1603

श्रीगणेशायनमः

अथमनुसंहितायाः सूचीपत्रम्. अध्यायश्लोकसंख्याक्रमेण.

श्रीसरस्वत्यैनमः

त्रा॰

सूची
१

॥इतिमनुसंहितायाःसूचीपत्रंसमाप्तम्॥

अथसटीकमनुस्मृतिप्रारंभः

श्रीगणेशायनमः ओंनमोभगवतेवासुदेवाय गौडेनंदनवासिनाम्निसुजनैर्वंद्येवरेंद्यांकुलेश्रीमद्भट्टदिवाकरस्यतनयःकुल्लूकभट्टोऽभवत् काश्यामुत्तरवाहिजन्हुतनयातीरेसमंपंडितैस्तेनेयंक्रियतेहितायविदुषांमन्वर्थमुक्तावली १ सर्वज्ञस्यमनोरसर्वविदपिव्याख्यामियद्वाङ्मयंयुक्त्यातद्बहुभिर्यतोमुनिवरैरेतद्बहुव्याहृतम् तांव्याख्यामधुनातनैरपिकृतांन्याय्यांब्रुवाणस्यमेभक्त्यामानववाङ्मयेभवभिदेभूयादशेषेश्वरः २ मीमांसेबहुसेवितासिसुहृदस्तर्काःसमस्ताःस्थमेवेदांताःपरमात्मबोधगुरवोयूयंमयोपासिताः जाताव्याकरणानिबालसखितासुधाभिरभ्यर्थयेप्राप्तोयंसमयोमनूक्तविवृतौसाहाय्यमालंब्यताम् ३ द्वेषादिदोषरहितस्यसतांहितायमन्वर्थतत्त्वकथनायममोद्यतस्य दैवाद्यदिक्वचिदिहस्खलनंतथापिनिस्तारकोभवतुमेजगदंतरात्मा ४ मानववृत्तावस्यांज्ञेयाव्याख्यानवामयोऽभिन्नाप्राचीनाअपिरुचिराव्याख्यानृणामशेषाणाम् ५ मनुमेकाग्रमासीनमित्यादि अत्रमहर्षीणांधर्मविषयप्रश्नेमनोःश्रूयतामित्युत्तरदानपर्यंतश्लोकचतुष्टयेनैतस्यशास्त्रस्यप्रेक्षावत्प्रवृत्त्युपयुक्तानिविषयसंबंधप्रयोजनान्युक्तानि तत्रधर्मएवविषयस्तेनसहवचनसंदर्भरूपस्यमानवशास्त्रस्यप्रतिपाद्यप्रतिपादकलक्षणःसंबंधः प्रमाणांतरासन्निकृष्टस्यस्वर्गापवर्गादिसाधनस्यधर्मस्यशास्त्रैकगम्यत्वात् प्रयोजनंतुस्वर्गापवर्गादितस्यधर्माधीनत्वात् यद्यपिपत्न्युपगमनादिरूपः कामोप्यत्राभिहितस्तथापिऋतुकालाभिगामीस्यात् स्वदारनिरतःसदेतिऋतुकालादिनियमेनसोपिधर्मएव एवंचार्थार्जनमपिऋतामृताभ्यांजीवेत्तेत्यादिनियमेनधर्मएवेत्यवगंतव्यम् मोक्षोपायत्वेनाभिहितस्यात्मज्ञानस्यापिधर्मत्वाद्धर्मविषयत्वंमोक्षोपदेशकत्वंचास्यशास्त्रस्योपपन्नम् पौरुषेयत्वेपिमनुवाक्यानामविगीतमहाजनपरिग्रहात्श्रुत्युपग्रहाच्चवेदमूलकतयाप्रामाण्यंतथाचछांदोग्यब्राह्मणेश्रूयते मनुर्वैयत्किंचिदवदत्तद्भेषजंभेषजतायाइति बृहस्पतिरप्याह वेदार्थोपनिबंधत्वात्प्राधान्यंहिमनोःस्मृतम् मन्वर्थविपरीतातुयास्मृतिःसानशस्यते तावच्छास्त्राणिशोभंतेतर्कव्याकरणानिच धर्मार्थमोक्षोपदेशमनुर्यावन्नदृश्यते महाभारतेप्युक्तम् पुराणंमानवोधर्मःसांगोवेदश्चिकित्सितम् आज्ञासिद्धानिचत्वारिनहंतव्यानिहेतुभिः विरोधिबौद्धादितर्कैर्नहंतव्यानि अनुकूलस्तुमीमांसादितर्कःप्रवर्त्तनीयएव अतएववक्ष्यति आर्षंधर्मोपदेशंचवेदशास्त्राविरोधिना यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरइति सकलवेदार्थाभिज्ञत्वान्मनुंमहर्षयइदंद्वितीयश्लोकवाक्यरूपंउच्यतेअनेनेतिवचनमब्रुवन् श्लोकस्यादौ

श्रीकृष्णायनमः मनुमेकाग्रमासीनमभिगम्यमहर्षयः प्रतिपूज्ययथान्यायमिदंवचनमब्रुवन् १

मनुनिर्देशोमंगलार्थःपरमात्मनएवसंसारस्थितयेसार्वज्ञैश्वर्यादिसंपन्नमनुरूपेणप्रादुर्भूतत्वात् तदभिधानस्यमंगलातिशयत्वात् वक्ष्यतिहि एतमेकेवदंत्यग्निंमनुमन्येप्रजापतिमिति एकाग्रंविषयांतराव्याक्षिप्तचित्तंआसीनंसुखोपविष्टंईदृशस्यैवमहर्षिप्रश्नोत्तरदानयोर्योग्यत्वात् अभिगम्यअभिमुखंगत्वामहर्षयोमहांतश्चतेऋषयश्चेतितथाप्रतिपूज्यपूजयित्वा यद्वामनुनापूर्वंस्वागतासनदानादिनापूजितास्तस्यपूजाकृतेतिप्रतिशब्दादुन्नीयते यथान्यायंयेनन्यायेनविधानेनप्रश्नःकर्तुंयुज्यतेप्रणतिभक्तिश्रद्धातिशयादिना वक्ष्यतिच नापृष्टःकस्यचिद्ब्रूयान्नचान्यायेनपृच्छतइति अभिगम्यप्रतिपूज्यअब्रुवन्निति क्रियात्रयेपिमनुमित्येवकर्मअब्रुवन्नित्यत्राकथितकर्मता ब्रुविधातोर्द्विकर्मकत्वात् १ किमब्रुवन्नित्यपेक्षायामाह भगवन्नित्यादि ऐश्वर्यादीनांभगशब्दोवाचकः तदुक्तंविष्णुपुराणे ऐश्वर्यस्यसमग्रस्यवीर्यस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणा मनुवंतेनसंबोधनंभगवन्निति वर्णाब्राह्मणक्षत्रियवैश्यशूद्राः सर्वेचतेवर्णाश्चेतिसर्ववर्णाः तेषामंतरप्रभवानांचसंकीर्णजातीनांचापिअनुलोमप्रतिलोमजातानांअंबष्ठक्षत्तृकरणप्रभृतीनांतेषांविजाते

भगवन्सर्ववर्णानांयथावदनुपूर्वशः अंतरप्रभवानांचधर्मान्नोवक्तुमर्हसि २ त्वमेकोह्यस्यसर्वस्यवि
धानस्यस्वयंभुवः अचिंत्यस्याप्रमेयस्यकार्यतत्त्वार्थवित्प्रभो ३

यमैथुनसंभवत्वेनखरतुरगीयसंपर्कोज्जाताश्वतरवज्जात्यंतरत्वाद्वर्णशब्देनाग्रहणात्पृथक्प्रश्नः एतेनास्यशास्त्रस्यसर्वोपकारकत्वंदर्शितम् यथावत् योधर्मोयस्यवर्णस्ययेनप्रकारेणार्हतीत्यनेनाश्रमधर्मादीनामपिप्रश्नः अनुपूर्वशःक्रमेणजातकर्मतदनुनामधेयमित्यादिनाधर्मान्नोऽस्मभ्यंवक्तुमर्हसिसर्वधर्माभिधानेयोग्योभवसितस्माद्ब्रूहीत्यध्येषणमध्याहार्यम् यत्तुब्रह्महत्यादिरूपाधर्मकीर्तनमप्यत्रतत्प्रायश्चित्तविधिरूपधर्मविषयत्वेननस्वतंत्रंतथा २ सकलधर्माभिधानयोग्यत्वेहेतुमाह त्वमेकइत्यादि हिशब्दोहेतौयस्मात्त्वमेकोऽद्वितीयः अस्यसर्वस्यप्रत्यक्षश्रुतस्यस्मृत्याद्यनुमेयस्यचविधानस्यविधीयंतेऽनेनकर्माण्यग्निहोत्रादीनिइतिविधानंवेदस्तस्यस्वयंभुवोऽपौरुषेयस्याचिंत्यस्यबहुशाखाविभिन्नत्वादियत्तयापरिच्छेत्तुमयोग्यस्य अप्रमेयस्यमीमांसादिन्यायनिरपेक्षतयाऽनवगम्यमानप्रमेयस्य कार्यमनुष्ठेयमग्निष्टोमादि तत्त्वंब्रह्म सत्यंज्ञानमनंतंब्रह्मेत्यादिवेदांतवेद्यम् तदेवार्थःप्रतिपाद्यभागस्तंवेत्तीतिकार्यतत्त्वार्थवित् मेधातिथिस्तुकर्ममीमांसावासनयावेदस्यकार्यमेवतत्त्वरूपोऽर्थ

स्त्वंवेत्तीतिकार्यतत्त्वार्थविदितिव्याचष्टे तन्न वेदानांब्रह्मण्यपिप्रामाण्याभ्युपगमात्कार्यमेवतत्स्वरूपोऽर्थः धर्माधर्मव्यवस्थापनस मर्थत्वात्प्रभोइतिसंबोधनम् ३ सतैः पृष्टस्तथासम्यगित्यादि समनुनैर्महर्षिभिस्तथातेनप्रकारेणपूर्वोक्तेनन्यायेनप्रणतिभक्तिश्रद्धा तिशयादिना पृष्टस्तान्सम्यक्यथातत्त्वंप्रत्युवाचश्रूयतामित्युपक्रम्य अमितमपरिच्छेद्यमोजः सामर्थ्यंज्ञानतत्त्वाभिधानादौयस्यसतथा अतएवसर्वज्ञसर्वशक्तितयामहर्षीणामपिप्रश्नविषयः महात्मभिर्महानुभावैः आर्च्यपूजयित्वा आङ्पूर्वस्यार्चतेर्ल्यबंतस्यरूपमिदम् धर्मस्याभिधानमपिपूजनपुरःसरमेवकर्त्तव्यमित्यनेनफलितम् ननुमनुप्रणीतत्वेअस्यशास्त्रस्यसपृष्टः प्रत्युवाचइतिनयुक्तम् अहं पृष्टोब्रवीमीतियुज्यते अन्यप्रणीतत्वेचकथंमानवीयसंहितेति उच्यतेप्रायेणाचार्याणामियंशैलीयत्स्वाभिप्रायमपिपरोपदेशमिवव र्णयंति अतएवकर्माण्यपिजैमिनिः फलार्थत्वादितिजैमिनेरेवसूत्रं अतएवतदुपर्यपिबादरायणःसंभवादितिबादरायणस्यैवशारीर कसूत्रम् अथवामनूपदिष्टधर्मात्तच्छिष्येण भृगुणातदाज्ञयोपनिबद्धः अतएवचस्यातिएतद्वोयंभृगुः शास्त्रंश्रावयिष्यत्यशेषतइत्य

सतैः पृष्टस्तथासम्यगमितौजामहात्मभिः प्रत्युवाचार्च्यतान्सर्वान्महर्षीञ्छ्रूयतामिति ४
आसीदिदंतमोभूतमप्रज्ञातमलक्षणम्

तोयुज्यतएवसपृष्टः प्रत्युवाचइति मनूपदिष्टधर्मोपनिबद्धत्वाच्चमान वीयसंहितेतिव्यपदेशः ४ श्रूयतामितिउपक्षिप्तमर्थमाह आसीदिदमिति ननुमुनीनांधर्मविषयप्रश्नेतत्रैवोत्तरंदातुमुचितं तत्कोयमप्रस्तुतः प्रलयदशायांकारणलीनस्यजगतःसृष्टिप्रकरणावतारः अत्रमेधातिथिःसमादधे शास्त्रस्यमहाप्रयोजनत्व मनेनसर्वेणप्रतिपाद्यते ब्रह्माद्याःस्थावरपर्यंताः संसारगतयोधर्माधर्मनिमित्ताअत्रप्रतिपाद्यंते तमसाबहुरूपेणवेष्टिताः कर्महेतुने तिचवक्ष्यतिच एताहष्ट्वास्यजीवस्यगतीःस्वेनैवचेतसा धर्मतोऽधर्मतश्चैवधर्मेदद्यात्सदामनइति ततश्चनिरतिशयैश्वर्यहेतुर्धर्म स्तद्विपरीतश्चाधर्मः तद्रूपपरिज्ञानार्थमिदंशास्त्रंमहाप्रयोजनमध्येतव्यमित्याद्याध्यायतात्पर्यमित्यंतेन गोविंदराजस्यापीदमेवसमा धानम् नैतन्मनोहरम् धर्मस्वरूपप्रश्नेपद्धर्मस्यफलकीर्त्तनंतदप्यप्रस्तुतम् धर्मोक्तिमात्राद्धिशास्त्रमर्थवत् किंचकर्मणांफलनिर्दे शंसेत्यक्तेमहर्षिभिः द्वादशेवक्ष्यमाणासांवत्सुमादौनयुज्यते इदंतुवदामः मुनीनांधर्मविषयेप्रश्नेजगत्कारणतयाब्रह्मप्रतिपा

दनंधर्मकथनमेवेतिनावस्तुनाभिधानम् आत्मज्ञानस्यापिधर्मरूपत्वान्मनुनैव धृतिःक्षमादमोस्तेयंशौचमिंद्रियनिग्रहः धीर्विद्या
सत्यमक्रोधोदशकंधर्मलक्षणमितिदशविधधर्माभिधानेविद्याशब्दवाच्यमात्मज्ञानंधर्मत्वेनोक्तम् महाभारतेपि आत्मज्ञानंतिति
क्षाचधर्मःसाधारणोनृपेत्यात्मज्ञानंधर्मत्वेनोक्तम् याज्ञवल्क्येनतुपरमधर्मत्वेनयदाह इज्याचारदमाहिंसादानंस्वाध्यायकर्मच अयं
तुंपरमोधर्मोयद्योगेनात्मदर्शनमिति जगत्कारणत्वंचब्रह्मलक्षणंअतएवब्रह्ममीमांसायांअथातोब्रह्मजिज्ञासेतिसूत्रानंतरंब्र-
ह्मलक्षणकथनायजन्माद्यस्ययतइतिद्वितीयसूत्रंभगवान्बादरायणःप्रणिनायास्यजगतोयतोजन्मादिसृष्टिस्थितिप्रलयमितिसू
त्रार्थः तथाचश्रुतिः यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेतिप्राधान्येनजग
दुत्पत्तिस्थितिलयनिमित्तोपादानब्रह्मप्रतिपादनंआत्मज्ञानरूपपरमधर्मावगमायप्रथमाध्यायंकृत्वासंस्कारादिरूपंधर्मंतदंगत-
याद्वितीयाध्यायादिक्रमेणवक्ष्यतीतिनकश्चिद्विरोधः किंचप्रश्नोत्तरवाक्यानामेवस्वरसादयंमदुक्तोऽर्थोलभ्यतेतथाहि धर्मेपृष्टे

अप्रतर्क्यमविज्ञेयंप्रसुप्तमिवसर्वतः ५

मनुर्ब्रह्मजगतःकारणंब्रुवन् आत्मज्ञानंपरंधर्मंविवेतेतिव्यक्तमुक्तवान् प्राधान्यात्प्रथमाध्यायेसाधुतस्यैवकीर्त्तनम् धर्मोन्यस्तुत
दंगत्वात्सुक्तोवक्तुमनंतरम् इदमित्यध्यक्षेणसर्वस्यप्रतिभासमानत्वात् जगन्निर्दिश्यतेइदंजगत्तमोभूतंतमसिस्थितंलीनमासीत्त
मःशब्देनगुणवृत्त्याप्रकृतिर्निर्दिश्यतेतमइवतमः यथातमसिलीनाःपदार्थाः अध्यक्षेणनप्रकाश्यंतेएवंप्रकृतिलीनाअपिभावाना
वगम्यंतेइतिगुणयोगःप्रलयकालेसूक्ष्मरूपतयाप्रकृतौलीनमासीदित्यर्थः तथाचश्रुतिः तमआसीत्तमसागूढमग्रइति प्रकृतिरपि
ब्रह्मात्मनाअव्याकृतासीत् अतएवअप्रज्ञातमप्रत्यक्षंसकलप्रमाणश्रेष्ठतयाप्रत्यक्षगोचरःप्रज्ञातइत्युच्यतेतन्नभवतीत्यप्रज्ञातंअ
लक्षणमननुमेयंलक्ष्यतेऽनेनेतिलक्षणंलिंगंतदस्यनास्तीतिअलक्षणंअप्रतर्क्यंतर्कयितुमशक्यंतदानींवाचकस्थूलशब्दाभावात्
शब्दतोप्यविज्ञेयंएतदेवचप्रमाणत्रयंसतर्कंद्वादशाध्यायेमनुनाभ्युपगतंअतएवाविज्ञेयमित्यर्थापत्त्याद्यगोचरमितिधरणीधरस्या
पिव्याख्यानम् नचनासीदेवेतिवाच्यंतदानींश्रुतिसिद्धत्वात् तथाचश्रूयते तद्धेदंतर्ह्यव्याकृतमासीच्छांदोग्योपनिषच्चसदेवसो

२

म्येदमग्र आसीदिदंजगत्सदेवासीद्ब्रह्मात्मनाआसीदित्यर्थः सच्छब्दोब्रह्मवाचकः अतएवप्रकृष्टमिवसर्वतः प्रथमार्थेतसिः स्वकार्याक्षमामित्यर्थः ५ अथकिमभूदित्याह ततःस्वयंभूर्भगवानित्यादि ततःप्रलयावसानानंतरंस्वयंभूः परमात्मास्वयंभवतिस्वेच्छयाशरीरपरिग्रहंकरोतिनत्वितरजीववत् कर्मायत्तदेहः तथाचश्रुतिः सएकधाभवतिद्विधाभवतीतिभगवानैश्वर्यादिसंपन्नः अव्यक्तोबाह्यकरणागोचरः योगाभ्यासावसेयइतियावत् इदंमहाभूतादिआकाशादीनिमहाभूतानिआदिग्रहणात्महदादीनिचव्यंजयन् अव्यक्तावस्थंप्रथमंसूक्ष्मरूपेणततःस्थूलरूपेणप्रकाशयन्वृत्तौजाः वृत्तमप्रतिहतमुच्यते अतएवत्वृत्तिसर्गतापनेषुक्रमइत्यत्रवृत्तिरप्रतिघातइतिव्याख्यातंजयादित्येन वृत्तमप्रतिहतमोजःसृष्टिसामर्थ्यंयस्यसतथा तमोनुदः प्रकृतिप्रेरकः तदुक्तंभगवद्गीतायाम् मयाध्यक्षेणप्रकृतिःसूयतेसचराचरमिति प्रादुरासीत्प्रकाशितोबभूवतमोनुदः प्रलयावस्थाध्वंसकइतितुमेधातिथिगोविंदराजौ ६ योसाविति

ततःस्वयंभूर्भगवानव्यक्तोव्यंजयन्निदम् महाभूतादिवृत्तौजाःप्रादुरासीत्तमोनुदः ६ योसावतींद्रियग्राह्यःसूक्ष्मोऽव्यक्तःसनातनः सर्वभूतमयोचिंत्यः सएवस्वयमुद्बभौ ७ सोभिध्यायशरीरात्स्वात्सिसृक्षुर्विविधाःप्रजाः अपएवससर्जादौतासुबीजमवासृजत् ८

योसाविनिसर्वनामद्वयेनसकललोकवेदपुराणेतिहासादिप्रसिद्धंपरमात्मानंनिर्दिशति अतींद्रियग्राह्यःइंद्रियमतीत्यवर्त्ततइत्यतींद्रियंमनस्तद्ग्राह्यइत्यर्थः यदाहव्यासः नैवासौचक्षुषाग्राह्योनचशिष्टैरपींद्रियैः मनसातुप्रसन्नेनगृह्यतेसूक्ष्मदर्शिभिः सूक्ष्मोबाह्येंद्रियागोचरः अव्यक्तोव्यक्तिरवयवः तद्रहितःसनातनोनित्यःसर्वभूतमयः सर्वभूतात्मा अतएवाचिंत्यः इयत्तयापरिच्छेत्तुमशक्यः सएवस्वयंउद्बभौमहदादिकार्यरूपतयाप्रादुर्बभूवउत्पूर्वोभातिःप्रादुर्भाववर्त्ततेधातूनामनेकार्थत्वात् ७ सोभिध्यायेति सपरमात्मानानाविधाःप्रजाःसिसृक्षुरभिध्यायापोजायंतामित्यभिध्यानमात्रेणापएवससर्ज अभिध्यानपूर्विकांसृष्टिंवदतोमनोःप्रकृतिरेवाचेतनाऽस्वतंत्रापरिणमतइत्ययंपक्षोनसंमतः किंत्वब्रह्मैवाव्याकृतशक्त्यात्मनाजगत्कारणमितित्रिदंडिवेदांतसिद्धांतएवाभिमतःप्रतिभातितथाचछांदोग्योपनिषत् तदैक्षतबहुस्यांप्रजायेयेति अतएवशारीरकसूत्रकृताव्यासेनसिद्धांतितम् ईक्षतेर्नाशब्दमिति ईक्षतेरीक्षणश्रवणात्नप्रधानंजगत्कारणंअशब्दंनविद्यतेशब्दःश्रुतिर्यस्यतदशब्दमितिसूत्रार्थः स्वाच्छरीरात् अव्याकृतरूपात् अव्याकृतमेवभगवद्भास्करीयवेदांतदर्शनेप्रकृतिस्तदेव

तस्यचशरीरंअव्याकृतशब्देनपंचभूतबुद्धींद्रियकर्मेंद्रियप्राणमनःकर्मविद्यावासनाएवसूक्ष्मरूपतयाशक्त्यात्मनोस्थिताअभिधीयं
तेअव्याकृतस्यचब्रह्मणासहभेदाभेदस्वीकारात् ब्रह्माद्वैतंशक्त्यात्मनाचब्रह्मजगद्रूपतयापरिणमतइत्युभयमप्युपपद्यतेआदौ
स्वकार्यभूमिब्रह्मांडसृष्टेःप्राक् अपांसृष्टिश्चेयंमहदहंकारतन्मात्रक्रमेणबोद्धव्यामहाभूतादिव्यंजयन्नितिपूर्वाभिधानात् अनंतर
मपिमहदादिसृष्टेर्वक्ष्यमाणत्वात् तास्वप्सुबीजंशक्तिरूपंआरोपितवान् ८ तदंडमभवद्धैममिति तद्बीजंपरमेश्वरेच्छयाहैममंडम
भवत्हैममिवहैमंशुद्धिगुणयोगात्नतुहैममेवतदीयैकशकलेनभूमिनिर्माणस्यवक्ष्यमाणत्वात् भूमेश्चाहैमत्वस्यप्रत्यक्षत्वादुपचा
राश्रयणम् सहस्रांशुरादित्यस्तत्तुल्यप्रभंतस्मिन्नंडेहिरण्यगर्भोजातवान्येनपूर्वजन्मनिहिरण्यगर्भोहमस्मीतिभेदाभेदभावनयाप
रमेश्वरोपासनाकृतातदीयंलिंगशरीरावच्छिन्नजीवमनुप्रविश्यस्वयंपरमात्मैवहिरण्यगर्भरूपतयाप्रादुर्भूतःसर्वलोकानांपितामहो-
जनकःसर्वलोकपितामहइतिवातस्यनाम ९ इदानीमागमप्रसिद्धनारायणशब्दार्थनिर्वचनेनउक्तमेवार्थंद्रढयतिआपोनाराइत्यादि

तदंडमभवद्धैमंसहस्रांशुसमप्रभम् तस्मिन्जज्ञेस्वयंब्रह्मासर्वलोकपितामहः ९ आपोनाराइतिप्रो
क्ताआपोवैनरसूनवः तायदस्यायनंपूर्वंतेननारायणःस्मृतः १० यत्तत्कारणमव्यक्तंनित्यंसदसदात्म
कम् तद्विसृष्टःसपुरुषोलोकेब्रह्मेतिकीर्त्यते ११

आपोनाराशब्देनोच्यंतेअप्सुनाराशब्दस्याप्रसिद्धेस्तदर्थमाहयतस्ता
नरारव्यस्यपरमात्मनःसूनवोऽपत्यानितस्येदमित्यण्प्रत्ययःयद्यपिअणिकृतेङीप्प्रत्ययःप्राप्तस्तथापिछांदसलक्षणैरपिस्मृतिषुव्यव-
हारात्सर्वेविधयश्छंदसिविकल्प्यंतइतिपाक्षिकोङीप्प्रत्ययस्तस्याभावपक्षेसामान्यलक्षणप्राप्तेटापिकृतेनाराइतिरूपसिद्धिःआपोऽ
स्यपरमात्मनोब्रह्मरूपेणावस्थितस्यपूर्वमयनमाश्रयंइत्यसौनारायणइत्यागमेषाम्नातः गोविंदराजेनतुआपोनराइतिपठितंव्याख्यातं
चनरायणइतिप्राप्तेअन्येषामपिदृश्यतइतिदीर्घत्वेननारायणइतिरूपम् अन्येत्वापोनाराइतिपठंति १० यत्तत्कारणमव्यक्तमित्यादि
यत्तदितिसर्वनामभ्यांलोकवेदादिसर्वप्रसिद्धंपरमात्मानंनिर्दिशतिकारणंसर्वोत्पत्तिमतांअव्यक्तंबहिरिंद्रियागोचरंनित्यंउत्पत्तिविनाशर
हितंवेदांतसिद्धत्वात् सत्स्वभावम् प्रत्यक्षाद्यगोचरत्वात् असत्स्वभावमिव अथवासद्भावजातमसद्भावःतयोरात्मभूतम् तथाचश्रुतिः

ऐतंदात्म्यमिदंसर्वमिति तद्दिसृष्टस्तेनोत्पादितःसपुरुषःसर्वत्रब्रह्मेतिकीर्त्यते ११ तस्मिन्नंडेसभगवानित्यादि तस्मिन्पूर्वोक्तेअंडेसब्र
ह्मावक्ष्यमाणब्रह्ममानेनसंवत्सरमुषित्वास्थित्वाआत्मनैवांडंद्विधाभवत्वितिआत्मगतध्यानमात्रेणतदंडंद्विखंडंकृतवान् १२ नाभ्यां
सशकलाभ्यांचेत्यादि शकलंखंडंताभ्यामंडशकलाभ्यांउत्तरेणदिवंस्वर्लोकंअधरेणभूलोकंउभयोर्मध्येआकाशंदिशश्चाष्टौनराउदि-
भिःसहापांस्समुद्राख्यंअपांस्थानंस्थिरंनिर्मितवान् १३ इदानींमहदादिक्रमेणैवजगन्निर्माणमितिदर्शयितुंतत्तत्सृष्टिमाह उद्बब
र्हात्मनश्चैवेत्यादि ब्रह्माआत्मनः परमात्मनःसकाशात्तेनरूपेणमनउद्धृतवान्परमात्मनएवब्रह्मस्वरूपेणोत्पन्नत्वात्परमात्मनएवचम
नःसृष्टिर्वेदांतदर्शनेनप्रधानात् तथाचश्रुतिः एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच खंवायुर्ज्योतिरापश्चपृथ्वीविश्वस्यधारिणी
मनश्चश्रुतिसिद्धत्वात् युगपज्ज्ञानानुत्पत्तिलिंगाच्चसत् अप्रत्यक्षत्वादसदितिमनसः पूर्वमहंकारतत्वं अहमित्यभिमानाख्यकार्यम्

तस्मिन्नंडेसभगवानुषित्वापरिवत्सरम् स्वयमेवात्मनोध्यानात्तदंडमकरोद्द्विधा १२ ताभ्यांसशकला
भ्यांचदिवंभूमिंचनिर्ममे मध्येव्योमदिशश्चाष्टावपांस्थानंचशाश्वतम् १३ उद्बबर्हात्मनश्चैवमनःस
दसदात्मकम् मनसश्चाप्यहंकारमभिमंतारमीश्वरम् १४ महांतमेवचात्मानंसर्वाणित्रिगुणानिच

क्तंईश्वरंस्वकार्यकरणक्षमम् १४ महांतमेवचात्मानमित्यादि महांतमितिमहदाख्यतत्वंअहंकारात्पूर्वंपरमात्मनएवाव्याकृतशक्ति
रूपप्रकृतिसहितादुद्धृतवान् आत्मनउत्पन्नत्वात् आत्मानमात्मोपकारकत्वात्तद्यान्यभिहितानिअभिधास्यंतेचतान्युत्पत्तिमंतिस
र्वाणिसत्त्वरजस्तमोगुणयुक्तानि विषयाणांशब्दस्पर्शरूपरसगंधानांग्राहकाणिशनैःक्रमेणवेदांतसिद्धेनश्रोत्रादीनिद्वितीयाध्या
यवक्ष्यमाणानिपंचबुद्धींद्रियाणिचशब्दात्तंचपाय्वादीनिकर्मेंद्रियाणिशब्दतन्मात्रादीनिचपंचोत्पादितवान् नन्वभिध्यानपूर्वकसृ-
ष्ट्यभिधानाद्वेदांतसिद्धांतएवमनोरभिमतइतिप्रागुक्तंतत्रसंगच्छते इदानींमहदादिक्रमेणसृष्ट्यभिधानाद्वेदांतदर्शनेनचपरमात्म
नएवाकाशादिक्रमेणसृष्टिरुक्तातथाचतैत्तिरीयोपनिषत् तस्माद्वाएतस्मादात्मनआकाशःसंभूतः आकाशाद्वायुः वायोरग्निःअग्ने
रापअद्भ्यः पृथिवीति इष्यते प्रकृतितोमहदादिक्रमेणसृष्टिरितिभगवद्भास्करीयदर्शनेप्युपपद्यतइतितद्विदोव्याचक्षते अव्याकृ

नमेवप्रकृतिरिष्यते नैतस्य च सृष्ट्युन्मुखत्वं सृष्ट्याद्यकालयोगरूपं तदेव महत्त्वं ततो बहु स्यामिति अभिमानात्मके क्षणकालयोगिल मव्याकृतस्याहंकारतत्त्वम् तत आकाशादिपंचभूतसूक्ष्माणि क्रमेणोत्पन्नानि पंचतन्मात्राणि ततस्तेभ्य एव स्थूलान्युत्पन्नानि पंचम हाभूतानि सूक्ष्मस्थूलक्रमेणैव कार्योदयदर्शनादिति न विरोधः अव्याकृतगुणत्वेपि सत्त्वरजस्तमसां सर्वाणि त्रिगुणानीत्युपपद्यते भ वतु वा सत्त्वरजस्तमसः समतारूपैव मूलप्रकृतिः भवंतु च तत्त्वांतराण्येवमहदहंकारतन्मात्राणि तथापि प्रकृतिर्ब्रह्मणोऽनन्येति मनोः स्व रसः यतो वक्ष्यति सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनीति तथा एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना ससर्वसमतामेत्य ब्रह्मा भ्येति परं पदमिति १५ तेषां त्ववयवान्सूक्ष्मानित्यादि तेषां षण्णां पूर्वोक्ताहंकारस्य तन्मात्राणां च ये सूक्ष्मा अवयवास्तान् आत्ममा सु षण्णां स्वविकारेषु योजयित्वा मनुष्यतिर्यक्स्थावरादीनि सर्वभूतानि परमात्मा निर्मितवान् तत्र तन्मात्राणां विकारः पंचमहाभूतानि अहंकारस्येंद्रियाणि पृथिव्यादिभूतेषु शरीररूपतया परिणतेषु तन्मात्राहंकारयोजनां कृत्वा सकलस्य कार्यजातस्य निर्माणं अत एवामि-

विषयाणां ग्रहीतॄणि शनैः पंचेंद्रियाणि च १५ तेषां त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसाम् सन्नि वेश्यात्ममात्रासु सर्वभूतानि निर्ममे १६ यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयंति षट् तस्माच्छरीरमि त्याहुस्तस्य मूर्तिं मनीषिणः १७

तौजसां अनंतकार्यनिर्माणेनातिवीर्यशालिनाम् १६ यन्मूर्त्यवयवाः सूक्ष्मा इत्यादि य स्मान्मूर्तिः शरीरं तत्संपादका अवयवाः सूक्ष्मास्तन्मात्राहंकाररूपाः षट् तस्य ब्रह्मणः सप्रकृतिकस्य इमानि वक्ष्यमाणानि भूतानींद्रिया णि च पूर्वोक्तानि कार्यत्वेनाश्रयंति तन्मात्रेभ्यो भूतोत्पत्तेः अहंकाराच्च इंद्रियोत्पत्तेः तथा च पठंति प्रकृतेर्महांस्ततो हंकारस्तस्माद्गणश्च षोडशकः तस्मादपि षोडशकात्संचभ्यः पंचभूतानि तस्मात्तस्य ब्रह्मणो या मूर्तिः स्वभावस्तां तथा परिणतामिंद्रियादिशालिनीं लोकाः शरीरमिति वदंति षडाश्रयणाच्छरीरमिति शरीरनिर्वचनेनानेन पूर्वोक्तोत्पत्तिक्रम एव दृढीकृतः १७ तदाविशंति भूतानीत्यादि तद्ब्रह्म सह कर्मभिः स्वकार्यैस्तत्राकाशस्यावकाशदानं कर्म वायोर्व्यूहनं विन्यासरूपं तेजसः पाकोऽपां संग्रहणं पिंडीकरणरूपं पृथिव्या

धारणं अहंकारात्मनावस्थितंब्रह्ममन आविशत्यहंकारादुत्पद्यतइत्यर्थः अवयवैःस्वकार्यैःशुभाशुभसंकल्पसुखदुःखादिरूपैःसू-
क्ष्मैर्बहिरिंद्रियागोचरैः सर्वभूतकृत्सर्वोत्पत्तिनिमित्तंमनोजन्यशुभाशुभकर्मप्रभवत्वाज्जगतः अव्ययमविनाशि १८ तेषामिदंतु
सप्तानामित्यादि तेषांपूर्वप्रकृतीनांमहदहंकारतन्मात्राणांसप्तसंख्यानांपुरुषादात्मनउत्पन्नत्वात् तद्वृत्तित्वाच्चपुरुषाणांमहौ
जसांस्वकार्यसंपादनेनवीर्यवतांसूक्ष्मायामूर्तिमात्राशरीरसंपादकभागास्ताभ्यइदंजगत्नश्वरंसंभवत्यनश्वरान्यत्कार्यंतद्वि
नाशिस्वकारणेलीयतेकारणंतुकार्यापेक्षयास्थिरंपरमकारणंतुब्रह्मनित्यमुपासनीयमित्येतद्दर्शयितुमयमनुवादः १९ आद्याद्य
स्यगुणंत्वेषामित्यादि एषामितिपूर्वतरश्लोकेतदाविशंतिभूतानीत्यत्रभूतानांपरामर्शः तेषांचाकाशादिक्रमेणोत्पत्तिक्रमः शब्दादि
गुणवत्ताचवक्ष्यते तत्राद्याद्यस्याकाशादेर्गुणंशब्दादिकंवाय्वादिःपरःपरःप्राप्नोति एतदेवस्पष्टयति योयइति एषांमध्येयोयो-
यावतांपूरणोयावतिथः वतोरिथुक्सद्वितीयादिः द्वितीयोद्विगुणः तृतीयस्त्रिगुणइत्येवमादिर्मन्वादिभिःस्मृतः एतेनैतदुक्तंभव

तदाविशंतिभूतानिमहांतिसहकर्मभिः मनश्चावयवैःसूक्ष्मैःसर्वभूतकृदव्ययम् १८ तेषामिदंतुसप्ता
नांपुरुषाणांमहौजसाम् सूक्ष्माभ्योमूर्तिमात्राभ्यःसंभवत्यव्ययाद्व्ययम् १९ आद्याद्यस्यगुणंत्वेषा
मवाप्नोतिपरःपरः योयोयावतिथश्चैषांससतावद्गुणःस्मृतः २० सर्वेषांतुसनामानिकर्माणिचपृथक्
पृथक् वेदशब्देभ्यएवादौपृथक्संस्थाश्चनिर्ममे २१

ति आकाशस्यशब्दोगुणःवायोः शब्दस्पर्शौतेजसः शब्दस्पर्शरू
पाणि अपांशब्दस्पर्शरूपरसाःभूमेःशब्दस्पर्शरूपरसगंधाः अत्रयद्यपिनित्यवीप्सयोर्भिन्नद्विर्वचनेनाद्यस्याद्यस्येतिप्राप्तंतथापिस्मृतीनां
छंदःसमानविषयत्वात्सुपांसुलुगितिप्रथमाद्यस्यसुपलुक्तेनाद्याद्यस्येतिरूपसिद्धिः २० सर्वेषांतुसनामानीत्यादिसपरमात्माहिरण्य
गर्भरूपेणावस्थितःसर्वेषांनामानिगोजातेर्गौरितिअश्वजातेरश्वइति कर्माणिब्राह्मणस्याध्ययनादीनि क्षत्रियस्यप्रजारक्षादीनिपृथक्
पृथक्यस्यपूर्वकल्पेयान्यभूवन् आदौसृष्ट्यादौवेदशब्देभ्यएवावगम्यनिर्मितवान् भगवताव्यासेनापिवेदमीमांसायांवेदपूर्विकैवजग-
त्सृष्टिर्व्युत्पादिता तथाचशारीरकसूत्रंशब्दइतिचेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां अस्यार्थः देवतानांविग्रहवत्त्वेवैदिकेव आदिशब्देदे
वतावाचिनिविरोधःस्यात् वेदस्यादिमत्वप्रसंगादितिनेन्नास्तिविरोधः कस्मादतःशब्दादेवजगतःप्रभवात्सत्तेःप्रलयकालेपिसूक्ष्मरूपे

टी॰ णपरमात्मनिवेदराशिःस्थितःसइहकल्पादौहिरण्यगर्भस्यपरमात्मनएवप्रथमदेहिमूर्त्तेर्मनस्यवस्थांतरमापन्नःसुप्तप्रबुद्धस्येवप्रा अ॰
दुर्भवनितेनप्रदीपस्थानीयेनसकलनरतिर्यगादिप्रविभक्तंजगत् अभिधेयमूलंनिर्मिमीते कथमिदंगम्यतेप्रत्यक्षानुमानाभ्यांश्रुतिस्मृतिभ्य ४
मित्यर्थः प्रत्यक्षंश्रुतिरनपेक्षत्वात् अनुमानंस्मृतिरनुमीयमानश्रुतिसापेक्षत्वात् तथाचश्रुतिः एतइतिवैप्रजापतिर्देवान्सृजतासृजद
ग्रइतिमनुष्यानिंदवइतिपितॄन्तिरःपवित्रमितिग्रहानाशवइतिस्तोत्रंविश्वानीतिशास्त्रमितिसौभगेत्यन्याःप्रजाः स्मृतिस्तुसर्वेषांतुस
नामानीत्यादिकामन्वादिप्रणीताएवपृथक्संस्थाश्चेतिलौकिकीश्चव्यवस्थाः कुलालस्यघटनिर्माणंकुविंदस्यपटनिर्माणमित्यादिकाविभा
गेननिर्मितवान् २१ कर्मात्मनांचदेवानामित्यादि सब्रह्मादेवानांगणमसृजत् प्राणिनामिंद्रादीनांकर्माणिआत्मास्वभावोयेषांतेषामप्रा-
णिनांचग्रावादीनांदेवानांसाध्यानांचदेवविशेषाणांसमूहंयज्ञंचज्योतिष्टोमादिकंकल्पांतरेप्यनुमीयमानत्वान्नित्यंसाध्यानांचगणस्यपृ

कर्मात्मनांचदेवानांसोऽसृजत्प्राणिनांप्रभुः साध्यानांचगणंसूक्ष्मंयज्ञंचैवसनातनम् २२ अग्निवायुरविभ्य स्तुत्रयंब्रह्मसनातनम् दुदोहयज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् २३ कालंकालविभक्तीश्चनक्षत्राणि ग्रहांस्तथा सरितःसागरान्शैलान्समानिविषमाणिच २४ तपोवाचंरतिंचैवकामंचक्रोधमेवच सृष्टिंस सर्जचैवेमांस्रष्टुमिच्छन्निमाःप्रजाः २५

थग्वचनंसूक्ष्मत्वात् २२ अग्निवायुरविभ्यस्त्वित्यादि ब्रह्माऋग्यजुःसामसंज्ञंवेदत्रयं
अग्निवायुरविभ्यआकृष्टवान् सनातनंनित्यंवेदापौरुषेयत्वपक्षएवमनोरभिमतः पूर्वकल्पेयेवेदास्तएवपरमात्ममूर्त्तेर्ब्रह्मणःस्म
त्यारूढाः तानेवकल्पादौअग्निवायुरविभ्यआचकर्षश्रौतश्चायमर्थोनशंकनीयः तथाचश्रुतिः अग्नेर्ऋग्वेदोवायोर्यजुर्वेदआदित्यात्सा
मवेदइतिआकर्षणार्थत्वाद्दुहिधातोर्नाग्निवायुरवीणामकथितकर्मताकिंत्वपादानतैवयज्ञसिद्ध्यर्थंत्रयीसंपाद्यत्वात्यज्ञानांआपीनस्थक्षीरव
त् विद्यमानानामेववेदानामभिव्यक्तिप्रदर्शनार्थंआकर्षणवाचकोगौणोदुहिःप्रयुक्तः २३ कालंकालविभक्तीश्चेत्यादि अत्रससर्जेत्युत्तर-
श्लोकवर्त्तिनीक्रियासंबध्यतेआदित्यादिक्रियाप्रचयरूपंकालंकालविभक्तीर्मासर्त्वयनाद्याःनक्षत्राणि कृत्तिकादीनिग्रहान्सूर्यादीन् सरि-
तोनदीःसागरान् समुद्रान् शैलान्पर्वतान्समानिसमस्थानानिविषमाणिउच्चनीचरूपाणि २४ तपोवाचमित्यादि तपःप्राजापत्यादिवाचं ५

धाणींरतिंचेतः परितोषंकाममिच्छांक्रोधंचेतोविकारंइमांएतच्छ्लोकोक्तांपूर्वश्लोकोक्तांचसृष्टिंचकार सृज्यतइतिसृष्टिः कर्मणिक्तिन् इ
माःप्रजावक्ष्यमाणादेवादिकाःकर्तुमिच्छन् २५ कर्मणांचेति धर्मोयज्ञादिःसचकर्तव्यः अधर्मोब्रह्मवधादिःसनकर्त्तव्यःइतिकर्मणां
विभागायधर्माधर्मौव्यवेचयत् पृथक्त्वेनाभ्यधात् धर्मस्यफलंसुखं अधर्मस्यफलंदुःखंधर्माधर्मफलभूतैर्द्वंद्वैःपरस्परविरुद्धैःसुखदुः
खादिभिरिमाःप्रजाःयोजितवान् आदिग्रहणात् कामक्रोधरागद्वेषक्षुत्पिपासाशोकमोहादिभिः २६ अण्व्योमात्रेति दशार्द्धानांपंचा
नांमहाभूतानांयाःसूक्ष्माःपंचतन्मात्ररूपाविनाशिन्यः पंचमहाभूतरूपतयाविपरिणामिन्यः ताभिःसहउक्तंवक्ष्यमाणंचेदंसर्वमुत्पद्यते
अनुपूर्वशःक्रमेणसूक्ष्मात्स्थूलंस्थूलात्स्थूलतरमित्यनेनसर्वशक्तेर्ब्रह्मणोमानससृष्टिः कदाचित्तत्त्वनिरपेक्षास्यादितीमांशंकामपनि
नीषन्तद्द्वारेणैवेयंसृष्टिरितिमध्येपुनःपूर्वोक्तंस्मारितवान् २७ यंतुकर्मणीति सप्रजापतिर्यंजातिविशेषंव्याघ्रादिकंयस्यांक्रियायांहि

कर्मणांचविवेकार्थंधर्माधर्मौव्यवेचयत् द्वंद्वैरयोजयच्चेमाःसुखदुःखादिभिःप्रजाः २६ अण्व्योमात्रा
विनाशिन्योदशार्द्धानांतुयाःस्मृताः ताभिःसार्द्धमिदंसर्वंसंभवत्यनुपूर्वशः २७ यंतुकर्मणियस्मिन्सन्य
युंक्तप्रथमंप्रभुः सतदेवस्वयंभेजेसृज्यमानःपुनःपुनः २८ हिंस्राहिंस्रेमृदुक्रूरेधर्माधर्मावृतानृते य
द्यस्यसोऽदधात्सर्गेतत्तस्यस्वयमाविशत् २९

रिणमारणादिकायांसृष्ट्यादौनियुक्तवान्सजातिविशेषःपुनःपुन
रपिसृज्यमानःस्वकर्मवशेनतदेवाचरितवान् एतेनप्राणिकर्मसापेक्षंप्रजापतेरुत्तमाधमजातिनिर्माणंनरागद्वेषाधीनमिति
दर्शितम् अतएववक्ष्यतियथाकर्मतपोयोगात्सृष्टंस्थावरजंगममिति २८ एतदेवप्रपंचयति हिंस्राहिंस्रेत्यादि हिंस्रंकर्म
सिंहादेःकरिमारणादिकंअहिंस्रंहरिणादेःमृदुदयाप्रधानंविप्रादेःक्रूरंक्षत्रियादेःधर्मोयथाब्रह्मचार्यादेःगुरुशुश्रूषादिः अध
र्मोयथातस्यैवमांसमैथुनसेवादिः ऋतंसत्यंतच्चप्रायेणदेवानां अनृतमसत्यंतदपिप्रायेणमनुष्याणांतथाचश्रुतिः सत्यवाचोदे
वाअनृतवाचोमनुष्याइतितेषांमध्येयत्कर्मसप्रजापतिःसर्गादौयस्याधारयत्सृष्ट्युत्तरकालमपिसतदेवकर्मप्राक्तनादृष्टवशा
त्स्वयमेवभेजे २९

अत्रदृष्टांतमाह यथ   यथावसंतादिऋतवऋतुचिन्हानिचूतमंजर्यादीनिऋतुपर्ययेस्वकार्यावसरेस्वयमेवप्राप्नुवंति तथादेहि-
नोपिहिंस्रादीनिकर्माणि ३० लोकानांत्विति भूलोकानांबाहुल्यार्थंमुखबाहूरुपादेभ्योब्राह्मणक्षत्रियवैश्यशूद्रान्यथाक्रमंनिर्मित
वान् ब्राह्मणादिभिःसायंप्रातरग्नावाहुतिःप्रक्षिप्तासूर्यमुपतिष्ठतेसूर्याद्वृष्टिः वृष्टेरन्नमन्नात् प्रजा बाहुल्यंवक्ष्यतिचअग्नौप्रास्ता
हुतिःसम्यगादित्यमित्यादिदैव्याचशक्त्याअथादित्योब्राह्मणादिनिर्माणंब्राह्मणोनविशंकनीयः श्रुतिसिद्धत्वात् तथाचश्रुतिः ब्राह्मणो
स्यमुखमासीदित्यादि ३१ द्विधाकृत्वेति सब्रह्मानिजदेहंद्विखंडंकृत्वा अर्द्धेनपुरुषोजातः अर्द्धेनस्त्रीतस्यांमैथुनधर्मेणविराट्संज्ञं
पुरुषंनिर्मितवान् श्रुतिश्चततोविराडजायतेति ३२ तपस्तप्त्वेति सविराट्तपोविधाययंनिर्मितवान्तंमांमनुंजानीत अस्यसर्वस्यजगतः

यथर्त्तुलिंगान्यृतवःस्वयमेवर्त्तुपर्यये स्वानिस्वान्यभिपद्यंतेतथाकर्माणिदेहिनः ३० लोकानांतुविवृद्ध्यर्थं
मुखबाहूरुपादतः ब्राह्मणंक्षत्रियंवैश्यंशूद्रंचनिरवर्त्तयत् ३१ द्विधाकृत्वात्मनोदेहमर्द्धेनपुरुषोभवत्
अर्द्धेननारीतस्यांसविराजमसृजत्प्रभुः ३२ तपस्तप्त्वासृजद्यंतुसस्वयंपुरुषोविराट् तंमांवित्तास्यसर्व-
स्यस्रष्टारंद्विजसत्तमाः ३३ अहंप्रजाःसिसृक्षुस्तुतपस्तप्त्वासुदुश्चरम् पतीन्प्रजानामसृजंमहर्षीनादि
तोदश ३४ मरीचिमत्र्यंगिरसौपुलस्त्यंपुलहंक्रतुम् प्रचेतसंवसिष्ठंचभृगुंनारदमेवच ३५ एतेमनूं
स्तुसप्तान्यानसृजन्भूरितेजसः देवान्देवनिकायांश्चमहर्षींश्चामितौजसः ३६

स्रष्टारंभोद्विजसत्तमाः एतेनस्वजन्मोत्कर्षसामर्थ्यातिशयावभिहितवान्लोकानांप्रत्ययितप्रत्ययार्थम् ३३ अहमिति अहंप्रजाःस्र
ष्टुमिच्छन्कृदुश्चरंतपस्तप्त्वादशप्रजापतीन्प्रथमंसृष्टवान्तैरपिप्रजानांसृज्यमानत्वात् ३४ मरीचिमित्यादि तएतेदशप्रजापतयो
नामतोनिर्दिष्टाः ३५ एतेमनूंस्त्विति एतेमरीच्यादयोदशभूरितेजसोबहुतेजसोअन्यान् सप्तापरिमिततेजस्कान् मनून्देवान् ब्रह्म
णासृष्टान्देवनिवासस्थानानिस्वर्गादीन्महर्षींश्चसृष्टवंतः मनुशब्दोयमधिकारवाचीचतुर्दशस्वमन्वंतरेषुयस्ययत्रसर्गाद्यधिकारः
सएतस्मिन्मन्वंतरेस्वायंभुवस्वारोचिषादिनामभिर्मनुरितिव्यपदिश्यते ३६

यक्षरक्षइति एतेऽसृजन्निति पूर्वस्यैवात्रानुषंगः उत्तरत्रच श्लोकद्वयेन यक्षो वैश्रवणस्तदनुचराश्च रक्षांसि रावणादीनि पिशाचास्तेभ्योऽपकृष्टा अशुचिमरुदेशनिवासिनः गंधर्वाश्चित्ररथादयः अप्सरस उर्वश्यादयः असुरा विरोचनादयः नागा वासुक्यादयः सर्पास्ततोऽपकृष्टाः अलगर्दादयः सुपर्णा गरुडादयः पितॄणामाज्यपादीनां गणः समूहः एषांच भेद इतिहासादिप्रसिद्धो नाध्यक्षादिगोचरः ३७ विद्युत इति मेघेषु दृश्यं दीर्घाकारं ज्योतिर्विद्युत् मेघादेव यज्ज्योतिर्वृक्षादिविनाशकं तदशनिः मेघाः प्रसिद्धाः रोहितं दंडाकारं नानावर्णं दिवि दृश्यते यज्ज्योतिस्तदेव वक्रमिंद्रधनुः उल्कारेखाकारमंतरिक्षात्पतज्ज्योतिर्निर्घातो भूम्यंतरिक्षगत उत्पातध्वनिः केतवः शिखावंति ज्योतींषि उत्पातरूपाणि अन्यानि ज्योतींषि ध्रुवागस्त्यादीनि नानाप्रकाराणि ३८ किन्नरानिति किन्नरा अश्वमुखा देवयोनयो नरविग्रहाः वानराः प्रसिद्धाः मत्स्या रोहितादयः विहंगमाः पक्षिणः पशवो गवाद्या मृगा हरिणाद्या व्यालाः सिंहाद्याः उभयतोदतः द्वे दंतपंक्ती येषां उत्तराधरे भवतः ३९ कृमिकीट इति कीटाः कृमिभ्यः किंचित्स्थूलाः पतंगाः शलभाः यूकादयः प्रसिद्धाः क्षुद्रजंतवः इत्यनेन एकवद्भावः स्थावरं वृक्षलतादिभेदेन विविधप्रकारम् ४० एवमेतैरिति एवमित्युक्तप्रकारेण एतैर्मरीच्यादिभिरिदं सर्वं स्थावरजंगमं सृष्टम् यथाकर्म यस्य जंतोर्यादृशं कर्म तदनुरूपं तस्य देवमनुष्यतिर्यगादियोनिषूत्पादनं मन्नियोगान्मदाज्ञया तपोयोगान्महत्तपः कृत्वा सर्वमेतद्यत्तपोऽधीनमिति दर्शितम् ४१ येषामित्यादि येषां पुनर्यादृशं कर्म इह संसारे पूर्वाचार्यैः कथितं यथौषध्यः फलपाकांता बहुपुष्पफलोपगाः ब्राह्मणादीनांचाध्ययनादि कर्म तत्तथैव वो युष्माकं वक्ष्यामि जन्मादिक्रमयोगंच ४२

यक्षरक्षःपिशाचांश्च गंधर्वाप्सरसोऽसुरान् नागान्सर्पान्सुपर्णांश्च पितॄणांच पृथग्गणान् ३७ विद्युतोऽशनिमेघांश्च रोहितेंद्रधनूंषि च उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च ३८ किन्नरान्वानरान्मत्स्यान्विविधांश्च विहंगमान् पशून्मृगान्मनुष्यांश्च व्यालांश्चोभयतोदतः ३९ कृमिकीटपतंगांश्च यूकामक्षिकमत्कुणम् सर्वंच दंशमशकं स्थावरंच पृथग्विधम् ४० एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः यथाकर्म तपोयोगात्सृष्टं स्थावरजंगमम् ४१ येषां तु यादृशं कर्म भूतानामिह कीर्त्तितम् तत्तथा वोऽभिधास्यामि क्रमयोगंच जन्मनि ४२

जरायुर्गर्भावरणचर्मतत्रमनुष्यादयः प्रादुर्भवंतिपश्चान्मुक्ताजायंतेएषामेवजन्मक्रमः प्रागुक्तोविवृतः दंतशब्दसमानार्थोदच्छब्दःप्रकृत्यंतरमस्तितस्येदंप्रथमाबहुवचनेरूपंउभयतोदतइति ४३ अंडजाःपक्षिणइति अंडआदौसंभवंतिततोजायंतइतिएषांजन्मक्रमः नक्रःकुंभीरःस्थलजानिकृकलासादीनिऔदकानिशंखादीनि ४४ स्वेदजमिति स्वेदःपार्थिवद्रव्याणांतापेनक्लेदः ततोदंशमशकादिर्जायते ऊष्मणश्चस्वेदहेतुतापादपिअन्यत् दंशादिसदृशंपुत्तिकापिपीलिकादिजायते ४५ उद्भिज्जाइति उद्भेदनमुद्भित् भावेक्विप्ततोजायंतेऊर्ध्वंबीजभूमिंचाभित्त्वेत्युद्भिज्जावृक्षाः तेचद्विधाः केचिद्बीजादेवजायंतेकेचित्कांडान्शाखाएवरोपितावृक्षतांयांति इदानींयेषांयादृशंकर्मतदुच्यते ओषध्यइति ओषध्योव्रीहियवादयःफलपाकेनैवनश्यंति बहुपुष्प-

पशावश्चमृगाश्चैवव्यालाश्चोभयतोदतः रक्षांसिचपिशाचाश्चमनुष्याश्चजरायुजाः ४३ अंडजाःपक्षिणःसर्पानक्रामत्स्याश्चकच्छपाः यानिचैवंप्रकाराणिस्थलजान्यौदकानिच ४४ स्वेदजंदंशमशकयूकामक्षिकमत्कुणम् ऊष्मणश्चोपजायतेयच्चान्यत्किंचिदीदृशम् ४५ उद्भिज्जाःस्थावराःसर्वेबीजकांडप्ररोहिणः ओषध्यःफलपाकांताबहुपुष्पफलोपगाः ४६ अपुष्पाःफलवंतोयेतेवनस्पतयःस्मृताः पुष्पिणःफलिनश्चैववृक्षास्तूभयतःस्मृताः ४७ गुच्छगुल्मंतुविविधंतथैवतृणजातयः बीजकांडरुहाण्येवप्रतानावल्ल्यएवच ४८

फलयुक्ताश्चभवंति ओषधिशब्दादेवकृदिकारादक्तिनइतिङीपादीर्घत्वेओषध्यइतिरूपम् ४६ अपुष्पाइति नास्यश्लोकस्याभिधानकोषवत् संज्ञासंज्ञिसंबंधिपरत्वमप्रकृतत्वात् किंतुक्रमयोगंचजन्मनीतिप्रकृतंतदर्थमिदमुच्यते येवनस्पतयस्तेषांपुष्पमंतरेणैवफलजन्मइतरेभ्यस्तुपुष्पाणिजायंतेतेभ्यःफलानीतिएवंवृक्षाउभयरूपाःप्रथमांतात्तसि. ४७ गुच्छगुल्मंत्विति मूलतएवयत्रलतासमूहोभवतिनचप्रकांडानितेगुच्छामल्लिकादयःगुल्माएकमूलाःसंघातजाताःशरेक्षुप्रभृतयःतृणजातयःउलपाद्याः प्रतानास्तंतुयुक्तास्त्रपुषालाबूप्रभृतयः वल्ल्योगुडूच्यादयःयाभूमेर्वृक्षमारोहंतिएतान्यपिबीजकांडरुहाणिनपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामितिनपुंसकत्वम् ४८

तमसेति एतेवृक्षादयस्तमोगुणेनविचित्रदुःखफलेनाधर्मकर्महेतुकेनव्याप्ताः अंतश्चैतन्याभवंतियद्यपिसर्वेषांचांतरेचैतन्यंतेनथापिबहि
र्व्यापारादिकार्यविरहात्तथाव्यपदिश्यंते त्रिगुणारब्धत्वेपिचैषांतमोगुणबाहुल्यात्तथाव्यपदेशः अतएवसुखदुःखसमन्विताः सत्त्वस्यापिभा
वात् कदाचित्सुखलेशोपिजलधरजनितजलसंपर्कादेषांजायते ४९ एतदंताइति स्थावरपर्यंताब्रह्मोपक्रमागतयउत्पत्तयः कथिताः भूता-
नांक्षेत्रज्ञानांजन्ममरणप्रबंधेदुःखबहुलतयाभीषणेसदाविनश्वरे ५० इत्थंसर्गमभिधायप्रलयदशामाह एवंसर्वमिति एवंउक्तप्रकारेण
इदंसर्वंस्थावरजंगमंजगत्सृष्ट्वाप्रजापतिरचिंत्यशक्तिरात्मनिशरीरत्यागरूपंअंतर्धानंकृतवान् सृष्टिकालंप्रलयकालेननाशयन्प्राणिनां
कर्मवशेनपुनःपुनःसर्गप्रलयान्करोतीत्यर्थः ५१ अत्रहेतुमाह यदेति यदासप्रजापतिर्जागर्ति सृष्टिस्थितीइच्छतितदेदंजगत् श्वासप्रश्वा

तमसाबहुरूपेणवेष्टिताःकर्महेतुना अंतःसंज्ञाभवंत्येतेसुखंदुःखसमन्विताः ४९ एतदंतास्तुगतयोब्र
ह्माद्याःसमुदाहृताः घोरेस्मिन्भूतसंसारेनित्यंसततयायिनि ५० एवंसर्वंससृष्ट्वेदंमांचाचिंत्यपराक्रमः
आत्मन्यंतर्दधेभूयःकालंकालेनपीडयन् ५१ यदासदेवोजागर्त्तितदेदंचेष्टतेजगत् यदास्वपितिशांतात्मा
तदासर्वंनिमीलति ५२ तस्मिन्स्वपितितुसुस्थेकर्मात्मानःशरीरिणः स्वकर्मभ्योनिवर्त्तंतेमनश्चग्लानिमृ
च्छति ५३ युगपत्तुप्रलीयंतेयदातस्मिन्महात्मनि तदायंसर्वभूतात्मासुखंस्वपितिनिर्वृतः ५४ तमोयंतु
समाश्रित्यचिरंतिष्ठतिसेंद्रियः नचस्वंकुरुतेकर्मतदोत्क्रामतिमूर्तितः ५५

साहारादिचेष्टांलभते यदास्वपितिनिवृत्तेच्छोभ
वतिशांतात्माउपसंहारमनातदेदंजगत्प्रलीयते ५२ पूर्वोक्तमेवस्पष्टयति तस्मिन्स्वपतीति तस्मिन्प्रजापतौनिवृत्तेच्छेसुस्थेउपसंहृतदेहम
नोव्यापारेकर्मलब्धदेहाःक्षेत्रज्ञाःस्वकर्मभ्योदेहग्रहणादिभ्योनिवर्त्ततेमनःसर्वेंद्रियसहितंवृत्तिरहितंभवति ५३ इदानींमहाप्रलयमा
ह युगपदिति एकस्मिन्नेवकालेयदातस्मिन्परमात्मनिसर्वभूतानिप्रलयंयांतितदायंसर्वभूतानामात्मानिर्वृतःनिवृत्तजाग्रत्स्वप्नव्यापारः
सुखंस्वपितिसुप्तइवभवति यद्यपिनित्यज्ञानानंदस्वरूपेपरमात्मनिनसुषुप्तं तथापिजीवधर्मोयंसुषुप्त्युपचर्यते ५४ इदानींप्रलयप्रसंगे
नजीवस्योत्क्रमणमपिश्लोकद्वयेनाह तमोयमिति अयंजीवस्तमोज्ञाननिवृत्तिंप्राप्यबहुकालमिंद्रियादिसहितस्तिष्ठतिनचात्मीयंकर्म

श्वासप्रश्वासादिकंकरोतितदामूर्त्तितः पूर्वदेहादुत्क्रामतिअन्यत्रगच्छतिलिंगशरीरावच्छिन्नस्यजीवस्यउत्क्रमात्तत्क्रमनमप्युपपद्यते त-
थाचोक्तंबृहदारण्यके तमुत्क्रामंतंप्राणोऽनूत्क्रामतिप्राणमनूत्क्रामंतंसर्वेप्राणा अनूत्क्रामंति प्राणाइंद्रियाणि ५५ कदादेहांतरंगृ
ह्णातीत्यतआह यदाणुमात्रिकइति अणवोमात्राःपुर्यष्टकरूपायस्यसोऽणुमात्रिकः पुर्यष्टकशब्देनभूतादीन्यष्टावुच्यंते तदुक्तंसनंदे
न भूतेंद्रियमनोबुद्धिवासनाकर्मवायवः अविद्याचाष्टकंप्रोक्तंपुर्यष्टमृषिसत्तमैः ब्रह्मपुराणेप्युक्तम् पुर्यष्टकेनलिंगेनप्राणाद्येनससुज्य
ते तेनवद्धस्यवैबंधोमोक्षोमुक्तस्यतेनतु यदाणुमात्रिकोभूत्वासंपद्यस्थास्नुवृक्षादिहेतुभूतंचरिष्णुमानुषादिकारणंबीजंप्रविशत्यधि
तिष्ठतितदासंसृष्टःपुर्यष्टकयुक्तोमूर्तिस्थूलदेहांतरंकर्मानुरूपंविमुंचतिगृह्णाति ५६ प्रासंगिकंजीवस्योत्क्रमणमभिधायप्रकृतमुप
संहरति एवंसजाग्रत्स्वप्नाभ्यामिति सब्रह्माअनेनप्रकारेणस्वीयजाग्रत्स्वप्नाभ्यामिदंस्थावरजंगमंसंजीवयतिमारयतिचाजस्रंसततंअ

यदाणुमात्रिकोभूत्वाबीजंस्थास्नुचरिष्णुच समाविशतिसंसृष्टस्तदामूर्त्तिंविमुंचति ५६ एवंसजाग्रत्स्व
प्नाभ्यामिदंसर्वंचराचरम् संजीवयतिचाजस्रंप्रमापयतिचाव्ययः ५७ इदंशास्त्रंतु कृत्वासौमामेवस्वयमा
दितः विधिवद्ग्राहयामासमरीच्यादींस्त्वहंमुनीन् ५८ एतद्वोयंभृगुःशास्त्रंश्रावयिष्यत्यशेषतः एतद्धिम
त्तोऽधिजगेसर्वमेषोऽखिलंमुनिः ५९

विनाशीअव्ययः ५७ इदंशास्त्रमिति असौब्रह्माइदंशास्त्रंकृत्वासृष्ट्यादौमामेवविधिव
च्छास्त्रोक्तांगजातानुष्ठानेनाध्यापितवान् अहंतुमरीच्यादीनध्यापितवान् ननुब्रह्मकृतत्वेऽस्यशास्त्रस्यकथंमानवव्यपदेशः अत्रमेधा
तिथिः शास्त्रशब्देनशास्त्रार्थोविधिनिषेधसमूहउच्यते तंब्रह्मामनुंग्राहयामासमनुस्तुतत्प्रतिपादकंग्रंथंकृतवानितिनविरोधः अ
न्येतुब्रह्मकृतत्वेप्यस्यमनुनाप्रथमंमरीच्यादिभ्यःस्वरूपतोऽर्थतश्चप्रकाशितत्वान्मानवव्यपदेशः वेदापौरुषेयत्वेपिकाठकादिव्य
पदेशवत् इदंतूच्यते ब्रह्मणाशतसाहस्रमिदंधर्मशास्त्रंकृत्वामनुरध्यापितआसीत्ततस्तेनचस्ववचनेनसंक्षिप्यशिष्येभ्यःप्र-
तिपादितमित्यविरोधः तथाचनारदः शतसाहस्रोयंग्रंथइतिस्मरतिस्म ५८ एतद्वोयमित्यादि एतच्छास्त्रमयंभृगुःयुष्माक
मखिलंकथयिष्यतियस्मादेषोऽशेषमेतन्मत्तोधीतवान् ५९

ततस्तथेति सभृगुर्मनुनातथोक्तोऽयंश्रावयिष्यतीतियस्मादेषोऽधिजगाद्कृत्स्नं ततोऽनंतरमनेकमुनिसन्निधौगुरुसंभावनयाप्रीत-मनास्तानृषीन्भृगुरुवाचश्रूयतामिति ६० स्वायंभुवस्येति ब्रह्मपुत्रस्यास्यमनोःषड्वंशप्रभवाअन्येमनवःएवंकार्यकारिणःस्वस्वका-लेसृष्टिपालनादावधिकृताःस्वाःस्वाःप्रजाउत्पादितवंतः ६१ स्वारोचिषश्चेति एतेभेदेनमनवःषट्नामतोनिर्दिष्टाः ६२ स्वायंभुवेति स्वायंभुवमुख्याःसप्तमनवःस्वीयस्वीयाधिकारकालेइदंस्थावरजंगमम्उत्पाद्यपालितवंतः ६३ इदानीमुक्तमन्वंतरसृष्टिप्रलयादि-कालपरिमाणपरिज्ञानायाह निमेषादशचाष्टौचेति अक्षिपक्ष्मणोःस्वाभाविकस्यउन्मेषस्यसहकारीनिमेषः तेऽष्टादशकाष्ठानामका-लः त्रिंशच्चकाष्ठाःकलासंज्ञकः त्रिंशत्कलाःमुहूर्ताख्यःकालः तावत्त्रिंशन्मुहूर्तान्अहोरात्रंकालंविद्यात् तावतइतिद्वितीयानिर्देशात्

ततस्तथासतेनोक्तोमहर्षिर्मनुनाभृगुः तानब्रवीदृषीन्सर्वान्प्रीतात्माश्रूयतामिति ६० स्वायंभुवस्यास्यमनोःषड्वंश्यामनवोऽपरे सृष्टवंतःप्रजाःस्वाःस्वामहात्मानोमहौजसः ६१ स्वारोचिषश्चोत्तमश्चतामसोरैवतस्तथा चाक्षुषश्चमहातेजाविवस्वत्सुतएवच ६२ स्वायंभुवाद्याःसप्तैतेमनवोभूरितेजसः स्वेस्वेंऽतरेसर्वमिदमुत्पाद्यापुश्चराचरम् ६३ निमेषादशचाष्टौचकाष्ठात्रिंशत्तुताःकला त्रिंशत्कलामुहूर्तःस्यादहोरात्रंतुतावतः ६४ अहोरात्रेविभजतेसूर्योमानुषदैविके रात्रिःस्वप्नायभूतानांचेष्टायैकर्मणामहः ६५ पित्र्येरात्र्यहनीमासःप्रविभागस्तुपक्षयोः कर्मचेष्टास्वहःकृष्णःशुक्लःस्वप्नायशर्वरी ६६ दैवेरात्र्यहनीवर्षंप्रविभागस्तयोःपुनः अहस्तत्रोदगयनंरात्रिःस्याद्दक्षिणायनम् ६७

विद्यादित्यध्याहारः ६४ अहोरात्रेइति मानुषदैवसंबंधिनौदिनरात्रिकालावादित्यःपृथक्करोति तयोर्मध्येभूतानांस्वप्नार्थंरात्रिं प्रवृत्तिकर्मानुष्ठानार्थंचदिनम् ६५ पित्र्येइति मानुषाणांमासः पितॄणामहोरात्रेभवतः तत्रपक्षद्वयेनविभागःकर्मानुष्ठानाय-पूर्वपक्षोऽहःस्वापार्थंशुक्लपक्षोरात्रिः ६६ दैवेरात्र्यहनीवर्षमिति मानुषाणांवर्षं देवानांरात्रिदिनेभवतः तयोरप्ययंविभागःनरा-णामुदगयनंदेवानामहः तत्रप्रायेणदैवकर्मणामनुष्ठानंदक्षिणायनंतुरात्रिः ६७

ब्राह्मस्येति ब्रह्मणोऽहोरात्रस्ययत्परिमाणंप्रत्येकंयुगानांच कृतादीनांतत्क्रमेणसमासतः संक्षेपतः शृणुतप्रकृतेपिकालविभागेब्रह्म
णोऽहोरात्रस्यपृथक्प्रतिज्ञानंतत्तदीयज्ञानस्यपुण्यफलज्ञानार्थंवक्ष्यतिच ब्राह्मंपुण्यमहर्विदुरितितद्वेदनात्पुण्यंभवतीत्यर्थः ६८
चत्वार्याहुरिति चत्वारिवर्षसहस्राणिकृतयुगकालंमन्वादयोवदंतितस्यतावद्वर्षशतानिसंध्यासंध्यांशश्चभवतियुगस्यपूर्वासंध्याउत्त
रश्चसंध्यांशः तदुक्तंविष्णुपुराणे तत्प्रमाणैःशतैःसंध्यापूर्वातत्राभिधीयते संध्यांशकश्चतत्तुल्योयुगस्यानंतरोहियः संध्यासंध्यांशयो
रंतर्यःकालोमुनिसत्तम युगाख्यःसतुविज्ञेयःकृतत्रेतादिसंज्ञकः वर्षसंख्याचेयंदिव्यमानेनतस्यैवानंतरप्रकृतत्वात् दिव्यैर्वर्षसहस्रै
स्तुकृतत्रेतादिसंज्ञितम् चतुर्युगंद्वादशभिस्तद्विभागंनिबोधमे इतिविष्णुपुराणवचनाच्च ६९ इतरेष्विति अन्येषुत्रेताद्वापरकलियुगे
संध्यासंध्यांशसहितेषुएकहान्यासहस्राणिशतानिचभवंति तेनेयंसंपद्यतेत्रीणिवर्षसहस्राणित्रेतायुगंतस्यत्रीणिवर्षशतानिसं

ब्राह्मस्यतुक्षपाहस्ययत्प्रमाणंसमासतः एकैकशोयुगानांतुक्रमशस्तन्निबोधत ६८ चत्वार्याहुःसह-
स्राणिवर्षाणांतुकृतंयुगम् तस्यतावच्छतीसंध्यासंध्यांशश्चतथाविधः ६९ इतरेषुससंध्येषुससंध्यां-
शेषुचत्रिषु एकापायेनवर्त्तंतेसहस्राणिशतानिच ७० यदेतत्परिसंख्यातमादावेवचतुर्युगम् एतद्द्वा
दशसाहस्रंदेवानांयुगमुच्यते ७१ दैविकानांयुगानांतुसहस्रंपरिसंख्यया ब्राह्ममेकमहर्ज्ञेयंतावतीं
रात्रिमेवच ७२ तद्वैयुगसहस्रांतंब्राह्मंपुण्यमहर्विदुः रात्रिंचतावतीमेवतेहोरात्रविदोजनाः ७३

ध्यांशश्च एवंद्वेवर्षसहस्रेद्वापरःतस्यद्वेवर्षशतेसंध्यासंध्यांशश्च एवंवर्षसहस्रंकलिःतस्यैकवर्षशतंसंध्यासंध्यांशश्च ७० यदेतदि-
ति एतस्यश्लोकस्यादौपदेतन्मानुषंचतुर्युगंपरिगणितंएतद्देवानांयुगमुच्यते चतुर्युगशब्देनसंध्यासंध्यांशयोरप्राप्तिशंकायामाह
एतद्द्वादशसाहस्रमितिस्वार्थेऽण्चतुर्युगैरेवद्वादशसंख्यैर्दिव्यंयुगमितितुमेधातिथेर्भ्रमोनादर्त्तव्यः मनुनानंतरंदिव्ययुगस
ब्रह्माहस्याप्यभिधानात् विष्णुपुराणेचमानुषचतुर्युगसहस्रेणब्रह्माहकीर्त्तनान्मानुषचतुर्युगेनैवदिव्ययुगानुगमनात् तथाचवि-
ष्णुपुराणम् कृतत्रेताद्वापरंचकलिश्चेतिचतुर्युगम् प्रोच्यतेतत्सहस्रंतुब्रह्मणोदिवसोमुने ७१ दैविकानामिति देवयुगानांसहस्रंब्राह्म
दिनंज्ञातव्यंसहस्रमेवरात्रिःपरिसंख्ययेतिश्लोकपूरणोऽर्थानुवादः ७२ तद्वैयुगेति युगसहस्रेणांतःसमाप्तिर्यस्यतद्ब्राह्ममहस्तत्परिमा

णांतरात्रिंयेजानंतितेऽहोरात्रज्ञाइतिस्तुतिरियंस्तुत्यात्त्रब्राह्ममहोरात्रंज्ञातव्यमितिविधिः परिकल्प्यतेअतएवतत्पुण्यहेतुत्वात्पुण्यमितिवि
शेषणंकृतम् ७३ तस्येति सब्रह्मातस्यपूर्वोक्तस्यस्वीयाहोरात्रस्यसमाप्तौप्रतिबुद्धोभवतिप्रतिबुद्धश्चस्वीयंमनःसृजति भूर्लोकादित्रयस्र
ष्टृत्वेनियुंक्तेनतुजनयतितस्यमहाप्रलयानंतरंजातत्वात् अनष्टत्वाच्च अवांतरप्रलयेभूर्लोकादित्रयमात्रनाशात् सृष्ट्यर्थंमनोनियुक्तिरेवम
नःसृष्टिः तथाचपुराणेश्रूयते मनःसिसृक्षयायुक्तंसर्गायनिदधेपुनरिति अथवामनःशब्दोयंमहत्तत्त्वपरएव यद्यपितन्महाप्रलयानंतर
मुत्पन्नंमहांतमेवचेत्यादिनासृष्टिरपितस्योक्तातथाप्यनुक्तंभूतानामुत्पत्तिक्रमंतद्गुणांश्चकथयितुंमहाप्रलयानंतरितामेवमहदादिसृष्टिंभू
तसृष्टिंचहिरण्यगर्भस्यापिपरमार्थत्वान्तत्कर्तृतामनुवदतिएतेनेदमुक्तंभवतिब्रह्मामहाप्रलयानंतरितसृष्ट्यादौपरमात्मरूपेणमहदादित
त्त्वानिजगत्स्रष्टुसर्वंसृजति अतएवशेषेवक्ष्यतिइत्येषासृष्टिरादितइति अवांतरप्रलयानंतरंतुमनःप्रभृतिसृष्टावभिधानक्रमेणैवमाथ

तस्यसोहर्निशस्यांतेप्रसुप्तःप्रतिबुध्यते प्रतिबुद्धश्चसृजतिमनःसदसदात्मकम् ७४ मनःसृष्टिंविकुरुतेचो
द्यमानंसिसृक्षया आकाशंजायतेतस्मात्तस्यशब्दंगुणंविदुः ७५ आकाशात्तुविकुर्वाणात्सर्वगंधवहःशु
चिः बलवान्जायतेवायुःसवैस्पर्शगुणोमतः ७६ वायोरपिविकुर्वाणाद्विरोचिष्णुतमोनुदम् ज्योतिरुत्पद्य
तेभास्वत्तद्रूपगुणमुच्यते ७७ ज्योतिषश्चविकुर्वाणादापोरसगुणाःस्मृताः अद्भ्योगंधगुणाभूमिरित्येषा
सृष्टिरादितः ७८ यत्प्राग्द्वादशसाहस्रमुदितंदैविकंयुगम् तदेकसप्ततिगुणंमन्वंतरमिहोच्यते ७९

प्यभावादित्येषासृष्टिरादितइतिनिष्प्रयोजनोऽनुवादःस्यात् ७४ मनःसृष्टिमिति मनोमहान्सृष्टिंकरोतिपरमात्मनःस्रष्टुमिच्छयाप्रेर्यमाणंत-
स्मादाकाशमुत्पद्यतेतच्चपूर्वोक्तानुसारादहंकारतन्मात्रक्रमेणाकाशस्यशब्दंगुणंविदुर्मन्वादयः ७५ आकाशादिति आकाशात्तुविकारज
नकात्सुरभ्यसुरभिगंधवहःपवित्रोबलवांश्चवायुरुत्पद्यतेसचस्पर्शाख्यगुणवान्मन्वादीनांसंमतः ७६ वायोरपीति वायोरपितेजउत्पद्यतेवि
रोचिष्णुपरप्रकाशकंतमोनाशनंभास्वत्प्रकाशकंतच्चगुणरूपमभिधीयते ७७ ज्योतिषश्चेति तेजसआपउत्पद्यंते ताश्चरसगुणयुक्ताअद्भ्योगंध
गुणयुक्ताभूमिरित्येषामहाप्रलयानंतरसृष्ट्यादौभूतसृष्टिः तैरेवभूतैरवांतरप्रलयानंतरमपिभूरादिलोकत्रयनिर्माणम् ७८ यत्प्रागिति यत्पू

र्द्वादशवर्षसहस्रपरिमाणंसंध्यासंध्यांशसहितंमनुष्याणांचतुर्युगंदेवानामेकंयुगमुक्तंतदेकसप्ततिगुणितंमन्वंतराख्यःकालइहशा स्त्रेऽभिधीयते तत्रैकस्यमनोःसर्गाद्यधिकारः ७९ मन्वंतराणीति यद्यपिचतुर्दशमन्वंतराणिपुराणेषु परिगण्यंतेतथापिसर्गप्रलया नामानंत्यात् असंख्यानिआवृत्त्यासर्गःसंहारश्चासंख्यःएतत्सर्वंक्रीडन्निवप्रजापतिःपुनःपुनः कुरुतेसृत्यर्थोहिप्रवृत्तिःक्रीडातस्यचा प्रकामत्वात्नसुखार्थेतिइवशब्दःप्रयुक्तः परमेस्थानेऽभात्तलक्षणेतिष्ठतीतिपरमेष्ठीप्रयोजनंविनापरमात्मनःसृष्ट्यादौकथंप्रवृत्तिरि त्येतत्लीलयैवएवंस्वभावत्वादित्यर्थः व्याख्यातुरिवकरताडनादौतथाचशारीरकसूत्रंलोकवत्तुलीलाकैवल्यम् ८० चतुष्पात्सकलोधर्मइ ति सत्ययुगेसकलोधर्मश्चतुष्पात्सर्वांगसंपूर्णआसीत् धर्मोमुख्यपादासंभवात् वृषोहि भगवान्धर्मइत्याद्यागमेवृषत्वेनकीर्त्तनात् तस्यपादच तुष्टयेनसंपूर्णत्वात्सत्ययुगेऽपिधर्माणांसर्वैरंगैःसमग्रत्वात्संपूर्णत्वपरोऽयंचतुष्पाच्छब्दःअथवातपःपरमित्यत्रमनुनैवतपोज्ञानयज्ञदानानां

मन्वंतराण्यसंख्यानिसर्गःसंहारएवच क्रीडन्निवैतत्कुरुतेपरमेष्ठीपुनःपुनः ८० चतुष्पात्सकलोधर्मःसत्यं चैवकृतेयुगे नाधर्मेणागमःकश्चिन्मनुष्यान्प्रतिवर्त्तते ८१ इतरेष्वागमाद्धर्मःपादशस्त्ववरोपितः चौरिका नृतमायाभिर्धर्मश्चापैतिपादशः ८२ अरोगाःसर्वसिद्धार्थाश्चतुर्वर्षशतायुषः कृतेत्रेतादिषुह्येषामायुर्ह्रसति पादशः ८३

चतुर्णांकीर्त्तनात् तस्यपादचतुष्टयेनसंपूर्णत्वात्पादत्वेननिरूपिताःसत्ययुगेसमग्रइत्यर्थः तथासत्यंचकृतयुगमासीत्स त्यस्यधर्मत्वेऽपिपृथक्ग्रहणंतथानशास्त्रातिक्रमेणधनविद्यादेरागमउत्पत्तिर्मनुष्यान्प्रतिसंपद्यते ८१ इतरेष्वितिसत्ययुगादन्येषु त्रेतादिषुआगमात् अधर्मेणधनविद्यादेरर्जनात् तस्यैवपूर्वश्लोकेप्रकृतत्वात् आगमाद्वेदादितिगोविंदराजोमेधातिथिश्च धर्मोयागा यथाक्रमंप्रतियुगंपादंपादमवरोपितोहीनःकृतः तथाधनविद्यार्जितोऽपियोधर्मःप्रचरतिसोऽपिचौर्यसत्यच्छद्मभिःप्रतियुगंपादशोन्हासा द्यपगच्छतित्रेतादियुगेषुसहचौरिकानृतच्छद्मनांनयथासंख्यंसर्वत्रसर्वेषांदर्शनात् ८२ अरोगाइति रोगनिमित्ताधर्माभावादरोगाःसर्वसिद्ध राज्यप्रकारयदित्याद्यविरोधः शतायुर्वैपुरुषइत्यादिश्रुतौतु शतशब्दोबहुत्वपरःकलिपरोवाएवंरूपामनुष्याःकृतेभवंतित्रेतादिषुपुनःपा त्र्यफलाःप्रतिबंधकाधर्माभावाच्चतुर्वर्षशतायुषश्चस्वाभाविकमधिकायुःप्रापकधर्मवशादधिकायुषोऽपिभवंतितेनदशवर्षसहस्राणिरा

दंपादमायुरल्पं भवतीति ८३ वेदोक्तमायुरिति शतायुर्वैपुरुष इत्यादिवेदोक्तमायुः कर्मणांचकाम्यानांफलविषयाः प्रार्थनाब्राह्मणादीनांचशा
पानुग्रहसमर्थत्वादिप्रभावायुगानुरूपेणफलंति ८४ अन्यइति कृतयुगेऽन्येधर्माभवंतित्रेतादिष्वपियुगापचयानुरूपेणाधर्मवैलक्षण्यम्
८५ तपःपरमिति यद्यपितपःप्रभृतीनिसर्वाणिसर्वयुगेष्वनुष्ठेयानितथापिसत्ययुगेतपःप्रधानमहाफलमितिज्ञाप्यते एवमात्मज्ञानंत्रेतायु
गेद्वापरेयज्ञः दानंकलौ ८६ सर्वस्यास्येति सब्रह्मामहातेजाअस्यसर्गस्यसमग्रस्याग्नौप्रस्ताहुतिरितिन्यायेनरक्षार्थंमुखादिजातानांब्राह्मणा
दीनांविभागेनकर्माणिदृष्टादृष्टार्थानिनिर्मितवान् ८७ अध्यापनमिति अध्यापनादीनामिहसृष्टिप्रकरणेसृष्टिविशेषतयाभिधानंविधिस्ते
षामुत्तरत्रभविष्यति अध्यापनादीनिषट्कर्माणिब्राह्मणानांकल्पितवान् ८८ प्रजानामिति प्रजारक्षणादीनिक्षत्रियस्यकर्माणिकल्पितवा

वेदोक्तमायुर्मर्त्यानामाशिषश्चैवकर्मणाम् फलंत्यनुयुगंलोकेप्रभावश्चशरीरिणाम् ८४ अन्येकृतयुगेध
र्मास्त्रेतायांद्वापरेपरे अन्येकलियुगेनृणांयुगह्रासानुरूपतः ८५ तपःपरंकृतयुगेत्रेतायांज्ञानमुच्यते द्वा
परेयज्ञमेवाहुर्दानमेकंकलौयुगे ८६ सर्वस्यास्यतुसर्गस्यगुप्त्यर्थंसमहाद्युतिः मुखबाहूरुपज्जानांपृथक्
कर्माण्यकल्पयत् ८७ अध्यापनमध्ययनंयजनंयाजनंतथा दानंप्रतिग्रहंचैवब्राह्मणानामकल्पयत् ८८
प्रजानांरक्षणंदानमिज्याध्ययनमेवच विषयेष्वप्रसक्तिश्चक्षत्रियस्यसमासतः ८९ पशूनांरक्षणंदान
मिज्याध्ययनमेवच वणिक्पथंकुसीदंचवैश्यस्यकृषिमेवच ९० एकमेवतुशूद्रस्यप्रभुःकर्मसमादिशत्
एतेषामेववर्णानांशुश्रूषामनसूयया ९१

न् विषयेषुगीतनृत्यवनितोपभोगादिष्वप्रसक्तिस्तेषांपुनरनासेवनंसमास-
तःसंक्षेपेण ८९ पशूनामिति पशूनांपालनादीनिवैश्यस्यकल्पितवान् वणिक्पथंस्थलजलादिनावाणिज्यंकुसीदंवृद्ध्याधनप्रयोगः
९० एकमेवेति प्रभुर्ब्रह्माशूद्रस्यब्राह्मणादिवर्णत्रयपरिचर्यात्मकंकर्मनिर्मितवान् एकमेवेतिप्राधान्यप्रदर्शनार्थंदानादेरपितस्य
विहितत्वात् अनसूययागुणानिंदया ९१ इदानींप्राधान्येनसर्गरक्षार्थत्वाद्ब्राह्मणस्यतदुपक्रमधर्माभिधानत्वाच्चास्यशास्त्रस्य
ब्राह्मणस्यस्तुतिमाह ऊर्ध्वमिति सर्वतएवपुरुषोमेध्यःनाभेरूर्ध्वमतिशयेनमेध्यःततोपिमुखमस्यमेध्यतमंब्रह्मणोक्तम् ९२

ततः किमत आह उत्तमांगोद्भवादिति उत्तमांगं मुखं तदुद्भवत्वात् क्षत्रियादिभ्यः पूर्वोत्पन्नत्वादध्यापनव्याख्यानादिना युक्तस्यातिशये न वेदधारणात् सर्वस्यास्य जगतो धर्मानुशासनेन ब्राह्मणः प्रभुः संस्कारस्य विशेषात्तु वर्णानां ब्राह्मणः प्रभुः ९३ कस्योत्तमांगादयमुद्भूत इत्यत आह तंहिस्वयंभूरिति तं ब्राह्मणं ब्रह्मा आत्मीयमुखात् देवपित्र्ये हविः कव्ये वहनाय तपः कृत्वा सर्वस्य जगतो रक्षार्थं च क्षत्रियादिभ्यः प्रथमं सृष्टवान् ९४ पूर्वोक्तहव्यकव्यवहनं स्पष्टयति यस्यास्येनेति यस्य विप्रस्य मुखेन श्राद्धादौ सर्वदा देवा हव्यानि पितरश्च कव्यानि भुंजते नेन ततोन्यत् प्रकृष्टतमं भूतं किं भवेत् ९५ भूतानामिति भूताख्यानां स्थावरजंगमानां मध्ये प्राणिनः कीटादयः श्रेष्ठाः कदाचित् सुखलेशात् तेषामपि बुद्धिजीविनः सार्थनिरर्थदेशोपसर्पणापसर्पणकारिणः पश्वादयः तेभ्योपि मनुष्याः प्रकृष्टज्ञानसंबंधात्

ऊर्द्धं नाभेर्मेध्यतरः पुरुषः परिकीर्त्तितः तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवा ९२ उत्तमांगोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ९३ तंहि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ९४ यस्यास्येन सदाश्नंति हव्यानि त्रिदिवौकसः कव्यानि चैव पितरः किंभूतमधिकं ततः ९५ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ९६ ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः ९७ उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती सहि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ९८ ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ९९

तेभ्योपि ब्राह्मणाः सर्वपूज्यत्वात् अपवर्गाधिकारयोग्यत्वाच्च ९६ ब्राह्मणेषु चेति ब्राह्मणेषु तु मध्ये विद्वांसो महाफलज्योतिष्टोमादिकर्माधिकारित्वात् तेभ्योपि कृतबुद्धयः अनागतेऽपि कृतं मयेति बुद्धिर्येषां शास्त्रोक्तानुष्ठाने पूत्पन्नकर्त्तव्यताबुद्धय इत्यर्थः तेभ्योपि अनुष्ठातारः हिताहितप्राप्तिपरिहारभागित्वात् तेभ्योपि ब्रह्मविदः मोक्षलाभात् ९७ उत्पत्तिरेवेति ब्राह्मणदेहजन्ममात्रमेव धर्मस्य शरीरमविनाशि यस्मादसौ धर्मार्थं जातः धर्मानुगृहीतात्मज्ञानेन मोक्षाय संपद्यते ९८ ब्राह्मण इति यस्माद्ब्राह्मणो जायमानः पृथिव्यामधि उपरि भवति श्रेष्ठ इत्यर्थः सर्वभूतानां धर्मसमूहरक्षायै

प्रभुः ब्राह्मणोपदिष्टत्वात्सर्वधर्माणाम् ९९ सर्वंस्वमिति यत्किंचिज्जगद्गतंधनंतद्ब्राह्मणस्यस्वमितिस्तुत्योच्यते स्वमिवस्वंनतुस्वमेवब्रा
ह्मणस्यापिमनुनास्तेयस्यवक्ष्यमाणत्वात् तस्माद्ब्रह्ममुखोद्भवत्वेनाभिजनेनश्रेष्ठतयासर्वंब्राह्मणोर्हतिसर्वग्रहणयोग्योभवत्येववै अवधार
णे १०० स्वमेवेति यत्परस्याप्यन्नंब्राह्मणोभुङ्क्तेपरस्यचवस्त्रंपरिधत्तेपरस्यगृहीत्वान्यस्मैददातितदपिब्राह्मणस्यस्वमिवपूर्ववत्स्तुतिःएवंसति
ब्राह्मणस्यकारुण्यादन्येभोजनादिकुर्वंति १०१ इदानींप्रकृष्टब्राह्मणकर्माभिधायकतयाशास्त्रप्रशंसांप्रक्रमते तस्यकर्मविवेकार्थमिति
ब्राह्मणस्यकर्मज्ञानार्थंशेषाणांक्षत्रियादीनांचस्वायंभुवोब्रह्मपुत्रोधीमान्सर्वविषयज्ञानवान्मनुरिदंशास्त्रंविरचितवान् १०२ विदुषेति
एतच्छास्त्राध्यापनफलज्ञेनब्राह्मणेनएतस्यव्याख्याताध्यापनोचितप्रयत्नतोऽध्ययनंकर्त्तव्यंशिष्येभ्यश्चेदंव्याख्यातव्यन्नान्येनक्षत्रियादि

सर्वंस्वंब्राह्मणस्येदंयत्किंचिज्जगतीगतम् श्रैष्ठ्येनाभिजनेनेदंसर्वंवैब्राह्मणोर्हति १०० स्वमेवब्राह्मणोभुं
क्तेस्वंवस्तेस्वंददातिच आनृशंस्याद्ब्राह्मणस्यभुंजतेहीतरेजनाः १०१ तस्यकर्मविवेकार्थंशेषाणामनुपूर्व
शः स्वायंभुवोमनुर्धीमानिदंशास्त्रमकल्पयत् १०२ विदुषाब्राह्मणेनेदमध्येतव्यंप्रयत्नतः शिष्येभ्यश्चप्र
वक्तव्यंसम्यङ्नान्येनकेनचित् १०३ इदंशास्त्रमधीयानोब्राह्मणःसंशितव्रतः मनोवाग्देहजैर्नित्यंकर्म
दोषैर्नलिप्यते १०४ पुनातिपंक्तिंवंश्यांश्चसप्तसप्तपरावरान् पृथिवीमपिचैवेमांकृत्स्नामेकोपिसोर्हति
१०५ इदंस्वस्त्ययनंश्रेष्ठमिदंबुद्धिविवर्द्धनम् इदंयशस्यमायुष्यमिदंनिःश्रेयसंपरम् १०६

ना अध्ययनमात्रंतुव्याख्यानाध्यापनरहितंक्षत्रियवैश्ययोरपिनिषेकादिःश्मशानांतेत्यादिनाविधास्यते अनुवादमात्रमेतदितिमेधाति
थिमतंतन्नमनोहरंद्विजैरध्ययनंब्राह्मणेनैवाध्यापनव्याख्यानेइत्यस्यालाभात् यत्तुअधीयीरंस्त्रयोवर्णाइत्यादिलहेदविषयमितिचस्व
तिविशेषेणैवाध्यापनमितिविधानेनसंभवत्यपिअनुवादत्वमस्येतिवृथामेधातिथेर्ग्रहः १०३ इदंशास्त्रमिति इदंशास्त्रंपठन्नेतदीयमर्थंज्ञा
त्वाशंसितव्रतोऽनुष्ठितव्रतः मनोवाक्कायसंभवैःपापैर्नसंबध्यते १०४ पुनातीति इदंशास्त्रमधीयानइत्यनुवर्त्तते अपांक्त्योपहतांपंक्तिमा
नुपूर्व्याणिविष्टजनसमूहंपवित्रीकरोतिवंशभवांश्चसप्तपरान्पित्रादीन् अवरांश्चपुत्रादीन्पृथिवीमपिसर्वांसकलधर्मज्ञतयापात्रत्वेनगृहीतुं
योग्योभवति १०५ इदमिति अभिमतार्थस्याविनाशःस्वस्तितस्यायनंप्रापकंएतच्छास्त्रस्याध्ययनंस्वस्त्ययनंजपहोमादिबोधकत्वाच्चश्रेष्ठं

स्वस्त्ययनांतरात्मकृष्टंबुद्धिविवर्द्धनमेतच्छास्त्राभ्यासेनाशेषविधिनिषेधपरिज्ञानात् यशसेहितंयशस्यंविद्वत्तयाख्यातिलाभात्परंप्र
कृष्टंनिःश्रेयसंनिःश्रेयसस्यमोक्षस्योपायोपदेशकत्वात् १०६ अस्मिन्धर्मइति अस्मिन्कार्त्स्न्येनधर्मोऽभिहितइतिशास्त्रप्रशंसाक
र्मणांचविहितनिषिद्धानामिष्टानिष्टफलेवर्णचतुष्टयस्यैवपुरुषधर्मरूपआचारः शाश्वतः पारंपर्यागतः धर्मत्वेप्याचारस्यप्राधान्यस्याप
नायपृथक्निर्देशः १०७ प्राधान्यमेवस्पष्टयति आचारइति युक्तोयत्नवान् आत्महितेच्छुः सर्वस्यात्मास्तीतिआत्मशब्देन आत्महितेच्छा
लक्ष्यते १०८ आचारादिति आचाराद्विच्युतोविप्रोनवैदिकंफलंलभेत् आचारयुक्तःपुनःसमग्रफलभाग्भवति १०९ एवमितिउक्तप्र-
कारेणाचाराद्धर्मप्राप्तिंदृष्ट्वामुनयोबुद्ध्वातपसश्चांद्रायणादेःसमग्रस्यकारणमाचारमनुष्ठेयतयागृहीतवंतः उत्तरत्रवक्ष्यमाणस्याचारस्यइह
स्तुतिःशास्त्रस्तुत्यर्था ११० इदानींशिष्यस्यसकलप्रतिपत्तयेवक्ष्यमाणार्थानुक्रमणिकामाह जगतश्चसमुत्पत्तिमितिपाखंडगणधर्मांश्चे

अस्मिन्धर्मोऽखिलेनोक्तोगुणदोषौचकर्मणाम् चतुर्णामपिवर्णानामाचारश्चैवशाश्वतः १०७ आचारः
परमोधर्मःश्रुत्युक्तःस्मार्तएवच तस्मादस्मिन्सदायुक्तोनित्यंस्यादात्मवान्द्विजः १०८ आचाराद्विच्युतोवि
प्रोनवेदफलमश्नुते आचारेणतुसंयुक्तःसंपूर्णफलभाग्भवेत् १०९ एवमाचारतोदृष्ट्वाधर्मस्यमुनयोगति
म् सर्वस्यतपसोमूलमाचारंजगृहुःपरम् ११० जगतश्चसमुत्पत्तिंसंस्कारविधिमेवच व्रतचर्योपचारंचस्ना
नस्यचपरंविधिम् १११ दाराधिगमनंचैवविवाहानांचलक्षणम् महायज्ञविधानंचश्राद्धकल्पंचशाश्वतम्
११२ वृत्तीनांलक्षणंचैवस्नातकस्यव्रतानिच भक्ष्याभक्ष्यंचशौचंचद्रव्याणांशुद्धिमेवच ११३ त्यंतम् जगदुत्पत्तिर्य-

थोक्ताब्राह्मणस्तुतिश्चमार्गरक्षार्थत्वेनब्राह्मणस्यशास्त्रकर्तृत्वादिकंचसृष्टावेवोक्तंभवति एतत्प्रथमाध्यायप्रमेयम् संस्काराणांजातकर्मादीनां
विधिमनुष्ठानंब्रह्मचारिणोव्रताचरणंउपचारंचगुर्वादीनामभिवादनोपासनादिसर्वोद्वन्द्वोविभाषयैकवद्भवतिइत्येकवद्भावः एतद्द्वितीयाध्याय
प्रमेयम् स्नानंगुरुकुलान्निवर्त्तमानस्यसंस्कारविशेषस्तस्यप्रकृष्टंविधानम् १११ दाराधिगमनमिति दाराधिगमनंविवाहः तद्विशेषाणांब्रा-
ह्मादीनांच लक्षणंमहायज्ञाःपंचवैश्वदेवादयःश्राद्धस्यविधिःशाश्वतःप्रतिसर्गमनादिप्रवाहप्रवृत्तत्वान्नित्यःएषतृतीयाध्यायार्थः ११२ वृत्तीना
मिति वृत्तीनांजीवनोपायानांऋतादीनांलक्षणम् स्नातकस्यगृहस्थस्यव्रतानिनियमाःएतच्चतुर्थाध्यायप्रमेयम् भक्ष्यंदध्यादिअभक्ष्यंल

शक्नादिशौचंमरणादौब्राह्मणादेर्दशाहादिनाद्रव्याणांशुद्धिमुदकादिना ११३ स्त्रीधर्मयोगमिति स्त्रीणांधर्मयोगंधर्मोपायंएतत्पांचमिकम्
तापस्यंतपसेवानप्रस्थायहितंतस्यधर्मंमोक्षहेतुत्वान्मोक्षंयतिधर्मम् यतिधर्मत्वेपिसंन्यासस्यपृथगुपदेशःप्राधान्यज्ञापनार्थः एषषष्ठाध्या
यार्थः राज्ञोभिषिक्तस्यसर्वोदृष्टादृष्टार्थोधर्मः एषसप्तमाध्यायार्थः कार्याणामृणादीनामर्थिप्रत्यर्थिसमर्पितानांविनिर्णयोविचार्यतत्त्वनि
र्णयः ११४ साक्षीति साक्षिणांचप्रश्नेयद्विधानंव्यवहारांगत्वेपिसाक्षिप्रश्नस्यविधाननिर्णयोपायत्वात् पृथङ्निर्देशः एतदाष्टमिकम् स्त्री
पुंसयोर्भार्यापत्योःसन्निधावसन्निधौचधर्मानुष्ठानंऋक्थभागस्यचधर्मपदापिऋक्थभागोपिकार्याणांचविनिर्णयमित्यनेनैवप्राप्तस्तथाप्य
ध्यायभेदात्पृथङ्निर्देशः द्यूतविषयोविधिर्द्यूतशब्देनोच्यते कंटकानांचौरादीनांशोधनंनिरसनम् ११५ वैश्यशूद्रोपचारंचेति वैश्यशू-

स्त्रीधर्मयोगंतापस्यंमोक्षंसंन्यासमेवच राज्ञश्चधर्ममखिलंकार्याणांचविनिर्णयम् ११४ साक्षिप्रश्नविधानं
चधर्मंस्त्रीपुंसयोरपि विभागधर्मंद्यूतंचकंटकानांचशोधनम् ११५ वैश्यशूद्रोपचारंचसंकीर्णानांचसंभवम्
आपद्धर्मंचवर्णानांप्रायश्चित्तविधिंतथा ११६ संसारगमनंचैवत्रिविधंकर्मसंभवम् निःश्रेयसंकर्मणांचगुणदो
षपरीक्षणम् ११७ देशधर्मान्जातिधर्मान्कुलधर्मांश्चशाश्वतान् पाषंडगणधर्मांश्चशास्त्रेऽस्मिन्नुक्तवा
न्मनुः ११८ यथेदमुक्तवान्शास्त्रंपुरापृष्टोमनुर्मया तथेदंयूयमप्यद्यमत्सकाशान्निबोधत ११९ इतिमा
नवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांप्रथमोऽध्यायः १

द्रोपचारंस्वधर्मानुष्ठानंएतन्नवमे एवंसंकीर्णानांअनुलोमप्रतिलोमजानामुत्पत्तिंआपदिजीविकोपदेशंआपद्धर्मंएतद्दशमे प्रायश्चित्तविधि
मेकादशे ११६ संसारगमनमिति संसारगमनंदेहांतरप्राप्तिरूपंउत्तममध्यमाधमभेदेनत्रिविधशुभाशुभकर्महेतुकम् निःश्रेयसमात्मज्ञानंसर्वो
त्कृष्टमोक्षलक्षणस्यश्रेयोहेतुत्वात्कर्मणांचविहितनिषिद्धानांगुणदोषपरीक्षणम् ११७ देशधर्मानिति प्रतिनियतदेशेऽनुष्ठीयमानादेशधर्माः
ब्राह्मणादिजातिनियताजातिधर्माःकुलविशेषाश्रयाःकुलधर्माःवेदबाह्यागमसमाश्रयाप्रतिषिद्धव्रतचर्यापाषंडंतद्योगात्पुरुषोपिपाषंडःतन्निमि
त्तायेधर्माःपाषंडिनोधिकर्मस्यानित्यादयःतेषांपृथक्धर्मानभिधानात्गणःसमूहोवणिगादीनाम् ११८ यथेदमिति पूर्वंमयापृष्टोमनुर्यथेदंशा

स्त्रमभिहितवान् तथैवान्यूनानतिरिक्तंमत्सकाशाच्छृणुतेतिऋषीणांश्रद्धातिशयार्थंपुनरभिधानम् ११९ इतिश्रीकुल्लूकभट्ट-
कृतायांमन्वर्थमुक्तावल्यांमनुवृत्तौप्रथमोऽध्यायः १ ७ ७ ७ प्रकृष्टपरमात्मज्ञानरूपधर्मज्ञानायजगत्कारणं
ब्रह्मप्रतिपाद्याधुनात्रस्यज्ञानांगभूतंसंस्कारादिरूपंधर्मंप्रतिपिपादयिषुर्धर्मसामान्यलक्षणंप्रथममाह विद्वद्भिरिति विद्वद्भिर्वेदविद्भिः स-
द्भिर्धार्मिकैरागद्वेषशून्यैरनुष्ठितोहृदयेनाभिमुख्येनज्ञात इत्यनेनश्रेयःसाधनमभिमतम् तत्राहिस्वरसान्मनोभिमुखीभवतिवेदविद्भिर्ज्ञा
त इतिविशेषणोपादानसामर्थ्यात्ज्ञानस्यवेदस्यैवश्रेयःसाधनज्ञानेकारणत्वंविवक्षितंखड्गधारिणाहत इत्युक्तेधृतखड्गस्यैवहननेप्राधान्यं
अतोवेदप्रमाणकःश्रेयःसाधनंधर्मइत्युक्तंएवंविधोयोधर्मस्तन्निबोधत उक्तार्थसंग्रहश्लोकाः वेदविद्भिर्ज्ञातइतिप्रयुंजानोविशेषणम्
वेदादेवपरिज्ञातोधर्मइत्युक्तवान्मनुः हृदयेनाभिमुख्येनज्ञात इत्यपिनिर्दिशन् श्रेयःसाधनमित्याहतद्ध्यत्रिसुखंमनः वेदप्रमाणकःश्रे

श्रीकृष्णायनमः विद्वद्भिःसेवितःसद्भिर्नित्यमद्वेषरागिभिः हृदयेनाभ्यनुज्ञातोयोधर्मस्तन्निबोधत १
कामात्मतानप्रशस्तानचैवेहास्त्यकामता काम्योहिवेदाधिगमःकर्मयोगश्चवैदिकः २

यःसाधनंधर्मइत्यतः प्र
नूक्तमेवमुनयःप्रणिन्युर्धर्मलक्षणम् अतएवहारीतः अथातोधर्मंव्याख्यामः श्रुतिप्रमाणकोधर्मः श्रुतिश्चद्विविधावैदिकीतांत्रिकीच
भविष्यपुराणे धर्मःश्रेयःसमुद्दिष्टंश्रेयोभ्युदयलक्षणम् सतुपंचविधःप्रोक्तोवेदमूलःसनातनः अस्यसम्यगनुष्ठानात्स्वर्गोमोक्षश्चजाय
ते इहलोकेसुखैश्वर्यमतुलंचखगाधिप श्रेयःसाधनमित्यर्थः जैमिनिरपि इदमेवधर्मलक्षणमसूत्रयत्चोदनालक्षणोऽर्थोधर्मइतिउभ
यचोदनयालक्ष्यतेऽर्थःश्रेयःसाधनंज्योतिष्टोमादिः अनर्थःप्रत्यवायसाधनंश्येनादितत्रवेदप्रमाणकंश्रेयःसाधनंज्योतिष्टोमादिधर्मइतिसू-
त्रार्थः स्मृत्यादयोपिवेदमूलत्वेनैवधर्मेप्रमाणमितिदर्शयिष्यामः गोविंदराजस्तुहृदयेनाभ्यनुज्ञात इत्यंतःकरणविचिकित्साशून्यइतिव्या-
ख्यातवान् तन्नवेदविद्भिरित्यनुष्ठितःसंशयरहितश्चधर्मइतिधर्मलक्षणंस्यात्एतच्चदृष्टार्थग्रामगमनादिसाधारणंधर्मलक्षणंविचक्षण
नश्रद्धत्ते मेधातिथिस्तुहृदयेनाभ्यनुज्ञातइतियत्रचित्तंप्रवर्त्तयतीतिव्याख्यायअथवाहृदयंवेदःसह्यधीतोभावनादिरूपेणहृन्हृदयस्थिति
र्हृदयमित्युच्यतेइत्युक्तवान् १ कामात्मतेति फलाभिलाषशीलत्वंपुरुषस्यकामात्मतासानप्रशस्ताबंधहेतुत्वात्स्वर्गादिफलाभिलाषेणका

स्यानिकर्माण्यनुष्ठीयमानानिपुनर्जन्मनेकारणंभवंतिनित्यनैमित्तिकानितु आत्मज्ञान सहकारितयामोक्षायकल्पंतेनपुनरिच्छामात्रमनेन निषिध्यते तदाहनचैवेहास्त्यकामतेति यतोवेदस्वीकरणंवैदिकसकलधर्मसंबंधश्चेच्छाविषयएव २ अत्रोपपत्तिमाह संकल्पमूलइति अनेनकर्मणाइदमिष्टंफलंसाध्यतइतिएवंविषयाबुद्धिः संकल्पःतदनंतरमिष्टसाधनतयावगतेतस्मिन्निच्छाजायतेतदर्थंप्रयत्नंकुरुतेचइ त्येवंयज्ञाःसंकल्पप्रभवाव्रतानियमरूपाश्चधर्माश्चतुर्थाध्यायेवक्ष्यमाणाः सर्वइत्यनेनपदेन अन्येपिशास्त्रार्थाःसंकल्पादेवजायंते इच्छामंत रेणतान्यपिनसंभवंतीत्यर्थः गोविंदराजस्तुव्रतान्यनुष्ठेयरूपाणियमधर्माःप्रतिषेधार्थकाइत्याह ३ अत्रैवलौकिकंनियमंदर्शयति अ- कामस्येति लोकेयाकाचिद्भोजनगमनादिक्रियासाप्यनिच्छतोनकदाचिदृश्यते ततश्चसर्वकर्मलौकिकंवैदिकंचयद्यत्पुरुषः कुरुतेतत्तदिच्छा कार्यम् ४ संप्रतिपूर्वोक्तंफलाभिलाषनिषेधन्नियमयति तेषुसम्यग्वर्तमानइति नात्रेच्छानिषिध्यतेकिंतु शास्त्रोक्तकर्मसुसम्यग्वृत्तिर्वि-

संकल्पमूलःकामोवैयज्ञाःसंकल्पसंभवाः व्रतानियमधर्माश्चसर्वेसंकल्पजाःस्मृताः ३ अकामस्यक्रियाका चिद्दृश्यतेनेहकर्हिचित् यद्यद्धिकुरुतेकिंचित्तत्तत्कामस्यचेष्टितम् ४ तेषुसम्यग्वर्तमानोगच्छत्यमरलो कताम् यथासंकल्पितांश्चेहसर्वान्कामान्समश्नुते ५ वेदोऽखिलोधर्ममूलंस्मृतिशीलेचतद्विदाम् आ चारश्चैवसाधूनामात्मनस्तुष्टिरेवच ६

धीयतेबंधहेतुफलाभिलाषंविनाशास्त्रीयकर्मणामनुष्ठानंतेषुसम्यग्वृत्तिःसम्य ग्वर्तमानोऽमरलोकतां अमरधर्मकंब्रह्मभावंगच्छतिमोक्षंप्राप्नोतीत्यर्थः तथाभूतश्चसर्वेश्वरत्वादिहापिलोकेसर्वानभिलषितान्प्राप्नोति तथाचछांदोग्येसयदापितृलोककामोभवतिसंकल्पादेवास्यपितरःसमुत्तिष्ठंतीत्यादि ५ इदानींधर्मप्रमाणान्याह वेदोऽखिलोधर्ममूल मिति वेदऋग्यजुःसामाथर्वलक्षणःससर्वोविध्यर्थवादमंत्रात्माधर्मेमूलंप्रमाणं अर्थवादानामपिविध्येकवाक्यतयास्तावकत्वेनधर्मेप्रामा- ण्यात् यदाहजैमिनिः विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेनविधीनांस्युर्मंत्रार्थवादानामपिविधिवाक्यैकवाक्यतयैवधर्मेप्रामाण्यंप्रयोगकाले चानुष्ठेयस्मारकत्वंवेदस्यचधर्मेप्रामाण्यंयथानुभवकरणत्वरूपंन्यायसिद्धम् स्मृत्यादीनामपितन्मूलत्वेनैवप्रामाण्यप्रतिपादनार्थमनूद्यते मन्वादीनांचवेदविदांस्मृतिर्धर्मेप्रमाणम् वेदविदामितिविशेषणोपादानादिदमूलत्वेनैवस्मृत्यादीनांप्रामाण्यमभिमतंशीलंब्रह्मण्यतादिरू

पम् तदाहहारीतः ब्रह्मण्यतादेवपितृभक्ततासौम्यताअपरोपतापिताअनसूयतामृदुताअपारुष्यंतुमैत्रताप्रियवादित्वंकृतज्ञताशरण्य
ताकारुण्यंप्रशांतिश्चेतित्रयोदशविधंशीलम् गोविंदराजस्तुशीलंरागद्वेषपरित्यागइत्याह आचारः कंबलवल्कलाद्याचरणरूपः साधूनां
धार्मिकाणां आत्मतुष्टिश्चवैकल्पिकपदार्थविषयाधर्मेप्रमाणम् तदाहगर्गः वैकल्पिकेआत्मतुष्टिःप्रमाणम् ६ वेदादन्येषांवेदमूलत्वेन
प्रामाण्येऽभिहितेपिमनुस्मृतेः सर्वोत्कर्षज्ञापनायविशेषेणवेदमूलतामाह यःकश्चिदिति यःकश्चित्कस्यचिद्ब्राह्मणादेर्मनुनाधर्मउक्तःस
सर्वोवेदेप्रतिपादितः यस्मात्सर्वज्ञोसौमनुः सर्वज्ञतयाचोत्सन्नविप्रकीर्णपठ्यमानवेदार्थसम्यग्ज्ञात्वालोकहितायोपनिबद्धत्वात् गोविंदरा
जस्तुसर्वज्ञानमयइत्यस्यसर्वज्ञानारब्धइववेदइतिवेदविशेषणतामाह ७ सर्वंत्विति सर्वशास्त्रजातंवेदार्थावगमोचितंज्ञानंमीमांसा
व्याकरणादिकंज्ञानमेवचक्षुस्तेननिखिलंतद्विशेषेणपर्यालोच्यवेदप्रामाण्येनानुष्ठेयमवगम्यस्वधर्मेवर्तितव्यम् ८ श्रुतिस्मृत्युदितमिति

यःकश्चित्कस्यचिद्धर्मोमनुनापरिकीर्तितः ससर्वोऽभिहितोवेदेसर्वज्ञानमयोहिसः ७ सर्वंतुसमवेक्ष्येद-
न्निखिलंज्ञानचक्षुषा श्रुतिप्रामाण्यतोविद्वान्स्वधर्मेनिविशेतवै ८ श्रुतिस्मृत्युदितंधर्ममनुतिष्ठन्हि-
मानवः इहकीर्तिमवाप्नोतिप्रेत्यचानुत्तमंसुखम् ९ श्रुतिस्तुवेदोविज्ञेयोधर्मशास्त्रंतुवैस्मृतिः तेसर्वार्थे-
ष्वमीमांस्येताभ्यांधर्मोहिनिर्बभौ १० योऽवमन्येततेमूलेहेतुशास्त्राश्रयाद्द्विजः ससाधुभिर्बहिष्कार्योनास्ति
कोवेदनिंदकः ११

श्रुतिस्मृत्युदितंधर्ममनुतिष्ठन्मानवइहलोकेधार्मिकत्वेनानुषंगिकींकीर्तिंपरलोकेचधर्मफलमुत्कृष्टंस्वर्गापवर्गादि
स्वरूपंप्राप्नोति अनेनवास्तवगुणकथनेनश्रुतिस्मृत्युदितंधर्ममनुतिष्ठेदितिविधिःकल्प्यते ९ श्रुतिस्त्विति लोकप्रसिद्धसंज्ञासंज्ञिसंबं-
धानुवादोयंश्रुतिस्मृत्योःप्रतिकूलतर्केणामीमांस्यत्वविधानार्थंस्मृतेःश्रुतितुल्यत्वबोधनेनाचारादिभ्योबलवत्त्वप्रतिपादनार्थंचतेनस्मृतिवि
रुद्धाचारोहेयइत्यस्यफलम् श्रुतिर्वेदोमन्वादिशास्त्रंस्मृतिः तेउभेप्रतिकूलतर्कैर्नविचारयितव्येयतस्ताभ्यांनिःशेषेणधर्मोबभौप्रकाश
तांगतः १० योवमन्येतेति यःपुनस्तेद्वेश्रुतिस्मृतीद्विजोऽवमन्येतसशिष्टैर्द्विजानुष्ठेयाध्ययनादिकर्मणोनिःसार्यः पूर्वश्लोकेसामान्येनामी
मांस्येइतिमीमांसानिषेधादनुकूलमीमांसापिनप्रवर्त्तनीयेतिभ्रमोमाभूदितिविशेषयतिहेतुशास्त्राश्रयात् वेदवाक्यमप्रमाणंवाक्यत्वात्

विप्रलंभकवाक्यवदित्यादिप्रतिकूलतर्कावष्टंभेनचार्वाकादिनास्तिकइवनास्तिकोयतोवेदनिंदकः ११ इदानींशीलस्याचारएवांतर्भाव
संभवात्वेदमूलताएवतंत्रंनस्मृतिशीलादिप्रकारनियमइतिदर्शयितुंचतुर्द्धाधर्मप्रमाणमाह वेदइति वेदोधर्मप्रमाणंसकश्चित्प्रत्यक्षः
कश्चित्स्मृत्यानुमितः इत्येवंतात्पर्यंनतुप्रमाणपरिगणने अतएवश्रुतिस्मृत्युदितंधर्ममित्यत्रद्वयमेवाभिहितवान् सदाचारःशिष्टाचारः
स्वस्यचात्मनःप्रियमात्मतुष्टिः १२ अर्थकामेष्विति अर्थकामेष्वसक्तानां अर्थकामलिप्साशून्यानांधर्मोपदेशोयम् येत्वर्थकामसमीह-
यालोकप्रतिपत्त्यर्थंधर्ममनुतिष्ठंतिनतेषांकर्मफलमित्यर्थः धर्मंचज्ञातुमिच्छतांप्रकृष्टंप्रमाणंश्रुतिः प्रकर्षबोधनेनचश्रुतिस्मृतिविरोधेस्मृ-
त्यर्थोनादरणीयइतिभावः अतएवजाबालः श्रुतिस्मृतिविरोधेतुश्रुतिरेवगरीयसी अविरोधेसदाकार्यंस्मार्त्तंवैदिकवत्सता भविष्यपु-
राणेप्युक्तम् श्रुत्यासहविरोधेतुबाध्यतेविषयंविना जैमिनिरप्याह विरोधेत्वनपेक्षंस्यादसतिह्यनुमानकम् श्रुतिविरोधेस्मृतिवाक्यमनपे

वेदःस्मृतिःसदाचारःस्वस्यचप्रियमात्मनः एतच्चतुर्विधंप्राहुःसाक्षाद्धर्मस्यलक्षणम् १२ अर्थकामेष्वस
क्तानांधर्मज्ञानंविधीयते धर्मंजिज्ञासमानानांप्रमाणंपरमंश्रुतिः १३ श्रुतिद्वैधंतुयत्रस्यात्तत्रधर्मावुभौ
स्मृतौ उभावपिहितौधर्मौसम्यगुक्तौमनीषिभिः १४ उदितेऽनुदितेचैवसमयाध्युषितेतथा सर्वथावर्त्तते
यज्ञइतीयंवैदिकीश्रुतिः १५

क्ष्यंअप्रमाणं अनादरणीयम् असतिविरोधेमूलवेदानुमानमित्यर्थः १३ श्रुतिद्वैधमिति यत्रपुनःश्रुत्योरेवद्वैधंपरस्परविरुद्धार्थप्रतिपादनंतत्रद्वावपिधर्मौमनुनास्मृतौतुल्यबलतयाविकल्पानुष्ठानविधानेनचविरोधा
भावः यस्मान्मन्वादिभ्यःपूर्वतरैरपिविद्वद्भिःसम्यक्समीचीनौद्वावपितौधर्मावुक्तौसमानन्यायतयास्मृत्योरपिविरोधेविकल्पइतिप्र
कृतोपयोगः तुल्यबलत्वाविशेषात् तदाहगौतमः तुल्यबलविरोधेविकल्पः १४ अत्रदृष्टांतमाह उदितेऽनुदितेचैवेति सूर्यनक्षत्रव-
र्जितःकालःसमयाध्युषितशब्देनउच्यते उदयात्पूर्वमरुणकिरणवान्प्रविरलतारकोऽनुदितकालः परस्परविरुद्धकालत्रयेपिसर्व
थाविकल्पेनाग्निहोत्रहोमःप्रवर्त्तते देवतोद्देशेनद्रव्यत्यागगुणयोगात्यज्ञशब्दोत्रगौणः उदितेहोतव्यइत्यादिकावैदिकीश्रुतिः १५
निषेकादीति गर्भाधानादिरंत्येष्टिपर्यंतोयस्यवर्णस्यमंत्रैरनुष्ठानकलापउक्तोद्विजातेरित्यर्थः तस्यास्मिन्मानवधर्मशास्त्रेऽध्ययने

श्रवणेऽधिकारः नत्वन्यस्यकस्यचिच्छूद्रादेः एतच्चास्यानुष्ठानंचयथाधिकारंसर्वैरेवकर्त्तव्यंप्रवचनंतस्याध्यापनंव्याख्यानरूपंब्राह्म णकर्तृकमेवेतिविदुषाब्राह्मणेनइत्यत्रव्याख्यातम् १६ सरस्वतीति धर्मस्यस्वरूपंप्रमाणंपरिभाषांचोक्त्वाइदानींधर्मानुष्ठानयोग्यदे शानाह सरस्वतीदृषद्वत्योर्नद्योरुभयोर्मध्यंब्रह्मावर्त्तदेशमाहुः देवनदीदेवनिर्मितशब्दौप्राशस्त्यार्थौ १७ तस्मिन्देशइति तस्मिन्दे शेप्रायेणशिष्टानांसंभवात्तेषांब्राह्मणादिवर्णानांसंकीर्णजातिपर्यंतानांयआचारः पारंपर्यक्रमागतोनत्विदानींतनः ससदाचारोऽभिधी
१८ कुरुक्षेत्रमिति मत्स्यादिशब्दाबहुवचनांताएवदेशविशेषवाचकाः पंचालाः कान्यकुब्जदेशाः शूरसेनकामथुरादेशाः एषब्रह्म र्षिदेशोब्रह्मावर्त्तात्किंचिदूनः १९ एतद्देशइति कुरुक्षेत्रादिदेशजातस्यब्राह्मणस्यसकाशात्सर्वमनुष्याआत्मीयमाचारंशिक्षेरन् २०

निषेकादिश्मशानांतोमंत्रैर्यस्योदितोविधिः तस्यशास्त्रेऽधिकारोस्मिन्ज्ञेयोनान्यस्यकस्यचित् १६ सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् तंदेवनिर्मितंदेशंब्रह्मावर्त्तंप्रचक्षते १७ तस्मिन्देशेयआचारःपारंपर्यक्रमागतः वर्णानांसांतरालानांससदाचारउच्यते १८ कुरुक्षेत्रंचमत्स्याश्चपंचालाःशूरसेनकाः एष ब्रह्मर्षिदेशोवैब्रह्मावर्त्तादनंतरः १९ एतद्देशप्रसूतस्यसकाशादग्रजन्मनः स्वंस्वंचरित्रंशिक्षेरन्पृथिव्यांसर्वमानवाः २० हिमवद्विंध्ययोर्मध्यंयत्प्राग्विनशनादपि प्रत्यगेवप्रयागाच्चमध्यदेशःप्रकीर्त्तितः २१ आसमुद्रात्तुवैपूर्वादासमुद्रात्तुपश्चिमात् तयोरेवांतरंगिर्योरार्यावर्त्तंविदुर्बुधाः २२ कृष्णसारस्तुचरति मृगोयत्रस्वभावतः सज्ञेयोयज्ञियोदेशोम्लेच्छदेशस्त्वतःपरः २३

हिमवदिति उत्तरदक्षिणदिगवस्थितौ हिमवद्विंध्यौपर्वतौतयोर्यन्मध्यंविनशनात्सरस्वत्यंतर्धानदेशात्यत्पूर्वंप्रयागाच्चयत्पश्चिमंसमध्यदेशनामादेशःकथितः २१ आसमुद्रात्विति आपूर्वसमुद्रात् आपश्चिमसमुद्रात्हिमवद्विंध्ययोश्चयन्मध्यंतमार्यावर्त्तदेशंपंडिताजानंति मर्यादायामयमाङ्नाभिविधौ तेनसमुद्रमध्यद्वीपानांनार्यावर्त्तता आर्याअत्रावर्त्ततेपुनःपुनरुद्भवंतीत्यार्यावर्त्तः २२ कृष्णसारस्त्विति कृष्णसारोमृगोयत्रस्वतोवसतिनतुबलादानीतः सयज्ञार्होदेशोज्ञातव्यः अन्योम्लेच्छदेशोनयज्ञार्हइत्यर्थः २३

एतानिति अन्यदेशोद्भवाअपिद्विजातयोयज्ञार्थत्वाद्दृष्टार्थत्वाच्चएतान्देशान्प्रयत्नादाश्रयेरन् शूद्रस्तुवृत्तिपीडितोवृत्त्यर्थमन्यदेशमप्याश्रयेत् २४ एषाधर्मस्येति एषायुष्माकंधर्मस्ययोनिःसंक्षेपेणोक्तायोनिर्ज्ञप्तिकारणंवेदोऽखिलोधर्ममूलमित्यादिनाउक्तमित्यर्थः गोविंदराजस्त्विहधर्मशब्दोऽपूर्वाख्यात्मकधर्मेवर्त्ततइतिविद्वद्भिःसेवितइत्यत्रतत्कारणेऽष्टकादौवापूर्वाख्यस्यधर्मस्ययोनिरितिव्याख्यातवान् संभवश्चोत्पत्तिर्जगतइत्युक्तमिदानींवर्णधर्मान्शृणुत वर्णधर्मशब्दश्चवर्णधर्माश्रमधर्मवर्णाश्रमधर्मगुणधर्मनैमित्तिकधर्माणामुपलक्षकः तेचभविष्यपुराणोक्ताः वर्णधर्मःस्मृतस्त्वेकआश्रमाणामतःपरम् वर्णाश्रमस्तृतीयस्तुगौणोनैमित्तिकस्तथा वर्णत्वमेकमाश्रित्ययोधर्मःसंप्रवर्त्तते वर्णधर्मःसउक्तस्तुयथोपनयनंनृप यस्त्वाश्रमंसमाश्रित्यअधिकारःप्रवर्त्तते सखल्वाश्रमधर्मस्तुभिक्षादंडादिकोयथा वर्णत्वमाश्रमत्वंचयोधिकृत्यप्रवर्त्तते सवर्णाश्रमधर्मस्तुमौंजीयामेखलायथा योगुणेनप्रवर्त्तेतगुणधर्मः

एतान्द्विजातयोदेशान्संश्रयेरन्प्रयत्नतः शूद्रस्तुयस्मिन्कस्मिन्वानिवसेद्वृत्तिकर्षितः २४ एषा धर्मस्यवोयोनिःसमासेनप्रकीर्त्तिता संभवश्चास्यसर्वस्यवर्णधर्मान्निबोधत २५ वैदिकैःकर्मभिःपुण्यै निषेकादिर्द्विजन्मनाम् कार्यःशरीरसंस्कारःपावनःप्रेत्यचेहच २६ गार्भैर्होमैर्जातकर्मचौडमौंजीनिबंधनैः बैजिकंगार्भिकंचैनोद्विजानामपमृज्यते २७

सउच्यते यथामूर्द्धाभिषिक्तस्यप्रजानांपरिपालनम् निमित्तमेकमाश्रित्ययोधर्मःसंप्रवर्त्तते नैमित्तिकःसविज्ञेयःप्रायश्चित्तविधिर्यथा २५ वैदिकैरिति वेदमूलत्वाद्वैदिकैःपुण्यैःशुभैर्मंत्रयोगादिकर्मभिःद्विजातीनांगर्भाधानादिशरीरसंस्कारःकर्त्तव्यःपावनःपापक्षयहेतुःप्रेत्यपरलोकेसंस्कृतस्ययागादिफलसंबंधात् इहलोकेचवेदाध्ययनाद्यधिकारात् २६ कुतःपापसंभवोयेनैषांपापक्षयहेतुत्वमतआह गार्भैरिति येगर्भशुद्धयेक्रियंतेतेगार्भाःहोमग्रहणमुपलक्षणंगर्भाधानादेरहोमरूपत्वात्जातस्ययत्कर्ममंत्रवत्सर्पिःप्राशनादिरूपंतज्जातकर्मचौडंचूडाकरणकर्ममौंजीनिबंधनमुपनयनंएतैर्बैजिकंप्रतिषिद्धमैथुनसंकल्पादिनाचपैतृकरेतोदोषात् यदेनःपापंगार्भिकंचाशुचिमातृगर्भवासजंतत्द्विजातीनांअपमृज्यते २७

८

अतऊर्ध्वमिति एतेब्राह्मणादयोयथाकालंयोयस्यानुकल्पिकोप्युपनयनकालउक्तःषोडशवर्षादिपर्यंतस्तत्रासंस्कृतास्तदूर्ध्वंसावि
त्रीपतिताउपनयनहीनाः शिष्टगर्हिताव्रात्यसंज्ञाभवंतिसंज्ञाप्रयोजनंचव्रात्यानांयाजनंकृत्वेत्यादिनाव्यवहारसिद्धिः ३९ नैतैरिति ए
तैरपूतैर्व्रात्यैर्यथाविधिप्रायश्चित्तमकृतवद्भिःसह आपत्कालेपिकदाचिदध्यापनकन्यादानादीन्संबंधान् ब्राह्मणोनानुतिष्ठेत् ४० कार्ष्ण
रौरववास्तानीति कार्ष्णइतिविशेषानभिधानेपिमृगविशेषःरुरुसाहचर्यान् हारिणमेणेयंवाकार्ष्णंब्राह्मणस्येत्यापस्तंबवचनाच्च कृ-
ष्णामृगोगृह्यते कृष्णामृगरुरुच्छागचर्माणिब्रह्मचारिणउत्तरीयाणिवसीरन् चर्माण्युत्तरीयाणीतिगृह्यवचनात् तथाशणक्षुमामे-
षलोमभवान्यधोवसनानिब्राह्मणादयःक्रमेणपरिदधीरन् ४१ मौंजीति मुंजमयीत्रिगुणासमगुणत्रयनिर्मितासुस्पर्शा
मेखलाकर्त्तव्या क्षत्रियस्यमुर्वमयीज्याधनुर्गुणरूपामेखलाअतोज्यात्वविनाशापत्तेस्त्रिवृत्त्वंनास्तीतिमेधातिथिगोविंदराजौ वैश्यस्य

अतऊर्ध्वंत्रयोप्येतेयथाकालमसंस्कृताः सावित्रीपतिताव्रात्याभवंत्यार्यविगर्हिताः ३९ नैतैरपूतैर्विधि
वदापद्यपिहिकर्हिचित् ब्राह्मान्यौनांश्चसंबंधान्नाचरेद्ब्राह्मणःसह ४० कार्ष्णरौरववास्तानिचर्मा
णिब्रह्मचारिणः वसीरन्नानुपूर्वेणशाणक्षौमाविकानिच ४१ मौंजीत्रिवृत्समाश्लक्ष्णाकार्याविप्रस्य
मेखला क्षत्रियस्यतुमौर्वीज्यावैश्यस्यशाणतांतवी ४२ मुंजालाभेतुकर्त्तव्याःकुशाश्मांतकबल्वजैःत्रि
वृताग्रंथिनैकेनत्रिभिःपंचभिरेववा ४३

शणसूत्रमयी अत्रत्रैगुण्यंअनुवर्त्ततएवत्रिगुणाःप्रदक्षिणामेखलाइति
सामान्येनप्रचेतसात्रैगुण्याभिधानात् ४२ मुंजालाभेत्विति कर्त्तव्याइतिबहुवचननिर्देशाद्ब्रह्मचारित्रयस्यप्रकृतत्वात् मुख्या-
लाभेत्रिष्वप्यपेक्षायाःसमत्वात् कौशादीनांचतिसृणांविधानात् मुंजाद्यलाभइतिबोद्धव्यंकर्त्तव्याइतिबहुवचनमुपपन्नतरंभिन्न
जातिसंबंधितयेतिब्रुवाणस्यमेधातिथेरपिबहुवचनपाठःसंमतःमुंजाद्यलाभेब्राह्मणादीनांत्रयाणांयथाक्रमंकुशादि
मेखलाःकार्याः त्रिगुणेनैकग्रंथिनायुक्तास्त्रिभिर्वापंचभिर्वाअत्रचवाशब्दनिर्देशात् ग्रंथीनांनवियादिभिःक्रमेणसंबंधः
नयथाकुलाचारंविकल्पःग्रंथिभेदस्चायंमुख्यामुख्यापेक्षासंभवाद्गृहीतव्यः ४३

कार्पासमिति पदीयविन्यासविशेषस्योपवीतसंज्ञांवक्ष्यतितन्द्रूर्ध्वंब्राह्मणस्यकार्पासंक्षत्रियस्यशाणसूत्रमयंवैश्यस्यमेषलोमनिर्मितंत्रि वृदितित्रिगुणंकृत्वाऊर्ध्ववृतंदक्षिणावृर्त्तितंएतच्चसर्वत्रसंबध्यतेयद्यपित्रिगुणत्रयमेवोर्ध्ववृतंमनुनोक्तंतथापितत्रिगुणीकृत्यत्रिगुणंका र्यम् तदुक्तंछंदोगपरिशिष्टेऊर्ध्वंतुत्रिवृतंकार्यंतंतुत्रयमधोवृतम् त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रंथिरिष्यते देवलोप्याह यज्ञोपवीतंकुर्वी तसूत्राणिनवतंतवः ४४ ब्राह्मणइति यद्यपिद्वंद्वनिर्देशेनसमुच्चयावगमात् धारणमपिसमुच्चितस्यैवभासंतथापिकेशांतिकोब्राह्मणस्य दंडःकार्यइतितथाप्रतिगृह्येप्सितंदंडमितिविधानेकत्वस्यविवक्षितत्वात् बैल्वःपालाशोवादंडइतिवासिष्ठेविकल्पदर्शनात् एकस्यैवदंडस्य धारणंविकल्पितयोरेवैकब्राह्मणसंबंधात्समुच्चयोद्वंद्वेनानूद्यतेब्राह्मणादयोविकल्पेनद्वौद्वौदंडौवक्ष्यमाणकार्यंकर्त्तुमर्हंति ४५ केशांति कइति केशललाटनासिकापर्यंतपरिमाणक्रमेणब्राह्मणादीनांदंडाःकर्त्तव्याः ४६ ऋजवइति तेदंडाअव्रणाअक्षताःशोभनदर्शनाःस

कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत् शाणसूत्रमयंराज्ञोवैश्यस्याविकसौत्रिकम् ४४ ब्राह्मणोबै ल्वपालाशौक्षत्रियोवाटखादिरौ पैलवौदुंबरौवैश्योदंडानर्हतिधर्मतः ४५ केशांतिकोब्राह्मणस्यदं डःकार्यःप्रमाणतः ललाटसमितोराज्ञःस्यात्तुनासांतिकोविशः ४६ ऋजवस्तेतुसर्वेस्युरव्रणाःसौम्यदर्श नाः अनुद्वेगकरान्नृणांसत्वचोनाग्निदूषिताः ४७ प्रतिगृह्येप्सितंदंडमुपस्थायचभास्करम् प्रदक्षिणंप रीत्याग्निंचरेद्भैक्षंयथाविधि ४८ भवत्पूर्वंचरेद्भैक्षमुपनीतोद्विजोत्तमः भवन्मध्यंतुराजन्योवैश्यस्तुभव दुत्तरम् ४९ मातरंवास्वसारंवामातुर्वाभगिनींनिजाम् भिक्षेतभिक्षांप्रथमंयाचैनंनावमानयेत् ५०

त्वचाः अग्निदाहरहिताभवेयुः ४७ नचतैःप्राणिजातमुद्वेजनीयमित्याह प्रतिगृह्येप्सितमिति उक्तलक्षणंप्राप्तुमिष्टंदंडंगृहीत्वा आ दित्याभिमुखंस्थित्वाग्निंप्रदक्षिणीकृत्ययथाविधिभैक्षंयाचेत् ४८ भवदिति ब्राह्मणोभवतिभिक्षांदेहीतिभवच्छब्दपूर्वंभिक्षांयाच नवाक्यमुच्चारयेत् क्षत्रियोभिक्षांभवतिदेहीतिभवन्मध्यंवैश्योभिक्षांदेहिभवतीतिभवदुत्तरम् ४९ मातरंवेति उपनयनांगभूतांभि क्षांप्रथमंमातरंभगिनींवामातुर्वाभगिनींसहोदरांयाचेत् याचैनंब्रह्मचारिणंप्रत्याख्यानेननावमन्येत्पूर्वासंभवेउत्तरापरिग्रहः ५०

समाहृत्येति तद्वेस्यंबहुप्य औहृत्ययावदन्नतृप्तिमात्रोचितंगुरवेभिवेद्यनिवेदनंकृत्वा अमाययानकदन्नेनसदन्नंभच्छाद्यएवमेतद्गुरु
र्ग्रहीष्यतीत्यादिमायाव्यतिरेकेणतदनुज्ञात आचमनंकृत्वाशुचि सन्भुंजीतप्राङ्मुखः ५१ इदानींकाम्यभोजनमाह आयुष्यमिति आ
युषेहितमन्नंप्राङ्मुखोभुंक्ते आयु:काम प्राङ्मुखोभुंक्तइत्यर्थः यशसेहितंदक्षिणामुखः श्रियमिच्छन्प्रत्यङ्मुखः ऋतंसत्यंतत्फलमिच्छ
न् उदङ्मुखोभुंजीत ५२ उपस्पृश्येति निवेद्यगुरवेभ्यो यादाचम्येतियद्यपिभोजनात्प्रागाचमनंविहितंतथाप्यद्भिः खानिचसंस्पृशेदितिगु
णविधानार्थोऽनुवाद नित्यंअन्नत्वर्यानंतरमपिद्विज आचम्यान्नंभुंजीतसमाहितोऽनन्यमनाः भुक्त्वाचाचामेतिसम्यग्यथाशास्त्रंतेन प्रक्षा
ल्यहस्तौपादौत्रिः पिवेदंबुवीक्षितंइत्यादिदक्षाद्युक्तमपिसंगृण्हातिजलेनखानींद्रियाणिषट्छिद्राणिचस्पृशेत् तानिचशिरःस्थानिप्रा
णचक्षुःश्रोत्रादीनिग्रहीतव्यानिखानिचोपस्पृशेत्शीर्षण्यानीतिगोतमवचनात् उपस्पर्शनंकृत्वाखानिचसंस्पृशेदितिपृथग्विधानात्

समाहृत्यतु तद्भैक्षंयावदर्थममायया निवेद्यगुरवेऽश्नीयादाचम्यप्राङ्मुखःशुचिः ५१ आयुष्यंप्राङ्मुखो
भुंक्तेयशस्यंदक्षिणामुखः श्रियंप्रत्यङ्मुखोभुंक्तेऋतंभुंक्तेह्युदङ्मुखः ५२ उपस्पृश्यद्विजोनित्यमन्न
मद्यात्समाहितः भुक्त्वाचोपस्पृशेत्सम्यगद्भिःखानिचसंस्पृशेत् ५३ पूजयेदशनंनित्यमद्याच्चैतदकुत्स
यन् दृष्ट्वाहृष्येत्प्रसीदेच्चप्रतिनंदेच्चसर्वशः ५४ पूजितंह्यशनंनित्यंबलमूर्जंचयच्छति अपूजितं
तुतद्भुक्तमुभयंनाशयेदिदम् ५५

त्रिरब्भक्षणमात्रमाचमनंखस्पर्शनादिकमितिकर्त्तव्यताइतिदर्शितम् ५३ पूजयेदश
नमिति सर्वदाअन्नंपूजयेत् प्राणार्थत्वेनध्यायेत् तदुक्तमादिपुराणे अन्नंविष्णुःस्वयंप्राहइत्यनुवृत्तौप्राणार्थमांसदाध्यायेत्समांसंपू
जयेत्सदा अनिंदंश्चैतदद्यात्तु दृष्ट्वाहृष्येत्प्रसीदेच्चेतिहेत्वंतरमपिखेदमन्नदर्शनेनत्यजेत् प्रतिनंदेत् नित्यमस्माकमेतदस्त्वितिअभि
धायवंदनंप्रतिनंदनम् तदुक्तमादिपुराणे अन्नंदृष्ट्वाप्रणम्यादौप्रांजलिः कथयेत्ततः अस्माकंनित्यमस्त्वेतदितिभक्त्यास्तुवन्नमेत् सर्व
शःसर्वमन्नम् ५४ पूजितमिति यस्मात्पूजितमन्नंसामर्थ्यंवीर्यंचददातिअपूजितंपुनरेतदुभयंनाशयतितस्मात्सर्वदाऽन्नंपूजयेदितिपू
र्वेणैकवाक्यतापन्नमिदम् फलश्रवणंसंध्यावंदनादावुपात्तदुरितक्षयवन्नित्यंकामनाविषयत्वेनापिनित्यश्रुतिरविहनानित्यस्मृतिवि

रोधात् फलश्रवणं स्तुत्यर्थमिति तु मेधातिथिगोविंदराजौ ५५ नोच्छिष्टमिति भक्तावशेषं कस्यचिन्न दद्यात् चतुर्थ्याशासायां संबंधमात्रविवक्षया षष्ठी अनेनैव सामान्यनिषेधेन शूद्रस्याप्युच्छिष्टदाननिषेधे सिद्धे नोच्छिष्टं न हविष्कृतमिति शूद्रगोचरनिषेधश्चातुर्थः स्नातकव्रतत्वार्थः दिवासायं भोजनयोश्च मध्ये न भुंजीत वारद्वयेप्यतिभोजनं न कुर्यात् नातिसौहित्यमाचरेदिति चातुर्थः स्नातकव्रतार्थः उच्छिष्टः सन् क्वचिन्न गच्छेत् ५६ अतिभोजने दोषमाह अनारोग्यमिति अरोगो रोगाभावः तस्मै हितमारोग्यं आयुषे हितमायुष्यं यस्मादतिभोजनमनारोग्यमनायुष्यं च भवति अजीर्णजनकत्वेन रोगमरणहेतुत्वात् अस्वर्ग्यं च स्वर्गहेतुयागादिविरोधित्वात् अपुण्यमितरपुण्यप्रतिपक्षत्वात् लोकविद्विष्टं बहुभोजितया लोकैर्निंदनात् तस्मात्तन्न कुर्यात् ५७ ब्राह्मेणेति ब्राह्मादिसंज्ञेयं शास्त्रे संव्यवहारार्थं स्तुत्यर्थं च न तु सुरव्यं ब्रह्मदेवताकत्वं संभवति अयागरूपत्वात् तीर्थशब्दोपि पावनगुणयोगात् ब्राह्मेण तीर्थेन सर्वदा विप्रादिराचामेत्

नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथांतरा न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद्व्रजेत् ५६ अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ५७ ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ५८ अंगुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते कायमंगुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ५९ त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ६०

कः प्रजापतिस्तदीयस्तस्येदमित्यण् इकारश्चांतादेशः त्रैदशिको दैवः ताभ्यां वा पित्र्येण तु तीर्थेन न कदाचिदाचामेत् अप्रसिद्धत्वात् ५८ ब्राह्मादितीर्थान्याह अंगुष्ठमूलस्येति अंगुष्ठमूलस्याधोभागो ब्राह्मं कनिष्ठांगुलिमूले कायं अंगुलीनामग्रे दैवं अंगुष्ठप्रदेशिन्योर्मध्ये पित्र्यं तीर्थं मन्वादय आहुः यद्यपि कायमंगुलिमूले तयोरध इत्यत्र चांगुलिमात्रं श्रुतं तथापि स्मृत्यंतराद्विशेषपरिग्रहः तथा च याज्ञवल्क्यः कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ५९ सामान्येनोपदिष्टस्याचमनस्यानुष्ठानक्रममाह त्रिराचामेदिति पूर्वं ब्राह्मादितीर्थेन जलगंडूषत्रयं पिबेत् अनंतरं संवृत्तौष्ठाधरौ वारद्वयमंगुष्ठमूलेन संमृज्यात् संहतांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं इति दक्षेण विशेषाभिधानात् खानि चेंद्रियाणि

जलेनस्पृशेन्मुखस्यसन्निधानान्मुखखान्येव गोतमोप्याह खानिचोपस्पृशेच्छीर्षण्यानिहृदयंतज्र्योतिः पुरुषइतिउपनिषत्प्रकृत
देशत्वेनात्मनः श्रवणादात्मानंहृदयंशिरश्चाद्भिरेवस्पृशेत् ६० अनुष्णाभिरिति अनुष्णीकृताभिः फेनवर्जिताभिरद्भिःशौचमिच्छन्
चमिच्छन् एकांतेजनैरनाकीर्णेसुचिदेशइत्यर्थः प्राङ्मुख उदङ्मुखोवासर्वदाचामेत् आपस्तंबेनतप्ताभिश्चकारणादित्यभिधानात् व्या
ध्यादिकारणव्यतिरेकेणनाचामेत् व्याधौतुउष्णीकृताभिरप्याचमनेदोषाभावः तीर्थव्यतिरेकेणाचमनेशौचाभावइतिदर्शयितुमु
क्तस्यापितीर्थस्यपुनर्वचनम् ६१ हृद्गाभिरिति आचमनजलपरिमाणमाह ब्राह्मणोहृदयगामिनीभिः क्षत्रियःकंठगामिनीभिः वै
श्योंतरास्यप्रविष्टाभिः कंठमप्राप्ताभिरपिशूद्रोजिव्होष्ठांतेनापिस्पृष्टाभिरद्भिः पूतोभवतिअंततइतितृतीयार्थेतसिः ६२ उद्धृतेइति आच
मनांगतामुपवीतस्यदर्शयितुमुपवीतलक्षणंततः प्रसंगेनप्राचीनावीतीत्यादिलक्षमाह दक्षिणेपाणावुद्धृतेवामस्कंधस्थितेदक्षिणस्कंधाव

अनुष्णाभिरफेनाभिरद्भिस्तीर्थेनधर्मवित् शौचेप्सुःसर्वदाचामेदेकांतेप्रागुदङ्मुखः ६१ हृद्गाभिःपूय
तेविप्रः कंठगाभिस्तुभूमिपः वैश्योद्भिःप्राशिताभिस्तुशूद्रःस्पृष्टाभिरंततः ६२ उद्धृतेदक्षिणेपाणावुप
वीत्युच्यतेद्विजः सव्येप्राचीनआवीतीनिवीतीकंठसज्जने ६३ मेखलामजिनंदंडमुपवीतंकमंडलुम्
अप्सुप्रास्यविनष्टानिगृण्हीतान्यानिमंत्रवत् ६४ केशांतःषोडशेवर्षेब्राह्मणस्यविधीयते राजन्यबंधोर्द्वा
विंशेवैश्यस्यद्व्यधिकेततः ६५

लंबेयज्ञसूत्रेवस्त्रेवाउपवीतीद्विजः कथ्यतेवामपाणावुद्धृतेदक्षिणस्कंधस्थितेवामस्कंधाव
येप्राचीनावीतीभण्यतेसव्येप्राचीनआवीतीतिछंदोनुरोधादुक्तम् तथाचगोभिलः दक्षिणंबाहुमुद्धृत्यशिरोवधायसव्येंसेप्रतिष्ठापयति
दक्षिणस्कंधमवलंबनंभवतिएवंयज्ञोपवीतीभवतिसव्यंबाहुमुद्धृत्यशिरोऽवधायदक्षिणेंसेप्रतिष्ठापयतिसव्यंकक्षमवलंबंभवत्येवंप्राची
नावीतीभवति निवीतीकंठसज्जनइतिशिरोवधायदक्षिणपाण्यादावप्यनुद्धृतेकंठदेवसज्जनेऋजुमालंबेयज्ञसूत्रेवस्त्रेचनिवीतीभ
वति ६३ मेखलामिति मेखलादीनिविनष्टानिभिन्नानिछिन्नानिचजलेप्रक्षिप्यान्यानिस्वस्वगृह्योक्तमंत्रैर्गृण्हीयात् ६४ केशांतइति के-
शांतारव्योगृह्योक्तसंस्कारोगर्भादिसंख्यावर्षाणामितिबोधायनवचनात्गर्भषोडशेवर्षेब्राह्मणस्यक्षत्रियस्यगर्भद्वाविंशेवैश्यस्यततोद्व्यधिके

र्भिन्नतुर्विंशेकर्त्तव्यः ६५ अमंत्रिकेतिइयमावृदयंजातकर्मादिक्रियाकलापःसमग्रउक्तकालक्रमेणशरीरसंस्कारार्थंस्त्रीणाममंत्रकःकार्यः ६६ अनेनोपनयनेऽपिप्राप्तेविशेषमाह वैवाहिकइति विवाहविधिरेवस्त्रीणांवैदिकःसंस्कारःउपनयनाख्योमन्वादिभिःस्मृतःपतिसेवैवगुरुकुलेवासोवेदाध्ययनरूपः गृहकृत्यमेवसायंप्रातःसमिद्धोमरूपोऽग्निपरिचर्यातस्माद्विवाहादेरुपनयनस्थानेविधानादुपनयनादेर्निवृत्तिरिति ६७ एषइति औपनायनिकइतिअनुशतिकादित्वादुभयपदवृद्धिः अयंद्विजातीनामुपनयनसंबंधीकर्मकलापउक्तःउत्पत्तेर्द्वितीयजन्मनोव्यंजकः ६८ इदानीमुपनीतस्ययेनकर्मणायोगस्तंशृणुतइत्याह उपनीयगुरुरिति गुरुःशिष्यमुपनीयप्रथममेकालिंगेगुदेतिस्रइत्यादिवक्ष्यमाणंशौचंस्नानाचमनाद्याचारमग्नौसायंप्रातःसमिद्धोमानुष्ठानंसमंत्रकसंध्योपासनविधिंचशिक्षयेत् ६९ अध्येष्य-

अमंत्रिकातुकार्येयंस्त्रीणामावृदशेषतः संस्कारार्थंशरीरस्ययथाकालंयथाक्रमम् ६६ वैवाहिकोविधिःस्त्रीणांसंस्कारोवैदिकःस्मृतः पतिसेवागुरौवासोगृहार्थोऽग्निपरिक्रिया ६७ एषप्रोक्तोद्विजातीनामौपनायनिकोविधिः उत्पत्तिव्यंजकःपुण्यः कर्मयोगंनिबोधत ६८ उपनीयगुरुःशिष्यंशिक्षयेच्छौचमादितः आचारमग्निकार्यंचसंध्योपासनमेवच ६९ अध्येष्यमाणस्त्वाचांतोयथाशास्त्रमुदङ्मुखः ब्रह्मांजलिकृतोध्याप्योलघुवासाजितेंद्रियः ७० ब्रह्मारंभेवसानेचपादौग्राह्यौगुरोःसदा संहत्यहस्तावध्येयंसहिब्रह्मांजलिःस्मृतः ७१ व्यस्तहस्तपाणिनाकार्यमुपसंग्रहणंगुरोः सव्येनसव्यःस्प्रष्टव्योदक्षिणेनचदक्षिणः ७२

माणइति अध्ययनंकरिष्यमाणःशिष्योयथाशास्त्रंकृताचमनउत्तराभिमुखःकृतांजलिःपवित्रवस्त्रःकृतेंद्रियसंयमोगुरुणाअध्याप्यःप्राङ्मुखोदक्षिणतःशिष्यउदङ्मुखोवेतिगौतमवचनात् प्राङ्मुखस्यापिअध्ययनंब्रह्मांजलिकृतइतिवाहिताग्न्यादिषुइत्यनेनकृतशब्दस्यपरनिपातः ७० ब्रह्मारंभेवसानेचेति वेदाध्ययनस्यारंभेकर्त्तव्येसमापनेचकृतेगुरोःपादोपसंग्रहणंकर्त्तव्यंहस्तौसंहत्यसंश्लिष्टौकृत्वाऽध्येतव्यंसएवब्रह्मांजलिःस्मृतइतिपूर्वश्लोकोक्तब्रह्मांजलिशब्दार्थव्याकारः ७१ व्यस्तपाणिनेति पादोपसंग्रहणंकार्यमित्यनंतरमुक्तंतद्व्यस्तपाणिनाकार्यमितिविधीयतेकीदृशोव्यासःकार्यइत्यतआह सव्येनपाणिनासव्यः

पादोदक्षिणेनपाणिनादक्षिणःपादःगुरोःस्प्रष्टव्यःउत्तानहस्ताभ्यांचैवंपादयोःस्पर्शनंकार्यम् यदाहपैठीनसिःउत्तानाभ्यांहस्ताभ्यां दक्षिणेनदक्षिणंसव्यंसव्येनपादावभिवादयेत् दक्षिणोपरिभावेनव्यत्यासोवायंशिष्टसमाचारात् ७२ अध्येष्यमाणमिति अध्ययनं करिष्यमाणंशिष्यंसर्वदाअनलसोगुरुरधीष्वभोइतिप्रथमंवदेत् शेषेविरामोस्त्वित्यभिधायविरमेत्निवर्त्तेत ७३ ब्रह्मणःप्रणवमिति ब्रह्मणोवेदस्याध्ययनारंभेअध्ययनसमाप्तौचोंकारंकुर्यात् यस्मात्पूर्वंयस्योंकारोनकृतस्तत्स्रवतिशनैःशनैर्नश्यतियस्यपुरस्तान्नकृत स्तद्विशीर्यतिअवस्थितिमेवनलभते ७४ प्राक्कूलानिति प्राक्कूलान्प्रागग्रान्दर्भान्अध्यासीनःपवित्रैःकुशैःकरद्वयस्थैःपवित्रीकृतः प्राणायामास्त्रयःपंचदशमात्राइतिगोतमस्यस्मरणात् पंचदशमात्रैस्त्रिभिःप्राणायामैःप्रयतःअकारादिलघ्वक्षरकालश्चमात्राततोऽध्य यनार्थमोंकारमर्हति ७५ अकारंचेति एतदक्षरमेतांचेतिवक्ष्यति तस्यापशेषः अकारमुकारंमकारंचप्रणवावयवभूतंब्रह्मावेदत्रयात

अध्येष्यमाणंतुगुरुर्नित्यकालमतंद्रितः अधीष्वभोइतिब्रूयाद्विरामोस्त्वितिचारमेत् ७३ ब्रह्मणःप्र णवंकुर्यादादावंतेचसर्वदा स्रवत्यऽनोंकृतंपूर्वंपरस्ताच्चविशीर्यति ७४ प्राक्कूलान्पर्युपासीनःपवित्रै श्चैवपावितः प्राणायामैस्त्रिभिःपूतस्ततओंकारमर्हति ७५ अकारंचाप्युकारंचमकारंचप्रजापतिः वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीतिच ७६ त्रिभ्यएवतुवेदेभ्यःपादंपादमदूदुहत् तदित्यृचोस्याःसावि त्र्याःपरमेष्ठीप्रजापतिः ७७ एतदक्षरमेतांचजपन्व्याहृतिपूर्विकाम् संध्ययोर्वेदविद्विप्रोवेदपुण्येन युज्यते ७८

ऋग्यजुःसामलक्षणात् भूर्भुवःस्वरितिव्याहृतित्रयंचक्रमेणनिरदुहत्उद्धृतवान् ७६ त्रिभ्यएवेति तथात्रि भ्यएववेदेभ्यःऋग्यजुःसामभ्यःतदित्यृचइतिप्रतीकेनानूदितायाःसावित्र्याःपादंपादमिति त्रीन्पादान्ब्रह्माचकर्षपरमेस्थानेतिष्ठती तिपरमेष्ठी ७७ यतएवमतः एतदक्षरमिति एतदक्षरमोंकाररूपंएतांचत्रिपदांसावित्रींव्याहृतित्रयपूर्विकांसंध्याकालेजपन्वेद ज्ञोविप्रादिर्वेदत्रयाध्ययनपुण्येनयुक्तोभवतिअतःसंध्याकालेप्रणवव्याहृतित्रयोपेतांसावित्रींजपेदितिविधिःकल्प्यते ७८ सहस्रकृ त्वइति संध्यायामन्यत्रकालेएतत्रिकंप्रणवव्याहृतित्रयसावित्र्यात्मकंत्रिकंग्रामाद्बहिर्नदीतीरारण्यादौसहस्रावृत्तिंजपित्वामह

तोपिपापात्सर्पइवकंचुकान्मुच्यते तस्मात्पापक्षयार्थमिदंजपनीयमिति अप्रकरणेपिलाघवार्थमुक्तम् अन्यत्रैतत्त्रयोच्चारणमपिपु नःकर्त्तव्यंस्यात् ७९ एतयर्चेति संध्यायामन्यत्रसमयेऋचैतयासावित्र्याविमुक्तस्त्यक्तसावित्रीजपःस्वकीययाक्रियया सायंप्रातर्होमा दिरूपयास्वकालेत्यक्तोब्राह्मणःक्षत्रियोवैश्योपिसज्जनेषुनिंदांगच्छतितस्मात्स्वकालेसावित्रीजपंस्वक्रियांचनत्यजेत् ८० ओंकारपू र्विकेति ओंकारपूर्विकास्तिस्रोव्याहृतयः भूर्भुवःस्वरित्येताअक्षरब्रह्मावाप्तिफलत्वेनाव्ययाःत्रिपदाचसावित्रीब्रह्मणोवेदस्यमुख माद्यंतत्पूर्वकवेदाध्ययनारंभात् अथवाब्रह्मणःपरमात्मनःप्राप्तेर्द्वारमेतदध्ययनजपादिनानिष्पापस्यब्रह्मज्ञानप्रकर्षेणमोक्षावाप्तेः ८१ अतएवाह योऽधीतइति यःप्रत्यहमनलसःसन्सावित्रींप्रणवव्याहृतियुक्तांवर्षत्रयमधीतेसपरंब्रह्माभिमुखेनगच्छतिसवायुभू तोवायुरिवकामचारीजायतेखंब्रह्मतदेवास्यमूर्तिरितिखमूर्तिमान्भवतिशरीरस्यापिनाशात्ब्रह्मैवसंपद्यते ८२ एकाक्षरमिति एका

सहस्रकृत्वस्त्वभ्यस्यबहिरेतत्त्रिकंद्विजः महतोप्येनसोमासात्त्वचेवाऽहिर्विमुच्यते ७९ एतयर्चाविसंयु क्तःकालेचक्रिययास्वया ब्रह्मक्षत्रियविड्योनिर्गर्हणांयातिसाधुषु ८० ओंकारपूर्विकास्तिस्रोमहाव्या हृतयोऽव्ययाः त्रिपदाचैवसावित्रीविज्ञेयंब्रह्मणोमुखम् ८१ योऽधीतेऽहन्यहन्येतांस्त्रीणिवर्षाण्यतं द्रितः सब्रह्मपरमभ्येतिवायुभूतःखमूर्तिमान् ८२ एकाक्षरंपरंब्रह्मप्राणायामाःपरंतपः सावित्र्यास्तु परंनास्तिमौनात्सत्यंविशिष्यते ८३ क्षरंतिसर्वावैदिक्योजुहोतियजतिक्रियाः अक्षरंदुष्करंज्ञेयंब्रह्मचै वप्रजापतिः ८४

क्षरमोंकारः परब्रह्मपरंब्रह्मावाप्तिहेतुत्वात् ओंकारस्यजपेनतदर्थस्यचपरंब्रह्मणोभावनयातदवाप्तेःप्राणाया मः सप्रणवसव्याहृतिसशिरस्कगायत्रीभिः त्रिरावृत्तिभिः कृताश्चांद्रायणादिभ्योपिपरंतपःप्राणायामाइतिबहुवचननिर्देशात्त्रयोवश्यंक र्तव्याइत्युक्तम् सावित्र्याःप्रकृष्टमन्यन्मंत्रजातंनास्तिमौनादपिसत्यंवाग्विशिष्यते एषांचतुर्णांस्तुत्याचत्वार्येतान्युपासनीयानीतिविधिः कल्प्यते धरणीधरेणतु एकाक्षरपरंब्रह्मप्राणायामपरंतपइतिपठितंव्याख्यातंचएकाक्षरंपरंयस्यतदेकाक्षरपरंएवंप्राणायामपरमिति मेधातिथिप्रभृतिभिर्वृद्धैरलिखितंयतःलिखनात्पाठांतरंतत्रस्वतंत्रोधरणीधरः ८३ क्षरंतीति सर्वावेदविहिताहोमयागादिरूपाःक्रि याःस्वरूपतःफलतश्चविनश्यंतिअक्षरंतुप्रणवरूपमक्षयंब्रह्मप्राप्तिहेतुत्वात् फलद्वारेणाक्षरंब्रह्मीभावस्याविनाशात् कथमस्यब्र-

ह्मप्राप्तिहेतुत्वमतआह ब्रह्मचैवेति चशब्दोहेतौयस्मात्प्रजानामधिपतिर्यत्ब्रह्मतदेवायमोंकारःस्वरूपतोब्रह्मप्रतिपादकत्वेनचास्यब्र
ह्मत्वंउभयथापिब्रह्मत्वेनप्रतिपादकत्वेनचायमुपासितोजपकालेमोक्षहेतुरनेनदर्शितम् ८४ विधियज्ञादिति विधिविषयोयज्ञोविधि
यज्ञोदर्शपौर्णमासादिस्तस्मात्प्रकृतानांप्रणवादीनांजपयज्ञोदशगुणाधिकःसोप्युपांशुश्चेदनुष्ठितःतदाशतगुणाधिकःयत्समीपस्थोपि
परोनशृणोतितदुपांशुमानसस्तुजपःसहस्रगुणाधिकःजिह्वौष्ठंमनागपिनचलतिसमानसः ८५ येपाकयज्ञाइति ब्रह्मयज्ञादन्येयेपं-
चमहायज्ञांतर्गतावैश्वदेवहोमबलिकर्मनित्यश्राद्धातिथिभोजनात्मकाश्चत्वारःपाकयज्ञाःविधियज्ञादर्शपौर्णमासादयःतैःसहिताजप
यज्ञस्यषोडशीमपिकलांनप्राप्नुवंतिजपयज्ञस्यषोडशांशेनापिनसमाइत्यर्थः ८६ जप्येनैवेति ब्राह्मणोजप्येनैवनिःसंदेहांसिद्धिंलभ
तेमोक्षप्राप्तियोग्योभवति अन्यद्वैदिकंयागादिकंकरोतुनकरोतुवायस्मान्मैत्रोब्राह्मणःब्रह्मणःसंबंधीब्रह्मणिलीयतइत्यागमेषूच्यते

विधियज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः उपांशुःस्याच्छतगुणःसाहस्रोमानसःस्मृतः ८५ येपाकयज्ञा
श्चत्वारोविधियज्ञसमन्विताः सर्वेतेजपयज्ञस्यकलांनार्हंतिषोडशीम् ८६ जप्येनैवतुसंसिध्येद्ब्राह्मणो
नात्रसंशयः कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते ८७ इंद्रियाणांविचरतांविषयेष्वपहारिषु संयमे
यत्नमातिष्ठेद्विद्वान्यंतेववाजिनाम् ८८ एकादशेंद्रियाण्याहुर्यानिपूर्वेमनीषिणः तानिसम्यक्प्रव-
क्ष्यामियथावदनुपूर्वशः ८९ श्रोत्रंत्वक्चक्षुषीजिह्वानासिकाचैवपंचमी पायूपस्थंहस्तपादंवाक्चैवद
शमीस्मृता ९०

मित्रमेवमैत्रःस्वार्थेऽण्यागादिषुपशुबीजादिवधान्नसर्वप्राणिप्रियतासंभवतितस्माद्यागादिनाविनापिप्रणवा
दिजपनिष्ठोनिस्तरतीतिजपप्रशंसानतुयागादीनांनिषेधःतेषामपिशास्त्रीयत्वात् ८७ इदानींसर्ववर्णानुष्ठेयंसकलपुरुषार्थोपयुक्त
मिंद्रियसंयममाह इंद्रियाणामिति इंद्रियाणांविषयेष्वपहरणशीलेषुवर्त्तमानानांक्षयित्वादिविषयदोषान्जानन्संयमेयत्नंकुर्यात्सा
रथिरिवरथनियुक्तानामश्वानाम् ८८ एकादशेति पूर्वपंडितायान्येकादशेंद्रियाण्याहुस्तान्यवर्त्तांशिष्यार्थंसर्वाणिकर्मतोनामतश्चक्रमा
द्वक्ष्यामि ८९ श्रोत्रमिति तेषुएकादशसुश्रोत्रादीनिदशैतानिवहिरिंद्रियाणिनामतोनिर्दिशति पायूपस्थंहस्तपादमितिद्वंद्वैक्यंप्राणित्

यंगेनांगानामितिप्राण्यंगहृद्दत्वादेकवद्भावः ९० बुद्धींद्रियाणीति एषांदशानांमध्येश्रोत्रादीनिपंचक्रमोक्तानिबुद्धेःकरणत्वात्बुद्धींद्रियाणि पाय्वादीनित्वोत्सर्गादिकर्मकरणत्वात्कर्मेंद्रियाणितद्विदोवदंति ९१ एकादशमिति एकादशसंख्यापूरकंचमनोरूपमंतरिंद्रियंज्ञातव्यम् स्वगुणेनसंकल्परूपेणउभयरूपेंद्रियगणप्रवर्त्तकस्वरूपम् अतएवयस्मिन्मनसिजितेउभावपिपंचकौबुद्धींद्रियकर्मेंद्रियगणौजितौभवतः पंचकाविति तदस्यपरिमाणमित्यनुवृत्तौसंख्यायाःसंज्ञासंघसूत्राध्ययनेष्विति पंचसंख्यापरिमितिसंघार्थेकः ९२ मनोधर्मसंकल्पमूलत्वादिंद्रियाणांप्रायेणप्रवृत्तेःकिमर्थमिंद्रियनिग्रहःकर्त्तव्यइत्यतआह इंद्रियाणामिति यस्मादिंद्रियाणांविषयेषुप्रसक्त्यादृष्टादृष्टंचदोषंनिःसंदेहंप्राप्नोतितान्येवपुनरिंद्रियाणिसम्यक्नियम्यसिद्धिंमोक्षादिपुरुषार्थयोग्यतारूपांलभतेतस्मादिंद्रियसंयमंकुर्यादिति

बुद्धींद्रियाणिपंचैषांश्रोत्रादीन्यनुपूर्वशः कर्मेंद्रियाणिपंचैषांपाय्वादीनिप्रचक्षते ९१ एकादशंमनोज्ञेयंस्वगुणेनोभयात्मकम् यस्मिन्जितेजितावेतौभवतःपंचकौगणौ ९२ इंद्रियाणांप्रसंगेनदोषमृच्छत्यसंशयम् सन्नियम्यतुतान्येवततःसिद्धिंनियच्छति ९३ नजातुकामःकामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते ९४ यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत् प्रापणात्सर्वकामानांपरित्यागोविशिष्यते ९५ नतथैतानिशक्यंतेसंनियंतुमसेवया विषयेषुप्रजुष्टानियथाज्ञानेननित्यशः ९६

शेषः ९२ किमिंद्रियसंयमेनविषयोपभोगादेवलब्धकामोनिवर्त्स्यतीत्याशंक्याह नजात्विति नकदाचित्कामोभिलाषः काम्यंतइतिकामाविषयाःतेषामुपभोगेननिवर्त्तते किंतुघृतेनाग्निरिवाधिकाधिकतममेववर्द्धते प्रात्यहमुपभोगस्यापिप्रतिदिनंतदधिकभोगवांच्छादर्शनात् अतएवविष्णुपुराणेययातिवाक्यम् यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः एकस्यापिनपर्याप्तंतदित्यतितृषंत्यजेत् तथा पूर्णंवर्षसहस्रंमेविषयासक्तचेतसः नथाप्यनुदिनंतृष्णायत्तेष्वेवाहिजायते ९४ यश्चैतानिति यएतान्सर्वान्विषयान्प्राप्नुयात् यश्चैतान्कामानुपेक्षतेतयोर्विषयोपेक्षकःश्रेयान्तस्मात्सर्वकामप्राप्तेस्तदुपेक्षाप्रशस्यातथाहिविषयलोलुपस्यतत्साधनायुत्पादनेकप्रसंगतोविपत्तौचक्लेशानिरासेनतुविषयविरतस्य ९५ इदानीमिंद्रियसंयमोपायमाह नतथेति एतानींद्रियाणिविषयेषुप्रसक्तानित-

यानासेवयाविषयसन्निधिवर्जनरूपयानियंतुंनशक्यंतेदुर्निवारत्वात् यथासर्वदाविषयाणांक्षयित्वादिदोषज्ञानेनशरीरस्यचास्थिस्थूलमित्यादिवक्ष्यमाणदोषचिंतनेनेनतस्माद्विषयदोषज्ञानादिनाबहिरिंद्रियाणिमनश्चनियच्छेत् ९६ यस्मादनियमितंमनोविकारस्यहेतुःस्यादतआह वेदाइति वेदाध्ययनदानयज्ञनियमतपांसिभोगादिविषयसेवासंकल्पशीलिनोनकदाचित्फलसिद्ध्येप्रभवंति ९७ जितेंद्रियस्यस्वरूपमाह श्रुत्वेति स्तुतिवाक्यंनिंदावाक्यंचश्रुत्वासुखस्पर्शंदुकूलादिदुःखस्पर्शंमेषकंबलादिस्पृष्ट्वासुरूपंकुरूपंचदृष्ट्वास्वादुअस्वादुचभुक्त्वासुरभिमसुरभिंचघ्रात्वायस्यनहर्षविषादौसजितेंद्रियोज्ञातव्यः ९८ एकेंद्रियासंयमोपिनिवार्यतइत्याह इंद्रियाणांतिति सर्वेषामिंद्रियाणांमध्येयद्येकमपींद्रियंविषयप्रवणंभवतिततोस्यविषयपरस्यइंद्रियांतरैरपितत्त्वज्ञानंक्षरतिनव्यवतिष्ठतेचर्मनिर्मितोदकपात्रादिवैकेनापिच्छिद्रेणसर्वस्थानस्यमेवोदकंनव्यवतिष्ठते ९९ इंद्रियसंयमस्यसर्वपुरुषार्थहेतुतांदर्शयति वशेकृत्वेति बहि

वेदास्त्यागश्चयज्ञाश्चनियमाश्चतपांसिच नविप्रदुष्टभावस्यसिद्धिंगच्छंतिकर्हिचित् ९७ श्रुत्वास्पृष्ट्वाचदृष्ट्वाचभुक्त्वाघ्रात्वाचयोनरः नहृष्यतिग्लायतिवासविज्ञेयोजितेंद्रियः ९८ इंद्रियाणांतुसर्वेषांयद्येकंक्षरतींद्रियम् तेनास्यक्षरतिप्रज्ञादृतेःपादादिवोदकम् ९९ वशेकृत्वेंद्रियग्रामंसंयम्यचमनस्तथा सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुम् १०० पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् पश्चिमांतुसमासीनःसम्यगृक्षविभावनात् १०१

रिंद्रियगणमायत्तंकृत्वामनश्चसंयम्यसर्वान्पुरुषार्थान्सम्यक्साधयेत् योगतउपायेनस्वदेहमपीडयन्यःसहजसुखीसंस्कृतान्नादिकंभुंक्तेसक्रमेणतंत्यजेत् १०० पूर्वांसंध्यामिति पूर्वांसंध्यांपश्चिमामितिचकालाध्वनोरत्यंतसंयोगेद्वितीयाप्रथमसंध्यांसूर्यदर्शनपर्यंतंसावित्रींजपन्तिष्ठेत् आसनादुत्थायनिवृत्तगतिरेकत्रदेशेकुर्यात् पश्चिमांतुसंध्यांसावित्रींजपन्सम्यङ्नक्षत्रदर्शनपर्यंतमुपविष्टःस्यात् अत्रचफलवत्त्वाज्जपःप्रधानंस्थानासनंत्वंगंफलवत्सन्निधावफलंतदंगमितिन्यायात् संध्ययोर्वेदविद्विप्रोवेदपुण्येनयुज्यते सहस्रकृत्वस्त्वभ्यस्यइतिचपूर्वजपात्फलमुक्तम् मेधातिथिस्तुस्थानासनयोरेवप्राधान्यमाह संध्याकालश्चमुहूर्त्तमात्रंतदाहयोगीयाज्ञवल्क्यःह्रासवृद्धीतुसततंदिवसानांयथाक्रमम् संध्यामुहूर्त्तमात्रंतुह्रासेवृद्धौचसा स्मृता १०१

पूर्वसंध्यामिति पूर्वसंध्यायांतिष्ठन्जपंकुर्वाणोनिशासंचितंपापंनाशयति पश्चिमसंध्यायांतुउपविष्टोजपंकुर्वन्दिवार्जितंपापंनिहंतितत्रा
पिजपात्फलमुक्तम् एतच्चाज्ञानादिकृतपापविषयम् अतएवयाज्ञवल्क्यः दिवावायदिवारात्रौयदज्ञानकृतंभवेत् त्रिकालसंध्याकरणा
त्तत्सर्वंविप्रणश्यति १०२ नतिष्ठतीति यःपुनःपूर्वसंध्यांनानुतिष्ठतिपश्चिमांतुनोपास्तेतत्तत्कालविहितंजपादिनकरोतीत्यर्थःसशूद्रइव
सर्वस्माद्द्विजातिकर्मणोऽतिथिसत्कारादेरपिबाह्यःकार्यः अनेनैवप्रत्यवायेनसंध्योपासनस्यनित्यतोक्तानित्यत्वेपिसर्वदापेक्षितपापक्षय-
स्यफलत्वमविरुद्धम् १०३ अपांसमीपइति ब्रह्मयज्ञरूपमिदंबहुवेदाध्ययनाशक्तौसावित्रीमात्राध्ययनमपिविधीयते अरण्यादिनिर्जन
देशंगत्वानद्यादिजलसमीपेनियतेंद्रियःसमाहितोऽनन्यमनानैत्यकंविधिंब्रह्मयज्ञरूपमास्थितोऽनुतिष्ठासुः सावित्रीमपिप्रणवव्याहृतित्र
ययुतांयथोक्तामधीयीत १०४वेदोपकरणइति वेदोपकरणेवेदांगेशिक्षादौनैत्यकेनित्यानुष्ठेयेचस्वाध्यायेब्रह्मयज्ञरूपेहोममंत्रेषुचानध्या

पूर्वांसंध्यांजपंस्तिष्ठन्नैशमेनोव्यपोहति पश्चिमांतुसमासीनोमलंहंतिदिवाकृतम् १०२ नतिष्ठतितुयः
पूर्वांनोपास्तेयश्चपश्चिमाम् सशूद्रवद्बहिष्कार्यःसर्वस्माद्द्विजकर्मणः १०३ अपांसमीपेनियतोनैत्यकं-
विधिमास्थितः सावित्रीमप्यधीयीतगत्वारण्यंसमाहितः १०४ वेदोपकरणेचैवस्वाध्यायेचैवनैत्यके नानु
रोधोस्त्यनध्यायेहोममंत्रेषुचैवहि १०५ नैत्यकेनास्त्यनध्यायोब्रह्मसत्रंहितत्स्मृतम् ब्रह्माहुतिहुतंपुण्य
मनध्यायवषट्कृतम् १०६ यःस्वाध्यायमधीतेऽब्दंविधिनानियतःशुचिः तस्यनित्यंक्षरत्येषपयोदधि
घृतंमधु १०७

यादरोनास्ति १०५ नैत्यकइति पूर्वोक्तनैत्यकस्वाध्यायस्यायमनुवादःनैत्यकेजपयज्ञेअनध्यायोनास्तियतःसततप्र
वत्तात् ब्रह्मसत्रंतन्मन्वादिभिःस्मृतंब्रह्मैवाहुतिर्ब्रह्माहुतिर्हविस्तस्याहुतमनध्यायाध्ययनमध्ययनरूपमनध्यायवषट्कृतमपिपुण्य
मेवभवति १०६ यःस्वाध्यायमिति अब्दमिति अत्यंतसंयोगेद्वितीयायोवर्षमप्येकंस्वाध्यायमहरहर्विहितांगयुक्तंनियतेंद्रियःप्रयतोजप
तितस्यैषस्वाध्यायोजपयज्ञः क्षीरादीनिक्षरतिक्षीरादिभिर्देवान्पितृंश्चप्रीणातितेनचप्रीताःसर्वकामैर्जपयज्ञकारिणंतर्पयंतीत्यर्थः अत
एवयाज्ञवल्क्यः मधुनापयसाचैवसदेवांस्तर्पयेद्द्विजः पितॄन्मधुघृताभ्यांचऋचोधीतेहियोन्वहं इत्युपक्रम्ययत्तुणमेववेदानांपुराणानांच

जपस्यदेवपितृतृप्तिमुक्त्वाशेषे तेनतृप्तास्तर्पयंत्येनंसर्वकामफलैःशुभैरित्युक्तवान् १०७ अग्नींधनमिति सायंप्रातःसमिद्धोमंभिक्षासमूहाहरणमखट्वाशयनरूपामधःशय्यांनतुस्थंडिलशायित्वमेवगुरोरुदककुंभाद्याहरणरूपंहितंकृतोपनयनोब्रह्मचारीसमावर्त्तनपर्यंतंकुर्यात् १०८ कीदृशाःशिष्योऽध्याप्यइत्याह आचार्यपुत्रःपरिचारकज्ञानांतरदाता धर्मवित्मृद्वार्यादिषुशुचिः बांधवः ग्रहणधारणसमर्थः धनदाताहितेच्छुः ज्ञातिः दशैतेधर्मेणाध्याप्याः १०९ नापृष्टइति यद्यन्येनाल्पाक्षरंविस्वरंचाधीतंतस्यतत्त्वंनवदेत् शिष्यस्यतुपृच्छतोपिवक्तव्यंभक्तिश्रद्धादिप्रश्नधर्मोल्लंघनमन्यायःतेनपृच्छतोनब्रूयात् जानन्नपिहिप्राज्ञोलोकेमूकइवव्यवहरेत् ११० उक्तप्रतिषेधव्यतिक्रमेदोषमाह अधर्मेणेति अधर्मेणपृष्टोपियोयस्यवदतियश्चान्यायेनयंपृच्छतितयोरन्यतरोव्यतिक्रमकारीम्रियतेविद्वेषंवातेनसहगच्छति १११ धर्मार्थाविति यस्मिन्शिष्येऽध्यापितेधर्मार्थौनभवतःपरिचर्यावाऽध्ययनानुरूपातत्रविद्यानार्प

अग्नींधनंभैक्षचर्यामधःशय्यांगुरोर्हितम् आसमावर्त्तनात्कुर्यात्कृतोपनयनोद्विजः १०८ आचार्यपुत्रःशुश्रूषुर्ज्ञानदोधार्मिकःशुचिः आप्तःशक्तोऽर्थदःसाधुःस्वोध्याप्यादशधर्मतः १०९ नापृष्टःकस्यचिद्ब्रूयान्नचान्यायेनपृच्छतः जानन्नपिहिमेधावीजडवल्लोकआचरेत् ११० अधर्मेणचयःप्राहयश्चाधर्मेणपृच्छति तयोरन्यतरःप्रैतिविद्वेषंवाधिगच्छति १११ धर्मार्थौयत्रनस्यातांशुश्रूषावापितद्विधा तत्रविद्यानवक्तव्याशुभंबीजमिवोषरे ११२ विद्ययैवसमंकामंमर्त्तव्यंब्रह्मवादिना आपद्यपिहिघोरायांनत्वेनामिरिणेवपेत् ११३ विद्याब्राह्मणमेत्याहशेवधिस्तेस्मिरक्षमाम् असूयकायमांमादास्तथास्यांवीर्यवत्तमा ११४

णीयासुकृष्टोप्त्यादिबीजमिवोषरेयत्रबीजसुसंनप्ररोहतिसउषरः नचार्थग्रहणेमृतकाध्यापकत्वमाशंकनीयंयद्येतावन्मह्यंदीयतेतदैतावदध्यापयामीतिनियमाभावात् ११२ विद्ययेति विद्ययैवसहवेदाध्यापकेनवरंमर्त्तव्यंनतुसर्वथाध्यापनयोग्यशिष्याभावेचापात्रायैवतांप्रतिपादयेत् तथाछांदोग्यब्राह्मणम् विद्ययासार्द्धंम्रियेतनविद्यामूषरेवपेत् ११३ अस्यानुवादमाह विद्याब्राह्मणमिति विद्याधिष्ठात्रीदेवताकंचिदध्यापकंब्राह्मणमागत्यएवमवदत् तवाहंनिधिरस्मिमांरक्षअसूय-

कादिदोषवत्तेनमांवदेः तथासत्यतिशयेनवीर्यवतीभूयासम् तथाचछांदोग्यब्राह्मणम् विद्याहवैब्राह्मणमाजगामतवाहमस्मित्वंमांपाल
यअनर्हतेमानिनेनैवमादागोपायमांश्रेयसीतथाहमस्मीति ११४ यमिति यमेवपुनःशिष्यंशुचिंनियतेंद्रियंब्रह्मचारिणंजानासितस्मैवि
द्यारूपनिधिरक्षकायप्रमादरहितायमांवद ११५ ब्रह्मेति यःपुनरस्यासार्थमधीयानादन्यंवाकंचिदध्यापयतस्तदनुमतिरहितंवेदंगृण्हाति
सवेदस्तेययुक्तोनरकंगच्छतितस्मादेतन्नकर्त्तव्यम् ११६ लौकिकमिति लौकिकमर्थशास्त्रादिज्ञानंवैदिकंवेदार्थज्ञानं आध्यात्मिकंब्रह्म
ज्ञानंयस्मात्तुगृण्हातिबहुमान्यमध्येस्थितंप्रथममभिवादयेत् लौकिकादिज्ञानदातॄणामेवंत्रयाणांसमवायेयथोत्तरंमान्यत्वम् ११७ सा
वित्रीति सावित्रीमात्रवेत्तापिवरंसुयंत्रितःशास्त्रनियमितः विप्रादिर्मान्यःनायंत्रितोवेदत्रयवेत्तापिनिषिद्धभोजनादिशीलःप्रतिषिद्धविक्रे

यमेवतुशुचिंविद्यान्नियतब्रह्मचारिणम् तस्मैमांब्रूहिविप्रायनिधिपायाप्रमादिने ११५ ब्रह्मयस्त्वननु
ज्ञातमधीयानादवाप्नुयात् सब्रह्मस्तेयसंयुक्तोनरकंप्रतिपद्यते ११६ लौकिकंवैदिकंवापितथाध्यात्मिक
मेवच आददीतयतोज्ञानंतंपूर्वमभिवादयेत् ११७ सावित्रीमात्रसारोपिवरंविप्रःसुयंत्रितः नायंत्रित
स्त्रिवेदोपिसर्वाशीसर्वविक्रयी ११८ शय्यासनेऽध्याचरितेश्रेयसानसमाविशेत् शय्यासनस्थश्चैवैनंप्र
त्युत्थायाभिवादयेत् ११९ ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआयति प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्र
तिपद्यते १२० अभिवादनशीलस्यनित्यंवृद्धोपसेविनः चत्वारितस्यवर्द्धंते आयुर्विद्यायशोबलम् १२१

तान्यपत्न्यप्रदर्शनमात्रम् सुयंत्रितशब्देनविधिनिषेधनिष्ठत्वस्यविवक्षितत्वात् ११८ शय्येति शय्याचआसनंचशय्यासनंजातिरप्राणिना
मितिद्वंद्वैकवद्भावः तस्मिन्श्रेयसाविद्याधिकेनगुरुणाचाध्याचरितेसाधारण्येनस्वीकृतेचतत्कालमपिनासीत् स्वयंचशय्यासनस्थो
गुरावागतेउत्थायाभिवादनंकुर्यात् ११९ अस्यार्थवादमाह ऊर्ध्वमिति यस्मात्यूनोऽल्पवयसोवयोविद्यादिनास्थविरेआयतिआगच्छ
तिसतिप्राणाऊर्ध्वंउत्क्रामंतिदेहाद्बहिर्निर्गंतुमिच्छंतितान्वृद्धस्यप्रत्युत्थानाभिवादाभ्यांपुनःसुस्थान्करोति तस्माद्वृद्धस्यप्रत्युत्थायाभिवा
दनंकुर्यात् १२० इतश्चफलमाह अभिवादनशीलस्येति उत्थायसर्वदावृद्धाभिवादनशीलस्यवृद्धसेविनश्चआयुःप्रज्ञायशोबलानिच

त्यादिपदैरभिभाषणम् १२९ मातुलांश्चेति मातुलादीनागतान् कनिष्ठानासनादुत्थाय असावहमिति वदेत् नाभिवादयेत् असाविति
स्वनामनिर्देशः भूयिष्ठाः खलु गुरव इत्युपक्रम्य ज्ञानवृद्धतपोवृद्धयोरपि हारीतेन गुरुत्वकीर्त्तनात् तयोश्च कनिष्ठयोरपि संभवात् तद्विष-
योयं गुरुशब्दः १३० मातृष्वसेति मातृष्वस्रादयो गुरुपत्नीवत्प्रत्युत्थानाभिवादनासनदानादिभिः संपूज्याः अभिवादनप्रकरणादभिवा
दनमेव संपूजनं विज्ञायत इति समास्ता इत्यवोचत् गुरुभार्यासमानत्वात्प्रत्युत्थानादिकमपि कार्यमित्यर्थः १३१ भ्रातुर्भार्य्येति भ्रातुः स
जातीया भार्या ज्येष्ठा पूजाप्रकरणात् उपसंग्राह्या पादयोरभिवाद्या अहन्यहनि प्रत्यहमेव अपि रेवार्थे ज्ञातयः पितृपक्षाः पितृव्यादयः
संबंधिनो मातृपक्षाः श्वशुरादयश्च तेषां पत्न्यः पुनर्विप्रोष्य प्रवासात्प्रत्यागतेनैवाभिवाद्याः न तु प्रत्यहं नियमः १३२ पितुर्भगिन्यामिति
पितुर्मातुश्च भगिन्यां ज्येष्ठायां चात्मनो भगिन्यां मातृवद्वृत्तिमातिष्ठेत् माता पुनस्ताभ्यो गुरुतमा ननु मातृष्वसा मातुलानीत्यनेनैव गुरुप-

मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः १३० मातृष्वसा-
मातुलानी श्वश्रूरथ पितृष्वसा संपूज्या गुरुपत्नीवत्समास्ता गुरुभार्यया १३१ भ्रातुर्भार्योपसंग्राह्या
सवर्णाहन्यहन्यपि विप्रोष्य तूपसंग्राह्या ज्ञातिसंबंधियोषितः १३२ पितुर्भगिन्यां मातुश्च ज्यायस्यां च
स्वसर्यपि मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी १३३ दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृता
म् त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु १३४

त्नीवत्पूज्यत्वमुक्तं किमधिकमनेन बोध्यते इदमेव माता ताभ्यो गरीयसीति तेन पितृष्वस्राद्यनुज्ञायां दत्तायां मात्रा च विरोधे मातुराज्ञा अ
नुष्ठेयेति अथवा पूर्वं पितृष्वस्रादेर्मातृवत्पूज्यत्वमुक्तं अनेन तु स्नेहादिवृत्तिरप्यतिदिश्यत इत्यपुनरुक्तिः १३३ दशाब्दाख्यमिति दश
अब्दा आख्या यस्य तद्दशाब्दाख्यं पौरसख्यं अयमर्थः एकपुरवासिनां वक्ष्यमाणविद्यादिगुणरहितानां एकस्य दशभिरब्दैर्ज्येष्ठत्वे स-
त्यपि सख्यमाख्यायते पुरग्रहणं प्रदर्शनार्थं तेनैकग्रामादिनिवासिनामपि स्यात् गीतादिकलाभिज्ञानां पंचवर्षपर्यंतं सख्यं श्रोत्रिया-
णां त्र्यब्दपर्यंतं सापिंडेषु अत्यंताल्पेनैव कालेन सहसख्यम् अपिरेवार्थे सर्वत्रोक्तकालादूर्ध्वं ज्येष्ठव्यवहारः १३४ ६ ७

ब्राह्मणमिति दशवर्षंब्राह्मणंशतवर्षंपुनः क्षत्रियंपितापुत्रौजानीयात् तयोर्मध्येदशवर्षोपिब्राह्मणएव क्षत्रियस्यशतवर्षस्यापिपितातस्मा त्पितृवदसौतस्यमान्यः १३५ वित्तमिति वित्तंन्यायार्जितंधनंबंधुः पितृव्यादिःवयोऽधिकवयस्कताकर्मश्रौतंस्मार्तंचविद्यावेदार्थतत्वज्ञा नंएतानिपंचमान्यत्वकारणानि एषांमध्येयद्यदुत्तरंतत्तत्पूर्वस्मात्श्रेष्ठमिति बहुमान्यमेतकेबलाबलमुक्तम् १३६ पंचानामिति त्रिषु वर्णेषुब्राह्मणादिषुपंचानांवित्तादीनांमध्येयत्रपुरुषेपूर्वमप्यनेकंभवतिसएवोत्तरस्मादपिमान्यः तेनवित्तबंधुयुक्तोवयोधिकान्मान्यः ए वंवित्तादित्रययुक्तःकर्मवतोमान्यःवित्तादिचतुष्टययुक्तोविदुषोमान्यः गुणवंतिचेतिप्रकर्षवंतितेनद्वयोरेवविद्यादिसत्वेप्रकर्षोमानहेतुः शूद्रोपिदशमीमवस्थांनवत्यधिकांगतोद्विजन्मनामपिमानार्हः शतवर्षाणांदशधाविभागेदशम्यवस्थानवत्यधिकाभवति १३७ अयमपि

ब्राह्मणंदशवर्षंतुशतवर्षंतुभूमिपम् पितापुत्रौविजानीयाद्ब्राह्मणस्तुतयोःपिता १३५ वित्तंबंधुर्वयःक र्मविद्याभवतिपंचमी एतानिमान्यस्थानानिगरीयोयद्यदुत्तरम् १३६ पंचानांत्रिषुवर्णेषुभूयांसिगुणवं तिच यत्रस्युःसोत्रमानार्हःशूद्रोपिदशमींगतः १३७ चक्रिणोदशमीस्थस्यरोगिणोभारिणःस्त्रियाः स्ना तकस्यचराज्ञश्चपंथादेयोवरस्यच १३८ तेषांतुसमवेतानांमान्यौस्नातकपार्थिवौ राजस्नातकयोश्चैवस्नात कोनृपमानभाक् १३९ उपनीयतुयःशिष्यंवेदमध्यापयेद्द्विजः सकल्पंसरहस्यंचतमाचार्यंप्रचक्षते १४०

पूजाप्रकारःप्रसंगादुच्यते चक्रिणइति चक्रयुक्तरथादियानारूढस्यनवत्यधिकवयसोरोगार्तस्यभारपीडितस्यस्त्रियाः अचिरनिवृ त्तसमावर्तनस्यदेशाधिपस्यविवाहायप्रस्थितस्यपंथास्त्यक्तव्यः स्वागार्थलाभ्वददातेर्न्नन्तुर्या १३८ तेषामिति तेषामेकत्रमिलि तानांदेशाधिपस्नातकौमान्यौराजस्नातकयोरपिस्नातकएवराजापेक्षयामान्यः अतोराजशब्दोत्रपूर्वश्लोकेनकेवलजातिवचनःक्षत्रि यजात्यपेक्षयाब्राह्मणंदशवर्षंत्वित्यनेनब्राह्मणमात्रस्यमान्यत्वाभिधानात् स्नातकग्रहणवैयर्थ्यात् १३९ उपनीयेति आचार्यादि शब्दार्थमाह तैःशब्दैरिहशास्त्रेप्रायोव्यवहारात् योब्राह्मणःशिष्यमुपनीयकल्परहस्यसहितांवेदशाखांसर्वंअध्यापयतितमाचा र्यंपूर्वेमुनयोवदंति कल्पोयज्ञविद्यारहस्यमुपनिषत् वेदत्वेप्युपनिषदांप्राधान्यविवक्षयापृथङ्निर्देशः १४० ७ ७

प्रमाणामिति ब्राह्मणानांविद्ययाक्षत्रियाणांपुनर्वीर्येणवैश्यानांधान्यवस्त्रादिधनेनशूद्राणामेवपूर्वजन्मनाश्रेष्ठत्वंसर्वत्रतृतीया-
र्थेतसिः १५५ नतेनेति नतेनवृद्धोभवतियेनास्यशुक्लकेशंशिरःकिंतुयुवापिसन्विद्वान्तंदेवाःस्थविरंजानंति १५६ यथाकाष्ठमय
इति यथाकाष्ठघटितोहस्तीयथाचर्मनिर्मितोमृगःयश्चविप्रोनाधीतेत्रयएतेनाममात्रंदधतिनतुहस्त्यादिकार्यंशत्रुवधादिकंकर्त्तुंक्षम
ते १५७ यथाषंढइति यथानपुंसकस्त्रीषुनिष्फलंयथाचस्त्रीगवीगव्यामेवनिष्फलायथाचाज्ञेदानमफलंतथाब्राह्मणोऽप्यनध
नोनिष्फलःश्रौतस्मार्त्तकर्मानर्हतयातत्फलरहितः १५८ अहिंसयैवेति भूतानांशिष्याणांप्रकरणात्श्रेयोर्थमनुशासनमनतिहिंस
याकर्त्तव्यंरज्जुवेणुदलेनवेत्यहिंसायाअभ्यनुज्ञानात् वाणीमधुराप्रीतिजननीश्लक्ष्णयानोच्चैरुच्यतेसाशिष्यशिक्षायैधर्मबुद्धिमिच्छ

विप्राणांज्ञानतोज्यैष्ठ्यंक्षत्रियाणांतुवीर्यतः वैश्यानांधान्यधनतःशूद्राणामेवजन्मतः १५५ नतेनवृद्धो
भवतियेनास्यपलितंशिरः योवैयुवाप्यधीयानस्तंदेवाःस्थविरंविदुः १५६ यथाकाष्ठमयोहस्तीयथाच
र्ममयोमृगः यश्चविप्रोनधीयानस्त्रयस्तेनामबिभ्रति १५७ यथाषंढोफलस्त्रीषुयथागोर्गविचाफला
यथाचाज्ञेऽफलंदानंतथाविप्रोऽनृचोफलः १५८ अहिंसयैवभूतानांकार्यंश्रेयोऽनुशासनम् वाक्चैवम
धुराश्लक्ष्णाप्रयोज्याधर्ममिच्छता १५९ यस्यवाङ्मनसीशुद्धेसम्यग्गुप्तेचसर्वदा सवैसर्वमवाप्नोतिवेदां
तोपगतंफलम् १६० नारुंतुदस्यादार्त्तोपिनपरद्रोहकर्मधीः ययास्योद्विजतेवाचानालोक्यातामुदीरयेत्
१६१

तामयोक्तव्या १५९ यस्येति इदानींपुरुषमात्रस्यफलंधर्मंवाङ्मनःसंयममाहनअध्यापयितुरेव यस्यवाङ्मनसोरुभयं
शुद्धंभवति वागनृतादिभिरदुष्टामनश्चरागद्वेषादिभिरदूषितंभवतिएतेवाङ्मनसीनिषिद्धविषयप्रकरणेसर्वदायस्यपुंसःसुरक्षि
तेभवतःसवेदांतेऽवगतंसर्वफलंसर्वज्ञत्वंसर्वेशानादिरूपंमोक्षलाभादवाप्नोति १६० नारुंतुदइति अयमपिपुरुषमात्रस्यैवधर्मोना
ध्यापकस्यआर्त्तःपीडितोपिनारुंतुदःस्यात् नमर्मपीडाकरंतत्तद्दूषणमुदाहरेत् तथापरस्यद्रोहोपकारस्तदर्थंकर्मबुद्धिश्चनकर्त्तव्या
तथायययावाचान्यस्यपरोव्यथतेतांमर्मस्पृशमथालोक्यांस्वर्गादिप्राप्तिविरोधिनींनवदेत् १६१ ५ ५ ५

संमानादिति ब्राह्मणः संमानात् विषादिव सर्वदो द्विजते संमाने प्रीतिं न कुर्यात् अमृतस्येव सर्वस्माल्लोकादवमानस्याकांक्षेत् अवमाने परेण कृतेपि क्षमावांस्तत्र खेदं न कुर्यात् मानावमानद्वंद्वसहिष्णुत्वमनेन विधीयते १६२ सुखं ह्यवमतः शेते इति अवमानसहिष्णुत्वे हेतुमाह यस्मादवमाने परेण कृते तत्र खेदमकुर्वाणः सुखं निद्राति अन्यथावमानदुःखेन दह्यमानः कथं निद्रां लभते कथं च सुखं प्रतिबुध्यते प्रतिबुद्धस्य कथं सुखं कार्येषु चरति अवमानकर्त्ता तेन पापेन विनश्यति १६३ अनेनेति अनेन क्रमकथितोपायेन जातकर्मादिनाउपनयनपर्यंतेन संस्कृतो द्विजो गुरुकुले वसन् शनैरत्वरया वेदग्रहणार्थं तपोऽभिहिताभिधास्यमाननियमकलापरूपमनुतिष्ठेत् विध्यंतरसिद्धस्यापि अयमर्थवादोऽध्ययनांगत्वबोधनाय १६४ अध्ययनांगत्वमेव स्पष्टयति तपोविशेषैर्नियमकलापैर्विविधैर्बहुप्रकारैश्च अध्येष्यमाणस्त्वाचांत इत्यादिनोक्तैः सेवेतेमांस्तु नियमानित्यादिभिर्वक्ष्यमाणैरपि व्रतैश्चोपनिषन्महानाम्निकादिभिर्विधि

संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव अमृतस्येव चाकांक्षेदवमानस्य सर्वदा १६२ सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते सुखं चरति लोकेस्मिन्नवमंता विनश्यति १६३ अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः गुरौ वसन् संचिनुयाद्ब्रह्माधिगमिकं तपः १६४ तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः वेदः कृत्स्नोऽधिगंतव्यः सरहस्यो द्विजन्मना १६५ वेदमेव सदाभ्यस्येत्तपस्तप्स्यन् द्विजोत्तमः वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते १६६ आ हैव स नखाग्रेभ्यः परमं तप्यते तपः यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् १६७

देशितैः स्वगृह्यविहितैः समग्रो वेदो मंत्रब्राह्मणात्मकः सोपनिषत्कोऽप्यध्येतव्यः रहस्यमुपनिषदः प्राधान्यख्यापनाय पृथङ्निर्देशः १६५ वेदमेवेति यत्र नियमानामंगत्वमुक्तं तत् कृत्स्नस्वाध्यायाध्ययनमनेन विधत्ते तपस्तप्स्यन् चरिष्यन् द्विजो वेदमेव ग्रहणार्थमावर्त्तयेत् तस्माद्वेदाभ्यास एव विप्रादेरिह लोके प्रकृष्टं तपो मुनिभिरभिधीयते १६६ आ हैवेति स्वाध्यायाध्ययनस्तुतिरियं ह शब्दः परमशब्दविहितस्यापि प्रकर्षस्य सूचकः स द्विज आ नखाग्रेभ्य एव चरणनखपर्यंतसर्वदेहव्यापकमेव प्रकृष्टतमं तपस्तप्यते यः स्रग्व्यपि कुसुममालाधार्यपि प्रत्यहं यथाशक्ति स्वाध्यायमधीते स्रग्वी अपीत्यनेन वेदाध्ययना

यत्रब्रह्मचारिनियमत्यागमपिस्तुत्यर्थंदर्शयतितप्यतइतितपस्तपःकर्मकस्यवेतियंणात्मनेपदेभवतः १६७ योनऽधीत्येति योद्विजोवे
दमनधीत्यान्यत्रार्थशास्त्रादौश्रमंयत्नातिशयंकरोतिसजीवन्नेवपुत्रपौत्रादिसहितःशीघ्रंशूद्रत्वंगच्छति वेदमनधीत्यापिस्मृतिवेदां
गाध्ययनेविरोधाभावः अतएवशंखलिखितौ नवेदमनधीत्यान्यांविद्यामधीतान्यत्रवेदांगस्मृतिभ्यः १६८ द्विजानांतत्रतत्राधिकार
श्रुतेर्द्विजत्वनिरूपणार्थमाह मातुरग्रेइति मातुःसकाशादादौपुरुषस्यजन्मद्वितीयंमौंजीबंधनेउपनयनेऽझापोःसंज्ञाछंदसोर्बहुल
मितिन्हस्वः तृतीयंज्योतिष्टोमादियज्ञदीक्षायांवेदश्रवणात् तथाचश्रुतिःपुनर्वाएतंऋत्विजोगर्भंकुर्वंतियद्दीक्षयंतीतिप्रथमद्वितीयतृत
यजन्मकथनंचेदंद्वितीयजन्मस्तुत्यर्थंद्विजस्यैवयज्ञदीक्षायामप्यधिकारात् १६९ तत्रेति तेषुत्रिषुजन्मसुमध्येयदेतद्ब्रह्मग्रहणार्थं
जन्मउपनयनसंस्काररूपंमेखलाबंधनोपलक्षितंतत्रास्यमाणवकस्यसावित्रीमाताआचार्यश्चपितामातृपितृसंपाद्यत्वाज्जन्मनः १७०

योऽनधीत्यद्विजोवेदमन्यत्रकुरुतेश्रमम् सजीवन्नेवशूद्रत्वमाशुगच्छतिसान्वयः १६८ मातुरग्रेऽधिजननं
द्वितीयंमौंजीबंधने तृतीयंयज्ञदीक्षायांद्विजस्यश्रुतिचोदनात् १६९ तत्रयद्ब्रह्मजन्मास्यमौंजीबंधनचि-
न्हितम् तत्रास्यमातासावित्रीपितात्वाचार्यउच्यते १७० वेदप्रदानादाचार्यंपितरंपरिचक्षते नह्यस्मिन्
युज्यतेकर्मकिंचिदामौंजिबंधनात् १७१ नाभिव्याहारयेद्ब्रह्मस्वधानिनयनादृते शूद्रेणहिसमस्तावद्या
वद्वेदेनजायते १७२ कृतोपनयनस्यास्यव्रतादेशनमिष्यते ब्रह्मणोग्रहणंचैवक्रमेणविधिपूर्वकम् १७३

वेदप्रदानादिति वेदाध्ययनादाचार्यंपितरंमन्वादयोवदंतिपितृवन्महोपकारकत्वात्गौणंपितृत्वंमहोपकारमेवदर्शयति नह्यस्मिन्नि
ति यस्मादस्मिन्माणवकेप्रागुपनयनात्किंचित्कर्मश्रौतंस्मार्त्तंचनसंबध्यतेनतत्राधिक्रियतइत्यर्थः १७१ नाभिव्याहारयेदिति आ
मौंजीबंधनादित्यनुवर्त्ततेप्रागुपनयनाद्वेदंनोच्चारयेत् स्वधाशब्देनश्राद्धमुच्यतेनिनीयतेनिष्पाद्यतेयेनमंत्रजातेनतद्वर्जयित्वामृतपि
तृकोनवश्राद्धादौमंत्रंनोच्चारयेत् तद्व्यतिरिक्तंवेदंनोदाहरेत्यस्माद्यावद्वेदेनजायतेतावदसौशूद्रेणतुल्यः १७२ कृतोपनयनस्येति
यस्मादस्यमाणवकस्यसमिधमाधेहिदिवामास्वाप्सीरित्यादिव्रतादेशनंवेदस्याध्ययनंमंत्रब्राह्मणक्रमेणाध्येष्यमाणस्त्वाचांतइत्यादि-

विधिपूर्वकमुपनीतस्योपदिश्यते तस्मादुरुपनयनात्पूर्वं नवेदमुदाहरेत् १७३ यद्यस्येति यस्यब्रह्मचारिणोयानिचर्मसूत्रमेखलादंड
वस्त्राणिउपनयनकालेगृह्येणविहितानिगोदानादिव्रतेष्वपितान्येवनवानिकर्त्तव्यानि १७४ सेवेतेति ब्रह्मचारीगुरुसमीपेवसन्इंद्रिय
संयमंकृत्वात्मनुगताहृष्टस्थर्थमिमान्नियमाननुतिष्ठेत् १७५ नित्यमिति प्रत्यहंस्नात्वादेवर्षिपितृभ्यउदकदानंप्रतिमादिषुहरिहरादि
देवपूजनंसायंप्रातश्चसमिद्धोमंकुर्यात् यस्तुगौतमीयेस्नाननिषेधोब्रह्मचारिणःसस्वरस्नानविषयः अतएवबौधायनः नाप्सुश्लाघमा
नःस्नायात् विष्णुनात्रकालद्वयमभिषेकाग्निकार्यकारणमप्सुदंडवन्मज्जनमितिब्रुवाणेनवारद्वयंस्नानमुपदिष्टम् १७६ वर्ज्जयेदिति
क्षौद्रंमांसंचनखादेत् गंधंचकर्पूरचंदनकस्तूरिकादिवर्ज्जयेत् एषांचगंधानांयथासंभवंभक्षणमनुलेपनंचनिषिद्धंमाल्यंचनधारयेत्
उद्रिक्तरसांश्चगुडादीन्नखादेत् स्त्रियश्चनोपेयात् यानिस्वभावतोमधुरादिरसानिकालवशेनउदकवासादिनाचाम्लपंतितानिशुक्लानिन

यद्यस्यविहितंचर्मयत्सूत्रंयाचमेखला योदंडोयच्चवसनंतत्तदस्यव्रतेष्वपि १७४ सेवेतेमांस्तुनियमान् ब्रह्मचारीगुरौवसन् सन्नियम्येंद्रियग्रामंतपोवृध्यर्थमात्मनः १७५ नित्यंस्नात्वाशुचिःकुर्याद्देवर्षि-पितृतर्पणम् देवताभ्यर्चनंचैवसमिदाधानमेवच १७६ वर्ज्जयेन्मधुमांसंचगंधंमाल्यंरसान्स्त्रियः शुक्लानियानिसर्वाणिप्राणिनांचैवहिंसनम् १७७ अभ्यंगमंजनंचाक्ष्णोरुपानच्छत्रधारणम् कामंक्रोधंचलोभंचनर्त्तनंगीतवादनम् १७८ द्यूतंचजनवादंचपरिवादंतथानृतम् स्त्रीणांचप्रेक्षणालंभमु पघातंपरस्यच १७९ एकःशयीतसर्वत्रनरेतःस्कंदयेत्क्वचित् कामाद्धिस्कंदयन्रेतोहिनस्तिव्रतमात्म नः १८०

स्वादेत् प्राणिनांहिंसांनकुर्यात् १७७ अभ्यंगमिति तैलादिनाशिरःसहितदेहमर्द्दनलक्षणंकज्जलादिभिश्चचक्षुषोरं
जनंपादुकायाश्छत्रस्यचधारणंकामंमैथुनातिरिक्तविषयाभिलाषातिशयंमैथुनस्यस्त्रियइत्यनेनैवनिषिद्धत्वात् क्रोधलोभनृत्यगीत
वीणापणवादिवर्जयेत् १७८ द्यूतंचेति अक्षादीनांजनैःसहनिरर्थवाकलहंपरस्यदोषवादंमृषाभिधानंस्त्रीणांचमैथुनेच्छयासानुरा
गेणप्रेक्षणालिंगनंपरस्यचापकारंवर्ज्जयेत् १७९ एकइति सर्वत्रनीचशय्यादावेकाकीशयनंकुर्यात् इच्छयानस्वशुक्रंपातयेत् यस्माद्-

-च्छया स्वमेहनात्शुक्रंपातयन्स्वकीयव्रतंनाशयतिव्रतलोपेनावकीर्णिप्रायश्चित्तंकुर्यात् १८० स्वप्नइति ब्रह्मचारीस्वप्नादावनिच्छ-
यारेतः सिक्त्वा कृतस्नानश्चंदनाद्यनुलेपनपुष्पधूपादिभिःसूर्यमभ्यर्च्यपुनर्मामेत्विंद्रियमित्येतामृचंवारत्रयंपठेत् इदमत्रप्रायश्चित्तं
१८१ उदकुंभमिति जलकलशपुष्पगोमयमृत्तिकाकुशान्यावदर्थानियावद्भिःप्रयोजनानिआचार्यस्यतावदाचार्यार्थमाहरेत् अ-
तएवउदकुंभमित्यत्रएकत्वमप्यविवक्षितंप्रदर्शनंचैतत् अन्यदप्याचार्योपयुक्तमुपहरेत्भैक्षंचप्रत्यहमर्जयेत् १८२ वेदयज्ञैरिति
वेदयज्ञैश्चात्यक्तानांस्वकर्मसुदक्षाणांगृहेभ्यःप्रत्यहंब्रह्मचारीसिद्धान्नभिक्षामाहरेत् १८३ गुरोःकुलइति आचार्यस्यसपिंडेषुबंधु-
षुचमातुलादिषुनभिक्षेत्तद्गृहव्यतिरिक्तभिक्षायोग्यगृहाभावेचोक्तेभ्यःपूर्वंपूर्वंवर्जयेत् ततश्चप्रथमंबंधून्भिक्षेत् तत्रालाभेज्ञातीन्

स्वप्नेसिक्त्वाब्रह्मचारीद्विजःशुक्रमकामतः स्नात्वार्कमर्चयित्वात्रिःपुनर्मामित्यृचंजपेत् १८१ उदकुंभंसुमन
सोगोशकृन्मृत्तिकाकुशान् आहरेद्यावदर्थानिभैक्षंचाहरहश्चरेत् १८२ वेदयज्ञैरहीनानांप्रशस्तानां
स्वकर्मसु ब्रह्मचार्याहरेद्भैक्षंगृहेभ्यःप्रयतोऽन्वहम् १८३ गुरोःकुलेनभिक्षेतनज्ञातिकुलबंधुषु अलाभे
त्वन्यगेहानांपूर्वंपूर्वंविवर्जयेत् १८४ सर्ववापिचरेद्ग्रामंपूर्वोक्तानामसंभवे नियम्यप्रयतोवाचमभिशस्तांस्तु
वर्जयेत् १८५ दूरादाहृत्यसमिधःसंनिदध्याद्विहायसि सायंप्रातश्चजुहुयात्ताभिरग्निमतंद्रितः १८६ अ
कृत्वाभैक्षचरणमसमिध्यचपावकम् अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेत् १८७ भैक्षेणवर्तयेन्नित्यंनैका
न्नादीभवेद्व्रती भैक्षेणव्रतिनोवृत्तिरुपवाससमास्मृता १८८

तत्रालाभेगुरोरपिज्ञातीन्भिक्षेत १८४ सर्वंवेति पूर्ववेदयज्ञै-
रहीनानामित्यनेनोक्तासंभवेसर्वंवाग्राममुक्तगुणरहितमपिकृत्वामौनीभिक्षेत्महापातकाद्यभिशस्तांस्त्यजेत् १८५ दूरादिति दूराद्विभ्यः
परिगृहीतवृक्षेभ्यःसमिधआनीयआकाशेधारणाशक्तः पटलादौस्थापयेत् ताभिश्चसमिद्भिःसायंप्रातरनलेहोमंकुर्यात् १८६ अकृत्वे-
ति भिक्षाहारंसायंप्रातःसमिद्धोममरोगोनैरंतर्येणसप्तरात्रमकृत्वालुप्तव्रतोभवति ततश्चावकीर्णिप्रायश्चित्तंकुर्यात् १८७ भैक्षेणेति ब्रह्म-
चारीनएकान्नमद्यात्किंतुबहुगृहाहृतभिक्षासमूहेनप्रत्यहंजीवेत् यस्माद्भिक्षासमूहेनब्रह्मचारिणोवृत्तिरुपवासतुल्यामुनिभिःस्मृता १८८

व्रतवदिति पूर्वनिषिद्धस्यैकान्नभोजनस्यायंप्रतिप्रसवः दैवदैवत्येकर्मणिदेवतोद्देशेनाभ्यर्थितोब्रह्मचारीव्रतवदितिव्रतविरुद्धमधुमांसा
दिवर्जितमेकस्याप्यन्नंयथेप्सितंभुंजीत अथपित्र्युद्देशेनाभ्यर्थितोभवतितदाऋषिर्यतिःसम्यग्दर्शनसंपन्नत्वात्सइवमधुमांसवर्जित
मेकस्याप्यन्नंयथेप्सितंभुंजीतइतिसएवार्थोवैदग्ध्येनोक्तः तथापिभैक्षवृत्तिनियमरूपंव्रतमस्यलुप्तंनभवति याज्ञवल्क्योपिश्राद्धेभ्यर्थि
तस्यैकान्नभोजनमाह ब्रह्मचर्येस्थितोनैकमन्नमद्यादनापदि ब्राह्मणःकाममश्नीयाच्छ्राद्धेव्रतमपीडयन्निति विश्वरूपेणतुव्रतमस्यन
लुप्यतइतिपश्यताब्रह्मचारिणोमांसभक्षणमनेनमनुवचनेनविधीयतइतिव्याख्यातम् १८९ ब्राह्मणस्यैवेति ब्राह्मणक्षत्रियविशां
त्रयाणामेवब्रह्मचारिणांभैक्षचरणविधानाद्व्रतवदित्यनेनतदपवादरूपमेकान्नभोजनंउपदिष्टंक्षत्रियवैश्ययोरपिपुनरुक्तेनपर्युदस्य
तेतदेकान्नभोजनरूपंकर्मतद्ब्राह्मणस्यैववेदार्थविद्भिर्विहितंक्षत्रियवैश्ययोःपुनर्नचैतत्कर्मेतिब्रूते १९० चोदितइति आचार्येणप्रेरितो

व्रतवद्देवदैवत्ये पित्र्येकर्मण्यथर्षिवत् कामसभ्यर्थितोऽश्नीयाद्व्रतमस्यनलुप्यते १८९ ब्राह्मणस्यैव
कर्मैतदुपदिष्टंमनीषिभिः राजन्यवैश्ययोस्त्वेवंनैतत्कर्मविधीयते १९० चोदितोगुरुणानित्यमप्रचोदितए
ववा कुर्यादध्ययनेयत्नमाचार्यस्यहितेषुच १९१ शरीरंचैववाचंचबुद्धींद्रियमनांसिच नियम्यप्रांजलिस्ति
ष्ठेद्वीक्षमाणोगुरोर्मुखम् १९२ नित्यमुद्धृतपाणिःस्यात्साध्वाचारःसुसंयतः आस्यतामितिचोक्तःसन्ना
सीताभिमुखंगुरोः १९३ हीनान्नवस्त्रवेषःस्यात्सर्वदागुरुसन्निधौ उत्तिष्ठेत्प्रथमंचास्यचरमंचैवसंविशेत्
१९४ प्रतिश्रवणसंभाषेशयानोनसमाचरेत् नासीनोनचभुंजानोनतिष्ठन्नपराङ्मुखः १९५

नप्रेरितोवास्वयमेवप्रत्यहमध्ययनेगुरुहितेषुचउद्योगंकुर्यात् १९१ शरीरंचेति देहवाग्बुद्धींद्रियमनांसिनियम्यकृतांजलिर्गुरुमुखं
पश्यंस्तिष्ठेत् नोपविशेत् १९२ नित्यमिति सततमुत्तरीयाद्बहिष्कृतदक्षिणबाहुःशोभनाचारोवस्त्राच्छन्नदेहआस्यतामितिगुरुणो-
क्तःसन्गुरोरभिमुखंयथाभवतितथाआसीत् १९३ हीनान्नवस्त्रेति सर्वदागुरुसमीपेगुर्वपेक्षयाल्पवस्त्रकुथन्नवस्त्रप्रसाधनोभवेत्
गुरोःप्रथमंरात्रिशेषेशयनादुत्तिष्ठेत्प्रदोषेचगुरौसुप्तेपश्चात्स्वपीत १९४ प्रतिश्रवणेति प्रतिश्रवणमाज्ञांगीकरणंसंभाषणंचगुरोः
शय्यायांसुप्तः आसनोपविष्टोभुंजानस्तिष्ठन्विमुखश्चनकुर्यात् १९५ कथंतर्हिकुर्यात्तदाह आसीनस्येति आसनोपविष्टस्यगुरोरा

ज्ञांददतः स्वयमासनादुत्थितः तिष्ठतोगुरोरादिशतः तदभिमुखंकतिचित्पदानिगत्वा यथागुरुरागच्छतितथाप्यभिमुखंगत्वायदा-
तुगुरुर्द्धावन्नादिशतितदानस्यपश्चाद्धावन्प्रतिश्रवणसंभाषेकुर्यात् १९६ तथा पराङ्मुखस्येति पराङ्मुखस्यवादिशतः संमुखस्थो
दूरस्थस्यगुरोःसमीपमागत्यशयानस्यगुरोःप्रणम्यप्रह्वीभूत्वानिदेशेनिकटेअवतिष्ठतोगुरोरादिशतः प्रह्वीभूयैवप्रतिश्रवणसंभाषे-
कुर्यात् १९७ नीचमिति यत्रचदेशेसमासीनंगुरुः पश्यतिनतत्रयथेष्टचेष्टांचरणप्रसारादिकांकुर्यात् १९८ नोदाहरेदिति अस्यगु
रोःपरोक्षमपिउपाध्यायाचार्यादिपूजावचनोपपदशून्यंनामनोच्चारयेत् नतुगुरोर्गमनभाषितचेष्टितान्यनुकुर्वीत गुरुगमनादिसदृशा
न्यात्मनोगमनादीनिउपहासबुद्ध्यानकुर्वीत १९९ गुरोर्यत्रेति विद्यमानदोषस्याभिधानंपरीवादः अविद्यमानदोषाभिधानंनिंदाय

आसीनस्यस्थितःकुर्यादभिगच्छंस्तुतिष्ठतः प्रत्युद्गम्यत्वाव्रजतःपश्चाद्धावंस्तुधावतः १९६ पराङ्मुख
स्याभिमुखोदूरस्थस्यैत्यचांतिकम् प्रणम्यतुशयानस्यनिदेशेचैवतिष्ठतः १९७ नीचंशय्यासनंचास्य
सर्वदागुरुसन्निधौ गुरोस्तुचक्षुर्विषयेनयथेष्टासनोभवेत् १९८ नोदाहरेदस्यनामपरोक्षमपिकेवलम्
नचैवास्यानुकुर्वीतगतिभाषितचेष्टितम् १९९ गुरोर्यत्रपरीवादोनिंदावापिप्रवर्त्तते कर्णौतत्रपिधात-
व्यौगंतव्यंवाततोन्यतः २०० परीवादात्खरोभवतिश्वावैभवतिनिंदकः परिभोक्ताकृमिर्भवतिकीटोभ
वतिमत्सरी २०१ दूरस्थोनार्चयेदेनंनक्रुद्धोनांतिकेस्त्रियाः यानासनस्थश्चैवैनमवरुह्याभिवादयेत् २०२

त्रदेशेगुरोःपरीवादोनिंदावावर्त्ततेतत्रस्थितेनशिष्येणकर्णौहस्तादिनातिरोधातव्यौतस्माद्वादेशाद्देशांतरंगंतव्यम् २०० परीवादादिति
इदानींशिष्यकर्तृकपरीवादकृतफलमाह गुरोःपरिवादाच्छिष्योमृतःखरोभवतिगुरोर्निंदकःकुक्कुरोभवतिपरिभोक्ताअनुचितेनगुरु
धनेनोपजीवकःकृमिर्भवति मत्सरीगुरोरुत्कर्षासहनःकीटोभवतिकीटःकृमिभ्यःस्थूलोभवति २०१ दूरस्थइति दूरस्थःशिष्योऽन्यं
नियुज्यमानोवस्त्रादिनागुरुंनार्चयेत् स्वयंगमनाशक्तौत्वदोषः क्रुद्धः कामिनीसमीपेचस्थितंस्वयमपिनार्चयेत् यानासनस्थश्चशि
ष्योयानासनादवतीर्यगुरुमभिवादयेत् यानासनस्थश्चैवैनंप्रत्युत्थायेत्यनेनयानासनादुत्थानंविहितमनेनतुयानासनत्यागइत्यपुनरुक्ति

प्रतिवातइति प्रतिगतोऽभिमुखीभूतः शिष्यस्तदा गुरुदेशाच्छिष्यदेशमागच्छति सप्रतिवातः यः शिष्यदेशाद्गुरुदेशमागच्छति सोऽ
नुवातः तत्रगुरुणासमं नासीत तथाऽविद्यमानः संश्रवो यत्र तस्मिन्नसंश्रवे गुरुर्यत्र न शृणोतीत्यर्थः तत्रगुरुगतमन्यगतं वान किंचित्क
थयेत् २०२ गोऽइति यान शब्दः प्रत्येकमभिसंबध्यते बलीवर्दयाने घोटकप्रयुक्तेयाने उष्ट्रयुक्तयाने रथ काष्ठादौ प्रासादोपरि स्रस्तरेक
टेचतृणादिनिर्मिते शिलायां फलके च दारुघटित दीर्घासने नौकायां च गुरुणासह आसीत् २०४ गुरोर्गुराविति आचार्यस्याचार्ये सन्नि
हिते आचार्यइवतस्मिन्नपि अभिवादिकां वृत्तिमनुतिष्ठेत् तथा गुरुगृहे वसन् शिष्य आचार्येणानियुक्तो नस्वान् गुरून् मातृपितृव्यादी
नभिवादयेत् २०५ विद्येति आचार्यव्यतिरिक्ताउपाध्यायाविद्यागुरवः तेष्वेतदेवेति सामान्योपक्रमः किंतदाचार्यइवनित्यासार्वकालि
कीवृत्तिर्विधेया तथास्वयोनिषु पितृव्यादिषु तद्वृत्तिः अधर्मान्निषेधत्सु धर्मतत्त्वंचोपदिशत्सु गुरुवद्वर्त्तितव्यम् २०६ श्रेयस्सुविद्या

प्रतिवातेऽनुवातेचनासीतगुरुणासह असंश्रवेचैवगुरोर्नकिंचिदपिकीर्त्तयेत् २०२ गोऽश्वोष्ट्रयान
प्रासादस्रस्तरेषुकटेषुच आसीतगुरुणासार्द्धं शिलाफलकनौषुच २०४ गुरोर्गुरौसन्निहितेगुरुव
द्वृत्तिमाचरेत् नचानिसृष्टोगुरुणास्वान्गुरूनभिवादयेत् २०५ विद्यागुरुष्वेतदेवनित्यावृत्तिःस्वयो
निषु प्रतिषेधत्सुचाधर्मान्हितंचोपदिशत्स्वपि २०६ श्रेयस्सुगुरुवद्वृत्तिंनित्यमेवसमाचरेत् गुरुपु
त्रेषुचार्येषुगुरोश्चैवस्वबंधुषु २०७ बालःसमानजन्मावाशिष्योवायज्ञकर्मणि अध्यापयन्गुरुसु
तोगुरुवन्मानमर्हति २०८ उत्सादनंचगात्राणांस्नापनोच्छिष्टभोजने नकुर्याद्गुरुपुत्रस्यपादयोश्चावने
जनम् २०९ तपंःसमृद्धेषु आर्येष्विति गुरुपुत्रविशेषणं समानजातिगुरुपुत्रेषु गुरोश्च ज्ञातिषु पितृव्यादिषु सर्वदा गुरु
वद्वृत्तिमनुतिष्ठेत् गुरुपुत्रश्चात्र शिष्याऽधिकवयाश्चबोधव्यः शिष्यबालसमानवयसां अनंतरं शिष्यस्य वक्ष्यमाणत्वात् २०७ बा
लइति कनिष्ठःसवयावाज्येष्ठोपिवाशिष्योऽध्यापयन् अध्यापनसमर्थो गृहीतवेदइत्यर्थः सयज्ञकर्मणि ऋत्विगनृत्विग्वायज्ञदर्शना
र्थमागतोगुरुवत्पूजामर्हति २०८ उत्सादनमिति आचार्यवदित्यविशेषेण पूजायां प्राप्तायां विशेषमाह गात्राणामुत्सादनमुद्वर्त्तनंउ
च्छिष्टस्य भक्षणं पादयोश्च प्रक्षालनं गुरुपुत्रस्य न कुर्यात् २०९ ७ ७ ७ ७

गुरुवदिति सवर्णागुरुपत्न्यःगुरुवदाज्ञाकरणादिनापूज्याभवेयुः असवर्णाःपुनःकेवलप्रत्युत्थानाभिवादनैः २१० अभ्यंजनमि
तैलादिनादेहाभ्यंगंस्नापनंगात्राणांचोद्वर्त्तनंकेशानांचमाल्यादिनाप्रसाधनमेतानिगुरुपत्न्यानकर्त्तव्यानिकेशानामितिप्रदर्शनमात्रा
र्थंदेहस्यापिचंदनादिनाप्रसाधनंनकुर्यात् २११ गुरुपत्नीत्विति युवतीगुरुपत्नीपादयोरुपसंगृह्यअभिवादनदोषगुणज्ञेनयूना
नाभिवाद्यापूर्णविंशतिवर्षत्वंयौवनप्रदर्शनार्थंबालस्यपादयोरभिवादनमनिषिद्धम् यूनस्तुभूमावभिवादनंवक्ष्यति २१२ स्वभावइ
ति स्त्रीणामयंस्वभावःयदिहशृंगारचेष्टयाव्यामोह्यपुरुषाणांदूषणम् अतोऽर्थादस्माद्धेतोःपंडिताःस्त्रीषुनप्रमत्ताभवंति २१३ अ
विद्वांसमिति विद्वानहंजितेंद्रियइतिबुद्ध्यानस्त्रीसन्निधिर्विधेयः यस्मादविद्वांसंविद्वांसमपिवापुनःपुरुषंदेहधर्मात्कामक्रोधवशानु

गुरुवत्प्रतिपूज्याःस्युःसवर्णागुरुयोषितः असवर्णास्तुसंपूज्याःप्रत्युत्थानाभिवादनैः २१० अभ्यंजनंस्ना
पनंचगात्रोत्सादनमेवच गुरुपत्न्यानकार्याणिकेशानांचप्रसाधनम् २११ गुरुपत्नीतुयुवतिर्नाभिवा
द्येहपादयोः पूर्णविंशतिवर्षेणगुणदोषौविजानता २१२ स्वभावएषनारीणांनराणामिहदूषणम् अ
तोऽर्थान्नप्रमाद्यंतिप्रमदासुविपश्चितः २१३ अविद्वांसमलंलोकेविद्वांसमपिवापुनः प्रमदाह्युत्पथंनेतुं
कामक्रोधवशानुगम् २१४ मात्रास्वस्रादुहित्रावानविविक्तासनोभवेत् बलवानिंद्रियग्रामोविद्वांसम-
पिकर्षति २१५ कामंतुगुरुपत्नीनांयुवतीनांयुवाभुवि विधिवद्वंदनंकुर्यादसावहमितिब्रुवन् २१६
विप्रोष्यपादग्रहणमन्वहंचाभिवादनम् गुरुदारेषुकुर्वीतसतांधर्ममनुस्मरन् २१७

यायिनंस्त्रियउत्पथंनेतुं
समर्थाः २१४ अतआह मात्रेति मात्राभगिन्यादुहित्रानिर्जनगृहादौनासीतयतोऽतिबलइंद्रियगणःशास्त्रनियमितात्मानमपि
पुरुषंपरवशंकरोति २१५ कामन्त्विति कामंतुगुरुपत्नीनांयुवतीनांस्वयमपियुवायथोक्तविधिनाभिवादयेऽमुकशर्माहंभोरि
त्युपादग्रहणंविनाययेष्टमभिवादनंकुर्यात् २१६ विप्रोष्येति प्रवासादागत्यसव्येनसव्यंदक्षिणेनचदक्षिणमित्युक्तविधिनापाद
ग्रहणंप्रत्यहंचभूमावभिवादनंचगुरुपत्नीषुयुवाकुर्यात् शिष्टानामयमाचारइतिजानंतु २१७ ७ ७ ७

यथेति उक्तस्यशुश्रूषाविधेःफलमाह यथाकश्चिन्मनुष्यःखनित्रेणभूमिंखनन्जलंप्राप्नोति एवंस्थितांविद्यांगुरुसेवापरःशिष्यःप्राप्नो
ति २१८ मुंडोवेति ब्रह्मचारिणःप्रकारत्रयमाह मुंडितमस्तकः शिरःकेशोवाजटावान्वाशिखैववाजटाजातायस्यवापरेशिरःकेशामुंडि
ताःतथावाभवेत् एनंब्रह्मचारिणंकचिद्ग्रामेनिद्राणंउत्तत्रशयनमितिदर्शनात्सूर्योभिनिम्लोचेन्नास्तमियात् २१९ अत्रप्रायश्चित्तमाह
तंचेदिति तंचेत्कामतोनिद्राणंनिद्रोपवशत्वेनसूर्योऽभ्युदियात् अस्तमियात्तदासावित्रींजपन्उभयत्रापिदिनंउपवसन्रात्रौभुंजीत
अभिनिर्मुक्तस्यउत्तरेहनिउपवासजपौअभिरभागइतिकर्मप्रवचनीयसंज्ञातःकर्मप्रवचनीययुक्तेद्वितीया सावित्रीजपंतुगोतमवचनात्
तदाहगोतमः सूर्याभ्युदितोब्रह्मचारीतिष्ठेत् अहरभुंजानोऽभ्यस्तमितश्चरात्रिंजपन्सावित्रीम् ननुगोतमवचनात्सूर्याभ्युदितस्यैवदि
नाभोजनजपावुक्तौअभ्यस्तमितस्यतुरात्र्यभोजनजपौनैतदपेक्षायांव्यत्यासंदेहेवामुन्यंतरविहितमन्वर्थमन्वयमाह नतुस्फुटंमन्वर्थेस्मृतं

यथाखनन्खनित्रेणनरोवार्यधिगच्छति तथागुरुगतांविद्यांशुश्रूषुरधिगच्छति २१८ मुंडोवाजटि
लोवास्यादथवास्याच्छिखाजटः नैनंग्रामेऽभिनिम्लोचेत्सूर्योनाभ्युदियात्कचित् २१९ तंचेदभ्युदिया
त्सूर्यःशयानंकामचारतः निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम् २२० सूर्येणह्यभिनिर्मुक्तःशयानो-
ऽभ्युदितश्चयः प्रायश्चित्तमकुर्वाणोयुक्तःस्यान्महतैनसा २२१ आचम्यप्रयतोनित्यमुभेसंध्येसमाहितः शु
चौदेशेजपन्जप्यमुपासीतयथाविधि २२२ यदिस्त्रीयद्यवरजःश्रेयःकिंचित्समाचरेत् तत्सर्वमाचरेद्यु-
क्तोयत्रवास्यरमेन्मनः २२३

तदर्शनादन्यथाकुर्मः अतएवजपापेक्षायांगोतमवचनात् सावित्रीजपमभ्युपेयएवनतूभयत्र
स्फुटंमनूक्तंदिनोपवासजपावपाकुर्मः तस्मादभ्यस्तमितस्यमानवगोतमीयप्रायश्चित्तविकल्पः अस्यतुप्रायश्चित्तविधेःप्रायश्चित्तमाह
२२० सूर्येणेति यस्मात्सूर्येणाभिनिर्मुक्तोऽभ्युदितश्चनिद्राणःप्रायश्चित्तमकुर्वन्महतापापेनयुक्तोनरकंगच्छतितस्माद्यथोक्तप्रायश्चि
त्तंकुर्यात् यस्मादुक्तप्रकारेणसंध्यातिक्रमेमहत्पापमतः २२१ आचम्येति आचम्यपवित्रोनित्यमनन्यमनाःशुचिदेशेसावित्रींजपन्उभे
संध्येविधिवदुपासीत २२२ यदीति यदिस्त्रीशूद्रोवाकिंचित्श्रेयोऽनुतिष्ठतितत्सर्वयुक्तोऽनुतिष्ठेत्यत्रचशास्त्रानिषिद्धेमनोऽस्यतुष्य

नितदपिकुर्यात् श्रेयएवहिधर्मार्थौतिदर्शयति २२३ धर्मार्थाविति धर्मार्थौश्रेयोऽभिधीयतेकामहेतुत्वादितिकेचिदाचार्यामन्यंतेअन्ये
ऽर्थकामौसुखहेतुत्वात् श्रेयोऽभिधीयतेधर्मएवेत्यपरेअर्थकामयोरप्युपायत्वात् अर्थएवेहलोकेश्रेयइत्यन्येधर्मकामयोरपिसाध
नत्वात् संमतिस्स्वमतमाह धर्मार्थकामात्मकः परस्पराविरुद्धःत्रिवर्गएवपुरुषार्थतयाश्रेयइतिविनिश्चयःएवंचबुभुक्षूनुद्दिश्यायमुपदेशोनमुमु
क्षून्मुमुक्षूणांतुमोक्षएवश्रेयइतिषष्ठेवक्ष्यते २२४ आचार्यइति आचार्योदांतोदितस्यब्रह्मणः परमात्मनोमूर्त्तिःशरीरं
गर्भस्यमातात्वधारणात्पृथिवीमूर्त्तिःभ्राताचस्वःसगर्भः क्षेत्रज्ञस्यतस्माद्देवतारूपाएतानावमंतव्याः २२५ आचार्यश्चेति आचा नन्-
कोजननीचभ्राताचसगर्भोज्येष्ठःपीडितेनापिअमीनावमाननीयाःविशेषतोब्राह्मणेनयस्मात् २२६ यमिति नृणामपत्यानांसंभवेगर्भा

धर्मार्थावुच्यतेश्रेयःकामार्थौधर्मएवच अर्थएवेहवाश्रेयस्त्रिवर्गइतितुस्थितिः २२४ आचार्योब्रह्मणो
मूर्त्तिःपितामूर्त्तिःप्रजापतेः मातापृथिव्यामूर्त्तिस्तुभ्रातास्वोमूर्त्तिरात्मनः २२५ आचार्यश्चपिताचैवमाता
भ्राताचपूर्वजः नार्त्तेनाप्यवमंतव्याब्राह्मणेनविशेषतः २२६ यंमातापितरौक्लेशंसहेतेसंभवेनृणाम् न-
तस्यनिष्कृतिःशक्याकर्त्तुंवर्षशतैरपि २२७ तयोर्नित्यंप्रियंकुर्यादाचार्यस्यचसर्वदा तेष्वेवत्रिषुतुष्टेषुतपः
सर्वंसमाप्यते २२८ तेषांत्रयाणांशुश्रूषापरमंतपउच्यते नतैरभ्यननुज्ञातोधर्ममन्यंसमाचरेत् २२९

धानेसति अनंतरंयंक्लेशंमातापितरौसहेतेतस्यवर्षशतैरप्यनेकैरपिजन्मभिरानृण्यंकर्त्तुमशक्यम् मातुस्तावत्कुक्षौधारणदुःखंप्रसव
वेदनातिशयोजातस्यरक्षणवर्द्धनकष्टंचपितुरधिकान्येवरक्षासंवर्द्धनदुःखंउपनयनात्प्रभृतिवेदतदंगाध्यापनादिक्लेशातिशयइतिसर्वं
सिद्धंतस्मात् २२७ तयोर्नित्यमिति तयोर्मातापित्रोःप्रत्यहमाचार्यस्यचसर्वदाप्रीतिमुत्पादयेत् यस्मात्तेष्वेवत्रिषुप्रीतेषुसर्वंतपश्चांद्रा
यणादिकंफलद्वारेणसम्यक्प्राप्यतेमात्रादित्रयतुष्ट्यैवसर्वस्यतपसःफलंप्राप्यतइत्यादि २२८ तेषामिति तेषांमातापित्राचार्याणां
परिचर्यासर्वंतपोमयंइतएवसर्वतपःफलप्राप्तेर्यद्यन्यमपिधर्मंकथंचित्करोतितदप्येतत्त्रयानुमतिव्यतिरेकेणनकुर्यात् २२९ तएवे-
ति यस्मात्तएवमातापित्राचार्यास्त्रयोलोकाःलोकत्रयप्राप्तिहेतुत्वात् कारणेकार्योपचारः तएवब्रह्मचर्यादिभावत्रयआश्रमाःगार्हस्थ्या

त्याश्रमत्रयप्रदायकत्वात् तएवत्रयोवेदाः वेदत्रयजपफलोपायत्वात् तएवहित्रयोऽग्नयोऽभिहिताःत्रेतासंपाद्ययज्ञादिफलदातृत्वात्
२३० पितेति वैशब्दोऽवधारणेपितैवगार्हपत्योऽग्निःमातादक्षिणाग्निःआचार्यआहवनीयःसेयमग्नित्रेताश्रेष्ठतरास्तुत्यर्थत्वाच्चास्यनव
स्तुविरोधोत्रभावनीयः २३१ त्रिष्विति एतेषुत्रिषुप्रमादमकुर्वन्ब्रह्मचारीतावज्जपत्येव गृहस्थोपित्रीन्लोकान्विजयतेसंज्ञापूर्वकस्यात्म
नेपदविधेरनित्यत्वात्नविपराभ्यांजेरित्यात्मनेपदंत्रीन्लोकान्विजयेदिति त्रिलोकाधिपत्यंप्राप्नोतितथास्ववपुषाप्रकाशमानःसूर्यादिदेववत्
दिविहृष्टोभवति २३२ इममिति इमंभूर्लोकंमातृभक्त्यापितृभक्त्यामध्यममंतरीक्षम् आचार्यभक्त्यातुहिरण्यगर्भलोकमेवप्राप्नोति २३३
सर्वेतस्येति यस्यैतेत्रयोमातृपित्राचार्याआदृताःसत्कृताः तस्यसर्वेधर्माःफलदाभवंतियस्यैतेत्रयोऽनादृतास्तस्यसर्वाणिश्रौतस्मार्त्तकर्माणि

तएवहित्रयोलोकास्तएवत्रयआश्रमाः तएवहित्रयोवेदास्तएवोक्तास्त्रयोऽग्नयः २३० पितावैगार्हपत्यो
ऽग्निर्माताग्निर्दक्षिणःस्मृतः गुरुराहवनीयस्तुसाग्नित्रेतागरीयसी २३१ त्रिष्वप्रमाद्यन्नेतेषुत्रीन्लोका
न्विजयेद्गृही दीप्यमानःस्ववपुषादेववद्दिविमोदते २३२ इमंलोकंमातृभक्त्यापितृभक्त्यातुमध्यमम् गु
रुशुश्रूषयात्वेवंब्रह्मलोकंसमश्नुते २३३ सर्वेतस्यादृताधर्मायस्यैतेत्रयआदृताः अनादृतास्तुयस्यैतेसर्वा
स्तस्याफलाःक्रियाः २३४ यावत्त्रयस्तेजीवेयुस्तावन्नान्यंसमाचरेत् तेष्वेवनित्यंशुश्रूषांकुर्यात्प्रियहितेरतः
२३५ तेषामनुपरोधेनपारत्र्यंयद्यदाचरेत् तत्तन्निवेदयेत्तेभ्योमनोवचनकर्मभिः २३६ त्रिष्वेतेष्वितिकृत्यंहि
पुरुषस्यसमाप्यते एषधर्मःपरःसाक्षादुपधर्मोऽन्यउच्यते २३७

निष्फलानिभवंति २३४ यावदिति तेत्रयोयावज्जीवं-
तितावदन्यंधर्मंस्वातंत्र्येणनानुतिष्ठेत् तदनुज्ञयातुधर्मानुष्ठानंमान्विहितमेवकिंतुतेष्वेवमस्य हं प्रियहितपरःशुश्रूषांतदर्थंप्रीतिसाधनं
प्रियंभेषजपानादिवत् आयत्यामिष्टसाधनंहितम् २३५ तेषामिति तेषांशुश्रूषाया अविरोधेनतदनुज्ञातोयद्यन्मनोवचनकर्मभिःपरलो
कफलंकर्मानुतिष्ठेत्तन्मयैतदनुष्ठितमितिपश्चात्तेभ्योनिवेदयेत् २३६ त्रिष्विति इतिशब्दःकार्त्स्न्येहिशब्दोहेतौयस्मादेतेषुत्रिषुशुश्रूषिते
षुसर्वंश्रौतस्मार्त्तंकर्त्तव्यंसंपूर्णमनुष्ठितंभवतितत्फलावाप्तेस्तस्मादेषसएवधर्मःसाक्षात्सर्वपुरुषार्थसाधनः अस्याग्निहोत्रादिप्रतिनियत

स्वर्गादिहेतुरूपधर्मोजयन्यधर्मइतिसुश्रूषास्तुतिः २३७ श्रद्धानइति श्रद्धायुक्तःशुभांदृष्टशक्तिंगारुडादिविद्यांअवरान्छूद्रादपि गृण्हीयात् अंत्यश्चांडालः तस्मादपिजातिस्मरादेर्विहितयोगप्रकर्षात् दुष्कृतशेषोपभोगार्थमवाप्तचांडालजन्मतःपरंधर्मंमोक्षोपायमाददीत तथाश्रज्ञानमेवोपक्रम्यमोक्षधर्मेमाध्यज्ञानंब्राह्मणाःक्षत्रियान्वैश्यान्शूद्रांदपिनीचादभीक्ष्णंश्रद्धातव्यंश्रद्धानेननित्यन्मश्रद्धिनंभतिजन्ममृत्युविशेषता मेधातिथिस्तुश्रुतिस्मृत्यपेक्षयापरोधर्मोलौकिकःधर्मशब्दोव्यवस्थायामपियुज्यते यदिचांडालोप्यत्रप्रदेशेमानिरंस्थामावास्मिन्नंभसिस्नायादितिवदतितमपिधर्ममनुतिष्ठेत् प्रागल्भ्याल्लौकिकंवस्तुपरंधर्ममितिब्रुवन् चित्रंतथापिसर्वत्रश्लाघ्योमेधातिथिःसताम् स्त्रीरत्नंआत्मापेक्षयानिकृष्टकुलादपिपरिणेतुंस्वीकुर्यात् २३८ विषादिति विषंयद्यमृतसंयुक्तंभवतितदाविषमपसार्यतस्मादमृतंग्राह्यंबालादपिहितवचनंग्राह्यंशत्रुतोपिसज्जनवृत्तंअमेध्यादपिसुवर्णादिकंग्रहीतव्यम् २३९ स्त्रियइति अतस्त्र्यादीना

श्रद्दधानःशुभांविद्यामाददीतावरादपि अंत्यादपिपरंधर्मंस्त्रीरत्नंदुष्कुलादपि २३८ विषादप्यमृतंग्राह्यंबालादपिसुभाषितम् अमित्रादपिसद्वृत्तममेध्यादपिकांचनम् २३९ स्त्रियोरत्नान्यथोविद्याधर्मःशौचंसुभाषितम् विविधानिचशिल्पानिसमादेयानिसर्वतः २४० अब्राह्मणादध्ययनमापत्कालेविधीयते अनुव्रज्याचशुश्रूषायावदध्ययनंगुरोः २४१ नाब्राह्मणेगुरौशिष्योवासमात्यंतिकंवसेत् ब्राह्मणेचाननूचानेकांक्षन्गतिमनुत्तमाम् २४२ यदित्वात्यंतिकंवासंरोचयेतगुरोःकुले युक्तःपरिचरेदेनमाशरीरविमोक्षणात् २४३

युक्तानामपिदुष्टांतत्वेनोपादनंयथास्त्र्यादयोनिकृष्टकुलादिभ्योगृह्यंतेतथाअन्यान्यपिहितानिचित्रलिखनादसर्वतःप्रतिग्रहीतव्यानि २४० अब्राह्मणादिति ब्राह्मणादन्योयोद्विजःक्षत्रियस्तदभावेवैश्योवातस्मादध्ययनमापत्कालेब्राह्मणाध्यापकासंभवेब्रह्मचारिणोविधीयते अनुव्रज्यादिरूपागुरोःशुश्रूषप्रायावदध्ययनंतावत्कार्य्यागुरुपादप्रक्षालनउच्छिष्टप्राशनादिरूपाशुश्रूषाप्रशस्तासानकार्यातदर्थमनुव्रज्याचेतिविशेषितंगुरुत्वमपियावदध्ययनमेवक्षत्रियस्याहव्यासःमंत्रदःक्षत्रियोविप्रैःशुश्रूषानुगमादिनाप्राप्तविद्योब्रस्तुपुनस्तस्यगुरुःस्मृतः ब्रह्मचारित्वेनैष्ठिकस्यापिअब्राह्मणादध्ययनंप्रसक्तंप्रतिषेधयति २४१ नाब्राह्मणइति आत्यंतिकंवासंयावज्जीविचर्यंक्षत्रियादिकेगुरौब्राह्मणेसांगवेदानध्येतरिअनुत्तमांगतिंमोक्षलक्षणामिच्छन्शिष्योनावतिष्ठेत् २४२ यदीति यदित्तुगुरोःकुलेनैष्ठिकब्रह्म

चार्यर्यकमात्यंतिकंवासमिच्छेत्तदायावज्जीवनमुद्युक्तोगुरुंशुश्रूषयेत् २४३ अस्यफलमाह आसमाप्तेरिति समाप्तिःशरीरस्यजीव
नत्यागः तत्पर्यंतंयोगुरुंपरिचरतिसतस्ततोब्रह्मणःसद्मरूपमविनाशिप्राप्नोतिब्रह्मणिलीयतइत्यर्थः २४४ नपूर्वमिति उपकुर्वाणस्यायं
विधिःनैष्ठिकस्यस्नानासंभवात् गुरुदक्षिणादानंधर्मज्ञोब्रह्मचारीस्नानात्पूर्वंकिंचित्गोवस्त्रादिधनंगुरवेनावश्यंदद्यात् यदितुयदृच्छा
तोलभतेतेनदागुरवेदद्यादेव अतएवस्नानात्पूर्वंगुरवेदानमाहापस्तंबः यदन्यानिद्रव्याणियथालाभमपहरतिदक्षिणाएवताःसएवब्रह्मचा
रिणोयज्ञोनित्यव्रतमिति स्नास्यन्पुनर्गुरुणादत्ताज्ञोयथाशक्तिधनिनंयाचित्वापिप्रतिग्रहादिनापिगुरवेऽर्थमाहृत्यावश्यंदद्यात् २४५ किं
तत्तदाह क्षेत्रमिति शक्त्यागुरवेऽर्थमाहरेदित्युक्तत्वात् क्षेत्रहिरण्यादिकंयथासामर्थ्यंविकल्पितंसमुदितंवागुरवेदत्वातत्प्रीतिमर्जयेत् वि-
कल्पपक्षेचांततोऽन्यासंभवेच्छत्रोपानहमपिदद्यात् द्वंद्वनिर्देशात् समुदितदानंप्रदर्शनार्थंचैतत्संभवेऽन्यदपिदद्यात् अतएवलघुहारी

आसमाप्तेःशरीरस्ययस्तुशुश्रूषतेगुरुम् सगच्छत्यंजसाविप्रोब्रह्मणःसद्मशाश्वतम् २४४ नपूर्वंगुरवेकिं
चिदुपकुर्वीतधर्मवित् स्नास्यंस्तुगुरुणाज्ञप्तःशक्त्यागुर्वर्थमाहरेत् २४५ क्षेत्रंहिरण्यंगामश्वंछत्रोपानहमा
सनम् धान्यंशाकंचवासांसिगुरवेप्रीतिमावहन् २४६ आचार्येतुखल्वपेतेगुरुपुत्रेगुणान्विते गुरुदारेसपि
डेवागुरुवद्वृत्तिमाचरेत् २४७ एतेष्वविद्यमानेषुस्थानासनविहारवान् प्रयुंजानोऽग्निशुश्रूषांसाधयेद्देहमात्म
नः २४८ एवंचरतियोविप्रोब्रह्मचर्यमविप्लुतः सगच्छत्युत्तमस्थानंनचेहाजायतेपुनः २४९ इतिमानवेधर्म
शास्त्रेभृगुप्रोक्तायांसंहितायांद्वितीयोऽध्यायः २ ७ ७

तः एकमप्यक्षरंयस्तुगुरुःशिष्येनिवेदयेत् पृथिव्यांनास्ति
तद्द्रव्यंयद्दत्वाचानृणीभवेत् असंभवेशाकमपिदद्यात् २४६ आचार्यइति नैष्ठिकस्यायमुपदेशः आचार्येमृतेतत्सुतेविद्यादिगुणयुक्तेतद-
भावेगुरुपत्न्यांतदभावेगुरोःसपिंडेपितृव्यादौगुरुवच्छुश्रूषामनुतिष्ठेत् २४७ एतेष्विति एतेषुत्रिषु अविद्यमानेषुसततमाचार्यस्यैवाग्नेःस-
मीपेस्थानासनविहारैःसायंप्रातरादौसमिद्धोमादिनाचाग्नेःशुश्रूषांकुर्वन्आत्मनोदेहमात्मदेहावच्छिन्नंजीवंब्रह्मप्राप्तियोग्यंसाधयेत् २४८
एवंचरतीति आसमाप्तेःशरीरस्येत्यनेनयावज्जीवमाचार्यशुश्रूषायामोक्षलक्षणंफलम् इदानीमाचार्येमृतेऽपिएवमित्यनेनानंतरोक्तविधि

नाआचार्यपुत्रादीनामप्यग्निपर्यंतानांशुश्रूषकोयोनैष्ठिकोब्रह्मचर्यमखंडितव्रतोऽनुतिष्ठतिसउत्तमंस्थानंब्रह्मण्यांतकसलक्षणंप्राप्नोति
नचेहसंसारेकर्मवशादुत्पत्तिंलभते २४९ इतिमन्वर्थमुक्तावल्यांमनुवृत्तौद्वितीयोऽध्यायः २ ॥ ॥ ॥ ॥
पूर्वत्रासमाप्तेःशरीरस्येत्यनेननैष्ठिकब्रह्मचर्यमुक्तम् नतत्रावध्यपेक्षा आसमावर्त्तनादित्यनेनचोपकुर्वाणकस्यसावधिब्रह्मचर्यमुक्तम्
अतस्तस्यैवगार्हस्थ्याधिकारः तत्रकियदवधिविधौब्रह्मचर्येतस्यगार्हस्थ्यमित्यपेक्षायामाह षट्त्रिंशदाब्दिकमिति त्रयोवेदाऋग्यजुःसा
माख्याःत्रिवेदीतद्विषयंव्रतंस्वगृह्योक्तनियमसमूहरूपंषट्त्रिंशद्वर्षयावत्गुरुकुलेचरितव्यंषट्त्रिंशदाब्दिकमितिषट्त्रिंशदब्दशब्दात्का
लाधृञ्अस्मिंश्चपक्षेसमंस्याद्श्रुतत्वादितिन्यायेनप्रतिवेदशाखंद्वादशवर्षाणिव्रतचरणम् तदर्द्धिकमष्टादशवर्षाणितत्रप्रतिवेदशाखंषड्
पादिकंनववर्षाणितत्रप्रतिवेदशाखंत्रीणि यावताकालेनोक्तावधेरूर्ध्वमधोवावेदान्गृह्णातितावत्कालंवाव्रतचरणंविषमशिष्टत्वेपिपक्षाणा-
मेकादेयात्रिवोदेयायद्वेयाइतिवत्नियमफलेन्यूनापेक्षोविकल्पः तथाचश्रुतिः नियमेनाधीतंवीर्यवत्तरंभवतीतिग्रहणांतिकपक्षसंदर्शनात्

षट्त्रिंशदाब्दिकंचर्यंगुरौत्रैवेदिकंव्रतम् तदर्द्धिकंपादिकंवाग्रहणांतिकमेववा १ वेदानधीत्यवेदौवा
वेदंवापियथाक्रमम् अविप्लुतब्रह्मचर्योगृहस्थाश्रममावसेत् २

वोक्तपक्षत्रयेग्रहणादूर्ध्वमपिव्रतानुष्ठान
मवगम्यते अथर्ववेदस्यऋग्वेदांशत्वेपिऋग्वेदंयजुर्वेदंसामवेदमथर्वाणंचतुर्थमितिछांदोग्योपनिषदिचतुर्थवेदत्वेनकीर्त्तनात् अंगानिवे
दाश्चत्वारइतिविष्णुपुराणादिवाक्येषुचपृथङ्निर्देशाच्चतुर्थवेदत्वेपिप्रायेणाभिचारार्थत्वात्यज्ञविद्यायामनुपयोगाच्चानिर्देशः तथाहिऋग्वे
देनैवहौत्रंकुर्वन्यजुर्वेदेनाध्वर्यवंसामवेदेनौद्गात्रंयदेवत्रय्यैविद्यायैसूक्तंतेनब्रह्मत्वमितिश्रुतेस्त्रयीसंपाद्यत्वंयज्ञानांज्ञायते अयंचमानवःत्रैवे-
दिकव्रतचर्याविधिर्नाथर्ववेदेव्रतचर्यांनिषेधयतितत्परत्वेवाक्यभेदप्रसंगात् श्रुत्यंतरेवेदमात्रेव्रतश्रवणाच्च यदाहयोगियाज्ञवल्क्यः
ब्रह्मचर्यंद्वादशाब्दानिपंचवा १ वेदानधीत्येति वेदशब्दोयंभिन्नवेदशाखापरः स्वशाखाध्ययनपूर्वकवेदशाखात्रयंद्वयमेकांवाशाखांमंत्र
ब्राह्मणक्रमेणाधीत्यगृहस्थाश्रमंगृहस्थविहितकर्मकलापरूपमनुतिष्ठेत् कृतदारपरिग्रहोगृहस्थःगृहशब्दस्यदारवचनत्वात् अविप्लुत-
ब्रह्मचर्यइतिपूर्वविहितस्त्रीसंयोगमधुमांसभक्षणवर्जनरूपब्रह्मचर्यानुवादोयंमुख्याध्ययनांगत्वख्यापनार्थःपुरुषशक्त्यपेक्षश्चायमेकद्वि
त्रिशाखाध्ययनविकल्पःयद्यपिव्रतानिवेदाध्ययनंचनित्यवदुपदिशतामनुनोभयस्नातकएवश्रेष्ठत्वादभिहितस्तथापिस्मृत्यंतरादन्यस्नात-

कोपिचोद्यः तदाहहारीतः त्रयस्नातकाभवंतिविद्यास्नातकोव्रतस्नातकोविद्याव्रतस्नातकश्चेति यःसमाप्यवेदमसमाप्यव्रतानिसमावर्त्ततेसविद्यास्नातकः यःसमाप्यव्रतानिअसमाप्यवेदंसमावर्त्ततेसव्रतस्नातकःउभयंसमाप्यसमावर्त्ततेयःसविद्याव्रतस्नातकः याज्ञवल्क्योप्याह वेदंव्रतानिवापारंनीत्वाह्युभयमेववेति २ तमिति तंब्रह्मचारिधर्मानुष्ठानेनस्यातंदीयतइतिदायःब्रह्मैवदायोब्रह्मदायःतंहरतीतिब्रह्मदायहरंपितुःपितृतोगृहीतवेदमित्यर्थः पितृतोऽध्ययनंमुख्यमुक्तंपितुरभावेआचार्यादेरप्यधीतवेदंमाल्यालंकृतंउत्कृष्टशयनोपविष्टंगोसाधनमधुपर्केणपिताआचार्योवाविवाहात्प्रथमंपूजयेत् ३ गुरुणेति गुरुणादत्तानुज्ञःस्वगृह्योक्तविधिनाकृतस्नानसमावर्त्तनःसमानवर्णांसुभलक्षणांकन्यांविवहेत् ४ असपिंडान्वेति मातुर्यासपिंडानभवतिसप्तमपुरुषपर्यंतंसपिंडतांवक्ष्यति सपिंडतातुपुरुषेसप्तमेविनिवर्त्ततइतितेनमातामहादिवंशजायानभवतीत्यर्थः चशब्दान्मातृसगोत्रापिमातृवंशजन्मपरंपरनाम्नोऽप्रत्यभिज्ञानेसतिनविवाह्यातदितरातुमातृसगोत्राविवाह्येतिसंगृहीतम् तथाचव्यासः सगोत्रांमातुरप्येकेनेच्छंत्युद्वाहकर्मणि जन्मनाम्नोरविज्ञाने उद्वहेदविशंकितः यत्तुमेधातिथिनाविशिष्टनाम्नामातृसगोत्रानिषेधवचनंलिखितम् परिणीयसगोत्रांतुसमानप्रवरांतथा तस्यांकृत्वासमुत्सर्गंद्विजश्चांद्रायणंचरेत् मातुलस्यसुतांचैवमातृगोत्रांतथैवचेति तदपिमातृवंशजन्मनामापरिज्ञानविषयमेव असगोत्राचयापितुरितिपितुर्यासगोत्रानभवतिचकारात्पितृसपिंडापिपितृव्यादिसंततिप्रभवायानभवतीत्यर्थः साद्विजातीनांदारत्वसंपादकेविवाहेप्रशस्तामैथुनसाध्येअग्न्याधानकर्मपुत्रोत्पादनार्थंचेति ५ महांत्यपीतिउत्कृष्टान्यपिगवादिभिःसमृद्धान्यपिइमानिदशकुलानिविवाहेत्यजेत् ६ तानिकानीत्याह हीनक्रियमिति जातकर्मादिक्रियारहितंस्त्रीजनकंवेदाध्यापनशून्यम् बहुदीर्घरोमान्वितं अर्शोनामव्याधियुक्तम् क्षयोराजयक्ष्मामंदानलापस्मारश्वित्रकुष्ठयुक्तानांचकुलानिवर्जयेदिति पूर्वक्रियासंबंधः दृष्टमूलत्वाच्चास्यप्रतिषेधस्यमातुल

तंप्रतीतंस्वधर्मेणब्रह्मदायहरंपितुः स्रग्विणंतल्पआसीनमर्हयेत्प्रथमंगवा ३ गुरुणानुमतःस्नात्वा
समावृत्तोयथाविधि उद्वहेतद्विजोभार्यांसवर्णांलक्षणान्विताम् ४ असपिंडाचयामातुरसगोत्राचयापि-
तुः सामशस्ताद्विजातीनांदारकर्मणिमैथुने ५ महांत्यपिसमृद्धानिगोजाविधनधान्यतः स्त्रीसंबंधेदशैता
निकुलानिपरिवर्जयेत् ६

वद्गुसन्नाअनुवहंते नेनहीनक्रियादिकुलात्परिणीतायांसंततिरपितादृशीस्यात् व्याधयःसंचारिणइतिवैद्यकाःपठंति सर्वेसंक्रामि
णोरोगावर्जयित्वाप्रवाहिकांइति अवेदमूलाकथमियंप्रमाणमितिचेन्न दृष्टार्थतयैवप्रामाण्यसंभवात् तदुक्तंभविष्यपुराणे सर्वाएत
वेदमूलादृष्टार्थाःपरिहृत्यतु मीमांसाभाष्यकारेणापिस्मृत्यधिकरणेऽडितम् ७ येदृष्टार्थाःतेतत्प्रमाणंयेत्वदृष्टार्थास्तेवैदिकाःशब्दानु
मानमिति कुलाश्रयंप्रतिषेधमभिधायकन्यास्वरूपाश्रयप्रतिषेधमाह नोद्वहेदिति कपिलकेशान्नित्यव्याधितां अविद्यमानलोमांप्रचुर-
लोमांबहुपरुषभाषिणीं पिंगलाक्षींकन्यान्नोपयच्छेत् ८ नेति ऋक्षंनक्षत्रंतन्नामिकांआर्द्रारेवतीत्यादिकांएवंतरुनदीम्लेच्छपर्वतप
क्षिसर्पदासभयानकनामिकांकन्यांनोद्वहेत् ९ अव्यंगांगीमिति अविकलांगीमधुरस्रवोयनाम्नींहंसगजरुचिरगमनांअनतिस्थूललोम

हीनक्रियंनिष्पुरुषंनिश्छंदोरोमशार्शसम् क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानिच ७ नोद्वहेत्क
पिलांकन्यांनाधिकांगींनरोगिणीम् नालोमिकांनातिलोमांनवाचाटांनपिंगलाम् ८ नर्क्षवृक्षनदीना
म्नींनांत्यपर्वतनामिकाम् नपक्ष्यहिप्रेष्यनाम्नींनचभीषणनामिकाम् ९ अव्यंगांगींसौम्यनाम्नींहंसवा
रणगामिनीम् तनुलोमकेशदशनांमृद्वंगीमुद्वहेत्स्त्रियम् १० यस्यास्तुनभवेद्भ्राताविज्ञायेतवापिता
नोपयच्छेततांप्राज्ञःपुत्रिकाधर्मशंकया ११

केशदशनांकोमलांगींकन्यामुद्वहेत् १० अत्रविधिनिषेधयोरभिधानम
निषिद्धविहितकन्यापरिणयनमभ्युदयार्थमितिदर्शयितुमाह यस्याइति यस्याःपुनर्भ्राताना्स्तितांपुत्रिकाशंकयानोद्वहेत् यदपत्यं
भवेदस्यास्तन्ममस्यात्स्वधाकरमित्यभिसंधानमात्रादपिपुत्रिकाभवति अभिसंधिमात्रात्पुत्रिकेत्येकइतिगौतमस्मरणात् यस्यावाविशे
षेणपितानज्ञायतेअनेनेयमुत्पन्नेतितामपिनोद्वहेत् अत्रचपुत्रिकाधर्मशंकयेतिनयोजनीयमितिकेचित् गोविंदराजस्त्वाहभिन्नपितृ
कयोरप्येकमातृकयोर्भ्रातृत्वप्रसिद्धेःसभ्रातृकत्वेपियस्याविशेषेणापितानज्ञायतेतामपिपुत्रिकाशंकयैवनोद्वहेदिति मेधातिथिस्तुएकमे
वइमंपक्षमाह यस्यास्तुभ्रातानास्तितांपुत्रिकाशंकयानोपयच्छेत् पिताचेन्नज्ञायतेप्रोषितोमृतोवावाशब्दश्चेदर्थेपितरितुविद्यमानेत
दीयवाक्यादेवपुत्रिकात्वाभावमवगम्याभ्रातृकापिवोढव्येति अस्माकंतुविकल्पस्वरसादिदंप्रतिभाति यस्याविशेषेणपितानज्ञायतेता
मपितावत्तेनाधर्मशंकयानोद्वहेत् अत्रचपक्षेपुत्रिकाधर्मशंकयेतिपुत्रिकात्वाधर्मश्चतयोःशंकापुत्रिकाधर्मशंकयेतियथासंख्यंयोजनी

यं अत्रच प्रकरणे सगोत्रांचेदमत्योपयच्छेत् मातृवदेनां विभृयादिति परित्यागश्रवणात् परिणीय सगोत्रांचेति प्रायश्चित्तश्रवणाच्च
तत्रतामसमभिव्याहृतेच मातृसपिंडापरिणयनादौ भार्यात्वमेवनभवति भार्याशब्दस्याहवनीयादिवत्संस्कारवचनत्वात् येषांपु-
नर्दृष्टगुणदोषमूलके विधिनिषेधाभिधानेयथाहीनक्रियमितिनतदतिक्रमे भार्यात्वाभावः अतएव मनुनामहांत्यपिसमृद्धानीत्यादि
पृथक्करणं कृतं एतन्मध्यपतितश्च नर्क्षवृक्षनदीनाम्नीमित्यादिप्रतिषेधोपिनभार्यात्वाभावफलकः किंत्वत्र शास्त्रातिक्रमात्प्रायश्चित्तमा
त्रम् ११ सवर्णाग्रइति ब्राह्मणक्षत्रियवैश्यानां प्रथमे विवाहे कर्त्तव्ये सवर्णाश्रेष्ठा भवति कामतः पुनर्विवाहे प्रवृत्तानामेतावक्ष्यमाणा आनु
लोम्येन श्रेष्ठा भवेयुः १२ शूद्रैवेति शूद्रस्य शूद्रैव भार्या भवति नतूत्कृष्टवैश्यादयस्तिस्रः वैश्यस्यच शूद्रा वैश्याच भार्या मन्वादिभिः स्मृता
क्षत्रियस्य वैश्या शूद्रे क्षत्रियाच ब्राह्मणस्य क्षत्रिया वैश्या शूद्रा ब्राह्मणीच वसिष्ठोपि शूद्रामप्येके मंत्रवर्जमिति द्विजातीनां मंत्रवर्जितं शूद्रा
विवाहमाह १३ नब्राह्मणेति ब्राह्मणक्षत्रिययोर्गार्हस्थ्यमिच्छतोः सर्वथा सवर्णालाभे कस्मिंश्चिदपि वृत्तांते इतिहासाख्यानेपि शूद्रभार्या

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोवराः १२ शूद्रैव भार्या
शूद्रस्य साच स्वाच विशः स्मृते तेच स्वाचैव राज्ञश्च ताश्च स्वाचाग्रजन्मनः १३ नब्राह्मणक्षत्रिययोराप
द्यपि हि तिष्ठतोः कस्मिंश्चिदपि वृत्तांते शूद्रा भार्योपदिश्यते १४ हीनजातिस्त्रियं मोहादुद्वहंतो द्विजात
यः कुलान्येव नयंत्याशु ससंतानानि शूद्रताम् १५ शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्यच शौनकस्य सु
तोत्पत्त्या तदपत्यतया भृगोः १६ नाभिधीयते पूर्वं सवर्णानुक्रमेणानुलोम्येन विवाहाय यत्तु ज्ञानात् अयं निषेधः प्रातिलोम्येन

विवाहविषयो बोद्धव्यः ब्राह्मणक्षत्रियग्रहणं चेदं दोषभूयस्त्वार्थं अनंतरं द्विजातय इति बहुवचनात् वैश्यगोचरनिषेधस्यापि वक्ष्यमाण
त्वात् १४ हीनजातिस्त्रियमिति सवर्णामपि परिणीय हीनजातिं शूद्रां शास्त्राविवेकात्परिणयंतो ब्रह्मक्षत्रियवैश्यास्तत्रोत्पन्नपुत्रपौत्रा
दिक्रमेण कुलान्येव ससंततिकानि शूद्रतां गमयंति अत्र द्विजातय इति बहुवचननिर्देशात् निंदया वैश्यस्यापि निषेधः कल्प्यते ब्राह्मणक्ष
त्रिययोस्तु पूर्वत्रैव निषेधकल्पनात्तन्निंदामात्रार्थत्वेनैव १५ शूद्रावेदीति शूद्रां विंदति परिणयतीति शूद्रावेदी स पतति पतितइव भवतीइ-
दमत्रेर्मतं उतथ्यतनयस्य गौतमस्यच अत्र्यादिग्रहणं सादरार्थं एतद्ब्राह्मणविषयं शूद्रायां सुतोत्पत्त्या पततीति शौनकस्य मतमेतत् क्षत्रि

यविषयंशूद्रासुतोत्पत्त्यापततीतिभृगोर्मतंएतदृैश्यविषयंएतस्यमहर्षिमतत्रयस्यव्यवस्थासंभवेविसदृशपतनविकल्पायोगात्
मेधातिथिगोविंदराजयोस्तुमतंशूद्रावेदापततीतिपूर्वोक्तशूद्राविवाहनिषेधविशेषः सुतोत्पत्त्यापततीतिदैवाज्ज्ञानशूद्राविवाहेऋतौ
नोपेयादितिविधानार्थंऋतुकालगमनेसुतोत्पत्तेः तदपत्यतयेतितुतान्येवशूद्रोत्पन्नान्यपत्यानियस्यसतदपत्यस्तस्यभावस्तदपत्यता
तयापततिएतेनेदमुक्तंऋतावुपयन्नितरासुजातापत्यउपेयात् १६ शूद्रामिति सवर्णामपरिणीयदैवान्स्नेहाद्वाशूद्रापरिणेतुर्ब्राह्म
णस्यशयननिषेधोयंनिंदयानिषेधस्मृत्यनुमानात्शूद्रांगत्वाब्राह्मणोनरकंगच्छतिजनयित्वासुतंतस्यांऋतुकालगमननिषेधपरंब्रा
ह्मण्यादेवहीयतइतिदोषभूयस्त्वार्थः १७ दैवेति यदिकथंचित्सवर्णानुक्रमेणवाशूद्रापिपरिणीयतेतदाभार्यात्वेनप्रसक्तानितत्कर्तृ
कानिदैवेत्यनेननिषिध्यंतेदैवंहोमादिपित्र्यंश्राद्धादिआतिथेयंअतिथिभोजनादि एतानियस्यशूद्रासंपाद्यानितद्धव्यंकव्यंपितृदेवा

शूद्रांशयनमारोप्यब्राह्मणोयात्यधोगतिम् जनयित्वासुतंतस्यांब्राह्मण्यादेवहीयते १७ दैवपित्र्याति
थेयानितत्प्रधानानियस्यतु नाश्नंतिपितृदेवास्तन्नचस्वर्गंसगच्छति १८ वृषलीफेनपीतस्यनिःश्वासो
पहतस्यच तस्यांचैवप्रसूतस्यनिष्कृतिर्नविधीयते १९ चतुर्णामपिवर्णानांप्रेत्यचेहहिताहितान् अ
ष्टाविमान्समासेनस्त्रीविवाहान्निबोधत २० ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः गांधर्वोराक्षसश्चै
वपैशाचश्चाष्टमोधमः २१

नाश्नंतिनचतेनातिथ्येनसगृहीस्वर्गंयाति यस्तुसंस्कारयेन्मोहात्सजात्यास्थितयान्ययेतिसवर्णा-
यांसन्निहितायांनिषेधंवक्ष्यति अयंत्वसन्निहितायामपीत्यपुनरुक्तिः १८ वृषलीति वृषलीफेनोऽधररसः सपीतोयेनसवृषलीफेनपी
तः वाहिताग्न्यादिष्वित्यनेनसमासः अनेनशूद्राया अधररसपानंनिषिध्यते निःश्वासोपहतस्यचेतितयासहैकशय्यादौशयननिषेधः
तस्यांजातापत्यस्यशुद्धिर्नोपदिश्यतइतिऋतुकालगमननिषेधानुवादः १९ चतुर्णामिति चतुर्णामपिवर्णानांब्राह्मणादीनांपरलो
केइहलोकेचकांश्चित्हितान् कांश्चिदहितान् इमानभिधास्यमानानष्टौसंक्षेपेणभार्याप्राप्तिहेतून्विवाहान्शृणुत २० ब्राह्मइति
नएतेनामतोनिर्दिश्यंतेब्राह्मराक्षसादिसंज्ञाश्चेयंशास्त्रसंव्यवहारार्थास्तुतिनिंदाप्रदर्शनार्थंच ब्रह्मणइवायंब्राह्मः रक्षसइवायंराक्ष

सः नतुब्रह्मादिदेवतान्वंविवाहानांसंभवति पैशाचस्याधर्मस्याभिधानंनिंदातिशयार्थम् २१ यइति धर्मादनपेतोधर्म्यःयोविवा
होधर्म्योयस्य विवाहस्ययौगुणदोषौइष्टानिष्टफलेतत्तद्विवाहोत्पन्नापत्येषुयेगुणागुणास्तत्सर्वंयुष्माकंप्रकर्षेणाभिधास्यामि वस्य
माणानुकीर्त्तनमिदंशिष्याणांस्वरूपग्रहणार्थम् २२ षडिति ब्राह्मणस्यब्राह्मादिक्रमेणषट् क्षत्रियस्यावरानुपरितनानासुरादीं
श्चतुरः विट्शूद्रयोस्तुतानेवराक्षसवर्जितानासुरगांधर्वपैशाचान्धर्मादनपेतान्जानीयात् २३ चतुरइति ब्राह्मणस्यप्रथमसंपठि
तान्ब्राह्मादींश्चतुरः क्षत्रियस्यराक्षसमेकमेववैश्यशूद्रयोरासुरमेतान्श्रेष्ठान्ज्ञातारोजानंति अतएवब्राह्मणादिष्वासुरादीनांपूर्व
विहितनामप्यत्राप्युपादानंजघन्यत्वज्ञापनार्थंतेनप्रशस्तविवाहासंभवेजघन्यस्यापिपरिग्रहइतिदर्शितम् एवमुत्तरत्रापिविगर्हित
परित्यागोबोद्धव्यः २४ पंचानामिति इहपैशाचप्रतिषेधादुपरितनानांपंचानांप्राजापत्यादीनांग्रहणम् तेषुमध्येप्राजापत्यगांधर्वरा

योयस्यधर्म्योवर्णस्यगुणदोषौचयस्ययौ तद्वःसर्वंप्रवक्ष्यामिप्रसवेचगुणागुणान् २२ षडानुपूर्व्याविप्रस्य
क्षत्रस्यचतुरोवरान् विट्शूद्रयोस्तुतानेवविद्याद्धर्म्यानराक्षसान् २३ चतुरोब्राह्मणस्याद्यान्प्रशस्तान्
कवयोविदुः राक्षसंक्षत्रियस्यैकमासुरंवैश्यशूद्रयोः २४ पंचानांतुत्रयोधर्म्याद्वावधर्म्यौस्मृताविह पैशा
चश्चासुरश्चैवनकर्त्तव्योकदाचन २५ पृथक्पृथग्वामिश्रौवाविवाहौपूर्वचोदितौ गांधर्वोराक्षसश्चैवध-
र्म्यौक्षत्रस्यतौस्मृतौ २६

क्षसास्त्रयोधर्मादनपेतास्तत्रप्राजापत्यः क्षत्रियादीनामप्राप्तोविधीयतेब्राह्मणस्यविहितत्वाद
नूद्यते गांधर्वस्यचचतुर्णामेवप्राप्तत्वादनुवादः राक्षसोपिवैश्यशूद्रयोर्विधीयते ब्राह्मणस्यक्षत्रियवृत्त्यवस्थितस्यापि आसुरपै-
शाचौनकर्त्तव्यौकदाचनेत्यविशेषाच्चतुर्णामेवनिषिध्यते अत्रयंवर्णप्रतियस्यविवाहस्यविधिनिषेधौतस्यतंप्रतिविकल्पः सचविहि-
तासंभवेबोद्धव्यः २५ पृथगिति पृथक्पृथगितिप्राप्तत्वादनूद्यते मिश्रावितिविधीयते पृथक्पृथग्विमिश्रौवापूर्वविहितौगांधर्व-
राक्षसौक्षत्रस्यधर्म्यौमन्वादिभिःस्मृतौ यदास्त्रीपुंसयोरन्योन्यानुरागपूर्वकसंवादेनपरिणेतायुद्धादिनाविजित्यतामुद्वहेत्तदागांध
र्वराक्षसौमिश्रौभवतः २६ आच्छाद्येति आच्छादनमात्रस्यैव औचित्यप्राप्तत्वात्सविशेषवाससाकन्यावराच्छाद्यालंकारादिना

चपूजयित्वाविद्याचारवंतमप्रार्थकवरमानीयतस्मैकन्यादानंब्राह्मोविवाहोमन्वादिभिरुक्तः २७ यज्ञइति ज्योतिष्टोमादियज्ञेमार-
भ्येयथाविधिऋत्विजेकर्मकर्त्रेअलंकृत्यकन्यादानंदैवंविवाहंमुनयोब्रुवते २८ एकमिति स्त्रीगवीपुंगोश्चगोमिथुनंतदेकंद्वेवावरा-
त्धर्मतः धर्मार्थंयागादिसिद्धयेकन्यायैवादात्तु नतुशुल्कबुद्ध्यागृहीत्वायद्यथाशास्त्रंकन्यादानंसआर्षोविवाहोविधीयते २९ सहे-
ति सहयुवांधर्मंकुरुतमितिकृताप्रदानकालेवचसापूर्वंनियम्यार्थयित्वायत्कन्यादानंसप्राजापत्योविवाहःस्मृतः ३० ज्ञातिभ्यइति
कन्यायाज्ञातिभ्यः पित्रादिभ्यःकन्यायैचयत्यथाशक्तिधनंदत्वाकन्याया आप्रदानमादानंस्वीकारःस्वाच्छंद्यात्स्वेच्छयानत्वार्षशास्त्रीय
धनंजातिपरिमाणंनियमेनसआसुरोविवाहउच्यते ३१ इच्छयेति कन्यायावरस्यचान्योन्यानुरागेणयःपरस्परसंयोगआलिंगनादि

आच्छाद्यचार्चयित्वाचश्रुतिशीलवतेस्वयम् आहूयदानंकन्यायाब्राह्मोधर्मःप्रकीर्तितः २७ यज्ञेतु
विततेसम्यगृत्विजेकर्मकुर्वते अलंकृत्यसुतादानंदैवंधर्मंप्रचक्षते २८ एकंगोमिथुनंद्वेवावरादा
दायधर्मतः कन्याप्रदानंविधिवदार्षोधर्मःसउच्यते २९ सहनौचरतांधर्ममितिवाचानुभाष्यच क
न्याप्रदानमभ्यर्च्यप्राजापत्योविधिःस्मृतः ३० ज्ञातिभ्योद्रविणंदत्वाकन्यायैचैवशक्तितः कन्याप्रदा
नंस्वाच्छंद्यादासुरोधर्मउच्यते ३१ इच्छयान्योन्यसंयोगःकन्यायाश्चवरस्यच गांधर्वःसतुविज्ञेयो
मैथुन्यःकामसंभवः ३२ हत्वाछित्वाचभित्वाचक्रोशंतींरुदतींगृहात् प्रसह्यकन्याहरणंराक्षसो
विधिरुच्यते ३३

रूपःसगांधर्वोज्ञातव्यः संभवत्यस्मादितिसंभवः यस्मात्कन्यावरयोरभिलाषादसौसंभवति अत
एवमैथुन्योमैथुनायहितः सर्वविवाहानामेवमैथुनत्वेनयदस्यमैथुनत्वाभिधानंतत्सत्यपिमैथुनेनविरोधइतिप्रदर्शनार्थम् ३२ ह-
त्वेति प्रसह्यबलात्कारेणकन्यायाहरणंराक्षसोविवाहइत्येवलक्षणम् यदातुहर्त्तुःशक्त्यातिशयंज्ञात्वापित्रादिभिरुपेक्ष्यतेतदानाव-
श्यकंहननादि यदिकन्यापक्षःप्रतिपक्षतांयातितदाहननादिकमपिकर्त्तव्यमित्यर्थप्राप्तमनूद्यते कन्यापक्षान्निनाश्यतेषामंगच्छेदंकृ-
त्वाप्राकारादीन्भित्वाहापितर्भ्रातरनाथाहंक्रियेइतिवदंतींअश्रूणिमुंचंतींयत्कन्यांगृहादपहरतिअनेनकन्यायाअनिच्छोक्तागांधर्वाद्वि
वेकार्थम् ३३

सुप्तामिति निद्राभिभूतां मद्यमदविह्वलां शीलसंरक्षणेनरहितांविजनदेशेयत्रविवाहेमैथुनधर्मेणप्रवर्त्तते सपापहेतुर्विवाहानांमध्येऽध
मःपैशाचःख्यातः ३४. अद्भिरिति उदकदानपूर्वकमेवब्राह्मणानांकन्यादानंप्रशस्तंक्षत्रियादीनांपुनर्विनाप्युदकंपरस्परेच्छयावाङ्मात्रेणा
पिकन्यादानंभवतिउदकपूर्वकमपीत्यनियमः ३५ यइति यद्यपिगुणदोषौचयस्ययावितिगुणाभिधानमपिप्रतिज्ञातमेवतथापिबहूनामर्था
नांवक्तव्यतयाप्रतिज्ञातत्वात्विशेषज्ञापनार्थःपुनरुपन्यासः एषांविवाहानामितिनिर्द्धारणेषष्ठी एषांमध्येयस्यविवाहस्ययोगुणोमनु-
नाकथितःतत्सर्वंहेविप्राःममकथयतःशृणुत ३६ दशेति दशपूर्वान्पित्रादीन्वंश्यान्परान्पुत्रादीन्दशआत्मानंचैकविंशकंब्राह्मवि
वाहोढासुतोयदिसुकृतकृद्भवतितदापापान्मोचयतिपित्रादीन्नरकादुद्धरतिपुत्रादयश्चतस्यकुलेनिष्पापाजायंतइतिमोचनार्थः तेषामनुसं

सुप्तांमत्तांप्रमत्तांवारहोयत्रोपगच्छति सपापिष्ठोविवाहानांपैशाचश्चाष्टमोऽधमः ३४ अद्भिरेवद्विजाग्र्या
णांकन्यादानंविशिष्यते इतरेषांतुवर्णानामितरेतरकाम्यया ३५ योयस्यैषांविवाहानांमनुनाकीर्तितोगु
णः सर्वंशृणुततंविप्राःसर्वंकीर्तयतोमम ३६ दशपूर्वान्परान्वंश्यानात्मानंचैकविंशकम् ब्राह्मीपुत्रःसु
कृतकृन्मोचयदेनसःपितॄन् ३७ दैवोढाजःसुतश्चैवसप्तसप्तपरावरान् आर्षोढाजःसुतस्त्रींस्त्रीन्षट्
षट्कायोढजःसुतः ३८ ब्राह्मादिषुविवाहेषुचतुर्ष्वेवानुपूर्वशः ब्रह्मवर्चस्विनःपुत्राजायंतेशिष्टसंमताः ३९

ततेःपापध्वंसस्याशक्यत्वात् ३७ दैवोढेति दैवविवाहोढायाःपुत्रःसप्तपरान्पित्रादीन्सप्तअवरान्पुत्रादींश्च आर्षविवाहोढायाः
पुत्रस्त्रीन्पित्रादीन्त्रींश्चपुत्रादीन् प्राजापत्यविवाहोढायाःपुत्रःषट्पित्रादीन्षट्पुत्रादीन् आत्मानंचैनसोमोचयतीतिपूर्वस्यैवसर्व
त्रानुषंगः कायोढजइतिआपोःसंज्ञाछंदसोर्बहुलमितिह्रस्वत्वम् ब्राह्माद्यष्टविवाहोद्देशक्रमानुसारेणमंत्रफलस्यार्षस्येहबहुफल-
प्राजापत्यात्पूर्वाभिधानंब्राह्मादिविवाहोद्देशश्लोकएवकथमयंक्रमइतिचेत् पंचानांतुत्रयोधर्म्याइत्यत्रप्राजापत्यग्रहणार्थम् अन्यथा
आर्षस्यैवग्रहणंस्यात् ३८ ब्राह्मेति प्रसवेचगुणागुणानितियदुक्तंतदुच्यते ब्राह्मादिषुचतुर्षुविवाहेषुश्रुताध्ययनसंपत्तिकृततेजोयु-
क्ताःपुत्राःशिष्टप्रियाजायंतेप्रियार्थत्वाच्चसंमतशब्दस्यक्तेनचपूजायामितिनषष्ठीसमासप्रतिषेधःसंबंधसामान्यविवक्षायांषष्ठीयंसमस्यते

रूपेति रूपंमनोहराकृतिः सत्त्वंराद्शाध्यायेवक्ष्यमाणागुणादयः तैर्युक्ताधनिनःख्यातिमंतोयथेप्सितवस्त्रस्रग्गंधलेपनादिभोगशालिनोधार्मिकाश्चपुत्राजायंतइतिपूर्वमनुवर्त्ततेशतंचवर्षाणिजीवंति ४० इतरेष्विति ब्राह्मादिभ्यश्चतुर्भ्योऽन्येषासुरादिषुचतुर्षुविवाहेषुक्रूरकर्माणोमृषावादिनोवेदद्वेषिणोयागादिधर्मद्वेषिणःपुत्राजायंते ४१ अनिंदितैरिति संक्षेपेणविवाहानांफलकथनमिदम् अगर्हितैर्भार्याप्राप्तिहेतुभिर्विवाहैरगर्हितामनुष्याणांसंततिर्गर्हितैस्तुगर्हितातस्माद्गर्हितविवाहान्नकुर्यात् ४२ पाणीति समानजातीयासूद्यमानासुहस्तग्रहणलक्षणःसंस्कारोगृह्यादिशास्त्रेणविधीयतेविजातीयासुपुनरुह्यमानासुविवाहकर्मणिपाणिग्रहणस्थानेऽयमनन्तरश्लोकेवक्ष्यमाणोविधिर्ज्ञेयः ४३ शरइति क्षत्रिययापाणिग्रहणस्थानेब्राह्मणविवाहेब्राह्मणहस्तपरिगृहीतकांडैकदेशोग्राह्यः वैश्ययाब्राह्मणक्षत्रियावधृतप्रतोदैकदेशोग्राह्यः शूद्रयापुनर्द्विजातित्रयविवाहेप्रावृतवसनदशाग्राह्या ४४ ऋत्विति ऋतुर्नामशोणि

रूपसत्त्वगुणोपेताधनवंतोयशस्विनः पर्याप्तभोगाधर्मिष्ठाजीवंतिचशतंसमाः ४० इतरेषुतुशिष्टेषुनृशंसानृतवादिनः जायंतेदुर्विवाहेषुब्रह्मधर्मद्विषःसुताः ४१ अनिंदितैःस्त्रीविवाहैरनिंद्याभवतिप्रजा निंदितैर्निंदितानृणांतस्मान्निंद्यान्विवर्जयेत् ४२ पाणिग्रहणसंस्कारःसवर्णासूपदिश्यते असवर्णास्वयंज्ञेयोविधिरुद्वाहकर्मणि ४३ शरःक्षत्रिययाग्राह्यःप्रतोदोवैश्यकन्यया वसनस्यदशाग्राह्याशूद्रयोत्कृष्टवेदने ४४ ऋतुकालाभिगामीस्यात्स्वदारनिरतःसदा पर्ववर्ज्जंव्रजेच्चैनांतद्व्रतोरतिकाम्यया ४५

तदर्शनोपलक्षितोगर्भधारणयोग्यःस्त्रीणामवस्थाविशेषः तत्कालाभिगामीस्यादित्ययन्नियमविधिः नतुपरिसंख्या स्वार्थहानिपरार्थकल्पनाप्राप्तबाधात्मकदोषत्रयदुष्टत्वात् ऋतुकालेपिरागतःपक्षेगमनप्राप्तौयस्मिन्पक्षेप्राप्तिस्तत्रविधिःसमेयजेतेतिवत् अतएवऋतावगमनेदोषमाह पराशरः ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति घोरायांब्रह्महत्यायांपततेनात्रसंशयः अनुत्पन्नपुत्रस्यचायंनियमः ब्राह्मणोहवैजायमानस्त्रिभिरृणैरृणवान्जायतेयज्ञेनदेवेभ्यःप्रजयापितृभ्यःस्वाध्यायेनऋषिभ्यइत्येतत्प्रत्यक्षश्रुतिमूलत्वेऽस्यसंभवतिमूलांतरकल्पनस्यायुक्तत्वात् तस्माद्युग्मासुपुत्रार्थीसंविशेदार्त्तवेस्त्रियामितिचवक्ष्यति ततोप्येतच्छ्रुतिमूलत्व

मवगम्यते पुत्रोत्पादनशास्त्रस्यनैकपुत्रोत्पादनेनैवचरितार्थत्वात् कामजानितरान्विदुरितिदर्शनादजातपुत्रस्यैवनियमः दशास्यां
पुत्रानाधेहीतिमंत्रस्तुबहुपुत्रप्रशंसापरः जातपुत्रस्यापिऋतुकालगमननियमोनदशस्वेवावतिष्ठते स्वदारनिरतःसदेतिनित्यंस्वदार
संतुष्टः स्यान्नान्यभार्यासुपगच्छेदितिविधानात्परिसंख्यैववाक्यानर्थक्यात् स्वदारगमनस्यप्रशस्तत्वात् ऋतावगमनेदोषाश्रवणाच्चननि
यमविधिः पर्ववर्ज्जंव्रजेच्चैनामिति पर्वाण्यमावास्यादीनिवक्ष्यंते तानिवर्ज्जयित्वाभार्याप्रीतिव्रतंयस्यसतद्व्रतोऽनृतावप्युपेयात् अतएव
रतिकाम्ययानतुपुत्रोत्पादनशास्त्रमनुष्ठानंस्यादितिविषयमिदम् ऋतावुपेयादेव अन्यभार्यांनोपगच्छेत् अनृतावपिभार्याप्रीतयेगच्छेदि
ति अत्रचगौतमः ऋतावुपेयादनृतौचपर्ववर्ज्जम् याज्ञवल्क्योप्याह यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन् पर्ववर्जमितिऋताव
नृतौचोभयत्रसंबध्यते ४५ ऋतुरिति अत्ररात्र्यहःशब्दावहोरात्रपरौ शोणितदर्शनात्प्रभृतिस्त्रीसंपर्कगमनादौशिष्टनिंदितैश्चतुर्भि

ऋतुःस्वाभाविकःस्त्रीणांरात्रयःषोडशस्मृताः चतुर्भिरितरैःसार्द्धमहोभिःसद्विगर्हितैः ४६ तासामा
द्याश्चतस्रस्तुनिंदितैकादशीचया त्रयोदशीचशेषास्तुप्रशस्तादशरात्रयः ४७ युग्मासुपुत्राजायंतेस्त्रि
योऽयुग्मासुरात्रिषु तस्माद्युग्मासुपुत्रार्थीसंविशेदार्त्तवेस्त्रियम् ४८ पुमान्पुंसोधिकेशुक्रेस्त्रीभवत्य
धिकेस्त्रियाः समेपुमान्पुंस्त्रियौवाक्षीणेल्पेचविपर्ययः ४९

रन्यैरहोरात्रैःसहषोडशाहोरात्राणिमासिमासिस्त्रीणा
मृतुःस्वभावेभवःस्वाभाविकः व्याध्यादिनातुन्यूनाधिककालोपिभवति ४६ तासामिति तासांपुनःषोडशानांरात्रीणांशोणितदर्श
नात्प्रभृति आद्याश्चतस्रोरात्रयः एकादशीत्रयोदशीचरात्रिर्गमनेनिंदिताअवशिष्टादशरात्रयःप्रशस्ताभवेयुः ४७ युग्मेति पूर्वोक्ता
स्वपिदशसुषष्ठ्यष्टम्याद्यासुरात्रिषुगमनेपुत्राउत्पद्यंते अयुग्मासुपंचमीसप्तम्यादिषुदुहितरः अतःपुत्रार्थीयुग्मासुऋतुकालेभा
र्यांगच्छेत् ४८ पुमानिति पुंसोबीजेअधिकेऽयुग्मास्वपिपुत्रोजायतेस्त्रीबीजेधिकेयुग्मास्वपिदुहिताएव अतोवृष्याहारादिनानि
जबीजाधिक्यंभार्यायाश्चाहारलाघवादिनाबीजाल्पत्वमवगम्ययुग्मास्वपिपुत्रार्थिनागंतव्यमितिदर्शितम् स्त्रीपुंसयोस्तुबीजसाम्ये
ऽपुमान्नपुंसकंजायतेपुंस्त्रियावितियमौच निःसारेस्वल्पेचोभयोरेवबीजेगर्भस्यासंभवः ४९ ५ ५ ५

निंद्येति निंद्यासुपूर्वोक्तासुषट्सुरात्रिषु अन्यासुत्वनिंद्यास्वपियासुकासुचिदष्टासुस्त्रियोवर्जयन् द्वेरात्री अवशिष्टेपर्ववर्ज्जिते व्रजन्नृत्व-
ऽतिब्रह्मचार्येवभवतियत्रतत्राश्रमेवसन्निति वानप्रस्थापेक्षया तस्यहिभार्ययासहगमनपक्षेऋतुगमनंप्रसक्तम् नचवनस्थभार्यायाऋ-
तुर्नभवतीतिवाच्यम् पंचाशतोव्रजेदिति वर्षैरेकगुणांभार्यामुद्वहेत्त्रिगुणःपुमानित्यादिशास्त्रपर्यालोचनयानतत्संभवात् मेधाति-
थिस्तुयत्रतत्राश्रमेवसन्निति अनुवादमात्रंगृहस्थेतराश्रमत्रयेजितेंद्रियत्वविधानात् रात्रिद्वयाभ्यनुज्ञानासंभवादित्याह गोविंदराजस्तु
उत्पन्नविनष्टपुत्रस्याश्रमांतरस्थस्यापीच्छयापुत्रार्थेरात्रिद्वयगमनेदोषाभावप्रतिपादनार्थमेतत् यत्रतत्राश्रमेवसन्नितिवचनात्पुत्रार्थसि-
द्धिर्विशेषादितिवस्तुतत्त्वात्पुत्रस्यचमहोपकारकत्वादित्याह हंतगोविंदराजेनविशेषमविवृण्वता व्यक्तमंगीकृतमृतौस्वदारसुरतंयतेः ५०
नेति कन्यायाःपिताधनग्रहणदोषज्ञः अल्पमपिधनंकन्यादाननिमित्तकंनगृण्हीयात् यस्माल्लोभेनतद्गृण्हन् अपत्यविक्रयीभवति ५१
स्त्रीधनेति कन्यादाननिमित्तकशुल्कग्रहणनिषेधात् नवमाध्यायाभिधेयस्त्रीधनग्रहणनिषेधोयम् येबांधवाःपतिपित्रादयःकलत्रदु

निंद्यास्वष्टासुचान्यासुस्त्रियोरात्रिषुवर्ज्जयन् ब्रह्मचार्येवभवतियत्रतत्राश्रमेवसन् ५० नकन्यायाःपिता
विद्वान्गृण्हीयाच्छुल्कमण्वपि गृण्हञ्छुल्कंहिलोभेनस्यान्नरोपत्यविक्रयी ५१ स्त्रीधनानितुयेमोहादुप-
जीवंतिबांधवाः नारीयानानिवस्त्रंवातेपापायांत्यधोगतिम् ५२ आर्षेगोमिथुनंशुल्कंकेचिदाहुर्मृषैवतत्
अल्पोप्येवंमहान्वापिविक्रयस्तावदेवसः ५३ हिरण्यादिधनानिगृण्हंतिनारीस्त्रीयानानिअश्वादीनिवस्त्रंचेतिप्रदर्शनार्थं
सर्वमेवधनंनग्राह्यंतेगृण्हाना पापकारिणोनरकंगच्छंति ५२ आर्षइति आर्षेविवाहेगोमिथुनंशुल्कंवराद्ग्राह्यमितिकेचिदाचार्यावदं-
तितत्पुनरसत्ययस्मादल्परूपसाध्यत्वादल्पोवाभवतुबहुमूल्यसाध्यत्वान्महान्वाभवतुसतावद्विक्रयोभवत्येव यत्पुनरेकंगोमिथुनमिति
पूर्वमुक्तंतत्परमतमितिगोविंदराज तदयुक्तम् मनुमतेलक्षणमार्षस्यनस्यादेवं वराद्गोमिथुनपूर्वककन्यादानस्यैवार्षविवाहलक्षणत्वात्
मन्वभिमतमन्यदेवार्षलक्षणमेकंगोमिथुनमितिपरमतमितिचेत् एकंगोमिथुनंद्वेचेत्येतत्परमतंयदि तदामनुमतेनार्षलक्षणंकिंतदुच्यता
म् अष्टौविवाहान्कथयन्नार्षेदासनतेर्गुणान् मनु किंस्वमतेनार्षलक्षणंवक्तुमक्षमः मेधातिथिस्तुपूर्वापरविरोधोपन्यासनिरासमेवनकृ-
तवान् तस्मादस्माभिरित्थंव्याख्यायते आर्षेविवाहेगोमिथुनंशुल्कमुक्तोचरूपमितिकेचिदाचार्यावदंतिमनोस्तुमतंनेदंशास्त्रनियमितजा-

तिसंख्याकंग्रहणंनशुल्करूपंशुल्कत्वेमूल्यात्पत्वमहत्त्वे ऽनुपयोगिनिविक्रयएवतदास्यात् किंत्वार्षविवाहसंपत्त्यै अवश्यकर्त्तव्ययागादि
सिद्ध्यैकन्यायैवादातुंशास्त्रीयंधर्मार्थमेवगृह्यते अतएवार्षलक्षणश्लोकेवरादादायधर्मतइतिधर्मतोधर्मार्थमितितस्यार्थः भोगलोभेन
तुधनग्रहणंशुल्करूपयशास्त्रीयं अतएवगृण्हन्शुल्कंहिलोभेनेतिनिंदामुक्तवान् तस्मात्पौर्वापर्यपर्यालोचनादार्षेधर्मार्थंगोमिथुनंग्राह्यंन-
तुभोगार्थमितिमनुनास्वमतमनुवर्णितम् ५३ आर्षेगोमिथुनंशुल्कमित्युक्तंइदानींकन्यार्थमपिधनस्यदानंनशुल्कमित्याह यासामिति या
सांकन्यानांभर्त्रावरेणदीयमानंधनंपित्रादयोनगृण्हंतिकिंतुकन्यायैसमर्पयंतिसोपिनविक्रय. यस्मात्कुमारीणांपूजनंतदानृशंस्यमहिंसक
त्वंकेवलंतदनुकंपारूपम् ५४ पितृभिरिति नकेवलंविवाहकालेवरेणदत्तंधनंसमर्पणीयंकिंतुतदुत्तरकालमपिपित्रादिभिरप्येताभोजना-
दिनापूजयितव्या. वस्त्रालंकारादिनाभूषयितव्याश्चबहुधनादिसंपदंप्राप्तुकामैः ५५ यत्रेति यत्रकुलेपित्रादिभिः स्त्रियःपूज्यंतेतत्रदेव-

यासांनाददतेशुल्कंज्ञातयोनसविक्रयः अर्हणंतत्कुमारीणामानृशंस्यंचकेवलम् ५४ पितृभिर्भ्रातृभि-
श्चैताःपतिभिर्देवरैस्तथा पूज्याभूषयितव्याश्चबहुकल्याणमीप्सुभिः ५५ यत्रनार्यस्तुपूज्यंतेरमंतेतत्र दे-
वताः यत्रैतास्तुनपूज्यंतेसर्वास्तत्राफलाःक्रियाः ५६ शोचंतिजामयोयत्रविनश्यत्याशुतत्कुलम् नशोचंति
तुयत्रैतावर्द्धतेतद्धिसर्वदा ५७ जामयोयानिगेहानिशपंत्यप्रतिपूजिताः तानिकृत्याहतानीवविनश्यंति-
समंततः ५८ तस्मादेताःसदापूज्याभूषणाच्छादनाशनैः भूतिकामैर्नरैर्नित्यंसत्कारेषूत्सवेषुच ५९

ताःप्रसीदंतियत्रपुनरेतानपूज्यंतेतत्रदेवताप्रसादाभावात् यागादिक्रियाःसर्वानिःफलाभवंतीतिनिंदार्थवादः ५६ शोचंतीति जामि.स्वसृ
कुलस्त्रियोरित्याभिधानिका. यस्मिन्कुलेभगिनीगृहपतीसंवर्द्धनीयसन्निहितसपिंडस्त्रियश्चपत्नीदुहितृस्नुषाद्याःपरितापादिनादुःखि
न्योभवंतितत्कुलंशीघ्रंनिर्द्धनीभवतिदैवराजादिनाचपीड्यते यत्रैतानशोचंतितद्धनादिनानित्यंवर्द्धतेति मेधातिथिगोविंदराजौतु नवोढा
दुहितृस्नुषाद्याजामयइत्याहतुः ५७ जामयइति यानिगेहानिभगिनीपत्नीदुहितृस्नुषाद्याअपूजिताःसत्यो अभिशपंतिइदमनिष्टमेषाम-
स्त्विति तान्यभिचारहतानिधनपश्वादिसहितानिनश्यंति ५८ तस्मादिति यस्मादेवंतस्मात्कारणादेताभूषणाच्छादनाशनैर्नित्यंसत्कारेषुकौ

मुंयादिषुउत्सवेषुउपनयनादिषुसमृद्धिकामैः नृभिःसदापूजनीयाः ५९ संतुष्टइति भार्ययाभर्त्रीइतिहेतौतृतीया यत्रकुलेभार्ययाभर्त्ता प्रीतोभवतिस्त्र्यंतराभिलाषादिकंनकरोतिभार्याचस्वामिनाप्रीताभवतितस्मिन्कुलेचिरंश्रेयोभवति कुलग्रहणान्नकेवलंभार्यापतीएवं पुत्रपौत्रादिसंततिःश्रेयोभागिनीभवति ६० यदीति दीप्त्यर्थोरुचिः यदिस्त्रीवस्त्राभरणादिनाशोभाजनकेनदीप्तिमतीनस्यात् तदास्वामिनंपुनर्नहर्षयेदेव हिशब्दोवधारणे अप्रहर्षात्पुनःस्वामिनःप्रजननंगर्भधारणंनसंपद्यते ६१ स्त्रियामिति स्त्रियांमंडनादिनाकांतिमत्यां भर्तृस्नेहविषयतयापरपुरुषसंपर्कविरहात् तत्कुलंदीप्तंभवतितस्यांपुनररोचमानायांभर्तृविद्विष्टतयानरांतरसंपर्कात्सकलमेवकुलंमलिनंभवति ६२ कुविवाहैरिति आसुरादिविवाहैर्यथावर्णनिषिद्धैर्जातकर्मादिक्रियालोपैर्वेदापाठेनब्राह्मणापूजनेनभरत्यातकुलान्यपकर्षं

संतुष्टोभार्ययाभर्त्ताभर्त्राभार्यातथैवच यस्मिन्नेवकुलेनित्यंकल्याणंतत्रवैध्रुवम् ६० यदिहिस्त्रीनरोचेतपुमांसंनप्रमोदयेत् अप्रमोदात्पुनःपुंसःप्रजननंनप्रवर्त्तते ६१ स्त्रियांतुरोचमानायांसर्वंतद्रोचतेकुलम् तस्यांत्वरोचमानायांसर्वमेवनरोचते ६२ कुविवाहैःक्रियालोपैर्वेदानध्ययनेनच कुलान्यकुलतांयांतिब्राह्मणातिक्रमेणच ६३ शिल्पेनव्यवहारेणशूद्रापत्यैश्चकेवलैः गोभिरश्वैश्चयानैश्च कृष्याराजोपसेवया ६४ अयाज्ययाजनैश्चैवनास्तिक्येनचकर्मणाम् कुलान्याशुविनश्यंतियानिहीनानिमंत्रतः ६५ मंत्रतस्तुसमृद्धानिकुलान्यल्पधनान्यपि कुलसंख्यांचगच्छंतिकर्षंतिचमहद्यशः ६६

गच्छंति ६३ शिल्पेनेति चित्रकर्मादिशिल्पेनकलयाधनप्रयोगात्मकव्यवहारेणकेवलशूद्रापत्येनगवाश्वरथक्रयविक्रयादिना कृषिराजसेवाभ्यांकुलानिविनश्यंतीत्युत्तरेणसंबंधः ६४ अयाज्येति अयाज्यव्रात्यादियाजनैः कर्मणांश्रौतस्मार्त्तादीनांनास्तिक्येनशास्त्रीयफलवत्कर्मसुफलाभावबुद्धिर्नास्तिक्यम् वेदाध्ययनशून्यानिकुलानिक्षिप्रमपकर्षंगच्छंति अत्रचविवाहप्रकरणेविवाहनिंदाप्रसंगेनक्रियालोपादयोनिंदिताः निंदया चैतन्नकर्त्तव्यमितिसर्वत्रनिषेधःकल्प्यते ६५ इदानींक्रियालोपादिगतप्रासंगिककुलनिंदानुप्रसक्त्याकुलोत्कर्षमाह मंत्रेति यद्यपिधनेनकुलमितिलोकेप्रसिद्धंतथाप्यल्पधनान्यपिकुलानिवेदाध्ययनतदर्थज्ञानानुष्ठानप्रसक्तानिउत्कृष्टकुलगणनायांगण्यंतेमहतींतुख्यातिमर्जयंति

विवाहप्रकरणमतिक्रांतंइदानींवैवाहिकाग्नौसंपाद्यंमहायज्ञविधानंचेतिवक्तव्यतयाप्रतिज्ञातंमहायज्ञाद्यनुष्ठानमाह वैवाहिकइति वि
वाहेभवोवैवाहिकः आध्यात्मिकादित्वाट्ठञ् तस्मिन्नग्नौगृह्योक्तंकर्मसायंप्रातर्होमाष्टकादियथाशास्त्रमग्निसंपाद्यंचपंचमहायज्ञां
तर्गतवैश्वदेवाद्यनुष्ठानंप्रतिदिनसंपाद्यंचपाकंगृहस्थःकुर्यात् ६७ पंचेति पशुवधस्थानंसूना सूनाइवसूनाहिंसास्थानगुणयोगात्
चुल्ह्यादयः पंचगृहस्थस्यहिंसाबीजानिहिंसास्थानानिचुल्हीउद्वाहनीपेषणीदृषदुपलात्मिकाउपस्करः गृहोपकरणकुंडसंमार्जन्यादि.
कंडनीउलूखलमुसले उदकुंभोजलाधारकलशः याःस्वकार्ययोजयन्पापेनसंबध्यते ६८ तासामिति तासांचुल्हीआदिस्थानानांय-
थाक्रमंनिःकृत्यर्थंउत्पन्नपापनाशार्थंगृहस्थानांपंचमहायज्ञाःप्रतिदिनमन्वादिभिरनुष्ठेयतयास्मृताः एवंचनिष्कृत्यर्थमित्यभिधानात्
हिंसास्थानत्वेनचकीर्त्तनात्सूनादोषैर्नलिप्यतइतिवक्ष्यमाणत्वात्पंचसूनानांपापहेतुत्वंपंचयज्ञानांचतत्पापनाशकत्वमवगम्यते प्रत्य-

वैवाहिकेग्नौकुर्वीतगृह्यंकर्मयथाविधि पंचयज्ञविधानंचपक्तिंचान्वाहिकींगृही ६७ पंचसूनागृहस्थस्य
चुल्हीपेषण्युपस्करः कंडनीचोदकुंभश्चबध्यतेयास्तुवाहयन् ६८ तासांक्रमेणसर्वासांनिष्कृत्यर्थंमहर्षि
भिः पंचक्लृप्तामहायज्ञाःप्रत्यहंगृहमेधिनाम् ६९ अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणम् होमोदैवोबलि
र्भौतोनृयज्ञोतिथिपूजनम् ७० पंचैतान्योमहायज्ञान्नहापयतिशक्तितः सगृहेपिवसन्नित्यंसूनादोषैर्न-
लिप्यते ७१ देवतातिथिभृत्यानांपितॄणामात्मनश्चयः ननिर्वपतिपंचानामुच्छ्वसन्नसजीवति ७२

हमित्यभिधा
नात्प्रतिदिनंतत्पापक्षयस्यापेक्षितत्वात्संध्यावंदनादिवन्नित्यत्वमपिनविरुध्यते ६९ अध्यापनमिति अध्यापनशब्देनाध्ययनमपिगृह्यतेज
पोऽहुतमितिवक्ष्यमाणत्वादतोऽध्यापनमध्ययनंचब्रह्मयज्ञः अन्नाद्येनोदकेनवाऽऽतितर्पणंवक्ष्यतिसपितृयज्ञः अग्नौहोमोवक्ष्यमाणोदै
वयज्ञः भूतबलिर्भूतयज्ञः अतिथिपूजनंमनुष्ययज्ञः अध्यापनादिषुयज्ञशब्दोमहच्छब्दश्चस्तुत्यर्थंगौणः ७० पंचेति शक्तितइत्येतद्वि
धानार्थोपमनुवादः अनुकल्पेनापियथासंभवमेतेकर्त्तव्याः हापयतीतिप्रकृत्यर्थएवच्छांदसत्वात्णिच्नजहातीत्यर्थः ७१ देवतेति देवता
शब्देनभूतानामपिग्रहणम् तेषामपिबलिहरणेदेवतारूपत्वात् भृत्याःवृद्धमातापित्रादयोऽवश्यंसंवर्द्धनीयाः सर्वतएवात्मानंगोपायेदिति

कुर्यादिति एतेगृहस्थेभ्यःसकाशादाशासते अतःशास्त्रज्ञेनतेभ्यः कर्त्तव्यम् ८० किंतत्तदाह स्वाध्यायेनेति नानाप्रकारत्वादर्चन स्यस्वाध्यायादेरर्चनार्थत्वमुचितम् महायज्ञांतर्गतैःस्वाध्यायादिभिः ऋषिदेवपित्रतिथिभूतानियथाशास्त्रंपूजयेत् ८१ तत्रपितृय ज्ञंतावदाह कुर्यादिति प्रत्यहंयथासंभवंश्राद्धंकुर्यात् श्राद्धशब्दोयंकर्मविधिवाक्यवर्तीकोडपायिनामयनीयाग्निहोत्रशब्दवत्वक्ष्य माणपार्वणश्राद्धधर्मातिदेशार्थः अन्नाद्येनेतितिलैर्व्रीहिभिर्यवैरित्यादेरुपादानंपयःक्षीरम् ८२ एकमिति पितृप्रयोजनेपंचयज्ञां तर्गतेएकमपिब्राह्मणंभोजयेत् अपिशब्दात्संभवेबहूनपि पार्वणधर्मग्रहणाच्चवैश्वदेवब्राह्मणभोजनमाप्तावाह नकिंचिद्वैश्वदे वार्थब्राह्मणमत्रभोजयेत् ८३ वैश्वदेवस्येति विश्वदेवार्थःसर्वदेवतार्थोवैश्वदेवस्तस्यपक्वस्यान्नस्यावसथ्याग्नौस्वगृह्यविहितपर्यु

ऋषयःपितरोदेवाभूतान्यतिथयस्तथा आशासतेकुटुंबिभ्यस्तेभ्यःकार्यंविजानता ८० स्वाध्यायेनार्च येतर्षीन्होमैर्देवान्यथाविधि पितॄन्श्राद्धैश्चनॄनन्नैर्भूतानिबलिकर्मणा ८१ कुर्यादहरहःश्राद्धम न्नाद्येनोदकेनवा पयोमूलफलैर्वापिपितृभ्यःप्रीतिमावहन् ८२ एकमप्याशयेद्विप्रंपित्रर्थेपांचयज्ञि के नचैवात्राशयेत्किंचिद्वैश्वदेवंप्रतिद्विजम् ८३ वैश्वदेवस्यसिद्धस्यगृह्येग्नौविधिपूर्वकम् आभ्यःकुर्या द्देवताभ्योब्राह्मणोहोममन्वहम् ८४ अग्नेःसोमस्यचैवादौतयोश्चैवसमस्तयोः विश्वेभ्यश्चैवदेवेभ्योधन्वन्तरयएवच ८५ कुह्वैचैवानुमत्यैचप्रजापतयएवच सहद्यावापृथिव्योश्चतथास्विष्टकृतेततः ८६

क्षणादीतिकर्त्तव्यतापूर्वकमाभ्योवक्ष्यमाणदेवताभ्योब्राह्मणःप्रत्यहंहोमंकुर्यात् ब्राह्मणग्रहणंद्विजातिप्रदर्शनार्थंत्रयाणांप्रकृ तत्वात् ८४ अग्नेरिति चतुर्थ्यर्थेषष्ठी स्वाहाकारप्रदानहोमइतिकात्यायनस्मरणादादावग्नयेस्वाहासोमायस्वाहेतिनिरपेक्षदेवताकं होमद्वयंकृत्वाअग्नीषोमाभ्यांस्वाहेतिसमस्तदेवताकहोमंकुर्यात्ततोविश्वेभ्योदेवेभ्योधन्वंतरये ८५ कुह्वैचेति कुह्वैअनुमत्यैप्रजा पतयेद्यावापृथिवीभ्यामग्नयेस्विष्टकृतइत्येवंस्वाहाकारांतान्होमान्कुर्यात् स्मृत्यंतरेष्वग्निविशेषणत्वेन स्विष्टकृतोविधानात्केव लंस्विष्टकृन्निर्देशोपिअग्निविशेषणत्वेनैवप्रयोगः पाठादेवांतत्वेसिद्धेस्विष्टकृतेततइत्यभिधानंस्मृत्यंतरीयहोमसमुच्चयेप्यंतत्वज्ञाप नार्थम् ८६

एवमिति एवमुक्तप्रकारेणसम्यगनन्यचित्तोदेवताध्यानपरएवहोमान्कृत्वासर्वासुप्राच्यादिषुदिक्षुप्रदक्षिणमिंद्रादिभ्यःसपुरुषेभ्योबलिंहरेत् तथाप्राच्यामिंद्रायनमः इंद्रपुरुषेभ्योनमः दक्षिणस्यांयमायनमः यमपुरुषेभ्योनमः पश्चिमायांवरुणायनमः वरुणपुरुषेभ्योनमः उत्तरस्यांसोमायनमः सोमपुरुषेभ्योनमः यद्यपिशब्दावगम्यत्वाद्देवतात्वस्यांतकाप्यतींदु

बह्वृचानुष्ठानसंवादाद्बह्वृचगृह्येचयमाययमपुरुषेभ्योवरुणायवरुणपुरुषेभ्यःसोमायसोमपुरुषेभ्यइतिप्रातिदिशमितिपाठात् य ॥ कएवप्रयोगः ८७ मरुद्भ्यइति इतिशब्दःस्वरूपविवक्षार्थः मरुद्भ्योनमइतिद्वारेबलिंदद्यात्जलेऽद्भ्यइति मुशलोलूखलइतिद्वंद्वनिर्देशात्सहयुक्तयोरन्यतरत्रवनस्पतिभ्यइतिबलिंदद्यात् गुणानुरोधेनप्रधानबलिकर्मासक्तेरन्याय्यत्वात् ८८ उच्छीर्षेति वास्तुपुरुषस्यशिरःप्रदेशेउत्तरपूर्वस्यांदिशिश्रियैबलिंदद्यात् तस्यैवपाददेशेदक्षिणपश्चिमायांदिशिभद्रकाल्यै अन्येतुउच्छी

एवंसम्यग्घविर्हुत्वासर्वदिक्षुप्रदक्षिणम् इंद्रांतकाप्यतींदुभ्यःसानुगेभ्योबलिंहरेत् ८७ मरुद्भ्यइति तुद्वारिक्षिपेदप्स्वद्भ्यइत्यपि वनस्पतिभ्यइत्येवंमुसलोलूखलेहरेत् ८८ उच्छीर्षकेश्रियैकुर्याद्भद्रकाल्यैच पादतः ब्रह्मवास्तोःपतिभ्यांतुवास्तुमध्येबलिंहरेत् ८९ विश्वेभ्यश्चैवदेवेभ्योबलिमाकाशउत्क्षिपेत् दिवाचरेभ्योभूतेभ्योनक्तंचारिभ्यएवच ९० पृष्ठवास्तुनिकुर्वीत बलिंसर्वात्मभूतये पितृभ्योबलिशेषंतुसर्वं दक्षिणतोहरेत् ९१

र्षस्यशिरःस्थानभूभागंपादतइतितस्यैवचरणभूप्रदेशमाहुः ब्रह्मणेवास्तोःपतयइतिगृहमध्ये द्वंद्वनिर्देशोपिब्रह्मवास्तोःपत्योःपृथगेवदेवतात्वम् यत्रद्वंद्वेमिलितस्यदेवतात्वमपेक्षितंतत्रसहादिशब्दंकरोति यथासहद्यावापृथिव्योश्चेति ८९ विश्वेभ्यइति विश्वेभ्यश्चैवदेवेभ्यइतिशब्दादेकैयमाहुतिः विश्वेभ्योदेवेभ्योनमइतिगृहाकाशेबलिंदद्यात् दिवाचरेभ्योभूतेभ्यइतिदिवानक्तंचारिभ्यइतिनक्तम् बह्वृचगृह्यदर्शनादियंव्यवस्था ९० पृष्ठेति गृहस्योपरियद्गृहंतत्पृष्ठवास्तुबलिंदातुः पृष्ठदेशेभूभागेवातत्रसर्वात्मभूतयेनमइत्येवबलिंदद्यात् उक्तबलिदानावशिष्टंसर्वमन्नंदक्षिणस्यांदिशिदक्षिणामुखः इतिबलिंहरेत् प्राचीनावीतिनाचायंबलिर्देयः स्वधापितृभ्यइतिप्राचीनावीताशेषंदक्षिणामुखोनिनयेदितिबह्वृचगृह्यवचनात्

९१ शुनांचेति अन्यदन्नंपात्रेसमुद्धृत्यश्वपतितादिभ्यःशनकैर्यथारजसानसंगृह्यतेतथाभुविदद्यात् पापरोगीकुष्ठीक्षय

रोगीवा ९२ एवमिति एवमुक्तप्रकारेणयः सर्वभूतान्यन्नदानादिना नित्यं पूजयति स परंस्थानं ब्रह्मात्मकं तेजोमूर्त्तिप्रकाशं अवक्रेण
वर्त्मनार्चिरादिमार्गेण प्राप्नोति ब्रह्मणि लीयत इत्यर्थः ज्ञानकर्मभ्यां मोक्षप्राप्तेः तेजोमूर्त्तिरिति सविसर्गपाठे प्रकृष्टब्रह्मबोधस्वभावो भू-
त्वेति व्याख्या ९३ कृत्वेति एवमुक्तप्रकारेण एतद्बलिकर्म कृत्वा गृहभोक्तृभ्यः पूर्वमतिथिं भोजयेत् भिक्षवे परिव्राजे ब्रह्मचारिणे प्रथमा
श्रमिणे च विधिवत्स्वस्ति वाच्य भिक्षादानमप्यूर्ध्वमिति गोतमाद्युक्तविधिना भिक्षां दद्यात् ग्रासप्रमाणा च भिक्षा भवति ग्रासमात्रा भवे
द्भिक्षेति शातातपवचनात् संभवे त्वधिकमपि देयम् ९४ यदिति गुरवे गां दत्वा विधिवत्स्वर्णशृंगिकादिविधानेन यत्फलं प्राप्नोति तद्गृह
स्थो विधिना भिक्षादानात्प्राप्नोति ९५ भिक्षामिति प्रचुरान्नाभावे ग्रासप्रमाणां भिक्षामपि व्यंजनादिना सत्कृत्य तदभावे जलपूर्णपात्रम

शुनां च पतितानां च श्वपचां पापरोगिणाम् वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि ९२ एवं यः सर्वभूतानि
ब्राह्मणो नित्यमर्चति स गच्छति परं स्थानं तेजोमूर्त्तिपथर्जुना ९३ कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशये-
त् भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ९४ यत्पुण्यफलमाप्नोति गां दत्वा विधिवद्गुरोः तत्पुण्यफ
लमाप्नोति भिक्षां दत्वा द्विजो गृही ९५ भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम् वेदतत्त्वार्थविदुषे ब्रा-
ह्मणायोपपादयेत् ९६ नश्यन्ति हव्यकव्यानि नराणामविजानताम् भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि
दातृभिः ९७ विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ९८
संप्राप्ताय त्वतिथये प्रदद्यादासनोदके अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम् ९९

पि फलपुष्पादिना सत्कृत्य
तत्तो वेदतदर्थज्ञानवते ब्राह्मणाय स्वस्ति वाच्येत्यादिविधिपूर्वकं दद्यात् ९६ नश्यंतीति मोहाद्यस्मादज्ञानभिज्ञतया देवपित्रुद्देशेनान्नानि
वेदाध्ययनतदर्थज्ञानानुष्ठानतेजःशून्यतया भस्मरूपेष्विव पात्रेषु दत्तानि दातृभिर्निष्फलानि भवंति ९७ विद्यातपःसमृद्धेष्विति विद्यात
पस्तेजःसंपन्नविप्राणां मुखानि होमाधिकरणत्वेनाग्नितया निरूपितानि हव्यकव्यादि प्रक्षिप्तमिहलोके दुस्तरान् व्याधिशत्रुराजपीडादिभ
यान्महतश्च पापादमुत्र नरकात्त्रायते ९८ संप्राप्तायेति स्वयमागताय त्वतिथये आसनं पादप्रक्षालनाद्युदकं यथासंभवं व्यंजनादिभि.

सत्कृतंतान्नमासनावसथादित्यादिवक्ष्यमाणविधिपूर्वकंदद्यात् ९९ शिलानिति लूनकेदारशेषधान्यानिशिलस्तानपिउ-
त्तिसंयमान्वितस्यत्रेतावसथ्य सभ्यश्चेतिपंचाग्नयः सभ्योनामाग्निःशीतापनोदाद्यर्थंयस्तत्रप्रणीयतेपंचस्त्री
त्तिसंकोचेनपंचाग्निहोमार्जितपुण्यमनर्चितोऽतिथिर्वसन्गृह्णाति अनयाचनिंदयातिथ्यनर्चनस्यनिंदावगम्यते १०० तृणानीति
अन्नासंभवेपुनस्तृणविश्रामभूमिपादप्रक्षालनाद्यर्थजलप्रियवचनान्यपिधार्मिकगृहेष्वातिथ्यर्थंनकदाचिदुच्छिद्यंते अवश्यदेया-
नीतिविधीयते तृणग्रहणंशयनीयोपलक्षणार्थम् १०१ अप्रसिद्धत्वादतिथिलक्षणमाह एकेति एकरात्रमेवपरगृहेनिवसन्ब्रा-
ह्मणोतिथिर्भवति अनित्यावस्थानान्नविद्यतेऽद्वितीयातिथिरस्येतिअतिथिरुच्यते १०२ नैकेति एकग्रामनिवासिनंलोकेषुविचि-
त्रपरिहासकथादिभिःसगत्यास्त्यर्थिनंभार्याग्निसुक्तोगृहेवैश्वदेवकालोपस्थितमपिनातिथिंविद्यात् एतेनभार्याग्निरहितस्यप्रवा-

शिलानप्युंछतोनित्यंपंचाग्नीनपिजुह्वतः सर्वंसुकृतमादत्तेब्राह्मणोनर्चितोवसन् १०० तृणानिभू-
मिरुदकंवाक्चतुर्थीचसूनृता एतान्यपिसतांगेहेनोच्छिद्यंतेकदाचन १०१ एकरात्रंतुनिवसन्नतिथि-
र्ब्राह्मणःस्मृतः अनित्यंहिस्थितोयस्मात्तस्मादतिथिरुच्यते १०२ नैकग्रामीणमतिथिंविप्रंसांगतिकं
तथा उपस्थितंगृहेविद्याद्भार्यायत्राग्नयोपिवा १०३ उपासतेयेगृहस्थाःपरपाकमबुद्धयः तेनतेप्रेत्य
पशुतांव्रजन्त्यन्नादिदायिनाम् १०४ अप्रणोद्योऽतिथिःसायंसूर्योढोगृहमेधिना कालेप्राप्तस्त्वका-
लेवानास्यानश्नन्गृहेवसेत् १०५ सिनोनातिथित्वमितिबोधितम् १०३ उपासतइति अतिथिप्रकरणादातिथ्यलो-
भेनयेगृहस्थाःग्रामांतराणिगत्वापरान्नंसेवंतेते निषिद्धपरान्नदोषानभिज्ञाः तेनपरान्नभोजनेनजन्मांतरेअन्नादिदायिनांपशु-
तांव्रजंतितस्मादिदंनकुर्यादितिनिषेधःकल्प्यते १०४ अप्रणोद्यइति सूर्येऽस्तमितेगृहस्थेनातिथिर्नप्रत्याख्येयः सूर्येणोढःप्रा-
पितःरात्रौस्वगृहगमनाशक्तः द्वितीयवैश्वदेवकालेप्राप्तः अकालेवासायंभोजनेनिवृत्तेपिनास्यगृहेअतिथिरनश्नन्वसेदवश्यम-
स्मैभोजनंदेयंप्रत्याख्यानेप्रायश्चित्तगौरवार्थोयमारंभः अतएवविष्णुपुराणे दिवातिथौतुविमुखेगतेयत्पातकंनृप तदेवाष्टगुणं
प्रोक्तंसूर्योढेविमुखेगते गोविंदराजस्तुप्रतिनिषिद्धातिथिप्रतिप्रसवार्थत्वमस्याह १०५

नवैइति यद्घृतदध्यादिउत्कृष्टमतिथिंनभक्षयेत्तत्तस्मैअदत्वानस्वयंभोक्तव्यम् धनायहितंधनस्यनिमित्तंवाधन्यंएवंयशस्यादयोपिशब्दाः अतिथिभोजनफलकथनमिदम् नत्वानावश्यकतापत्तिःसर्वंसकृतमादत्तेइत्यादिदोषश्रवणात् १०६ आसनेति आसनंपीठंचर्मवा आवसथोविश्रामस्थानम् शय्याखट्वादि अनुव्रज्यागच्छतोऽनुगमनम् उपासनांपरिचर्याम् एतत्सर्वंबहुष्वतिथिषुयुगपदुपस्थितेषुइतरेतरापेक्षयाउत्कृष्टापकृष्टमध्यमंकुर्यात् नपुनःसर्वेषांसमम् १०७ वैश्वेति अन्यशब्दनिर्देशादतिथिभोजनपर्यंतंवैश्वदेवेकृतेयद्यपरोतिथिरागच्छेत्तदातदर्थंपुनःपाकंकृत्वातस्यान्नंदद्यात् बलिहरणंततोनात्रकुर्यात् बलिनिषेधादन्नसंस्काराभावोवैश्वदेवस्यावगम्यते अन्नसंस्कारपक्षेकथमसंस्कृतान्नभोजनमनुजानीयात् १०८ नेति भोजनलाभार्थंब्राह्मणःस्वकुलगोत्रेननिवेदयेत् यस्माद्भोजनार्थंतेकथयन् उद्गीर्णाशीतिपंडितैःकथ्यते १०९ नेति ब्राह्मणस्यक्षत्रियादयअतिथयोनभवंति क्षत्रियादीनांब्राह्मणास्योत्कृष्टजातित्वात् मित्रज्ञा-

नवैस्वयंतदश्नीयादतिथिंयन्नभोजयेत् धन्यंयशस्यमायुष्यंस्वर्ग्यंवातिथिपूजनम् १०६ आसनावसथौशय्यामनुव्रज्यामुपासनाम् उत्तमेषूत्तमंकुर्याद्धीनेहीनंसमेसमम् १०७ वैश्वदेवेतुनिर्वृत्तेयद्यन्योतिथिराव्रजेत् तस्याप्यन्नंयथाशक्तिप्रदद्यान्नबलिंहरेत् १०८ नभोजनार्थंस्वेविप्रःकुलगोत्रेनिवेदयेत् भोजनार्थंहितेशंसन्वान्ताशीत्युच्यतेबुधैः १०९ नब्राह्मणस्यत्वतिथिर्गृहेराजन्यउच्यते वैश्यशूद्रौसखाचैवज्ञातयोगुरुरेवच ११० यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत् भुक्तवत्सूक्तविप्रेषुकामंतमपिभोजयेत् १११ वैश्यशूद्रावपिप्राप्तौकुटुंबेतिथिधर्मिणौ भोजयेत्सहभृत्यैस्तावानृशंस्यंप्रयोजयन् ११२

तीनामात्मसंबंधाद्गुरोःप्रभुत्वात् अनेनैवन्यायेनक्षत्रियस्यउत्कृष्टोब्राह्मणःसजातीयश्चक्षत्रियोऽतिथिःस्यान्नापकृष्टौवैश्यशूद्रौ एवंवैश्यस्यापिद्विजातयोतिथयोनशूद्रः ११० यदीति ग्रामाद्ग्रामांतरागतत्वादतिथिकालोपस्थितत्वादतिथिधर्मेणक्षत्रियोविप्रगृहमागच्छेत्तदाविप्रगृहोपस्थितविप्रेषुकृतभोजनेषुस्थितेषुइच्छातस्तमपिभोजयेत् १११ वैश्येति यदिवैश्यशूद्रावपिब्राह्मणस्यकुटुंबेगृहेप्राप्तौग्रामांतरादागतत्वाद्यतिथिधर्मशालिनौतदातावपिक्षत्रियभोजनकालात्परतोदंपतीभोजनात्पूर्वंदासभोजनकालेअनुकंपामाश्रयन्भोजयेत् ११२ इतरानिति उक्तभोजनकालेक्षत्रियादिव्यतिरिक्तान्सखिसहाध्यायिप्रभृतीन्संप्रीत्यागृहमागतान्प्रकृत्य नि

थिभावेनतस्यप्रतिषेधात् यथाशक्तिप्रकृष्टमन्नंकृत्वाभार्याभोजनकालेभोजयेत् गृहस्थस्यापिसएवभोजनकाल अवशिष्टंतुदंपती
तिवक्ष्यमाणत्वात् आत्मनासहेतिकर्तव्येवचनवैचित्र्यमाचार्यस्यगुरोस्तुभोजनकालानभिधानंप्रकृतत्वेनस्वाधीनकालत्वात् ११३
सुवासिनीमिति सुवासिन्योनवोढाःस्त्रियःस्नुषादुहितरश्चताःकुमारीगर्भिणीश्चातिथिभ्योग्रेपूर्वमेवातिथिभ्योभोजयेत् कथमतिथिषु
अभोजितेषुभोजनमेषामितिविचारमकुर्वन् मेधातिथिस्त्वन्वगेवेतिपठित्वानुगतानेवैतान्भोजयेत् अतिथिसमकालमितिव्याख्याय अ-
न्येतु अग्रइतिपठंतीत्युक्तवान् ११४ अदत्वेति एतेभ्योतिथ्यादिभृत्यपर्यंतेभ्योअन्नमदत्वाव्यतिक्रमभोजनदोषमजानन्यःपूर्वंभुंक्तेसम
रणानंतरंश्वगृध्रैरात्मनोभक्षणंनजानातिव्यतिक्रमस्येदंफलमितिवचनवैदग्ध्येनोक्तम् ११५ भुक्तेति विप्रेषुअतिथिषुस्वेषुज्ञातिषुभृ-

इतरानपिसख्यादीन्संप्रीत्यागृहमागतान् सत्कृत्यान्नंयथाशक्तिभोजयेत्सहभार्यया ११३ सुवासिनीःकु
मारीश्चरोगिणोगर्भिणीःस्त्रियः अतिथिभ्योग्रएवैतान्भोजयेदविचारयन् ११४ अदत्वातुयएतेभ्यःपू
र्वंभुंक्तेविचक्षणः सभुंजानोनजानातिश्वगृध्रैर्जग्धिमात्मनः ११५ भुक्तवत्स्वथविप्रेषुस्वेषुभृत्येषुचैवहि भुं
जीयातांततःपश्चादवशिष्टंतुदंपती ११६ देवानृषीन्मनुष्यांश्चपितॄन्गृह्याश्चदेवताः पूजयित्वाततःपश्चा
द्गृहस्थःशेषभुग्भवेत् ११७ अघंसकेवलंभुंक्तेयःपचत्यात्मकारणात् यज्ञशिष्टाशनंह्येतत्सतामन्नंविधी
यते ११८ राजर्त्विक्स्नातकगुरून्प्रियश्वशुरमातुलान् अर्हयेन्मधुपर्केणपरिसंवत्सरात्पुनः ११९

त्येषुदासादिषु
कृतभोजनेषुततोन्नादवशिष्टंभार्यापतीपश्चादश्नीयाताम् ११६ देवानिति गृह्याश्चदेवताइत्यनेन भूतयज्ञउक्तः पंचयज्ञानुष्ठानस्य
अवशिष्टंतुदंपतीत्यनेनशेषभोजनस्यचविहितत्वात् वक्ष्यमाणदोषकथनार्थोयमनुवादः अथवादेवानित्यनेनैव भूतयज्ञस्यसंग्रहः
गृहेभवागृह्यादेवताःपूजयित्वेतिवास्तुदेवादिप्रतिकृतिपूजाविधानार्थत्वमस्य ११७ अघमिति यस्त्वात्मार्थमेवान्नंपक्त्वाभुंक्तेदेवादि
भ्योनददातिसपापहेतुत्वात्पापमेवकेवलंभुंक्तेनान्नम् तथाचश्रुतिः केवलाघोभवतिकेवलादीयस्माद्यद्देवपाकयज्ञावशिष्टमशनमन्न
मस्यतेइतिनदेवसाधूनामन्नमुपदिश्यतेइति ११८ अतिथिपूजाप्रसंगेनराजादीनामपिगृहागतानांपूजाविशेषमाह राजेति राज्याभिषि-

कः क्षत्रियोराजा ऋत्विकृयेनयस्यार्त्विज्यंकृतंस्नातकोपि यात्रताभ्यांप्रियोजामाता राजादीनेतान्गृहागतान्संवत्सरगृह्योक्तेन मधुपर्काख्येन कर्मणापूजयेत् परिसंवत्सरादितिसंवत्सरंवर्जयित्वातदूर्द्ध्वंगृहागतान्पुनर्मधुपर्केणपूजयेत् पंचम्यपाङ्परिभिरितिसूत्रेणवर्जनार्थ परियोगेनइयंपंचमी अतएवैतत्सूत्रव्याख्यानेजयादित्येनोक्तं अपेनसाहचर्यात्परेर्वर्जनार्थस्यग्रहणमिति मेधातिथिस्तुपरिसंवत्सरानि तिपठित्वापरिगतोनिष्क्रांतःसंवत्सरोयेषांतान्पूजयेदितिव्याख्यातवान् उभयत्रापिपाठेसंवत्सरमध्यागमनेनमधुपर्कार्हता ११९ राजस्ना तकयोःपूजासंकोचार्थमाह राजेति राजस्नातकौसंवत्सरादूर्द्ध्वमपियज्ञकर्मण्येवप्राप्तौमधुपर्केणपूजनीयौनतुयज्ञव्यतिरेकेणजामात्रा दयस्तुसंवत्सरादूर्द्ध्वंयज्ञंविनापिमधुपर्कार्हाः संवत्सरमध्येतुसर्वेषांयज्ञविवाहयोरेवमधुपर्कः तदाहगौतमः ऋत्विगाचार्यश्वसुरपितृव्य मातुलानामुपस्थानेमधुपर्कः संवत्सरेपुनर्यज्ञविवाहयोरर्वाक्राज्ञःश्रोत्रियस्यच १२० सायमिति दिनांतेसिद्धस्यान्नस्यपत्नी अमंत्रंबलि

राजाचश्रोत्रियश्चैवयज्ञकर्मण्युपस्थितौ मधुपर्केणसंपूज्यौनत्वयज्ञइतिस्थितिः १२० सायंत्वन्नस्यसिद्ध स्यपत्न्यमंत्रंबलिंहरेत् वैश्वदेवंहिनामैतत्सायंप्रातर्विधीयते १२१ पितृयज्ञंतुनिर्वर्त्यविप्रश्चंद्रक्षयेग्नि मान् पिंडान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासिकम् १२२ पितॄणांमासिकंश्राद्धमन्वाहार्यंविदुर्बुधाः तच्चा मिषेणकर्त्तव्यंप्रशस्तेनसमंततः १२३ तत्रयेभोजनीयाःस्युर्येचवर्ज्याद्विजोत्तमाः यावतश्चैवयैश्चान्नैस्तान्प्र वक्ष्याम्यशेषतः १२४

हरणंकुर्यात् इंद्रायनमइतिमंत्रपाठवर्जमानसस्तद्देवतोद्देशोननिषिध्यते यतएतत्वैश्वदेवंनामा न्नसाध्यंहोमबलिदानातिथिभोजनात्मकंतत्सायंप्रातर्गृहस्थस्योपदिश्यते १२१ श्राद्धकल्पंचशाश्वतमित्यनुक्रमणिकायांप्रतिज्ञातं श्राद्धकल्पमुपक्रमते पितृयज्ञमिति साग्निरमावास्यायांपिंडपितृयज्ञाख्यंकर्मकृत्वाश्राद्धंकुर्यात् पितृयज्ञपिंडानामनुपश्चाद्दाक्रियत इतिपिंडान्वाहार्यकंश्राद्धंमासानुमासिकंमासस्यानुमासश्चतयोर्भवंप्रतिमासंकर्त्तव्यमित्यर्थः अनेनास्यनित्यत्वमुक्तंविप्रग्रहणंद्विजाति परंत्रयाणांप्रकृतत्वात् १२२ इदानींनामनिर्वचनेनोक्तमेवपितृयज्ञानंतर्यंद्रढयति पितॄणामिति इदंमासिकंप्रतिमासभवंश्राद्धंयस्मा त्पितृयज्ञपिंडानामनुपश्चाद्दाक्रियतेतेनपिंडान्वाहार्यकमिदंपंडिताजानंति ततोयुक्तंपितृयज्ञानंतर्यमस्यतच्चामिषेणवक्ष्यमाणमांसे नप्रशस्तेनमनोहरेणपूतिगंधादिरहितेनप्रयत्नतःकर्त्तव्यंपिंडानांमासिकंश्राद्धमितिवापाठःपिंडानांपितृयज्ञपिंडानांशेषंतुल्यम् १२३ तत्रे

ति तस्मिन्श्राद्धेयेभोजनीयाः येनचयाज्यायत्संख्याकाः यैश्चान्नैस्तत्सर्वंप्रवक्ष्यामि १२४ अत्रयद्यप्युद्देशक्रमेणयेभोजनीयाइतिवक्तु
मुचितंतथाप्यल्पवक्तव्यत्वाद्ब्राह्मणसंख्यामाह द्वाविति दैवश्राद्धेद्वौब्राह्मणौपितृपितामहप्रपितामहानांत्रीन्ब्राह्मणान्अथवा ः
वेएकंपित्रादित्रिकेचैकंब्राह्मणंभोजयेत् उक्तातिरिक्तभोजनेसमर्थोपिनाधिकभोजनेषुप्रवर्त्तेत मेधातिथिस्त्वाह पितृकृत्येत्री
पितुस्त्रीन्ब्राह्मणान्पितामहस्यत्रीन्ब्राह्मणान्प्रपितामहस्यत्रीन्ब्राह्मणान्भोजयेत् एकैकमुभयत्रवेतिदैवएकंपित्रादित्रयस्यचै
कैकम् नत्वेवैकंपित्रादित्रयस्य नत्वेवैकंसर्वेषांपिंडैर्व्याख्यातमित्याश्वलायनगृह्यविरोधात् यथैकःपिंडःपित्रादित्रयस्यननिरूप्यतेत
थैकोब्राह्मणोनभोजयितव्यइत्यर्थः तस्मान्नपित्रादित्रयस्यैकब्राह्मणभोजनम् तदसत् गृह्यकारेणैवनत्वेवैकंसर्वेषांपिंडैर्व्याख्यात-
मितिपठित्वाकाममनाद्येइत्यभिहितम् अस्यार्थः बहुपित्रादिदेवताकश्राद्धानामाद्यंसपिंडीकरणमभिमतंतद्व्यतिरिक्तश्राद्धेकाममेकः
पित्रादीनांब्राह्मणइत्यर्थः अथवाअनाद्येअदनीयद्रव्याभावेएकोपिभोजयितव्यःउभयत्राधिव्याख्यानेपार्वणादौपित्रादित्रयस्यैकब्रा-

द्वौदैवेपितृकार्येत्रीनेकैकमुभयत्रवा भोजयेत्सुसमृद्धोपिनप्रसज्जेतविस्तरे १२५ सत्क्रियांदेशकालौच
शौचंब्राह्मणसंपदः पंचैतान्विस्तरोहंतितस्मान्नेहेतविस्तरम् १२६ प्रथितापेतकृत्यैषापित्र्यंनामविधुक्ष
ये तस्मिन्युक्तस्यैतिनित्यंप्रेतकृत्यैवलौकिकी १२७

ह्मणभोजनंगृह्यकृतैवोक्तम् वशिष्ठोपि यद्येकंभोजयेच्छ्राद्धेदैवतं
त्रंकथंभवेत् अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यच देवतायतनेकृत्वायथाविधिप्रवर्त्तयेत् प्रास्येदग्नौतदन्नंवादद्याद्वाब्रह्मचारिणइतिस
र्वेभ्यएकब्राह्मणभोजनमाहतस्माद्यथोक्तैवव्याख्यापयमेवाशब्दइत्यनेन विस्तारइतिप्रासेछंदःसमानत्वात्स्मृतीनांसर्वेविधयः छंदसिवि
कल्पंतेइतिविस्तरइतिरूपम् १२५ सदिति सत्क्रियांब्राह्मणस्यपूजांदेशंदक्षिणप्रवणत्वादिवक्ष्यमाणंकालमपराह्णंशौचंश्राद्धकर्तृ
ब्राह्मणप्रेष्यगतंगुणवद्ब्राह्मणलाभंचब्राह्मणविस्तारोनाशयतितस्माद्ब्राह्मणविस्तारंनकुर्यादितिसत्क्रियादिविरोधतोब्राह्मणा
धिक्यात्सत्क्रियादिसंभवेपित्रादेरेकैकस्यापिब्राह्मणत्रयाद्यनुज्ञानम् अतएवगौतमः नवावरान्भोजयेदयुजोवायथोत्साहम् बह्वृचगृह्य
कारोपिअथातःपार्वणश्राद्धेकाम्येआभ्युदयिकएकोद्दिष्टेब्राह्मणानित्युपक्रम्यएकैकमेकैकस्यद्वौद्वौत्रीन्त्रीन्वावृद्धौफलभूयस्त्वमित्याह
द्वौदाविति आभ्युदयिकश्राद्धविषयंस्मृत्यंतरेषुतथाविधानात् अत्राप्याभ्युदयिकइत्युपक्रमात्च १२६ प्रथितेति यदेतत्पित्र्यंकर्मश्राद्धरूपंप्र

थमभियंप्रख्यातामेतत्कृत्यापित्रुपकारार्थाक्रिया प्रकर्षेणइतःप्रेतःपितृलोकस्थएवोच्यते विधुक्षये अमावास्यायांतस्मिन्पित्र्येक र्मणियुक्तस्यैतस्यरस्यलौकिकास्मार्त्तिकीप्रेतकृत्यापित्रुपकारार्थाक्रियागुणवत्पुत्रपौत्रधनादिफलप्रबंधरूपेणकर्त्तारमुपतिष्ठतेत स्मादिदंकर्त्तव्यम् गोविंदराजेनतुविधिःक्षयइतिपठितंव्याख्यातंचयोयंनामविधिःपित्र्यंकर्मतिथिक्षयेचंद्रक्षयेमहेवा तदसामदा यिकम् मेधातिथिप्रभृतिभिर्गोविंदराजादपिवृद्धतरैरनभ्युपेतत्वात्क्षयइतिसंबंधक्लेशाच्च १२७ श्रोत्रियेति छंदोमात्राध्यायीश्रो त्रियस्तस्मैदेवपित्र्यान्नानियत्नतोदेयानि अर्हत्तमायश्रुताचाराभिजनादिभिःपूज्यतमायतस्मैदत्तंमहाफलंभवति १२८ एकैकमपि- ति दैवपित्र्ययोरेकैकमपिवेदतत्त्वविदंब्राह्मणंभोजयेत् तदापिविशिष्टंश्राद्धफलंप्राप्नोतिनत्वविदुषोबहूनपिएवंचफलश्रवणाद्ब्राह्म णभोजनमेवप्रधानंपिंडदानादिकंत्वंगमितिगोविंदराजः-वयंतुपित्रुद्देशेनद्रव्यत्यागंब्राह्मणस्वीकारपर्यंतंश्राद्धशब्दवाच्यंप्रधानंब्रूमः तदेवमनुनापिंडान्वाहार्यकंश्राद्धंकुर्यादितिविहितंआपस्तंबेनतुमन्वर्थस्यैवव्याख्यातत्वात् तदाहआपस्तंबःतथैतन्मनुःश्राद्धशब्दं

श्रोत्रियायैवदेयानिहव्यकव्यानिदातृभिः अर्हत्तमायविप्रायतस्मैदत्तंमहाफलम् १२८ एकैकमपिविद्वांसंदैवेपित्र्येचभोजयेत् पुष्कलंफलमाप्नोतिनामंत्रज्ञान्बहूनपि १२९ दूरादेवपरीक्षेतब्राह्मणंवेदपारगम् तीर्थंतद्धव्यकव्यानांप्रदानेसोतिथिःस्मृतः १३० सहस्रंहिसहस्राणामनृचांयत्रभुंजते एकस्तान्मंत्रवित्प्रीतःसर्वानर्हतिधर्मतः १३१

कर्मप्रोवाचप्रजानिःश्रेयसार्थंतत्रपितरोदेवताब्राह्मणस्त्वाहव नीयार्थेमासिमास्यपरपक्षस्यापराण्हःश्रेयानिति श्राद्धशब्दंश्राद्धमितिशब्दोवाचकोयस्यतत्तथाब्राह्मणस्त्वाहवनीयार्थे आहव- नीयवत्प्रक्षिप्तद्रव्यप्रतिपत्तिस्थानत्वात् पितरोदेवताइतिनियतपितृदेवताकत्वाच्चश्राद्धस्य देवताश्राद्धादौश्राद्धशब्दस्तद्धर्मप्राप्त्य र्थोगौणः कौंडपायिनामयनइवाग्निहोत्रशब्दः पुष्कलंफलंप्राप्नोतिइतितुपुष्कलतरफलार्थिनोगुणफलविधिः सभोजनस्यांगत्वेपित दाश्रयोनविरुद्धः आपस्तंबोप्यथान्श्राद्धंकर्मैतत्पितृदैवतम् मन्वर्थकथयस्तस्मान्नेदंब्राह्मणभोजनम् १२९ दूरादिति दूरादेवपि तृपितामहाद्यभिजनशुद्धिनिरूपणेनकृत्स्नशाखाध्यायिनंब्राह्मणंपरीक्षेतयस्मात्तथाविधोब्राह्मणोहव्यादीनांतीर्थंपात्रंप्रदानेसो तिथिरेवमहाफलप्राप्तेर्हेतुत्वात् १३० सहेति यत्रश्राद्धेब्राह्मणानामवेदविदांदशलक्षाणिभुंजतेतत्रैकोवेदविद्भोजनेनपरितुष्टो-

धर्मतो धर्मोत्पादनेन तान्सर्वान्नर्हतिस्वीकर्त्तुंयोग्योभवतितद्भोजनजन्यंफलंजनयतीत्यर्थः छांदसत्वादेकवचनम् अथवाबहुवच
नानांस्थानेसहस्रमितिमनोरभिमतम् गोविंदराजस्त्वाहसहस्रंगच्छंतुभूतानीतिवेदे १३१ ज्ञानेति विद्ययाउत्कृष्टेभ्योहव्यानि
कव्यानिचदेयानिनमूर्खेभ्यः अर्थांतरन्यासोनामालंकारः नहिरक्ताक्तौहस्तौरक्तेनैवविशुद्धौभवतः किंतुविमलजलेन एवंमूर्ख
भोजनेनजनितंदोषंनमूर्खएवभोजितोपहंतिकिंतुविद्वान् १३२ अविद्वन्निंदयाविद्वद्दानमेवोक्तंवक्रोक्त्यास्तौति यावतइति या
वत्संख्यकान्ग्रासान्हव्यकव्येष्वनृग्विद्भुंक्तेतत्संख्याकानेवप्रकृतश्राद्धकर्त्ताज्वलितशूलर्ष्टिस्थ्यासुधलोहपिंडान्ग्रसते श्राद्ध-
कर्त्तुरेवेदमविद्वद्दानफलकथनम् तथाचव्यासः ग्रसतेयावतःपिंडान्यस्यवैहविषोनृपः ग्रसतेतावतःशूलान्गत्वावैवस्वतक्ष
यम् १३३ ज्ञानेति केचिदात्मज्ञानपराब्राह्मणाभवंतिअन्येप्राजापत्यादितपःप्रधानाः अपरेतपोध्ययननिरताःइतरेयागादिपराः

ज्ञानोत्कृष्टायदेयानिकव्यानिचहवींषिच नहिहस्तावसृग्दिग्धौरुधिरेणैवशुध्यतः १३२ यावतोग्रसते
ग्रासान्हव्यकव्येष्वमंत्रवित् तावतोग्रसतेप्रेत्यदीप्तशूलर्ष्ट्ययोगुडान् १३३ ज्ञाननिष्ठाद्विजाःकेचित्त
पोनिष्ठास्तथापरे तपःस्वाध्यायनिष्ठाश्चकर्मनिष्ठास्तथापरे १३४ ज्ञाननिष्ठेषुकव्यानिप्रतिष्ठाप्यानि
यत्नतः हव्यानितुयथान्यायंसर्वेष्वेवचतुर्ष्वपि १३५ अश्रोत्रियःपितायस्यपुत्रःस्याद्वेदपारगः अ
श्रोत्रियोवापुत्रःस्यात्पितास्याद्वेदपारगः १३६ ज्यायांसमनयोर्विद्याद्यस्यस्याच्छ्रोत्रियःपिता मंत्रसं
पूजनार्थंतुसत्कारमितरोर्हति १३७

१३४ ततकिमतआह ज्ञानेति ज्ञानप्रधानेभ्योपित्र्यर्थान्यानियत्नाद्दातव्यानि
देवान्नानिपुनःन्यायावधृतार्थशास्त्रानुसारेणचतुर्भ्योपि १३५ अश्रोत्रियइति योऽश्रोत्रियपितृकःस्वयंचश्रोत्रियः यः श्रोत्रिय-
पितृकःस्वयंवाअश्रोत्रियः १३६ तयोःकःश्रेष्ठइत्यपन्यस्यविशेषमाह ज्यायांसमिति अनयोः पूर्वश्लोकनिर्दिष्टयोर्मध्येश्रोत्रियपु
त्रंस्वयमश्रोत्रियमपिज्येष्ठंजानीयात्पितृविद्यादरपरमिदम् यःपुनरश्रोत्रियस्यपुत्रःस्वयंचश्रोत्रियःसतदधीतवेदपूजनार्थंपूजा
मर्हतिवेदएवतद्द्वारेणपूज्यतइतिपुत्रविद्यादरपरमिदम् तस्माद्वचनभंग्याश्रोत्रियपुत्रःस्वयंचश्रोत्रियःश्राद्धेभोजयितव्यइत्य-

हम् ननुश्रोत्रियपुत्रस्यस्वयमश्रोत्रियस्यैवाप्यनुज्ञानंश्रोत्रियायैवदेयानीतिविरोधादेवंच दूरादेवपरीक्षेतेतिविद्याव्यतिरिक्ता
चारादिपरीक्षायत्नेनावतिष्ठते १२७ नेति श्राद्धेनमित्रंभोजयेत्धनांतरैरस्यमैत्रीसंपादनीया नशत्रुन्नचमित्रंयंजानीयात्तंब्रा
ह्मणंश्राद्धेभोजयेत् १३८ यस्येति मित्रशब्दोयंभावप्रधानः यस्यमैत्रीप्रधानानिहव्यकव्यानितस्यपारलौकिकंफलंनभवतीति
फलाभावकथनपरमिदम् प्रेत्येति परलोकेइत्यर्थेशब्दांतरमव्ययमिदंनतुक्त्वांतंतेनासमानकर्तृकत्वेकथंक्त्वाइतिनाशंकनीयम्
१३९ स्वर्गफलंश्राद्धस्यदर्शयितुंपूर्वोक्तफलाभावमेवविशेषेणकथयति यइति योमनुष्यःसंगतानिमित्रभावंशास्त्रानभिज्ञतया
श्राद्धेनकुरुतेश्राद्धमेवमित्रलाभहेतुत्वान्मित्रंयस्यसश्राद्धमित्रोद्विजापसदःसस्वर्गलोकाच्च्यवतेतंनप्राप्नोतीत्यर्थः श्राद्धस्यापिस्व

नश्राद्धेभोजयेन्मित्रंधनैःकार्योस्यसंग्रहः नारिंनमित्रंयंविद्यात्तंश्राद्धेभोजयेद्द्विजम् १३८ यस्यमि
त्रप्रधानानिश्राद्धानिचहवींषिच तस्यप्रेत्यफलंनास्तिश्राद्धेषुचहविःषुच १३९ यःसंगतानिकुरुते
मोहाच्छ्राद्धेनमानवः सस्वर्गाच्च्यवतेलोकाच्छ्राद्धमित्रोद्विजाधमः १४० संभोजनीसाभिहितापैशा
चीदक्षिणाद्विजैः इहैवास्तेतुसालोकेगौरंधेवैकवेश्मनि १४१ यथेरिणेबीजमुप्त्वानवप्तालभतेफ-
लम् तथानृचेहविर्दत्वानदातालभतेफलम् १४२ दातॄन्प्रतिग्रहीतॄंश्चकुरुतेफलभागिनः विदुषेद
क्षिणांदत्वाविधिवत्प्रेत्यचेहच १४३

र्गफलत्वमाह याज्ञवल्क्यः आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच प्रयच्छं-
तितथाराज्यंप्रीतानृणांपितामहाः १४० संभोजनीति सादक्षिणादानक्रियासंभोजनीसहभुज्यतेययासासंभोजनीगोष्ठीबहुपु
रुषभोजनात्मिकापिशाचधर्मत्वात्पैशाचीमन्वादिभिरुक्ता साचमैत्रीप्रयोजनकत्वान्नपरलोकफलाइहलोकेएवास्ते यथाऽन्धा-
गौरेकस्मिन्नेवगृहेतिष्ठतिनगृहांतरगमनक्षमा १४१ यथेति ईरिणमूषरदेशोयत्रबीजमुप्तंनप्ररोहतितत्रयथाबीजमुप्त्वाक
र्षकोनफलंप्राप्नोतिएवमविदुषेश्राद्धदानफलंदातानप्राप्नोतीति १४२ दातॄनिति वेदतत्त्वविदेयथाशास्त्रंदत्तंऐहिकामुष्मि
कफलभागिनोदातॄन्करोति ऐहिकंफलंयथाशास्त्रानुष्ठानेनलोकेख्यातिरूपमानुषंगिकमितिमेधातिथिगोविंदराजौ ययंस्त्रा

पुरादिकमेवैहिकफलंब्रूमः आयुःप्रजाधनविद्याभित्याद्यैहिकामुष्मिकादिफलत्वेनापिश्राद्धस्ययाज्ञवल्क्यादिभिरुक्तत्वात् प्र
तिग्रहीतॄंभ्यश्राद्धलब्धधनानुष्ठितयागादिफलेनपरलोकेसफलांकुरुते अन्यायार्जितधनानुष्ठितयागादेरफलप्रदत्वात् इह
लोकेन्यायार्जितधनारब्धकृष्यादिफलातिशयत्वाभासफलांकुरुते १४३ काममिति वरंविद्वद्ब्राह्मणाभावेगुणवन्मित्रंभोजये
न् नतुविद्वांसमपिशत्रुंयतःशत्रुणाश्राद्धेभुक्तंपरलोकेनिष्फलंभवतियथोक्तपात्रासंभवेमित्रप्रतिप्रसवार्थमिदम् १४४ श्रोत्रि
यायैवदेयानीत्यनेनछंदोमात्राध्यायिनिश्रोत्रियशब्दप्रयोगात्तदाश्रयणमावश्यकमुक्तंइदानींत्वधिकफलार्थंमंत्रब्राह्मणात्मकक्र
त्स्नशाखाध्यायिनिश्रोत्रियेदानमाह यत्नेनेति ऋग्वेदिनंमंत्रब्राह्मणात्मकशाखाध्यायिनंयत्नतोभोजयेत् तथाविधमेवयजुर्वेदि
नंवेदस्यपारंगच्छतीतिवेदपारगःशाखाया अंतंगच्छतीतिशाखांतगःसमाप्तिरस्यास्तीतिसमाप्तिकःसर्वैरेवशब्देर्मंत्रब्राह्मणा

कामंश्राद्धेर्चयेन्मित्रंनाभिरूपमपित्वरिम् द्विषताहिहविर्भुक्तंभवतिप्रेत्यनिष्फलम् १४४ यत्ने
नभोजयेच्छ्राद्धेबह्वृचंवेदपारगम् शाखांतगमथाध्वर्युंछंदोगंतुसमाप्तिकम् १४५ एषामन्यतमो
यस्यभुंजीतश्राद्धमर्चितः पितॄणांतस्यतृप्तिःस्याच्छाश्वतीसाप्तपौरुषी १४६ एषवैप्रथमःकल्पः
प्रदानेहव्यकव्ययोः अनुकल्पस्त्वयंज्ञेयःसदासद्भिरनुष्ठितः १४७ मातामहंमातुलंचस्वस्रीयंश्व
शुरंगुरुम् दौहित्रंविट्पतिंबंधुमृत्विग्याज्यौचभोजयेत् १४८

त्मककृत्स्नशाखाध्येत्राभिहितः १४५ त
द्भोजनेअधिकंफलमाह एषामिति एषांसंपूर्णशाखाध्यायिनांबह्वृचादीनांमध्यादन्यतमोयस्यसम्यक्पूजितःसन्श्राद्धे
भुंक्तेतस्यपुत्रादिसप्तपुरुषाणांशाश्वतीअविच्छिन्नापितॄणांतृप्तिःस्यात् साप्तपौरुषीति अनुशतिकादित्वादुभयपदवृद्धिःतस्य
चाकृतिगणत्वात् १४६ एषइति हव्यकव्ययोरुभयोरेवप्रदानेयदसंबंधिश्रोत्रियादिभ्योदीयतइति अयंमुख्यःकल्पउक्तः अयंतु
मुख्याभावेवक्ष्यमाणोऽनुकल्पोज्ञातव्यःसर्वदासाधुभिरनुष्ठितः १४७ मातामहमिति स्वस्रीयोभागिनेयःगुरुर्विद्यागुरुराचार्यो
विट्दुहितातस्याःपतिःविट्पतिर्जामाता बंधुर्मातृष्वस्रपुत्रादिएतान्मातामहादीन्दशमुख्यश्रोत्रियाद्यसंभवेभोजयेत् १४८

नेति धर्मज्ञोदैवश्राद्धेभोजनार्थंनब्राह्मणंयत्नतःपरीक्षेत्लोकप्रसिद्धिमात्रेणासौसाधुतयाभोजयितव्यः पित्र्येपुनःकर्मण्युपस्थिते पितृपितामहाद्यभिजनपरीक्षाकर्त्तव्येतिप्रयत्नतःशब्दस्यार्थः १४९ यइति स्तेनश्चौरःसचसुवर्णचौरादन्यः तस्यपतितशब्देनैवग्रहणात् पतितोमहापातकी क्लीबोनपुंसकः नास्तिकवृत्तिर्नास्तिपरलोकइत्येवंवृत्तिःप्रवर्त्तनंयस्यएतान्दैवपितृकृत्ययोरुभयोरेवायोग्यान्मनुरब्रवीदितिमनुग्रहणंनिषेधादरार्थंसर्वधर्माणामेवमनुनोक्तत्वात् १५० जटिलमिति जटिलोब्रह्मचारी मुंडोवाजटिलोवास्यादित्युक्तब्रह्मचार्युपलक्षणत्वात्जटिलत्वस्यमुंडोपिनिषिध्यते अनधीयानंवेदाध्ययनरहितंयस्योपनयनमात्रंकृतंनवेदादेशःतेनास्वीकृतवेदस्यापिब्रह्मचारिणोवेदाध्ययनकर्त्तुरभ्यनुज्ञानार्थोयंनिषेधः अतःश्रोत्रियायैवदेयानीतिब्रह्मचारीतरविषयम् दुर्बलोदुश्चर्मा मेधातिथिस्तु दुर्बलमितिपठित्वाखलतिर्लोहितकेशोवादुश्चर्मावाइत्यर्थत्रयमुक्तवान् कितवोद्यूतकृत् पूगयाजकाब

नब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित् पित्र्येकर्मणितुप्राप्तेपरीक्षेतप्रयत्नतः १४९ येस्तेनपतितक्लीबायेचनास्तिकवृत्तयः तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् १५० जटिलंचानधीयानंदुर्बलंकितवंतथा याजयंतिचयेपूगांस्तांश्चश्राद्धेनभोजयेत् १५१ चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा विपणेनचजीवंतोवर्ज्याःस्युर्हव्यकव्ययोः १५२ प्रेष्योग्रामस्यराज्ञश्चकुनखीश्यावदंतकः प्रतिरोद्धागुरोश्चैवत्यक्ताग्निर्वार्धुषिस्तथा १५३

हुयाजकाःपूगःक्रमुकवृंदयोरित्याभिधानिकाः अतएववसिष्ठः यश्चापिबहुयाज्यःस्यात्यश्चोपनयतेबहूनिति तान्श्राद्धेनभोजयेदितिनदैवेनिषेधोमनोरभिमतः तत्रहव्यकव्यग्रहणमुभयत्रेतिव्याकरोति १५१ चिकित्सेति चिकित्सकोभिषक् देवलःप्रतिमापरिचारकः वर्त्तनार्थत्वेनैतत्कर्मकुर्वतोयंनिषेधःनतुधर्मार्थम् देवकोशोपभोजीचनाम्नादेवलकोभवेदितिदेवलवचनात् मांसविक्रयिणःसकृदपि सद्यःपततिमांसेनेतिलिंगात् विपणेनेति विपणोवणिज्यातयाजीवंतःहव्यकव्ययोरित्यभिधानात्दैवेपित्र्येचैतेत्याज्याः १५२ प्रेष्यइति भृतिग्रहणपूर्वकंग्रामाणांराज्ञश्चाज्ञाकारीकुत्सितनखकृष्णदंतगुरुप्रतिकूलाचरणशीलत्यक्तश्रौतस्मार्त्ताग्निकलोपजीविनश्चहव्यकव्ययोर्वर्ज्याइतिपूर्वस्यैवात्रानुषंगःउत्तरएवंच १५३

यक्ष्मीति यक्ष्मीक्षयरोगी पशुपालोऽत्यर्थतयाच्छागमेषादिपोषकः परिवेत्तृपरिवित्तौवक्ष्यमाणलक्षणौ निराकृतिः पंचमहाय ज्ञानुष्ठानरहितः तथाच्छंदोगपरिशिष्टंनिराकर्त्तामरादीनांसविज्ञेयोनिराकृतिः ब्रह्मद्विट्ब्राह्मणादीनांद्वेष्टा गणाभ्यंतरोगणा पसृष्टसंबंधिधनाद्युपजीवी १५४ कुशीलवइति कुशीलवोनर्त्तनवृत्तिः अवकीर्णोस्त्रीसंपर्कात्विप्लुतब्रह्मचर्यःप्रथमाश्रमीयति श्च वृषलीपतिःसवर्णामपरिणीयकृतशूद्राविवाहः पौनर्भवःपुनर्भूपुत्रोवक्ष्यमाणः उपपतिर्यस्यजायाजारोगृहेस्ति १५५ भृतेति भृतिर्वेतनंतद्ग्राही भृतकःसन्योऽध्यापकः सतथाएवंभृतकाध्यापितः शूद्रशिष्योव्याकरणादौगुरुश्चतस्यैव वाग्दुष्टःपरुषभाषी अभिशस्तइत्यन्ये कुंडगोलकौवक्ष्यमाणौ १५६ अकारणेति मातुः पितुर्गुरूणांचपरित्यागकारणंविनात्यक्ताशुश्रूषादेरकर्त्ता तितैश्चाध्ययनकन्यादानादिभिः संबंधैः संपर्कंगतः पतितत्वादेवास्यनिषेधइतिचेत् नसंवत्सरात्त्यागिदंभविष्यतिसंवत्सरेणपतती

यक्ष्मीचपशुपालश्चपरिवेत्तानिराकृतिः ब्रह्मद्विट्परिवित्तिश्चगणाभ्यंतरएवच १५४ कुशीलवोव कीर्णीचवृषलीपतिरेवच पौनर्भवश्चकाणश्चयस्यचोपपतिर्गृहे १५५ भृतकाध्यापकोयश्चभृतका ध्यापितस्तथा शूद्रशिष्योगुरुश्चैववाग्दुष्टःकुंडगोलकौ १५६ अकारणपरित्यक्तामातापित्रोर्गुरो स्तथा ब्राह्मैर्यौनैश्चसंबंधैःसंयोगंपतितैर्गतः १५७ अगारदाहीगरदःकुंडाशीसोमविक्रयी समु द्रयायीवंदीचतैलिकःकूटकारकः १५८ पित्राविवदमानश्चकितवोमद्यपस्तथा पापरोग्यभिशस्त श्चदांभिकोरसविक्रयी १५९ तिवक्ष्यमाणत्वात् १५७ अगारेति गृहदाहकः मरण

माणस्ययोन्नमश्नाति प्रदर्शनार्थत्वात्कुंडस्यगोलकस्यापिग्रहणम् अतएवदेवलः अमृतेजारजः कुं [illegible] रि [illegible]डकः य स्तयोरन्नमश्नातिसकुंडाशीतिकथ्यते सोमलताविक्रेता समुद्रेयोवहित्रादिनाद्वीपांतरंगच्छति वंदीस्तुतिपाठकः तैलार्थंति लादिवीजानांपेष्टा साक्षिवादेकूटस्यमृषावादकस्यकर्त्ता १५८ पित्रेति पित्रासहशास्त्रार्थेलौकिकेवावस्तुनिनिरर्थंयोवि वदते कितवोयःस्वयंदेवितुमनभिज्ञःस्वार्थंपरान्देवयतिनस्वयंदेवितातस्योक्तत्वात् नचसभिकःतस्यद्यूतवृत्ति [illegible] स्यमानत्वात् केकरइतिपाठेतिर्यग्दृष्टिःस्त्राव्यतिरिक्तमद्यपाता कुष्ठी अनिर्णीतेपितस्मिन्महापातकादौजाताभिशापः छ

प्रनाधर्मकारी रसविक्रेता १५९ धनुरिति धनूंषिशरांश्चयःकरोति ज्येष्ठायांसोदरभगिन्यामनूढायांयाकनिष्ठाविवाहेनदीयते साग्रेदिधिषूस्तस्याःपतिः तथाचलोकाक्षिः ज्येष्ठायांयद्यनूढायांकन्यायामुह्यतेनुजा साचाग्रेदिधिषूर्ज्ञेयापूर्वातुदिधिषूःस्मृता गोविंदराजस्तुभ्रातुर्मृतस्यभार्यायामित्यनेनाग्रेदिधिषूपतिरेववृत्तिवशादग्रेपदलोपेनदिधिषूपतिरितिमनुनावक्ष्यतेसइहगृह्य तइत्याह मित्रध्रुक्योमित्रस्यापकारेवर्त्तते द्यूतवृत्तिःसभिकः पुत्रेणाध्यापितःपितापुत्राचार्यस्तासंभवात् १६० भ्रामरीति अपस्मारी गंडमालाख्यव्याध्युपेतः श्वेतकुष्ठयुक्तः दुर्जनःउन्मादवान् अन्धःस्पष्टः वेदनिंदाकरः १६१ हस्तीति हस्तिगवाश्वोष्ट्राणांविनेता नक्षत्रशब्देनज्योतिःशास्त्रमुपलक्ष्यतेतेनयोवर्त्तते पक्षिणांपंजरसंजातानांक्रीडाद्यर्थंपोषिता युद्धार्थमायुधविद्योपदे-

धनुःशराणांकर्त्ताचयश्चाग्रेदिधिषूपतिः मित्रध्रुक्द्यूतवृत्तिश्चपुत्राचार्यस्तथैवच १६० भ्रामरीगंड-
मालीचश्वित्र्यथोपिशुनस्तथा उन्मत्तोऽन्धश्चवर्ज्याःस्युर्वेदनिंदकएवच १६१ हस्तिगोश्वोष्ट्रदमको
नक्षत्रैर्यश्चजीवति पक्षिणांपोषकोयश्चयुद्धाचार्यस्तथैवच १६२ स्रोतसांभेदकोयश्चतेषांचावर-
णेरतः गृहसंवेशकोदूतोवृक्षारोपकएवच १६३ श्वक्रीडीश्येनजीवीचकन्यादूषकएवच हिंस्रो
वृषलवृत्तिश्चगणानांचैवयाजकः १६४ आचारहीनःक्लीबश्चनित्यंयाचनकस्तथा कृषिजीवीश्लीप
दीचसद्भिर्निंदितएवच १६५

शकः १६२ स्रोतसामिति प्रवहज्जलानांसेतुभेदादिनादेशांतरनेता तेषामेवावरणकर्त्ता निजगनिम्ननिबंधकः गृहसन्निवेशोपदेशकोवास्तुविद्योपजीवी दूतोराजग्रामप्रेष्यव्यतिरिक्तोपि वृक्षरोपयितावेतनग्रहणेननतुधर्मार्थं पंचाम्ररोपीनरकंनयातीतिविधानात् १६३ श्वक्रीडीति क्रीडार्थंशुनःपोषयति श्येनैर्जीवतिक्रयविक्रयादिना कन्याभिगंता हिंसारतः शूद्रोपकृष्टस्तिः वृषलपुत्रइतिपाठांतरम् वृषलाएवकेवलाःपुत्रायस्येत्यर्थः विनायकादिगणयागकृत् १६४ आचारेति गुर्वतिथिभक्त्स्नानाद्याचारवर्जितः क्लीबोधर्मकृत्यादौनिरुत्साहः नपुंसकस्योक्तत्वात् नित्यंयाचनेनपरोद्वेजकः स्वयंकृतयाकृष्यायोजीवति रत्स्यंनरेपिवासंभवस्तस्वयंकृतयापि श्लीपदीव्याधिनास्थूलचरणः केनापिनिमित्तेनसाधूनांनिंदाविषयः १६५ ७ ७

औरभ्रिकेति मेषमहिषजीवनः परपूर्वापुनर्भूस्तस्याः पतिः प्रेतनिर्हारकोधनग्रहणेननतुधर्मार्थंएतद्वैपरमंतपोयत्प्रेतमरण्यंहरंत
तिअवश्यश्रुत्याविहितत्वात् १६६ एतानिति एतान्स्तेनादीन्निंदिताचारान्काणादींश्चपूर्वजन्मार्जितनिंदितकर्मशेषलब्धकाणादि
भावान्साधुभि.सहैकत्रभोजनायनर्हान्ब्राह्मणापसदान्ब्राह्मणश्रेष्ठः शास्त्रज्ञोदैवेपित्र्येत्यजेत् १६७ ब्राह्मणइति तृणाग्निर्यथा
विर्दहनसमर्थोहविषिप्रक्षिप्तेशाम्यतिनिष्फलस्तत्रहोम. एवंवेदाग्निशून्योब्राह्मणस्तृणाग्निसमस्तस्मैदेवोद्देशेनत्यक्तंहविर्नदातव्यं
नेनहूयतेश्रोत्रियायैवदेयानीत्यनेनैवानधीयानस्यापिप्रतिषेधसिद्धौस्तेनादिवत्पंक्तिदूषकत्वज्ञापनार्थंपुनर्वचनम् अन्येतुदै
वेअनधीयानएववर्जनीयः अधीयानस्तुकाणादिरपिशारीरदोषयुक्तोग्राह्यइतिएतदर्थंपुनर्वचनम् अतएववसिष्ठः अथचेन्मंत्रविद्यु
क्तः शारीरैःपंक्तिदूषणैः अदूष्यंतंयम.प्राहपंक्तिपावनएवसः शारीरैः काणत्वादिभिर्नतुस्वयमुत्पाद्यैस्तेनत्वादिभिः १६८ अपांक्तदाने

औरभ्रिकोमाहिषिकःपरपूर्वापतिस्तथा प्रेतनिर्यातकश्चैववर्जनीयाःप्रयत्नतः १६६ एतान्विगर्हि
ताचारानपांक्तेयान्द्विजाधमान् द्विजातिप्रवरोविद्वानुभयत्रविवर्जयेत् १६७ ब्राह्मणस्त्वनधीयान
स्तृणाग्निरिवशाम्यति तस्मैहव्यंनदातव्यंनहिभस्मनिहूयते १६८ अपांक्तदानेयोदातुर्भवत्यूर्ध्वं-
फलोदयः दैवेहविषिपित्र्येवातत्प्रवक्ष्याम्यशेषतः १६९ अव्रतैर्यद्द्विजैर्भुक्तंपरिवेत्रादिभिस्तथा अ
पांक्तेयैर्यदन्यैश्चतद्वैरक्षांसिभुंजते १७० दाराग्निहोत्रसंयोगंकुरुतेयोग्रजे परिवेत्तासविज्ञेयःपरि
वित्तिस्तुपूर्वजः १७१ परिवित्तिःपरिवेत्तायायाचपरिविद्यते सर्वेतेनरकंयांतिदातृयाजकपंचमाः १७२

इति पंक्तिभोभजनानर्हब्राह्मणायदैवेहविषिपित्र्येवादत्तेदातुर्योदानादूर्ध्वंफलोदयस्तमशेषमभिधास्यामि १६९ अव्रतैरिति वेद
ग्रहणार्थव्रतरहितैस्तथापरिवेत्रादिभिरन्यैश्चअपांक्तेयैःस्तेनादिभिर्यत्हव्यंभुक्तंतत्रक्षांसिभुंजते निष्फलंतच्छ्राद्धंभवतीत्यर्थः
१७० अप्रसिद्धत्वात्परिवेत्रादिलक्षणमाह दारेति अग्निहोत्रशब्दोयमग्निहोत्राद्याधानपरः यःसहोदरोज्येष्ठेभ्रातरिअनूढेअनग्नि
केचदारपरिग्रहंश्रौतस्मार्ताग्निहरणंचकुरुतेसपरिवेत्ताज्येष्ठश्चपरिवित्तिर्भवति १७१ प्रसंगात्परिवेदनसंबंधिनामप्यनिष्टफलमा
ह परीति परिवित्ति.परिवेत्ताचययाचकन्ययापरिवेदनंक्रियतेकन्याप्रदातायाजकश्चतद्विवाहहोमकर्त्तासपंचमोयेषांसर्वेनरकंव्रजंति
१७२

भ्रातुरिति मृतस्य भ्रातुर्वक्ष्यमाणनियोगधर्मेणापिनियुक्तायां भार्यायां सकृत्सकृदृतावित्यादिविधिंहित्वा कामेनानुरागंभावयेदाश्ले
षचुंबनादिकुर्यात् असकृद्वाभवेत्तेतसादिधिषूपतिर्ज्ञातव्यः अतःश्राद्धनिषिद्धपात्रमध्यपाठादस्यापिहव्यकव्यपात्रयोर्निषेधःकल्पनीयः
१७३ परेति परदारेषुकुंडगोलकाख्यौद्वौसुतावुत्पद्येतेतत्रजीवत्पतिकायांसुतःकुंडोमृतपतिकायांचगोलकः १७४ ताविति तेपर
भार्यायांजातौ कुंडाद्यादृष्टायत्नुपयोगात्प्राणिनइतिव्यपदिष्टाःप्राणिनौब्राह्मणत्वेपितत्कार्याभावात् प्रेत्यफलाभावात्परलोकेनानु
षंगिककीर्त्यादिफलाभावाद्दत्तानिहव्यकव्यानिप्रेत्यफलाभावादिहकीर्तेरभावात्नाशयेतेनाशयतःप्रदायिभिर्दत्तानिहव्यकव्यानि-
निष्फलानिकुर्वंति १७५ अपांक्तिति साङ्कःसहैकपंक्त्यांभोजनानर्हःस्तेनादिर्यत्संख्यान्भोजनार्हान्पश्यतितावत्संख्यानांभोजन

भ्रातुर्मृतस्यभार्यायांयोनुरज्येतकामतः धर्मेणापिनियुक्तायांसज्ञेयोदिधिषूपतिः १७३ परदारे
षुजायेते द्वौसुतौकुंडगोलकौ पत्यौजीवतिकुंडःस्यान्मृतेभर्त्तरिगोलकः १७४ तौतुजातौपरक्षेत्रे
प्राणिनौप्रेत्यचेहच दत्तानिहव्यकव्यानिनाशयेतेप्रदायिनाम् १७५ अपांक्त्योयावतःपांक्त्यान्भुंजा
नाननुपश्यति तावतांनफलंप्रेत्यदाताप्राप्नोतिबालिशः १७६ वीक्ष्यान्धोनवतेःकाणःषष्टेःश्वित्रीश
तस्यतु पापरोगीसहस्रस्यदातुर्नाशयतेफलम् १७७ यावतःसंस्पृशेदंगैर्ब्राह्मणान्शूद्रयाजकः ता
वतांनभवेद्दातुःफलंदानस्यपौर्त्तिकम् १७८

स्यफलंतत्रश्राद्धेदातानप्राप्नोति बालिशोऽज्ञः अतःस्तेनादिर्यथानप
श्यतितथाकर्त्तव्यम् १७६ वीक्ष्येति अंधस्यवीक्षणासंभवात्वीक्षणयोग्यदेशसन्निहितोऽसौपांक्त्यानांनवतेर्भोजनफलंनाशय
तिएवंकाण.षष्टेःश्वेतकुष्ठीशतस्यपापरोगीरोगराजोपहतःसहस्रस्यइत्यंधादिसन्निधिनिरासार्थवचनम् गुरुलघुसंख्याभिधानं
चेहसंस्त्रोपन्नयेदोषगौरवंतत्रचप्रायश्चित्तगौरवमितिदर्शयितुम् १७७ यावतइति शूद्रस्ययज्ञादौऋत्विक्पावत्संख्यान्ब्राह्म
णान्स्पृशतिआसनेपूपक्रुसेविति आसनभेदस्यवक्ष्यमाणत्वात् मुख्यस्पर्शासंभवेयावतांश्राद्धभोजिनांपंक्त्याउपविशतितावतांसंबंधि
पौर्त्तिकंफलंश्राद्धीयदातुर्नभवति तावतांपौर्त्तिकंफलंचहिर्वेदिदानाच्चयत्फलंतन्नभवतिइतिमेधातिथिगोविंदराजौ अतस्तथैव

निंदयानिषिद्धगणपठितोपिशूद्रयाजकभोजनेनिषेधःकल्प्यते १७८ प्रसंगाच्चशूद्रयाजकप्रतिग्रहन्निषेधयतिलाघवार्थमन्यत्रनि
षेधकरणेशूद्रयाजकशब्दोच्चारणंकर्त्तव्यंस्यात् वेदेति वेदज्ञोपिब्राह्मणःशूद्रयाजकस्यलोभात्प्रतिग्रहंकृत्वाशीघ्रंशरीरादिनाविनाशं
गच्छति सुतरामवेदवित् अपक्वमृन्मयशरावादिकमिवोदके १७९ सोमविक्रयिणइति सोमविक्रयिणेयद्दत्तं तद्दातुर्भोजनार्थंवि
ष्ठासंपद्यते जन्मांतरेविष्ठाभोजिनांजातौजायतइत्यर्थः इतरेएवंपूयशोणितेपिव्याख्येयम् नष्टंनाशभागितयानिष्फलंविवक्षितम्
अप्रतिष्ठमनाश्रयतयानिष्फलमेव १८० यत्त्विति वाणिजकायेयद्दत्तंश्राद्धेतत्रेहानुषंगिककीर्त्यादिफलायनापिपारलौकिकफलाय
भवति पुनर्भूसुतायपदत्तंतद्भस्महुतहविःसमन्निष्फलमित्यर्थः १८१ इतरेष्विति इतरेभ्योविशेषेणानुक्तफलेभ्यः पंक्तिभोजनानर्हे
भ्यःस्तेनादिभ्योयथाकीर्त्तितेभ्योयद्दत्तमन्नंतद्दातुर्भोजनार्थंमेदोरुधिरमांसमज्जास्थिभवतीतिपंडितावदंति अत्रापिजन्मांतरेमेद

वेदविच्चापिविप्रोऽस्यलोभात्कृत्वाप्रतिग्रहम् विनाशंव्रजतिक्षिप्रमामपात्रमिवांभसि १७९ सो
मविक्रयिणेविष्ठाभिषजेपूयशोणितम् नष्टंदेवलकेदत्तमप्रतिष्ठंतुवार्धुषौ १८० यत्तुवाणिजके
दत्तंनेहनामुत्रतद्भवेत् भस्मनीवहुतंहव्यंतथापौनर्भवेद्विजे १८१ इतरेषुत्वपांक्त्येषुयथोद्दिष्टेष्व
साधुषु मेदोसृङ्मांसमज्जास्थिवदन्त्यन्नंमनीषिणः १८२ अपांक्त्योपहतापंक्तिःपाव्यतेयैर्द्विजो
त्तमैः तान्निबोधतकार्त्स्न्येनद्विजाग्र्यान्पंक्तिपावनान् १८३ अग्र्याःसर्वेषुवेदेषुसर्वप्रवचनेषुच
श्रोत्रियान्वयजाश्चैवविज्ञेयाःपंक्तिपावनाः १८४

शोणितादिभुजांजातिषुजायंतइत्यर्थः १८२ अपांक्त्यइति एकपं
क्त्युपविष्टस्तेनादिदूषितापंक्तिर्यैर्ब्राह्मणैःपवित्रीक्रियतेतान्पवित्रीकारकान्ब्राह्मणानशेषेणशृणुत निषेधादेकपंक्तिभोजनासंभवे
पिस्तेनादीनांरहस्यकृताज्ञानदोषविषयत्वेनसाधकताऽस्यवचनस्य १८३ अग्र्याइति सर्वेषुवेदेषुचतुर्ष्वपिअग्र्याःश्रेष्ठाःसम्यग्गृ
हीतवेदाःब्राह्मणाःपंक्तिपावनाः अतएवयमः पंक्तिपावनगणनायांचतुर्वेदविदेवैवेतिपठितवान् तथाप्रकर्षेणैवउच्यन्तेवेदार्थएभि
रितिप्रवचनान्यंगानितेष्वप्यग्र्याःषडंगविदस्तेचचतुर्वेदिनोपिपंक्तिपावनाः न्यायविच्चषडंगविदितिपंक्तिपावनमध्येयमेनपृथक्पठि
तत्वात् तथाछंदसांशब्दइदशपुरुषइत्यशनोवचनाद्दशपुरुषपर्यंतमविच्छिन्नवेदसंप्रदायवंशजाःपंक्तिपावनाः १८४ ७, ७

त्रिणेति त्रिणाचिकेतः अध्वर्युवेदभागःतद्व्रतंचतद्योगात्पुरुषोपित्रिणाचिकेतः पंचाग्निरग्निहोत्री तथाचहारीतः पवनः पावनस्त्रे
तायस्यपंचाग्नयोगृहे सायंप्रातःप्रदीप्यंतेसविप्रःपंक्तिपावनः पवन आवसथ्याग्निः पावनःसभ्योग्निः शीतापनोदाद्यर्थंबहुषुदेशेष्व
पिविधायते त्रिसुपर्णोबह्वृचांवेदभागःतद्व्रतंचतद्योगात्पुरुषोपित्रिसुपर्णःषडंगानिशिक्षादीनियोव्याचष्टेसषडंगवित् सर्वप्रवचनेन
षडंगाध्येतोक्तः ब्रह्मदेयाब्राह्मविवाहोढातस्या आत्मसंतानःपुत्रःज्येष्ठसामानिआरण्यकेगीयंतेतेषांगाताएतेषट् विज्ञेयाःपंक्तिपाव
नाइत्युत्तरश्लोकेनसंबंधः १८५ वेदेति अनधीत्यापिवेदांगानिगुरूपदेशाधिगतवेदार्थः प्रवक्तावेदार्थस्यैव ब्रह्मचारीप्रथमाश्रमी स
हस्रदइतिदेयविशेषानुपादानेपिगावोवैयज्ञस्यमातरइत्यादिविशेषप्रवृत्तश्रुतिदर्शनात् गोसहस्रदाताबहुप्रदोवा शतायुःशतवया:
श्रोत्रियायैवदेयानीतिनियमात्सतिश्रोत्रियत्वेउक्तगुणयोगात्पंक्तिपावनत्वम् १८६ पूर्वेद्युरिति श्राद्धकर्मणिप्राप्ते श्राद्धाहात्पूर्वदिनेत

त्रिणाचिकेतःपंचाग्निस्त्रिसुपर्णःषडंगवित् ब्रह्मदेयात्मसंतानोज्येष्ठसामगएवच १८५ वेदार्थवि
त्प्रवक्ताचब्रह्मचारीसहस्रदः शतायुश्चैवविज्ञेयाब्राह्मणाःपंक्तिपावनाः १८६ पूर्वेद्युरपरेद्युर्वाश्राद्ध
कर्मण्युपस्थिते निमंत्रयेतत्र्यवरान्सम्यग्विप्रान्यथोदितान् १८७ निमंत्रितोद्विजःपित्र्येनियतात्माभ
वेत्सदा नचछंदांस्यधीयीतयस्यश्राद्धंचतद्भवेत् १८८ निमंत्रितान्हिपितरउपतिष्ठंतितान्द्विजान्
वायुवच्चानुगच्छंतितथासीनानुपासते १८९

दसंभवेश्राद्धदिनएवोक्तलक्षणान्ब्राह्मणान्सम्यगितिसत्कृत्यनिमंत्र-
येत् त्रयोवरान्न्यूनायेषांतेत्र्यवराःनतुतानेवएकैकभोजनस्याप्युक्तत्वात् १८७ निमंत्रितइति श्राद्धेनिमंत्रितोब्राह्मणोनिमंत्रणादा
रभ्यश्राद्धाहोरात्रंयावत्मैथुननिवृत्तिसंयमनियमवान्स्यात् अवश्यकर्त्तव्यजपादिवर्ज्जंवेदाध्ययनंचनकुर्यात् श्राद्धकर्त्तापितथैव-
नुगच्छतोनुगच्छंतितथोपविष्टेषुतेषुसमीपउपविशंतितस्मान्नियताभवेयुः १८९ केतितइति हव्यकव्येयथाशास्त्रंनिमंत्रितो
स्यात् १८८ निमंत्रितानिति पूर्वनियमविधेरयमनुवादः यस्मात्तान्ब्राह्मणान्निमंत्रितानदृश्यरूपेणपितरोधितिष्ठंति प्राणवायुव
ब्राह्मणःस्त्रीकृत्यकेनापिप्रकारेणभोजनमकुर्वाणः तेनपापेनजन्मांतरेसूकरोभवति १९० नियतात्माभवेत्सदेत्यनेनमैथुननिषेधे

कृतेवृषलीगमनस्याधिकदोषज्ञापनायाहआमंत्रितस्त्विति वृषलीशूद्रातत्रमूढत्वात्श्राद्धेनिमंत्रितःसन्योवृषल्यासार्द्धंस्त्रीपुंसध
र्मेणक्रीडतिद्विजोरमतेसदातुर्यत्पापंतत्प्राप्नोतिपापोत्पत्तिमात्रंविवक्षितम् अन्यथादातरिअपापेपापंनजायते नचेद्दातुःप्रायश्चित्त
तयाविहितंयेनासौपापान्मुच्यते मेधातिथिगोविंदराजौतुसामान्येनब्रह्मचर्यस्यविधानात् वृषस्यंतीचपलयतिभर्त्तारमितियोगा
श्रयणेनश्राद्धभोक्तुरूढाब्राह्मण्यपिवृषल्यभिमतात्रेत्याहतुः १९१ अक्रोधनाइति क्रोधरहिताबहिःशौचंमृद्वारिभ्यामंतः
गद्वेषादित्यागस्तद्युक्ताःसर्वदास्त्रीसंयोगादिशून्याःत्यक्तयुद्धाःदयाद्यष्टगुणयोगोमहाभागतातद्वंतः अनादिदेवतारूपाःपितरस्त
स्मात्क्रोधादिरहितेनभोक्त्राकर्त्राचभवितव्यम् १९२ यस्मादिति एषांसर्वेषांपितॄणांयस्मादुत्पत्तिर्येचपितरोयैर्ब्राह्मणादिभिर्यै
र्नियमैःशास्त्रोक्तकर्मभिरुपचरणीयाभवेयुःतान्साकल्येनशृणुत १९३ मनोरिति हिरण्यगर्भापत्यस्यमनोर्येमरीच्यादयःपुत्राः

केतितस्तुयथान्यायंहव्यकव्येद्विजोत्तमः कथंचिदप्यतिक्रामन्पापःसूकरतांव्रजेत् १९० आमंत्रि
तस्तुयःश्राद्धेवृषल्यासहमोदते दातुर्यद्दुष्कृतंकिंचित्तत्सर्वंप्रतिपद्यते १९१ अक्रोधनाःशौचपराः
सततंब्रह्मचारिणः न्यस्तशस्त्रामहाभागाःपितरःपूर्वदेवताः १९२ यस्मादुत्पत्तिरेतेषांसर्वेषामप्यशेष-
तः येचयैरुपचर्याःस्युर्नियमैस्तान्निबोधत १९३ मनोर्हैरण्यगर्भस्ययेमरीच्यादयःसुताः तेषामृषी
णांसर्वेषांपुत्राःपितृगणाःस्मृताः १९४ विराट्सुताःसोमसदःसाध्यानांपितरःस्मृता अग्निष्वात्ताश्च
देवानांमारीच्यालोकविश्रुताः १९५ दैत्यदानवयक्षाणांगंधर्वोरगरक्षसाम् सुपर्ण [illegible]
र्हिषदोत्रिजाः १९६ सोमपानामविप्राणांक्षत्रियाणांहविर्भुजः वैश्यानामाज्यपानामशूद्राणांतुसुकः
नः १९७

पूर्वसुक्ताःमरीचिरत्र्यंगिरसावित्यादिनातेषामृषीणांसर्वेषांसोमपादयःपितृगणाःपुत्रामन्वादिभिःस्मृताः १९४ विराडिति
विराट्सुताःसोमसदोनामसाध्यानांपितरः अग्निष्वात्तामरीचेःपुत्रालोकविख्यातादेवानांपितरः १९५ दैत्येति दैत्यादीनांप्रथमाध्यायो
दितभेदानां अत्रिपुत्राबर्हिषदोनामपितरःस्मृताः १९६ सोमेति ब्राह्मणप्रभृतीनांचतुर्णांवर्णानांसोमपाप्रभृतयश्चत्वारःपितरःस्मृताः
१९७

सोमेति कवेर्भृगोः सोमपाः पुत्राः हविर्भुजएवहविष्मंत अंगिरसःपुत्रा आज्यपाःपुलस्त्यसुताःसुकालिनोवसिष्ठसुताः १९८ अग्नीति
अग्निदग्धानग्निदग्धकाव्यबर्हिषदग्निष्वात्तसौम्याख्यान्पितॄन्विप्राणामेवजानीयात् १९९ यइति यएतेप्रधानभूताःपितृगणाउ-
क्तास्तेषामपीहजगतिपितरएवपुत्रपौत्राअनंताविज्ञेयाःपुत्रपौत्रमितिगवाश्वप्रभृतीनिचेत्येकवद्भाव एतच्छ्लोकसूचिताएववरोवरेण्य
इत्यादयोऽन्येपिपितृगणामार्कंडेयादिपुराणादिषुश्रूयंते २०० ऋषिभ्यइति ऋषिभ्योमरीच्यादिभ्यउक्तक्रमेणपितरोजाताःपितृभ्योदे
वमानवाजाताःदेवेभ्यश्चजंगमस्थावरंजगत्क्रमेणजातंतस्मात्सोमपादिप्रभवत्वात्स्वपितृपितामहप्रपितामहानामेषांश्राद्धेपूजनीयत्वःसो
मपादयोपिपूजिताः संतःश्राद्धफलदानायकल्पंतइतिप्रकृतस्यापित्रादिश्राद्धस्तुत्यर्थोयंसोमपादिपितृगणोपन्यासः अथवाआवाहनका

सोमपास्तुकवेःपुत्राहविष्मंतोंगिरःसुताः पुलस्त्यस्याज्यपाःपुत्रावसिष्ठस्यसुकालिनः १९८ अग्नि
दग्धानग्निदग्धान्काव्यान्बर्हिषदस्तथा अग्निष्वात्तांश्चसौम्यांश्चविप्राणामेवनिर्दिशेत् १९९ यएते
तुगणामुख्याःपितॄणांपरिकीर्तिताः तेषामपीहविज्ञेयंपुत्रपौत्रमनंतकम् २०० ऋषिभ्यःपितरोजाताः
पितृभ्योदेवमानवाः देवेभ्यस्तुजगत्सर्वंचरंस्थाण्वनुपूर्वशः २०१ राजतैर्भाजनैरेषामथोवाराजतान्वि
तैः वार्यपिश्रद्धयादत्तमक्षयायोपकल्पते २०२ देवकार्याद्द्विजातीनांपितृकार्यंविशिष्यते दैवंहिपितृ-
कार्यस्यपूर्वमाप्यायनंस्मृतम् २०३ तेषामारक्षभूतंतुपूर्वंदैवंनियोजयेत् रक्षांसिहिविलुंपंतिश्राद्ध
मारक्षवर्जितम् २०४

लेनिजपित्रादयोब्राह्मणादिभिःसोमपादिरूपेणध्येयाएवंव्यवस्थाज्ञानमनुष्ठानपरतावस्यात्
२०१ राजतैरिति एषांपितॄणांरूप्यमयपात्रैरूप्ययुक्तैर्वाताम्रादिपात्रैर्जलमपिश्रद्धयादत्तमक्षयसुखहेतुःसंपद्यतेकिंपुनःप्र
शस्तपायसादीति २०२ देवेति देवानुद्दिश्ययत्क्रियतेतद्दैवकार्यंम् ततःपितृकार्यंद्विजातीनांविशेषेणकर्त्तव्यमुपदिश्यते अनेनपितृ-
श्राद्धस्यप्राधान्यंदैवंतत्रांगमित्याह एतदेवस्पष्टयति यतोदैवंकर्मपितृकृत्यस्यपूर्वंसदाप्यायनंपरिपूरकंस्मृतम् २०३ तेषामिति आ
रक्षोरक्षातेषांपितॄणांरक्षाभूतंदैवंविश्वेदेवब्राह्मणंपूर्वंनिमंत्रयेत् यस्मात् रक्षावर्जितंश्राद्धंराक्षसाआच्छिंदंति २०४ ५ ५

दैवेति यत एवमतः तच्छ्राद्धं दैवाद्यंतं दैवकर्मणि आद्यंतावारंभावसाने यस्य तत्तथा एतेनेदमुक्तं निमंत्रणादि सर्वं दैवपूर्वं विसर्ज्जनं तु दे
वांतं शेषे अत एव देवलः यत्तत्र क्रियते कर्म पैतृके ब्राह्मणान्प्रति तत्सर्वं तत्र कर्त्तव्यं वैश्वदैविकपूर्वकम् न तु तच्छ्राद्धं पित्र्युपक्रमावसानम्
पित्राद्यंतं तदनुतिष्ठन्स संतानः शीघ्रं विनश्यति २०५ शुचिमिति अस्थ्यंगाराद्यनुपहतं देशं निर्जनं च गोमयेनोपलेपयेत् दक्षिणादिगव
नतं च प्रयत्नतः संपादयेत् २०६ अवेति चोक्षाः स्वभावशुचयो ऽरण्यादिप्रदेशास्तेषु नद्यादितीरेषु तथा निर्जनप्रदेशेषु दत्तेन श्राद्धादिना
सर्वदा पितरस्तुष्यंति २०७ आसनेति तत्र च देशे आसनेषु पृथक्पृथग्विन्यस्तेषु सकुशेषु प्रागामंत्रितब्राह्मणान्सम्यक्कृतस्नानाचम
नानुपवेशयेत् अत्र दैवब्राह्मणासने कुशद्वयं पित्रासनेषु च प्रत्येकं दक्षिणाग्र एकः कुशो देयः तदाह देवलः ये चात्र विश्वेदेवानां विप्राः पू

दैवाद्यंतं तदीहेत पित्राद्यंतं न तद्भवेत् पित्राद्यंतं त्वीहमानः क्षिप्रं नश्यति सान्वयः २०५ शुचिं देशं वि
विक्तं च गोमयेनोपलेपयेत् दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् २०६ अवकाशेषु चोक्षेषु नदीती
रेषु चैव हि विविक्तेषु च तुष्यंति दत्तेन पितरः सदा २०७ आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक्पृथक् उ
पस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेशयेत् २०८ उपवेश्य तु तान्विप्रानासनेष्वजुगुप्सितान् गंधमाल्यैः
सुरभिभिरर्चयेद्दैवपूर्वकम् २०९ तेषामुदकमानीय सपवित्रांस्तिलानपि अग्नौ कुर्यादनुज्ञातो ब्रा
ह्मणो ब्राह्मणैः सह २१० अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः हविर्दानेन विधिवत्पश्चात्संत
र्पयेत्पितॄन् २११

र्वं निमंत्रिताः प्राङ्मुखान्यासनान्येषां द्विदर्भोपहितान्यथ दक्षिणामुखयुक्तानि पितॄणामासना
नि दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः दक्षिणामुखयुक्तानि दक्षिणाग्राणि अग्रं कांडमूलापेक्षया २०८ उपेति तान्विप्रानामंत्रि
तानासनेषूपवेश्य कुंकुमादिगंधमाल्यधूपादिभिः स्पृहणीयगंधैर्दैवपूर्वकमर्चयेत् २०९ तेषामिति तेषां ब्राह्मणानामर्घोदकपवित्रति
लान्संमिश्रान्कृत्वा तैर्ब्राह्मणैः सहानुज्ञातो ऽग्नौ वक्ष्यमाणं होमं कुर्यात् अनुज्ञासामर्थ्याच्च प्रार्थनापि पूर्वं कर्त्तव्या सा च स्वगृह्यानुसारे
ण करवाणि करिष्य इत्यादिका अनुज्ञापि ओमित्येवंरूपा कुरुष्वेति वा २१० अग्नेरिति अग्नेः सोमयमयोश्च विधिवत्पर्युक्षणादिपूर्वं हवि

दीनेनप्रीणनमादौकृत्वापश्चादन्नादिनापितॄंस्तर्पयेत् सोमयमयोः द्वंद्वनिर्देशेपिपृथगेवदेवतात्वंसहादिशब्दप्रयोगाभावात् यत्र-
साहित्यंविवक्षितंतत्रसहादिशब्दंकरोतीत्युक्तंप्राक् २११ अग्न्यभावेत्विति अग्न्यभावेपुनर्ब्राह्मणहस्तएवउक्ताहुतित्रयंदद्यात् य
स्माद्यएवाग्निःसएवब्राह्मणइतिवेदविद्भिर्ब्राह्मणैरुक्तः अग्न्यभावश्चानुपनीतस्यसंभवतिउपनीतस्यसमावृत्तस्यचपाणिग्रह-
णात्पूर्वंमृतभार्यस्यवा २१२ अक्रोधेति क्रोधशून्यान्सुप्रसादान्प्रसन्नमुखान्प्रवाहानादितयापुरातनान् अग्नौप्राप्ताहुतिरितिन्या
येनलोकस्यवृद्धयेउद्युक्तान्श्राद्धपात्रभूतान्मन्वादयोवदंतितस्माद्देवतुल्यत्वाच्छ्राद्धब्राह्मणस्यतद्धस्तेदातव्यमितिपूर्वविध्यनुवादः २१३
अपेति अग्नौपर्युक्षणाद्यंगयुक्तंअग्नौकरणहोमानुष्ठानक्रममपसव्यंदक्षिणसंस्थंकृत्वाततोपसव्येनदक्षिणहस्तेनपिंडाधारभूतायां
भुव्युदकंक्षिपेत् २१४ त्रीनिति तस्माद्ग्न्यादिहोमादुद्धृतादन्नादुद्धृतावशिष्टान्त्रीन्पिंडान्कृत्वा औदकेनैवविधिनादक्षिणहस्तेन

अग्न्यभावेतुविप्रस्यपाणावेवोपपादयेत् योह्यग्निःसद्विजोविप्रैर्मंत्रदर्शिभिरुच्यते २१२ अक्रोध
नान्सुप्रसादान्वदंत्येतान्पुरातनान् लोकस्याप्यायनेयुक्तान्श्राद्धदेवान्द्विजोत्तमान् २१३ अपसव्य
मग्नौकृत्वासर्वमावृत्यविक्रमम् अपसव्येनहस्तेननिर्वपेदुदकंभुवि २१४ त्रींस्तुतस्माद्धविःशेषा
त्पिंडान्कृत्वासमाहितः औदकेनैवविधिनानिर्वपेद्दक्षिणामुखः २१५ न्युप्यपिंडांस्ततस्तांस्तुप्रयतो
विधिपूर्वकम् तेषुदर्भेषुतंहस्तंनिमृज्याल्लेपभागिनाम् २१६ आचम्योदक्परावृत्यत्रिरायम्यशनै
रसून् षड्ऋतूंश्चनमस्कुर्यात्पितॄनेवचमंत्रवित् २१७

समाहितोऽनन्यमनादक्षिणामुखस्तेषुदर्भेषुविनिवस्यमा
णतादर्भेषुदद्यात् २१५ न्युप्येति विधिपूर्वकंस्वगृह्योक्तविधिनादर्भेषुतान्पिंडान्दत्वादर्भमूलेषुकरावघर्षणमितिविष्णुवचना
त्तेषुदर्भेषुमूलदेशेहस्तंनिर्लेपंकुर्यात्प्रपितामहपित्रादीनांत्रयाणांलेपभुजान्तृप्तये २१६ आचम्येति अनंतरमुपस्पृश्योद-
ङ्मुखोभूत्वायथाशक्तिप्राणायामत्रयंकृत्वावसंतायनमस्तुभ्यमित्यादिनाषड्ऋतून्नमस्कुर्यात्पितॄंश्चनमोवःपितरइत्यादिमंत्रयुक्त
मद्भिःपर्यास्त्येतिगृह्यदर्शनात्दक्षिणामुखो नमस्कुर्यात् २१७ उदकमिति पिंडदानात्पूर्वंपिंडाधारदेशदत्तोदकशेषमुदकपात्र-

म॰स॰
५३

स्थंप्रतिपिंडसमीपेक्रमेणपुनरुत्सृजेत् तांश्चपिंडान्यथान्युप्तान् येनैवक्रमेणदत्तातेनैवक्रमेणावजिघ्रेत्समाहितोनन्यमनाः २१८
पिंडेभ्यइति अल्पिकेतिअन्नाल्पमात्राअवयवभागाः पिंडेषुउत्पन्नानल्पभागान्पिंडक्रमेणैवगृहीत्वातेनैवपित्रादिब्राह्मणान्भोज
नकालेभोजनात्पूर्वंभोजयेत् विधिवत्पिंडानुष्ठानवत्पितरमुद्दिश्ययःपिंडोदत्तस्तदवयवंपितृब्राह्मणंभोजयेत् एवंपितामहप्रपिता
महपिंडयोरपि २१९ ध्रियमाणेत्विति ध्रियमाणेजीवतिपितरिमृतानांपितामहादित्रयाणांश्राद्धंकर्त्तव्यम् अथवापितृविप्रस्थानेत
मेवस्वपितरंभोजयेत् पितामहप्रपितामहयोश्चब्राह्मणौभोजयेत्पिंडद्वयंचदद्यात् २२० पितेति नामकीर्त्तनमंत्रश्राद्धोपलक्षणार्थ
पितृजीवनापेक्षोयंवाशब्दः यस्यपुनःपितामृतःस्यात्पितामहेजीवतिसपितृप्रपितामहयोःश्राद्धंकुर्यात् गोविंदराजस्तुयस्यपितृप्र-

उदकंनिनयेच्छेषंशनैःपिंडांतिकेपुनः अवजिघ्रेच्चतान्पिंडान्यथान्युप्तान्समाहितः २१८ पिंडेभ्य
स्त्वल्पिकांमात्रांसमादायानुपूर्वशः तानेवविप्रानासीनान्विधिवत्पूर्वमाशयेत् २१९ ध्रियमाणेतुपित
रिपूर्वेषामेवनिर्वपेत् विप्रवद्वापितंश्राद्धेस्वकंपितरमाशयेत् २२० पितायस्यनिवृत्तःस्याज्जीवेच्चापि
पितामहः पितुःसनामसंकीर्त्यकीर्त्तयेत्प्रपितामहम् २२१ पितामहोवातच्छ्राद्धंभुंजीतेत्यब्रवीन्मनुः
कामंवासमनुज्ञातःस्वयमेवसमाचरेत् २२२ तेषांदत्वातुहस्तेषुसपवित्रंतिलोदकम् तत्पिंडाग्रंप्रयच्छे
तस्वधैषामस्त्वितिब्रुवन् २२३ पाणिभ्यांतूपसंगृह्यस्वयमन्नस्यवर्द्धितम् विप्रांतिकेपितॄन्ध्यायन्शन
केरुपनिक्षिपेत् २२४

पितामहौप्रेतौस्यातांसपित्रेपिंडन्निधायपितामहात्परंद्वाभ्यांदद्यात् इतिविष्णुवचनात्प्रपितामहत
त्पितृभ्यांदद्यादितिव्याख्यातवान् २२१ पितामहेति यथाजीवत्पिताभोज्यस्तथापितामहोपिपितामहब्राह्मणस्थानेभोज्यःपितृप्रपि
तामहयोश्चब्राह्मणभोजनंपिंडदानंचकुर्यात् यथावाजीवतापितामहेनत्वमेवयथारुचिकुर्वितिदत्तानुज्ञःस्वरुच्यापितामहंवाभोजये
त् पितृप्रपितामहयोर्वाश्राद्धद्वयंकुर्यादितिविष्णुवचनात्पितृप्रपितामहतत्पितामहानांश्राद्धत्रयंकुर्यात् २२२ तेषामिति पिंडेभ्यस्त्वल्पि
कामात्रामितियदुक्तंतस्यायंकालविधिःप्रदेयविधिश्चतेषांब्राह्मणानांहस्तेषुसदर्भतिलोदकंदत्वातदितिपूर्वनिर्दिष्टंपिंडाग्रंपित्रेस्वधास्त्वि
त्येवमादिब्रुवन्पित्रादिब्राह्मणेभ्यस्त्रिभ्य क्रमेणदद्यात् २२३ पाणिभ्यामिति अन्नस्येतितृतीयार्थेषष्ठी वर्द्धितंपूर्णंपिठरादिपात्रं

अ॰
३

५३

सयंपाणिभ्यांगृहीत्वापितॄंश्वचिंतयन्नसवत्यागारादानीयब्राह्मणानांसमीपेपरिवेषणार्थमत्वरयास्थापयेत् २२४ उभयोरिति अधिकरणसप्तमीयम् उभयोः करयोर्मुक्तमस्थितंयदन्नंब्राह्मणांतिकमानीयतेतदसुरादुष्टबुद्धय आछिंदंति तस्मान्नैकहस्तेना नीयपरिवेष्टव्यम् २२५ गुणानिति गुणान्व्यंजनानि अन्नापेक्षया प्राधान्यात्गुणसंयुक्तान्वासूपशाकाद्यान्प्रयतः शनैः समाहि तः अनन्यमना. सम्यक्पथानविशीर्येततथाभूमावेवसपात्रस्थानेस्थापयेन्नदारुफलकादौ २२६ भक्ष्यमिति भक्ष्यंखरविशदम- भ्यवहरणीयंमोदकादि भोज्यंपायसादि नानाप्रकारफलमूलानिहृदयस्यप्रियाणिमांसानिपानानिसुगंधीनि भूमावेवविन्यसेदिति पूर्वेणसंबंध. २२७ उपेति एतत्सर्वमन्नादिकंब्राह्मणसमीपमानीयप्रयतः शनैः अनन्यमनाः क्रमेणपरिवेषयेत् इदंमधुरमिदमम्ल

उभयोर्हस्तयोर्मुक्तंयदन्नमुपनीयते तद्विप्रलुंपंत्यसुराःसहसादुष्टचेतसः २२५ गुणांश्चसूपशा काद्यान्पयोदधिघृतमधु विन्यसेत्प्रयतः पूर्वंभूमावेवसमाहितः २२६ भक्ष्यंभोज्यंचविविधंमूला निचफलानिच हृद्यानिचैवमांसानिपानानिसुरभीणिच २२७ उपनीयतुतत्सर्वंशनकैःसुसमाहितः परिवेषयेतप्रयतोगुणान्सर्वान्प्रचोदयन् २२८ नास्रमापातयेज्जातुनकुप्येन्नानृतंवदेत् नपादेनस्पृ शेदन्नंनचैतदवधूनयेत् २२९ अस्रंगमयतिप्रेतान्कोपोरीनन्नृतंशुनः पादस्पर्शस्तुरक्षांसिदुष्कृती नवधूननम् २३० यद्यद्रोचेतविप्रेभ्यस्तत्तद्दद्यादमत्सरः ब्रह्मोद्याश्चकथाःकुर्यात्पितॄणामेतदी- प्सितम् २३१

मित्येवंप्राधुर्यादिगुणान्कथयन् २२८ नास्रमिति रोदनक्रोधमृषाभाषणानिनकुर्यात् पादेनचान्नंन- स्पृशेत् नचोत्क्षिप्योत्क्षिप्यान्नंपात्रेक्षिपेत् सुरूपार्थतयामातिपित्र्योरपिक्रोधानृतयोः श्राद्धांगत्वज्ञापनार्थोयन्निषेधः २२९ अस्रमिति अश्रुक्रियमाणमेतान्भूतवेपान्श्राद्धान्नानिप्रापयतिनपितॄणामुपकारकंभवति क्रोधः शत्रून्मृषावादः कुक्कुरान्पाद स्पर्शोन्नस्यराक्षसान् अवधूननंपापकारिणः तस्मान्नरोदनादिकुर्यात् २३० यदिति यद्यद्विप्राणामीप्सितंअन्नव्यंजनादितत्त दमत्सरोदद्यात् परमात्मनिरूपणपराः कथाश्चकुर्यात् यतःपितॄणामेतदपेक्षितम् २३१ ७ ७ ७

स्वाध्यायमिति स्वाध्यायंवेदंमानवादीनिधर्मशास्त्राणिआख्यानानिसौपर्णमैत्रावरुणादीनिइतिहासान्महाभारतादीन्पुराणा
निब्रह्मपुराणादीनिखिलानिश्रीसूक्तशिवसंकल्पादीनिश्राद्धेब्राह्मणान्श्रावयेत् २३२ हर्षयेदिति स्वयंहृष्टोभूत्वाप्रियवचना-
दिभिर्ब्राह्मणान्परितोषयेत् अन्नंचसंश्रयाभोजयेत्मिष्टान्नेनपायसादिभिःपायसमिदंस्वादु
दिगुणाभिधानैःपुनर्ब्राह्मणान्प्रेरयेत् २३३ व्रतेति ब्रह्मचारिणमपिदौहित्रंश्राद्धेप्रयत्नतोभोजयेत् अपिशब्दादब्रह्मच
रिणमपिआनुकल्पिकमध्यपठितस्यापिब्रह्मचारिणोयत्नवचनाच्छ्रेष्ठत्वंकथयति नेपालकंबलंचासनेदद्यात्दौहित्रमंतरे
णापि तिलांश्चश्राद्धभूमौविकिरेत् २३४ त्रीणीति पूर्वोक्तान्येवत्रीणिदौहित्रादीनिश्राद्धेपवित्राणीतिज्ञाप्यंते त्रीणि

स्वाध्यायंश्रावयेत्पित्र्येधर्मशास्त्राणिचैवहि आख्यानानीतिहासांश्चपुराणानिखिलानिच २३२
हर्षयेद्ब्राह्मणांस्तुष्टोभोजयेच्चशनैःशनैः अन्नाद्येनासकृच्चैतान्गुणैश्चपरिचोदयेत् २३३ व्रतस्थ
मपिदौहित्रंश्राद्धेयत्नेनभोजयेत् कुतपंचासनेदद्यात्तिलैश्चविकिरेन्महीम् २३४ त्रीणिश्राद्धेपवित्रा
णिदौहित्रःकुतपस्तिलाः त्रीणिचात्रप्रशंसंतिशौचमक्रोधमत्वराम् २३५ अत्युष्णंसर्वमन्नंस्याद्भु
ञ्जीरंस्तेचवाग्यताः नचद्विजातयोब्रूयुर्दात्रापृष्टाहविर्गुणान् २३६ यावदुष्णंभवत्यन्नंयावदश्नंति
वाग्यताः पितरस्तावदश्नंतियावन्नोक्ताहविर्गुणाः २३७ यद्वेष्टितशिराभुंक्तेयद्भुंक्तेदक्षिणामुखः
सोपानत्कश्चयद्भुंक्तेतद्वैरक्षांसिभुंजते २३८

दीनिप्रशंसंति २३५ अत्युष्णमिति उष्णमेवात्युष्णंयस्योष्णस्यान्न
भोजनमुचितंतदुष्णंदद्यान्नतुफलाद्यपि अतएवशंखः उष्णमन्नंद्विजातिभ्यःश्रद्धयाविनिवेदयेत् अन्यत्रफलमूलेभ्यःपा कै
भ्यश्चपंडितः संयतवाचश्चब्राह्मणाअश्नीयुः किमिदंस्वादुस्वादुवेतिदात्राअन्नादिगुणान्पृष्टावक्त्राद्यभिनयेनापिनब्रूयुःवा
क्यतंस्यात्रैवविधानात् २३६ यावदिति यावदन्नेउष्णताभवतियावच्चमौनिनोभुंजतेयावच्चहविर्गुणानोच्यंतेतावत्पितरोऽ
श्नंतीतिपूर्वोक्तस्यैवार्थस्यप्रशंसा २३७ यदिति वस्त्रादिवेष्टितशिरायदन्नंभुंक्तेतथादक्षिणामुखःसपादुकश्चतत्तद्रक्षांसिभुं

तेनपितरस्तस्मादेवंरूपंनकर्त्तव्यम् २३८ चांडालइति चांडालग्राम्यसूकरकुक्कुटकुक्कुरोदक्यानपुंसकायथाब्राह्मणान्भोजन
कालेनपश्येयुस्तथाकार्यम् २३९ होमइति यस्मात्होमेऽग्निहोत्रादौप्रदानेगोहिरण्यादौभोज्येस्वाभ्युदयार्थब्राह्मणभोजनेदै
वेहविपिदर्शपौर्णमासादौपित्र्येश्राद्धादौयदेभिर्वीक्ष्यतेक्रियमाणंकर्मतन्नयदर्थंक्रियतेतन्नसाधयति २४० घ्राणेनेति सूकरस्त
दन्नादेर्गंधंघ्रात्वाकर्मनिःफलंकरोति तस्मादन्नघ्राणयोग्यदेशात्निरसनीयः कुक्कुटःपक्षवातेनसोपिपक्षपवनयोग्यदेशादप
गमनीयः श्वादर्शनेन शुनोन्नादिदर्शनंनिषिद्धमतिदोषभूयस्त्वज्ञापनार्थंपुनरभिहितम् अथवादृष्टिनिपातेनेतिश्राद्धकर्त्तृ
भोक्तृणांदृष्टिनिपातविषयत्वेन अवरवर्णःशूद्रस्तस्माज्जातोऽवरवर्णजःशूद्रएव असावन्नादिस्पर्शेनद्विजातिश्राद्धंनिष्फलय
ति २४१ खंजोवेति यदिगतिविकलःकाणोवादातुर्दासस्यैवप्रेष्यत्वविधानात् अपिशब्दादन्योपिशूद्रोन्यूनाधिकांगुल्यादि

चांडालश्चवराहश्चकुक्कुटःश्वातथैवच रजस्वलाचषंढश्चनेक्षेरन्नश्नतोद्विजान् २३९ होमेप्रदा
नेभोज्येचयदेभिरभिवीक्ष्यते दैवेकर्मणिपित्र्येवातद्गच्छत्ययथातथम् २४० घ्राणेनसूकरोहंति
पक्षवातेनकुक्कुटः श्वातुदृष्टिनिपातेनस्पर्शेनावरवर्णजः २४१ खंजोवायदिवाकाणोदातुःप्रेष्यो
पिवाभवेत् हीनातिरिक्तगात्रोवातमप्यपनयेत्पुनः २४२ ब्राह्मणंभिक्षुकंवापिभोजनार्थमु
पस्थितम् ब्राह्मणैरभ्यनुज्ञातःशक्तितःप्रतिपूजयेत् २४३ सार्ववर्णिकमन्नाद्यंसन्नीयाप्लाव्य
वारिणा समुत्सृजेद्भुक्तवतामग्रतोविकिरन्भुवि २४४ असंस्कृतप्रमीतानांत्यागिनांकुलयोषि
ताम् उच्छिष्टंभागधेयंस्याद्दर्भेषुविकिरश्चयः २४५

र्वास्यात्तदातमपिततःश्राद्धदेशादपसारयेत् २४२ ब्राह्मे
ति ब्राह्मणमतिथिरूपंअन्यंवाभिक्षणशीलंभोजनार्थंतत्कालोपस्थितंश्राद्धपात्रब्राह्मणैरनुज्ञातोयथाशक्त्यन्नभोजनेनभि
क्षादानेनवार्हयेत् २४३ सार्वेति वर्णशब्दःप्रकारवाची सर्वप्रकारकमन्नादिकंव्यंजनादिभिरेकीकृत्यउदकेनाप्लावयित्वाकृ
तभोजनानांब्राह्मणानांपुरतोभूमौदर्भेषुविकिरश्चयइतिवक्ष्यमाणत्वाद्दर्भोपरिनिक्षिपेत्त्यजेत् २४४ असंस्कृतेति नास्यका
र्योग्निसंस्कारइतिनिषेधात्संस्कारानर्हबालानांतथाकुलस्त्रीणांअदुष्टदोषाणांयेत्यक्तारस्तेषांपात्रस्थमुच्छिष्टंदर्भेषुचयो

विकिरः सभागः स्यात् अन्येतुत्यागिनामितिगुर्वादित्यागिनांकुलयोषितामितिस्वातंत्र्येणतु कुलयोषितामनूढकन्यानामिति
व्याचक्षते गोविंदराजस्तुत्यागिनांकुलयोषितामितिसामान्योपक्रमादिदंविशेषाभिधानंसंस्कृतंभक्षाइतिवक्ततः
गतानांकुलस्त्रीणामित्याह २४५ उच्छेषणमिति उच्छिष्टंयद्भूमिगतंतद्दाससमूहस्यावक्रस्यानलसस्याकुटिलस्यचपित्र्येश्रा
द्धकर्मणिभागधेयंमन्वादयोवदंति २४६ आसपिंडेति मर्यादायामाङ्नाभिविधौसपिंडीकरणश्राद्धपर्यंतमचिरमृतस्यद्विजाते
श्चवैश्वदेवब्राह्मणभोजनरहितंश्राद्धार्थमन्नंब्राह्मणंभोजयेत्एकंचपिंडंदद्यात् अस्यचश्राद्धानुष्ठानम् एकोद्दिष्टंदेवहीन
मेकार्घैकपवित्रकम् आवाहनाग्नौकरणरहितंह्यपसव्यवदितियाज्ञवल्क्यादिस्मृतिष्ववगंतव्यम् २४७ सहेति अस्येतिय
स्येदमेकोद्दिष्टंविहितंतस्यधर्मतःस्वगृह्यादिविधिनासपिंडीकरणश्राद्धे कृतेअनयैवावृताउक्तामावास्याश्राद्धेतिकर्त्तव्यतयापिं

उच्छेषणंभूमिगतमजिह्मस्याशठस्य च दासवर्गस्यतत्पित्र्येभागधेयंप्रचक्षते २४६ आसपिंड
क्रियाकर्मद्विजातेःसंस्थितस्यतु अदैवंभोजयेच्छ्राद्धंपिंडमेकंतुनिर्वपेत् २४७ सहपिंडक्रियायां
तुकृतायामस्यधर्मतः अनयैवावृताकार्यंपिंडनिर्वपनंसुतैः २४८ श्राद्धंभुक्त्वायउच्छिष्टंवृषला
यप्रयच्छति समूढोनरकंयातिकालसूत्रमवाक्शिराः २४९ श्राद्धभुग्वृषलीतल्पंतदहर्योधिग-
च्छति तस्याःपुरीषेतन्मासंपितरस्तस्यशेरते २५०

डनिर्वपनंपार्वणविधिनाश्राद्धंपुत्रैःसर्वत्रमृताहादौकर्त्त-
व्यम् नन्वनयैवावृताइत्यनेनप्रकृतमेकोद्दिष्टमेवहिकिमितिनपरामृष्यते उच्यते तर्हिसपिंडीकरणात्पूर्वमेकोद्दिष्टंसपिंडीक
रणेकृतेपुनः अनयैवावृताइतिभेदनिर्देशोनस्यात् ततोऽमावास्येतिकर्त्तव्यतैवप्रतीयते २४८ श्राद्धमिति आश्रितशूद्रायउच्छिष्ट
दानप्रसक्तावयंनिषेधःश्राद्धभोजनोच्छिष्टंयःशूद्रायददातिसमूढःकालसूत्रंनामनरकमधोमुखंगच्छति २४९ श्राद्धेति वृषलीश
ब्दोत्रस्त्रीपरइत्याहुः निरुक्तंचकुर्वंति वृषस्यंतीचपलयतिभर्त्तारमितिवृषलीब्राह्मणस्यपरिणीताब्राह्मण्यपिवृषलीति श्राद्धंभु
क्त्वातदहोरात्रेयःस्त्रीसंप्रयोगंकरोतितस्यपितरस्तस्याःपुरीषेमासंशेरतइतिनिवृत्त्यर्थानिंदा २५०

पृष्ट्वेति तृप्तान्ब्राह्मणान् तुंष्ट्वास्वदितमिति पृष्ट्वा तेषामाचमनं कारयेत् कृताचमनांश्च भो इति संबोध्य अभिरम्यतामिति ब्रूया
त् अभित इति पाठे अभित उभयत इह वास्व गृहे वास्यतामित्यर्थः २५१ स्वधेति अनुज्ञानानंतरं ब्राह्मणाः श्राद्धकर्त्तारं स्वधास्त्विइ
ति ब्रूयुः यस्मात्सर्वेषु श्राद्धतर्पणादिपितृकर्मसु स्वधाशब्दोच्चारणं प्रकृष्टा आशीः २५२ तत इति स्वधाशब्दोच्चारणानंतरं कृतभो
जनानां ब्राह्मणानां शेषमन्नं प्रख्यस्तौ स्वशिष्टमन्नं निवेदयेत् तैर्ब्राह्मणैरिदमनेनान्नेन क्रियतामित्यनुज्ञातो यथा ते ब्रूयुः तथा
न्नशेषविनियोगं कुर्यात् २५३ इदानीं प्रसंगाच्छ्राद्धांतरेषु विशेषविधिमाह पित्र्ये इति पित्र्ये निरपेक्षपितृमातृदेवताके एकोद्दिष्ट
श्राद्धे तृप्तिप्रश्नार्थे स्वदितमिति वाच्यम् तथा च गोभिलसांख्यायनौ स्वदितमिति तृप्तिप्रश्नः मेधातिथिगोविंदराजौ तु श्राद्धकालाग

पृष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः आचांतांश्चानुजानीयादभितो रम्यतामिति २५१ स्वधास्त्वि
त्येवं ब्रूयुर्ब्राह्मणास्तदनंतरम् स्वधाकारः परा ह्याशीः सर्वेषु पितृकर्मसु २५२ ततो भुक्तवतां तेषाम
न्नशेषं निवेदयेत् यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततो द्विजैः २५३ पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सु
श्रुतम् संपन्नमित्यभ्युदये दैवे रुचितमित्यपि २५४ अपराह्णस्तथा दर्भा वास्तुसंपादनं तिलाः सृ
ष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु संपदः २५५ दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः पवित्रं यच्च
पूर्वोक्तं विज्ञेया हव्यसंपदः २५६

तेनान्येनापि स्वदितमित्येव कर्त्तव्यमिति व्याचक्षते तु श्राद्धे स्वदितमित्येतद्वाच्यमन्येन केन
चित् नानुरुद्धमिदं विद्ध हृदैर्नश्च हृधीमहि गोष्ठे गोष्ठश्राद्धे सुश्रुतमिति वाच्यं गोष्ठ्यां शुद्ध्यर्थमष्टममिति द्वादशविधश्राद्धगणना
यां गोष्ठीश्राद्धमिति विश्वामित्रेण पठितम् अभ्युदये वृद्धिश्राद्धे संपन्नमिति वाच्यम् दैवे देवतोद्देशेन श्राद्धे रुचितमिति वचनीयम् दै
वश्राद्धं तु भविष्यपुराणोक्तम् देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्यते हविष्येणाविशिष्टेन सप्तम्यादिषु यत्नतः २५४ अपराह्ण इति
अमावास्याश्राद्धस्य प्रकृतत्वात्तद्विषयोऽयमपराह्णकालः प्रातर्वृद्धिनिमित्तकमित्यादिना वृद्धिश्राद्धादौ स्मृत्यंतरे प्रातःकालादिविधा
नात् विस्तार्य दर्भाः गोमयादिना श्राद्धदेशसंशोधनम् तिलाश्च विकिरणार्थाः सृष्टिरकार्पण्येनान्नादिविसर्गः मृष्टिरन्नादेश्च

संस्कारविशेषः पंक्तिपावनादयश्च ब्राह्मणाः एताः श्राद्धेसंपत्तयइत्यभिधानादंगांतरापेक्षंप्रकृष्टफलमेषांबोधितम् २५५
दर्भाइति पवित्रंमंत्रा. पूर्वाण्हः कालः हविष्याणिमुन्यन्नादीनिसर्वाणिचयच्चपवित्रंपावनंवास्तुसंपादनादिपूर्वमुक्तम् एता
श्चदेवार्थस्यकर्मणःसमृद्धयः हव्यशब्दोदैवकर्मोपलक्षणार्थः २५६ मुन्यन्नानीति मुनेर्वानप्रस्थस्यान्नानिनीवारादीनिपयः
क्षीरंसोमलतारसः अनुपस्कृतमविकृतंपूतिगंधादिरहितंमांसम् अक्षारलवणमकृत्रिमलवणंसैंधवादिएतत्स्वभावतो
मन्वादिभिरभिधीयते २५७ विसृज्येति तान्ब्राह्मणान्विसृज्यानन्यमनाः मौनीपवित्रोद[illegible]णांदिशंवीक्षमाणएता
णान् अभिलषितानर्थान्पितॄन्प्रार्थयेत् २५८ दातारइति अस्मत्कुलेदातारःसु
धनदर्शयागाद्यनुष्ठानैर्वृद्धिमाप्नुवंतु पुत्रपौत्रादिकंचवर्द्धताम् वेदार्थश्रद्धाचास्मत्कुलेनव्यपैतु दातव्यंचधनादिकंबहुभवतु

मुन्यन्नानिपयःसोमोमांसंयच्चानुपस्कृतम् अक्षारलवणंचैवप्रकृत्याहविरुच्यते २५७ विसृज्य
ब्राह्मणांस्तांस्तुनियतोवाग्यतःशुचिः दक्षिणांदिशमाकांक्षन्याचेतेमान्वरान्पितॄन् २५८ दाता
रोनोभिवर्द्धंतांवेदाःसंततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्विति २५९ एवंनिर्वपनंकृत्वा
पिंडांस्तांस्तदनंतरम् गांविप्रमजमग्निंवाप्राशयेदप्सुवाक्षिपेत् २६० पिंडनिर्वपनंकेचित्पुरस्तादे
वकुर्वते वयोभिःखादयंत्यन्येप्रक्षिपंत्यनलेप्सुवा २६१ पतिव्रताधर्मपत्नीपितृपूजनतत्परा मध्य
मंतुततःपिंडमद्यात्सम्यक्सुतार्थिनी २६२

२५९ एवमुक्तप्रकारेणपिंडानांप्रदानंकृत्वाप्रकृतवरयाचना
नंतरंतान्पिंडान्गांब्राह्मणंछागंवाभोजयेत् अग्नौजलेवाक्षिपेत् २६० पिंडेति पिंडप्रदानंकेचिदाचार्याः
नानंतरंकुर्वते अन्येपक्षिभिःपिंडान्खादयंति इयंचपक्षिभोजनरूपाप्रतिपत्तिरग्न्युदकप्रक्षेपयोर्वैकल्पिकीतिद्व
मुक्तयोरप्यभिधानम् २६१ पतिव्रतेति धर्मार्थकामेषुमनोवाक्कायकर्मभिःपतिरेवमयापरिचरणीयइतिव्रतंयस्याःसा
पतिव्रताधर्मपत्नीसवर्णाप्रथमोढाश्राद्धक्रियाणांश्रद्धाशालिनीपुत्रार्थिनीतेषांपिंडानांमध्यमंपितामहपिंडंभक्षयेत् सम्य
गाधत्तपितरोगर्भमित्यादिगृह्योक्तमंत्रेण २६२ आयुष्मंतमिति तेनपिंडभक्षणेनदीर्घायुषंकीर्त्तिधारणात्मकबुद्धियु

कं धनपुत्रादिसंततिधर्मानुष्ठानसत्वाख्यगुणान्वितं पुत्रं जनयति २६३ प्रक्षाल्येति तदनु हस्तौ प्रक्षाल्य ज्ञातिप्रायमन्नं कुर्यात्
ज्ञातीन्प्रैतिगच्छतीतिज्ञातिप्रायम् कर्मण्यम् ज्ञातीन्भोजयेदित्यर्थः तेभ्यः पूजापूर्वकमन्नं दत्वा मातृपक्षानपि साहृणं भोजयेत् २६४
उच्छेषणमिति तद्ब्राह्मणोच्छिष्टं तावत्कालं तिष्ठेत् यावत् ब्राह्मणानां विसर्जनं ब्राह्मणेषु तु निर्गतेषु मार्ष्टव्यमित्यर्थः ततः संपन्ने श्राद्धक
र्मणि वैश्वदेव बलिहोमकर्म नित्यश्राद्धातिथिभोजनानि कर्त्तव्यानि बलिशब्दस्य प्रदर्शनार्थत्वात् अतएव मत्स्यपुराणे निर्वृत्य प्रतिप
त्स्यर्थ पर्युक्ष्याग्निं च मंत्रवित् वैश्वदेवं प्रकुर्वीत नैत्यकं विधिमेव चेति २६५ यैश्चान्नैरिति पूर्वमुक्तमपि व्यवधानाद्बुद्धिस्थं शिष्य कृत्स्न
प्रतिपत्तये पुनर्वक्तव्यं यान्प्रतिजानीते हविरिति चिररात्राय पदमव्ययं चिरकालवाचि अतएव चिराय चिररात्राय चिरस्याद्याश्चिरा-

आनुष्यंतं सकृतं सूते यशोमेधासमन्वितम् धनवंतं प्रजावंतं सात्विकं धार्मिकं तथा २६३ प्रक्षाल्य ह
स्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ज्ञातिभ्यः सत्कृतं दत्वा बांधवानपि भोजयेत् २६४ उच्छेषणं तु तत्ति
ष्ठेद्यावद्विप्रा विसर्जिताः ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः २६५ हविर्यच्चिररात्राय यच्चानं
त्याय कल्पते पितृभ्यो विधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः २६६ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा
दत्तेन मासं तृप्यंति विधिवत्पितरो नृणाम् २६७ द्वौ मासौ मत्स्यमांसेन त्रीन्मासान्हारिणेन तु औरभ्रे
णाथ चतुरः शाकुनेनाथ पंच वै २६८ षण्मासांश्छागमांसेन पार्षतेन च सप्त वै अष्टावेणस्य मांसेन रौर
- वेण नवैव तु २६९

र्थकाइत्याभिधानिकाः यद्यत् हविः पितृभ्यो यथाविधि दत्तं चिरकालतृप्तये अनंततृप्तये च संपद्यते त
न्निःशेषेणाभिधास्यामि २६६ तिलैरिति तिलधान्ययवमाषजलमूलफलानामन्यतमेन यथाशास्त्रं श्रद्धया दत्तेन मनुष्याणां मासं
पितरस्तृप्यंति कृष्णामाषास्तिलाश्चैव श्रेष्ठाः स्युर्यवशालयइति वायुपुराणवचनान्माषैरिति कृष्णमाषा बोद्धव्याः २६७ द्वाविति पा
ठीनादिमत्स्यानां मांसेन द्वौ मासौ पितरः प्रीयंतइति पूर्वेण संबंधः त्रीन्मासान्हारिणेन मांसेन चतुरो मेषमांसेन पंच द्विजातिभक्ष्यप
क्षिमांसेन २६८ षण्मासानिति षण्मासान्छागमांसेन प्रीयंते पृषतश्चित्रमृगस्तन्मांसेन सप्त एणमांसेनाष्टौ रुरुमांसेन नव ए

णरुरूर्हरिणजातिविशेषौ २६९ दशेति दशमासानारण्यसूकरमहिषमांसैस्तृप्यंति एकादशशाशकच्छपमांसेन २७० संवत्सरमिति नर्यत्पुनर्गोपयःक्षीरेणतत्साधितोदनेनचतृप्यंतितत्रैवपायसशब्दप्रसिद्धेः वार्ध्रीणसस्यमांसेनद्वादशवर्षपर्यंतंपितृतृप्तिर्भवति वार्ध्रीणसश्चनिगमेव्याख्यातः त्रिपिबंत्विंद्रियक्षीणंश्वेतंवृद्धमजापतिम् वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाःपितृकर्मणि नद्यादौपयः पिबतोयस्यत्रीणिजलंस्पृशंतिकर्णौजिह्वाचत्रिभिः पिबतीतित्रिपिबः २७१ कालेति कालशाकाख्यंशाकंमहाशल्काःसशल्काइतिमेधातिथिः मत्स्यविशेषाइतियुज्यंतेमहाशल्कलिनोमत्स्याइतिवचनात् खड्गोगंडकः लोहोलोहितवर्णःछागएव सर्वलोहेनानंत्यमितिपैठीनसिवचनात्तयोरामिषंमधुमाक्षिकंमुन्यन्नानिनीवारादीनिआरण्यानिसर्वाणिएतान्यनंततृप्तयेसंपद्यंते २७२ यदिति ऋतुनक्षत्रतिथिनामयंसमुच्चयः यत्किंचिदित्यप्रसिद्धम् मधुसंयुक्तंवर्षाकालेमघात्रयोदश्यांदीयतेतदप्य

दशमासांस्तुतृप्यंतिवराहमहिषामिषैः शशकूर्मयोस्तुमांसेनमासानेकादशैवतु २७० संवत्सरंतुगव्येनपयसापायसेनच वार्ध्रीणसस्यमांसेनतृप्तिर्द्वादशवार्षिकी २७१ कालशाकंमहाशल्काःखड्गलोहामिषंमधु आनंत्यायैवकल्प्यंतेमुन्यन्नानिचसर्वशः २७२ यत्किंचिन्मधुनामिश्रंप्रदद्यात्तुत्रयोदशीम् तदप्यक्षयमेवस्याद्वर्षासुचमघासुच २७३ अपिनःसकुलेजायाद्योनोदद्यात्त्रयोदशीं पायसंमधुसर्पिर्भ्यांप्राक्छायेकुंजरस्यच २७४

क्षयमेवभवति त्रयोदश्याअधिकरणत्वेपीप्सितत्वविवक्षया प्राप्येत्यध्याहाराद्वाद्वितीया २७३ अपीति वर्षासुमघायुक्तत्रयोदशी पूर्वोक्ताविवक्षिता तत्रापिप्रौष्ठपद्यामतीतायांमघायुक्तात्रयोदशीम् प्राप्यश्राद्धंहिकर्त्तव्यंमधुनापायसेनचेतिशंखवचनात् भाद्रकृष्णात्रयोदशीपूर्वत्रेहचगृह्यते पितरःकिलैवमाशासतेअपिनामतथाविधः कश्चिदस्माकंकुलेभूयात् योअस्मभ्यंप्रकृतायांत्रयोदश्यांतथातिथ्यंतरेपिहस्तिनःपूर्वादिशंगतायांछायायांमधुघृतसंयुक्तंपायसंदद्यात् नतुत्रयोदशीहस्तिच्छाययोःसमुच्चयः यथाहविष्णुः अपिजायेतसोऽस्माकंकुलेकश्चिन्नरोत्तमः प्रावृट्कालेसितेपक्षेत्रयोदश्यांसमाहितः मधुप्लुतेनयःश्राद्धंपायसेनसमाचरेत् कार्त्तिकंसकलंवापिप्राक्छायेकुंजरस्यच २७४ ६॰

यदिति यद्यदितिवीप्सायांसर्वमन्नमप्रतिषिद्धंयथाशास्त्रंसम्यग्रूपश्रद्धायुक्तःपितृभ्योददातितदनंतकंसर्वकालमक्षयमनपचितं
परलोकेपितृतृप्तयेभवति अनंतफलार्थिनाश्रद्धयादेयमितिविधीयते २७५ कृष्णेति कृष्णपक्षेदशमीमारभ्यचतुर्दशीन्त्य-
स्काश्राद्धेयथातिथयःश्रेष्ठमहाफलानतथैतदन्याःप्रतिपदादयः २७६ युक्ष्विति दिनशब्दोऽत्रतिथिपरःयुक्षुयुग्मासुतिथिषुद्वि
तीयाचतुर्थ्यादिषुयुग्मनक्षत्रेषु भरणीरोहिण्यादिषुश्राद्धंकुर्वन्सर्वाभिलषितान्प्राप्नोति अयुग्मासुतिथिषुप्रतिपत्तृतीयाप्रभृतिषु
अयुग्मेषुचनक्षत्रेषु अश्विनीकृत्तिकादिषुश्राद्धेनपितॄन्पूजयन्पुत्रादिसंततिंलभतेपुष्कलांधनविद्यापरिपुष्टाम् २७७ यथेति चै-
त्रसितायामासाइतिज्योतिःशास्त्रविधानात्शुक्लपक्षोपक्रमत्वान्मासानांअपरःपक्षःकृष्णपक्षःसयथाशुक्लपक्षात्श्राद्धस्यसंबंधीवि

यद्यद्ददातिविधिवत्सम्यक्श्रद्धासमन्वितः तत्तत्पितॄणांभवतिपरत्रानंतमक्षयम् २७५ कृष्णपक्षे
दशम्यादौवर्जयित्वाचतुर्दशीम् श्राद्धेप्रशस्तास्तिथयोयथैतानतथेतराः २७६ युक्षुकुर्वन्दिनर्क्षे
षुसर्वान्कामान्समश्नुते अयुक्षुतुपितॄन्सर्वान्प्रजांप्राप्नोतिपुष्कलाम् २७७ यथाचैवापरःपक्षःपूर्व-
पक्षाद्विशिष्यते तथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यते २७८ प्राचीनावीतिनासम्यगपसव्यमतंद्रि
णा पित्र्यमानिधनात्कार्यंविधिवद्दर्भपाणिना २७९ रात्रौश्राद्धंनकुर्वीतराक्षसीकीर्तिताहिसा संध्ययो
रुभयोश्चैवसूर्येचैवाचिरोदिते २८०

शिष्टफलदोभवतिएवंपूर्वार्द्धदिवसादुत्तरार्द्धदिवसःप्रकृष्टफलोविशिष्यतइतिवच-
नात्पूर्वाह्णेपिश्राद्धकर्तव्यतांबोधयति ननुशुक्लपक्षादप्युत्कर्षस्यापरपक्षस्यकथंदृष्टांततापसिद्धोहिदृष्टांतोभवति उच्यते कृष्णप-
क्षेदशम्यादावित्यत्रैवविशिष्टविधावुत्कर्षाभिधानात् २७८ प्राचीति दक्षिणसंस्थितयज्ञोपवीतेनानलसेनदर्भहस्तेन अपसव्यंपितृ
तीर्थेनयथाशास्त्रंसर्वपितृसंबंधिकर्मआनिधनादासमाप्तेःकर्तव्यम् आनिधनायावज्जीवमितिमेधातिथिगोविंदराजौ २७९ रात्रावि
ति रात्रौश्राद्धंनकर्तव्यम् यस्माच्छ्राद्धविनाशनगुणयोगात्राक्षसीत्वादिभिरसौकथिता संध्ययोश्चनकुर्यात् आदित्येचाचिरोदि
ते अचिरोदितादित्यकालस्यापेक्षायांत्रिमुहूर्तःप्रातःकालोग्राह्यः यथोक्तंविष्णुपुराणे रेखाप्रभृत्यथादित्येत्रिमुहूर्तंगतेरवौ प्रात
स्ततःस्मृतःकालोभागःसोह्नस्तुपंचमः अपराह्णस्यश्राद्धांगतयाविधानात्कथमयमप्रसक्तप्रतिषेधइतिचेत् नायंप्रतिषेधःसहिरागप्रा

तस्यवास्यान्विधिप्राप्तस्यवा नायः नात्रागतोनित्यस्यदर्शश्राद्धस्यप्राप्तत्वान्विधिप्राप्तस्यनिषेधेषोडशिग्रहणाग्रहणवत्विकल्पः तस्मात्पर्युदासोयम् रात्र्यादिपर्युदस्तेतरकालेश्राद्धंकुर्यात् अनुयाजेतरयजतिषुयेयजामहइतिमंत्रवत् अपराह्णविधिश्चप्राशस्त्यर्थः अतएवोक्तम् यथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यतइति २८० अनेनेति कुर्यान्मासानुमासिकमितिप्रतिमासंश्राद्धंविहितंतदसंभवेविधिरयंचतुर्भिर्मासैर्ऋतुरेकः एकस्तुऋतुःसंवत्सरइतीमंपक्षमाश्रित्योच्यते अनेनोक्तविधानेनसंवत्सरमध्येत्रीन्वारान्हेमंतग्रीष्मवर्षासुश्राद्धंकर्त्तव्यम् तच्चसमयाचारात्कुंभवृषकन्यास्थेर्के पंचमहायज्ञांतर्गतंचएकमप्याशयेद्विप्रमित्यनेनविहितंप्रत्यहंतुकुर्यादितिपूर्वोक्तदार्ढ्यार्थम् २८१ नपैत्रिति अग्नेःसोमयमाभ्यांचेत्यनेनविहितपितृयज्ञांगभूतोहोमोनलौकिकेश्रौतस्मार्त्तव्यतिरिक्ताग्नौशास्त्रेणविधीयते तस्माल्लौकिकाग्नावग्नौकरणहोमःकर्त्तव्यः निरग्निनांतु अग्न्यभावेतुविप्रस्यपाणावित्यभिधानात् विप्र

अनेनविधिनाश्राद्धंत्रिरब्दस्येहनिर्वपेत् हेमंतग्रीष्मवर्षासुपांचयज्ञिकमन्वहम् २८१ नपैतृयज्ञियोहोमोलौकिकेग्नौविधीयते नदर्शेनविनाश्राद्धमाहिताग्नेर्द्विजन्मनः २८२ यदेवतर्पयत्यद्भिःपितॄन्स्नात्वाद्विजोत्तमः तेनैवकृत्स्नमाप्नोतिपितृयज्ञक्रियाफलम् २८३ वसून्वदंतितुपितॄन्रुद्रांश्चैवपितामहान् प्रपितामहांस्तथादित्यान्श्रुतिरेषासनातनी २८४ विघसाशीभवेन्नित्यंनित्यंवामृतभोजनः विघसोभुक्तशेषंतुयज्ञशेषंतथामृतम् २८५

पाण्यादौकरणीयः आहिताग्नेर्द्विजस्यनामावास्याव्यतिरेकेणकृष्णपक्षेदशम्यादौश्राद्धंविधीयते मृताहश्राद्धंतुनियतत्वात्कृष्णपक्षेपितिथ्यंतरेननिषिध्यते २८२ यदिति पांचयज्ञिकश्राद्धम् यत्स्नानानंतरमुदकतर्पणंद्विजःकरोतितेनैवसर्वनित्यश्राद्धफलमाप्नोति द्विजोत्तमपदंद्विजपरम् २८३ वसूनिति यस्मात्पित्रादयोवस्वादयइत्येषामनादिभूताश्रुतिरस्तिअतःपितॄन्वस्वाख्यदेवान्पितामहान्रुद्रान्प्रपितामहानादित्यान्मन्वादयोवदंतितत्रश्वसिद्धबोधनवैयर्थ्यात्श्राद्धेपित्रादयोवस्वादिरूपेणध्येयाइतिविधिःकल्प्यते अतएवपैठीनसिःयएवंविद्वान्पितॄन्यजतेवसवोरुद्राआदित्याश्चास्यप्रीताभवंति मेधातिथिगोविंदराजौतु पितृद्वेषान्नास्तिक्याद्वायःपितृकर्मणिनप्रवर्त्ततेतंप्रत्येतत्प्रवर्त्तनार्थंदेवतात्वाध्यारोपेणपितॄणांस्तुतिवचनम् २८४ विघसाशीति सर्वदाविघसभोजनःस्यात्सर्वदावामृतभोजनोभवेत् विघसामृतपदयोरर्थ

दर्थंव्याकुरुते विप्रादिभुक्तशेषंविघसउच्यते दर्शपौर्णमासादियज्ञशिष्टंपुरोडाशाद्यमृतंसामान्याभिधानेपिप्रकृतत्वात् श्राद्धेवि-
प्रभुक्तशेषभोजनार्थोयंविधिः अतएवभुंजीतातिथिसंयुक्तःसर्वंपितृनिषेवितमितिस्मृत्यंतरम् अतिथ्यादिविशेषभोजनंत्ववशि-
ष्टंतुदंपतीइत्यनेनैवविहितंतस्यैवयज्ञशेषतुल्यत्वापादनेनस्तुत्यर्थंपुनर्वचनमितितुगोविंदराजव्याख्यानमनुष्ठानविशेषानर्हंअ-
प्राकरणिकंच २८५ एतदिति इदंपंचयज्ञभवमनुष्ठानंसर्वंयुष्माकमुक्तंपार्वणश्राद्धव्यवहितैरपिपंचयज्ञैरुपसंहारस्तेषामभ्यर्हि-
तत्वज्ञापनार्थः मंगलार्थइतितुमेधातिथिगोविंदराजौ इदानींद्विजानांमुख्योब्राह्मणस्तस्यवृत्तीनामृतादीनामनुष्ठानंश्रूयतामितिव-
क्ष्यमाणाध्यायैकदेशोपन्यासः २८६ इतिवारेंद्रनंदनवासीयभट्टदिवाकरात्मजश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्ताव-

एतद्वोऽभिहितंसर्वंविधानंपांचयज्ञिकम् द्विजातिमुख्यवृत्तीनांविधानंश्रूयतामिति २८६ इति
मानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांतृतीयोऽध्यायः ३ ७ ७ ५ ५
चतुर्थमायुषोभागमुषित्वाद्यंगुरौद्विजः द्वितीयमायुषोभागंकृतदारोगृहेवसेत् १ अद्रोहेणैवभू-
तानामल्पद्रोहेणवापुनः यावृत्तिस्तांसमास्थायविप्रोजीवेदनापदि २

ल्यांतृतीयोऽध्यायः ३ ७ ५ ५ ७ श्राद्धकल्पानंतरंवृत्तीनांलक्षणंचैवेतिवृत्तिमुख्यक्तयाभि-
हितास्ताश्चगृहस्थाधीनत्वात्गार्हस्थ्यस्यानंतरंवक्तव्याश्चब्रह्मचर्यपूर्वकमेवगार्हस्थ्यंतत्रैववक्ष्यमाणावृत्तयइतिदर्शयितुंब्रह्मचर्यकालं
गार्हस्थ्यकालंचात्रवदति चतुर्थमिति चतुर्थमायुषोभागमाद्यमित्युक्तंब्रह्मचर्यकालोपलक्षणार्थम् अनियतपरिमाणत्वादायुष-
श्चतुर्थभागस्यदुर्ज्ञानत्वात् नचशतायुर्वैपुरुषइतिश्रुतेः पंचविंशतिवर्षपरत्वम् षट्त्रिंशदाब्दिकंब्रह्मचर्यमित्यादिविरोधात् आ-
श्रमसमुच्चयपक्षमाश्रितोब्राह्मणोक्तब्रह्मचर्यकालंजन्मापेक्षायंयथाशक्तिगुरुकुलेस्थित्वाद्वितीयमायुश्चतुर्थभागोगृहस्थाश्रम-
मनुतिष्ठेत् गृहस्थस्तुयदापश्येदित्यनियतत्वात् द्वितीयमायुषोभागमित्यपिगार्हस्थ्यकालमेव १ अद्रोहेणेति परस्यापीडाशि-
लोंछायाचितादिरद्रोहः नतुहिंसैवद्रोहः तस्यानिषिद्धत्वात् अद्रोहेणतदसंभवेऽल्पद्रोहेणवावृत्तिर्जीवनोपायःतदाश्रयणेन

मार्यादिमृत्स्यपंचयज्ञानुष्ठानयुक्तो ब्राह्मणोनतु क्षत्रियादिरनापदिजीवेत् आपदिदशमेविधिर्भविष्यति अयंचसामान्योपदेशोयाजनाध्यापनविशुद्धप्रतिग्रहादिसंग्रहार्थः वक्ष्यमाणऋतादिविशेषमात्रनिष्ठत्वेसंकुचितस्वरसत्वहानिरनधिकारार्थत्वंयाजनादेर्निमकरणानिवेशन्मस्यात्तयापिजीवन् २ यात्रेति यात्राप्राणस्थितिः शास्त्रीयकुटुंबसंवर्द्धननित्यकर्मानुष्ठानपूर्वकप्राणस्थितिमात्रार्थन्नभोगार्थंस्वसंबंधितयाशास्त्रविहितार्जनरूपैः कर्मभिः ऋतादिवक्ष्यमाणैः कायक्लेशंविनाऽर्थसंग्रहंकुर्यात् ३ कैः कर्मभिरित्यत्राह ऋतामृताभ्यामिति अनापदीत्यनुवर्त्तते ऋतादिभिरनापद्विजीवेत् सेवयात्वनापदिकदाचिन्नवर्त्तेतप्रसिद्धत्वादृतादीनिव्याचष्टे ४ ऋतमुंछशिलमिति अबाधितस्थानेषुपथिवाक्षेत्रेषुवाप्रतिहतावकाशेषुयत्रयत्रौषधयोविद्यंतेतत्रतत्रांगुलीभ्यांएकैकंकणंसमुंछापलेतिबौधायनदर्शनात् एकैकधान्यादिगुडकोच्चयनमुंछः मंजर्यात्मकानेकधान्योच्चयनंशि

यात्रामात्रप्रसिद्ध्यर्थंस्वैःकर्मभिरगर्हितैः अक्लेशेनशरीरस्यकुर्वीतधनसंचयम् ३ ऋतामृताभ्यांजीवेत्तुमृतेनप्रमृतेनवा सत्यानृताभ्यामपिवानश्ववृत्त्याकदाचन ४ ऋतमुंछशिलंज्ञेयममृतंस्यादयाचितम् मृतंतुयाचितंभैक्षंप्रमृतंकर्षणंस्मृतम् ५ सत्यानृतंतुवाणिज्यंतेनचैवापिजीव्यते सेवाश्ववृत्तिराख्यातातस्मात्तांपरिवर्जयेत् ६

लः उंछश्चशिलश्चेत्येकवद्भावः तत्सत्यसमानफलत्वादृतमित्युच्यते अयाचितोपस्थितममृतमिवसुखहेतुत्वादमृतम् प्रार्थितंपुनर्भैक्षंभिक्षासमूहरूपंमरणशरणपीडाजननान्मृतम् एतच्चसाग्नेरस्यभैक्षमपक्वतंडुलादिरूपन्नतुसिद्धान्नंपराग्निपक्वेनस्वाग्नौहोमाभावात् कर्षणंचभूमिगतप्रचुरप्राणिमरणनिमित्तत्वात् बहुदुःखफलकंप्रकर्षेणमृतमिवप्रमृतम् ५ सत्यानृतंत्विति प्रायेणसत्यानृतव्यवहारसाध्यत्वात्सत्यानृतंवाणिज्यम् कुसीदेअनापदीत्यनुवृत्तेरस्वयंकृतान्येतानिबोद्धव्यानि यथाहगौतमः कृषिवाणिज्येस्वयंचाकृतेकुसीदंच नतुवाणिज्येशास्त्रेणसत्यानृतवाद्यनुज्ञा तेनचैवापिजीव्यतइतिचशब्देनवाणिज्यकृषिसमवशिष्टत्वात्कुसीदमपिगृह्यते पूर्वश्लोकोक्ताकृषिरेतत्श्लोकेचवाणिज्यम् सेवातुदीनदृष्टिसंदर्शनस्वामितर्जननीचक्रियादिधर्मयोगात्श्वुनइववृत्तिरतःश्ववृत्तिरुक्तातस्मात्तांप्रकृतोब्राह्मणस्त्यजेत् ६ ५

कुशूलधान्यकइति कुशूलोव्रीह्यगारंस्यादित्यभिधानिकाः इष्टकानिर्मितागारधान्यसंचयोभवेत् अत्रकालविशेषापेक्षायाम् य
स्यत्रैवार्षिकंभक्तंपर्याप्तंभृत्यवृत्तये अधिकंवापिविद्येतससोमंपातुमर्हतिइतिमनूक्तएवकालोग्राह्यः तेननित्यनैमित्तिकधर्मकृत्यपो
ष्यवर्गसहितस्यगृहिणोयावताधान्यादिधनेनवर्षत्रयंसमधिकंवानिर्वाहोभवतितावद्धनःकुशूलधान्यकउच्यते वर्षनिर्वाहोचितधा
न्यादिधनःकुंभीधान्यः प्राक्सौमिकीःक्रियाःकुर्यात्यस्यान्नंवार्षिकंभवेदितियाज्ञवल्क्येनगृहस्थस्यवार्षिकसंचयाभ्यनुज्ञानात् मनुर
पियदावानप्रस्थस्यैवसमान्निचयएवइत्यनेनसमान्निचयंवक्ष्यति तदपेक्षयाबहुपोष्यवर्गस्यगृहिणःसमुचितःसंवत्सरसंचयः मेधा-
तिथिस्तु यावताधान्यादिधनेनबहुभृत्यदारादिमतःत्रिसंवत्सरस्थितिर्भवतितावत्सुवर्णादिधनवानपिकुशूलधान्यइत्यभिधायकुं
भीउष्ट्रिकापाण्मासिकधान्यादिनिचयःकुंभीधान्यकइतिव्याख्यातवान् गोविंदराजस्तुकुशूलधान्यकइत्येतद्व्याचक्षते कोष्ठप्रमाण

कुशूलधान्यकोवास्यात्कुंभीधान्यकएववा त्र्यहैहिकोवापिभवेदश्वस्तनिकएववा ७ चतुर्णामपिचैवै
तेषांद्विजानांगृहमेधिनाम् ज्यायान्परःपरोज्ञेयोधर्मतोलोकजित्तमः ८ षट्कर्मैकोभवत्येषांत्रिभिर-
न्यःप्रवर्त्तते द्वाभ्यामेकश्चतुर्थस्तुब्रह्मसत्रेणजीवति ९

धान्यसंचयोवास्यात् द्वादशाहमात्रपर्याप्तधनःकुंभीधा-
न्यकइत्येतद्व्याचष्टे उष्ट्रिकाप्रमाणधान्यादिसंचयोवापडहमात्रपर्याप्तधनः द्वादशाहंकुशूलेनवृत्तिःकुंभ्यादिनानिषट् इसामनूनां-
गोविंदराजोक्तिनानुरुध्महे ईहान्वेद्यतस्यांभवंऐहिकंत्र्यहपर्याप्तमैहिकंधनंयस्यसत्र्यहैहिकःतथावास्यात् दिनत्रयनिर्वाहोचितध
नमित्यर्थः श्वोभवंश्वस्तनंभक्तंतदस्यास्तीतिमत्वर्थीयमिकंकृत्वानञ्समासः तथावाभवेत् ७ चतुर्णामपीति एषांचतुर्णामपिकुशू
लधान्यकादीनांब्राह्मणानांगृहस्थानांमध्येयोयःशेषेपठितःसश्रेष्ठोज्ञातव्यः यतोऽसौवृत्तिसंकोचधर्मेणस्वर्गादिलोकजित्तमोभव
ति ८ षट्कर्मेति एषांगृहस्थानांमध्येकश्चिद्गृहस्थोयोबहुपोष्यवर्गःसऋतामृताभ्यांयाचितभैक्षकृषिवाणिज्यैः पंचभिस्तेनचैवेत्य
नेनैवचशब्दसमुच्चितेनकुसीदेनत्येवंषड्भिःकर्मभिःषट्कर्माभवतिषड्भिरेतैर्जीवति कृषिवाणिज्यकुसीदान्येतानिगौतमोक्तानीत्युक्त
म् अन्यश्चपुनस्ततोऽल्पपरिकरः त्रिभिर्याजनाध्यापनप्रतिग्रहैरद्रोहेणेत्येतत्श्लोकसंगृहीतैः प्रवर्त्ततेप्रशब्दोऽनर्थकोवर्त्ततइत्यर्थः

अपरः पुनः प्रतिग्रहः प्रत्यवर इति वक्ष्यमाणत्वात् परित्यागेन द्वाभ्यां याजनाध्यापनाभ्यां प्रवर्त्तते उक्तत्रयापेक्षया चतुर्थः पुनर्ब्रह्मस-त्रेणाध्यापनेन जीवति मेधातिथिस्तु एषां कुशूलधान्यकादीनां मध्यादेकः कुशूलधान्यकः प्रकृतैरुञ्छशिलायाचितायाचितकृषिवाणिज्यैः ष-ड्कर्मा भवति षड्भिर्जीवति अन्यो द्वितीयः कुम्भीधान्यकः कृषिवाणिज्ययोर्निन्दितत्वात् तत्त्यागे उञ्छशिलयाचितायाचितानां मध्यादिच्छा-तस्त्रिभिर्वर्त्तेत एकस्त्र्यहैहिको याचितलाभं विहाय उञ्छशिलायाचितानां मध्यादिच्छया द्वाभ्यां वर्त्तेत चतुर्थः पुनरश्वस्तनिको ब्रह्म-सत्रेण जीवति ब्रह्मसत्रं शिलोञ्छयोरन्यतरा वृत्तिः ब्रह्मणो ब्राह्मणस्य सततभवत्वात् सत्रमित्याह ९ वर्त्तयंश्चेति शिलोञ्छाभ्यां जीवन् धनसाध्यकर्मान्तराननुष्ठानासामर्थ्यात् अग्निहोत्रनिष्ठ एव स्यात् पार्वायनान्तीयाश्च इष्टीः केवला अनुतिष्ठेत् पर्व च अयनं च पर्वायने तयोरन्तस्तत्र भवा दर्शपौर्णमासाग्रयणात्मिकाः १० नलोकवृत्तमिति लोकवृत्तमसत्यमिथ्याख्यानं विचित्रपरिहासकथादिकं

वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः इष्टीः पार्वायनान्तीयाः केवला निर्वपेत्सदा १० न लोकवृ-त्तं वर्त्तेत वृत्तिहेतोः कथंचन अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् ११ संतोषं परमास्थाय सुखार्थी संयतो भवेत् संतोषमूलं हि सुखं दुःखमूलं विपर्य्ययः १२ अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत् १३

जीविकार्थं न कुर्यात् अजिह्मां मृषानुगुणार्था-भिधानादिपापरहिताम् अशठां दम्भादिव्याजशून्यां शुद्धां वैश्यादिवृत्तेरसंकीर्णां ब्राह्मणजीविकामनुतिष्ठेत् अनेकार्थत्वाद्धातूनां अनुष्ठानार्थोऽयं जीवतिरिति सकर्मता ११ संतोषमिति यथासंभव भृत्यात्मप्राणधारणावश्यकपञ्चयज्ञाद्यनुष्ठानमात्रोचितधनान-धिकास्पृहा संतोषः तमतिशयितमालम्ब्य प्रचुरधनार्जने संयमं कुर्यात् यतः संतोषहेतुकमिति सुखं परत्र चाव्यग्रस्य विहितानुष्ठानात् स्वर्गादिसुखं विपर्ययस्त्वसंतोषो दुःखमूलं बहुधनार्जनप्रयासेन प्रचुरदुःखाद् संपत्तौ च क्लेशात् १२ अतोऽन्यतमेति अबहुभृत्यैक-वृत्त्या निर्वाहसंभवे सत्यन्यतमयेति विधीयते बहुभृत्यस्यान्नसंभवे षट्कर्मैको भवत्येषामिति विहितत्वात् अथवा एकवाक्यता-वगमात् व्रतविधायकतया वृत्त्येत्यनुवादकत्वादेकत्वमविवक्षितम् उक्तवृत्तीनामन्यतमया वृत्त्या जीवन् स्नातको ब्राह्मण इमानि व्र

माणानियथासंभवंस्वर्गायुर्यशांसिहितानिप्रतानिकुर्यात् इदंमयाकर्त्तव्यमिदंनकर्त्तव्यमित्येवंविधिसंकल्पविशेषाद्व्रतम् १३ वे-
दोदितमिति वेदोक्तंस्मार्त्तमपिवेदमूलत्वाद्वेदोक्तमेवस्वकंस्वाश्रमोक्तंयावज्जीवमतंद्रितोऽनलसःकुर्यात् हिहेतौयस्मात्तत्कुर्वन्यथा-
सामर्थ्यंपरमांगतिंमोक्षलक्षणांप्राप्नोतिनित्यकर्मानुष्ठानात्पापक्षयेसतिनिष्पापांतःकरणेनब्रह्मसाक्षात्कारात्मोक्षावाप्तेः तदुक्तं
मोक्षधर्मे ज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणः तत्रादर्शतलप्रख्येपश्यत्यात्मानमात्मनि आत्मनिअंतःकरणे १४ नेहेतार्थानि
ति प्रसज्यतेयत्रपुरुषःसप्रसंगोगीतवादित्रादिः तेनार्थान्नार्जयेत् नापिशास्त्रनिषिद्धेनकर्मणा अयाज्ययाजनादिनाच नचविद्य-
मानेषुधनेषुनत्वाप्यविद्यमानेष्वपिप्रकारांतरासंभवेयतस्ततःपतितादिभ्योपि १५ इंद्रियार्थेष्विति इंद्रियाणामर्थारूपरसगंध-
स्पर्शादयःतेषुनिषिद्धेष्वपिस्वदारसुरतादिषुनप्रसज्येत नातिप्रसक्तिंप्रसक्तसेवनात्मिकांकुर्यात् कामतउपभोगार्थंअतिप्रसक्तिनि

वेदोदितंस्वकंकर्मनित्यंकुर्यादतंद्रितः तद्धिकुर्वन्यथाशक्तिप्राप्नोतिपरमांगतिम् १४ नेहेतार्थान्प्रसं
गेननविरुद्धेनकर्मणा नविद्यमानेष्वर्थेषुनार्त्यामपियतस्ततः १५ इंद्रियार्थेषुसर्वेषुनप्रसज्येतकामतः
अतिप्रसक्तिंचैतेषांमनसासन्निवर्त्तयेत् १६ सर्वान्परित्यजेदर्थान्स्वाध्यायस्यविरोधिनः यथातथाध्या
पयंस्तुसाह्यस्यकृतकृत्यता १७ वयसःकर्मणोऽर्थस्यश्रुतस्याभिजनस्यच वेषवाग्बुद्धिसारूप्यमाचरन्
विचरेदिह १८ बुद्धिवृद्धिकराण्याशुधन्यानिचहितानिच नित्यंशास्त्राण्यवेक्षेतनिगमांश्चैववैदिकान्
१९

स्त्युपायमाह अतिप्रसक्तिंचैतेषामिति विषयाणामस्थिरत्वस्वर्गापवर्गार्थश्रेयोविरोधित्वादिभावनयामनसासम्यक्
निवर्त्तयेत् १६ सर्वानिति वेदार्थविरोधिनः अर्थानत्यंतेश्वरगृहोपसर्पणकृषिलोकयात्रादयः तान्सर्वान्परित्यजेत् कथंतर्हिभृत्यात्म
पोषणमित्याशंक्याह यथातथाकेनाप्युपायेनस्वाध्यायाविरोधिनाभृत्यात्मानौजीवयन्यस्मात्साऽस्यस्नातकस्य कृतकृत्यतायन्नि
त्यंस्वाध्यायपरता १७ वयसइति वयसःक्रियायाधनस्यश्रुतस्यकुलस्यानुरूपेणवेषवाग्बुद्धीराचरन्लोकेप्रवर्त्तेत यथायौवनेस्त्र
गंधलेपनादिधारणंप्रवर्णानुसारीचावाग्बुद्धिश्चएवंकर्मादिष्वप्युन्नेयम् १८ बुद्धीति वेदाविरुद्धानिशीघ्रंबुद्धिवृद्धिजनकानिव्याक

रणमीमांसास्मृतिपुराणन्यायादीनिशास्त्राणितथाधन्यानिधनायहितानि अर्थशास्त्राणि बार्हस्पत्यौशनसादीनितथाहितानिदृ
ष्टोपकारकाणिवैद्यकज्योतिषादीनितथापर्यायकथनेनवेदार्थावबोधकान्निगमाख्यांश्चग्रंथान्नित्यंपर्यालोचयेत् १९ यथाय
थेति यस्माद्यथायथापुरुषःशास्त्रंसम्यगभ्यस्यति तथातथाविशेषेणजानातिशास्त्रांतरविषयमपिचास्य विज्ञानंरोचतेतदूलं
भवतिदौस्थ्यर्थत्वाद्रुचेरभिलाषार्थत्वाभावाद्रुच्यर्थानांप्रीयमाणइतिनसंप्रदानसंज्ञा २० ऋषियज्ञमिति स्वाध्यायादीन्पंचयज्ञा
न्यथाशक्तिनत्यजेत् तृतीयाध्यायविहितानामपिपंचयज्ञानामिहनिर्देशउत्तरत्रविशेषविधानार्थः स्नातकव्रतत्वबोधनार्थश्च
२१ एतानेवेति एकेगृहस्थाबाह्यांतरयज्ञानुष्ठानशास्त्रज्ञाएतान्पंचमहायज्ञान् ब्रह्मज्ञानप्रकर्षाद्बहिरचेष्टमानाःपंचसुबुद्धीं
द्रियेषुएवंपंचरूपज्ञानादिसंयमंकुर्वंतःसंपादयंतियज्ञानांहोमत्वानुपपत्तेःसंपादनार्थस्तुहोतिः २२ वाचीति एकेगृहस्थाब्रह्म

यथायथाहिपुरुषःशास्त्रंसमधिगच्छति तथातथाविजानातिविज्ञानंचास्यरोचते २० ऋषियज्ञं
देवयज्ञंभूतयज्ञंचसर्वदा नृयज्ञंपितृयज्ञंचयथाशक्तिनहापयेत् २१ एतानेकेमहायज्ञान्यज्ञशास्त्र
विदोजनाः अनीहमानाःसततमिंद्रियेष्वेवजुह्वति २२ वाच्येकेजुह्वतिप्राणंप्राणेवाचंचसर्वदा वाचि
प्राणेचपश्यंतोयज्ञनिर्वृत्तिमक्षयाम् २३ ज्ञानेनैवापरेविप्रायजंत्येतैर्मखैःसदा ज्ञानमूलांक्रियामेषां
पश्यंतोज्ञानचक्षुषा २४

विदोवाचिप्राणवायौचयज्ञनिर्वृत्तिमक्षयफलांजानंतःसततंवाचिप्राणंचजुह्वति वाचंचप्रा
णेभाषमाणेनचवाचिप्राणंजुहोतीति अभाषमाणेनोच्छ्वसताप्राणेवाचंजुहोमीतिव्याख्यातव्यमित्यनेनविधीयते यथाकौषीत
करहस्यब्राह्मणम् यावद्वैपुरुषोभाषतेनतावत्प्राणितुंशक्नोतिप्राणंतदावाचिजुहोतियावद्धिपुरुषःप्राणितिनतावद्भाषितुंश-
क्नोतिवाचंतदाप्राणेजुहोतिएतेऽनंतेऽमृतेमृतेआहुतीजाग्रच्चसततंजुहोति अथवाअन्याआहुतयः अनंतरन्यस्ताः कर्म
हिभवंत्येवंहितस्यैतत्पूर्वेविद्वांसोऽग्निहोत्रंजुहवांचक्रुरिति २३ ज्ञानेनैवेति अपरेविप्राब्रह्मनिष्ठाःसर्वथाब्रह्मज्ञानेनैवएते
र्मखैर्यजंति एतांश्चयज्ञाननुतिष्ठंति कथमेतदित्याह ज्ञानंब्रह्म सत्यंज्ञानमनंतमित्यादिश्रुतिषुप्रसिद्धंज्ञानमूलामेषांज्ञानानां

क्रियामुत्पत्तिंजानंतः ज्ञायतेऽनेनेतिज्ञानंचक्षुरिवचक्षुः ज्ञानचक्षुषाउपरियदास्वल्विदंब्रह्मतज्जनकानित्यादिकपंचयज्ञानपिब्र
ह्मोत्पत्तिकालेब्रह्मात्मकान्ध्यायंतः संपादयंतिपंचयज्ञफलमश्नुवतइत्यर्थः श्लोकत्रयेणब्रह्मनिष्ठानांवेदसंन्यासिनांगृहस्थानाम
विधिरयं २४ अग्निहोत्रमिति उदितहोमपक्षेदिनस्यादौनिशायाश्चादौ अनुदितहोमपक्षेदिनस्यांतेनिशायाश्चांते यद्वा उदित
होमपक्षेदिनस्यादौदिनांतेच अनुदितहोमपक्षेनिशादौनिशांतेचअग्निहोत्रंकुर्यात् कृष्णपक्षार्द्धमासांतेदर्शाख्येनकर्मणा शुक्ल
पक्षार्द्धेचपौर्णमासाख्येनयजेत् २५ सस्यांतइति पूर्वार्जितधान्यादिसस्येसमाप्तेशरदिनवानामितिसूत्रकारवचनात् असमाप्ते-
ऽपिपूर्वसस्येनवसस्योत्पत्तौआग्रयणेनयजेत् सस्यक्षयस्यानियतत्वात् धनिनांबहुहायनजीवनोचितधान्यसंभवाच्चसस्यांतग्रह
णाच्चनवसस्योत्पत्तिरेवाभिप्रेतानियतत्वात्तस्याः प्रत्यब्दंसनिमित्तत्वोत्पत्तेः ऋतुसंवत्सरइत्येतन्मताश्रयणेनचत्वारश्चत्वारोमासाऋ
तवस्तदंतेऽध्वरैश्चातुर्मास्याख्यैर्यागैर्यजेत् अयनयोरनयोरुत्तरदक्षिणयोरादौपशुनायजेत् पशुबंधाख्यंयागमनुतिष्ठेत् ज्योतिः

अग्निहोत्रंचजुहुयादाद्यंतेद्युनिशोःसदा दर्शेनचार्द्धमासांतेपौर्णमासेनचैवहि २५ सस्यांतेनवस-
स्येष्ट्यातथर्त्वंतेद्विजोऽध्वरैः पशुनात्वयनस्यादौसमांतेसौमिकैर्मखैः २६ नानिष्ट्वानवसस्येष्ट्यापशु
नाचाग्निमान्द्विजः नवान्नमद्यान्मांसंवादीर्घमायुर्जिजीविषुः २७ नवेनानर्चिताह्यस्यपशुहव्येनचाग्न
यः प्राणानेवात्तुमिच्छंतिनवान्नामिषगर्द्धिनः २८ आसनाशनशय्याभिरद्भिर्मूलफलेनवा नास्यकश्चि
द्वसेद्गेहेशक्तितोऽनर्चितोऽतिथिः २९

शास्त्रेचैत्रशुक्लप्रतिपदादिवर्षगणनात् शिशिरेणसमाप्तेवर्षेवसंतेसोमरस
साध्यैरग्निष्टोमादियागैर्यजेत् २६ नानिष्ट्वेति आहिताग्निर्द्विजोदीर्घमायुर्जीवितुमिच्छन् आग्रयणमकृत्वानवान्नंनभक्षयेत् न
चपशुयागमकृत्वामांसमश्नीयात् २७ नवेनेति दोषंकथयन् अनित्यतामनयोराहयस्मान्नवेहव्येनपशुनवदामेनानर्चिताअकृत-
यागाअग्नयोनवान्नमांसाभिलाषिणोऽस्याहिताग्नेःप्राणानेवअग्निहोत्रिणःखादितुमिच्छंति गर्द्धोऽभिलाषातिशयः गृधेर्घञंत
स्यरूपंसोऽस्यास्तीतिगर्द्धीमत्वर्थीयइनिः २८ आसनाशनेति यथाशक्त्यासनभोजनादिभिरनर्चितोऽतिथिरस्यगृहस्थस्यगृहे
नवसेत् अनेनशक्तितोऽतिथिंपूजयेदित्युक्तमपिउत्तरार्थमनूद्यते २९

पाषंडिनइति पाषंडिनोवेदबाह्यव्रतलिंगधारिणः शाक्यभिक्षुक्षपणकादयः विकर्मस्थाः प्रतिषिद्धजीविनः बैडालव्रतिकबक
वृत्ती वक्ष्यमाणलक्षणौ शठावेदेष्वश्रद्धानाः हैतुकावेदविरोधितर्कव्यवहारिणः एतानतिथिकालोपस्थितान् वाङ्मात्रेणापि
नपूजयेत् पूजारहितेअन्नदानमात्रंतुशक्तितोऽपचमानेभ्यइत्यनुज्ञानमेव ३० वेदविद्येति वेदविद्याव्रतस्नातानितिविद्या
स्नातकव्रतस्नातकोभयस्नातकास्त्रयोपिगृह्यंते यथाहहारीतः यःसमाप्यवेदानसमाप्यव्रतानिसमावर्त्ततेसविद्यास्नातकः
यःसमाप्यव्रतानिअसमाप्यवेदान्समावर्त्ततेसव्रतस्नातकःउभयंसमाप्ययःसमावर्त्ततेसविद्याव्रतस्नातकः यद्यपिस्नातकध-
र्मत्वेनैवस्नातकमात्रप्राप्तिस्तथापिश्रोत्रियत्वंविवक्षितम् तान्स्नातकान् श्रोत्रियान् हव्यकव्येनपूजयेत् विपरीतान्पुनर्व
र्जयेत् ३१ शक्तितइति अपचमानाब्रह्मचारिपरिव्राजकाःपाषंडादयः ब्रह्मचारिपरिव्राजकानामुक्तमपि अन्नदानंपचमानापे

पाषंडिनोविकर्मस्थान्बैडालव्रतिकान्शठान् हैतुकान्बकवृत्तींश्चवाङ्मात्रेणापिनार्चयेत् ३०
वेदविद्याव्रतस्नातान् श्रोत्रियान्गृहमेधिनः पूजयेद्धव्यकव्येनविपरीतांश्चवर्जयेत् ३१ शक्ति-
तोऽपचमानेभ्योदातव्यंगृहमेधिना संविभागश्चभूतेभ्यःकर्त्तव्योऽनुपरोधतः ३२ राजतोधनम
न्विच्छेत्संसीदन्स्नातकःक्षुधा याज्यांतेवासिनोर्वापिनत्वन्यतइतिस्थितिः ३३

क्षपातिशयार्थं स्नातकव्रतत्वार्थंचपुनरुच्यते मेधातिथिगोविंदराजौतु भिक्षांचभिक्षवेदद्याद्विधिवत्ब्रह्मचारिणइतिब्र
ह्मचारीपरिव्राजकयोरुक्तत्वात् पाषण्ड्यादिविषयत्वमेवास्यवचनस्यइत्यूचतुः स्वकुटुंबानुरोधेनवृक्षादिपर्यंतंप्राणिभ्योपि
जलादिनापिविभागःकर्त्तव्यः ३२ राजतइति नराज्ञःप्रतिगृण्हीयाद्राजन्यप्रसूतितइतिनिषेधात्राजशब्दोऽत्रक्षत्रि
तिपरःस्नातकःक्षुधाअवसीदन्द्विजातिप्रतिगृहस्थसंभवेपियथाशास्त्रवर्त्तिनःक्षत्रियाद्राज्ञोयाज्यशिष्याभ्यांवाप्रथम
मभिलषेत् राज्ञोमहाधनत्वेनपीडाविरहात् याज्यशिष्ययोश्चकृतोपकारतयाप्रत्यपकारभवणत्वात्तदसंभवेत्वन्यस्मादपि
द्विजादन्नमाददीततदभावेतुसर्वतःप्रतिगृण्हीयादिति यथाधर्मंवक्ष्यति एवंचानापदिप्रथमंक्षत्रियनृपयाज्यशिष्येभ्यःप्रति

ग्रहनियमार्थंवचनम् अतएवाहनलन्यतइतिस्थितिः शास्त्रमर्यादानवसंसीदन्नित्यभिधानादापद्धर्मविषयत्वमस्यवाच्यंअव्य
भिचारात् अनापत्प्रकरणात् संसीदन्नित्यस्यचोपात्तधनाभावपरत्वात् नचधनाभावआपत् किंतुतस्मिन्सतिविहितोपा-
यासंभवात् अन्यथासद्यःप्रक्षालकोप्यापद्वृत्तिःस्यात् यदिचापद्विषयत्वमस्यभवेत् तदानलन्यत इत्यनेनसर्वतःप्रतिगृण्ही
यादितिविरुध्येत यच्चापत्प्रकरणात् सीदद्भिःकुप्यमिच्छाद्भिर्धनंवापृथिवीपतिः याच्यःस्यादित्युक्तंतच्छूद्रनृपविषयम् एवं
राजादिप्रतिग्रहासंभवे ३३ नसीदेदिति विद्यादियोगात्प्रतिग्रहशक्तोपिस्नातकोब्राह्मणउक्तराजप्रतिग्रहादिलाभेसतिनक्षु
धायसन्नोभवेत् नचधनेसंभवतिजीर्णमलिनेनवाससाविभृयात् ३४ क्लृप्तकेशेति कल्पनंछेदनंलूनकेशनखश्मश्रुस्तपःक्ले
शसहोदांतः शुक्लवासाबाह्याभ्यंतरशौचसंपन्नोवेदाभ्यासयुक्तऔषधोपयोगादिनाचात्महितपरःस्यात् ३५ वैणवीमिति वे

नसीदेत्स्नातकोविप्रःक्षुधाशक्तःकथंचन नजीर्णमलवद्वासाभवेच्चविभवेसति ३४ क्लृप्तकेश
नखश्मश्रुर्दान्तःशुक्लांबरःशुचिः स्वाध्यायेचैवयुक्तःस्यान्नित्यमात्महितेषुच ३५ वैणवींधारयेद्य-
ष्टिंसोदकंचकमंडलुम् यज्ञोपवीतंवेदंचशुभेरौक्मेचकुंडले ३६ नेक्षेतोद्यंतमादित्यंनास्तंयां
तंकदाचन नोपसृष्टंनवारिस्थंनमध्यंनभसोगतम् ३७ नलंघयेद्वत्सतंत्रींनप्रधावेच्चवर्षति न-
चोदकेनिरीक्षेतस्वरूपमितिधारणा ३८ मृदंगांदैवतंविप्रंघृतंमधुचतुष्पथम् प्रदक्षिणानिकुर्वीत
प्रज्ञातांश्चवनस्पतीन् ३९

णुदंडमुदकसहितंचकमंडलुम् यज्ञोपवीतंकुशमुष्टिंशोभनेसौवर्णकुंडलेधारयेत् ३६
नेक्षेतेति उद्यंतमस्तमयंतंचसूर्यबिंबंसंपूर्णनेक्षेत उपसृष्टंग्रहोपरक्तम् वल्काद्युपसर्गयुक्तंचवारिस्थंजलप्रतिबिंबितम् न-
भोमध्यगतंमध्यंदिनसमये ३७ नलंघयेदिति वत्सबंधनरज्जुंनलंघयेत् वर्षतिमेघेनधावेत नचस्वदेहप्रतिबिंबंजलेनिरी-
क्षेतइतिशास्त्रेनिश्चयः ३८ मृदमिति प्रस्थितःसन्संमुखावस्थितान्उद्धृतमृत्तिकांगांपाषाणादिदेवतांब्राह्मणघृतक्षौद्रच
तुष्पथप्रमाणज्ञातवृक्षान्दक्षिणहस्तमार्गेणकुर्यात् प्रदक्षिणानीति नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामितिनपुंसकत्वं

नोपगच्छेदिति प्रमत्तः कामार्त्तोपि रजोदर्शने निषिद्धस्पर्शादित्रयेण स्त्रियं नोपगच्छेत् स्पर्शनिषेधेनैव तासामाद्यास्पृत्य इति निषेधसिद्धौ प्रायश्चित्तगौरवार्थं स्नातकव्रतत्वार्थं च पुनरारंभः नचागच्छन्नपि तया सहैकशय्यायां स्वप्यात् ४० रजसाभिप्लुतामिति यस्माद्रजस्वलां स्त्रियं पुरुषस्योपगच्छतः प्रज्ञावीर्यबलचक्षूंषि नश्यंति तस्मात्तां नोपगच्छेत् ४१ तामिति तां तु रजस्वलामगच्छतस्तस्य प्रज्ञादयो वर्द्धंते तस्मात्तां नोपेयात् ४२ नाश्नीयादिति भार्यया सह एकपात्रे नाश्नीयात् एनां च भुंजानां क्षुतं जृंभां च कुर्वतीं यथासुखं निर्यंत्रणप्रदेशावस्थितां च न नेक्षेत ४३ नांजयंतीमिति तथा स्वनेत्रयोरंजनं कुर्वतीं तैलाद्यभ्यक्तां अनावृतां स्तनावरणरहितां न तु नग्नाम् नग्नां नेक्षेत च स्त्रियमिति वक्ष्यमाणत्वात् अपत्यं च प्रसवंतीं ब्राह्मणो न निरीक्षेत ४

नोपगच्छेत्प्रमत्तोपि स्त्रियमार्त्तवदर्शने समानशयने चैव न शयीत तया सह ४० रजसाभिप्लुतां नारीं नरस्य ह्युपगच्छतः प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रहीयते ४१ तां विवर्जयतस्तस्य रजसा समभिप्लुताम् प्रज्ञा तेजो बलं चक्षुरायुश्चैव प्रवर्द्धते ४२ नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीम् क्षुवतीं जृंभमाणां वा न चासीनां यथासुखम् ४३ नांजयंतीं स्वके नेत्रे न चाभ्यक्तामनावृताम् न पश्येत्प्रसवंतीं च तेजस्कामो द्विजोत्तमः ४४ नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ४५ न फालकृष्टे न जले न चित्यां न च पर्वते न जीर्णदेवायतने न वल्मीके कदाचन ४६ न ससत्वेषु गर्त्तेषु न गच्छन्नापि च स्थितः न नदीतीरमासाद्य न च पर्वतमस्तके ४७

नान्नमद्यादिति एकवस्त्रो नान्नं भुंजीत उपस्थाच्छादनवासोरहितो न स्नायात् मूत्रग्रहणमधःकायमलविसर्गोपलक्षणार्थं तेन मूत्रपुरीषे वर्त्मनि भस्मनि गोष्ठे च न कुर्यात् ४५ न फालकृष्ट इति तथा फालकृष्टे क्षेत्रादावुदके अग्न्यर्थकृतेष्टकाचये पर्वते चिरंतनदेवतागारे कृमिकृतमृत्तिकाचये च विण्मूत्रोत्सर्गं न कदाचन कुर्यात् ४६ न ससत्वेष्विति तथा सप्राणिषु विलेषु न व्रजन्न चोत्थितो न नदीतटमाश्रित्य नापि पर्वतशृंगे मूत्रपुरीषे कुर्यात् पर्वतनिषेधादेव तच्छृंगनिषेधे सिद्धे पुनः पर्वतशृंगनिषे॰

स्तारतरपर्वतेविकल्पार्थः तत्रेच्छाविकल्पस्यान्यथापिप्राप्तोसामान्यनिषेधवैयर्थ्यात् व्यवस्थितोऽत्रविकल्पः अत्यंतार्त्तस्यपर्वतेन
दोषः ४७ वाय्वग्निविप्रमिति वायुमग्निंब्राह्मणंसूर्यंजलंगांचपश्यन्नकदापिमूत्रपुरीषोत्सर्गंकुर्यात् वायोररूपत्वेनासंभवेवात्य
प्रेरिततृणकाष्ठादिनिषेधोयम् ४८ तिरस्कृत्योच्चरेदिति अंतर्धायकाष्ठादीनिभूमाववागनुच्छिष्टःप्रच्छादितांगोऽवगुंठितशिरा
मूत्रपुरीषोत्सर्गंकुर्यात् शुष्कैस्तृणैर्वाकाष्ठैर्वापर्णैर्वेणुदलेनवा मृन्मयैर्भाजनैर्वापि अंतर्धायवसुंधरामितिवायुपुराणवचनात् शु
ष्कानिकाष्ठपत्रतृणानिज्ञेयानि ४९ मूत्रोच्चारसमुत्सर्गमिति मूत्रपुरीषोत्सर्गमहनिसंध्यायांचोत्तराभिमुखोरात्रौचेद्दक्षिणामुखः
कुर्यात् धरणीधरस्तु स्वस्थोऽनाशायचेतसरतिचतुर्थपदंपठित्वाचेतसो बुद्धेःअनाशायेतिव्याख्यातवान् परंपरीयमाम्नायंहि
त्वाविहाद्विरादृतम् पाठांतरंच्यरव्ययन्मुधेहधरणीधरः ५० छायायामिति रात्रौछायायामंधकारेवा अहनिच्छायायान्नीहाराद्यंध-

वाय्वग्निविप्रमादित्यमपःपश्यंस्तथैवगाः नकदाचनकुर्वीतविण्मूत्रस्यविसर्जनम् ४८ तिरस्कृत्यो
च्चरेत्काष्ठलोष्ठपत्रतृणादिना नियम्यप्रयतोवाचंसंवीतांगोऽवगुंठितः ४९ मूत्रोच्चारसमुत्सर्गंदिवा
कुर्यादुदङ्मुखः दक्षिणाभिमुखोरात्रौसंध्ययोश्चयथादिवा ५० छायायामंधकारेवारात्रावहनिवा-
द्विजः यथासुखमुखःकुर्यात्प्राणबाधभयेषुच ५१ प्रत्यग्निंप्रतिसूर्यंचप्रतिसोमोदकद्विजान् प्र
तिगांप्रतिवातंचप्रज्ञानश्यतिमेहतः ५२ नाग्निंमुखेनोपधमेन्नग्नांनेक्षेतचस्त्रियम् नामेध्यंप्रक्षि
पेदग्नौनचपादौप्रतापयेत् ५३

कारेवादिग्विशेषाज्ञानेसतिचौरव्याघ्रादिकृतप्राणविनाशभयेषुचयथेप्सितमुखो
मूत्रपुरीषेकुर्यात् ५१ प्रत्यग्निमिति वाय्वग्निविप्रमित्यनेनमेहतोऽग्न्यादीनांदर्शनंनिषिद्धं अनेनत्पश्यतोपिसंमुखीनत्वंनि
षिध्यते अग्निसूर्यचंद्रजलब्राह्मणगोवाताभिमुखंमूत्रपुरीषेकुर्वतःप्रज्ञानश्यतितस्मादेतन्नकर्त्तव्यंप्रतिवातमित्यस्यस्थानेप्र
तिसंध्यमित्यन्येपठंति ५२ नाग्निमिति नाग्निर्मुखेनध्मातव्यःकिंतर्हिव्यजनादिना ननग्नांस्त्रियमीक्षेतमैथुनादन्यत्रेतिसांख्या
यनदर्शनात् मैथुनव्यतिरेकेणनग्नांस्त्रियंनपश्येत् अमेध्यंमूत्रपुरीषादिकंनाग्नौक्षिपेत् नचपादौप्रतापयेत् प्रशब्दादग्नौ

पादांगुल्शिष्यसाक्षान्नप्रतापयेत् वस्त्रादितापस्वेदेऽविरोधः ५३ अधस्तादिति खट्वादिभ्योऽधस्तादंगारशकट्यादिकंनकु
र्यात् नचाग्निमुत्प्लुत्यगच्छेत् नचसुप्तःपाददेशेऽग्निंस्थापयेत् नचप्राणपीडाकरंकर्मकुर्यात् ५४ नाश्नीयादिति संध्याका
लेभोजनंग्रामांतरगमनंनिद्रांचनकुर्यात् नचरेखादिनाभूमिमुल्लिखेत् नचमालांधृतांस्वयमेवापनयेत् अर्थादन्येनापनये
दित्युक्तम् ५५ नाप्स्विति मूत्रंपुरीषंश्लेष्माणंमूत्राद्यमेध्यलिप्तवस्त्रंअन्यद्वाभक्तोच्छिष्टाद्यमेध्यंरुधिरंविषाणिचकृ
त्रिमाकृत्रिमभेदभिन्नानिनजलेप्रक्षिपेत् ५६ नैकइति उत्सन्नजनवासगेहेनैकःशयीतवित्तविद्यादि॰
येत् रजस्वलयासंभाषणंनकुर्यात् यज्ञंचाकृतावरणोऽनृत्विक्नगच्छेत् दर्शनायेच्छयागच्छेत् दर्श

अधस्तान्नोपदध्याच्चनचैनमभिलंघयेत् नचैनंपादतःकुर्यान्नप्राणाबाधमाचरेत् ५४ नाश्नी
यात्संधिवेलायांनगच्छेन्नापिसंविशेत् नचैवप्रलिखेद्भूमिंनात्मनोपहरेत्स्रजम् ५५ नाप्सुमूत्रंपु
रीषंवाष्ठीवनंवासमुत्सृजेत् अमेध्यलिप्तमन्यद्वालोहितंवाविषाणिवा ५६ नैकःस्वपेच्छून्यगेहे
शयानंनप्रबोधयेत् नोदक्ययाभिभाषेतयज्ञंगच्छेन्नचावृतः ५७ अग्न्यागारेगवांगोष्ठेब्राह्म
णानांचसन्निधौ स्वाध्यायेभोजनेचैवदक्षिणंपाणिमुद्धरेत् ५८ नवारयेद्गांधयंतीनचाचक्षीत
कस्यचित् नदिवींद्रायुधंदृष्ट्वाकस्यचिद्दर्शयेद्बुधः ५९ नाधार्मिकेवसेद्ग्रामेनव्याधिबहुलेभृश
म् नैकःप्रपद्येताध्वानंनचिरंपर्वतेवसेत् ६०

नात् ५७ अग्न्यागारइति अग्निगृहेगवांनिवासेब्राह्मणानां
गवांसमीपेस्वाध्यायभोजनकालयोश्चदक्षिणपाणिंसवादंवाउद्धरेदितिबहिःकुर्यात् ५८ नवारयेदिति गांजलंक्षीरंवापिबंतींन
निवारयेत् दोहनार्थवारणादन्यत्रनिषेधः नापिपरकीयक्षीरादिपिबंतींतस्यकथयेत् नचेंद्रधनुराकाशेदृष्ट्वानिषिद्धदर्शन
दोषज्ञःकस्यचिद्दर्शयेत् ५९ नाधार्मिकइति अधार्मिकइत्यनेनयत्राधार्मिकावसंतिनतत्रवासोयुक्तः यत्रवानिंदितदुर्भिक्षि
तव्याधिपीडिताबहवोजनास्तत्रभृशमत्यर्थंवासोनयुक्तः पंथानंएकःकदापिनगच्छेत् ६०

नशूद्रराज्यइति यत्रदेशेशूद्रोराजातत्रनवसेत् अधार्मिकजनैश्चबाह्यतःपरिवृतेग्रामादौनवसेदित्यपुनरुक्तिः पाषंडिभिश्चवे
दबाह्यलिंगधारिभिर्वशीकृते चांडालादिभिश्चांत्यजैरुपद्रुतेनवसेत् ६१ नभुंजीतेति उद्धृतस्नेहंपिण्याकादिनभुंजीत अ
तितृप्तिंवारद्वयेपिनकुर्यात् जठरंपूरयेदर्द्धमन्नैर्भागंजलेनच वायोःसंचरणार्थंतुचतुर्थमवशेषयेदित्यादिविष्णुपुराणवचना
त् सूर्योदयकालेसूर्यास्तमयेभोजनंनकुर्यात् प्रातराशितोऽतितृप्तःसायन्नभुंजीत ६२ नकुर्वीतेति दृष्टादृष्टार्थशून्यंव्यापा
रन्नकुर्यात् अंजलिनाचजलंनपिबेत् ऊर्वोरुपरिविन्यस्यमोदकादीन्नभक्षयेत् असतिप्रयोजनेकिमेतदितिजिज्ञासाकुतूह
लंनकुर्यात् ६३ ननृत्येदिति अशास्त्रीयाणिनृत्यगीतवाद्यानिनाचरेत् पाणिनाबाहोर्ध्वनिरूपमास्फोटनंनकुर्यात् अव्य-
क्तदंतशब्दात्मकंक्ष्वेडनंनकुर्यात् नचसानुरागोरासभादिरावंकुर्यात् ६४ नपादाविति कांस्यपात्रेकदाचित्पादौनप्रक्षालयेत्

नशूद्रराज्येनिवसेन्नाधार्मिकजनावृते नपाषंडिगणाक्रांतेनोपसृष्टेंऽत्यजैर्नृभिः ६१ नभुंजीतोद्
धृतस्नेहंनातिसौहित्यमाचरेत् नातिप्रगेनातिसायंनसायंप्रातराशितः ६२ नकुर्वीतवृथाचेष्टांनवा
र्य्यंजलिनापिबेत् नोत्संगेभक्षयेद्भक्ष्यान्नजातुस्यात्कुतूहली ६३ ननृत्येदथवागायेन्नवादित्रा
णिवादयेत् नास्फोटयेन्नचक्ष्वेडेन्नचरक्तोविरावयेत् ६४ नपादौधावयेत्कांस्येकदाचिदपिभा
जने नभिन्नभांडेभुंजीतनभावप्रतिदूषिते ६५ उपानहौचवासश्चधृतमन्यैर्नधारयेत् उपवी
तमलंकारंस्रजंकरकमेवच ६६ नाविनीतैर्व्रजेद्धुर्यैर्नचक्षुद्व्याधिपीडितैः नभिन्नशृंगाक्षि
खुरैर्नवालधिविरूपितैः ६७

ताम्ररजतसुवर्णानांभिन्नमभिन्नंवेतिनदोषइतिपैठीनसिवचनादेतद्व्यतिरिक्तभिं
न्नभांडेनभोजनंकुर्यात् यत्रमनोविचिकित्सातितद्भावदुष्टंनतत्रभुंजीत ६५ उपानहाविति उपानहवस्त्रयज्ञोपवीतालंकारस्र
ग्मालाकमंडलून्परोपभुक्तान्नधारयेत् ६६ नाविनीतैरिति क्षुधाव्याधिनाचपीडितैर्भिन्नशृंगाक्षिखुरैश्छिन्नवालधिभि
श्चनयायात् ६७ विनीतैस्त्विति दमितैःशीघ्रगामिभिःशुभसूचकलक्षणोपेतैःशोभनवर्णैर्मनोज्ञाकृतिभिःप्रतोदेनात्य-

र्थमपीडयनाच्छेत् ६८ बालातपमिति प्रथमोदितादित्यतापोबालातपः सचमुहूर्त्तत्रयंयावदितिमेधातिथिः कन्यार्कातपइत्यन्ये प्रेतधूमोदह्यमानशवधूमः भग्नासनंचएतानिवर्जनीयानि नखान्रोमाणिचप्रवृद्धानिनछिंद्यात् दंतैश्चनखान्नोत्पाटयेत् ६९ नमृल्लोष्टमिति नाकारणंमृल्लोष्टंमृद्नीयात् तृणानिचनछिंद्यादितिआपस्तंबवचनात् निष्प्रयोजनंमृल्लोष्टमर्द्दनं नखैश्चतृणच्छेदनंनकुर्यात् नकुर्वीतवृथाचेष्टामित्यनेनैवास्यापिप्रतिषेधसिद्धौदोषरूपत्वंप्रायश्चित्तगौरवंचदर्शयितुंविशेषणनिषेधः अतएवात्रानंतरंलोष्टमर्दीतिनिंदिष्यति दृष्टादृष्टफलशून्यंचकर्मनकुर्यात् ननुनकुर्वीतवृथाचेष्टामित्यनेनपुनरुक्तं उच्यते देहव्यापारश्चेष्टासवृथाचेष्टाशब्देननिषिद्धः अनेनतुनिष्फलंमनोग्राह्यादिसंकल्पात्मकंयच्चआयत्यामागामिकालेकर्मासुखावहम् यथाअजीर्णभोजनादितदपिनकुर्यात् ७० लोष्टमर्दीति लोष्टमर्दयितातृणच्छेत्तानखखादितान्वयोमनुष्यः

विनीतैस्तुव्रजेन्नित्यमाशुगैर्लक्षणान्वितैः वर्णरूपोपसंपन्नैःप्रतोदेनातुदन्भृशम् ६८ बालातपःप्रेतधूमोवर्ज्यंभिन्नंतथासनम् नच्छिंद्यान्नखलोमानिदंतैर्नोत्पाटयेन्नखान् ६९ नमृल्लोष्टंचमृद्नीयान्नच्छिंद्यात्करजैस्तृणम् नकर्मनिष्फलंकुर्यान्नायत्यामसुखोदयम् ७० लोष्टमर्दीतृणच्छेदीनखखादीचयोनरः सविनाशंव्रजत्याशुसूचकोऽशुचिरेवच ७१ नविगर्ह्यकथांकुर्याद्बहिर्माल्यंनधारयेत् गवांचयानंपृष्ठेनसर्वथैवविगर्हितम् ७२ अद्वारेणचनातीयाद्ग्रामंवावेश्मवावृतम् रात्रौचवृक्षमूलानिदूरतःपरिवर्जयेत् ७३

सूचकःखलोयःपरस्यदोषानसतःसंतोवाख्यापयतिबाह्याभ्यंतरशौचरहितः शीघ्रमेतेदेहधनादिनाविनश्यंति ७१ नविगर्ह्यकथामिति नसाभिनिवेशेनकथांशास्त्रीयेष्वर्थेषुलौकिकेषुवाकुर्यात् केशकलापाद्बहिर्माल्यंनधारयेत् गवांचपृष्ठेयानंसर्वथेतिपाण्यादिव्यवधानेनाप्यधर्मावहंपृष्ठेनेत्यभिधानादाकृष्टशकटादिनानदोषः ७२ अद्वारेणचेति प्राचीराद्यावृतंगृहंचद्वारव्यतिरिक्तप्रदेशेनप्राकारादिलंघनंकृत्वानविशेत् रात्रौचवृक्षमूलावस्थानंदूरतस्त्यजेत् ७३ नाक्षैरिति कदाचिदपिपरिहासेनापिनाक्षादिभिःक्रीडयेत् स्वयमित्यभिधानात् आत्मोपानहौपादव्यतिरिक्ते

नहस्ताग्निनादेशांतरंननयेत् शय्याद्यवस्थितश्चनभुंजीतहस्तेचप्रभूतमन्नंकृत्वाक्रमेणनखादयेत् आसनेभोजनपात्रंनिधा
यनभुंजीत ७४ सर्वमिति यत्किंचित्तिलसंमिश्रंकृसरमोदकादितदस्तमितेऽर्केनाद्यात् उपस्थाच्छादनवासोरहितोनेहस्वप्या
त् उच्छिष्टस्सन्नान्यतोगच्छेत् ७५ आर्द्रपादइति जलार्द्रपादोभोजनमाचरेत् नार्द्रपादःस्वप्यात् यस्मादार्द्रपादोभुंजानश्च
तायुर्भवति ७६ अचक्षुर्विषयमिति तरुगुल्मलतागहनत्वेनाचक्षुर्गोचरमरण्यादिदेशंदुर्गमनाक्रमेत् सर्पचौरादेरंतर्हितस्य-
संभवात् पुरीषंमूत्रंचनाभिवीक्षेत् बाहुभ्यांचनदींनतरेत् ७७ अधितिष्ठेदिति दीर्घमायुर्जीवितुमिच्छुःकेशादीन्नाधिरो-
हेत् भग्नमृन्मयभाजनसकलानिकपालिकाः ७८ नसंवसेदिति पतितादिभिर्ग्रामांतरवासिभिरपिसहनसंवसेत् एकतरु

नाक्षैःक्रीडेत्कदाचित्तुस्वयंनोपानहौहरेत् शयनस्थोपिभुंजीतनपाणिस्थंनचासने ७४ सर्वंच
तिलसंबद्धंनाद्यादस्तमितेरवौ नचनग्नःशयीतेहनचोच्छिष्टःक्वचिद्व्रजेत् ७५ आर्द्रपादस्तुभुं
जीतनार्द्रपादस्तुसंविशेत् आर्द्रपादस्तुभुंजानोदीर्घमायुरवाप्नुयात् ७६ अचक्षुर्विषयंदुर्गंनप्र
पद्येतकर्हिचित् नविण्मूत्रमुदीक्षेतनबाहुभ्यांनदींतरेत् ७७ अधितिष्ठेन्नकेशांस्तुनभस्मास्थि
कपालिकाः नकार्पासास्थिनतुषांदीर्घमायुर्जिजीविषुः ७८ नसंवसेच्चपतितैर्नचांडालैर्नपुक्कशैः
नमूर्खैर्नावलिप्तैश्चनांत्यैर्नांत्यावसायिभिः ७९ नशूद्रायमतिंदद्यान्नोच्छिष्टंनहविष्कृतम् नचास्यो
पदिशेद्धर्मंनचास्यव्रतमादिशेत् ८०

च्छायादौनसमीपेवसेत् अतोनाधार्मिकेवसेद्ग्रामइत्यतोभेदः निषादाच्छू
द्रायांजातः पुक्कशःवक्ष्यतिचजातोनिषादाच्छूद्रायांजात्याभवतिपुक्कशइति अवलिप्ताधनादिमदगर्विताः अंत्याअंत्यजारज
कादयः अंत्यावसायिनोनिषादस्त्रियांचांडालाज्जाताः वक्ष्यतिच निषादस्त्रीतुचांडालात्पुत्रमंत्यावसायिनम् ७९ नशूद्रा
येति शूद्रायमतिंदृष्टार्थोपदेशंनदद्यात् धर्मोपदेशस्यपृथङ्निर्देशात् अदासशूद्रायउच्छिष्टन्नदद्यात् दासगोचरतयाउच्छि
ष्टमन्नंदातव्यमितिवक्ष्यमाणत्वाददोषः द्विजोच्छिष्टंभोजनमिति भोक्तुर्विधिः दातुरुच्छिष्टदाननिषेधेपियथासंभवलब्धा

विषयः हविष्कृतमिति यस्यैकदेशोहुतः सहविःशेषोनदातव्यः धर्मोपदेशोनशूद्रस्यकर्त्तव्यः व्रतंचास्यप्रायश्चित्तरूपंसाक्षा
न्नोपदिशेत् किंतुब्राह्मणंमध्येकृत्वातदुपदेशव्यवधानात् यथाहांगिराः तथाशूद्रंसमासाद्यसदाधर्मपुरःसरम् अंतराब्रा-
ह्मणंकृत्वाप्रायश्चित्तंसमादिशेत् प्रायश्चित्तमितिसकलधर्मोपदेशस्योपलक्षणार्थम् ८० योह्यस्येति यस्मात् योऽस्यशूद्र
स्यधर्मंब्रूतेयश्चप्रायश्चित्तमुपदिशतिसतेनशूद्रेणैवसह असंवृताख्यंतमोगहनंनरकंप्रविशति पंचकपूर्वोक्तेषु द्वयोर्दोषकथ
नंप्रायश्चित्तगौरवार्थम् ८१ नसंहताभ्यामिति संश्लिष्टाभ्यांपाणिभ्यान्नकंडूयेदात्मनः शिरःउच्छिष्टःस्वशिरोनस्पृशेत् शिरसा
विनाउन्मज्जनव्यतिरेकेणनित्यनैमित्तिकस्नानेनकुर्यात् दृष्टार्थेशिरोव्यतिरिक्तेगात्रप्रक्षालनेनदोषः स्नानशक्तस्यचायंनिषेधः
अशक्तस्यतु अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मणामितिजाबालिना विहितमेव ८२ केशग्रहानिति क्रोधं

योह्यस्यधर्ममाचष्टेयश्चैवादिशतिव्रतम् सोऽसंवृतंनामतमःसहतेनैवमज्जति ८१ नसंहताभ्यां
पाणिभ्यांकंडूयेदात्मनःशिरः नस्पृशेच्चैतदुच्छिष्टोनचस्नायाद्विनाततः ८२ केशग्रहान्प्रहारांश्च
शिरस्येतान् विवर्जयेत् शिरःस्नातश्चतैलेननांगंकिंचिदपिस्पृशेत् ८३ नराज्ञःप्रतिगृण्हीया
दराजन्यप्रसूतितः शूनाचक्रध्वजवतांवेशेनैवचजीवताम् ८४

शिरसिवर्जयेत् कोपनिमित्तत्वाच्चात्मनः
परस्यचप्रतिषेधः अतएवरतसमयेकामिनीकेशग्रहस्यानिषेधः स्वशिरस्कस्नातस्यतैलेननकिंचिदप्यंगंस्पृशेत् अथवा
तैलेनेतिकाकाक्षिवदुभयत्रसंबध्यते तैलेनशिरःस्नातः तैलेनपुनःकिंचिदप्यंगंनस्पृशेत् अतोरात्रौशिशूनामतैलशिरः
स्नातानांतैलेनपादाभ्यंगसमाचरणमविरुद्धम् ८३ नराज्ञइति राजन्यशब्दःक्षत्रियवचनः अक्षत्रियप्रसूतस्यराज्ञो
तिगृण्हीयात् राजतोधनमन्विच्छेत्तस्यायंविशेषउक्तः शूनाचक्रध्वजवतामिति शूनावतांचक्रवतांध्वजवतांच शूनाप्राणिव
धस्थानंतद्यस्यास्तीतिसशूनावान् पशुमारणपूर्वकमांसविक्रयजीवी चक्रवान्बीजवधविक्रयजीवीतैलिकः ध्वजवान्म
द्यविक्रयजीवीशौंडिकः वेशःपण्यस्त्रियाप्रवृतिः तयायोजीवतिस्त्रीपुमान्वासवेशवान्एतेषांचनप्रतिगृण्हीयात् ८४ ७

दशसूनेति गोविंदराजकृत दशवेश्यासमोनृपइतिपठति मेधातिथिप्रभृतयः प्राचोदशवेशसमोनृपइतिपठंति शूनादिशब्दैस्त
द्वानुपलक्ष्यते दशशूनावत्तःयावान्दोषस्तावानेकस्मिन्चक्रवतितैलिके यावान्दशसुतैलिकेषुदोषः तावानेकध्वजवतिशौंडिके
यावान्दशसुध्वजवत्सुदोषस्तावानेकत्रवेशावति यावान्दशसुवेशावत्सुदोषस्तावानेकत्रराजनि उत्तरोत्तरनिंदाधिक्यंपूर्वदातृसंभवेस
ुत्तरवर्जनार्थमपेक्षयायोज्यते ८५ दशशूनासहस्राणीति शूनयावरतीतिशौनिकः एवंसंकलनयायश्चशौनिकोदशसहस्राणि
स्वार्थेव्यापादयतितेनेनतुल्योराजामन्वादिभिःस्मृतः तस्मात्तुल्यप्रतिग्रहोनरकहेतुत्वाद्भयानकः क्षत्रियस्यापिच ८६ योराज्ञइति
योराज्ञःकृपणस्यशास्त्रोल्लंघनेनप्रवर्त्तमानस्यप्रतिग्रहंकरोतिसंक्रमेणैतान्वक्ष्यमाणैकविंशतिनरकान्गच्छति ८७ पूर्वश्लोके
सामान्यतोनरकानिमानेकविंशतिमुक्त्वेदानींतानेवनामतोनिर्दिशति तामिस्रमितित्रिभिः एतेषांनरकाणांस्वरूपंमार्कंडेय

दशशूनासमंचक्रंदशचक्रसमोध्वजः दशध्वजसमोवेशोदशवेशसमोनृपः ८५ दशशूनासहस्रा-
णियोवाहयतिशौनिकः तेनतुल्यःस्मृतोराजाघोरस्तस्यप्रतिग्रहः ८६ योराज्ञःप्रतिगृह्णातिलुब्धस्यो-
च्छास्त्रवर्तिनः सपर्यायेणयातीमान्नरकानेकविंशतिम् ८७ तामिस्रमंधतामिस्रंमहारौरवरौरवौ
नरकंकालसूत्रंचमहानरकमेवच ८८ संजीवनंमहावीचिंतपनंसंप्रतापनम् संहातंचसकाकोलंकु-
ड्मलंप्रतिमूर्तिकम् ८९ लोहशंकुमृजीषंचपंथानंशाल्मलींनदीम् असिपत्रवनंचैवलोहदारक-
मेवच ९० एतद्विदंतोविद्वांसोब्राह्मणाब्रह्मवादिनः नराज्ञःप्रतिगृह्णंतिप्रेत्यश्रेयोभिकांक्षिणः ९१

पुराणादिषुविस्तरेणोक्तंतत्रैवावगंतव्यम् ८८ ८९ ९० एतद्विदंतइति प्रतिग्रहोविविधनरकहेतुरितिजानंतोब्राह्मणाः
धर्मशास्त्रपुराणादिविदोवेदाध्यापिनोजन्मांतरेश्रेयःकामयंतोनराज्ञःप्रतिगृह्णीयुः विदुषोहिप्रतिग्रहेनातीवदोषः यतोवक्ष्यति
तस्मादविद्वान्बिभियादिति तेषामपिनिषिद्धःराजप्रतिग्रहःप्रचुरप्रत्यवायफलकइतिदर्शयितुंविद्वद्ग्रहणंब्रह्मवादिग्रहणंच
९१ ब्राह्मइति ब्राह्मोमुहूर्त्तोरात्रेःपश्चिमोयामः ब्राह्मीभारतीतद्बोधहेतुत्वात् मुहूर्त्तशब्दोत्रकालमात्रवचनः तत्रबुध्येत
दक्षेणापि प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत् प्रहरद्वयंशयानोहिब्रह्मभूयायकल्पते इतिब्रुवतात्रप्रबोधोऽभ्यनुज्ञा

तः गोविंदराजस्तु रात्रेःपश्चिमेमुहूर्त्तेबुध्येतइत्याह धर्मार्थौचपरस्पराविरोधेनानुष्ठानार्थमवधारयेत् तथाधर्म
नून्कायक्लेशान्निरूपयेत् यदिमहान्कायक्लेशोऽल्पौचधर्मार्थौवानदातंपरिहरेत् वेदस्यतत्त्वार्थंब्रह्मकर्मात्मकंनि
तस्मिन्समपेबुद्धिप्रकाशान् ९२ उत्थायेति ततःउषःकालेशय्यायाउत्थायसतिवेगेमूत्रपुरीषोत्सर्गंकृत्वाकृतवक्ष्यमाण
ऽनन्यमनाः पूर्वसंध्यांचिरंगायत्रीजपंकुर्वन्नवर्त्तेतार्कदर्शनादयंविधिःप्रातःसंध्यायामुक्तउदयादूर्ध्वमपिजपेत्
इतिविधानार्थोयमारंभः अपरामपिसंध्यांस्वकालेप्रारभ्यनारकोदयादूर्ध्वमपिजपन्नासीत ९३ ऊ
त्तिदर्शयन्नाह ऋषयइति संध्याशब्दोत्रसंध्यानुष्ठेयजपादिपरःयस्मादृषयोदीर्घसंध्यानुष्ठानात्द [illegible]युः प्रज्ञांज [illegible] यशो
मृतांचकीर्त्तिमध्ययनादिसंपन्नंयशश्चप्रापुः तस्मादायुरादिकामश्चिरंसंध्यामुपासीत ९४ श्रावण्यामिति श्रावणस्यपौ-

ब्राह्मेमुहूर्त्तेबुध्येत्धर्मार्थौचानुचिंतयेत् कायक्लेशांश्चतन्मूलान्वेदतत्त्वार्थमेवच ९२ उत्थाया
वश्यकंकृत्वाकृतशौचःसमाहितः पूर्वांसंध्यांजपंस्तिष्ठेत्स्वकालेचापरांचिरम् ९३ ऋषयोदीर्घसं
ध्यत्वाद्दीर्घमायुरवाप्नुयुः प्रज्ञांयशश्चकीर्त्तिंचब्रह्मवर्चसमेवच ९४ श्रावण्यांप्रौष्ठपद्यांवाप्युपा
कृत्ययथाविधि युक्तश्छंदांस्यधीयीतमासान्विप्रोर्द्धपंचमान् ९५ पुष्येतुच्छंदसांकुर्याद्बहिरु
त्सर्जनंद्विजः माघशुक्लस्यवाप्राप्तेपूर्वाह्णेप्रथमेहनि ९६ यथाशास्त्रंतुकृत्वैवमुत्सर्गंछंदसांबहिः
विरमेत्पक्षिणींरात्रिंतदेवैकमहर्निशम् ९७

र्णमास्यांभाद्रपदस्यचस्वगृह्यानुसारेणउपाकर्माख्यंकर्म
श्चतुरोमासान्ब्राह्मणउपक्तोवेदानधीयीत ९५ पुष्येत्विति ततःपक्षाधिकेषुचतुर्षुयःपुष्यस्तत्रग्रामाद्बहिर्गत्वास्वगृह्या
रेणोत्सर्गाख्यंकर्मकुर्यात् अथवामाघशुक्लस्यप्रथमेहनिपूर्वाह्णेकुर्यात् माघशुक्लेचविधिःप्रौष्ठपद्यांयेनोपाकर्मनकृतंतद्वि
षयः ९६ यथाशास्त्रमिति एवमुक्तशास्त्रानुसारेणग्रामाद्बहिःछंदसामुत्सर्गाख्यंकर्मकृत्वापक्षिणींरात्रिंविरमेत् नाधीयीत
द्वेदिने पूर्वापरेपक्षाविवयस्यामध्यवर्त्तिन्यारात्रेःसापक्षिणीरात्रिः अस्मिन्पक्षेनूत्सर्गाहोरात्रेद्वितीयदिनेचाह्निनाध्येतव्यं

द्वितीयरात्रौनध्येतव्यम् अथवानदैवैकसुसर्गाहोरात्रमनध्यायंकुर्यात् विद्यानैपुण्यकामंप्रत्ययमहोरात्रानध्यायविधिः ९७ अतऊर्ध्वमिति उत्सर्गानध्ययनादूर्ध्वंमंत्रब्राह्मणात्मकंवेदंशुक्लपक्षेषु संयतः पठेत्सर्वाणितुवेदांगादीनिशिक्षाव्याकरणादीनि कृष्णपक्षेषुपठेत् ९८ नाविस्पष्टमिति स्वरवर्णाद्यभिव्यक्तिशून्यंशूद्रसन्निधौचनाधीयीन तथारात्रेःपश्चिमेयामेकृत्सोत्थितो वेदमधीत्यश्रांतोनपुनःस्वप्यात् ९९ यथोदितेनेति यथोक्तविधिनानित्यंछंदस्कृतंगायत्र्यादिछंदोयुक्तंमंत्रमात्रंपठेत् मंत्राणामेवकर्मांतरंगत्वात् अनापदिसम्यक्करणादौसतिब्रह्मब्राह्मणंमंत्रजातंचयथोक्तविधिनायुक्तःसन्द्विजःपठेत् १०० इमानिति इमान्वक्ष्यमाणाननध्यायान्सर्वथायथोक्तविधिनाअधीयानःशिष्याध्ययनंचकुर्वाणोगुरुर्वर्जयेत् १०१ कर्णश्रवइति रा

अतऊर्ध्वंतुछंदांसिशुक्लेषुनियतःपठेत् वेदांगानिचसर्वाणिकृष्णपक्षेषुसंपठेत् ९८ नाविस्पष्टमधीयीतनशूद्रजनसन्निधौ ननिशांतेपरिश्रांतोब्रह्माधीत्यपुनःस्वपेत् ९९ यथोदितेनविधिनानित्यंछंदस्कृतंपठेत् ब्रह्मच्छंदस्कृतंचैवद्विजोयुक्तोह्यनापदि १०० इमान्नित्यमनध्यायानधीयानोविवर्जयेत् अध्यापनंचकुर्वाणःशिष्याणांविधिपूर्वकम् १०१ कर्णश्रवेऽनिलेरात्रौदिवापांसुसमूहने एतौवर्षास्वनध्यायावध्यायज्ञाःप्रचक्षते १०२ विद्युत्स्तनितवर्षेषुमहोल्कानांचसंप्लवे आकालिकमनध्यायमेतेषुमनुरब्रवीत् १०३ एतांस्त्वभ्युदितान्विद्याद्यदाप्रादुष्कृताग्निषु तदाविद्यादनध्यायमनृतौचाभ्रदर्शने १०४

त्रौकर्णश्रवणयोग्यशब्दजनकेवायौवाति गोविंदराजस्तु कर्णाभ्यामेवश्रवणोपपत्तेरतिशयविवक्षयाकर्णश्रवइत्युक्तम् तेनातिशब्दवतिवायौवातीत्यभिहितवान् दिवाचधूलिपटलोत्सारणसमर्थेवायौवहति एतौवर्षाकालेअनध्यायौनाकालिकावध्यापनविधिज्ञामुनयःकथयंति १०२ विद्युदिति विद्युद्गर्जितवर्षेषुद्वंद्वनिर्देशायुगपदुपस्थितेषुमहतीनांचोल्कानांसंप्लवेइतस्ततःपातेसति आकालिकमितितुनिमित्तकालादारभ्यापरेद्युर्यावत्सएवकालस्तावत्पर्यंतमनध्यायमेतेषुमनुरवोचत् १०३ एतानिति एतान्विद्युदादीन्यदाहोमार्थंप्रकटीकृताग्निकालेषुसंध्याक्षणेषु

युगपदुत्पन्नान्जानीयात् तदानध्यायंवर्षासुकुर्यान्नसर्वदा तथाऽनृतौप्रादुष्कृताग्निकालेषुमेघदर्शनमात्रेसतिअनध्या
योनवर्षासु १०४ निर्घातेति अंतरीक्षभवोत्पातध्वनौभूकंपेसूर्यचंद्रताराग्रणानांचोपसर्गेसत्यनध्याय इमानाकालिकान्-
जानीयात् आकालिकशब्दार्थोव्याकृतएव ऋतावपिवर्षासुकिलभूकंपादयोनदोषावहा इत्यभिप्रायेणात्र तावपीर
अपिशब्ददन्यत्रापि १०५ प्रादुष्कृतेति होमार्थप्रकाशितेष्वग्निषुसंध्यायांयदाविद्युद्गर्जितश
ज्योतिरनध्यायःस्यात् नाकालिकः तत्रयदिप्रातःसंध्यायांतौस्यातांरात्रौस्तनितविद्युद्वर्षेध्वितित्रयाणांपू नां
त्रितयेजातेयथादिवानध्यायस्तथारात्रावपिअहोरात्रएवेत्यर्थः १०६ नित्यानध्याय इति नैपुण्यविषयोधर्मातिशया
नगरयोःसर्वदानध्यायःस्यात् कुत्सितगंधेचसर्वस्मिन्नपिगम्यमानेधर्मनैपुण्यकामंप्रत्ययंविद्यानध्यायोपदेशोविद्या

निर्घातेभूमिचलनेज्योतिषांचोपसर्ज्जने एतानाकालिकान्विद्यादनध्यायानृतावपि १०५ प्रादु-
ष्कृतेष्वग्निषुतुविद्युत्स्तनितनिस्वने सज्योतिःस्यादनध्यायःशेषेरात्रौयथादिवा १०६ नित्यानध्या
यएवस्याद्ग्रामेषुनगरेषुच धर्मनैपुण्यकामानांपूतिगंधेचसर्वदा १०७ अंतर्गतशवेग्रामेवृषल
स्यचसन्निधौ अनध्यायोरुद्यमानेसमवायेजनस्यच १०८ उदकेमध्यरात्रेचविण्मूत्रस्यविसर्ज्ज
ने उच्छिष्टःश्राद्धभुक्चैवमनसापिनचिंतयेत् १०९

मस्यकदाचिदध्ययनमनुजानातियेशिष्याः केचिद्धीनवेद
ध्ययनजन्मादृ्येच्छवस्तेधर्मनैपुण्यकामाः केचित्स्वयमाध्येतारोविद्यातिशयमात्रार्थिनस्तेविद्यानैपुण्यकामाः १०७ अंतर्गते-
ति अंतर्गतःशवोयस्मिन्ग्रामे ज्ञायतेतत्र वृषलोऽधार्मिकस्तस्यसन्निधौनतुशूद्रः तस्यनशूद्रजनसन्निधावितिनिषेधात् रु
द्यमानेरोदनध्वनौभावेलकारः कार्यांतरार्थबहुजनमेलकेसत्यनध्यायः १०८ उदकइति उदकमध्येमध्यरात्रेचमुहूर्त्तचतुष्ट
येचनिशायांचचतुर्मुहूर्त्तमितिगोतमस्मरणात् गोविंदराजस्तुरात्रिमध्यप्रहरद्वयइत्युक्तवान् तथामूत्रपुरीषोत्सर्गकालेऽन्न
भोजनादिनाचोच्छिष्टोनिमंत्रणसमयादारभ्यश्राद्धभोजनाहोरात्रंयावन्मनसापिवेदंनचिंतयेत् १०९ ७ ७

मतिगृह्येति एकएवोद्दिश्यतेयत्रश्राद्धेतदेकोद्दिष्टन्नवश्राद्धंतत्केतनन्निमंत्रणंगृहीत्वानिमंत्रणादारभ्य क्षत्रियस्यजनपदेश्व
रस्यपुत्रजन्मादिसूतके राहोश्चसूतकंचंद्रसूर्योपरागः तत्रत्रिरात्रंवेदन्नाधीयीत ११० यावदिति यावदेकस्यानुदिष्टस्य
उच्छिष्टस्यसकुंकुमादेर्गंधोलेपश्चब्राह्मणस्यशास्त्रविदोदेहेतिष्ठतितावंत्यहोरात्राणिऊर्द्धमपिवेदन्नाधीयीत १११ शयान
इति शय्यायांपतितांगआसनारूढपादः कृतावसक्थिकोवामांसम् जननमरणशौचिनांचान्नंभुक्त्वानाधीयीत ११२ नीहा
रइति नीहारेधूलिकायाम् बाणशब्देशरध्वनौ बाणोवीणाविशेषइत्यन्ये प्रातःसायंसंध्ययोरमावास्याचतुर्दशीपौर्णमा-
सीषुनाधीयीत अष्टकासूत्तरत्रनिषेधात्पौर्णमास्यादिसाहचर्यादष्टकाशब्दोऽष्टमीतिथिपरः ११३ विशेषदोषमाह अमावा-

प्रतिगृह्यद्विजोविद्वानेकोद्दिष्टस्यकेतनम् त्र्यहंनकीर्त्तयेद्ब्रह्मराज्ञोराहोश्चसूतके ११० यावदेका
नुदिष्टस्यगंधोलेपश्चतिष्ठति विप्रस्यविदुषोदेहेतावद्ब्रह्मनकीर्त्तयेत् १११ शयानःप्रौढपादश्चकृ
त्वाचैवावसक्थिकाम् नाधीयीतामिषंजग्ध्वासूतकान्नाद्यमेवच ११२ नीहारेबाणशब्देचसंध्ययो
रेवचोभयोः अमावास्याचतुर्दश्योःपौर्णमास्यष्टकासुच ११३ अमावास्यागुरुंहंतिशिष्यंहंतिच
तुर्दशी ब्रह्माष्टकापौर्णमास्यौतस्मात्ताःपरिवर्जयेत् ११४ पांशुवर्षेदिशांदाहेगोमायुविरुतेतथा
श्वखरोष्ट्रेचरुवतिपंक्तौचनपठेद्द्विजः ११५ नाधीयीतश्मशानांतेग्रामांतेगोव्रजेपिवा वसित्वामैथु
नंवासःश्राद्धिकंप्रतिगृह्यच ११६ प्राणिवायदिवाप्राणियत्किंचिच्छ्राद्धिकंभवेत् तदालभ्याप्यनध्या
यःपाण्यास्योहिद्विजःस्मृतः ११७

स्येति यस्मादमावास्यागुरुंहंतिशिष्यंहंतिचतुर्दशी वेदंचाष्टमीपौर्णमास्यौविस्मार
यतः तस्मात्ताअध्ययनाध्यापनयोःपरित्यजेत् ११४ पांशुवर्षइति धूलिवर्षेदिशांदाहे शृगालकुक्कुरगर्दभोष्ट्रेषुचरुवत्सुपंक्तौ
चोपविश्यपठनकृतत्वात्सृगालश्वखरादीनामेवब्राह्मणोनपठेत् ११५ नाधीयीतेति श्मशानसमीपेग्रामसमीपेगोष्ठेचमैथुनसमय
धृतवासःपरिधायश्राद्धीयंचकिंचिद्दान्नादिप्रतिगृह्यनाधीयीत ११६ प्राणिन्वेति श्राद्धिकमन्नादिभुक्त्वातावदनध्यायोभवतीत्य

कंप्राणिवागवाश्वादिअप्राणिवावस्त्रमाल्यादिप्रतिग्रहकालेहस्तेन गृहीत्वानध्यायोभवतियस्मात्पाणिरेवास्यमस्येतिपाण्यास्योहिब्राह्मणःस्मृतः ११७ चौरैरिति चौरैरुपप्लुतेग्रामेगृहादिदाहादिकृतेभयेदिव्यांतरिक्षभौमेषुचाद्भुतेषुउत्पाद्यमयेषुआकालिकमनध्यायंजानीयात् ११८ उपाकर्मणीति उपाकर्मणिचोत्सर्गेत्रिरात्रमध्ययनक्षेपणम् उत्सर्गेपक्षिण्यहोरात्रावनध्यायुक्तौ तत्रायंधर्मनैपुण्यकामंप्रतित्रिरात्रोपदेशः तथाग्रहायण्याऊर्ध्वंकृष्णपक्षाष्टमीषुतिसृषुचतसृषुचाहोरात्रमनध्यायःदिवाकालमात्रसञ्ज्ञवेपिपौर्णमास्यष्टकासूत्वेत्यनेनयावदष्टम्येवानध्यायइतराष्टमीषूक्तइत्यपुनरुक्तिः ऋत्वंताहोरात्रेषुचानध्याय ११९ नधीयीतेति तुरगतरुकरिनौकाखरोष्ट्रारूढः तयोषरदेशस्थः शकटादियानेनगच्छन्नाधीयीत १२० नविवादइति

चौरैरुपप्लुतेग्रामेसंभ्रमेचाग्निकारिते आकालिकमनध्यायंविद्यात्सर्वाद्भुतेषुच ११८ उपाकर्मणिचोत्सर्गे त्रिरात्रंक्षेपणंस्मृतम् अष्टकासुत्वहोरात्रमृत्वंतासुचरात्रिषु ११९ नाधीयीताश्वमारूढोनवृक्षंनचहस्तिनम् ननावंनखरंनोष्ट्रंनेरिणस्थोनयानगः १२० नविवादेनकलहेनसेनायानसंगरे नभुक्तमात्रेनाजीर्णेनवमित्वानसूतके १२१ अतिथिंचाननुज्ञाप्यमारुतेवातिवाभृशम् रुधिरेचस्रुतेगात्राच्छस्त्रेणचपरिक्षते १२२ सामध्वनावृग्यजुषीनाधीयीतकदाचन वेदस्याधीत्यवाप्यंतमारण्यकमधीत्यच १२३

देवा कलहेकलहेदंडादंड्यादौसेनायांअमरत्तसुद्वायांसंगरेयुद्धे भोजनानंतरंचयावदार्द्रहस्तो यावदार्द्रपाणिरितिवसिष्ठस्मरणात् तथाअजीर्णेऽन्नेवमनंच कृत्वाअम्लोद्गारेचनपठेत् १२१ अतिथिमिति उनंकरोमीतियावदतिथिरनुज्ञापितोनभवतिमारुतेचात्यर्थवातिरुधिरेचगात्रात्स्रुतेरुधिरस्रवंविनापिशस्त्रेणक्षतमात्रेपिनाधीयीत १२२ सामध्वनाविति सामध्वनौचश्रूयमाणेऋग्यजुषोःकदाचिदध्ययनन्नकुर्यात् वेदंचसमाप्यचारण्यकाख्यंचवेदंमधीत्यतदहोरात्रेवेदांतरंनाधीयीत १२३ ऋग्वेदेति सामगानश्रुतौऋग्यजुषोरनध्यायउक्तः तस्यायमनुवादः ऋग्वेदोदेवएवदेवताअस्येतिदेवदैवत्यः यजुर्वेदोमानुषोमानुषदेवताकत्वात् प्रायेणमानुषकर्मोपदेशाद्वामानुषः सामवेदःपितृदेवताक-

त्वात्पित्र्यः पितृकर्मकृत्वाजलोपस्पर्शनंस्मरंति तस्मात्तस्याशुचिरिवध्वनिःनत्वशुचिरेव अतस्तस्मिन्श्रूयमाणेऋग्यजुषीनाधीयीत १२४ एतद्विदंतइति एतद्वेदत्रयस्यदेवमनुष्यपितृदेवताकत्वंजानंतः शास्त्रज्ञास्त्रयीनिष्कर्षसारोद्धृतंव्याहृतिसावित्र्यात्मकंप्रणवव्याहृतिसावित्रीःक्रमेणपूर्वमधीत्यपश्चाद्वेदाध्ययनंकुर्युः द्वितीयाध्यायोक्तोप्ययमर्थःपुनरनध्यायप्रकरणेऽभिहितः यथैतेयथोक्तानध्यायाएवंप्रणवव्याहृतिसावित्रीरूपवितारूअनध्यायइतिदर्शयितुंशिष्यस्याध्यापनमेवंकर्त्तव्यमितिस्नातकव्रतलाघवमार्थंच १२५ पशुमंडूकेति पशुर्गवादिःमंडूकविडालकुक्कुरसर्पनकुलमूषिकैःशिष्योपाध्याययोर्मध्यगमनेअनध्यायमहोरात्रंजानीयात् १२६ संप्रतिविधानैपुण्यकांप्रतिपूर्वोक्तानध्यायविकल्पार्थमाह द्वावेवेति स्वाध्यायभूमिंचोच्छिष्टादिमेध्योपहताम् आत्मानंचयथोक्तशौचरहितमितिद्वावेवानध्यायौनित्यंप्रयत्नतोवर्जयेत् नतुपूर्वोक्तान्तेषामपिय

ऋग्वेदोदेवदैवत्योयजुर्वेदस्तुमानुषः सामवेदःस्मृतःपित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः १२४ एतद्विदंतोविद्वांसस्त्रयीनिष्कर्षमन्वहम् क्रमतःपूर्वमभ्यस्यपश्चाद्वेदमधीयते १२५ पशुमंडूकमार्जारश्वसर्पनकुलाखुभिः अंतरागमनेविद्यादनध्यायमहर्निशम् १२६ द्वावेववर्जयेन्नित्यमनध्यायौप्रयत्नतः स्वाध्यायभूमिंचाशुद्धामात्मानंचाशुचिंद्विजः १२७ अमावास्यामष्टमींचपौर्णमासींचतुर्दशीम् ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजः १२८ नस्नानमाचरेद्भुक्त्वानातुरोनमहानिशि नवासोभिःसहाजस्रंनाविज्ञातेजलाशये १२९

अनित्यग्रहणंअनुवादोवानित्यत्वापेक्षकोऽयास्तितानपिनित्यंवर्जयेत् अन्यत्रविकल्पः १२७ अमावास्यामिति अमावास्यादिषुऋतावपिस्नातकोद्विजोनस्त्रियमुपगच्छेत् पर्ववर्जंभजेच्चैनामित्यनेनैवनिषेधसिद्धौस्नातकव्रतलोपप्रायश्चित्तार्थमिहवर्जनम् १२८ नस्नानमिति नित्यस्नानस्यभोजनानंतरगमसक्तेश्चांडालादिस्पर्शनिमित्तकस्यमुहूर्त्तमपिशक्तिविषयेनाप्रयतःस्यादित्यापस्तंबस्मरणात्निषेद्धुमयोग्यत्वात्यदृच्छास्नानमिदंभोजनानंतरंनिषिध्यते तथारोगीनैमित्तिकमपिस्नानंनकुर्यात् किंतुयथासामर्थ्यम् अशिरस्कंभवेत्स्ना

नंस्नानाशक्तौतुकर्मिणाम् ओर्द्रेणवाससावास्यान्मार्ज्जनंदैहिकंविदुः इत्यादिजाबालाद्युक्तमनुसंधेयम् तथामहानि
शिविशेयामध्यस्थंप्रहरद्वयम् तस्मिन्स्नानन्नकुर्वीतकाम्यनैमित्तिकादृतइति देवलवचनात्तत्रनस्नायात् बहुवासाश्चनि
त्यन्नस्नायात्नैमित्तिकचांडालादिस्पर्शेसतितुस्नानबहुवाससोप्यनिषिद्धम् ग्राहाद्याक्रांतागाधरूपतयाविशेषेणाज्ञाते
जलाशयेच १२९ देवतानामिति देवतानांपाषाणादिमयीनांगुरोःपित्रादेःनृपतेःस्नातकस्याचार्यस्यचगुरुत्वेप्याचार्यस्यप्रा
धान्यविवक्षयापृथङ्निर्देशः बभ्रुणःकपिलस्ययज्ञेदीक्षितस्यचेच्छयाछायांनाक्रामेत्चशब्दाच्चांडालादीनामपि कामतइत्य
भिधानात्अबुद्धिपूर्वकेनदोषः १३० मध्यंदिनइति दिवारात्रेचसंपूर्णप्रहरद्वयेसमांसंचश्राद्धंभुक्त्वाप्रातःसायंसंध्ययो
निरंचतुष्पथंनाधितिष्ठेत् १३१ उद्वर्त्तनमिति उद्वर्त्तनमभ्यंगमलापकर्षणपिष्टकादिअपस्नानंस्नानोदकंमूत्रपुरीषेरुधि

देवतानांगुरोराज्ञःस्नातकाचार्ययोस्तथा नाक्रामेत्कामतश्छायांबभ्रुणोदीक्षितस्यच १३० म
ध्यंदिनेऽर्द्धरात्रेच श्राद्धंभुक्त्वाचसामिषम् संध्ययोरुभयोश्चैवनसेवेतचतुष्पथम् १३१ उद्वर्त्तन
मपस्नानंविण्मूत्रेरक्तमेवच श्लेष्मनिष्ठ्यूतवांतानिनाधितिष्ठेत्तुकामतः १३२ वैरिणंनोपसेवेत
सहायंचैववैरिणः अधार्मिकंतस्करंचपरस्यैवचयोषितम् १३३ नहीदृशमनायुष्यंलोकेकिंचन
विद्यते यादृशंपुरुषस्येहपरदारोपसेवनम् १३४ क्षत्रियंचैवसर्पंचब्राह्मणंचबहुश्रुतम् नाव
मन्येतवैभूष्णुःकृशानपिकदाचन १३५

रंचश्लेष्माणंनिष्ठ्यूतमश्लेष्मरूपमपिचर्वितपरित्यक्तरूपतांबुलादि
वांतंभुक्त्वाउद्गीर्णभक्तादिएतानिकामतोनाधितिष्ठेत् अधिष्ठानंतत्रपर्यवस्थानम् १३२ वैरिणमिति शत्रुंतन्मित्रंभिणमधर्म-
शीलंचौरंपरदारान्नसेवेत् चौरस्याधार्मिकत्वेप्यत्यंतगर्हितत्वात्पृथङ्निर्देशः १३३ नहीदृशमिति यस्मादीदृशमनायुष्यमि
हलोकेपुरुषस्यनकिंचिदस्तियादृशंपरदारगमनम् तस्मादेतन्नकर्त्तव्यम् १३४ क्षत्रियमिति वृध्यर्थेभूधातुःभूष्णुः
वर्द्धिष्णुः धनगवादिनावर्द्धनशीलः क्षत्रियंसर्पंबहुश्रुतंचब्राह्मणन्नावजानीयात् कृशानपिकालेप्रतीकारक्षमान् १३५

एतत्त्रयमिति एतत्त्रयमवमानितंसदवमंतारंविनाशयतिक्षत्रियसर्पौदृष्टशात्त्याब्राह्मणश्चाभिचारादिनादृष्टेनतस्मात्कल्याणबु द्धिरेतत्त्रयंसर्वदानावजानीयात् १३६ नात्मानमिति प्रथमंधनार्थमुद्यमेकृतेतत्रधनानामसंपत्तिभिर्मंदभाग्योहमितिनात्मान मवजानीयात्किंतुमरणपर्यंतंश्रीसिद्ध्यर्थमुद्यमंकुर्यात् नतुइमान्दुर्लभांबुध्येत् १३७ सत्यंब्रूयादिति यथादृष्टश्रुतंतत्सत्यंब्रू यात् तत्प्रियमितिसाधनंब्रूयात्पुत्रस्तेजातइति यथादृष्टश्रुतमप्यप्रियंपुत्रस्तेमृतइत्यादिनवदेत् एषवेदमूलत्वान्नित्योधर्मः १३८ भद्रमिति प्रथमंभद्रपदमभद्रपदपरंद्वितीयंभद्रशब्दपर्यायपरं अभद्रंयत्तद्भद्रशब्दपर्यायपरमप्रशस्तादिशब्देनप्रब्रूयात् न त्वाचापस्तंवः नासद्भमभद्रंब्रूयात्पुण्यंप्रशस्तमितिब्रूयात् भद्रमित्येवेति भद्रेभद्रपदमेवप्रातत्प्रयोज्यंशुष्कन्निःप्रयोजनंवैरंविवा

एतत्त्रयंहिपुरुषंनिर्दहेदवमानितम् तस्मादेतत्त्रयंनित्यंनावमन्येत्बुद्धिमान् १३६ नात्मानमव मन्येतपूर्वाभिरसमृद्धिभिः आमृत्योःश्रियमन्विच्छेन्नैनांमन्येतदुर्लभाम् १३७ सत्यंब्रूयात्प्रियंब्रूया न्नब्रूयात्सत्यमप्रियम् प्रियंचनानृतंब्रूयादेषधर्मःसनातनः १३८ भद्रंभद्रमितिब्रूयाद्भद्रमित्येववा वदेत् शुष्कवैरंविवादंचनकुर्यात्केनचित्सह १३९ नातिकल्यंनातिसायंनातिमध्यंदिनेस्थिते नाज्ञा तेनसमंगच्छेन्नैकोनवृषलैःसह १४० हीनांगानतिरिक्तांगान्विद्याहीनान्वयोधिकान् रूपद्रव्यवि हीनांश्चजातिहीनांश्चनाक्षिपेत् १४१ नस्पृशेत्पाणिनोच्छिष्टोविप्रोगोब्राह्मणानलान् नचापिपश्येद शुचिःस्वस्थोज्योतिर्गणान्दिवि १४२

दंकेनचित्सहकुर्यात् १३९ नातिकल्यमिति उषःसमयेप्रदोषेचादिवासंपू र्णमहरद्वयेच अज्ञातशीलेनपुरुषेणशूद्रैश्चसहनगच्छेत् नैकःप्रपद्येताध्वानमित्यस्मिन्प्रतिषेधेपिपुनर्नैकइतिप्रतिषेधःस्ना तकव्रतलोपप्रायश्चित्तगौरवार्थः १४० हीनांगानिति हीनांगाधिकांगमूर्खवृद्धकुरूपहीनजातीन्काणशब्दाह्वानादिनान निंदेत् १४१ नस्पृशेदिति कृतभोजनःकृतमूत्रपुरीषादिश्चाकृतशौचाचमनोब्राह्मणोहस्तादिनागोब्राह्मणाग्नीन्नस्पृशेत् नचाशुचिःसन्अनातुरोदिविस्थान्सूर्यचंद्रग्रहादिज्योतिर्गणान्पश्येत् १४२ स्पृशेतानिति एतानावादीनशुचिःसन्-

स्पृष्ट्वाकृताचमनः पाणिनागृहीताभिरद्भिः प्राणांश्चक्षुरादीनींद्रियाणिशिरःस्कंधजानुपादान्नाभिंचस्पृशेत् अप्रकरणेचेदं
शायश्चित्ताभिधानंलाघवार्थंतत्प्रकरणेगवादिग्रहणमपिकर्त्तव्यंस्यात् १४३ अनातुरइति अनातुरःसन्स्वानिखानिइंद्रिय
णिछिद्राणिरोमाणिचगोप्यानिउपस्थकक्षगतानिनिर्निमित्तंनस्पृशेत् १४४ मंगलाचारयुक्तःस्यादिति अभिप्रेतार्थसिद्धिर्मं
गलम् तद्धेतुत्वेनगोरोचनादिधारणमपिमंगलंगुरुसेवादिकमाचारस्तत्रोद्युक्तःस्यात् बाह्याभ्यंतरशौचोपेतोजितेंद्रियोभवेत्
गायत्र्यादिजपंविहितहोमंचकुर्यात् अतंद्रितः अनलसः अत्राचारादियुक्तानामपिविनिपातनिरस्त्यर्थत्वात्पुनरभिधानम् १४
अतआह मंगलाचारयुक्तानामिति मंगलाचाराभ्यांयुक्तानान्नित्यंसुचीनांजपहोमरतानांदैवमानुषोपद्रवोनजायते १४६

स्पृष्ट्वैतानसुचिर्नित्यमद्भिःप्राणानुपस्पृशेत् गात्राणिचैवसर्वाणिनाभिंपाणितलेनतु १४३ अना
तुरःस्वानिखानिनस्पृशेदनिमित्ततः रोमाणिचरहस्यानिसर्वाण्येवविवर्जयेत् १४४ मंगलाचारयु
क्तःस्यात्प्रयतात्माजितेंद्रियः जपेच्चजुहुयाच्चैवनित्यमग्निमतंद्रितः १४५ मंगलाचारयुक्तानांनित्यं
चप्रयतात्मनाम् जपतांजुह्वतांचैवविनिपातोनविद्यते १४६ वेदमेवाभ्यसेन्नित्यंयथाकालमतंद्रितः
तंह्यस्याहुःपरंधर्ममुपधर्मोऽन्यउच्यते १४७ वेदाभ्यासेनसततंशौचेनतपसैवच अद्रोहेणचभूता-
नांजातिंस्मरतिपौर्विकीम् १४८ पौर्विकींसंस्मरन्जातिंब्रह्मैवाभ्यसतेपुनः ब्रह्माभ्यासेनचाजस्र-
मनंतंसुखमश्नुते १४९

वेदमेवेति नित्यकृत्यावसरेश्रेयोहेतुतयाप्रणवगायत्र्यादिकंवेदमेवानलसोजपेत् यस्मा
त्तंब्राह्मणस्यश्रेष्ठंधर्ममन्वादयोवदंति अन्यःपुनस्ततोऽपकृष्टोधर्मोमुनिभिरुच्यते उक्तस्यैववेदाभ्यासादेः पूर्वजातिस्मरणद्वा
रेणमोक्षहेतुत्वंवदितुंपुनरभिधानम् १४७ वेदाभ्यासेनेति सततवेदाभ्यासशौचतपोऽहिंसाभिः पूर्वभवस्यजातिंस्मरति
१४८ ततःकिमतआह पौर्विकीमिति पूर्वजातिंस्मरन्जातिमित्येकत्वमनाकांक्षितत्वादविवक्षितम् बहूनिजन्मानिस्मरंस्ते
षुचगर्भजन्मजरामरणदुःखान्यपिस्मरन्संसारेविरज्यन्ब्रह्मैवाजस्रमभ्यसतिश्रवणमननध्यानैःसाक्षात्करोतितेनचानंतम

विनाशिपरमानंदाविर्भावलक्षणंमोक्षफलंप्राप्नोति सावित्रानिति सावित्रीदेवताकान् होमान् अनिष्टनिरसनार्थं शांतिहोमां

पौर्णमास्यमावास्ययोः सर्वदाकुर्यात् तथा आग्रहायण्याऊर्ध्वंकृष्णाष्टमीषुतिसृषुचाष्टकाख्येनकर्मणाश्राद्धेनचतदंतरित

कृष्णनवमीषुचान्वष्टकाख्येन परलोकगतान् पितॄन् यजेत् १५० दूरादावसथादिति नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं-

फलइतिविष्णुपुराणवचनादेवंविधादग्निगृह दूरान्मूत्रपुरीषपादप्रक्षालनसकलोच्छिष्टान्नानिनिषिच्यतइतिनिषेकं रेत-

श्चोत्सृजेत् १५१ मैत्रमिति मित्रदेवताकत्वान्मैत्रः पायुः तद्वत्वान्मैत्रंपुरीषोत्सर्गम् तथादेहप्रसाधनप्रातःस्नानदंतधा

वनांजनदेवार्चनादिपूर्वाण्हएवकुर्यात् पूर्वाण्हशब्देनरात्रिशेषदिनपूर्वभागाविहविवक्षितौपदार्थमात्रविधिपरत्वाच्चास्यपाठ

क्रमोपिनादरणीयः नहिस्नानानंतरंदंतधावनम् १५२ दैवतानीति पाषाणादिमयानिधर्मप्रधानांश्चब्राह्मणान् रक्षार्थंसजा

सावित्रान् शांतिहोमांश्चकुर्यात्पर्वसुनित्यशः पितॄंश्चैवाष्टकास्तर्पयेन्नित्यमन्वष्टकासुच १५० दूरा

दावसथान्मूत्रंदूरात्पादावसेचनम् उच्छिष्टान्ननिषेकंच दूरादेवसमाचरेत् १५१ मैत्रंप्रसाधनंस्नानं

दंतधावनमंजनम् पूर्वाण्हएवकुर्वीतदेवतानांचपूजनम् १५२ दैवतान्यभिगच्छेत्तुधार्मिकांश्चद्वि

जोत्तमान् ईश्वरंचैवरक्षार्थंगुरूनेवचपर्वसु १५३ अभिवादयेद्वृद्धांश्चदद्याच्चैवासनंस्वकम् कृ-

तांजलिरुपासीतगच्छतःपृष्ठतोन्वियात् १५४ श्रुतिस्मृत्युदितंसम्यङ्निबद्धंस्वेषुकर्मसु धर्ममूलंनि

षेवेतसदाचारमतंद्रितः १५५

दिकंगुरूंश्चपित्रादीनमावास्यादिपर्वसुद्रष्टुमभिमुखोगच्छेत् १५३ अभिवाद-

येदिति गृहागतान् गुरूनभिवादयेत्तेषांचस्वीयमासनंउपवेष्टुंदद्यात् बद्धांजलिश्चगुरुसमीपआसीत् गच्छतश्चपृष्ठ

देशेऽनुगच्छेत् उक्तोप्ययमभिवादनाद्याचारः फलाभिधानायपुनरुच्यते १५४ श्रुतिस्मृत्युदितमिति वेदस्मृतिभ्यांसम्य

गुक्तंस्वेषुकर्मसुअध्ययनादिष्वंगत्वेनसंबंधंधर्मस्यहेतुंसाधूनामाचारमनलसः सन्नितांतंसेवेतेतिसामान्येनाचारानुष्ठानो

पदेशःफलकथनाय १५५ आचारादिति आचाराद्वेदोक्तमायुर्लभतेअभिमताश्चप्रजाःपुत्रपौत्रदुहित्रात्मिकाःप्रभूतंच-

धनंअशुभफलसूचकंचदेहस्थमलक्षणमाचारोनिष्फलयति आचारस्यधर्मेणालक्षणसूचितारिष्टनाशात् १५६ दुराचा
रोहीति यस्माद्दुराचारःपुरुषोलोकेगर्हितःस्यात्सर्वदादुःखान्वितोरोगवान् अल्पायुश्चभवति तस्मात्सदाचारयुक्तःस्यात्
१५७ सर्वलक्षणहीनोपीति यःसदाचारवान् श्रद्धान्वितःपरदोषानभिधातास्शुभसूचकलक्षणशून्योपिशतायुर्भवति
१५८ यद्यत्परेति यद्यत्कर्मपराधीनंपरप्रार्थनादिसाध्यंतत्तद्यत्नतोवर्जयेत् यद्यत्स्वाधीनदेहव्यापारसाध्यंपरमात्मग्रहा
दितत्तद्यत्नतोऽनुतिष्ठेत् १५९ अत्रहेतुमाह सर्वपरवशमिति सर्वपरप्रार्थनादिसाध्यंदुःखहेतुःसर्वमात्माधीनंसुखहेतुः
एतत्सुखदुःखयोःकारणंजानीयात् १६० यत्कर्मकुर्वन्निति यत्कर्मकुर्वतोऽस्यानुष्ठातुःपुरुषस्यांतरात्मनःतुष्टिःस्यात्तत्प्रयत्न

आचाराल्लभतेह्यायुराचारादीप्सिताःप्रजाः आचाराद्धनमक्षय्यमाचारोहंत्यलक्षणम् १५६ दु-
राचारोहिपुरुषोलोकेभवतिनिंदितः दुःखभागीचसततंव्याधितोल्पायुरेवच १५७ सर्वलक्षणही
नोपियःसदाचारवान्नरः श्रद्दधानोनसूयश्चशतंवर्षाणिजीवति १५८ यद्यत्परवशंकर्मतत्तद्यत्नेन
वर्जयेत् यद्यदात्मवशंतुस्यात्तत्तत्सेवेतयत्नतः १५९ सर्वंपरवशंदुःखंसर्वमात्मवशंसुखम् एत
द्विद्यात्समासेनलक्षणंसुखदुःखयोः १६० यत्कर्मकुर्वतोऽस्यस्यात्परितोषोऽन्तरात्मनः तत्प्रयत्नेन
कुर्वीत विपरीतंतुवर्जयेत् १६१ आचार्यंचप्रवक्तारंपितरंमातरंगुरुम् नहिंस्याद्ब्राह्मणान्गाश्च
सर्वांश्चैवतपस्विनः १६२ नास्तिक्यंवेदनिंदांचदेवतानांचकुत्सनम् द्वेषंदंभंचमानंचक्रोधंतैक्ष्ण्यं
चवर्जयेत् १६३

तोऽनुष्ठेयंअतुष्टिकरंवर्जयेत् एतच्चाविहितानिषिद्धगोचरंवैकल्पिकविषयंच १६१ आचार्यंचेति आ
चार्यमुपनयनपूर्वकवेदाध्यापकंप्रवक्तारंवेदार्थव्याख्यातारंगुरुमल्पंवाबहुवायस्येत्युक्तं आचार्यादींस्तुनहिंसेत् प्रतिकू
लाचरणेऽत्रहिंसाशब्दः गोविंदराजस्तु सामान्येनहिंसानिषेधात्आततायिनोप्येतान्नहिंस्यादितिव्याख्यातवान् तदयुक्तं
गुरुंवाबालवृद्धौवाइत्यनेनविरोधात् १६२ नास्तिक्यमिति नास्तिपरलोकइतिबुद्धिंवेदस्यदेवतानांचनिंदांमात्सर्यंधर्मानुल

हाभिमानकोपक्रौर्याणित्यजेत् १६३ परस्यदंडमिति परस्यहननार्थंक्रुद्धःसन् दंडादिनोत्क्षिपेत् नचपरगात्रेनिपातयेत्पुत्रशि
ष्यभार्यादासादेरन्यत्रकृतापराधानेताननुशासनार्थंरज्वावेणुदलेनवाइत्यादिवक्ष्यमाणप्रकारेणताडयेत् १६४ ब्राह्मणायेति द्वि
जातिरपिब्राह्मणस्यहननार्थंदंडादिकमुद्यम्यैवनतु निपात्यवर्षशतंतामिस्रादिनरकेपरिभ्रमति १६५ ताडयित्वातृणेनापीति तृणे
नापिक्रोधाद्बुद्धिपूर्वकंब्राह्मणंताडयित्वाएकविंशतिजन्मानिपापयोनिषुकु क्कुरादियोनिषुजायते १६६ अयुध्यमानस्येति अयुध्य
मानस्यब्राह्मणस्यांगेशास्त्रानभिज्ञतयाशोणितमुत्पाद्यपरलोकेचमहद्दुःखमाप्नोति १६७ शोणितमिति खड्गादिहतब्राह्मणां
गनिर्गतंरुधिरंभूमिपतितंयावतोधूलिद्व्यणुकान् पिंडीकरोतितावत्संख्यानिवर्षाणिपरलोकेशोणितोत्पादकःप्रहर्त्ताअन्यैःश्वशृ

परस्यदंडंनोद्यच्छेत्क्रुद्धोनैवनिपातयेत् अन्यत्रपुत्राच्छिष्याद्वाशिष्ट्यर्थंताडयेत्तुतौ १६४ ब्राह्मणा
यावगुर्य्यैवद्विजातिर्वधकाम्यया शतंवर्षाणितामिस्रेनरकेपरिवर्त्तते १६५ ताडयित्वातृणेनापिसंरं
भान्मतिपूर्वकम् एकविंशतिमाजातीःपापयोनिषुजायते १६६ अयुध्यमानस्योत्पाद्यब्राह्मणस्या
सृगंगतः दुःखंसुमहदाप्नोतिप्रेत्याप्राज्ञतयानरः १६७ शोणितंयावतःपांसून्संगृह्णातिमहीतला
त् तावतोब्दानमुत्रान्यैःशोणितोत्पादकोद्यते १६८ नकदाचिद्द्विजेतस्माद्विद्वानवगुरेदपि नताड
येत्तृणेनापिनगात्रात्स्रावयेदसृक् १६९ अधार्मिकोनरोयोहियस्यचाप्यनृतंधनम् हिंसारतश्चयो
नित्यन्नेहासौसुखमेधते १७०

गालादिभिर्भक्ष्यते १६८ नकदाचिदिति तस्मादवगोरणादिदोषाभिज्ञोब्राह्मणेदं
डाद्युद्यमननिपातरुधिरस्रवणानिनापद्यपिकुर्यादितिपूर्वोक्तक्रियात्रयस्योपसंहारः १६९ अधार्मिकइति अधर्मेणव्यवहरतीति
ति अधार्मिकः शास्त्रप्रतिषिद्धागम्यागमनाद्यनुष्ठातायोमानुषोयस्यचसाक्ष्येव्यवहारनिर्णयादौचमिथ्याभिधानमेवधनोपाय
असत्यमभिधायोत्कोचधनंगृह्णातियश्चपरहिंसाभिरतः नासाविहलोकेसुखयुक्तोवर्त्तते तस्मादेतन्नकर्त्तव्यमितिनिंदात्रिषे
धःकल्प्यते १७० नसीदन्नपीति शास्त्रविहितमनुतिष्ठन् धनाद्यभावेन अवसीदन्नपिकदाचिन्नाधर्मेबुद्धिंकुर्यात् यस्मा

दधर्मव्यवहारिणोयद्यप्यापाततोधनादिसंपद्भागिनोपिदृश्यंते तथापितेषामधार्मिकाणांअधर्मचौरादिव्यवहारिणांपापिनां तज्जनितदुरितशालिनांशीघ्रंधनादिविपर्ययोपिदृश्यते तंपश्यन्नाधर्मेधियंदद्यादितिविशिष्यहितायदृष्टमर्थंदर्शितवान् १७१ नाधर्मइति शास्त्रेणानियमितकालपरिपाकत्वात् शुभाशुभकर्मणांनाधर्मोऽनुतिष्ठतःतत्कालएवफलतिगौरिवइह भूमिपक्षे- साधर्म्यदृष्टांतः यथाभूमिकृतबीजमात्रातदैवप्रचुरपचेलिमफलव्रीहिस्तवकसंवलितानभवति किंतुनियमफलपाकसमयमा- साद्य पशुपक्षेवैधर्म्यदृष्टांतः यथागौःपशुर्वाहदोहाभ्यांसद्यःफलतिनैवमधर्मः किंतुक्रमेणावर्त्तमानःफलोन्मुखोभवन्नधर्म कर्त्तुर्मूलानिछिंदंतिमूलच्छेदेनसर्वनाशोलक्ष्यते देहधनाद्यन्वितोनश्यति १७२ यदीति यदिस्वयंकर्त्तुर्देहधनादिनाशंफल ञ्भजनयतिनदातत्पुत्रेषु नोचेत्पौत्रेषुजनयतिनत्तुनिष्फलएवभवति ननुअन्यकृतस्यकर्मणःकथमन्यत्रफलजनकत्वंउच्यते

नसीदन्नपिधर्मेणमनोधर्मेनिवेशयेत् अधार्मिकाणांपापानामाशुपश्यन्विपर्ययम् १७१ नाधर्म श्चरितोलोकेसद्यःफलतिगौरिव शनैरावर्त्तमानस्तुकर्त्तुर्मूलानिकृंतति १७२ यदिनात्मनिपुत्रेषु नचेत्पुत्रेषुनप्तृषु नत्वेवतुकृतोऽधर्मःकर्त्तुर्भवतिनिष्फलः १७३ अधर्मेणैधतेतावत्ततोभद्राणि पश्यति ततःसपत्नाञ्जयतिसमूलस्तुविनश्यति १७४ सत्यधर्मार्यवृत्तेषुशौचेचैवारमेत्सदा शिष्यांश्चशिष्याद्धर्मेणवाग्बाहूदरसंयतः १७५

पुत्रादिनाशस्यपितुःक्लेशहेतुत्वात्शास्त्रीयत्वाच्चास्यार्थस्य नाविश्वासः १७३ अधर्मेणेति अधर्मेणपरद्रोहादिनातावदापाततोग्रामधनादिनावर्द्धते ततोभद्राणिबहुभृत्यगवाश्वादी निलभते ततःशत्रूंस्वस्मादपकृष्टान्जयतिपश्चात्क्रियताकालेनाधर्मपरिपाकवशात्देहधनतनयादिसहितोविनश्यति १७४ सत्यधर्मार्यवृत्तेष्विति सत्यधर्मसदाचारशौचेषुसर्वदारतिंकुर्यात् शिष्यांश्चानुशासनीयान्भार्यापुत्रदासछात्रान्र- ज्जुवेणुदलेनवेतिशासयेत् उक्तानामप्यभिधानादादरार्थंवाग्बाहूदरसंयतश्चस्यात् वाक्संयमःसत्यभाषित्वं बाहुसंयमोबा हुबलेनकस्याप्यपीडनम् उदरसंयमोयथालब्धाल्पभोजनम् १७५ ६ ६ ६ ६

पंरित्यजेदिति यावर्थकामौधर्मविरोधिनौ भवेतांतौपरिहरेत् यथाचौर्यादिनार्थोपपादनम् दीक्षादिनेयजमानस्यपत्न्युपगमः उदर्कउत्तर- न
कालः तत्रासुखंयत्रधर्मेतद्धर्ममपिपरित्यजेत् यथापुत्रादिवर्गेणोप्ययुक्तस्यसर्वस्वदानम् लोकविक्रुष्टंयत्रलोकानांविक्रोशः यथाकलौमध्य-
माष्टकादिषुगोवधादिः १७६ नपाणिपादचापलइति पाण्यादिचापलंत्यजेत् अनुपयुक्तवस्तूपादानादिपाणिचापलंनिष्प्रयोजनंभ्र
मणादिपादचापलंपरस्त्रीप्रेक्षणादिरसोनेत्रचापलंबहुगर्ह्यवादितावाक्चापलंअनृजुःकुटिलोनस्यात् परद्रोहोहिंसातदर्थंचेष्टांधियं
चनकुर्यात् १७७ येनेति बहुविधशास्त्रार्थसंभवेपितृपितामहाद्यनुष्ठितएवशास्त्रार्थोऽनुष्ठातव्यः तेनगच्छन्नरिष्यतेनाधर्मेणहिंस्या
त् १७८ ऋत्विगितिवचनद्वयम् ऋत्विगादिभिर्वाक्कलहंनकुर्यात् शांत्यादिकर्त्तापुरोहितःसंश्रिताअनुजीविनः ज्ञातयःपितृपक्षाःसं
बंधिनःश्यालकादयः बांधवामातृपक्षाः यामयोभगिनीस्नुषाद्याः १७९ १८० एतैरिति एतैःऋत्विगादिभिःसहविवादान्परित्यज्य

परित्यजेदर्थकामौयौस्यातान्धर्मवर्जितौ धर्मंचाप्यसुखोदर्कंलोकविक्रुष्टमेवच १७६ नपाणिपादच
पलोननेत्रचपलोऽनृजुः नस्याद्वाक्चपलश्चैवनपरद्रोहकर्मधीः १७७ येनास्यपितरोयातायेनयाताःपि
तामहाः तेनयायात्सतांमार्गंतेनगच्छन्नरिष्यते १७८ ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः बा
लवृद्धातुरैर्वैद्यैर्ज्ञातिसंबंधिबांधवैः १७९ मातापितृभ्यांयामीभिर्भ्रात्रापुत्रेणभार्यया दुहित्रादास
वर्गेणविवादंनसमाचरेत् १८० एतैर्विवादान्संत्यज्यसर्वपापैःप्रमुच्यते एभिर्जितैश्चजयतिसर्वान्
लोकानिमान्गृही १८१ आचार्योब्रह्मलोकेशःप्राजापत्येपिताप्रभुः अतिथिस्त्विंद्रलोकेशोदेवलोक
स्यचर्त्विजः १८२

अज्ञानपापैःप्रमुच्यते तथैतैर्विवादैरुपेक्षितैरिमान्वक्ष्यमाणान्लोकान्गृहस्थोजयति १८१ आचा-
र्यइति आचार्योब्रह्मलोकस्यप्रभुःतेनसहविवादपरित्यागेनतत्संतुष्यातुब्रह्मलोकमाप्तिर्गौणंब्रह्मलोकेशत्वम् एवंप्राजापत्यलो
केशः प्राजापत्येपिताचप्रभुः अतिथिरिंद्रलोके देवलोकस्यचऋत्विजः एवमुत्तरत्रापितत्तल्लोकेशत्वंबोद्धव्यम् १८२ यामयइति
अप्सरसांलोकेयामयःप्रभवंति वैश्वदेवलोकेबांधवाः वरुणलोकेसंबंधिनः भूर्लोकेमातृमातुलौ १८३ आकाशेशास्त्विति रुशः

कृशधनः संश्रितो विवक्षितः बालवृद्धसंश्रितातुरा अंतरिक्षे प्रभवंति भ्राता च ज्येष्ठः पितृतुल्यः तस्मात्सोपि प्रजापतिलोकप्रभुः भार्या पुत्रौ च स्वशरीरमेव अतः कथमात्मनैव सह विवादः संभवति १८४ छायेति स्वदासवर्गश्च नित्यानुगतत्वात् आत्मच्छायेव न विवाहोंदुहिता च परं कृपापात्रं तस्मादेतैरधिक्षिप्तः सन् असंतापः सहेत न तु विवदेत् १८५ प्रतिग्रहसमर्थोपीति विद्यातपोवृत्तसंपन्नतया प्रतिग्रहेऽधिकार्यपि तत्र पुनःपुनःप्रवृत्तिं त्यजेत् यस्मात्प्रतिग्रहेण वेदाध्ययनादिनिमित्तप्रभावः शीघ्रमेव विनश्यति यात्रामात्रप्र-सिद्ध्यर्थमित्युक्तेपि सामान्येनार्जनसंकोचविशेषेण प्रतिग्रहस्य ब्राह्मणप्रभावप्रशमनफलत्वकथनार्थं वचनम् १८६ नद्रव्याणामिति द्रव्याणां प्रतिग्रहे धर्माय हितं विधानं ग्राह्यदेवताप्रतिग्रहमंत्रादिकमज्ञात्वा क्षुधावसानं गच्छन्नपि प्राज्ञो न प्रतिगृह्णीयात् किंपुनरनापदि

यामयोऽप्सरसांलोके वैश्वदेवस्यबांधवाः संबंधिनोह्यपांलोके पृथिव्यांमातृमातुलौ १८३ आकाशे
शास्तुविज्ञेयाबालवृद्धकृशातुराः भ्राताज्येष्ठःसमःपित्राभार्यापुत्रःस्वकातनुः १८४ छायास्वोदास
वर्गश्चदुहिताकृपणंपरम् तस्मादेतैरधिक्षिप्तःसहेतासंज्वरःसदा १८५ प्रतिग्रहसमर्थोपिप्रसंगंतत्र
वर्जयेत् प्रतिग्रहेणह्यस्याशुब्राह्मंतेजःप्रशाम्यति १८६ नद्रव्याणामविज्ञायविधिंधर्म्यंप्रतिग्रहे प्रा
ज्ञःप्रतिग्रहंकुर्यादवसीदन्नपिक्षुधा १८७ हिरण्यंभूमिमश्वंगामन्नंवासस्तिलान्घृतम् प्रतिगृह्णन्न
विद्वांस्तुभस्मीभवतिदारुवत् १८८ हिरण्यमायुरन्नंचभूर्गौश्चाप्योषतस्तनुम् अश्वश्चक्षुस्त्वचंवा-
सोघृतंतेजस्तिलाःप्रजाः १८९ अतपास्त्वनधीयानःप्रतिग्रहरुचिर्द्विजः अंभस्यश्मप्लवेनेवसहतेनैवम
ज्जति १९०

१८७ हिरण्यमिति स्वर्णादीन् श्रुतस्वाध्यायहीनः प्रतिगृह्णन्नग्निसंयोगेन दारुवद्भस्मीभूतो भवति पुनरुत्पत्तिं न लभते १८८ हिरण्यमिति अविदुषः प्रतिग्रहीतुर्भूर्गौश्च शरीरं ओषतो दहतः उषदाहे भौवादिकस्तस्येदं रूपं भूर्गवोर्द्वित्वविवक्षायां द्विवचनम् एवं हिरण्यमन्नं चायुरोषतः अश्वश्चक्षुरित्यादिषु विभक्तिविपरिणामादोषतीत्येकवचनांतस्यानुषंगः १८९ अतपास्त्विति यस्तपोविद्याशून्यः प्रतिग्रहेच्छुः ब्राह्मणो भवति स प्रतिग्रहाविनाभावात् तुल्यस्थेन तेन इति परामृष्टेनैव दात्रै वानर्हप्रतिग्रहादानपापयुक्तेन सह नरके मज्जति यथा पाषाणमयेनोडुपेनाम्भस्तरं तेनैव सहाम्भसि मग्नो भवति १९० ७ ७

तस्मादविद्वानिति यस्मादसावल्पद्रव्यप्रतिग्रहेणापिमूर्खः पंकेगौरिवनरकेऽसमर्थोभवतितस्माद्यतःकुतश्चिल्लक्षणादिव्यतिरिक्तसी
तस्मादविद्वानिति यस्मादसावल्पद्रव्यप्रतिग्रहेणापिमूर्खः पंकेगौरिवनरकेऽसमर्थोभवतितस्माद्यतः कुतश्चित्क्षपणादिव्यतिरिक्तात्
सकाशादसारप्रतिग्रहादपित्रस्येत् १९१ नवार्यपीति प्रतिग्रहीतुर्दोषमभिधायअधुनादातुराह वायसादिभ्योयद्दीयतेतदपिवैडाल
व्रतिकेभ्योधर्मज्ञोनदद्यादित्यतिशयोक्त्याद्रव्यांतरदानंनिषिध्यते नतुवारिदानमेवपाषंडिनोविकर्मस्थानित्यनेनवैडालव्रतिकाय
अतिथित्वेनसत्कृतार्थदानादिनिषिद्धमिहतुधनदानंनिषिध्यते अतएवविधिनाप्यर्जितंधनमितिवक्ष्यति नावेदविदीतिवेदा
र्थानभिज्ञे एतच्चविद्वत्संभवेनावेदविदीतिनिषिध्यते १९२ त्रिष्वपीति एतेषुत्रिष्वपिवैडालव्रतिकादिषुन्यायार्जितमपिधनंदत्तंदा
तुःप्रतिग्रहीतुश्चपरलोकेनरकहेतुत्वादनर्थायभवति १९३ यथाप्लवेनेति यथापाषाणमयेनोडुपादिनाजलेतरन्तेनैवसहाधोग
च्छति एवंदानप्रतिग्रहयोरज्ञानभिज्ञोदातृग्राहकौनरकंगच्छतः अतपास्त्वनधीयानइतिप्रतिग्रहीतृप्राधान्येननिंदोक्ताइहतु

तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात् स्वल्पकेनाप्यविद्वान्हिपंकेगौरिवसीदति १९१ नवार्यपि
प्रयच्छेत्तुवैडालव्रतिकेद्विजे नबकव्रतिकेविप्रेनावेदविदिधर्मवित् १९२ त्रिष्वप्येतेषुदत्तंहिविधिनाप्यर्जि
तंधनम् दातुर्भवत्यनर्थायपरत्रादातुरेवच १९३ यथाप्लवेनौपलेननिमज्जत्युदकेतरन् तथानिमज्ज
तोधस्तादज्ञौदातृप्रतीच्छकौ १९४ धर्मध्वजीसदालुब्धश्छाद्मिकोलोकदंभकः वैडालव्रतिकोज्ञेयोहिं
स्रःसर्वाभिसंधकः १९५ अधोदृष्टिर्नैष्कृतिकःस्वार्थसाधनतत्परः शठोमिथ्याविनीतश्चबकव्रतचरो
द्विजः १९६

दातृप्राधान्येनइत्यपुनरुक्तिः १९४ धर्मध्वजीति योबहुजनसमक्षंधर्ममाचरतिस्वतःपरतश्चलोकेख्यापयतितस्य
धर्मोध्वजंचिन्हमिवेतिधर्मध्वजी लुब्धःपरधनाभिलाषुकः छद्मनाव्याजेनचलतीतिछाद्मिकः लोकदंभकोनिःक्षेपापहारादिनाजनवंच
कः हिंस्रःपरहिंसाशीलः सर्वाभिसंधकःपरगुणासहनतयासर्वाक्षेपकः विडालव्रतेनचरतीतिवैडालव्रतिकः विडालोहिप्रायेणमूषिका
दिहिंसारुचितयाध्याननिष्ठइवविनीतःसन्नवतिष्ठतइतिउपचाराद्विडालव्रतशब्दः १९५ अधोदृष्टिरिति अधोदृष्टिर्निजविनयख्या
पनायसततमधएवनिरीक्षते निष्कृतिर्निष्ठुरतातयाचरतीतिनैष्कृतिकः स्वार्थसाधनतत्परःपदार्थखंडनेन शठोवक्रः मिथ्याविनीतःक

परविनयवान् बकव्रतंचरतीतिबकव्रतचरः बकोहिप्रायेणमीनहननरुचितयामिथ्याविनीतः सन्नेवंशीलोभवतीतिगौणोबकव्रतश-
ब्दः १९६ येबकव्रतिनइति येबकव्रतंविडालव्रतंचरंतितेब्राह्मणास्तेनपापहेतुनाकर्मणाअंधतामिस्रनाम्निनरकेपतंति १९७ नधर्म
स्येति पापंकृत्वाप्रायश्चित्तरूपंप्राजापत्यादिव्रतंपापमपनयतितन्नेदंप्रायश्चित्तम् किंतुधर्मार्थमहमनुतिष्ठामीतिस्त्रीशूद्रमूर्खादिजनमो
हनंकुर्वन्नातिष्ठेत् १९८ प्रेत्येहइतिश्लोकद्वयम् प्रथमंसुबोधम् अब्रह्मचारीयोब्राह्मणोब्रह्मचर्य्यादिलिंगंमेखलाजिनदंडादिवेषोपल
क्षितस्तद्वृत्त्याभिक्षाभ्रमणादिनाजीवतिसब्रह्मचार्यादीनांयत्पापंतदात्मन्याहरतिकुक्कुरादितिर्यग्योनौउत्पद्यतेतस्मादेतन्नकर्त्तव्यमिति
निषेधःकल्प्यते १९९ २०० परकीयेति निपानंजलाधारःपरकृतपुष्करिण्यादिषुनकदाचित्स्नायात् तत्रस्नात्वापुष्करिण्यादिकर्त्तुर्य

येबकव्रतिनोविप्रायेचमार्ज्जारलिंगिनः तेपतंत्यंधतामिस्रेतेनपापेनकर्मणा १९७ नधर्मस्यापदेशेनपा
पंकृत्वाव्रतंचरेत् व्रतेनपापंप्रच्छाद्यकुर्वन्स्त्रीशूद्रदंभनम् १९८ प्रेत्येहचेदृशाविप्रागर्ह्यंतेब्रह्मवादिभिः
छद्मनाचरितंयच्चव्रतंरक्षांसिगच्छति १९९ अलिंगीलिंगिवेषेणयोवृत्तिमुपजीवति सलिंगिनांहरत्येन
स्तिर्य्यग्योनौचजायते २०० परकीयनिपानेषुनस्नायाच्चकदाचन निपानकर्त्तुःस्नात्वातुदुष्कृतांशेनलि
प्यते २०१ यानशय्यासनान्यस्यकूपोद्यानगृहाणिच अदत्तान्युपभुंजानएनसःस्यात्तुरीयभाक् २०२

त्पापंतस्यांशेनवक्ष्यमाणचतुर्थभागरूपेणसंबध्यते अकृत्रिमनद्यसंभवेपरकृतेपिपुष्करिण्यादौमाक्षप्रदानात्पंचपिंडाननुद्धृत्यस्ना
तव्यम् तदाहयाज्ञवल्क्यः पंचपिंडाननुद्धृत्यनस्नायात्परवारिषु उद्धृत्यचतुरःपिंडान्पारक्येस्नानमाचरेत् स्नात्वाचतर्पयेद्देवान्पि
तॄंश्चैवविशेषतः २०१ यानशय्येति अस्येतिप्रकृतःपुनःपरामृश्यते परस्ययानादीन्यदत्तानिउपभुंजानस्तदीयपापचतुर्थभागभागी
भवति अदत्तानीतिपरस्यानुमत्यभावश्चविवक्षितः तेनसर्वार्थोत्सृष्टमठकूपादौउपयोगार्थाभ्यनुज्ञानादौनविरोधः २०२ नदीष्विति न
तदुक्तंछंदोगपरिशिष्टे धनुःसहस्राण्यष्टौचगतिर्यासांनविद्यते नतानदीशब्दवहागर्त्तास्ताःपरिकीर्त्तिताः चतुर्हस्तप्रमाणंधनुःप्र
धादिषुसर्वदास्नानमाचरेत् देवखातेषितितडागविशेषणंदेवसंबंधित्वेनप्रसिद्धेषुसरःसु गर्त्तेषुअष्टधनुःसहस्रेभ्योन्यूनगतिषु

स्रवणेषुनिर्झरेषुचानेनैवपरकीयनिपानव्यावृत्तिसिद्धौयत्पृथग्वचनंतदात्मीयोत्सृष्टतडागादिषुस्नानाद्यनुज्ञानार्थंतदपिनह्याद्यसंभ
वेद्रष्टव्यम् २०३ यमानिति नियमापेक्षयायमानुष्ठानगौरवज्ञापनार्थमिदम् नतुनियमनिषेधार्थंद्वयोरेवशास्त्रार्थत्वात् यमनि
यमविवेकश्चमुनिभिरेवकृतः तदाहयाज्ञवल्क्यः ब्रह्मचर्यंदयाक्षांतिर्ध्यानंसत्यमकल्कता अहिंसास्तेयमाधुर्येदमश्चेतियमाःस्मृ
ताः स्नानंमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः नियमोगुरुशुश्रूषाशौचाक्रोधाप्रमादता यमनियमस्वरूपज्ञःसमस्तस्नानादि
नियमत्यागेनाप्यहिंसादिरूपंयममनुतिष्ठेत् नियमाननुतिष्ठन्नपियमानुष्ठानरहितःपततीत्ययंयमस्तुत्यर्थइति मेधातिथि-
गोविंदराजौहिंसादिप्रतिषेधार्थकाःयमाः वेदमेवजपेन्नित्यमित्यादयोऽनुष्ठेयरूपानियमाइत्याचक्षते अहिंसासत्यवचनंब्र-
ह्मचर्यमकल्कता अस्तेयमितिपंचैतेयमावैपरिकीर्तिताः अक्रोधोगुरुशुश्रूषाशौचमाहारलाघवम् अप्रमादश्चसततंपंचैते

नदीषुदेवखातेषुतडागेषुसरःसुच स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणेषुच २०३ यमान्सेवेतसततं
ननित्यंनियमान्बुधः यमान्पतत्यकुर्वाणोनियमान्केवलान्भजन् २०४ नाश्रोत्रियततेयज्ञेग्रामया
जिकृतेतथा स्त्रियाक्लीबेनचहुतेभुंजीतब्राह्मणःक्वचित् २०५ अश्लीकमेतत्साधूनांयत्रजुह्वत्य
मीहविः प्रतीपमेतद्देवानांतस्मात्तत्परिवर्जयेत् २०६ मत्तक्रुद्धातुराणांचनभुंजीतकदाचन केश
कीटावपन्नंचपदास्पृष्टंचकामतः २०७ भ्रूणघ्नावेक्षितंचैवसंस्पृष्टंचाप्युदक्यया पतत्रिणावली
ढंचशुनासंस्पृष्टमेवच २०८

नियमाःस्मृताः २०४ नाश्रोत्रियेति अनधीतवेदेनोपक्रांतेयज्ञेऽग्नीषोमीयादूर्ध्वम
पिभोजनयोग्यसमयेब्राह्मणोनभुंजीत तथाबहूनांयाजकेनऋत्विजास्त्रियानपुंसकेनचयत्रयज्ञेहूयतेतत्रकदाचिन्नभुंजीत
२०५ अश्लीकमिति पूर्वोक्ताबहुयाजकादयोयत्रहोमंकुर्वंतितत्कर्मशिष्टानाम् अश्लीकमश्रीकंश्रीशब्देरेफस्यस्थानेलकारः दे
वानांप्रतिकूलंतस्मादेतत्होमंनकारयेत् २०६ मत्तक्रुद्धातुराणामिति क्षुब्धक्रुद्धव्याधितानामन्नंतथाकेशकीटसंसर्गदु
ष्टंपादेनचेच्छातःसंस्पृष्टमन्नंनभुंजीत २०७ भ्रूणघ्नेति भ्रूणघ्नेत्युपलक्षणात्गोघ्नत्वादिपतितावेक्षितरजस्वलयाचस्पृष्टं

पक्षिणाचकाकादिनास्वादितंकुक्कुरेणचस्पृष्टमन्नंनभुंजीत २०८ गवेति यदन्नंगवाघ्रातंघुष्टान्नंकोभोक्ताइत्युद्घुष्यान्नंस-
त्रादौयद्दीयते विशेषतइतिभूरिदोषतयाप्रायश्चित्तगौरवार्थम् गणान्नंशठब्राह्मणसंघान्नंगणिकावेश्यातस्याअन्नंतच्चनभुंजी
त २०९ स्तेनेति चौरगायनजीविनोस्तथातक्षवृत्तिजीवनस्यवृध्युपजीविनश्चान्नंनभुंजीततथायज्ञेदीक्षितस्यप्रागग्नीषोमी
यात् कदर्यस्यकृपणस्यनिगडस्येतितृतीयार्थेषष्ठी गोविंदराजस्तु बद्धशब्दस्यबंधनेविनाप्ययोनिगडैर्निगडितस्यदत्तायोनिग
डस्येतिव्याख्यातवान् २१० अभिशस्तस्येति महापातकित्वेनसंजातलोकविक्रोशस्यनपुंसकस्यपुंश्चल्याव्यभिचारिण्याअगणिका
याअपिदांभिकस्यछद्मनाधर्मचारिणोवैडालव्रतिकादेरन्नंनभुंजीत शुक्तंयत्स्वभावतोमधुरंदध्यादिसंपर्कवशेनउदकादीनांचा
म्लादिभावंगतम् पर्युषितंरात्र्यंतरितंशूद्रस्यान्नंनभुंजीतेतिसंबंधःउच्छिष्टंचभुक्तावशिष्टान्नमविशेषात्कस्यापिनभुंजीत गुरू

गवाचान्नमुपघ्रातंघुष्टान्नंचविशेषतः गणान्नंगणिकान्नंचविदुषांचजुगुप्सितम् २०९ स्तेनगाय
नयोश्चान्नंतक्ष्णोवार्धुषिकस्यच दीक्षितस्यकदर्यस्यबद्धस्यनिगडस्यच २१० अभिशस्तस्यषंढ
स्यपुंश्चल्यादांभिकस्यच शुक्तंपर्युषितंचैवशूद्रस्योच्छिष्टमेवच २११ चिकित्सकस्यमृगयोःक्रूर-
स्योच्छिष्टभोजिनः उग्रान्नंसूतिकान्नंचपर्याचांतमनिर्दशम् २१२ अनर्चितंवृथामांसमवीरायाश्च
योषितः द्विषदन्नंनगर्यन्नंपतितान्नमवक्षुतम् २१३

च्छिष्टंचविहितत्वाद्भोज्यम् गोविंदराजस्तु शूद्रस्योच्छि
ष्टंतद्भुक्तावशिष्टंचस्थालीस्थमपिनभुंजीतइत्याह २११ चिकित्सकस्येति चिकित्साजीविनः मृगयोर्मांसविक्रयार्थंमृगादिपशु
हंतुः क्रूरस्यानृजुप्रकृतेःनिषिद्धोच्छिष्टभोक्तुरन्नंनभुंजीत उग्रोदारुणकर्मातस्यान्नम् गोविंदराजोमंजर्यामुग्रंराजानमुक्त
मत्तुवृत्तौचशूद्रायांक्षत्रियोत्पन्नमभ्यधात् भेदोक्तेर्याज्ञवल्कीयेनोग्रोराजेतिवावदत् आश्चर्यमिदमेतस्यस्वकीयहृदिभूषणम्
सूतिकान्नंसूतिकामुद्दिश्ययत्क्रियतेतदन्नंतत्कुलजैरपिनभोक्तव्यम् एकपंक्तिस्थानन्यानवमन्ययत्रान्नेभुज्यमानेकेनचिदाच
मनंक्रियतेतत्पर्याचांतम् अनिर्दशंसूतिकान्नंवक्ष्यमाणत्वात्नभुंजीत २१२ अनर्चितमिति अर्चार्हस्ययदवज्ञयादीयते यथामां

संदेवतादिमुद्दिश्यपन्नक्तृतम् अवीराया पतिपुत्ररहितायाः शत्रुनगरपतितानांचउपरिक्तृतक्तृतंचान्नंनभुंजीत २१३ पिशुनेतिपि
शुनःपरोक्षेपरापवादभाषणपरः अनृतीति अतिशयेनानृतवादीकूटसाक्ष्यादिः क्रतुविक्रयकःमदीययागस्यफलंतवभवत्विति अभि
धाययोधनंगृह्णाति शैलूषोनटः तुन्नवायःसौचिकः कृतघ्नःकृतोपकारस्यापकारेप्रवर्त्ततेतस्यान्नंनभुंजीत २१४ कर्मारस्येति
कर्मारस्यलोहकारस्य निषादस्यदशमाध्यायोक्तस्य नटगायनव्यतिरिक्तस्यरंगावतरणजीविनः सुवर्णकारस्य वेणोर्भेदनेनयोजीव
तिवरुडइतिविख्यातः शस्त्रंलोहः तद्विक्रयिणश्चान्नंनभुंजीत २१५ श्ववतामिति आखेटकाद्यर्थंशुनःपोषकानाम् मद्यविक्रयिणा
म् वस्त्रधावकस्य कुसुंभादिनावस्त्ररागकृतः निर्दयस्य यस्यचोपपतिर्गृहेजारश्चयस्याज्ञानतोगृहेस्थितस्तस्यगेहेनाद्यात् २१६ मृ
ष्यतीति गृहइत्यनुषज्यते गेहेज्ञातंभार्याजारंयेसहंतेतेषामन्नंनभुंजीत तेनगृहान्निःसारितायाजारसहनेपदोषः तथासर्वकर्मसु

पिशुनानृतिनोश्चान्नंक्रतुविक्रयिणस्तथा शैलूषतुन्नवायान्नंकृतघ्नस्यान्नमेवच २१४ कर्मारस्य
निषादस्यरंगावतारकस्यच सुवर्णकर्तुर्वेणस्यशस्त्रविक्रयिणस्तथा २१५ श्ववतांशौंडिकानांच
चैलनिर्णेजकस्यच रंजकस्यनृशंसस्ययस्यचोपपतिर्गृहे २१६ मृष्यंतियेचोपपतिंस्त्रीजितानांचसर्वशः
अनिर्दशंचप्रेतान्नमतुष्टिकरमेवच २१७ राजान्नंतेजआदत्तेशूद्रान्नंब्रह्मवर्चसम् आयुःसुवर्णकारा
न्नंयशश्चर्मावकर्त्तिनः २१८ कारुकान्नंप्रजांहंतिबलंनिर्णेजकस्यच गणान्नंगणिकान्नंचलोकेभ्यःप
रिकृंतति २१९

स्त्रीपरतंत्राणाम् अनिर्गताशौचंनसूतकान्नम् अतुष्टिकरमेवचनभुंजीत २१७ राजान्नमिति राजान्नंते
जोनाशयतिइतएवदोषदर्शनात्तदन्नभक्षणनिषेधःकल्प्यते एवमुत्तरत्रापिपूर्वमनिषिद्धस्यदोषदर्शनादेवनिषेधकल्पनंनाद्याच्छूद्र
स्यपक्वान्नमितिनिषेधिष्यतितदतिक्रमणफलकथनमिदम् शूद्रस्यपक्वान्नमध्ययनादिनिमित्तंतेजोनाशयतिसुवर्णकारस्यान्नमायुः
चर्मकारान्नंख्यातिंनाशयति २१८ कारुकान्नमिति कारुकस्यसूपकारादेरन्नंप्रजांअपत्यंनिहंति चर्मकारादेःकारुकत्वेपिगोबली
वर्दन्यायेनपृथङ्निर्देशः निर्णेजकस्यान्नंबलंहंति गणगणिकयोरन्नंनकर्मांतरार्जितेभ्यःस्वर्गादिलोकेभ्यआछिनत्ति २१९

पूयमिति चिकित्सकस्यान्नं पूयं पूयभक्षणसमदोषम् एवं पुंश्चल्या अन्नं इंद्रियं शुक्रं वार्द्धुषिकस्यान्नं पुरीषम् लोहविक्रयिणो ऽन्नं विष्ठाव्यतिरिक्तश्लेष्मादि गोविंदराजस्तु चिकित्सकान्नभक्षणेन तथाविधायां जातौ जायते यत्र पूयभक्षणं भवतीत्याह २२० यएतेऽन्यइति प्रतिपदनिर्दिष्टेभ्यो येऽन्ये क्रमेणाभोज्यान्ना अस्मिन् प्रकरणे पठितास्तेषां यदन्नं तत् त्वगस्थिरोमाणि यस्तदोषास्त्वचः कीकशस्य रोम्णां च भक्षणानां यो दोषः स एव तदन्नस्यापि भक्षणस्य बोद्धव्यः २२१ भक्त्वेति एषां मध्ये ऽन्यतमसंबंधान्नमज्ञानतो भक्त्वा त्र्यहमुपवासः ज्ञानतस्तु कृच्छ्रम् एवं रेतोविण्मूत्रभोजनेपि एतच्चान्यतमस्येति षष्ठीनिर्देशान्मत्तादिसंबंधिनः परिग्रहदुष्टान्नस्यैव प्रायश्चित्तं न संसर्गदुष्टस्य केशकीटादावपन्नादेः नापि कालदुष्टस्य पर्युषितान्नादेः नापि निमित्तदुष्टस्य घुष्टादेः एकप्रकरणेपि तेषां त्वमानत्वज्ञापनार्थं प्रायश्चित्तं चैतेष्वेकादशेवक्ष्यति यदि तु सर्वेष्वेवं प्रायश्चित्तं स्यात्तदा भक्त्वातोन्यतमस्यान्नं दुष्टमित्यभ्य

पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिंद्रियम् विष्ठा वार्द्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् २२०
य एतेन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः तेषां त्वगस्थिरोमाणि वदंत्यन्नं मनीषिणः २२१ भक्त्वातो
न्यतमस्यान्नममत्या क्षपणं त्र्यहम् मत्या भक्त्वा चरेत्कृच्छ्रं रेतोविण्मूत्रमेव च २२२ नाद्याच्छूद्रस्य प
क्वान्नं विद्वानश्राद्धिनो द्विजः आददीतामम् एवास्मादवृत्तावेकरात्रिकम् २२३ श्रोत्रियस्य कदर्यस्य वदा
न्यस्य च वार्द्धुषेः मीमांसित्वोभयं देवाः सममन्नमकल्पयन् २२४

धास्यत् नत्वन्यतमस्य तु भक्त्वेति तस्मादेकप्रकरणाद्यन्मेधातिथिरभ्यधात् प्रायश्चित्तमिदं शुक्तं शुक्तादौ तदसुंदरम् अप्रकरणे च प्रायश्चित्तस्याभिधानं लाघवार्थं तत्र क्रियमाणे मत्तादिग्रहणमपि कर्त्तव्यं स्यात् २२२ नाद्यादिति अविशेषेण शूद्रान्नं प्रतिषिद्धं तस्येदानीं विशिष्टविषयतोच्यते अश्राद्धिनः श्राद्धादिपंचयज्ञशून्यस्य शूद्रस्य शास्त्रविद् द्विजः पक्वान्नं न भुंजीत किंत्वन्नांतराभावे सति एकरात्रनिर्वाहोचितमाममेवान्नमस्माद्गृह्णीयात् नतु पक्वान्नम् २२३ श्रोत्रियस्येति एकोऽधीतवेदः कृपणश्च परो दाता वृद्धिजीवी च तयोरुभयोरपि गुणदोषवत्त्वं विचार्य देवास्तुल्यमन्नमनयोरिति निरूपितवंतः उभयोरपि गुणदोषसाम्यात् २२४ तानिति तान् देवानागत्य ब्रह्मा प्रोवाच विषममन्नं मा समं कुरुत विषमसमीकरणमनुचितं कः पुनरनयोर्विशेषः इत्यपे

क्षायांसएवावोचत् दानशीलवार्द्धुषिकस्यापिश्रद्धयान्नंपवित्रंभवति कृपणान्नंपुनरश्रद्धयाहतंदूषितंअधमंप्राग्गुभयमति
पेयेपिश्रद्धादत्तविहद्वार्द्धुषिकान्नविशुद्धिबोधनपरमिदम् २२५ अतएवाह श्रद्धयेति इष्टमंतर्वेदियज्ञादिकर्मपूर्त्ततोन्यत्तु
करिणीकूपमपारामादि तदेवमनलसःसन्नित्यकाम्यस्वर्गादिफलरहितंश्रद्धयाकुर्यात् यस्मात्तेइष्टापूर्तेन्यायार्जितधनेनश्र
द्धयाकृतेऽक्षयेमोक्षफलेभवतः २२६ दानधर्ममिति दानाख्यंधर्ममैष्टिकंपौर्त्तिकंअंतर्वेदिकंबहिर्वेदिकंचसर्वदाविद्यातपोयुक्तंब्रा
ह्मणमासाद्यपरितोषाख्येनांतःकरणयुक्तंयथाशक्तिकुर्यात् २२७ यत्किंचिदिति प्रार्थितेनपरगुणामत्सरेणान्नमपियथाश-
क्तिदातव्यंयस्मात्सर्वदादानशीलस्यकदाचित्तादृशंपात्रमागमिष्यतितत्सर्वस्मान्नरकहेतोर्मोचयिष्यति २२८ वारिदइति जल

तान्प्रजापतिराहैत्यमाकृध्वंविषमंसमम् श्रद्धापूतंवदान्यस्यहतमश्रद्धयेतरत् २२५ श्रद्धयेष्टंच
पूर्त्तंचनित्यंकुर्यादतंद्रितः श्रद्धाकृतेह्यक्षयेतेभवतःस्वागतैर्धनैः २२६ दानधर्मंनिषेवेतनित्यमैष्टि
कपौर्त्तिकम् परितुष्टेनभावेनपात्रमासाद्यशक्तितः २२७ यत्किंचिदपिदातव्यंयाचितेनानसूयया उ
त्पत्स्यतेहितत्पात्रंयत्तारयतिसर्वतः २२८ वारिदस्तृप्तिमाप्नोतिसुखमक्षय्यमन्नदः तिलप्रदःप्रजा
मिष्टांदीपदश्चक्षुरुत्तमम् २२९ भूमिदोभूमिमाप्नोतिदीर्घमायुर्हिरण्यदः गृहदोऽग्र्याणिवेश्मानिरू
प्यदोरूपमुत्तमम् २३० वासोदश्चंद्रसालोक्यमश्विसालोक्यमश्वदः अनडुहःश्रियंपुष्टांगोदोब्रध्न
स्यविष्टपम् २३१ यानशय्याप्रदोभार्य्यामैश्वर्यमभयप्रदः धान्यदःशाश्वतंसौख्यंब्रह्मदोब्रह्मसार्ष्टिता
म् २३२

दःक्षुत्पिपासाविगमात्तृप्तिम् अन्नदोऽक्षयंतसुखंतिलप्रदईप्सितान्यपत्यादीनि दीपदोविमलेक्षणादीनिदीर्घंचक्षुः
प्राप्नोति २२९ भूमिदइति भूमिदोभूमेराधिपत्यम् सुवर्णदःचिरंजीवित्वं गृहदःश्रेष्ठानिवेश्मानि रूप्यदःसकलजननयनमनो
हरंरूपंलभते २३० वासोदइति वस्त्रदश्चंद्रसमानलोकान्प्राप्नोति चंद्रलोकेचंद्रसमविभूतिर्वसतीति एवमेवाश्विलोकंघोटक
दः बलीवर्दस्यदाताप्रचुरांश्रियम् स्त्रीगवीप्रदःसूर्यलोकंप्राप्नोति २३१ यानशय्येति रथादियानस्यशय्यायाश्चदाताभार्यामभय

प्रदः प्राणिनामहिंसकः प्रफलम् धान्यदोव्रीहियवमाषमुद्गादिसस्यानांदाताचिरस्थायिफलंविलम् ब्रह्मवेदस्तंप्रदोवेदस्याध्यापको व्याख्याताचब्रह्मणःसार्ष्टितांसमानगतितांतत्तुल्यतांप्राप्नोति २३२ सर्वेषामिति उदकान्नधेनुभूमिवस्त्रतिलसुवर्णघृतादीनांसर्वेषामेवयानिदानानितेषांमध्यात्वेददानंविशिष्यतेप्रकृष्टफलदंभवति २३३ येनयेनेति अवधारणेतुशब्दः येनयेनैवभावेनाभिप्रायेणफलाभिसंधिकःस्वर्गोमेस्यादितिमुमुक्षुर्मोक्षाभिप्रायेणानिष्कामोयद्यद्दानंददातितेनैवभावेनोपलक्षितस्तत्तद्दानफलद्वारेणजन्मांतरेपूजितःसन्प्राप्नोति २३४ योर्चितमिति योऽर्चापूर्वकमेवदाताददातियश्चप्रतिगृहीताऽर्चापूर्वकमेवदत्तंप्रतिगृण्हातितावुभौस्वर्गंगच्छतोऽनर्चितदानप्रतिग्रहणेनरकंपुरुषार्थेतुप्रतिग्रहेऽनर्चितमेवमयाग्रहीतव्यंनान्यथेतिनियमात्फललाभोनविरुद्धः २३५

सर्वेषामेवदानानांब्रह्मदानंविशिष्यते वार्यन्नगोमहीवासस्तिलकांचनसर्पिषाम् २३३ येनयेनतुभावेनयद्यद्दानंप्रयच्छति तत्तत्तेनैवभावेनप्राप्नोतिप्रतिपूजितः २३४ योऽर्चितंप्रतिगृण्हातिददात्यर्चितमेवच तावुभौगच्छतःस्वर्गंनरकंतुविपर्यये २३५ नविस्मयेततपसावदेदिष्ट्वाचनानृतम् नार्त्तोप्यपवदेद्विप्रान्नदत्वापरिकीर्त्तयेत् २३६ यज्ञोऽनृतेनक्षरतितपःक्षरतिविस्मयात् आयुर्विप्रापवादेनदानंचपरिकीर्त्तनात् २३७ धर्मंशनैःसंचिनुयाद्वल्मीकमिवपुत्तिकाः परलोकसहायार्थंसर्वभूतान्यपीडयन् २३८ नामुत्रहिसहायार्थंपितामाताचतिष्ठतः नपुत्रदारन्नज्ञातिर्धर्मस्तिष्ठतिकेवलः २३९

नविस्मयेदिति चांद्रायणादितपसाकृतेनकथंममेदंदुष्करमनुष्ठितमितिविस्मयंनकुर्यात् यागंचकृत्वानासत्यंवदेत्कृतेपिपुरुषार्थतयाऽनृतवदननिषेधेक्रत्वर्थोयंपुनर्निषेधः ब्राह्मणैःपीडितोपिनतान्निंदयेत् गवादिकंचदत्वामयेदंदत्तमितिपरस्यनकथयेत् २३६ यज्ञइति अनृतेनहेतुनायज्ञःक्षरतिसत्येनैवसफलंसाधयतिएवंतपसिदानेचयोज्यम् विप्रनिंदयाचायुःक्षीयते २३७ धर्ममिति सर्वप्राणिनांपीडांपरिहरन्परलोकसहायार्थंयथाशक्तिशनैःशनैर्धर्ममनुतिष्ठेत् यथापुत्तिकाःपिपीलिकाप्रभेदाःशनैःशनैर्महांतंमृत्तिकाकूटंसंचिन्वंति २३८ नामुत्रेति यस्मात्परलोकेसहायकार्यसिध्यर्थंनपितृमातृपत्नीज्ञातयस्तिष्ठंतिकिंतुधर्मए

वैकोद्वितीयभावेनोपकारार्थमवतिष्ठते तस्मात्पुत्रादिभ्योपिमहोपकारकंधर्ममनुतिष्ठेत् २३९ एकइति एकएवप्राण्युत्पद्यतेन मात्रादिभिः सहतस्मान्मात्राद्य बांधवैः सहितः एकएवचम्रियते स्वकृतफलमपिस्वर्गादिकंचदुरितफलंचनरकादिकमेकएवभुंक्ते तेनमृतंजीव पेक्षयापिधर्मन्नत्यजेत् २४० मृतमिति मृतंशरीरमनः प्राणादित्यक्तंलोष्टवदचेतनंभूमौत्यक्त्वापराङ्मुखाबांधवायांतिनसततं मनुयांतिधर्मस्तुतमनुगच्छति २४१ तस्मादिति यस्माद्धर्मेणसहायेनदुस्तरंतमोनरकादिदुःखंतरतितस्माद्धर्मसहायभावेनसततं शनैरनुतिष्ठेत् २४२ धर्मप्रधानमिति धर्मपरंपुरुषंदैवादुपजातेपापेप्राजापत्यादितपोरूपप्रायश्चित्तेनहतपापंदीप्तिमंतंप्रकृष्टो धर्मएवशीघ्रंब्रह्मस्वर्गादिरूपंपरलोकन्नयति खंब्रह्मेत्याद्युपनिषत्सुखशब्दस्यब्रह्मणिप्रयोगःखशरीरिणंब्रह्मस्वरूपमित्यर्थः

एकःप्रजायतेजंतुरेकएवप्रलीयते एकोऽनुभुंक्तेसुकृतमेकएवचदुष्कृतम् २४० मृतंशरीरमुत्सृ ज्यकाष्ठलोष्टसमंक्षितौ विमुखाबांधवायांतिधर्मस्तमनुगच्छति २४१ तस्माद्धर्मंसहायार्थंनित्यंस ञ्चिनुयाच्छनैः धर्मेणहिसहायेनतमस्तरतिदुस्तरम् २४२ धर्मप्रधानंपुरुषंतपसाहतकिल्बिषम् परलोकन्नयत्याशुभास्वंतंखशरीरिणम् २४३ उत्तमैरुत्तमैर्न्नित्यंसंबंधानाचरेत्सह निनीषुःकुल मुत्कर्षमधमानधमांस्त्यजेत् २४४ उत्तमानुत्तमान्गच्छन्हीनान्हीनांश्चवर्जयन् ब्राह्मणःश्रेष्ठता मेतिप्रत्यवायेनशूद्रताम् २४५ दृढकारीमृदुर्दांतःक्रूराचारैरसंवसन् अहिंस्रोदमदानाभ्यांजयेत् स्वर्गंतथाव्रतः २४६

यद्यपिलिंगशरीरावच्छिन्नोजीवएवगच्छतिनयापिब्रह्मांशत्वाद्ब्रह्मस्वरूपमुपपन्नंधर्मएवचेत्परंलोकं नयतिततोधर्ममनुतिष्ठेत् नहिवेदाःस्वधीतास्तुशास्त्राणिविविधानिच तत्रगच्छंतियत्रास्यधर्मएकोनुगच्छति २४३ उत्तमैरिति कुल मुत्कर्षंनेतुमिच्छन्विद्याचारजन्मादिभिरुत्कृष्टैःसहसर्वदाकन्यादानादिसंबंधानाचरेत् अपकृष्टांस्तुसंबंधांस्त्यजेत् उत्तमविधानादे वाधमपरित्यागेसिद्धेयत्पुनरधमांस्त्यजेदित्यभिधानंतदुत्तमासंभवेसतुल्याद्यनुज्ञानार्थम् २४४ उत्तमानिति उत्तमान्गच्छन्तैःस हसंबंधंकुर्वन्ब्राह्मणःश्रेष्ठतांगच्छतिप्रत्यवायेनविपरीताचारेणहीनैःसहसंबंधेजातेरपकर्षतयाशूद्रतुल्यतामेति २४५ दृढकारीति मा

रथ्यसंपादयिता मृदुरनिष्ठुरः दमस्यपृथगुपादानाद्दांतइतिशीतातपादिद्वंद्वसहिष्णुर्ग्रहीतव्यः क्रूराचारैःपुरुषैःसंसर्गपरिहरन् परहिंसानिवृत्तः तथाव्रतएवनियमदमेंद्रियसंयमाख्येनचदानेनस्वर्गमाप्नोति २४६ एधोदकमिति काष्ठजलफलमूलमधूनिअ भ्यंचाभ्युद्यतमयाचितोपनीतम् अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषइतियाज्ञवल्क्यवचनात्कुलटादिवर्जंसर्वतःशूद्रादिभ्योपि प्रतिगृण्हीयात् २४७ आहृताभ्युद्यतामिति आहृतांसंप्रदानदेशमानीताम् अभ्युद्यतामाभिमुख्येनस्थापिताम् अप्रचोदितां प्रतिग्रहीतास्वयमन्यमुखेनवापूर्वमयाचितांदाताचतुभ्यमिदंददानीतिपूर्वमकथितांहिरण्यादिभिक्षांनतुसिद्धान्नरूपांअन्नमभ्यु द्यतंचेत्यक्तत्वात्पापकारिणोपिपतितादिवर्जंग्राह्याइतिविरिंचिरमन्यत २४८ नाश्नंतीति तेनोपकल्पितंश्राद्धेषुकव्यंपंचदशवर्षा णिपितरोनभुंजते नचयज्ञेषुतेनदत्तंपुरोडाशादिहव्यमग्निर्वहतिदेवान्प्रापयतियस्तांभिक्षांनस्वीकरोति २४९ शय्यामिति गं

एधोदकंमूलफलमन्नमभ्युद्यतंचयत् सर्वतःप्रतिगृण्हीयान्मध्वथाभयदक्षिणाम् २४७ आहृता भ्युद्यतांभिक्षांपुरस्तादप्रचोदिताम् मेनेप्रजापतिर्ग्राह्यामपिदुष्कृतकर्मणः २४८ नाश्नंतिपितरस्त स्यदशवर्षाणिपंचच नचहव्यंवहत्यग्निर्यस्तामभ्यवमन्यते २४९ शय्यांगृहान्कुशान्गंधानपःपुष्पं मणीन्दधि धानामत्स्यान्पयोमांसंशाकंचैवननिर्णुदेत् २५० गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवता तिथीन् सर्वतःप्रतिगृण्हीयान्नतुतृप्येत्स्वयंततः २५१ गुरुषुत्वभ्यतीतेषुविनावातैर्गृहेवसन् आ त्मनोवृत्तिमन्विच्छन्गृण्हीयात्साधुतःसदा २५२

धान्गंधवंतिकर्पूरादीनिधानाभृष्टतंडुलान्पयःक्षीरंपूर्वमा हरणोपायनिबंधेनगवादीनामप्रत्याख्यानमुक्तंशय्यादीनितुयानिताहृतान्यपिदातृस्वगृहस्थितानिअयाचितोपकल्पितानिन प्रत्याचक्षीत २५० गुरूनिति मातापित्रादीन्गुरून्भृत्यांश्चभार्यादीन्क्षुधावसन्नानुद्धर्तुमिच्छन्पतितादिवर्जंसर्वतःशू द्रादेरसाधुभ्यश्चप्रतिगृण्हीयात् नतुतेनधनेनस्वयंवर्त्तेत २५१ गुरुष्विति मातापित्रादिषुमृतेषुतैर्वाजीवद्भिरपिस्वयोगावस्थि तैर्विनागृहांतरेवसन्आत्मनोवृत्तिमन्विच्छन्सर्वदासाधुभ्योगृण्हीयादेव २५२ आर्द्धिकइति आर्द्धिकःकार्षिकःसंबंधिश ब्दाच्चैतेयोयस्यक्षेत्रंकरोतिसतस्यभोज्यान्नः एवंस्वकुलस्यमित्रंयोयस्यगोपालोयोयस्यनापितःकर्मकरोतियोयस्मिन्नात्मानं

यथात्मनिवेदनंशूद्रेणकर्त्तव्यंतदाह २५३
निवेदयतिदुर्गतिरहंत्वदीयसेवांकुर्वन्नित्तिचत्वत्समीपेवसामीतियःशूद्रस्तस्यभोज्यान्नः यथात्मनिवेदनंशूद्रेणकर्त्तव्यंतदाह २५३
यादृशइति अस्यशूद्रस्यकुलशीलादिभिर्यादृशआत्मास्वरूपंयच्चास्यकर्मकर्त्तुमीप्सितयथाचानेनसेवाकर्त्तव्यातेनप्रकारेणात्मानंकथ
येत् २५४ योन्यथेति यइतिसामान्यनिर्देशात्तकृतशूद्रादन्योपियःकश्चित्कुलादिभिरन्यथाभूतमात्मानमन्यथासाधुभ्युकथयतिस-
लोके।तिशयेनपापकारीयस्मादात्मापहारकः अन्यःस्तेनोद्रव्यांतरमपहरतिअयंतुसर्वप्रधानमात्मानमेवापहरेत् २५५ वाच्यर्था
इति सर्वे।र्थाः शब्देषुनियतावाच्यत्वेननियताः वाङ्मूलाश्चशब्दास्तेषांप्रतिपत्तौशब्देभ्यएवप्रतीयंते प्रतीतिद्वारेणशब्दमूलत्वंशब्दे
भ्यएवावगम्यत्वानुष्ठीयंतेइतिवाग्विनिर्गताइत्युच्यंते अतएववेदशब्देभ्यएवादाविति ब्रह्मणोपिसृष्टिर्वेदशब्दमूलैवोक्ता अतोय
स्तांवाचंस्तेनयेत्स्वार्थव्यभिचारिणींवाचपतिसनरःसर्वार्थस्तेयकृद्भवति २५६ महर्षीति गृहस्थस्यैवसंन्यासप्रकारोयमुच्यते मह

आर्द्धिकःकुलमित्रंचगोपालोदासनापितौ.एतेशूद्रेषुभोज्यान्नायश्चात्मानंनिवेदयेत् २५३ यादृशो
स्यभवेदात्मायादृशंचचिकीर्षितम् यथाचोपचरेदेनंतथात्मानंनिवेदयेत् २५४ योन्यथासंतमात्मा
नमन्यथासत्सुभाषते सपापकृत्तमोलोकेस्तेनआत्मापहारकः २५५ वाच्यर्थानियताःसर्वेवाङ्मूला
वाग्विनिःसृताः तांस्तुयःस्तेनयेद्वाचंससर्वस्तेयकृन्नरः २५६ महर्षिपितृदेवानांगत्वानृण्यंयथाविधि
पुत्रेसर्वंसमासज्यवसेन्माध्यस्थमाश्रितः. २५७ एकाकीचिंतयेन्नित्यंविविक्तेहितमात्मनः एकाकीचिंत
यानोहिपरंश्रेयोधिगच्छति २५८ एषोदितागृहस्थस्यवृत्तिर्विप्रस्यशाश्वती स्नातकव्रतकल्पश्चसत्त्व
वृद्धिकरःशुभः २५९

र्षीणांस्वाध्यायेनपितॄणांपुत्रोत्पादनेनदेवतानांयज्ञैर्यथाशास्त्रमानृण्यंगत्वायोग्यपुत्रेसर्वंकुटुंबचिंता
भारमारोप्यमाध्यस्थमाश्रितःपुत्रदारधनादौत्यक्तममतोब्रह्मबुध्यासर्वत्रसमदर्शनोगृहएववसेत् २५७ एकाकीति काम्यकर्मणां
धनार्जनंस्यचकृतसंन्यासः षष्ठाध्यायेवक्ष्यमाणःपुत्रोपकल्पितवृत्तिरेकाकीनिर्जनदेशेआत्महितंजीवस्यब्रह्मभावंवेदांतोक्तंसर्वदा
ध्यायेत् यस्मात्तध्यायन्ब्रह्मसाक्षात्कारेणपरंश्रेयोमोक्षलक्षणंप्राप्नोति २५८ एषेति अयमध्यायार्थोपसंहारः एषाकृतादिवृ-
त्तिर्गृहस्थस्यब्राह्मणस्योक्ताशाश्वतीनित्याआपदित्वनित्यावस्थनेस्नातकव्रतविधिःसत्त्वगुणस्यवृद्धिकरणप्रशस्तउक्तः २५९ ५

अनेनेति सर्वस्योक्तस्य फलकथनमिदं अनेन शास्त्रोक्ताचारेण वेदविद्ब्राह्मणो वर्त्तमानो नित्यकर्मानुष्ठानात्क्षीणपापः सन्ब्रह्म-
ज्ञानप्रकर्षेण ब्रह्मैव लोकस्तस्मिन्लीनो महिमानं सर्वोत्कर्षं प्राप्नोति २६० इति कुल्लूकभट्टविरचितायां मन्वर्थमुक्तावल्यां च
तुर्थोऽध्यायः ४ ७ ७ ७ ७ ७ ऋत्वैतानिति ऋषयः स्नातकस्यैतान् यथोदितधर्मान् श्रुत्वा महात्मानं
परमार्थपरं भृगुमिदं वचनमब्रुवन् यद्यपि प्रथमाध्याये दशप्रजापतिमध्ये भृगुन्नारदमेव चोक्ता भृगुसृष्टिरपि मनुत एवोक्ता तथापि
कल्पभेदेनाग्निप्रभवत्वमुच्यते तथा च श्रुतिः तस्य यद्रेतसः प्रथमं देदीप्यते तदसावादित्योऽभवत् यद्द्वितीयमासीद्भृगुरिति अत
एव प्रश्नवाद्रेतस उत्पन्नत्वाद्भृगुः १ एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठताम् कथं मृत्युः प्रभवतीति एवं यथोक्तं स्वधर्ममनु
ष्ठानां श्रुतिशास्त्रज्ञानां वेदोदितायुषः पूर्वं कथं मृत्युः प्रभवति आयुरल्पत्वहेतोरधर्माचरणस्याभावात् सकलसंशयोच्छेदनस-

अनेन विप्रो वृत्तेन वर्त्तयन् वेदशास्त्रवित् व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते २६० इति
मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां चतुर्थोऽध्यायः ४ ७ ७ ७ ऋत्वैतानृषयो
धर्मान्स्नातकस्य यथोदितान् इदमूचुर्महात्मानमनलप्रभवं भृगुम् १ एवं यथोक्तं विप्राणां स्वधर्म
मनुतिष्ठताम् कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो २ स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः
श्रूयतां येन दोषेण मृत्युर्विप्राञ्जिघांसति ३ अनभ्यासेन वेदानामाचारस्य च वर्जनात् आलस्याद
न्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ४ लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च अभक्ष्याणि द्विजाती
नाममेध्यप्रभवानि च ५

मर्थत्वात्प्रभो इति संबोधनम् २ स तानिति स मनोः पुत्रो भृगुर्धर्मस्वभावो येन दोषेणाल्पका-
लेविप्रान्हंतुमिच्छति मृत्युः स दोषः श्रूयतामित्येवं तान्महर्षीन्जगाद ३ अनभ्यासेति वेदानामनभ्यासात्स्वीयाचारपरित्यागात्
सामर्थ्ये सत्यवश्यकर्त्तव्यकरणानुत्साहलक्षणादालस्यात् अदनीयदोषाच्च मृत्युर्विप्रान्हंतुमिच्छति एतेषामधर्मोत्पादनद्वारे-
णायुःक्षयहेतुत्वाद्वेदानभ्यासादेरुक्तत्वात् अनुक्तमन्नदोषमाह ४ लशुनमिति लशुनं गृंजनं पलाण्ड्वाख्यानि स्थूलकंदशाका
निकवकं छत्राकममेध्यप्रभवानि विष्ठादिजातानि तंडुलीयादीनि द्विजातीनामिति याज्ञवल्क्यवचनादेतानि द्विजातीनामभक्ष्या-

णाद्विजातिग्रहणंशूद्रपर्युदासार्थम् ५ लोहितानिति लोहितवर्णान्वृक्षनिर्यासान्वृक्षान्निर्गतरसान्कठिनतांयातान्वृश्च
नंच्छेदनंतत्प्रभवानलोहितानपि तथाचतैत्तिरीश्रुतिः अथोखलुयएवलोहितोयोवावृश्चनान्निर्येषवितस्यनाश्यकाममन्यस्येति
शेलुंबहुवारकफलंगोभवंपेयूषन्नवप्रसूतायागोः क्षीरमग्निसंयोगात्कठिनंभवतिएतान्यत्नतस्त्यजेत् अनिर्दशायागोः क्षीरमि
त्यनेनैवपेयूषस्यापिनिषेधसिद्धावधिकदोषत्वात्प्रायश्चित्तगौरवज्ञापनार्थंपृथङ्निर्देशः अतएवयत्नतइत्युक्तम् ६ वृथाकृसरे
ति देवताद्युद्देशेनआत्मार्थंयत्पच्यतेतद्वृथाकृसरस्तिलेनसहसिद्धओदनः तथाचछंदोगपरिशिष्टम् तिलतंडुलसंपक्वःकृसरः
सोभिधीयते संयावंघृतक्षीरगुडगोधूमचूर्णसिद्धस्तत्कारिकेतिप्रसिद्धः क्षीरतंडुलमिश्रःपायसःअपूपःपिष्टकःएतान्वृथापक्वा
न्विवर्जयेत् पशुयागादौमंत्रवत्कुशेनपशोःस्पर्शनमुपाकरणंतद्रहितःपशुरनुपाकृतःतस्यमांसानिदेवान्नानिनैवेद्यार्थमन्नानि
माङ्निवेदनात्हवींषिचपुरोडाशादीनिहोमात्प्राग्वर्जयेत् अनुपाकृतमांसानीत्येतद्विशेषनिषेधदर्शनात् अनर्चितंवृथामांसमिति

लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा शेलुंगव्यंचपेयूषंप्रयत्नेनविवर्जयेत् ६ वृथाकृसर
संयावंपायसापूपमेवच अनुपाकृतमांसानिदेवान्नानिहवींषिच ७ अनिर्दशाया गोः क्षीरमौष्ट्रमे
कशफंतथा आविकंसंधिनीक्षीरंविवत्सायाश्चगोःपयः ८ आरण्यानांचसर्वेषांमृगाणांमाहिषंवि
ना स्त्रीक्षीरंचैववर्ज्यानिसर्वशुक्तानिचैवहि ९

सामान्यनिषेधोबलीवर्दन्यायेनानुपाकृतमांसेतरश्राद्धाद्युद्देश्य
मांसभक्षणेपर्यवस्यति ७ अनिर्दशायाइति प्रसूतायाअनिर्दशायागोर्दुग्धंगोरितिपेयक्षीरपशूपलक्षणार्थंतेनाजामहिष्योर
पिदशाहमध्येप्रतिषेधः तथाचयमः अनिर्दशाहंगोक्षीरमाजंमाहिषमेवच तथोष्ट्रभवंअश्वाद्येकखुरसंबंधिमेषभवंसंधिनी
याऋतुमितिवृषभिच्छतीतस्याःक्षीरम् तथाचहारीतः संधिनावृषस्यंतीतस्याःपयोनपिबेत्ऋतुमतीभवतिविवत्सायामृतव
त्सायाः असन्निहितवत्सायाश्चक्षीरंवर्जयेत् धेन्वधिकरणन्यायेनवत्सग्रहणादेवगविलब्धायांपुनर्गोग्रहणंगोरेवनतुअजामहि
ष्योरितिज्ञापनार्थम् ८ आरण्यानांचसर्वेषांमृगाणांमाहिषंविना स्त्रीक्षीरंचैवेति मृगशब्दोत्रमाहिषपर्युदासात्पशुमात्रपरः मा

हिषं क्षीरं वर्जयित्वा सर्वेषामारण्यपशूनां हस्त्यादीनां क्षीरं स्त्रीक्षीरं च सर्वाणि शुक्तानि वर्जनीयानि स्वभावतो मधुराणि रसानि यानि कालवशेन उदकादिना चाम्लीभवंति तानि शुक्तशब्दवाच्यानि शुक्तं पर्युषितं चैवेति चतुर्थे कृतेपि शुक्तप्रतिषेधे दध्यादिप्रसक्त्यर्थं पुनरिहोच्यते ९ दधिभक्ष्यं चेति शुक्तेषु मध्ये दधि संभवं तक्रादि यानि तु पुष्पमूलफलैरुदकेन संधीयंते तानि भक्षणीयानि शुभैरिति विशेषणोपादानात् मोहादिविकारकारिभिः कृतसंधानस्य प्रतिषेधः तथा च बृहस्पतिः कंदमूलफलैः पुष्पैः शस्तैः शुक्तान्न वर्जयेत् अविकारि भवेद्यस्य भक्ष्यं न तद्विकारकृत् १० क्रव्यादानिति आमं मांसं ये भक्षयंति ते क्रव्यादास्तान् सर्वान् गृध्रादीन् पक्षिणो वर्जयेत् तथा ग्रामनिवासिनश्च पक्षिणः पारावतादीन् तथा श्रुतौ केचिदेकशफा भक्ष्यत्वेन निर्दिष्टाः तथा चोष्ट्रं वाडवमालभेत तस्य च मांसमश्नीयादिति केचिच्चानिर्दिष्टा रासभादयः तेषां मांसं वर्ज्जयेत् येपि यज्ञांगत्वेन विहितास्तेषामपि यज्ञ एव मांसभ

दधिभक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम् यानि चैवाभिषूयंते पुष्पमूलफलैः शुभैः १० क्रव्यादान् शकुनीन् सर्वान् तथा ग्रामनिवासिनः अनिर्दिष्टांश्चैकशफांष्टिट्टिभं चैव विवर्जयेत् ११ कलविंकं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम् सारसं रज्जुवालं च दात्यूहं शुकसारिके १२ प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान् निमज्जतश्च मत्स्यादान् शौनं वल्लूरमेव च १३

क्षणं न सर्वदा टिट्टिभाख्यं च पक्षिणं वर्ज्जयेत्

११ कलविंकमिति कलविंकं चटकं तस्य ग्रामारण्योभयवासिन एव निषेधः आरण्यस्याप्यभक्ष्यत्वार्थं जातिशब्देन निषेधः प्लवाख्यं पक्षिणं तथा हंसचक्रवाकग्रामकुक्कुटसारसरज्जुवालदात्यूहशुकसारिकाख्यान् पक्षिणो वर्जयेत् वक्ष्यमाणजालपादनिषेधेनैव हंसचक्रवाकयोरपि निषेधसिद्धौ पृथङ्निषेधोऽन्येषामापदि जालपादानां विकल्पार्थः स च व्यवस्थितो विज्ञेयः आपदि भक्ष्यानत्वनापदि इच्छाविकल्पस्य रागत एव प्राप्तेः ग्रामकुक्कुटे तु ग्रामग्रहणमारण्यकुक्कुटाद्यनुज्ञानार्थं न त्वलेतद्व्यतिरिक्तग्रामवासिविकल्पार्थं आपदर्थे गतप्रयोजनं भवति वाक्यांतरगतविशेषावधारणपरत्वस्यान्याय्यत्वात् १२ प्रतुदानिति प्रतुद्य चंच्वा ये भक्षयंति तान् दार्वाघाटादीन् जालपादानिति जालाकारपादान् शरारिप्रभृतीन् कोयष्ट्याख्यं पक्षिणं नखविष्किरान् नखैर्विकीर्य ये भक्षयं-

तितानप्यनुज्ञातारण्यकुक्कुटादिव्यतिरिक्तान् श्येनादीन् तथानिमज्ज्य ये मत्स्यान् खादंति तान्मद्गुप्रभृतीन् शूनां मारणस्थानं तत्र
स्थितं यन्मांसमभक्ष्यमपि वल्लूरं शुष्कमांसं एतानि वर्ज्जयेत् १३ बकंचैवेति बकबलाकाद्रोणकाकखंजनान् तथा मत्स्यादान् पक्षि
व्यतिरिक्तानपि नक्रादीन्विड्वराहांश्च विडिति विशेषणादारण्यसूकराद्यनुज्ञानार्थं मत्स्यांश्च सर्वान् वर्ज्जयेत् १४ मत्स्यभक्षणे नि
दामाह योयस्येति योयदीयं मांसं खादति स तन्मांसाद एव परमुपादिश्यते यथा मार्जारो मूषिकादः मत्स्यादः पुनः सर्वमांसभक्षक
त्वेन व्यपदेष्टुं योग्यः तस्मान्मत्स्यान्न खादेत् १५ इदानीं भक्ष्यमत्स्यानाह पाठीनरोहिताविति पाठीनरोहितौ मत्स्यभेदौ भक्षणी
यौ हव्यकव्ययोर्नियुक्तावितिसमस्तवक्ष्यमाणभक्षणनिषिद्धोपलक्षणार्थं तेन प्राणात्ययादावदोषः तथा राजीवाख्यान्सिंहतुंडां
श्च सशल्कांश्च सर्वान् वक्ष्यमाणलक्षणोपेतान् खादेत् मेधातिथिगोविंदराजौ तु पाठीनरोहितौ दैवपैत्रादिकर्मणि नियुक्तावेवाद्नीयौ
न त्वन्यदा राजीवसिंहतुंडसशल्कमत्स्यास्तु हव्यकव्याभ्यामन्यत्रापि भक्षणीया इत्याचक्षातुः न तन्मनोहरम् पाठीनरोहितौ श्राद्धे

बकंचैव बलाकांच काकोलं खंजरीटकम् मत्स्यादान्विड्वराहांश्च मत्स्यानेव च सर्वशः १४ योयस्य
मांसमश्नाति स तन्मांसाद उच्यते मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्ज्जयेत् १५ पाठीनरो-
हितावाद्यौ नियुक्तौ हव्यकव्ययोः राजीवान्सिंहतुंडांश्च सशल्कांश्चैव सर्वशः १६ न भक्षयेदेकचरा
नज्ञातांश्च मृगद्विजान् भक्ष्येष्वपि समुद्दिष्टान्सर्वान्पंचनखांस्तथा १७

नियुक्तो श्राद्धभोक्त्रैव भक्षणीयौ न तु श्राद्ध
कर्त्रापि राजीवादयो हव्यकव्याभ्यामन्यत्रापि भक्ष्या इत्यस्याप्रमाणत्वात् सूत्रांतरैश्च रोहितपाठीनराजीवादीनान्तुल्यत्वेनाभिधा
नात् तथा च शंखः राजीवाः सिंहतुंडाश्च सशल्काश्च तथैव च पाठीनरोहितौ चापि भक्ष्या मत्स्येषु कीर्त्तिताः याज्ञवल्क्यः भक्ष्याः पं
चनखा श्वाविद्गोधाः कच्छपशल्यकाः शशश्च मत्स्येष्वपि तु सिंहतुंडकरोहिताः तथा पाठीनराजीवसशल्काश्च द्विजातिभिः हारी
तः सशल्कान्मत्स्यान्पापोपपन्नान्भक्षयेत् एवं च मोक्त्रैवाद्यौ न कर्त्रापि श्राद्धे पाठीनरोहितौ राजीवाद्यास्तथा नेति व्याख्यानमु
पेक्षणीयम् १६ न भक्षयेदिति ये एकाकिनः प्रायेण चरंति सर्पादयस्तान् एकचरान् तथा ये अभियुक्तैरपि नामजातिभेदेनावधार्य विभाग

तस्यमृगपक्षिणोनज्ञायंतेतान्भक्ष्येष्वपिसमुद्दिष्टानितिसामान्यविशेषनिषेधाभावेनभक्ष्यपक्षिनिक्षिप्तान्भक्ष्यत्वेनसमुद्दिष्टानिव
तथासर्वान्पंचनखान्वानरादीन्नभक्षयेत् १७ अत्रप्रतिप्रसवमाह श्वाविधमिति श्वाविधंसेधाख्यंप्राणिभेदकंशल्यकंतत्सदृशंस्
लोमानम् तथागोधागंडककच्छपशशान्पंचनखेषुभक्ष्यान्मन्वादयःप्राहुः तथाउष्ट्रवर्जितान्एकदंतपंक्त्युपेतान् १८ छत्राकमि
ति कवकंग्रामसूकरलशुनादीनां अन्यतमंबुद्धिपूर्वकंगुणप्रायश्चित्तोपदेशात् अभ्यासतोभक्षयित्वाद्विजातिःपततिततश्चपतितप्रा-
यश्चित्तंकुर्यात् गर्हितानांतथाजग्धिःकराणा नसमानिषडिति १९ अमत्येति एतानिछत्राकादीनिषट्बुद्धिपूर्वकमेवभक्षयित्वाऽभिधे
यभक्षणस्यनिमित्तत्वेनसाहित्यस्याविवक्षितत्वात् एकादशाध्यायवक्ष्यमाणस्वरूपंसंतापनंयतिचांद्रायणंचरेत्एतद्य
तिरिक्तेषुलोहितवृक्षनिर्यासादिषुप्रत्येकंभक्षणादहोरात्रोपवासंकुर्यात् छत्राकादीनांचप्रायश्चित्तापकर्षविवर्जनार्थः शेषेषूपवसेदह

श्वाविधंशल्यकंगोधांखड्गकूर्मशशांस्तथा भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदतः १८ छत्राकंविड्वरा
हंचलशुनंग्रामकुक्कुटम् पलांडुंगृंजनंचैवमत्याजग्ध्वापतेद्द्विजः १९ अमत्यैतानिषड्जग्ध्वाकृच्छ्रंसां
तपनंचरेत् यतिचांद्रायणंवापिशेषेषूपवसेदहः २० संवत्सरस्यैकमपिचरेत्कृच्छ्रंद्विजोत्तमः अज्ञात
भुक्तशुद्ध्यर्थंज्ञातस्यतुविशेषतः २१ यज्ञार्थंब्राह्मणैर्वध्याःप्रशस्तामृगपक्षिणः भृत्यानांचैववृत्त्यर्थ
मगस्त्योह्याचरत्पुरा २२

रितिलाघवार्थंतत्राहिक्रियमाणेलोहितनिर्यासग्रहणमपिकर्त्तव्यंस्यात् २० संवत्सरस्येति द्वि-
जोत्तमपदंद्विजातिपरंत्रयाणांप्रकृतत्वात्एतदुक्तंद्विजातीनामित्युपसंहाराच्च द्विजातिःसंवत्सरमध्येएकमपिकृच्छ्रंप्रथमाम्नाना
त्प्राजापत्याख्यमज्ञातभक्षणदोषोपशमनार्थमनुतिष्ठेत् ज्ञातस्यपुनःअभक्ष्यभक्षणदोषस्यविशेषतोयत्रयद्विहितंतदेवप्राया
नंकुर्यात् यत्तुत्राणिदेवाःपवित्राणिब्राह्मणानामकल्पयन् अदृष्टमद्भिर्निर्णिक्तंयच्चवाचाप्रशस्यतइतितद्रव्यशुद्धिप्रकरणपा
प्रायश्चित्तव्यतिरिक्तद्रव्यशुद्धिविशेषेऽवतिष्ठते २१ यज्ञार्थमिति इदानींभक्षणप्रसंगेनयागाद्यर्थंहिंसामप्यनुजानातियया त-
ब्राह्मणादिभिर्यागार्थंप्रशस्ताःशास्त्रविहितामृगपक्षिणोवध्याः भृत्यानांचावश्यभरणीयानांवृद्धमातापित्रादीनांसंव

स्यादगस्त्योमुनिः पूर्वंतथाकृतवान् भक्तिरूपोयमनुवादः २२ बभूवुरिति यस्मात्पुरातनेष्वपिऋषिकर्त्तृकयज्ञेषुच भक्ष्याणां
मृगपक्षिणांमांसेनपुरोडाशाअभवन् तस्माद्यज्ञार्थमधुनातनैरपिमृगपक्षिणोवध्याः २३ इदानींपर्युषितप्रतिप्रसवार्थमाह
यत्किंचिदिति यत्किंचित्खरविशदंअभ्यवहार्य्यंमोदकादिभोज्यंपायसादिअगर्हितंउपघातांतररहितंतत्पर्युषितंरात्र्यंतरितमपि
तत्घृततैलदध्यादिसंयुक्तंकृत्वाभक्षणीयम् ननुप्रागेवयत्स्नेहसंयुक्तंतत्पर्युषितंभक्षणीयमितिव्याख्येयंतथाचसतिहविःशेष
स्यस्नेहसंयोगावश्यंभावात्यत्किंचित्स्नेहसंयुक्तमित्यनेनैवभक्षणेसिद्धेहविःशेषंचयद्भवेदित्यनर्थकंस्यात् स्मृत्यंतरेपिभक्ष
णकालएवाभिघारणमुपदिश्यते तथाचयमः मसूरमाषसंयुक्तंतथापर्युषितंचयत् तत्तुप्रक्षालितंकृत्वाभुंजीतह्यभिघारित
म् हविःशेषंतुचरुपुरोडाशादिपर्युषितमपिभोजनकालेस्नेहसंयोगशून्यमेवभक्षणीयंपृथगुपदेशात् २४ चिरस्थितमिति

बभूवुर्हिपुरोडाशाभक्ष्याणांमृगपक्षिणाम् पुराणेष्वपियज्ञेषुब्रह्मक्षत्रसवेषुच २३ यत्किंचित्स्नेह
संयुक्तंभक्ष्यंभोज्यमगर्हितम् तत्पर्युषितमप्याद्यंहविःशेषंचयद्भवेत् २४ चिरस्थितमपित्वाद्यम
स्नेहाक्तंद्विजातिभिः यवगोधूमजंसर्वंपयसश्चैवविक्रिया २५ एतदुक्तंद्विजातीनांभक्ष्याभक्ष्यमशेष
तः मांसस्यातःप्रवक्ष्यामिविधिंभक्षणवर्जने २६ प्रोक्षितंभक्षयेन्मांसंब्राह्मणानांचकाम्यया यथा
विधिनियुक्तस्तुप्राणानामेवचात्यये २७

अनेकरात्र्यंतरिताअपियवगोधूमदुग्धविकाराःस्नेहसंयोगरहिताअपिद्वि
जातिभिर्भक्षणीयाः २५ एतदुक्तमिति एतद्द्विजातीनांभक्ष्याभक्ष्यमुक्तम् अतऊर्ध्वंमांसस्यभक्षणेवर्ज्जनेचविधानंनिःशेषंव
क्ष्यामि २६ प्रोक्षितमिति प्रोक्षितंभक्षयेदितिपरिसंख्यावास्यात् नियमविधिर्वास्यात्तत्रपरिसंख्यात्वेप्रोक्षितादन्यन्नभक्षणी
यमितिवाक्यार्थःस्यात् सचानुपाकृतमांसानीत्यनेनैवनिषेधात्सिद्धः तस्मान्मंत्रकृतप्रोक्षणाख्यसंस्कारयुक्तयज्ञहुतपशुमांस
भक्षणमिदंयज्ञांगंविधीयते अतएवासंस्कृतान्पशून्मंत्रैरित्यस्यानुवादंवक्ष्यति ब्राह्मणानांचयदाकामनाभवतितदावश्यंमांसं
भोक्तव्यमितितदापिनियमतएकवारंभक्षयेत्सकृद्ब्राह्मणकाम्ययेतियमवचनात् तथाश्राद्धेचमधुपर्केचसमांसोमधुपर्कइतिगृ

स्ववचनात् नियुक्तेननियमान्मांसंभक्षणीयमिति अतएवनियुक्तस्तथान्यायमित्यतिक्रमदोषंवक्ष्यतिप्राणात्ययेचाहारांत
राभावनिमित्तकेव्याधिहेतुकेवानियमतोमांसंभक्षयेत् २७ प्राणात्ययेमांसभक्षणानुवादमाह प्राणस्यान्नमिदमिति प्राणिनो
तिप्राणोजीवः शरीरांतर्गतोभोक्तातस्यादनीयंसर्वमिदंब्रह्माकल्पितवान् किंतदाहजंगमंपश्वादिस्थावरंव्रीहियवादिसर्वंतस्यभो
जनंतस्मात्प्राणधारणार्थंजीवोमांसंभक्षयेत्प्राणस्यार्थमिदंसर्वमित्येवंप्रपंचयति २८ चराणामिति जंगमानांहरिणादीनांअजं
गमास्तृणादयः दंष्ट्रिणांव्याघ्रादीनांअदंष्ट्रिणोहरिणादयः सहस्तानांमनुष्यादीनांअहस्तामत्स्यादयः शूराणांसिंहादीनांभीरवोह
ऽदनीयाएतादृश्यांविधात्रैवसृष्टौ २९ नात्तेति भक्षयिताभक्षणार्हान्प्राणिनःप्रत्यहमपिभक्षयन्नदोषंप्राप्नोति यस्मा

प्राणस्यान्नमिदंसर्वंप्रजापतिरकल्पयत् स्थावरंजंगमंचैवसर्वंप्राणस्यभोजनम् २८ चराणामन्न
मचरादंष्ट्रिणामप्यदंष्ट्रिणः अहस्ताश्चसहस्तानांशूराणांचैवभीरवः २९ नात्तादुष्यत्यदन्नाद्यान्प्राणि
नोहन्यहन्यपि धात्रैवसृष्टाह्याद्याश्चप्राणिनोऽत्तारएवच ३० यज्ञायजग्धिर्मांसस्येत्येषदैवोविधिःस्मृ
तः अतोन्यथाप्रवृत्तिस्तुराक्षसोविधिरुच्यते ३१ क्रीत्वास्वयंवाप्युत्पाद्यपरोपकृतमेववा देवान्पितॄं
श्चार्चयित्वाखादन्मांसंनदुष्यति ३२ नाद्यादविधिनामांसंविधिज्ञोऽनापदिद्विजः जग्ध्वाह्यविधिनामां
संप्रेत्यतैरद्यतेऽवशः ३३

द्धिधात्रैवभक्षणार्हाभक्षयितारश्चनिर्मिताइतित्रिभिःश्लोकैःप्राणात्ययेमांसभक्षणस्तुतिरि
यम् ३० अथप्रोक्षितभक्षणनियमार्थमाह यज्ञायेति यज्ञसंपत्त्यर्थंतदंगभूतमांसस्यभक्षणंजग्धिरेतद्दैवमनुष्ठानंउक्तव्यतिरिक्त
प्रकारेणपुनरात्मार्थमेवपशुंव्यापाद्यतन्मांसभक्षणेप्रवृत्तीराक्षसोचितमनुष्ठानंइत्युत्तरार्द्धेवृथामांसभक्षणनिषेधस्यानुवादः ३१
क्रीत्वेति क्रीत्वाआत्मनाचोत्पाद्यअन्येनवाकेनाप्यानीयदत्तंमांसंदेवपितृभ्योदत्वाशेषंभक्षयन्नपापंप्राप्नोति अतःप्रोक्षितादि
नतुव्यपभक्षणवन्नेदन्नियतंभक्षणंनदुष्यतीत्यभिधानात् वर्षेवर्षेऽश्वमेधेनइत्यादिवक्ष्यमाणमांसवर्जनविधिरप्येत
एवाविरोधात् ३२ नाद्यादिति मांसभक्षणानुष्ठानदोषज्ञोद्विजातिरनापदितत्तद्दैवाद्यर्चनविधानंविनानमांसंभक्षयेत् य

श्राद्धमधुपर्कादिविधानेनयोमांसंखादतिसमृतःसन्यन्मांसंतेनभक्षितंतैःप्राणिभिः परलोकैस्वरक्षणाक्षमःस्वीयतइतिसर्वश्लोकानुवादः ३३
नताहृशमिति मृगवधजीविनोव्याधादेर्धनानिमित्तंमृगाणांहंतुर्नतथाविधंपापंभवतियादृशमदेवपितृशेषभूतमांसानिखादतःपर
लोकेभवतीतिपरस्तुवादएव ३४ नियुक्तस्त्विति श्राद्धेमधुपर्केचयथाशास्त्रंनियुक्तःसन्योमनुष्योमांसंनखादतिसंमृतःसन्नेकविं
शतिर्जन्मानिपशुर्भवति यथाविधिनियुक्तस्त्विसेतन्नियमातिक्रमफलविधानमिदम् ३५ असंस्कृतानिति वेदविहितमंत्रवत्प्रोक्ष
णादिसंस्कारशून्यान्पशून्विप्रादिःकदाचिन्नाश्नीयात् शाश्वतंप्रवाहानादितयानित्यंपशुयागादिविधिमास्थितोमंत्रसंस्कृतानेवा-
श्नीयादिति प्रोक्षितंभक्षयेन्मांसमित्येतस्यानुवादार्थमेतत् ३६ कुर्यादिति संगेआसक्तौपशुभक्षणानुरागेण घृतमयींपिष्टमयीं

नताहृशंभवत्येनोमृगहंतुर्धनार्थिनः यादृशंभवतिप्रेत्यवृथामांसानिखादतः ३४ नियुक्तस्तुयथान्यायं
योमांसंनात्तिमानवः सप्रेत्यपशुतांयातिसंभवानेकविंशतिम् ३५ असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रःकदाच
न मंत्रैस्तुसंस्कृतानद्याच्छाश्वतंविधिमास्थितः ३६ कुर्याद्घृतपशुंसंगेकुर्यात्पिष्टपशुंतथा नत्वेवतुवृथा
हंतुंपशुमिच्छेत्कदाचन ३७ यावंतिपशुरोमाणितावत्कृत्वोहमारणम् वृथापशुघ्नःप्राप्नोतिप्रेत्यजन्मनि
जन्मनि ३८ यज्ञार्थंपशवःसृष्टाःस्वयमेवस्वयंभुवा यज्ञस्यभूत्यैसर्वस्यतस्माद्यज्ञेवधोऽवधः ३९ ओषध्यः
पशवोवृक्षास्तिर्यंचःपक्षिणस्तथा यज्ञार्थंनिधनंप्राप्ताःप्राप्नुवंत्युत्सृतीःपुनः ४०

वापशुप्रतिकृतिंकृत्वाखादये
न्नपुनर्देवताद्युद्देशंविनैवपशून्कदाचिदपिहंतुमिच्छेत् ३७ यावंतीति देवताद्युद्देशमंतरेणआत्मार्थंयःपशून्हंतिसहपाप
कर्मामृतःसन्यावत्संख्यानिपशुरोमाणितावत्संख्या भूतंजन्मनिजन्मनिमारणंप्राप्नोति तस्माद्वृथापशुन्नहन्यात् तावत्कृत्वइ
तिवत्तंतात्क्रियाभ्यावृत्तिगणनेकृत्वसुच्प्रत्ययः इहहशब्दआगमप्रसिद्धिसूचनार्थः ३८ यज्ञार्थंतुपशुवधेनदोषइत्याह यज्ञा
र्थंपशवइति यज्ञसिद्ध्यर्थंप्रजापतिनाआत्मनैवादरेणपशवःसृष्टाःयज्ञश्चाग्नौप्रास्ताहुतिन्यायात्सर्वस्यास्यजगतोविवृद्ध्यर्थःतस्मा
द्यज्ञेवधोऽवधएववधजन्यदोषाभावात् किंच ३९ ओषध्यइति ओषध्योव्रीहियवाद्याःपशवोयूपाद्यर्थाःतिर्यंचःकूर्मादयःपक्षिणः

कपिंजलाद्याः यज्ञार्थेविनाशंगताः पुनर्जात्युत्कर्षंप्राप्नुवंति ४० मधुपर्केचेति समांसोमधुपर्क इतिविधानान्मधुपर्केच्चयज्ञेचज्यो तिष्टोमादौपित्र्येदैवेचकर्मणिश्राद्धादौपशवोहिंसनीयाः नान्यत्रेतिमनुरभिहितवान् ४१ एष्वर्थेष्विति एषुमधुपर्कादिषुपदार्थे षुपशून्हिंसन् आत्मानंपशुंचउत्तमांगतिंस्वर्गोपभोगयोग्यविलक्षणदेहदेशादिसंबंधंप्रापयतिवेदतत्त्वार्थविदितिविद्वदधिकार बोधनार्थम् नन्वन्याधिकारित्वेकर्मणिकथमनधिकृतस्यपश्वादेरुत्तमगतिप्राप्तिः फलमुच्यतेशास्त्रप्रमाणकत्वात् अस्यार्थस्य धिकारिकायांजातेष्ट्यावनधिकारिणोपिपुत्रस्यफलप्राप्तिवत् इहापिपश्वादिगतफलसंभवात् यजमानएवकारुणिकतयापशुगतफल विशिष्टमेवफलंकामयिष्यतिअतएवात्मानंचपशुंश्चैवेत्यभिधानम् यजमानव्यापारादेवपशुगतफलसिद्धिरुक्ता ४२ गृहेगुरावर- ण्येवेति गृहेगृहाश्रमेब्रह्मचर्याश्रमेवानप्रस्थाश्रमेचप्रशस्तात्माद्विजोनिवसन्नापद्यपिनाशास्त्रीयांहिंसांसमाचरेत् ४३ कथंतर्हिहिं

मधुपर्केचयज्ञेचपितृदैवतकर्मणि अत्रैवपशवोहिंस्यान्नान्यत्रेत्यब्रवीन्मनुः ४१ एष्वर्थेषुपशून्हिं सन्वेदतत्त्वार्थविद्द्विजः आत्मानंचपशंश्चैवगमयत्युत्तमांगतिम् ४२ गृहेगुरावरण्येवानिवसन्नात्मवा न्द्विजः नावेदविहितांहिंसामापद्यपिसमाचरेत् ४३ यावेदविहिताहिंसानियतास्मिंश्चराचरे अहिंसामे वतांविद्याद्वेदाद्धर्मोहिनिर्बभौ ४४ योऽहिंसकानिभूतानिहिनस्त्यात्मसुखेच्छया सजीवंश्चमृतश्चैवन क्वचित्सुखमेधते ४५ योबंधनवधक्लेशान्प्राणिनान्नचिकीर्षति ससर्वस्यहितप्रेप्सुःसुखमत्यंतमश्नुते ४६

स्याद्वैदिकोदेशादिपशुहिंसानाधर्मायेत्यतआह यावेदविहितेति याश्रुतिविहिताकर्मविशेषदेशकालादिनियताऽस्मिन्ज तिस्थावरजंगमात्मनिअहिंसामेवतांजानीयात् हिंसाजन्याधर्मविरहाद्वैक्षपशुहननमधर्मः प्राणिहननत्वात् ब्राह्मणहननवत् इत्याद्य नुमानंउपजीव्यशास्त्रबाधादेवनप्रवर्त्तते दृष्टांतीकृतब्राह्मणहननस्याप्यधर्मत्वेशास्त्रमेवोपजीव्यंवेदाद्धर्मोहिनिर्बभौयस्मादनन्य प्रमाणकोधर्मोवेदादेवनिःशेषेणप्रकाशतांगतः ४४ योऽहिंसकानीति योऽनुपघातकान्प्राणिनः हरिणादीनात्मसुखेच्छयामारय तिसइहलोकेपरलोकेचनसुखेनवर्द्धते ४५ योबंधनेति योबंधनमारणक्लेशादीन् प्राणिनांकर्त्तुंनेच्छतिससर्वहितप्राप्तीच्छुरनं

तंसत्वंप्राप्नोतिअन्यच्च ४६ यद्ध्यायतीति यच्चिंतयतिधर्मादिकमिदंमेस्त्वितिसर्वश्रेयःसाधनंकर्मकरोतियत्रचपरमार्थध्यानादौधृ
तिंबध्नातितत्सर्वमक्लेशेनलभतेयउपघातनिमित्तंदंशमशकाद्यपिनव्यापादयति मांसभक्षणप्रसंगेनहिंसागुणदोषावभिधायपुनः
प्रकृतेमांसाभक्षणमाह ४७ नाकृत्वेति प्राणिहिंसाव्यतिरेकेणनकृचिन्मांसमुत्पद्यतेप्राणिवधश्चनस्वर्गनिमित्तंनरकहेतुरेवयाव
त्तस्मादविधिनामांसंनभक्षयेदिति ४८ समुत्पत्तिंचेति शुक्रशोणितपरिणामात्मिकांसमुत्पत्तिंघृणाकरींविज्ञायप्राणिनांवध-
बंधौक्रूरकर्मरूपौनिरूप्यविहितमांसभक्षणादपिनिवर्तेतकिमुताविहितमांसभक्षणादिति अविधिनामांसभक्षणनिंदानुवादः
४९ नभक्षयतीति उक्तविधिव्यतिरिक्तेनयोनमांसंभक्षयतिपिशाचवदितियथापिशाचोभक्षयतितथानेतिव्यतिरेकेदृष्टांतः

यद्ध्यायतियत्कुरुतेधृतिंबध्नातियत्रच तदवाप्नोत्ययत्नेनयोहिनस्तिनकिंचन ४७ नाकृत्वाप्राणिनां
हिंसांमांसमुत्पद्यतेक्वचित् नचप्राणिवधःस्वर्ग्यस्तस्मान्मांसंविवर्जयेत् ४८ समुत्पत्तिंचमांसस्यवधबं
धौचदेहिनाम् प्रसमीक्ष्यनिवर्तेतसर्वमांसस्यभक्षणात् ४९ नभक्षयतियोमांसंविधिंहित्वापिशाचवत्
सलोकेप्रियतांयातिव्याधिभिश्चनपीड्यते ५० अनुमंताविशसितानिहंताक्रयविक्रयी संस्कर्ताचो
पहर्ताचखादकश्चेतिघातकाः ५१ स्वमांसंपरमांसेनयोवर्द्धयितुमिच्छति अनभ्यर्च्यपितॄन्देवान्
ततोऽन्योनास्त्यपुण्यकृत् ५२

सलोकस्यप्रियोभवतिरोगैश्चनबाध्यतेतस्माद्वैधमांसभक्षणाद्व्याधयोभवंतीतिदर्शित
म् ५० अनुमंतेति यदनुमतिव्यतिरेकेणहननंकर्त्तुंनशक्यतेसोऽनुमंता विशसिताअंगानियःकर्त्तर्यादिनापृथक्पृथक्करोतिक्र
यविक्रयीमांसस्यक्रेताविक्रेताच संस्कर्तापाचकःखादकोभक्षयिता गोविंदराजस्तुयःक्रीत्वाविक्रीणातिसक्रयविक्रयीत्येकमेवाह
तदयुक्तम् हननेनतथाहंताधनेनक्रयकस्तथा विक्रयीतुधनादानात्संस्कर्तातत्प्रवर्तनादितियमवचनेनपृथङ्निर्देशात् घातकत्वव
चनंचेदमशास्त्रीयपशुवधेनुमत्यादयोपिनकर्त्तव्याइत्येवंपरंविधिनिषेधपरत्वाच्छास्त्रस्य खादकादीनांपृथक्प्रायश्चित्तदर्शनात्
५१ स्वमांसमिति स्वशरीरमांसंपरमांसेनदेवपित्राद्यर्चनंविनायोवर्द्धयितुमिच्छतितस्मादपरोनापुण्यकर्तास्तीत्यविधिमांसभक्षण

निंदानुवादः इदानीमनियतामसिद्धमांसभक्षणस्यनिवृत्तिर्द्धर्मायइत्येतद्दर्शयितुमाह ५२ वर्षेवर्षइति योवर्षशतंयावत्प्रतिवर्षम-
श्वमेधेनयजेतयश्चयावज्जीवंमांसन्नखादतितयोःपुण्यस्यफलंस्वर्गादितुल्यम् ५३ फलमूलाशनैरिति पवित्रस्यफलमूलभक्षणे
र्वानप्रस्थभोजनानांचनीवाराद्यन्नानांभोजनैर्नतत्फलमवाप्नोतिपुच्छोरुक्तंनियमितामसिद्धमांसवर्जनाल्लभते ५४ मांसभक्षयितेति
इहलोकेयस्यमांसमहमद्मामिपरलोकेमांसभक्षयिष्यतीतिएतन्मांसशब्दस्यनिरुक्तंपंडिताःप्रवदंति इतिमांसशब्दस्यनिर्वचनमवैध
मांसभक्षणपापफलकथनार्थम् ५५ नमांसभक्षणइति ब्राह्मणादीनांवर्णानांयथाधिकारंमाविहितामतिषिद्धभक्षणादौनकश्चि
द्दोषोयस्मात्प्राणिनांभक्षणपानमैथुनादौप्रवृत्तिःस्वाभाविकीयंधर्मःवर्जनंपुनर्महाफलंअविहितामतिषिद्धमद्यमैथुननिवृत्तेर्महाफ

वर्षेवर्षेऽश्वमेधेनयोयजेतशतंसमाः मांसानिचनखादेद्यस्तयोःपुण्यफलंसमम् ५३ फलमूलाशनैर्मे
ध्यैर्मुन्यन्नानांचभोजनैः नतत्फलमवाप्नोतियन्मांसपरिवर्ज्जनात् ५४ मांसभक्षयिताऽमुत्रयस्यमांस
मिहाद्म्यहम् एतन्मांसस्यमांसत्वंप्रवदंतिमनीषिणः ५५ नमांसभक्षणेदोषोनमद्येनचमैथुने प्रवृ
त्तिरेषाभूतानांनिवृत्तिस्तुमहाफला ५६ प्रेतशुद्धिंप्रवक्ष्यामिद्रव्यशुद्धिंतथैवच चतुर्णामपिवर्णानां
यथावदनुपूर्वशः ५७ दंतजातेऽनुजातेचकृतचूडेचसंस्थिते अशुद्धाबांधवाःसर्वेसूतकेचतथोच्य
ते ५८

लकथनार्थोयंउक्तस्यैवमांसवर्ज्जनमहाफलकथनस्यानुवादः ५६ प्रेतशुद्धिमिति ब्राह्मणादीनांचतुर्णामपिव
र्णानांप्रेतेष्वपिपित्रादीनांशुद्धिंब्राह्मणादिक्रमेणयथायस्येतिद्रव्यादीनांचतैजसादीनांशुद्धिमभिधास्यन्तत्रशुद्धेरशुद्धिसापेक्ष
त्वात्तन्निरूपणार्थमाहवक्ष्यमाणेन ५७ दंतजातइति दंतजातेजातदंतइत्यर्थः वाहिताग्न्यादिष्वित्यनेनपरनिपातः अनुजातेजा
तदंतानंतरेकृतचूडाकरणेचचकारात्कृतोपनयनेचसंस्थितेमृतेसतिबांधवाःसपिंडाःसमानोदकाश्चाशुद्धाभवंतीत्युच्यते
वक्ष्यमाणाशौचकालभेदादित्यस्यावबोधनार्थम् ५८ दशाहमिति सप्तपुरुषपर्यंतंसपिंडतांव-
क्ष्यति सपिंडेषुशवनिमित्तमाशौचंदशाहोरात्रंब्राह्मणस्योपदिश्यते शुद्ध्येद्विप्रोदशाहेनइतिवक्ष्यमाणत्वात् आर्वाक्संचय

नाद स्थ्नामिति चतुरहोपलक्षणं चतुर्थे दिवसे अस्थिसंचयनं कुर्यादिति विष्णुवचनात् त्र्यहमेकाहोरात्रं वा अहःशब्दोऽहोरात्रपरः अयं चाग्निवेदादिगुणापेक्षो व्यवस्थितविकल्पः यथाह दक्षः एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः हीने हीनं भवे चैव त्र्यह श्चतुरहस्तथा श्रौताग्निमतो मंत्रब्राह्मणात्मककृत्स्नशाखाध्यायिनः एकाहाशौचम् तत्र श्रौताग्निवेदाध्ययनगुणयोरेकगुण रहितो हीनः तस्य त्र्यहः उभयगुणरहितस्तु हीनतरः केवलस्मार्ताग्निमान् तस्य चतुरहः सकलगुणरहितदशाहः तदाह पराशरः नि र्गुणो दशभिर्दिनैरिति ५९ सपिंडतात्विति सपिंडलक्षणमाह यं पुरुषं प्रतियोगिनं कृत्वा निरूप्यते तस्य पितृपितामहप्रभृतीन् ष ट्पुरुषाननतिक्रम्य सप्तमे पुरुषे प्राप्ते सपिंडत्वं निवर्त्तते एवं पुत्रपौत्रादिष्वप्यवगंतव्यं पिंडसंबंधनिबंधना चेयं सापिंडता तथाहि पितृपितामहप्रपितामहेभ्यस्त्रिभ्यः पिंडदानं प्रपितामहस्य पित्रादयस्त्रयः पिंडलेपभाजस्ततः पूर्वस्य तु सप्तमस्य पिंडसंबंधो नास्ती

दशाहं शावमाशौचं सपिंडेषु विधीयते आर्वाक्संचयनादस्थ्नां त्र्यहमेकाहमेव च ५९ सपिंडता तु पुरु षे सप्तमे विनिवर्त्तते समानोदकभावस्तु जन्मनाम्नोरवेदने ६० यथेदं शावमाशौचं सपिंडेषु विधीय ते जननेप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम् ६१ सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् सूत कं मातुरेव स्यादुपस्पृश्य पिता शुचिः ६२

त्यसपिंडता यस्य चैते षट् पुरुषाः सपिंडाः सोपि तेषां सपिंडः पिंडदातृत्वेन त त्पिंडसंबंधात् अतः साप्तपौरुषीयं सपिंडता तदुक्तं मत्स्यपुराणे लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषम् सगोत्रत्वे चेयं सपिंडता अतएव शंखलिखितौ सपिंडता तु सर्वेषां गोत्रतः साप्तपौरुषी तेन मातामहादीनां एकपिंडसंबंधेपि न सपिंडता समानोदकत्वं पुनरस्मत्कुले अमुकनामा भूदिति जन्मनाम्नोर्यथापरिज्ञानेन निवर्त्तते ६० यथेदमिति यथेदं दशाहादिकं शवनिमित्तमाशौचं कर्मानर्हत्वलक्षणं सपिंडेषु दशाहं शावमाशौचमित्यनेन विधीयते प्रसवेपि सम्यक् शुद्धि मिच्छतां सपिंडानां तादृशमेवाशौचं भवेत् अनिर्देशेन तुल्यतायां प्राप्तायां विशेषमाह ६१ सर्वेषामिति मरणनिमित्तमस्पृश्यत्वल क्षणमशौचं सर्वेषामेव सपिंडानां समानम् जनननिमित्तं तु मातापित्रोरेव भवति तत्राप्ययं विशेषः जनननिमित्तमस्पृश्यत्वं मातुरेव

दशरात्रंपितातुस्नानात्स्पृश्योभवतिअयमेवसंबंधःसंवर्तेनव्यक्तीकृतः जातेपुत्रेपितुःस्नानंसचैलंतुविधीयते माताशुध्येद्दशाहेनस्नानात्तुस्पर्शनंपितुः ६२ निरस्यत्विति स्नानंमैथुनिनःस्मृतमितिमैथुनेस्नानंविधास्यति तेनमैथुनंविनापिकामतोरेतःस्खलनेस्नात्वापुमान्शुद्धोभवति अकामतस्तुस्वप्नादौरेतःपातेमूत्रवदेतसउत्सर्गेइत्यापस्तंबोक्तेःस्नानंविनापिगृहस्थस्यशुद्धिः ब्रह्मचारिणस्तुकामतोऽपिस्वप्नेसिक्त्वाब्रह्मचारीत्यनेनस्नानादिनाशुद्धिरुक्ताबैजिकेतुसंबंधेपरपूर्वभार्यायामपत्योत्पत्तौत्र्यहमशौचंभवति तथाचविष्णुः परपूर्वभार्यासुत्रिरात्रंरेतःपातिनअशौचमप्रकृतमपिजननप्रकरणेप्रसंगात्तदनुगुणतयोक्तंयत्ररेतःपातमात्रेणस्नानंतत्रापत्योत्पत्तौत्रिरात्रमुचितम् ६३ अन्हाचैकेनेति एकेनान्हाएकयाचरात्र्याइत्यहोरात्रेणत्रिरात्रैस्त्रिभिरितिनवाहोरात्रैर्मिलित्वादशाहेनेतिवेदाध्येनोक्तम् ननुदशाहेनेतिवक्तव्येकिमर्थोयंवाग्विस्तारः उच्यते रंहीयसीलघिष्ठांवा

निरस्यतुपुमान्शुक्रमुपस्पृश्यैवशुद्ध्यति बैजिकादभिसंबंधादनुरुंध्यादघंत्र्यहम् ६३ अन्हाचैकेनरात्र्याच त्रिरात्रैरेवचत्रिभिः शवस्पृशोविशुद्ध्यंतित्र्यहादुदकदायिनः ६४ गुरोःप्रेतस्यशिष्यस्तुपितृमेधंसमाचरन् प्रेतहारैःसमंतत्रदशरात्रेणशुद्ध्यति ६५ रात्रिभिर्मासतुल्याभिर्गर्भस्रावेविशुद्ध्यति रजस्युपरतेसाध्वीस्नानेनस्त्रीरजस्वला ६६

गिरंनिर्मीतिवाग्मिनः नचावश्यत्वमेतेषांलघूक्त्यैवयन्निबध्यते वृत्तस्वाध्यायगुणयोगेनयेसपिंडाएकाहादिअल्पाशौचयोगास्तेयदिस्नेहादिनाशवस्पृशोभवंतितदादशाहेनैवशुद्ध्यंतिउदकदायिनःपुनःसमानोदकास्त्र्यहेण गोविंदराजस्तुधनग्रहणपूर्वकशवनिर्हारकासंबंधिब्राह्मणविषयमिदंदशाहाशौचमाह ६४ गुरोरिति गुरोराचार्यादेरसपिंडस्यमृतस्यशिष्योऽत्येष्टिंकृत्वाप्रेतनिर्हारकैर्गुरुसपिंडैस्तुल्योदशरात्रेणशुद्धोभवति ६५ रात्रिभिरिति अत्ररात्रिरितिविधेयगामिनोबहुत्वस्याविवक्षितत्वात् तृतीयमासात्प्रभृतिगर्भस्रावेगर्भमासतुल्याहोरात्रैर्विशेषाभिधानाच्चातुर्वर्ण्यस्त्रीविशुद्ध्यतिएतच्चषण्मासपर्यंतम् यथोक्तमादिपुराणे षण्मासाभ्यंतरंयावद्गर्भस्रावोभवेद्यदि तदामासमैस्तासां दिवसैःशुद्धिरिष्यते अतऊर्ध्वंतुजात्युक्तमाशौचंतासुविद्यते मेधातिथिगोविंदराजादयस्त्वादिपुराणेवचनादर्श

नान्सप्तममासादर्वाग्गर्भस्रावेमासतुल्याहोरात्रैःस्त्रीणांविशुद्धिरित्यतिदिशतिप्रथमद्वितीयमासीयगर्भस्रावेस्त्रीणांत्रिरात्रम् यथा
हहारीतः गर्भस्रावेस्त्रीणांत्रिरात्रंसाधीयोरजोविशेषत्वात् पित्रादिसपिंडानान्तत्रसद्यःशौचम् यथाहस्कमंतुः गर्भमासतुल्यादि
वसागर्भसंस्रवणेसद्यःशौचंवाभवति गर्भमासतुल्याइनिस्त्रीविषयंसद्यःशौचंवेतिपित्रादिसपिंडविषयमितिव्यवस्थितविकल्पः
रजस्वलाचस्त्रीरजसिनिवृत्तेसतिपंचमेदिनेस्नानेनाहशर्यकल्पनयोग्याभवतिस्पर्शयोग्यातुत्रिरात्रव्यपगमेचतुर्थेह्निकृतस्नानेनै
वशुद्धाभवति ६६ नृणामिति अकृतचूडानांबालानांमरणेसपिंडानामहोरात्रेणशुद्धिर्भवतिकृतचूडानांतुमरणेप्रागुपनयनकालात्त्रि
रात्रेणशुद्धिः ६७ ऊनद्विवार्षिकमिति असंपूर्णद्विवर्षबालंमृतमकृतचूडंमालादिभिरलंकृत्यग्रामाद्बहिः कृत्वाविशुद्धायांभूमौकाष्ठां
तरेशीर्णदेहतयायथायमस्थिसंचयनकर्मवांधवाःप्रक्षिपेयुः विश्वरूपस्तुयस्यांभूमौअन्यस्यास्थिसंचयनन्नकृतंतस्यान्निदध्युरिति

नृणामकृतचूडानांविशुद्धिर्नैशिकीस्मृता निर्वृत्तचूडकानांतुत्रिरात्राच्छुद्धिरिष्यते ६७ ऊनद्विवार्षिकंप्रेतन्निदध्युर्बांधवावहिः अलंकृत्यशुचौभूमावस्थिसंचयनादृते ६८ नास्यकार्योग्निसंस्कारोनचकार्योदकक्रिया अरण्येकाष्ठवत्त्यक्त्वाक्षपेयुस्त्र्यहमेवच ६९ नात्रिवर्षस्यकर्त्तव्याबांधवैरुदकक्रिया जातदंतस्यवाकुर्युर्नाम्निवापिकृतेसति ७०

थांचक्षते ६८ नास्येति अस्योनद्विवार्षिकस्याग्निसंस्कारोनकर्त्तव्यः नाप्युदकक्रियाकर्त्तव्या
उदकदाननिषेधोयंश्राद्धादिसकलप्रेतकृत्यनिवृत्त्यर्थः किंत्वरण्येकाष्ठवत्परित्यज्यकाष्ठवदितिशोकाभावोऽभिहितः यथाअरण्येकाष्ठं
परित्यज्यशोकोनभवतिएवंत्यक्त्वात्र्यहंक्षपेत्त्र्यहाशौचंकुर्यात् अयंचाकृतचूडस्यत्र्यहाशौचविधिः पूर्वोक्तैकाहाशौचविकल्पपरःसच
व्यवस्थितोरत्नसाध्यायादियुक्तस्यैकाहः तद्रहितस्यत्र्यहः यद्यपिमनुनापरित्यागमात्रंविहितंतथाप्यूनद्विवार्षिकन्निखनेदितियाज्ञव
ल्क्यवचनादिदमत्रभूमौनिखायैवत्यक्तव्यः ६९ नात्रिवर्षस्येति अप्राप्ततृतीयवर्षस्यपित्रादिसपिंडैरुदकक्रियानकर्त्तव्येतिपूर्वत्राभि
हिताप्युत्तरार्थमनूद्यतेजातदंतस्यवाउदकदानंकर्त्तव्यम् नामकरणेवाकृतेउदकक्रियासाहचर्यादग्निसंस्कारोप्यनुज्ञामात्रंप्रेतपिंड
श्राद्धादिकंत्वयथाप्यकरणसंभवेकरणंक्लेशावहंतथापिकरणाकरणयोराम्नानाज्जातदंतकृतनाम्नोः करणेप्रेतोपकारोभवत्यकरणे

मत्यत्रायामावदृत्यवगम्यते ७० सब्रह्मचारिणीति सहाध्यायिनिमृतेएकरात्रमशौचंकर्त्तव्यंसमानोदकानांपुनःपुत्रजननेसतित्रि
रात्रेणशुद्धिर्भवति म्यहानुदकदायिनइतिमरणविषयमुक्तम् ७१ स्त्रीणामिति स्त्रीणामकृतविवाहानांवाग्दत्तानांमरणेबांधवा
भर्त्रादयस्त्र्यहेनशुध्यंतिवाग्दानंविनाभर्तृसंबंधाभावात् अश्रुतमपिवाग्दानांतपर्यंतंबोद्धव्यम् सनाभयःपितृपक्षाः वाग्दत्तानां
विवाहादूर्ध्वंमरणेयथोक्तेनैवकल्पेनेत्येतच्छ्लोकपूर्वार्द्धोक्तेनत्रिरात्रेणैवशुध्यंतीत्यर्थः तदुक्तमादिपुराणे आजन्मनस्तुचूडांतं-
यत्रकन्याविपद्यते सद्यःशौचंभवेत्तत्रसर्ववर्णेषुनित्यशः ततोवाग्दानपर्यंतंयावदेकाहमेवहि अतःपरंप्रवृद्धानांत्रिरात्रमितिनि
श्चयः वाग्दानेतुकृतेतत्रज्ञेयंचोभयतस्त्र्यहम् पितुर्वरस्यचततोदत्तानांभर्तुरेवहि स्वजात्युक्तमशौचंस्यान्मृतकेसूतकेपिच मेधा
तिथिगोविंदराजौतुयथोक्तेनैवकल्पेनेतिनृणामकृतचूडानामित्येतदुक्तेनविधिनाशुध्यंतीतिव्याचक्षतुः अत्रचव्याख्यानेपुत्रवक्

सब्रह्मचारिण्येकाहमतीतेक्षपणंस्मृतम् जन्मन्येकोदकानांतुत्रिरात्राच्छुद्धिरिष्यते ७१ स्त्रीणाम
संस्कृतानांतुत्र्यहाच्छुध्यंतिबांधवाः यथोक्तेनैवकल्पेन शुध्यंतितुसनाभयः ७२ अक्षारलवणा-
न्नाःस्युर्निमज्जेयुश्चतेत्र्यहम् मांसाशनंचनाश्नीयुःशयीरंश्चपृथक्क्षितौ ७३ सन्निधावेषवैक
ल्पःशावाशौचस्यकीर्त्तितः असन्निधावयंज्ञेयोविधिःसंबंधिबांधवैः ७४ विगतंतुविदेशस्थंशृ
णुयाद्योह्यनिर्दशम् यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवेत् ७५

न्यायामपिचूडाकरणादूर्ध्वंमरणेत्र्यहाशौ
चंस्यात् तच्चादिपुराणाद्यनेकवचनविरुद्धम् ७२ अक्षारेति क्षारलवणंकृत्रिमलवणंतद्रहितमन्नमश्नीयुःत्रिरात्रंनद्यादौस्नानमा
चरेयुः मांसंचनभक्षयेयुः भूमौचैकाकिनःशयनंकुर्युः ७३ सन्निधाविति मृतस्यसन्निधावेकस्थानावस्थानादहःपरिज्ञानेशावाशौ
चस्यविधिरयमुक्तःस्वदेशांतरावस्थानादज्ञानेसत्ययंवक्ष्यमाणोविधिःसंबंधिबांधवैर्ज्ञातव्यः संबंधिनःसपिंडाःसमानोदकाबांधवाः
७४ विगतन्त्विति विगतंमृतंविदेशस्थंविप्रकृष्टदेशस्थंअनिर्दशमनिर्गतदशाहाद्यशौचकालंयःशृणोतिसयदवशिष्टंदशरा
त्राद्यशौचस्यतावत्कालमविशुद्धोभवतिविगतमित्युपलक्षणंजननेप्येतदवगंतव्यम् तथाचबृहस्पतिः अन्यदेशमृतंज्ञातिंश्रुत्वा

वापुत्रजन्मन अनिर्गतेदशाहेतुशेषाहोभिर्विशुध्यति ७५ अतिक्रांतइति नाशौचंप्रसवस्यास्तिव्यतीतेषुदिनेष्वपि इतिदे
वलवचनान्मरणविषयंवचनमिदम् सपिंडमरणेदशाहाशौचेऽतिक्रांतेत्रिरात्रमशुद्धोभवतिसंवत्सरेपुनरतीतेस्नात्वैवविशुध्य
ति एतच्चाविशेषेणाभिधानाच्चातुर्वर्ण्यविषयम् ७६ निर्दशमिति दशाहाशौचव्यपगमेकर्मानर्हत्वलक्षणस्यत्र्यहाशौचस्योक्त-
त्वात् तदंगास्पर्शविषयम् निर्गतदशाहंसपिंडमरणंश्रुत्वापुत्रस्यजन्मच सचेलंस्नात्वास्पृश्योभवति ७७ बालइति बालेअजात
दंतेमृतेजातदंतेनृणामकृतचूडानामितिएकाहोरात्राभिधानाद्देशांतरस्थेचसपिंडेमृतइत्येकाहाशौचविषयम् पूर्वश्लोकेदशा
हाशौचिनस्त्र्यहविधानात्पृथक्पिंडेसमानोदकेत्रिरात्रमुक्तम् तत्रत्रिरात्रव्यपगमेसर्वेषुसचेलंस्नात्वासद्योविशुद्धोभवति ७८

अतिक्रांतेदशाहेचत्रिरात्रमशुचिर्भवेत् संवत्सरेव्यतीतेतुस्पृष्ट्वैवापोविशुध्यति ७६ निर्दशं
ज्ञातिमरणंश्रुत्वापुत्रस्यजन्मच सवासाजलमाप्लुत्यशुद्धोभवतिमानवः ७७ बालेदेशांतरस्थेचपृथ
क्पिंडेचसंस्थिते सवासाजलमाप्लुत्यसद्यएवविशुध्यति ७८ अंतर्दशाहेस्यातांचेत्पुनर्मरणज
न्मनी तावत्स्यादशुचिर्विप्रोयावत्तत्स्यादनिर्दशम् ७९ त्रिरात्रमाहुराशौचमाचार्येसंस्थितेसति
तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिः ८० श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेत् मातुलेपक्षि
णींरात्रिंशिष्यर्त्विग्बांधवेषुच ८१ प्रेतेराजनिसज्योतिर्यस्यस्याद्विषयेस्थितः अश्रोत्रियेत्वहःकृत्स्नम
नूचानेतथागुरौ ८२

अंतर्दशाहइति दशाहादिमध्येयदिपुनर्मरणेमरणंजननेजननंस्यात्पुनःशब्दात्सजातीयावगमा
त्तदातावत्कालमेवविप्रादिरशुद्धःस्यात् यावत्पूर्वजातदशाहाद्यशौचंनापगतंस्यात्तात्पूर्वाशौचव्यपगमेनैवद्वितीयेपिमृतकेसूत
केत्वशुद्धिरित्यर्थः ७९ त्रिरात्रमिति आचार्येमृतेसतिशिष्यस्यत्रिरात्रमाशौचंवदंतितत्पुत्रपत्न्योश्चमृतयोरहोरात्रमित्येषाशास्त्रमर्यादा
८० श्रोत्रियइति वेदशास्त्राध्यायिनिउपसंपन्नेमैत्र्यादिनातत्समीपवर्तिनितद्गृहवासिनीत्यर्थः तस्मिन्मृतेत्रिरात्रेणशुद्धोभवति मातुलऋत्वि
क्शिष्यादिषुपक्षिणींरात्रिंव्याप्याशौचं द्वेअहनीपूर्वोत्तरेपक्षाविवयस्याःसापक्षिणी ८१ प्रेतेराजनीति यस्यदेशेब्राह्मणादिस्थितःत

स्मिन्राजनि कृताभिषेके क्षत्रिये मृते सज्योतिराशौचं स्यात् सह ज्योतिषा वर्त्तत इति सज्योतिः यदि दिवा तदा यावत्सूर्यज्योतिस्तावदाशौचं यदि रात्रौ मृतस्तदा यावत्तारकाज्योतिस्तावदाशौचम् श्रोत्रिये त्रिरात्रमुक्तम् अश्रोत्रिये पुनस्तद्गृहे मृते कृत्स्नं दिनमात्रमाशौचम् न तु रात्राव पि रात्रौ मृते रात्रावेवेत्यवगंतव्यं सांगवेदाध्यापिनि स्वल्पं वा बहु वा यस्य येन निर्दिष्टे गुरावप्यहमात्रमेव ८२ शुद्ध्येदिति उपनीतसपिंडमरणे संपूर्णकालीनजनने च वृत्तस्वाध्यायादिरहितब्राह्मणो दशाहेन शुद्धो भवति क्षत्रियो द्वादशाहेन वैश्यः पंचदशाहेन शूद्रो मासेन तस्य चोपनयनस्थाने विवाहः ८३ न वर्द्धयेदिति यस्य तु वृत्तस्वाध्यायाद्यपेक्षया पूर्वमर्वाक् संचयनादस्थ्नामित्याद्याशौचसंकोचउक्तः स निष्कर्मा सन्नवमासिष्य इति बुद्ध्या नाशौचदिनानि दशाहादिरूपतया वर्द्धयेत् संकुचिताशौचदिनेष्वपि अग्निष्विति बहुवचनात् श्रौताग्निषु ह्यग्निहोत्रहोमान्न विघातयेत् स्वयं कुर्यादशक्तौ वा पुत्रादीन् कारयेत् अत्रैव हेतुमाह यस्मात्तत्कर्माग्निहोत्ररूपं कुर्वाणः पुत्रादिः सपिंडो नाशुचिर्भवति तदाह पारस्करः नित्यानि विनिवर्त्तंते वैतानवर्जं वैतानं श्रौतो होमः गार्हपत्यकुंडस्थानग्नीनाहवनीया

शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति ८३ न वर्द्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेत् ८४

दिकुंडेषु वितत्य क्षिपत इति तथा च शंखलिखितौ अग्निहोत्रार्थं स्नानोपस्पर्शनाच्छुचिः जाबालोप्याह जन्महानौ वितानस्य कर्मलोपो न विद्यते शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः छंदोगपरिशिष्टमपि सूतके कर्मणां त्यागः संध्यादीनां विधीयते होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनापि वा फलैः तस्मादेकाहत्र्यहाद्याशौचसंकोचे संध्यादीनामेव परित्यागो न तु श्रौतहोमस्य एकाहत्र्यहाद्यपगमे तु संध्यापंचमहायज्ञादि सर्वमेवानुष्ठेयम् अतो यन्मेधातिथिगोविंदराजाभ्यामन्यथाप्यभिधायि एकाहत्र्यहाद्याशौचसंकोचोऽयं स्वाध्यायमात्रविषयः संध्योपासनादिकं तु तेनापि दशाहमेव न कर्त्तव्यमिति तन्निष्प्रमाणकम् यत्तु गौतमेन राज्ञां च कर्मविरोधात् ब्राह्मणस्य स्वाध्यायानिवृत्त्यर्थं याज्ञवल्क्येन च ऋत्विजां दीक्षितानां चेत्यादिना सद्यःशौचमुक्तं तत्सर्वेषामेव दशाहाद्याशौचिनाम् पितृत्तत्कर्मविषयम् यानि तु अयत्र दशाहानि कुलस्यान्नं न भुंजीत इत्यादीनि दशाहं तत्तत्कर्मनिषेधकानि वचनानि तानि दशाहाशौ

न्विपयाणांतिनकश्चिद्विरोधः तस्माद्धोमस्वाध्यायमात्रार्थंसगुणेअशौचलाघवन्नसंध्योपासनार्थमितीदन्निष्प्रमाणम् ८४ दिवेति
चांडालंरजस्वलांब्रह्महादिकंप्रसूतान्दशाहाभ्यंतरेशवंशवस्पृष्टिनंचस्पृष्ट्वास्नानेनशुद्धोभवति केचित्तुतत्स्पृष्टिनमितिचांडालोद
क्यादिभिःसर्वैःसंबंधयंति गोविंदराजस्तुयाज्ञवल्क्यवचनात्शवस्पृष्टिनमेवतत्स्पृष्टिनमाह नोदक्यादिस्पृष्टिनंतत्राचमनविधा
नात् तदाहयाज्ञवल्क्यः उदक्याशुचिभिःस्नायात्संस्पृष्टस्तैरुपस्पृशेत् उदक्याशुचिभिःस्पृष्टःस्नानंकुर्यात्उदक्याशौचिभिःस्पृष्टैः
स्पृष्टस्तूपस्पृशेदाचमेत् ८५ आचम्येति श्राद्धदेवपूजादिसंचिकीर्षुःस्नानाचमनादिनाप्रयतःसम्यक्कृतचांडालाद्यशुचिदर्शनेस
ति ओंउदुत्यंजातवेदसमित्यादिसूर्यदैवतमंत्रान्यथासामर्थ्यंपावमानीश्चशक्त्याजपेत् ८६ नारमिति मानुषास्थिस्नेहसंयुक्तं
स्पृष्ट्वाब्राह्मणादिःस्नानेनविशुध्यति स्नेहशून्यंपुनःस्पृष्ट्वाआचम्यगोस्पर्शार्कवीक्षणयोरन्यतरत्कृत्वाविशुद्धोभवति ८७आ

दिवाकीर्तिमुदक्यांचपतितंसूतिकांतथा शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यति ८५ आच
म्यप्रयतोनित्यंजपेदशुचिदर्शने सौरान्मंत्रान्यथोत्साहंपावमानीश्चशक्तितः ८६ नारंस्पृष्ट्वास्थि
सस्नेहंस्नात्वाविप्रोविशुध्यति आचम्यैवतुनिःस्नेहंगामालभ्यार्कमीक्ष्यवा ८७ आदिष्टीनोदकं
कुर्यादाव्रतस्यसमापनात् समाप्तेतूदकंकृत्वात्रिरात्रेणैवशुध्यति ८८ वृथासंकरजातानांप्र
व्रज्यासुचतिष्ठताम् आत्मनस्त्यागिनांचैवनिवर्त्ततोदकक्रिया ८९

दिष्टीति व्रतादेशनमादिष्टंतदस्यास्तीति
ब्रह्मचारीसमेतोदकमाव्रतसमापनान्नकुर्यात् उदकमितिपूरकपिंडषोडशश्राद्धादिसकलप्रेतकृत्योपलक्षणंसमाप्तेपुनर्ब्रह्मच
र्यमेतोदकंकृत्वात्रिरात्रमशौचंकृत्वाविशुद्धोभवति एतच्चमातापित्राचार्यव्यतिरिक्तविषयम् तदाहवसिष्ठः ब्रह्मचारिणःशवकर्म
णाव्रतान्निवृत्तिरन्यत्रमातापित्रोर्गुरोर्वाशवकर्मणेतिशवनिमित्तकेननिर्हरणदहनोदकदानपूर्वकपिंडषोडशश्राद्धादिकर्मणा
व्रतस्यनिवृत्तिर्न आचार्यस्तुउपाध्यायमिति ८८ वृथेति जातशब्दःप्रत्येकमभिसंबध्यते वृथाजातानांबाहुल्येनत्यक्तस्वधर्माणांसंक
रजातानांहीनवर्णेनोत्कृष्टस्त्रीषूत्पन्नानांवेदबाह्यरक्तपटादिप्रव्रज्यासुवर्त्तमानानांअशास्त्रीयविषोद्बंधनादिनाकामतश्चकृत

जीवितत्यागिनामुदकादिक्रियानकर्त्तव्या ८९ पाषंडमिति वेदबाह्यरक्तपटमौंजादिव्रतचर्यापाषंडंतदनुतिष्ठंतीनांस्वछंदमेका ऽनेकपुरुषगामिनीनांगर्भपातनभर्तृवधकारिणीनांद्विजातिस्त्रीणांसुरापीनांउदकक्रियाऔर्ध्वदैहिकन्निवर्त्ततइतिपूर्वेणसंबंधः ९० आचार्यमिति आचार्यउपनयनपूर्वकंसंपूर्णशाखाध्यापयिताउपाध्यायोवेदैकदेशस्यांगस्यवाअध्यापकः वेदस्यवेदानांचएकदेशस्यापिव्याख्यातागुरुः निर्हरणकत्वात्प्रेतकृत्यस्यनिर्हृत्यइतिदाहदशाहपिंडषोडशश्राद्धादिसकलप्रेतकृत्यस्यप्रदर्शनार्थमाचार्यादीन्स्वंचमृतान्निर्हृत्यब्रह्मचारीनलुप्तव्रतोभवति एवंचान्यान्निर्हृत्यव्रतलोपोभवतीतिगम्यतेआचार्यस्त्वमिसभिधानाद्गुरोर्गुरौसान्निहितेगुरुवद्वृत्तिमाचरेत्इतिन्यायान्नाचार्याचार्यमपिस्वामितिसर्वत्रसंबध्यतेतेनोपाध्यायोपाध्यायमपिनिर्हृत्यव्रतलोपएव ९१ दक्षिणेनेति अमांगलिकत्वादत्यंतापकृष्टशूद्रक्रमेणाभिधानंशूद्रंमृतंदक्षिणपुरद्वारेणनिर्हरेत् द्विजातीन्

पाषंडमाश्रितानांचचरंतीनांचकामतः गर्भभर्तृद्रुहांचैवसुरापीनांचयोषिताम् ९० आचार्यंस्वमुपाध्यायंपितरंमातरंगुरुम् निर्हृत्यतुव्रतीप्रेतान्नव्रतेनवियुज्यते ९१ दक्षिणेनमृतंशूद्रंपुरद्वारेणनिर्हरेत् पश्चिमोत्तरपूर्वैस्तुयथायोगंद्विजन्मनः ९२ नराज्ञामघदोषोस्तिव्रतिनांनचसत्रिणाम् ऐंद्रंस्थानमुपासीनाब्रह्मभूताहितेसदा ९३ राज्ञोमाहात्मिकेस्थानेसद्यःशौचंविधीयते प्रजानांपरिरक्षार्थमासनंचात्रकारणम् ९४

पुनर्यथायोगंयथायुक्त्याअपकृष्टवैश्यक्षत्रियक्रमेणैवपश्चिमोत्तरपूर्वद्वारेणनिर्हरेत् ९२ नराज्ञामिति राज्ञामभिषिक्तक्षत्रियाणांसपिंडमरणादौ अशौचदोषोनास्तियतोराजानऐंद्रंस्थानंराज्याभिषेकाख्यंआधिपत्यकारणंप्राप्ताः व्रतिनोब्रह्मचारिणश्चांद्रायणादिव्रतकारिणश्च सत्रिणोयागप्रवृत्ताः यतोब्रह्मभूतास्तेब्रह्मैवनिष्पापाः अशौचाभावश्चायंकर्मविशेषे तदाहविष्णुः अशौचंनराज्ञांराजकर्मणिनव्रतिनांव्रतेनसत्रिणांसत्रे राजकर्मचव्यवहारदर्शनशांतिहोमादिकर्मणि ९३ राज्ञइति महात्मनइदंस्थानंमाहात्मिकंराज्यपदाख्यंसर्वाधिपत्यलक्षणंमहात्मैवप्रवीणपुण्यराज्यमासादयतितस्मिन्वर्त्तमानस्यसद्यःशौचमुपदिश्यतेनतुराज्यमच्युतस्यक्षत्रियजातेरप्यत्रजातिरविवक्षिताइत्यनेनश्लोकेन

दर्शितंयतोन्यायनिरूपणेनदुर्भिक्षेऽन्नदानेनोपसर्गेषुशांतिहोमादिनाप्रजारक्षार्थंराज्यासनेऽवस्थानमशौचाभावेनकारणंतच्चा
क्षत्रियाणामपितत्कार्यकारिणांविप्रवैश्यशूद्राणामविशिष्टंअतएवसोमकार्यकारिणिचमसेसोमधर्माअतएवव्रीहिधर्मान्विततयाश्रुतम
प्यवघातादितत्कार्यकारित्वस्यविवक्षितत्वात्प्रकृतौयवेविकृतौचनीवारादिषुसंबध्यतइतिकर्ममीमांसायांतत्तदधिकरणेषुनिरणायि
९४ डिंबाहवइति डिंबाहवोनृपरहितयुद्धंतत्रहतानांविद्युतावज्रेणपार्थिवेनवधार्हेपराधेहतेगोब्राह्मणरक्षणार्थेविनापियुद्धंजला
ग्निव्याघ्रादिभिर्हतानांयस्यपुरोहितादेःस्वकार्याविघातार्थंनृपतिरशौचाभावमिच्छतितस्यापिसद्यःशौचम् ९५ सोमेति चंद्राग्निसूर्य
वायुशक्रयमानांवित्तस्याप्पांचपत्योःकुबेरवरुणयोरेवंअष्टानांलोकपालानांसंबंधिदेहंराजाधारयतिततःकिमतआह ९६ लोकेशेति यतो
लोकेशांशाक्रांतोनृपतिरतोनास्याशौचमुपदिश्यते यस्मान्मनुष्याणांयच्छौचमशौचंचातल्लोकेशेभ्यःप्रभवतिविनश्यतिच अप्ययो-

डिंबाहवहतानांचविद्युतापार्थिवेनच गोब्राह्मणस्यचैवार्थेयस्यचेच्छतिपार्थिवः ९५ सोमाग्न्यर्का
निलेंद्राणांवित्तापत्योर्यमस्यच अष्टानांलोकपालानांवपुर्धारयतेनृपः ९६ लोकेशाधिष्ठितोराजाना-
स्याशौचंविधीयते शौचाशौचंहिमर्त्यानांलोकेशप्रभवाप्ययम् ९७ उद्यतैराहवेशस्त्रैःक्षत्रधर्महतस्य
च सद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्थितिः ९८ विप्रःशुध्यत्यपःस्पृष्ट्वाक्षत्रियोवाहनायुधम् वै
श्यःप्रतोदंरश्मीन्वायष्टिंशूद्रःकृतक्रियः ९९

विनाशः एतेनान्यदीयशौचाशौचोत्पादनविनाशशक्तस्यलोकेश्वररू
पस्यनृपतेःकुतःस्वकीयाशौचमितिपूर्वोक्ताशौचाभावस्तुतिः ९७ उद्यतैरिति उद्यतैःशस्त्रैःखड्गादिभिर्नतुलगुडपाषाणादिभिरपराङ्मु
खत्वादिक्षत्रियधर्मयुक्तसंग्रामेहतस्यतत्क्षणादेवज्योतिष्टोमादियज्ञःसंतिष्ठतेसमाप्तिमेवेतितत्पुण्येनयुज्यतेइत्यर्थः तथाशौचम
पितत्क्षणादेवसमाप्तिमेतिइयंशास्त्रेमर्यादा ९८ विप्रइति अशौचांतेकृतश्राद्धादिकृत्योब्राह्मणःअपःस्पृष्ट्वेतिजलस्पर्शमात्रंद
क्षिणहस्तेनकृत्वाशुद्धोभवतिनतुसंवत्सरेव्यतीतेतुस्पृष्टैरद्भिर्विशुध्यतीतिवत्स्नात्वावाहनादिस्पर्शसाहचर्यात्स्पृष्ट्वेत्यस्यचसकृदु
च्चरितस्यार्थभेदस्यान्याय्यत्वात्क्षत्रियोहस्त्यादिवाहनंखड्गाद्यस्त्रंचवैश्योबलीवर्दादितोदंलोहमोताग्रंयोक्त्रंवाशूद्रोयष्टिंवंशदंडकाम्

एतदिति भोद्विजश्रेष्ठाएतच्छौचंसपिंडेषुप्रेतेषुयुष्माकमुक्तम् इदानीमसपिंडेषुप्रेतशुद्धिंशृणुत १०० असपिंडमिति असपिंडंब्राह्मणंमृतंब्राह्मणोबंधुवत्स्नेहानुबंधेननिर्हृत्यशुद्ध्यतीत्यर्थादुक्तंमातुश्चाप्तान्सन्निकृष्टान्सहोदरभ्रातृभगिन्यादीन्बांधवान्निर्हृत्यत्रिरात्रेणशुद्धोभवति १०१ यद्यन्नमिति निर्हारकोपदितेषांमृतस्यसपिंडानांआशौचिनामन्नमश्नातितदातद्दशाहेनैवशुध्यतिनत्रिरात्रेणअथतेषामन्नंनाश्नातिगृहेचतेषांनवसतिनिर्हरतिचतदाहोरात्रेणैवशुध्यतिएवंचतद्गृहवासेसतितदन्नाभोजिनोनिर्हारकस्यपूर्वोक्तंत्रिरात्रम् १०२ अनुगम्येति ज्ञातिमज्ञातिंवामृतमिच्छातोऽनुगम्यसचेलस्नानंचकृत्वाततोऽग्निंस्पृष्ट्वाघृतप्राशनंकृत्वाअनुगमननिमित्ताशौचाद्विशुध्यति १०३ नविप्रमिति ब्राह्मणादिमृतंसमानजातीयेषुस्थितेषुनशूद्रेणपुत्रादि

एतद्वोभिहितंशौचंसपिंडेषुद्विजोत्तमाः असपिंडेषुसर्वेषुप्रेतशुद्धिंनिबोधत १०० असपिंडंद्विजंप्रेतंविप्रोनिर्हृत्यबंधुवत् विशुध्यतित्रिरात्रेणमातुराप्तांश्चबांधवान् १०१ यद्यन्नमत्तितेषांतुदशाहेनैवशुध्यति अनदन्नन्नमन्हैवनचेत्तस्मिन्गृहेवसेत् १०२ अनुगम्येच्छयाप्रेतंज्ञातिमज्ञातिमेवच स्नात्वासचेलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यति १०३ नविप्रंस्वेषुतिष्ठत्सुमृतंशूद्रेणनाययेत् अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूषिता १०४ ज्ञानंतपोग्निराहारोमृन्मनोवार्युपांजनम् वायुःकर्मार्ककालौचशुद्धेःकर्तॄणिदेहिनाम् १०५

यस्मात्साशरीराहुतिःशूद्रस्पर्शदुष्टासतीमृतस्यस्वर्गायहितानभवतिमृतंस्वर्गंनप्रापयतीत्यर्थः स्वेषुतिष्ठत्स्वित्यभिधानात्ब्राह्मणाभावेक्षत्रियेणतदभावेवैश्येनतदभावेशूद्रेणापिनिर्हारयेदित्युक्तंयथापूर्वंश्रेष्ठत्वादस्वर्ग्यदोषश्चब्राह्मणादिसद्भावेशूद्रेणनिर्हरणेसतिबोद्धव्यः गोविंदराजस्तूक्तदोषनिर्देशात्स्वेषुतिष्ठत्स्वित्यविवक्षितमित्याह तदयुक्तम् संभवत्युपदद्वयोच्चारणवैयर्थ्यप्रसंगात्उपक्रमावगतेश्चवेदोदितन्यायेनानुबोध्यत्वाद्गुणभूतसुख्यर्थबाधेनप्रधानभूतायाजातेरुपेक्षायांगुणलोपेतुमुख्यस्येत्यपिन्यायेनबाध्येत तस्मात् स्वेषुतिष्ठत्स्वितिपदद्वितयंनविवक्षितम् इमांगोविंदराजस्यराजाज्ञांनाद्रियामहे १०४ ज्ञानमिति ज्ञानादीनिशुद्धेःसाधनानिभवंति तत्रब्रह्मज्ञानंबुद्धिरूपांतः

करणशब्दैः साधनंयथावक्ष्यतिबुद्धिर्ज्ञानेनशुध्यति तपोयथातपसावेदवित्तमाः अग्निर्यथापुनःपाकेनमृण्मयम् आहारोयथाह
विष्येणयवागवाइति मृद्वारिणीयथामृद्वार्यादेयमर्थवदिति मनोयथामनःपूतंसमाचरेदितिसंकल्पविकल्पात्मकंमनोनिश्चयात्मिका
बुद्धिरितिमनोबुद्ध्योर्भेदः उपांजनमुपलेपनंयथामार्जनोपांजनैर्वेश्म कर्मयथायजेताऽश्वमेधेनइत्यादि अर्कोयथागासालभ्यार्क
मीदृयवा कालोयथाशुध्येद्विप्रोदशाहेन ज्ञायोस्तुशुद्धिहेतुत्वंमनुनानुक्तमपि पंथानश्चविशुध्यंतिसोमसूर्यांशुमारुतैरितिवि-
षयादावुक्तंग्राह्यम् १०५ सर्वेषामेवेति सर्वेषांमृद्वारिनिमित्तदेहशौचमनःशौचादीनांमध्यादर्थशौचं अन्यायेनपरधनहरणपरी
हारेणयद्वेच्छपातस्तंअर्थशौचंमन्वादिभिःस्मृतंयस्माद्योऽर्थेशुद्धःसशुद्धोभवति यःपुनर्मृद्वारिशुचिरर्थेनाशुद्धःसोऽशुद्धएव १०६
क्षांत्येति परेणापकारेकृतेतस्मिन्प्रत्यपकारबुद्ध्यनुत्पत्तिरूपयापंडिताःशुध्यंतियथावक्ष्यति महायज्ञक्रियाःक्षमानाशयंत्या-

सर्वेषामेवशौचानामर्थशौचंपरंस्मृतम् योऽर्थेशुचिर्हिसशुचिर्नमृद्वारिशुचिःशुचिः १०६ क्षांत्याशु-
ध्यंतिविद्वांसोदानेनाकार्यकारिणः प्रच्छन्नपापाजप्येनतपसावेदवित्तमाः १०७ मृत्तोयैःशुध्यतेशो-
ध्यंनदीवेगेनशुध्यति रजसास्त्रीमनोदुष्टासंन्यासेनद्विजोत्तमः १०८ अद्भिर्गात्राणिशुध्यंतिमनःस-
त्येनशुध्यति विद्यातपोभ्यांभूतात्माबुद्धिर्ज्ञानेनशुध्यति १०९

शुपापानीति अकार्यकारिणोदानेन यथावक्ष्य
ति सर्वस्वंवावेदविदेब्राह्मणायेति अप्रख्यातपापाजप्येनयथावक्ष्यति जपंस्तूपवसेद्दिनमिति वेदवित्तमाः वेदार्थचांद्रायणादितपो
विदः तपसेत्येकादशाध्यायेवक्ष्यमाणेन १०७ मृत्तोयैरिति मलाद्युपहतंशोधनीयंमृज्जलैःशोध्यतेनदीप्रवाहश्चश्लेष्माद्यशुचि
दूषितोवेगेनशुध्यति स्त्रीचपरपुरुषमैथुनसंकल्पादिदूषितमानसाप्रतिमासार्त्तवेनतस्मात्पापाच्छुद्धाभवतिब्राह्मणश्चसंन्यासेनष
ष्ठाध्यायाभिधेयेनपापाच्छुध्यति १०८ अद्भिरिति स्वेदाद्युपहतान्यंगानिजलेनक्षालितानिशुध्यंतिमनश्चनिषिद्धचिंतनादिनादूषि
तंसत्याभिधानेनशुध्यतिभूतात्मासूक्ष्मादिलिंगशरीरावच्छिन्नोजीवात्माब्रह्मविद्ययापापक्षयहेतुतयातपसाचशुद्धोभवतिबुद्धिः
परमात्मरूपेणावतिष्ठतेबुद्धिश्चविपर्ययज्ञानोपहतायथार्थविषयज्ञानेनशुध्यति १०९

एषइति अयंशरीरसंबंधिनःशौचस्ययुष्माकंनिश्चयउक्तःइदानींनानाप्रकारद्रव्याणांयेनयच्छुध्यतितस्यनिर्णयंशृणुत ११०
तैजसेति तैजसानांसुवर्णादीनांमरकतादिमणीनांपाषाणमयस्यचसर्वस्यभस्मनाजलेनमृत्तिकयाचमन्वादिभिःशुद्धिरुक्तानि-
र्लेपस्यजलेनैवानंतरंशुद्धेर्वक्ष्यमाणत्वात् इदमुच्छिष्टघृतादिलिप्तविषयंतत्रमृद्भस्मनोर्गंधक्षयैककार्यत्वाद्विकल्पः आपस्तू-
भयत्रसमुच्चीयंते १११ निर्लेपमिति उच्छिष्टादिलेपरहितंसौवर्णभांडंजलभवंचशंखमुक्तादिपाषाणमयंचराजतमनुपस्कृतंरे-
खादिगुणांतराधानरहितंतथाविधमलासंभवाज्जलेनैवभस्मादिरहितेनशुध्यति ११२ अपामग्नेश्चेति अग्निर्वैवरुणादीन्का-
मयतइत्यादिवेदेश्रूयतेतथाग्नेःसुवर्णमिंद्रियंवरुणादीनांरजतमित्यादिश्रुतिषग्न्यापःसंयोगात्सुवर्णरजतंचोद्भूतंयस्मादतस्तयो

एषशौचस्यवःप्रोक्तःशारीरस्यविनिर्णयः नानाविधानांद्रव्याणांशुद्धेःशृणुतनिर्णयम् ११० तैजसा
नांमणीनांचसर्वस्याश्ममयस्यच भस्मनाद्भिर्मृदाचैवशुद्धिरुक्तामनीषिभिः १११ निर्लेपंकांचनं
भांडमद्भिरेवविशुध्यति अब्जमश्ममयंचैवराजतंचानुपस्कृतम् ११२ अपामग्नेश्चसंयोगाद्धैमंरौ
प्यंचनिर्बभौ तस्मात्तयोःस्वयोन्यैवनिर्णेकोगुणवत्तरः ११३ ताम्रायःकांस्यरैत्यानां त्रपुणःसीस
कस्यच शौचंयथार्हंकर्त्तव्यंक्षाराम्लोदकवारिभिः ११४ द्रवाणांचैवसर्वेषांशुद्धिराप्लवनंस्मृतम् प्रो
क्षणंसंहतानांचदारवाणांचतक्षणम् ११५

स्वेनकारणेनैवजलेनात्यंतोपघातेनाग्निनानिर्णेकःशुद्धिहेतुःगुणव
त्तरःप्रशस्ततरः ११३ ताम्रायइति अयोलोहंरैतिपित्तलंतद्द्रवंपात्रंरैत्यंत्रपुरंगंएषांभस्माम्लोदकैःशोधनंकर्त्तव्यंयथार्हंयस्यय
दर्हति अंभसाहेमरौप्यायःकांस्यंशुध्यतिभस्मना अम्लैस्ताम्रंचरैत्यंचपुनःपाकेनमृण्मयमितिवृहस्पत्यादिवचनाद्विशेषोऽव
धोद्धव्यः ११४ द्रवाणांचेति द्रवाणांघृततैलानांकाककीटाद्युपहतानांबौधायनादिवचनात्प्रस्तृतिमात्रप्रमाणानांप्रादेशप्रमा
णकुशपत्रद्वयाभ्यांउत्प्लवनेनशुद्धिः संहतानांचशय्यादीनामुच्छिष्टाद्युपघातेप्रोक्षणंदारवाणांचात्यंतोपघातेतक्षणेन ११५
मार्जनमिति चमसानांग्रहाणांचान्येषांयज्ञपात्राणांपूर्वंपाणिनामार्जनंकार्यंपश्चात्प्रक्षालनेनयज्ञेकर्त्तव्येशुद्धिर्भवति ११६

चरूणामिति स्नेहाक्तानांचरुस्रुक्स्रुवादीनांउष्णजलेनशुद्धिः स्नेहायुक्तानांतुजलमात्रणवसुधोपदर्शायम् ११७ अद्भिस्त्विति ब
हूनान्धान्यानांवस्त्राणांचचांडालाद्युपघातेजलेनप्रोक्षणाच्छुद्धिः बहुत्वंचपुरुषभारहार्याधिकत्वमितिव्याचक्ष्यते तदल्पानांतु
प्रक्षालनाच्छुद्धिर्मन्वादिभिरुपदिश्यते ११८ चेलवदिति स्पृश्यपशुचर्मणांवंशादिदलनिर्मितानांच वस्त्रवच्छुद्धिर्भवतिशाक
मूलफलानांच धान्यवच्छुद्धिः ११९ कौषेयेति कृमिकोषोद्भवस्यवस्त्रस्यमेषादिलोमप्रभवस्यकंबलादेरूषैः क्षारमृत्तिकाभिः कु
तपानांनेपालकंबलानांअरिष्टकैः अरिष्टचूर्णैः अंशुपट्टानांपट्टशाटकानांबिल्वफलैः क्षौमाणांदुकूलानांक्षुमावल्कलभवानां
वस्त्राणांतुपिष्टश्वेतसर्षपप्रक्षालनाच्छुद्धिः १२० क्षौमवदिति शंखस्यपशुश्रृंगाणांस्पृश्यपश्वस्थिभवस्यगजादिदंतस्यच क्षौ-

मार्ज्जनंयज्ञपात्राणांपाणिनायज्ञकर्मणि चमसानांग्रहाणांचशुद्धिःप्रक्षालनेनतु ११६ चरूणांस्रुक्
स्रुवाणांचशुद्धिरुष्णेनवारिणा स्फ्यशूर्पशकटानांचमुसलोलूखलस्यच ११७ अद्भिस्तुप्रोक्षण
शौचंबहूनांधान्यवाससाम् प्रक्षालनेनत्वल्पानामद्भिःशौचंविधीयते ११८ चेलवच्चर्मणांशुद्धि
र्वैदलानांतथैवच शाकमूलफलानांचधान्यवच्छुद्धिरिष्यते ११९ कौषेयाविकयोरूषैःकुतपानाम
रिष्टकैः श्रीफलैरंशुपट्टानांक्षौमाणांगौरसर्षपैः १२० क्षौमवच्छंखश्रृंगाणामस्थिदंतमयस्यच शु
द्धिर्विजानताकार्यागोमूत्रेणोदकेनवा १२१ प्रोक्षणात्तृणकाष्ठंचपलालंचैवशुध्यति मार्ज्जनोपाञ्ज
नैर्वेश्मपुनःपाकेनमृण्मयम् १२२ मद्यैर्मूत्रैःपुरीषैर्वाष्ठीवनैःपूयशोणितैः संस्पृष्टंनैवशुध्येत्पुनःपा
केनमृण्मयम् १२३

मवत्सिष्टश्वेतसर्षपकल्केनगोमूत्रजलयोरन्यतरयुक्तेनशास्त्रविदाशुद्धिःकर्त्तव्या १२१ प्रोक्षणात्तृ
णकाष्ठंचेति तृणकाष्ठपलालंचचंडालादिस्पर्शदूषितंप्रोक्षणेनशुध्यति तृणपलालसाहचर्यादिदमिंधनादिकाष्ठविषयम् दारवाणां
चतक्षणमितिनिर्मितदारुमयगृहपात्रविषयम् गृहमुदक्यानिवासादिदूषितम् मार्जनगोमयाद्युपलेपनेनमृन्मयभांडमुच्छिष्टादि
स्पर्शदूषितंपुनःपाकेनशुध्यति १२२ मद्यैरिति मद्यादिभिस्तुसंस्पृष्टंमृण्मयपात्रंपुनःपाकेनापिनशुध्यति ष्ठीवनंश्लेष्मापूयंशोणि
तविकारः १२३

संमार्जनेति अवकरशोधनेनगोमयाद्युपलेपनेनगोमूत्रोदकादिसेकेनखातकाचिन्मृदपनयेनेनगवांअहोरात्रनिवासेनपंचभिरेके कशोभूमिःशुध्यति एषांचोच्छिष्टमूत्रपुरीषचंडालनिवासाद्युपघातगौरवलाघवाभ्यांसमुच्चयविकल्पाववगंतव्यौ १२४ पक्षि जग्धंगवाघ्रातमिति भक्ष्यपक्षिणाकश्चिद्भागोपस्यभक्षितःगवायस्यघ्राणंकृतंपदाचावधूतमुपरिक्षुतक्षुतंकेशकीटदूषितंजग्ध शब्दलिंगादन्नमल्पंमृत्प्रक्षेपेणशुध्यति १२५ यावदिति विष्ठादिलिप्ताद्द्रव्याद्यावत्संबंधिनोगंधलेपौतिष्ठतःतावद्द्रव्यमुद्धृत्य मृद्वारिमक्षिप्यग्रहीतव्यम् यत्रचसामान्यादौमृदाशुद्धिस्तत्रमृत्सहितंजलग्रहणंकर्त्तव्यंयत्रकर्णमलादौजलेनैवशुद्धिस्तत्र जलमात्रमित्यवगंतव्यम् १२६ त्रीणिदेवाइति केनापिप्रकारेणादृष्टोपघातहेतुसंसर्गमदृष्टंसंजातोपघातशंकायांजलेनप्रक्षा

संमार्जनोपांजनेनसेकेनोल्लेखनेनच गवांचपरिवासेनभूमिःशुध्यतिपंचभिः १२४ पक्षिजग्धंगवाघ्रा तमवधूतमवक्षुतम् दूषितंकेशकीटैश्चमृत्प्रक्षेपेणशुध्यति १२५ यावन्नापैत्यमेध्याक्ताद्गंधोलेपश्चतत् कृतः तावन्मृद्वारिचादेयंसर्वासुद्रव्यशुद्धिषु १२६ त्रीणिदेवाःपवित्राणिब्राह्मणानामकल्पयन् अदृष्ट मद्भिर्निर्णिक्तंयच्चवाचाप्रशस्यते १२७ आपःशुद्धाभूमिगतावैतृष्ण्यंयासुगोर्भवेत् अव्याप्ताश्चेदमे ध्येनगंधवर्णरसान्विताः १२८ नित्यंशुद्धःकारुहस्तःपण्यंयच्चप्रसारितम् ब्रह्मचारिगतंभैक्ष्यंनित्यंमे ध्यमितिस्थितिः १२९

लितम् तदाह हारीतः यद्यन्मीमांसास्यात्तत्तदद्भिःस्पर्शाच्छुद्धिर्भवतिउपघातशंकायामेवपवित्रंभव लिनिब्राह्मणवाचायत्प्रशस्यतेतानित्रीणिपवित्राणिदेवाः ब्राह्मणानांकल्पितवंतः १२७ आपःशुद्धाइति यत्परिमाणास्वप्सुगोःपि पासाविच्छेदोभवतिताआपोगंधवर्णरसशालिन्यःसत्यः यद्यमेध्यलिप्तानभवंतितदाविशुद्धभूमिगताविशुद्धाःस्युःविशुद्धभूमिग ताइति भूमिसंबंधप्रदर्शनायनत्वंतरिक्षगतानांनिवृत्त्यर्थः १२८ नित्यंशुद्धइति कारोर्मालाकारादेर्देवब्राह्मणाद्यर्थेपिमाल्यादि ग्रथनेद्रव्यप्रयोजनाद्यपेक्षयाशुद्धिविशेषाकरणेपिस्वभावादेवहस्तःसर्वदाशुद्धः तथाजननमरणयोरपिस्वव्यापारेशुद्धः नखशौचं कारूणांकारुकर्मणीतिवचनात् तथायद्विक्रेतव्यंपण्यवीथिकायांप्रसारितंनापणनीयमन्नमश्नीयादितिशंखवचनात्सिद्धान्न-

व्यतिरिक्तं तदनेककर्तृकरस्पर्शेपि शुद्धमेव तथाच ब्रह्मचार्यादिगतभैक्ष्यमनाचांतस्त्रीदत्तमपि रथ्यादिक्रमणेपि सर्वदा शुद्धमिति शा
स्त्रमर्यादा १२९ नित्यमास्यमिति सर्वदा स्त्रीणां मुखं शुचि तथा काकादिपक्षिणां चंचूपघातपतितं फलं शुचि वत्सस्य मुखं च दोहसमये-
क्षीरप्रक्षरणे शुचि श्वा च यदा मृगादीन् हंतुं गृण्हाति तदा तत्र व्यापारे शुचिः तस्मात् १३० श्वभिरिति कुक्कुरैर्हतस्य मृगादेर्यन्मांसं त
न्शुचिमनुरब्रवीत् तच्छ्राद्धातिथिभोजनादावेवद्रष्टव्यम् अन्यैश्चाममांसादिभिर्व्याघ्रश्येनादिभिश्च व्याधादिभिश्च मृगवधजी
विभिर्हतस्य १३१ ऊर्द्धनाभेरिति नाभेरुपरि यानींद्रियच्छिद्राणि तानि सर्वाणि पवित्राणि भवंति अतस्तेषां स्पर्शने नाशौचं यानि नाभेर
धस्तान्यशुची नि भवंति अधश्छिद्रेषु च बहुवचनं व्यक्तिबहुलापेक्षया वक्ष्यमाणाश्च वसादयो देहमला देहान्नि:सृता अशुद्धा भवंति
१३२ मक्षिकेति मक्षिका अमेध्यस्पर्शिन्योपि विप्रुषो मुखनिःसृता अल्पा जलकणाः छायापतितादेर्हीनस्पर्शस्यापि गवादीनि चाग्निपर्यं

नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः १३० श्वभिर्हतस्य
यन्मांसं शुचि तन्मनुरब्रवीत् क्रव्याद्भिश्च हतस्यान्यैश्चंडालाद्यैश्च दस्युभिः १३१ ऊर्द्ध्वं नाभेर्यानि खानि
तानि मेध्यानि सर्वशः यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः १३२ मक्षिका विप्रुषश्छाया गौरश्वः
सूर्यरश्मयः रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् १३३ विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थ
वत् दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि १३४ वसा शुक्रमसृङ्मज्जा मूत्रविट् घ्राणकर्णविट् श्ले
ष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः १३५

तानि चंडालादिस्पृष्टानि स्पर्शे शुचीनि जानीयात् १३३ विण्मूत्रेति विण्मू
त्रमुत्सृज्यते येन स विण्मूत्रोत्सर्गः पाय्वादिस्तस्य शुध्यर्थं मृद्वारि गृहीतव्यं अर्थवत्प्रयोजनवत् यावता गंधलेपक्षयो भवति तथा शारीराणां
वसादिमलानां संबंधिषु द्वादशस्वपि गंधलेपक्षयार्थं मृद्वारि ग्राह्यं तत्र स्मृत्यंतरात्पूर्वषट्के मृज्जलग्रहणं उत्तरषट्के जलमात्रग्रहणं तदाह बौ
धायनः आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये उत्तरेषु च षट्स्वद्भिः केवलाभिर्विशुध्यति ततश्च द्वादशस्वपीति मानवं मृद्वारिग्रहणवच
नं व्यवस्थया मृद्वारिणोर्ग्रहणे सति न विरुध्यते गोविंदराजस्तु मनुबौधायनवचनसंदर्शनादुत्तरषट्केपि विकल्पमाह सच व्यवस्थितो दैव
पित्राद्यदृष्टकर्मप्रवृत्तेउत्तरेष्वपि मृदमादद्यान्नान्यदा १३४ वसेति वसा कायस्नेहः शुक्रं रेतः असृक् रक्तं मज्जा शिरोमध्ये पिंडितस्नेहः

दूषिकाअक्षिमलः स्वेदः श्रमादिनादेहनिःसृतंजलम् वसादयोद्वादशनराणांदैहिकामलाभवंति १३५ एकालिंगइति मूत्रपु-
रीषोत्सर्गेसतिशुद्धिमभीप्सतांमृद्वावार्यादेपमर्थवदित्युक्तत्वाज्जलसहितामृदेकालिंगेदातव्यागुदेतिस्रोमृदः तथैकस्मिन्करेवा
मे शौचविद्दक्षिणंहस्तंनाधःशौचेनियोजयेत् तथैववामहस्तेननाभेरूर्ध्वंनशोधयेदितिदेवलवचनात्तस्यैवाधःशौचसाधनत्वात्
तत्रैवदशमृदोदातव्यातत्उभयोः करयोःसप्तदातव्या. यदात्तूक्तशौचेनापिगंधलेपक्षयोनभवतितदायावद्पैत्यमेध्यात्क्तादितिवच
नादधिकसंख्याअपिमृद्दातव्याएतद्विषयाण्येवमुनीनामधिकमृत्संख्यावचनानि मृत्परिमाणमाहदक्षः लिंगेपिमृत्समाख्यातात्रिपू-
र्वीपूर्यतेयया द्वितीयाश्चतृतीयाचतदर्द्धार्द्धमकीर्त्तिताइति यदात्तूक्तसंख्यायाअल्पेनापिगंधलेपक्षयोभवतितदासंख्यावास्या
रंभसामर्थ्यात्संख्यापूरयितव्यैव १३६ एतच्छौचमिति एकालिंगइत्यादियच्छौचमुक्तंतद्गृहस्थानामेवब्रह्मचारिणांद्विगुणंवानप्र

एकालिंगेगुदेतिस्रस्तथैकत्रकरेदश उभयोःसप्तदातव्यामृदःशुद्धिमभीप्सता १३६ एतच्छौचंगृ
हस्थानांद्विगुणंब्रह्मचारिणाम् त्रिगुणंस्याद्वनस्थानांयतीनांतुचतुर्गुणम् १३७ कृत्वामूत्रंपुरीषं
वाखान्याचांतउपस्पृशेत् वेदमध्येष्यमाणश्चअन्नमश्नंश्चसर्वदा १३८ त्रिराचामेदपःपूर्वंद्विःप्रमृ
ज्यात्ततोमुखम् शारीरंशौचमिच्छन्हिस्त्रीशूद्रस्तुसकृत्सकृत् १३९ शूद्राणांमासिकंकार्यंवपनंन्या
यवर्त्तिनाम् वैश्यवच्छौचकल्पश्चद्विजोच्छिष्टंचभोजनम् १४०

स्थानांत्रिगुणंयतीनांपुनश्चतुर्गुणम् १३७ कृ
त्वेति मूत्रपुरीषंकृत्वाकृतयथोक्तशौचस्त्रिराचांतइंद्रियछिद्राणिशीर्षण्यन्यानिचस्पृशेत् वेदाध्ययनंचिकीर्षन्अन्नंवाअश्नन् य
त्तुद्वितीयाध्यायेअध्येष्यमाणस्त्वाचांतोनिवेद्यगुरवेऽधीयादाचम्येत्युभयमुक्तंतद्वतांगत्वार्थम् इदंतुपुरुषार्थंशौचार्थेत्यपुनरुक्तिः
आचांतइतियदुक्तंतत्रविशेषमाह १३८ त्रिराचामेदिति देहस्यशुद्धिमिच्छन्प्रथमंवारत्रयमपोभक्षयेत् ततोर्द्विर्मुखंपरिमृज्या
त् स्त्रीशूद्रश्चैकवारमाचमनार्थमुदकंभक्षयेत् १३९ शूद्राणामिति शूद्राणांकार्यमितिकृत्यानांकर्त्तरिवेतिकर्त्तरिषष्ठी यथा
शास्त्रव्यवहारिभिर्द्विजशुश्रूषकैः शूद्रैर्मासिमासिमुंडनंकार्यंवैश्यवच्चमृतसूतकादौशौचकल्पोऽनुष्ठातव्यःद्विजोच्छिष्टंचभोजनं

भ्रुज्यतइति भोजनंकार्यमिति १४० नोच्छिष्टमिति निष्ठीव्योक्त्वानृतानि पीतवतामाचमनविधानाद्विप्रुषामपिमुखान्निःसरणान्निष्ठीव
नमेवेतिप्रसक्तौशत्ध्यर्थमपवादमाह मुखभवाविप्रुषोयाअंगेनिपतंतिताउच्छिष्टंनकुर्वंतितथाश्मश्रुलोमानिमुखप्रविष्टानिनोच्छिष्टतां
जनयंतिदंतावकाशस्थितंचान्नावयवादिनोच्छिष्टंकुरुते अत्रगौतमीयेविशेषः दंताश्लिष्टेषुदंतवदन्यत्रजिह्वाभिमर्षणात्प्राक्च्युतेरि-
त्येके च्युतेष्वास्रववद्विद्यान्निगिरन्नेवतच्छुचिः १४१ स्पृशंतीति अन्येषामाचमनार्थंजलंददतांयेविंदवः पादौस्पृशंतिनजंघादि वि
शुद्धभूमिष्ठोदकैस्तुल्यास्तेननाचमनार्होभवति तदानन्यवनावस्थैरकृताचमनःशुद्ध्यतिद्रव्यंचशुद्ध्यति १४२ उच्छिष्टेनेति द्रव्य
हस्तपदेनशरीरसंबंधमात्रंद्रव्यस्यविवक्षितं आमणिबंधात्पाणिंप्रक्षाल्येतिद्रव्यहस्तस्याचमनासंभवात्स्कंधादिस्थितद्रव्योयद्युच्छि
ष्टेनसंस्पृष्टोभवतितदाद्रव्यमनवस्थाप्यैवकृताचमनःशुध्यति द्रव्यंचशुद्धंभवति १४३ वांतइति कृतवमनःसंजातविरेकःस्नात्वाघृ

नोच्छिष्टंकुर्वतेमुख्याविप्रुषोंगेपतंतियाः नश्मश्रूणिगतान्यास्यान्नदंतांतरधिष्ठितम् १४१ स्पृशंतिबिं
दवःपादौयआचामयतःपरान् भौमिकैस्तेसमाज्ञेयानतैरप्रयतोभवेत् १४२ उच्छिष्टेनतुसंस्पृष्टोद्रव्यह
स्तःकथंचन अनिधायैवतद्द्रव्यमाचांतःशुचितामियात् १४३ वांतोविरिक्तःस्नात्वातुघृतप्राशनमाच
रेत् आचामेदेवभुक्त्वान्नंस्नानंमैथुनिनःस्मृतम् १४४ सुप्त्वाक्षुत्वाचभुक्त्वाचनिष्ठीव्योक्त्वानृतानिच
पीत्वापोऽध्येष्यमाणश्चआचामेत्प्रयतोपिसन् १४५ एषशौचविधिःकृत्स्नोद्रव्यशुद्धिस्तथैवच उक्तोवःस
र्ववर्णानांस्त्रीणांधर्मान्निबोधत १४६

तप्राशनंकुर्यात् दशविरेकान्विरिक्तइतिगोविंदराजः यदिभुक्त्वाअनंतरमेववम
तितदा आचमनमेवकुर्यान्नस्नानघृतप्राशनेमैथुनंचकृत्वास्नायात् इदंतुऋतुमतीविषयम् १४४ सुप्त्वेति निद्रांकृत्वाभोजनश्लेष्म
निरसनमृषावादजलपानादिकृत्वा अध्ययनंचिकीर्षुः शुचिरप्याचामेत् यत्तुभुक्त्वाचोपस्पृशेत्सम्यगितितथा अध्येष्यमाणस्त्वाचांतइ
तिद्वितीयाध्यायोक्तंतद्भुतांगत्वेन इहतुभुक्त्वाचमनविधानंपुरुषार्थं अध्ययनांगतयाचमनविधानंगृहस्थादीनामपीति १४५ एषशौच
विधिरिति गमवर्णानांजननमरणादौदशरात्रादिरशौचविधिःसमग्रोद्रव्याणांतैजसादीनांचैलादीनांचजलादिनाशुद्धिविधिर्युष्माक

युक्तः इदानींस्त्रीणामनुष्ठेयंधर्मंशृणुत १४६ बालयावेति बाल्येयौवनेवार्द्धकेचवर्त्तमानयाकिंचित्सूक्ष्ममपिकार्यंभर्त्राद्यननुमत
मस्वातंत्र्येणकर्त्तव्यमितिकिंतु १४७ बाल्येपितुरिति बाल्येपितुर्वशेतिष्ठेत्यौवनेभर्त्तुः भर्त्तरिमृतेपुत्राणांतदभावे तत्सपिंडे
पुत्रासत्सुपितृपक्षःप्रभुः स्त्रियः पक्षद्वयावसानेतुराजाभर्त्तास्त्रियामतइतिनारदवचनात् ज्ञातिराजादीनामायत्तास्यात्कदाचिन्न
स्वतंत्राभवेत् १४८ पित्रेभर्त्रेति पित्रापत्यापुत्रैर्वानात्मनोविरहंकुर्यात् यस्मादेषांवियोगेनस्त्रीबंधकीभावंगतापिपतिपितृकुले
निंदितेकरोति १४९ सदाप्रहृष्टेति सर्वदाभर्त्तरिविरुद्धेपिप्रसन्नवदनयागृहकर्मणिचतुरयासुशोधितकुंडकटाहादिगृहभांडया-
व्ययेचानह्वप्रदयास्त्रियाभवितव्यम् १५० यस्मैदद्यादिति यस्मैपिताएनांदद्यात्पितुरनुमत्याभ्रातावातंजीवंतंपरिचरेत् मृतंच

बालयावायुवत्यावावृद्धयावापियोषिता नस्वातंत्र्येणकर्त्तव्यंकिंचित्कार्यंगृहेष्वपि १४७ बाल्येपितु
र्वशेतिष्ठेत्पाणिग्राहस्ययौवने पुत्राणांभर्त्तरिप्रेतेनभजेत्स्त्रीस्वतंत्रताम् १४८ पित्राभर्त्रासुतै-
र्वापिनेच्छेद्विरहमात्मनः एषांहिविरहेणस्त्रीगर्ह्येकुर्यादुभेकुले १४९ सदाप्रहृष्टयाभाव्यंगृहका
र्येषुदक्षया सुसंस्कृतोपस्करयाव्ययेचामुक्तहस्तया १५० यस्मैदद्यात्पितात्वेनांभ्रातावानुमते
पितुः तंशुश्रूषेतजीवंतंसंस्थितंचनलंघयेत् १५१ मंगलार्थंस्वस्त्ययनंयज्ञश्चासांप्रजापतेः प्रयु
ज्यतेविवाहेषुप्रदानंस्वाम्यकारणम् १५२ अनृतावृतुकालेचमंत्रसंस्कारकृत्पतिः सुखस्यनित्यं
दातेहपरलोकेचयोषितः १५३

नातिक्रामेत् व्यभिचारेणतदीयश्राद्धतर्पणादिविरहितयापारलौकिककृत्यखंड
नेनच १५१ मंगलार्थमिति यदासांस्वस्त्ययनंशांत्यनुमंत्रवचनादिरूपंयश्चासांप्रजापतियागःप्रजापतयइदंशोनाज्यहोमात्मको
विवाहेषुक्रियतेतन्मंगलार्थमभीष्टसंपत्त्यर्थंकर्म यत्पुनःप्रथमंप्रदानंवाग्दानात्मकंतदेवभर्त्तुःस्वाम्यजनकंततश्चवाग्दानादार
भ्यस्त्रीभर्तृपरतंत्रातस्मात्तंश्रयेतेतिपूर्वोक्तशेषः यत्तुनवमेवक्ष्यतेतेषांनिष्ठातुविज्ञेयाविद्वद्भिःसप्तमेपदेइतितद्भार्यात्वसंस्का
रार्थमित्यविरोधःयतः १५२ अनृतावृतुकालेति मंत्रसंस्कारोविवाहःतत्कर्त्ताभर्त्ताऋतावृपेयात्सर्वत्रवाप्रतिषिद्धवर्जमिति

गोतमवचनात् ऋतुकालेअन्यदाचनित्यमिहलोकेच सुखस्यदातानदाराधनेनचस्वर्गादिप्राप्तेःपरलोकेऽपिसुखस्यदातेतित-
स्मात् १५३ विशीलइति सदाचारशून्यःस्त्र्यंतरानुरक्तोवाविद्यादिगुणहीनोवातथापिसाध्व्यास्त्रियादेववत्पतिराराधनीय.य-
स्माच्च १५४ नास्तिस्त्रीणामिति यथाभर्त्तुःकस्याश्चित्पत्न्यारजोयोगादिना अनुपस्थितावपिपत्न्यंतरेणयज्ञनिष्पत्तिः नथानस्त्रीणां
भर्त्राविनायज्ञसिद्धिः नापिभर्त्तुरनुमतिमंतरेणव्रतोपवासौकिंतुभर्तृपरिचर्ययैवस्त्रीस्वर्गलोकेपूज्यते १५५ पाणिग्राहस्येति प-
त्यासहधर्माचरणेनयोर्जितःस्वर्गादिलोकः तमिच्छंतीसाध्वीस्त्रीजीवतोवामृतस्यवाभर्त्तुर्नकिंचिदप्रियमर्जयेत् मृतस्याप्रियंव्य
भिचारेणविहितश्राद्धखंडनेनवृत्तिसंभवेपि १५६ कामंत्विति पुष्पमूलफलैःपवित्रैश्चदेहंक्षपयेत् अल्पाहारेणक्षीणंकुर्यात् नचभ-

विशीलः कामवृत्तोवागुणैर्वापरिवर्जितः उपचर्यःस्त्रियासाध्व्यासततंदेववत्पतिः १५४ नास्तिस्त्रीणां
पृथक्यज्ञोनव्रतन्नाप्युपोषितम् पतिंशुश्रूषतेयेनतेनस्वर्गेमहीयते १५५ पाणिग्राहस्यसाध्वीस्त्री
जीवतोवामृतस्यवा पतिलोकमभीप्संतीनाचरेत्किंचिदप्रियम् १५६ कामंतुक्षपयेद्देहंपुष्पमूलफ-
लैःशुभैः नतुनामापिगृह्णीयात्पत्यौप्रेतेपरस्यतु १५७ आसीतामरणात्क्षांतानियताब्रह्मचारिणी
योधर्मएकपत्नीनांकांक्षंतीतमनुत्तमम् १५८ अनेकानिसहस्राणिकुमारब्रह्मचारिणाम् दिवंगतानि
विप्राणामकृत्वाकुलसंततिम् १५९ मृतेभर्त्तरिसाध्वीस्त्रीब्रह्मचर्येव्यवस्थिता स्वर्गंगच्छत्यपुत्रापि
यथातेब्रह्मचारिणः१६०

नैमिमृतेव्यभिचारधियापरपुरुषस्यनामाप्युच्चारयेत्एवंचसति १५७ आसीतेति क्षमायुक्तानि
यमवतीएकभर्त्तृकानांयोधर्मःप्रकृष्टतम.तमिच्छंतीमधुमांसमैथुनाकामाब्रह्मचर्यशालिनीमरणपर्यंतंतिष्ठेत् अपुत्रापिपुत्रार्थंनपर
पुरुषंसेवेतयस्मात १५८ अनेकानीति बाल्यतएवब्रह्मचारिणामकृतदाराणांसनकवालखिल्यादीनांब्राह्मणानांबहूनिसहस्राणि
कुलरक्षार्थंसंततिमनुत्पाद्यापिस्वर्गंगतानि १५९ मृतेभर्त्तरीति साध्व्याचारास्त्रीमृतेभर्त्तरिअकृतपुरुषांतरमैथुनापुत्ररहितापि
स्वर्गंगच्छति यथातेसनकवालखिल्यादयःपुत्रशून्याःस्वर्गंगताः १६० ७ ७ ७ ७

अपत्यलोभाद्यातुस्त्रीति पुत्रोमेजायतांतेनस्वर्गंप्राप्स्यामीतिलोभेनयास्त्रीभर्त्तारमतिक्रम्यवर्त्ततेव्यभिचरतीत्यर्थः सेहलोकेगर्हां
प्राप्नोतिपरलोकंचस्वर्गंतेनपुत्रेणनलभतेअत्रैवहेतुमाह १६१ नान्योत्पन्नेति यस्माद्भर्तृव्यतिरिक्तेनपुरुषेणउत्पन्नासाप्रजातस्याः
शास्त्रीयानभवतिनचान्यपत्न्यामुत्पादिताःउत्पादकस्यप्रजाभवति एतच्चानियोगोत्पादितविषयम् बहुभर्तृकेयमितिलोकप्रसिद्धेःद्वि
तीयोपिभर्त्तैव तस्मादन्योत्पादितत्वप्रसिद्धिमित्याशंक्याहनच लोकेगर्हाप्रसिद्धावपिसाध्व्याचाराणांनक्वचिच्छास्त्रेद्वितीयोपभर्त्तोप
दिश्यते एवंचसतिपुनर्भूत्वमपिप्रसिद्धम् १६२ पतिमिति अपकृष्टंक्षत्रियादिकंस्वकीयंपतिंत्यक्त्वाउत्कृष्टंब्राह्मणादिकंयाआश्रय
तिसालोकेगर्हणीयैवभवति परोऽन्यःपूर्वोभर्त्ताअस्याअभूदितिचलोकैरिष्यते व्यभिचारफलमाह १६३ व्यभिचारेति परपुरुषोप

अपत्यलोभाद्यातुस्त्रीभर्त्तारमतिवर्त्तते सेहनिंदामवाप्नोतिपतिलोकाच्चहीयते १६१ नान्योत्प
न्नाप्रजास्तीहनचाप्यन्यपरिग्रहे नद्वितीयश्चसाध्वीनांक्वचिद्भर्त्तोपदिश्यते १६२ पतिंहित्वापकृष्ट
स्वमुत्कृष्टंयानिषेवते निंद्यैवसाभवेल्लोकेपरपूर्वेतिचोच्यते १६३ व्यभिचारात्तुभर्त्तुःस्त्रीलोकेप्रा
प्नोतिनिंद्यताम् शृगालयोनिंप्राप्नोतिपापरोगैश्चपीड्यते १६४ पतिंयानाभिचरतिमनोवाग्देहसं
यता साभर्तृलोकमाप्नोतिसद्भिःसाध्वीतिचोच्यते १६५ अनेननारीवृत्तेनमनोवाग्देहसंयता इ
हाग्र्यांकीर्तिमाप्नोतिपतिलोकंपरत्रच १६६ एवंवृत्तांसवर्णांस्त्रीं द्विजातिःपूर्वमारिणीम् दाहयेदग्नि
होत्रेणयज्ञपात्रैश्चधर्मवित् १६७

भोगेनस्त्रीइहलोकेगर्हणीयतांलभतेमृताचशृगालीभवतिकुष्ठादिरोगैश्चपीड्यते
१६४ पतिंयेति मनोवाग्देहसंयतेतिविशेषणोपादानात् यामनोवाग्देहैरेवभर्तारंनव्यभिचरतिसाभर्तृमात्रनिष्ठमनोवाग्देहव्या
पारत्वात्भर्त्रासहार्जितान्लोकान्प्राप्नोतिइहचशिष्टैःसाध्वीत्युच्यते वाङ्मनोभ्यामपिपतिंनव्यभिचरेदितिविधानार्थोदैहिकव्यभि
चारनिवृत्तेरुक्तायाअप्यनुवादः १६५ अनेनेति अनेनस्त्रीधर्मप्रकारेणउक्तेनाचारेणपतिसुश्रूषाभर्त्रव्यभिचारादिनामनोवा
ग्देहसंयतास्त्रीइहलोकेचप्रकृष्टांकीर्तिंपरत्रपत्यासहार्जितंचस्वर्गादिलोकंप्राप्नोतीतिप्रकरणार्थोपसंहारः १६६ एवंवृत्तामिति द्विजातिः
समानवर्णांयथोक्ताचारयुक्तांपूर्वमृतांश्रौतस्मार्त्ताग्निभिर्यज्ञपात्रैश्चदाहधर्मज्ञोदाहयेत् १६७

भार्येति पूर्वमृतायैअंत्यकर्मणिदाहनिमित्तमग्नीन्समर्प्यगृहस्थाश्रमनिमित्तंउत्पन्नपुत्रोऽनुत्पन्नपुत्रोवापुनर्विवाहंकुर्यात्स्मार्त्ता
ग्नीन्श्रौताग्नीन्वाआदध्यात् १६८ अनेनेति अनेनतृतीयाध्यायाद्युक्तविधिनाप्रत्यहंपंचयज्ञान्नत्यजेत् द्वितीयमायुर्भागंकृ
तदारपरिग्रहोऽनेनैवयथोक्तविधिनागृहस्थविहितांधर्माननुतिष्ठेत्गृहस्थधर्मत्वेपिपंचयज्ञानांप्रकृष्टधर्मज्ञापनार्थंपृथङ्निर्देशः
१६९ इतिकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांपंचमोऽध्यायः ५ ७ ७ ७ ७
एवमिति आश्रमसमुच्चयार्थितोद्विजातिः कृतसमावर्त्तनउक्तप्रकारेणयथाशास्त्रंगृहाश्रममनुष्ठायनियतः कृतनिश्चयोयथाविधानं
वक्ष्यमाणधर्मेणयथार्हंविशेषेणजितेंद्रियःपरिपक्वकषायइत्यर्थः वानप्रस्थाश्रममनुतिष्ठेत् १ गृहस्थस्त्विति गृहस्थोयदात्मदेहस्य

भार्यायैपूर्वमारिण्यैदत्त्वाग्नीनंत्यकर्मणि पुनर्दारक्रियांकुर्यात्पुनराधानमेवच १६८ अनेनविधिना
नित्यंपंचयज्ञान्नहापयेत् द्वितीयमायुषोभागंकृतदारोगृहेवसेत् १६९ इतिमानवेधर्मशास्त्रे
भृगुप्रोक्तायांसंहितायांशौचविधिःपंचमोऽध्यायः ५ ७ ७ ७ एवंगृहाश्रमेस्थित्वा
विधिवत्स्नातकोद्विजः वनेवसेत्तुनियतोयथावद्विजितेंद्रियः १ गृहस्थस्तुयदापश्येद्वलीपलित
मात्मनः अपत्यस्यैवचापत्यंतदारण्यंसमाश्रयेत् २ संत्यज्यग्राम्यमाहारंसर्वंचैवपरिच्छदम् पुत्रे
षुभार्यांनिक्षिप्यवनंगच्छेत्सहैववा ३ अग्निहोत्रंसमादायगृह्यंचाग्निपरिच्छदम् ग्रामादरण्यंनिः
सृत्यनिवसेन्नियतेंद्रियः ४

त्वक्शैथिल्यंकेशधावल्यंपुत्रस्यपुत्रंपश्यतितदात्याविधवयोवस्थयाविगतविषयरागतयाव
नंसमाश्रयेत् २ संत्यजेत्यादि ग्राम्यंव्रीहियवादिकंभक्ष्यंसर्वंचगवाश्वशय्यादिपरिच्छदंपरित्यज्यविद्यमानभार्यश्चवनवासमनिच्छं
तींभार्यांपुत्रेषुसमर्प्यइच्छंत्यासहैववनंगच्छेत् ३ अग्निहोत्रमिति श्रौताग्निंआवसथ्यादींश्चाग्न्युपकरणंचस्रुक्स्रुवादीन्
गृहीत्वाग्रामादरण्यंनिःसृत्यगत्वासंयतेंद्रियःसन्निवसेत् ४ मुन्यन्नैरिति मुन्यन्नैर्नीवारादिभिर्नानाप्रकारैःपवित्रैःशाकमू

डफलैर्वारण्योद्भवैरेतानेवेतिगृहस्थस्यपूर्वोक्तान्महायज्ञान्यथाशास्त्रमनुतिष्ठेत् ५ वसीतइति मृगादिचर्मवृक्षवल्कलं
वाआच्छादयेत् हारीतेनतुवल्कलशालीचर्मचारकुशामुंजफलकवासाइतिविदधतावल्कलादिकमप्यनुज्ञातम्
न्जटाश्मश्रुलोमनखानिनित्यंधारयेत् ६ यद्भक्ष्यमिति यद्भुंजीततत्तोयथाशक्तिबलिंभिक्षांचदद्यात् बलिमितितुवैश्वदेवनि-
सभाद्र्योरुपलक्षणंएतानेवमहायज्ञानितिविहितत्वात् आश्रमागतान्जलफलमूलभिक्षादानेनपूजयेत् ७ स्वाध्यायेति वेदाभ्य
सेनित्ययुक्तःस्यात् शीतातपादिद्वंद्वसहिष्णुःसर्वोपकारकःसंयतमनाःसततंदाताप्रतिग्रहनिवृत्तःसर्वभूतेषुकृपावान्भवेत् ८
वैतानिकमिति गार्हपत्यकुंडस्थानामग्नीनामाहवनीयदक्षिणाग्निकुंडयोर्विहारोवितानंतत्रभवंवैतानिकमग्निहोत्रंयथाशास्त्रमनुति

मुन्यन्नैर्विविधैर्मेध्यैःशाकमूलफलेनवा एतानेवमहायज्ञान्निर्वपेद्विधिपूर्वकम् ५ वसीतचर्मची
रंवासायंस्नायात्प्रगेतथा जटाश्चविभृयान्नित्यंश्मश्रुलोमनखानिच ६ यद्भक्ष्यस्यात्ततोदद्याद्बलिं
भिक्षांचशक्तितः अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ७ स्वाध्यायेनित्ययुक्तःस्याद्दांतोमैत्रः
समाहितः दातानित्यमनादातासर्वभूतानुकंपकः ८ वैतानिकंचजुहुयादग्निहोत्रंयथाविधि दर्श
मस्कंदयन्पर्वपौर्णमासंचयोगतः ९ ऋक्षेष्ट्याग्रायणंचैवचातुर्मास्यानिचाहरेत् उत्तरायणंचक्रम
शोदाक्षस्यायनमेवच १०

ष्ठेत् दर्शपौर्णमासंचपर्वेतिश्रौतस्मार्त्तदर्शपौर्णमासौयोगतःकालेअस्कंदयन् अपरित्यजन् भा
र्यानिःक्षेपपक्षेत्वरजस्वलायामिवभार्यायामेतेषामनुष्ठानमुचितंविशेषाश्रयणात् ९ ऋक्षेति ऋक्षेष्टिर्नक्षत्रेष्टिःआग्रायणंनवस
स्येष्टिः ऋक्षेष्ट्याग्रायणंचेतिसमाहारद्वंद्वः तथाचातुर्मास्योत्तरायणदाक्षायणानिश्रौतकर्माणिक्रमेणकुर्यात् अत्रकेचित्सर्वमेतत्
श्रौतंदर्शपौर्णमासादिकर्मवानप्रस्थस्यस्मृत्यर्थमुच्यतेनत्वस्यानुष्ठेयंग्राम्यव्रीह्यादिसाध्यत्वादेषांच नचस्मृतिःश्रौतांगबाधनेश
क्ता तदसत्वासतशारदैरित्युत्तरश्लोकेमुन्यन्नैर्नीवारादिभिःवानप्रस्थविषयतयास्पष्टस्यचरुपुरोडाशादिविधेर्बाधनस्यानित्य
त्वात् गोविंदराजस्तुव्रीह्यादिभिरेवकथंमिदरण्यजातैरेतान्निर्वर्त्तयिष्यतइत्याह १०

वासंतेत्यादि वसंतोद्भवैः शरदुद्भवैर्मेध्यैर्योगांगभूतैर्मुन्यन्नैर्नीवारादिभिः स्वयमानीतैः पुरोडाशांश्चरूंश्च यथाशास्त्रं तत्तद्यागादिसि-
द्ध्येसंपादयेत् ११ देवताभ्यइत्यादि तद्वनोद्भवनीवारादिकसाधितमतिशयेनयागार्हंहविर्देवताभ्यउपकल्प्यशेषान्नमुपभुंजीत
आत्मनाच कृतंलवणमूषरलवणाद्युपभुंजीत १२ स्थलजेति स्थलजलोद्भवशाकानिअरण्ययज्ञीयवृक्षोद्भवानिइंगुद्यादिफलोद्-
भवांश्चस्नेहानद्यात् १३ वर्जयेदित्यादि माक्षिकंमांसंभौमानीतिप्रसिद्धदर्शनार्थंभौमानिकवकानिछत्राकारान् भूस्तृणंमालवदे-
शेप्रसिद्धंशाकंशिग्रुकंवाहीकेषुप्रसिद्धंशाकंश्लेष्मातकफलानिवर्जयेत् गोविंदराजस्तुभौमानिकवकानीतिअन्यव्यवच्छेदकंविशे-
षणमिच्छन् भौमानांकवकानांनिषेधःवार्क्षानांतुभक्षणमाह तदयुक्तंमनुनैवद्विजातेरेवकवकमात्रनिषेधात् वनस्थगोचरतयानि-
यमातिशयस्योचितत्वात् यमस्तु भूमिजंवृक्षजंवापिछत्राकंभक्षयंतिये ब्रह्मघ्नांस्तान् विजानीयात् ब्रह्महादिषुगर्हितानिति

वासंतशारदैर्मेध्यैर्मुन्यन्नैःस्वयमाहृतैः पुरोडाशांश्चरूंश्चैवविधिवन्निर्वपेत्पृथक् ११ देवताभ्यस्तु
तद्धुत्वावन्यंमेध्यतरंहविः शेषमात्मनियुंजीतलवणंचस्वयंकृतम् १२ स्थलजौदकशाकानिपुष्पमू-
लफलानिच मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्चफलसंभवान् १३ वर्जयेन्मधुमांसंचभौमानिकवकानिच
भूस्तृणंशिग्रुकंचैवश्लेष्मातकफलानिच १४ त्यजेदाश्वयुजेमासिमुन्यन्नंपूर्वसंचितम् जीर्णानिचैव
वासांसिशाकमूलफलानिच १५ नफालकृष्टमश्नीयादुत्सृष्टमपिकेनचित् नग्रामजातान्यार्त्तोपिमू-
लानिचफलानिच १६

विशेषेणवृक्षजस्यापिनिषेधमाह मेधातिथिस्तुभौमानीतिस्वतंत्रंपदंवदन् गोजिह्विकानाम
कश्चित्पदार्थोवनेचराणांप्रसिद्धःतद्विषयंनिषेधमाह तदपिबहुष्वभिधानकोशादिष्वप्रसिद्धत्वाच्छ्रद्धीमहि कवकानांद्विजाति-
विशेषेपांचमिकेनिषेधेसत्यपिपुनर्निषेधोभूस्तृणादीनांनिषेधेपिचसमप्रायश्चित्तविधानार्थः १४ त्यजेदिति सर्वमेवसंचयप-
क्षेपूर्वसंचितनीवाराद्यन्नंजीर्णानिचवासांसिशाकमूलफलानिचआश्विनेमासित्यजेत् १५ नफालइति फालकृष्टप्रदेशेजातं-
स्वामिनोपेक्षितमपिव्रीह्यादिनाद्यात् तथाग्रामजातान्यफालकृष्टभूभागोत्पन्नानिवृक्षमूलफलानिक्षुत्पीडितोपिनभक्षयेत् १६

अग्निपक्वेति अग्निपक्वंवन्यमन्नंकालपक्वंवाफलादि यह्वानो दूखलमुसलाभ्यांकिंतुपाषाणेनचूर्णीकृत्यापक्वमेवाद्यात् दंताएवो दूखलस्थानानियस्यतथाविधोवाभवेत् १७ सद्यइत्यादि एकाहमात्रजीवनोचितंमासवृत्त्यर्थसंचितंवाषण्मासंसंवत्सरनिर्वाहसमर्थंवानीवारादिकंसंचिनुयात् यथापूर्वंनियमातिशयःमासवृत्तियोग्यसंचयोमाससंचयः सोऽस्यास्तीति अतइनूठनाविति ठन्प्रत्यये नमाससंचयिकइतिरूपम् १८ नक्तमित्यादि यथासामर्थ्यमन्नमाहृत्यप्रदोषेभुंजीत अहन्येववाचतुर्थकालाशनोवास्यात्सायंप्रातर्मनुष्याणामशनंदेवनिर्मितमितिविहिततत्रैकस्मिन्नहनिउपोष्यापरेद्युःसायंभुंजीत अष्टमकालिकोवाभवेत् त्रिरात्रमुपोष्य चतुर्थस्यान्होरात्रौभुंजीत १९ चांद्रायणेति शुक्लकृष्णयोरेकैकंन्हासयेत्पिंडंशुक्लेकृष्णेचवर्द्धयेत् इत्यादिनैकादशाध्यायेवक्ष्यमाणैश्चांद्रायणैर्वावर्त्तयेत् पक्षांतोपौर्णमास्यमावास्येतत्रशृतांयवागूंवाप्यश्नीयात्सकृदितिसायंप्रातर्वा २० पुष्पमूले

अग्निपक्वाशनोवास्यात्कालपक्वभुगेववा अश्मकुट्टोभवेद्वापिदंतोलूखलिकोपिवा १७ सद्यःप्रक्षालकोवास्यान्माससंचयिकोपिवा षण्मासनिचयोवास्यात्समानिचयएववा १८ नक्तंचान्नंसमश्नीयाद्दिवावाहृत्यशक्तितः चतुर्थकालिकोवास्यात्स्याद्वाप्यष्टमकालिकः १९ चांद्रायणविधानैर्वाशुक्लकृष्णेचवर्त्तयेत् पक्षांतयोर्वाप्यश्नीयाद्यवागूंक्वथितांसकृत् २० पुष्पमूलफलैर्वापिकेवलैर्वर्त्तयेत्सदा कालपक्वैःस्वयंशीर्णैर्वैखानसमतेस्थितः २१ भूमौविपरिवर्त्तेततिष्ठेद्वाप्रपदैर्दिनम् स्थानासनाभ्यांविहरेत्सवनेषूपयन्नपः २२

त्यादि पुष्पमूलफलैरेववाकालपक्वैःस्वयंपतितैर्जीवेत् वैखानसोवानप्रस्थः तद्धर्मप्रतिपादकशास्त्रदर्शनेस्थितः तेनैतदुक्तंअन्यदपिवैखानसशास्त्रोक्तंधर्ममनुतिष्ठेत् २१ भूमावित्यादि केवलायांभूमौलुठन्गतागतानिकुर्यात्स्थानासनाद्वाउपविशेत् उत्तिष्ठेत्पर्यटेदित्यर्थः आवश्यकस्नानभोजनादिकालंविहायचाप्यन्नियमः एषमुत्तरत्रापिपादाग्राभ्यांवादिनंतिष्ठेत्कंचित्कालंस्थितएवस्यात्कंचिच्चोपविष्टएवनत्वंतरापर्यटेत्सवनेषुसायंप्रातर्मध्याह्नेषुस्नायात् यत्तुसायंप्रगेतथेत्युक्तंतेनसहास्यनियमातिशयापेक्षोविकल्पः २२ छ छ छ

ग्रीष्मइत्यादि आत्मतपोवृद्ध्यर्थंग्रीष्मेचतुर्दिगवस्थितैरग्निभिरूर्द्ध्वादित्यतेजसाआत्मानंतापयेत् वर्षास्वभ्रावकाशमाश्रयेत् यत्रदेशेदेवोवर्षतितत्रछत्राद्यावरणरहितस्तिष्ठेदित्यर्थः हेमंतेचार्द्रवासाभवेत् ऋतुत्रयसंवत्सरावलंबेनायंसांवत्सरिकएवनियमः २३ उपेति विहितमपित्रिषवणंस्नानंदेवर्षिपितृतर्पणविधानार्थमनूद्यते प्रातर्मध्यंदिनंसायंसवनेषुत्रिष्वपिदेवर्षिपितृतर्पणंकुर्वन् अन्यदपिपक्षमासोपवासादिकंतीव्रमंततपोऽनुतिष्ठन् यथोक्तयमेनपक्षोपवासिनःकेचिन्मासोपवासिनःइतिस्वशरीरंशोषयेत् २४ अग्नीनित्यादि श्रौतानग्नीन् वैखानसशास्त्रविधानेनभस्मपानादिनाआत्मनिसमारोप्यलौकिकाग्निगृहशून्योयथावस्यतिवृक्षमूलनिकेतनइतिमुनिर्मौनव्रतचारीफलमूलाशनएवस्यात्नीवाराद्यपिनाश्नीयात् एतच्चोर्ध्वंषण्मासेभ्योप्युपरि अनग्निरनिके

ग्रीष्मेपंचतपास्तुस्याद्वर्षास्वभ्रावकाशिकः आर्द्रवासास्तुहेमंतेक्रमशोवर्द्धयंस्तपः २३ उपस्पृशंस्त्रिषवणंपितॄन्देवांश्चतर्पयेत् तपश्चरंश्चोग्रतरंशोषयेद्देहमात्मनः २४ अग्नीनात्मनिवैतानान्समारोप्ययथाविधि अनग्निरनिकेतःस्यान्मुनिर्मूलफलाशनः २५ अप्रयत्नःसुखार्थेषुब्रह्मचारीधराशयः शरणेष्वममश्चैववृक्षमूलनिकेतनः २६ तापसेष्वेवविप्रेषुयात्रिकंभैक्षमाहरेत् गृहमेधिषुचान्येषुद्विजेषुवनवासिषु २७ ग्रामादाहृत्यवाश्नीयादष्टौग्रासान्वनेवसन् प्रतिगृह्यपुटेनैवपाणिनाशकलेनवा २८ एताश्चान्याश्चसेवेतदीक्षाविप्रोवनेवसन् विविधाश्चौपनिषदीरात्मसंसिद्धयेश्रुतीः २९

तनइतिवसिष्ठवचनात्षण्मासोपर्यनग्निरनिकेतत्वंच २५ अप्रयत्नेति सुखप्रयोजनेषुस्वादुफलभक्षणशीतातपपरिहारादिषुप्रयत्नशून्यः अस्त्रीसंभोगीभूशायीनिवासस्थानेषुममत्वरहितोवृक्षमूलवासीस्यात्फलमूलासंभवेच २६ तापसेति वानप्रस्थेभ्योब्राह्मणेभ्यःप्राणमात्रधारणोचितंभैक्षमाहरेत् तदभावेचान्येभ्योवनवासिभ्योगृहस्थेभ्योद्विजेभ्यस्तस्याप्यसंभवे २७ ग्रामेति ग्रामादानीयग्रामस्थान्नस्याष्टौग्रासान्पर्णशरावादिखंडेनपाणिनेववागृहीत्वावानप्रस्थोभुंजीत २८ एताश्चेति वानप्रस्थएतादीक्षाएतान्नियमान्अन्यांश्चवानप्रस्थशास्त्रोक्तानभ्यसेत् औपनिषदीश्चश्रुतीःउपनिषत्पठिताब्रह्मप्रतिपादकवाक्यानिविविधान्यस्यात्मनोब्रह्मसिद्धयेग्रंथतो

र्थतश्चाभ्यसेत् २९ ऋषिभिरिति यस्मादुक्तमृषिभिर्ब्रह्मदर्शिभिः परिव्राजकैर्गृहस्थैश्चवानप्रस्थैर्ब्रह्माद्वैतज्ञानधर्मयोर्विवृद्ध्यर्थं-
उपनिषत्स्थुतयः सेविताः तस्मादेताः सेवेतेतिपूर्वस्यानुवादः ३० अपरेति अचिकित्सितव्याध्याद्युद्भवे अपराजितामैशानींदिशमाश्रि
त्याकुटिलगतिर्युक्तोयोगनिष्ठोजलानिलाशनः आशरीरनिपाताद्गच्छेत् महाप्रस्थानस्यशास्त्रेविहितंचेदंप्रस्थानंमरणंतेननसुरा-
पुषः स्वकामीनप्रेयादितिश्रुत्यापिनविरोधः यतः स्वकामिशब्दप्रयोगात् अवैधंमरणमनयानिषिध्यतेनशास्त्रीयम् ३१ आसामित्या
दि एषांपूर्वोक्तानुष्ठानानामन्यतमेनानुष्ठानेनशरीरंत्यक्त्वा अपगतदुःखभयोब्रह्मैवलोकस्तत्रपूजांलभतेमोक्षमाप्नोतीत्यर्थः केव-
लकर्मणोवानप्रस्थस्यकथंमोक्षइतिचेन्नविविधाश्चोपनिषदीरात्मसंसिद्धयेश्रुतीरित्यनेनास्याप्यात्मज्ञानसंभवात् यस्यतुमरणाभ
वस्तस्मात् ३२ वनेष्वित्यादि अनियतपरिमाणत्वात्आयुषस्तृतीयभागस्यदुर्विज्ञानात्तृतीयमायुषोभागमितिरागक्षयावधिवानप्र-

ऋषिभिर्ब्राह्मणैश्चैवगृहस्थैरेवसेविताः विद्यातपोविवृद्ध्यर्थंशरीरस्यचशुद्धये ३० अपराजितां
वास्थायव्रजेद्दिशमजिह्मगः आनिपाताच्छरीरस्ययुक्तोवार्यनिलाशनः ३१ आसांमहर्षिचर्याणांत्य-
क्त्वान्यतमयातनुम् वीतशोकभयोविप्रोब्रह्मलोकेमहीयते ३२ वनेषुचविहृत्यैवन्तृतीयंभागमायु
षः चतुर्थमायुषोभागंत्यक्त्वासंगान्परिव्रजेत् ३३ आश्रमादाश्रमंगत्वाहुतहोमोजितेंद्रियः भिक्षा
बलिपरिश्रांतः प्रव्रजन्प्रेत्यवर्द्धते ३४ ऋणानित्रीण्यपाकृत्यमनोमोक्षेनिवेशयेत् अनपाकृत्यमोक्षं
तुसेवमानोव्रजत्यधः ३५

स्थकालोपलक्षणार्थं अतएवशंखलिखितौवनवासादूर्द्ध्वंशांतस्यपरिगतवयसः परिव्राज्यमि-
त्याचख्यतुः एवंवनेषुविहृत्यैवंविधिवद्बहुश्चरतपोनुष्ठानप्रकारेणवानप्रस्थाश्रमंविषयरागोपशमनायकथितकालमनुष्ठ तुर्य
स्यायुषोभागमितिशेषायुः कालेसर्वथाविषयसंगान्त्यक्त्वापरिव्राजकाश्रममनुतिष्ठेत् ३३ आश्रमादिति पूर्वपूर्वाश्रमादुत्त
श्रमंगत्वाब्रह्मचर्याद्गृहाश्रमंततोवानप्रस्थाश्रममनुष्ठायेत्यर्थः यथाशक्तिगताश्रमहुतहोमोजितेंद्रियोभिक्षाबलिदानचिरसेवयाश्रांतः
परिव्रज्याश्रममनुतिष्ठन्परलोकेमोक्षलाभात्ब्रह्मभूतऋद्ध्यतिशयंप्राप्नोति ३४ ऋणानित्यादि आश्रमसमुच्चयपक्षमाश्रितोब्राह्मण

उत्तरश्लोकाभिधेयानि त्रीणि ऋणानि संशोध्य मोक्षे मोक्षांतरंगे परिव्रज्याश्रमे मनो नियोजयेत् तानि ऋणान्य संशोध्य मोक्षं चतुर्थाश्रममनुतिष्ठन्नरकं व्रजति तान्येव ऋणानि दर्शयति ३५ अधीत्येति जायमानो ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान्जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्यायेन ऋषिभ्य इति श्रुतेः अतो यथाशास्त्रं वेदानधीत्य पर्ववर्जनादिधर्मेण च पुत्रानुत्पाद्य यथा सामर्थ्यं ज्योतिष्टोमादियज्ञांश्चानुष्ठाय मोक्षांतरंगे चतुर्थाश्रमे मनो नियोजयेत् ३६ अनधीत्येति वेदाध्ययनमकृत्वा पुत्रमनुत्पाद्य यज्ञांश्चाननुष्ठाय मोक्षमिच्छन्नरकं व्रजति ३७ प्राजापत्येति यजुर्वेदीयोपाख्यानग्रंथोक्तां सर्वस्वदक्षिणां प्रजापतिदेवताकां इष्टिं कृत्वा तदुक्तविधिनैवात्मन्यग्नीन्समारोप्य गृहादित्यभिधानात् वानप्रस्थाश्रममननुष्ठायैव चतुर्थाश्रममनुतिष्ठेत् एतेन मनुना चातुराश्रमस्य समुच्चयोपि दर्शितः श्रुतिसिद्धाश्च एकद्वित्रिचतुराश्रमाणां समुच्चयाविकल्पिताः तथा जाबालश्रुतिः ब्रह्मचर्यं समा-

अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ३६ अनधीत्य द्विजो वेदाननुत्पाद्य तथा सुतान् अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः ३७ प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम् आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ३८ यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ३९ यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ४० आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ४१

प्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् इतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा ३८ य इत्यादि यः सर्वेभ्यो भूतेभ्यः स्थावरजंगमेभ्यो अभयं दत्त्वा गृहाश्रमात्प्रव्रजति तस्य ब्रह्मप्रतिपादकोपनिषन्निष्ठस्य सूर्याद्यालोकरहिता हिरण्यगर्भादेर्लोकाः तत्तेजसैव प्रकाशा भवंति तान् आप्नोतीत्यर्थः ३९ यस्मादित्यादि यस्मात् द्विजात् सूक्ष्ममपि भयं भूतानां न भवति तस्य देहाद्विमुक्तस्य देहनाशे कस्मादपि भयं न भवति ४० आगारादित्यादि गृहान्निर्गतः पवित्रैर्दंडकमंडल्वादियुक्तो मुनिर्मौनी समुपोढेषु कामेषु केनचित्सम्यक् समीपं प्रापितेषु स्वाद्वन्नादिषु विगतस्पृहः परिव्रजेत्

मेधातिथिस्तुपवित्रैर्मंत्रजपैरथवापावनैः कृच्छ्रैर्युक्तइतिव्याचष्टे ४१ एकइत्यादि एकस्यसर्वसंगविरहिणोमोक्षावाप्तिर्भवतीतिजानन्एकएवसर्वदापिमोक्षार्थंचरेत् एकएवेत्यनेनपूर्वपरिचितपुत्रादित्यागउच्यतेअसहायवान्इत्युत्तरस्यापिएकाकीयदिन्रतिसकिंचिन्नत्यजतिनकस्यापित्यागेनदुःखमनुभवतिनापिकेनापित्यज्यतेनकोप्यनेनत्यागदुःखमनुभाव्यतेततश्चसर्वत्रनिर्ममत्वःसुखदुःखेमुक्तिमाप्नोति ४२ अनग्निरित्यादि अनग्निर्लौकिकाग्निसंयोगरहितःशास्त्रीयाग्निंसमारोप्यपूर्वमुक्तत्वात् निकेतोगृहशून्यःउपेक्षकःशरीरस्यव्याध्याद्युत्पादेतत्प्रतीकाररहितःअशंकुसुकःस्थिरमतिःअसंचयिकइति अन्येपठंमननान्मौनस्यपूर्वोक्तत्वात् भावेनब्रह्मणिसमाहितःतदेकतानमनाः अरण्येचदिवारात्रौवसन्भिक्षार्थमेवग्राममविशेत् ४३

एकएवचरेन्नित्यंसिद्ध्यर्थमसहायवान् सिद्धिमेकस्यसंपश्यन्नजहातिनहीयते ४२ अनग्निरनिकेतःस्याद्ग्राममन्नार्थमाश्रयेत् उपेक्षकोऽशंकुसुकोमुनिर्भावसमाहितः ४३ कपालंवृक्षमूलानिकुचेलमसहायता समताचैवसर्वस्मिन्नेतन्मुक्तस्यलक्षणम् ४४ नाभिनंदेतमरणन्नाभिनंदेतजीवितम् कालमेवप्रतीक्षेतनिर्देशंभृतकोयथा ४५ दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंजलंपिबेत् सत्यपूतांवदेद्वाचंमनःपूतंसमाचरेत् ४६ अतिवादांस्तितिक्षेतनावमन्येतकंचन नचेमंदेहमाश्रित्यवैरंकुर्वीतकेनचित् ४७

कपालमित्यादि मृण्मयकर्परादिभिक्षापात्रंवासार्थंवृक्षमूलानिस्थूलजीर्णवस्त्रंकौपीनकं सर्वत्रब्रह्मबुद्ध्याशत्रुमित्राभावः एतन्मुक्तिसाधनत्वान्मुक्तस्यलिंगम् ४४ नेत्यादि मरणंजीवनंचद्वयमपिनकामयेत्किंधीनंमरणकालमेवप्रतीक्षेतनिर्दिश्यतेइतिनिर्देशोभृतिः तत्परिशोधनकालमिवभृतकः ४५ दृष्टिपूतमित्यादि केशास्थ्यादिपरिहारार्थंदृष्टिशोधितपादोभूमौक्षिपेत् जलेपुक्षुद्रजंत्वादिवारणार्थंवस्त्रशोधितंजलंपिबेत् सत्यपवित्रांवाचंवदेत् ततश्चमौनेनसहसत्यस्यविकल्पःप्रतिषिद्धसंकल्पशून्यमनसासर्वदापवित्रात्मास्यात् ४६ अतिवादानित्यादि अतिक्रमवादान्परोक्तान्सहेतनकंचित्परिभवेत्नेमंदेहमस्थिरंव्याध्यायतनमाश्रित्यतदर्थंकेनचित्सहवैरंकुर्यात् ४७ ७ ७

कुध्यंतमित्यादि संजातक्रोधायकस्मैचित् प्रतिक्रोधंनकुर्यात् निंदितश्चान्येनवाचंभद्रांवदेत्नतुनिंदेत्सप्तद्वारावकीर्णामितिचक्षु
रादीनिपंचबहिर्बुद्धींद्रियाणिमनोबुद्धिरित्यंतःकरणद्वयवेदांतदर्शनेएतैर्गृहीतेषुस्वेषुवाचाप्रवृत्तेरेतानिसप्तद्वाराणीत्युच्यंते एतैरव
कीर्णांविक्षिप्तांतद्गृहीतार्थविषयांवाचन्नवदेत्किंतुब्रह्ममात्रविषयांवदेत् ननुमनसैवब्रह्मउपास्यतेब्रह्मविषयवागुच्चारणमपिमनो
व्यापारः तत्कथंसप्तद्वारावकीर्णत्वविशेषेपिब्रह्मविषयांवदेदिति अन्यविषयांनवदेदितिलभ्यते उच्यते अतएवानृतामितिविशेषण
मित्यनृतमसत्यंविनाशीतियावत्तद्विषयावागप्यनृतोच्यते तेनविनाशिकार्यविषयांवाचंनोच्चारयेत् अविनाशिब्रह्मविषयांतुप्रणवो
पनिषदादिरूपांवदेत् गोविंदराजस्तुधर्मोर्थःकामोधर्मार्थावर्थकामौधर्मार्थकामाइतिएतानिसप्तवाग्विषयतयावाक्प्रवृत्तेर्द्वाराणिते
रवकीर्णांविक्षिप्तांसर्वस्यभेदस्यासत्वात् तद्विषयांअसत्यरूपांवाचंनवदेत् अन्येतुसप्तभुवनान्येववाग्विषयत्वात्सप्तद्वाराणितेषां

क्रुध्यंतंनप्रतिक्रुध्येदाक्रुष्टःकुशलंवदेत् सप्तद्वारावकीर्णांचनवाचमनृतांवदेत् ४८ अध्यात्मरति
रासीनोनिरपेक्षोनिरामिषः आत्मनैवसहायेनसुखार्थीविचरेदिह ४९ नचोत्पातनिमित्ताभ्यांनन
क्षत्रांगविद्यया नानुशासनवादाभ्यांभिक्षांलिप्सेतकर्हिचित् ५० नतापसैर्ब्राह्मणैर्वावयोभिरपिवा
श्वभिः आकीर्णंभिक्षुकैर्वान्यैरगारमुपसंव्रजेत् ५१ कृप्तकेशनखश्मश्रुःपात्रीदंडीकुसुंभवान् वि
चरेन्नियतोनित्यंसर्वभूतान्यपीडयन् ५२

भेदाद्विनाशित्वाच्च असत्यतयातद्विषयांवाचमसत्यांनवदेत्केवलंब्रह्मवि-
षयांवदेत् ४८ अध्यात्मेति आत्मानंब्रह्माधिकृत्यरतिर्यस्यसोऽध्यात्मरतिःसर्वदाब्रह्मध्यानपरआसीनइतिस्वस्तिकाद्योगासन
निष्ठःनिरपेक्षोदंडकमंडल्वादिष्वपिविशेषापेक्षाशून्यःनिरामिषःआमिषंविषयाःतदभिलाषरहितःआत्मनोदेहेनैवसहायेनमोक्ष
सुखार्थीहसंसारेविचरेत् ४९ नेत्यादि भूकंपाद्युत्पातनचक्षुःस्पंदादिनिमित्तफलकथनेन अथाश्विनीहस्तरेखादेरीदृशंफलमितिनक्ष
त्रांगविद्ययाईदृशोनीतिमार्गइत्थंवर्तितव्यंअनुशासनेनशास्त्रार्थकथनेनचकदाचिन्नभिक्षांलब्धुमिच्छेत् ५० नतापसैरित्यादि वा
नप्रस्थैरन्यैर्वाब्राह्मणैर्भक्षणशीलैःपक्षिभिःकुक्कुरैर्वाव्याप्तंगृहंभिक्षार्थंनप्रविशेत् ५१ कृप्तेत्यादि कृप्तकेशनखश्मश्रुर्भिक्षापात्रवान्

दंडीकुसंभः कमंडलुस्तद्युक्तः सर्वप्राणिनोऽपीडयन्सर्वदापरिव्रजेत् ५२ अतैजसेति सौवर्णादिवर्जितानिनिश्छिद्राणिभिक्षोर्भि
क्षापात्राणिभवेयुः तथायमः सुवर्णरूप्यपात्रेषुताम्रकांस्यायसेषुच गृह्णन्भिक्षांनधर्मोस्तिगृहीत्वानरकंव्रजेत् तेषांचयतिपा
त्राणांजलेनैवतुशुद्धिः यज्ञेचमसानामिव तान्येवदर्शयति ५३ अलाबुमित्यादि अलाबुदारुमृत्तिकावंशादिखंडनिर्मितानियतीनां
भिक्षापात्राणिस्वायंभुवोमनुरवदत् वैदलंनरुलकुनिर्मितमितिगोविंदराजः ५४ एककालमिति एकवारंप्राणधारणार्थंभैक्षंचरेत्
तत्रापिप्रचुरभिक्षाप्रसंगंनकुर्यात् यतोबहुतरभिक्षाभक्षणप्रसक्तोयतिःप्रधानधातुवृद्ध्यास्त्र्यादिविषयेष्वपिप्रसज्जते ५५ विधूमइ
त्यादि विगतपाकधूमेनिवृत्तावहननमुसलेनिर्वाणापाकांगारेगृहस्थपर्यंतभक्तवज्जनेउत्सृष्टशरावेषुत्यक्तेषुसर्वदायतिर्भिक्षांचरेत्

अतैजसानिपात्राणितस्यस्युर्निर्व्रणानिच तेषामद्भिःस्मृतंशौचंचमसानामिवाध्वरे ५३ अलाबुंदारु
पात्रंचमृण्मयंवैदलंतथा एतानियतिपात्राणिमनुःस्वायंभुवोऽब्रवीत् ५४ एककालंचरेद्भैक्षंनप्रस
ज्जेतविस्तरे भैक्षेप्रसक्तोहियतिर्विषयेष्वपिसज्जति ५५ विधूमेसन्नमुसलेव्यंगारेभक्तवज्जने वृ
त्तेशरावसंपातेभिक्षांनित्यंयतिश्चरेत् ५६ अलाभेनविषादीस्याल्लाभेचैवनहर्षयेत् प्राणयात्रिक
मात्रःस्यान्मात्रासंगाद्विनिर्गतः ५७ अभिपूजितलाभांस्तुजुगुप्सेतैवसर्वशः अभिपूजितलाभैश्चय
तिर्मुक्तोपिबध्यते ५८ अल्पान्नाभ्यवहारेणरहःस्थानासनेनच ह्रियमाणानिविषयैरिंद्रियाणिनिव
र्तयेत् ५९

एतच्चदिनशेषमुहूर्त्तत्रयरूपसामान्योपलक्षणम् तथाहयाज्ञवल्क्यः अप्रमत्तश्चरेद्भैक्ष्यंसायान्हेनाभिसंधितः
५६ अलाभेइत्यादि भिक्षादेरलाभेनविषीदेदिति लाभेचहर्षंनकुर्यात्प्राणस्थितिमात्रोपचितान्नभोजनपरःस्यात् दंडकमंडलु
मात्रास्वपिइदमशोभनंस्रजाभिरदंरुचिरंगृह्णामिइत्यादिप्रसंगंनकुर्यात् ५७ अभीत्यादि पूजापूर्वकभिक्षालाभंसर्वकालंनिंदेत्न
स्वीकुर्यादित्यर्थः यस्मात्पूजापूर्वकलाभस्वीकारेदातृगोचरस्नेहममत्वादिभिः आसन्नमुक्तिरपियतिर्जन्मबंधान्लभते ५८ अल्पे
त्यादि आहारलाघवेननिर्जनदेशस्थानादिनाचरूपादिविषयैराकृष्यमाणानींद्रियाणिनिवर्त्तयेत्यस्मात् ५९ ७ ७

इंद्रियाणामित्यादि इंद्रियाणांनिग्रहेणरागद्वेषाभावेनचप्राणिहिंसाविरतेनचमोक्षयोग्योभवति इदानींइंद्रियनियमोपायंविषय-
वैराग्यायसंसारतत्त्वचिंतनमुपदिशति ६० अवेक्षेतेत्यादि विहिताकरणनिंदिताचरणरूपकर्मदोषजन्यामनुष्याणांपश्वादिदेहप्रा-
प्तिंनरकेषुपतनंयमलोकेनरकस्थस्यनिशितनिस्त्रिंशच्छेदनादिभवास्तीव्रवेदना श्रुतिपुराणादिषूक्ताश्चिंतयेत् ६१ विप्रयोगमि-
त्यादि इष्टपुत्रादिवियोगंअनिष्टहिंसकादियोगंजराभिभवनंव्याध्यादिभिश्चपीडनंकर्मदोषसमुद्भवअनुचिंतयेत् ६२ देहादित्यादि
अस्माद्देहादस्यजीवात्मनःउत्क्रमणंतथाचमर्मभिद्भिर्महारोगपतितस्यश्लेष्मादिदोषनिरुद्धकंठस्यमहतीवेदनांगर्भेचोत्पत्तिंदुःखब-
हुलांश्वसृगालादिनिकृष्टजातियोनिकोटिसहस्रगमनानिसकर्मबंधान्यनुचिंतयेत् ६३ अधर्मेत्यादि शरीरवतांजीवात्मनांअधर्महे

इंद्रियाणान्निरोधेनरागद्वेषक्षयेणच अहिंसयाचभूतानाममृतत्वायकल्पते ६० अवेक्षेतगतीर्नृ-
णांकर्मदोषसमुद्भवाः निरयेचैवपतनंयातनाश्चयमक्षये ६१ विप्रयोगंप्रियैश्चैवसंयोगंचतथाप्रि-
यैः जरयाचाभिभवनंव्याधिभिश्चोपपीडनम् ६२ देहादुत्क्रमणंचास्मात्पुनर्गर्भेचसंभवम् योनि
कोटिसहस्रेषुसृतीश्चास्यांतरात्मनः ६३ अधर्मप्रभवंचैवदुःखयोगंशरीरिणाम् धर्मार्थप्रभवंचैव
सुखसंयोगमक्षयम् ६४ सूक्ष्मतांचान्ववेक्षेतयोगेनपरमात्मनः देहेषुचसमुत्पत्तिमुत्तमेष्वधमेषु
च ६५ दूषितोपिचरेद्धर्मंयत्रतत्राश्रमेरतः समःसर्वेषुभूतेषुनलिंगंधर्मकारणम् ६६

तुकंदुःखसंबंधंधर्महेतुकोऽर्थोब्रह्मसाक्षात्कारस्तत्प्रभवंमोक्षलक्षणमक्षयब्रह्मसुखसंयोगंचिंतयेत् ६४ सूक्ष्मतामित्यादि
योगेनविषयांतरचित्तवृत्तिनिरोधेनपरमात्मनःस्थूलशरीराद्यपेक्षयासर्वांतर्यामित्वेनसूक्ष्मतांनिरवयवतांतत्त्यागादुत्कृष्टापकृष्टेषु
देवपश्वादिशरीरेषुजीवानांशुभाशुभफलभोगार्थमुत्पत्तिमधिष्ठानमनुचिंतयेत् ६५ दूषितेति यस्मिन्कस्मिंश्चिदाश्रमेस्थित-
स्तदाश्रमविरुद्धाचारदूषितोपिआश्रमलिंगरहितोपिसर्वभूतेषुब्रह्मबुद्ध्यासमदृष्टिःसन्धर्ममनुतिष्ठेन्नहिदंडादिलिंगधारणमात्रं
धर्मकारणंकिंतुविहितानुष्ठानंएतच्चधर्मप्राधान्यबोधनायोक्तंनतुलिंगपरित्यागार्थमत्रदृष्टांतमाह ६६ ७ ७ ७

फलमिति यद्यपिकतकवृक्षस्यफलंकलुषजलस्वच्छताजनकंतथापितन्नामोच्चारणवशान्नप्रसीदतिकिंतुफलप्रक्षेपेणएवंन लिंगधारणमात्रंधर्मकारणंकिंतुविहितानुष्ठानम् ६७ संरक्षणार्थमित्यादि शरीरस्यापिपीडायांसूक्ष्मपिपीलिकादिप्राणरक्षार्थं रात्रौदिवसेवासदाभूमिंनिरीक्ष्यपर्यटेत्पूर्वंकेशादिपरिहारार्थंदृष्टिपूतंन्यसेत्पादमित्युक्तंइदंतुहिंसापरिहारार्थंइत्यपुनरुक्तिः अत्र प्रायश्चित्तमाह ६८ अन्हारात्र्येति यतिर्यानज्ञानतोदिवसेरात्रौवाप्राणिनोहंतितद्धननजनितपापनाशार्थंस्नात्वाषट्प्राणायामान् कुर्यात्प्राणायामश्च सव्याहृतिसप्रणवांगायत्रींशिरसासह त्रिःपठेदायतप्राणःप्राणायामःसउच्यतेवसिष्ठोक्त्याअत्रद्रष्टव्यः ६९ प्राणायामाइति ब्राह्मणस्येतिनिर्देशात्ब्राह्मणजातेरयमुपदेशोनयतेरेवत्रयोपिप्राणायामाःसप्तभिर्व्याहृतिभिर्दशभिःप्रणवै र्युक्ताविधिवदित्यनेनसावित्र्याशिरसाचयुक्ताः पूरककुंभकरेचकविधिनाकृताब्राह्मणस्यश्रेष्ठंतपोज्ञातव्यंपूरकादिस्वरूपंस्मृत्यंतरे·

फलंकतकवृक्षस्ययद्यप्यंबुप्रसादकम् ननामग्रहणादेवतस्यवारिप्रसीदति ६७ संरक्षणार्थंजंतूनांरात्रावहनिवासदा शरीरस्यात्ययेचैवसमीक्ष्यवसुधांचरेत् ६८ अन्हारात्र्याचयान्जंतून्हिनस्त्यज्ञानतोयतिः तेषांस्नात्वाविशुद्ध्यर्थंप्राणायामान्षडाचरेत् ६९ प्राणायामाब्राह्मणस्यत्रयोपिविधिवत्कृताः व्याहृतिप्रणवैर्युक्ताविज्ञेयंपरमंतपः ७० दह्यंतेध्मायमानानांधातूनांहियथामलाः तथेंद्रियाणांदह्यंतेदोषाःप्राणस्यनिग्रहात् ७१ प्राणायामैर्दहेद्दोषान्धारणाभिश्चकिल्बिषम् प्रत्याहारेणसंसर्गान्ध्यानेनानीश्वरान्गुणान् ७२

पुञ्जेयम् तथायोगियाज्ञवल्क्यः नासिकोत्कृष्टउच्छ्वासोध्मातःपूरकउच्यते कुंभकोनिश्चलश्वासोमुच्यमानस्तुरेचकः त्रयोपीत्यपिशब्देनत्रयोअवश्यंकर्त्तव्याः अधिककरणेत्वधिक पापक्षयः ७० दह्यंतेति धातूनांस्वर्णरजतादीनांयथामूषायांअग्निनाध्मायमानानांमलद्रव्याणिदह्यंतेएवंमनसोरागादय रादेश्चविषयप्रवणत्वादयोदोषाःप्राणायामेनविषयानभिध्यानात्दह्यंतेएवंसति ७१ प्राणायामैरित्यादि अनंतरोक्तप्रकारेण प्राणायामैरागादिदोषान्दहेत् अपेक्षितदेशेपरंब्रह्मादौयन्मनसोधारणंसाधारणातयापापंनाशयेत् प्रत्याहारेणविषयेभ्यः इंद्रियाकर्षणेविषयसंपर्कान्वारयेत्ब्रह्मध्यानेनेतिसोहमस्मीतिसजातीयप्रत्ययप्रवाहरूपेणअनीश्वरान्गुणान्ईश्वरस्य

त्मनोयेगुणानभवंतिक्रोधलोभाभयादयः ७२ उच्चावचेष्वित्यादि अस्यजीवस्यउत्कृष्टापकृष्टेषुदेवपश्वादिषुजन्मप्राप्तिमकृतात्मभिः शास्त्रैरसंस्कृतांतःकरणैर्दुर्ज्ञेयांध्यानाभ्यासेनसम्यक्सकारणकंजानीयात् ततश्चाविद्याकाम्यनिषिद्धकर्मनिर्मितेयंगतिरितिज्ञा त्वाब्रह्मज्ञाननिष्ठोभवेदितितात्पर्यार्थः ततश्च ७३ सम्यग्दर्शनेति ब्रह्मसाक्षात्कारवान्कर्मभिर्ननिबध्यतेकर्मणितस्यपुनर्जन्मानि नभवंतिपूर्वार्जितपापपुण्यस्यब्रह्मज्ञानेननाशात्तथाचश्रुतिः तद्यथाइषीकातूलमग्नौप्रोतंप्रदहेतएवंहास्यसर्वेपाप्मानःप्रदूयंतइति ब्रह्मविदेवभवतीतिश्रुत्या तथाक्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइतिविशेषश्रुत्यापुण्यसंबंधोपिबोध्यतेउत्तरकालेच दैवात्पापेकर्मणिप्रकृतेपिनपापसंश्लेषः तथाचश्रुतिःपुष्करपलाशआपोनश्लिष्यंतएवमेवंदेहेपापकर्मनश्लिष्यतइतिदेहारंभकपापपुण्यसंबंधःपरंनश्यतिअयमेवचार्थोब्रह्ममीमांसायांतदधिगमउत्तरपूर्वार्धयोरश्लेषविनाशौतस्योपदेशादितिसूत्रेबादरायणेननि

उच्चावचेषुभूतेषुदुर्ज्ञेयामकृतात्मभिः ध्यानयोगेनसंपश्येद्गतिमस्यांतरात्मनः ७३ सम्यग्दर्शनसंपन्नःकर्मभिर्ननिबध्यते दर्शनेनविहीनस्तुसंसारंप्रतिपद्यते ७४ अहिंसयेंद्रियासंगैर्वैदिकैश्चैव कर्मभिः तपसश्चरणैश्चोग्रैःसाधयंतीहतत्पदम् ७५ अस्थिस्थूणंस्नायुयुतंमांसशोणितलेपनम् चर्मावनद्धंदुर्गंधिपूर्णंमूत्रपुरीषयोः ७६ जराशोकसमाविष्टंरोगायतनमातुरम् रजस्वलमनित्यंच भूतावासमिमंत्यजेत् ७७

रणादिब्रह्मसाक्षात्कारशून्यस्तुजन्ममरणप्रबंधंलभते ७४ अहिंसेति निषिद्धहिंसाव र्जनेनइंद्रियाणांचविषयसंगपरिहारेणवैदिकैर्नित्यैःकर्मभिःकाम्यकर्मणांबंधहेतुत्वात् उक्तंचकाम्यकर्मतानप्रशस्तेतितपश्च र्ययासंभवमुपवासकृच्छ्रचांद्रायणादिभिरनुष्ठानैरिहलोकेतत्पदंब्रह्मात्यंतिकलयलक्षणंप्राप्नुवंतिपूर्वश्लोकेनब्रह्मदर्शनस्य- मोक्षहेतुत्वमुक्तं अनेनतत्पदसहकारितयाकर्मणोऽभिहितम् इदानीमोक्षांतरंगोपायसंसारवैराग्यायदेहस्वरूपमाह श्लोकद्वये- न ७५ अस्थीत्यादि जरेत्यादिच अस्थीन्येवस्थूणाइवयस्यतंअस्थिस्थूणंस्नायुरज्जुभिरावद्धंमांसरुधिराद्युपलिप्तंचर्मा- च्छादितंमूत्रपुरीषाभ्यांपूर्णंअतएवदुर्गंधि ७६ जरोपतापाभ्यांआक्रांतंविविधव्याधीनामाश्रयंआतुरंक्षुत्पिपासाशीतोष्णादि

कातरंभायेंणरजोगुणयुक्तंविनश्वरस्वभावंच आवासोगृहंपृथिव्यादिभूतानितेषामावासंदेहमेवजीवस्यगृहत्वेननिरूपितंत्यजे
त् यथापुनर्देहसंबंधोनभवेत्तथाकुर्यात्गृहसाम्यमेवाह ७७ नदीकूलमिति ब्रह्मोपासकस्यदेहत्यागसमयेमोक्षः आरब्ध
हस्यकर्मणोभोगेनैवनाशात्तत्रदेहस्यकुर्द्वैविध्यमाहयः कर्माधीनंदेहपातमवेक्ष्यतेसनदीकूलंयथावृक्षस्त्यजतिस्वपातमजानन्ने
वनदीरयेणपात्यतेतयादेहंत्यजन्यश्चज्ञानकर्मप्रकर्षात्भीष्मादिवत्स्वाधीनमृत्युःसयथापक्षीवृक्षंस्वेच्छयात्यजतितथादे
हमिमंत्यजन्संसाररूपाद्ग्राहादिवजलचरप्राणिभेदाद्विमुच्यते ७८ प्रियेष्वित्यादि ब्रह्मविदात्मीयेषुप्रियेषुहितकारिषुसुकृतंअ
प्रियेष्वहितकारिषुदुष्कृतंनिःक्षिप्यध्यानयोगेननित्यंब्रह्माप्येतिब्रह्मणिलीयते तथाचश्रुतिः तस्यपुत्रादायमुपयंतिसुहृदःसाधु
कृत्यांद्विषंतःपापकृत्यमित्यपराश्रुतिः ततस्तेषुसुकृतदुष्कृतेषुतुनेतस्यप्रियाज्ञातयःसुकृतमुपपद्येरन्नप्रियादुष्कृतमितिएवमा

नदीकूलंयथावृक्षोवृक्षंवाशकुनिर्यथा तथात्यजन्निमंदेहंकृच्छ्राद्ग्राहाद्विमुच्यते ७८ प्रियेषुस्वेषु
सुकृतमप्रियेषुचदुष्कृतम् विसृज्यध्यानयोगेनब्रह्माप्येतिसनातनम् ७९ यदाभावेनभवतिस
र्वभावेषुनिस्पृहः तदासुखमवाप्नोतिप्रेत्यचेहचशाश्वतम् ८०

दीन्येववाक्यान्युदाहृत्यसुकृतदुष्कृतयोर्हानिमा
त्रश्रवणेप्युपासनंप्रतिपत्तव्यंइतिब्रह्ममीमांसायांहानौतूपायनशब्दशेषत्वात्कुशाच्छंदस्स्तुत्युपगानवत्तदुक्तमित्यादिसूत्रेबादराय
णआचार्येणतत्त्वनिर्धारितमेतत्तुपरकीयसुकृतदुष्कृतयोः कथंपरत्रसंक्रांतिःउच्यतेधर्माधर्मव्यवस्थायांशास्त्रमेवप्रमाणंसंक्रामोपितयोःशास्त्रप्रमाण
कएव अतःशास्त्रात्संक्रमेणयोग्यावेतौसिध्यतः अतःशास्त्रेणबाधात्नप्रतिपक्षानुमानोदयः कश्चिन्नरशिरःकपालंप्राण्यंगत्वात्शंखा
दिवदितिवत् मेधातिथिगोविंदराजौतु स्वेषुप्रियेषुकेनचित्कृतेषुध्यानाभ्यासेनात्मीयमेवतत्रकारणत्वेनारोप्यएवमप्रियेष्वपिकेन
चित्कृतेषुआत्मीयमेवप्राग्जन्मार्जितंदुष्कृतंकारणत्वेनप्रकल्प्योभयतत्संपादयितारौपुरुषौरागद्वेषास्पदौत्यक्त्वानित्यंब्रह्माप्येति
मस्वभावमुपगच्छतीतिव्याचक्षते तन्न विसृज्येतिक्रियायांसुकृतंदुष्कृतमितिकर्मद्वयत्यागेनतत्संपादयितारावित्यश्रुत
हानात्कर्मद्वयेचश्रुतक्रियात्यागेनकारणत्वेनप्रकल्प्येत्याद्यश्रुतक्रियाध्याहारात् किंच व्यासव्याख्यातवेदार्थमेवप्रस्यामनुस्मृतेः

न्येनकल्पितंगर्वादर्वाचीनंविचक्षणैः ७९ यदेति यदापरमार्थतोविषयदोषभावेनसर्वविषयेषुनिरभिलाषोभवतितदेहलोकेसंतो
षजन्यसुखंपरलोकेचमोक्षसुखंअविनाशिमाप्नोति ८० अनेनेति पुत्रकलत्रक्षेत्रादिषुममत्वरूपान्क्रमेणसंगान्सर्वान्त्यक्त्वाद्वं
द्वैर्मानापमानादिभिर्निर्मुक्तोअनेनयथोक्तेनज्ञानकर्मानुष्ठानेनब्रह्मण्येवात्यंतिकंलयमाप्नोति ८१ ध्यानिकमिति यदेतदित्यत्यंत
सन्निधानंपूर्वश्लोकोदितंपरामृश्यतेयदेतदुक्तंपुत्रादिममत्वत्यागोमानापमानादिहानिर्ब्रह्मण्येवावस्थानंसर्वमेवैतत्ध्यानिकंआ
त्मनःपरमात्मत्वेनध्यानेसतिभवतियदात्मानंपरमात्मेतिजानातितदासर्वसत्वान्नविशिष्यतेतस्यकुत्रचिन्ममत्वंमानापमानादिकंवा
भवतितथाविधज्ञानात् ब्रह्मात्मत्वंनजायतेध्यानिकविशेषात्ध्येयविशेषलाभेपरमात्मध्यानार्थमाह नह्यनध्यात्मविदितियस्मादा
त्मानंजीवमधिकृत्ययदुक्तंतस्यपरमात्मत्वंतद्योनजानातिनध्यायतिसम्यक्कृतध्यानक्रियाफलंममत्वत्यागमानापमानादिहानिमोक्षंचन

अनेनविधिनासर्वांस्त्यक्त्वासंगान्शनैःशनैः सर्वद्वंद्वविनिर्मुक्तोब्रह्मण्येवावतिष्ठते ८१ ध्यानिकं
सर्वमेवैतत्यदेतदभिशब्दितम् नह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ८२ अधियज्ञंब्र
ह्मजपेदाधिदैविकमेवच अध्यात्मिकंचसततंवेदांताभिहितंचयत् ८३ इदंशरणमज्ञानामिदमे
वविजानताम् इदमन्विच्छतांस्वर्गमिदमानंत्यमिच्छताम् ८४ अनेनक्रमयोगेनपरिव्रजतियो
द्विजः सविधूयेहपाप्मानंपरंब्रह्माधिगच्छति ८५

माप्नोति ८२ अधियज्ञमिति पूर्वंब्रह्मध्यानस्वरूपमुपासन
मुक्तंइदानींतदंगतयावेदजपंविधत्ते तथाचश्रुतिः तमेतंवेदानुवचनेनविविदिषंतीतिविद्यांगतयावेदजपमुपदिशति अधियज्ञमिति
यज्ञमधिकृत्यमंत्रंब्रह्मवेदंतयादेवतामधिकृत्यमंत्रंतथाजीवमधिकृत्यतथावेदांतेषूक्तंसत्यंज्ञानमनंतंब्रह्मइत्यादिब्रह्मप्रतिपाद
कंसर्वदाजपेत् ८३ इदमिति इदंवेदाख्यंब्रह्मतदर्थानभिज्ञानामपिशरणंगतिपाठमात्रेणापिपापक्षयहेतुत्वात्तत्रांतज्ज्ञानतांतद
र्थाभिज्ञानांस्वर्गमपवर्गंचइच्छतामिदमेवशरणंतदुपायोपदेशकत्वेनप्राप्तिहेतुत्वात् ८४ अनेनेति अनेनयथाक्रमोक्तानुष्ठानेनयः
प्रव्रज्याश्रममाश्रयतिसइहलोकेपापंविसृज्यपरंब्रह्मप्राप्नोतिब्रह्मसाक्षात्कारेणउपाधिशरीरनाशात्ब्रह्मण्यैक्यंगच्छति ८५ ७

एषधर्मइति एषःयतीनांयतात्मनांचतुर्णामेवकुटीचरकबहूदकहंसपरमहंसानांसाधारणोधर्मोवोयुष्माकमुक्तइदानींयतिवि-
शेषाणांकुटीचराख्यानांवेदविहितादिकर्मसंयोगिनां असाधारणंवक्ष्यमाणंपुत्रैश्वर्येसत्वंवसेदितिकर्मसंबंधंशृणुत भारतेचतुर्द्वा
भिक्षवउक्ताः चतुर्द्धाभिक्षवस्तस्मः कुटीचरोबहूदकः हंसःपरमहंसश्चयोयःपश्चात्सउत्तमइतिकुटीचरकस्यायंसुत्रभि
रूपासाधारणकर्मोपदेशः गोविंदराजस्तुगृहस्थविशेषमेववेदोदिताग्निहोत्रादिकर्मत्यागिनंज्ञानमात्रसंपादितवेदं . . .
सन्यासिकमाह तत्रगृहस्थस्याहिताग्नेरंत्येष्टौविनियोगःचतुर्थाश्रमाश्रयणेचात्मनिसमारोपः शास्त्रेणोच्यतेतदुभयाभावेसत्येव-
मेवाग्नीनांत्यागःस्यात् गोविंदराजोगृहस्थंवेदसन्यासिकंब्रुवन् एवमेवाहिताग्नीनांत्यागमर्थादुपेतवान् वेदसन्यासिकंमेधाति-
थिःप्राहनिराश्रमम् तन्मतेचातुराश्रम्यनियमोक्तिः कथंमनोः इदानींवेदसन्यासिकस्यप्रज्ञातकर्मत्यागानंतरंवक्तुमुचितमपिवेदसं

एषधर्मोनुशिष्टोवोयतीनांनियतात्मनाम् वेदसंन्यासिकानांतुकर्मयोगन्निबोधत ८६ ब्रह्मचा
रीगृहस्थश्चवानप्रस्थोयतिस्तथा एतेगृहस्थप्रभवाश्चत्वारःपृथगाश्रमाः ८७ सर्वेपिक्रमशस्त्व
तेयथाशास्त्रंनिषेविताः यथोक्तकारिणंविप्रंनयंतिपरमांगतिम् ८८ सर्वेषामपिचैतेषांवेद-
स्मृतिविधानतः गृहस्थउच्यतेश्रेष्ठःसत्रीनेतान्बिभर्तिहि ८९

न्यासिकःपंचमाश्रमीनिराश्रमीवाचत्वार-
एवाश्रमानियताइतिदर्शयितुमुक्तानाश्रमाननुवदति ८६ ब्रह्मचारीति ब्रह्मचर्यादयोयएतेपृथगाश्रमाउक्ताएतेचत्वारए
जन्याभवंति ८७ सर्वेपीत्यादि एतेसर्वेचत्वारोप्याश्रमाः शास्त्रानतिक्रमेणानुष्ठिताः अपिशब्दात्त्रयोद्वावेकोपियथोक्त
विप्रंमोक्षलक्षणांगतिंप्रापयंतिप्रकृतवेदसन्यासिकस्यगृहेपुत्रैश्वर्येवासंवक्ष्यतितदर्थंगृहस्थोत्कर्षमाह ८८ सर्वेषामि १२
षामेतेषांब्रह्मचार्यादीनांमध्येगृहस्थस्याश्रयमाणत्वेनप्रायशोऽग्निहोत्रादिविधानात्गृहस्थोमन्वादिभिःश्रेष्ठउच्यतेतथायस्मा
द्ब्रह्मचारिवानप्रस्थयतीनसौभिक्षादानेनपोषयतितेनाप्यसौश्रेष्ठःयथोक्तम् यस्मात्त्रयोप्याश्रमिणोज्ञानेनान्नेनचान्वहमि
ति ८९ यथेत्यादि यथासर्वेनदीनदागंगाशोणाद्याःसमुद्रेअवस्थितिंलभंतेएवंगृहस्थादपरेसर्वाश्रमिणःतदधीनजीवनत्व

न गृहस्थसमीपे अवस्थितिं लभन्ते ९० चतुर्भिरित्यादि एतैर्ब्रह्मचार्यादिभिराश्रमिभिश्चतुर्भिरपि द्विजातिभिः वक्ष्यमाणो दशविध-
स्वरूपो धर्मः प्रयत्नतः सततमनुष्ठेयः तमेव स्वरूपतः संख्यादिभिश्च दर्शयति ९१ धृतिरित्यादि संतोषो धृतिः परेणापकारे कृते तस्य प्र
त्युपकाराचरणं क्षमा विकारहेतुविषयसन्निधानेऽप्यविक्रियत्वं मनसो दमः नंदम इति सनंदनवचनात् शीतातपादिद्वंद्वसहिष्णुता दम इति
गोविंदराजः अन्यायेन धनादिग्रहणं स्तेयं तदन्यदस्तेयं यथाशास्त्रं मृज्जलाभ्यां देहशोधनं शौचं विषयेभ्यश्चक्षुरादिवारणमिन्द्रियनि
ग्रहः शास्त्रादितत्त्वज्ञानं धीः आत्मज्ञानं विद्या यथार्थाभिधानं सत्यं क्रोधहेतौ सत्यपि क्रोधानुत्पत्तिरक्रोधः एतद्दशविधं धर्मस्वरूपम्
९२ दशलक्षणानीति ये विप्राः एतानि दशविधकर्मरूपाणि पठन्ति पठित्वा चात्मज्ञानसान्निध्येनानुतिष्ठन्ति ते च सज्ञानसमुत्कर्षात्परमां ग

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ९० चतुर्भि
रपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ९१ धृतिः क्षमा दमोऽस्तेयं
शौचमिन्द्रियनिग्रहः धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ९२ दशलक्षणानि धर्मस्य ये विप्राः स
मधीयते अधीत्य चानुवर्त्तन्ते ते यान्ति परमां गतिम् ९३ दशलक्षणकं धर्ममनुतिष्ठन् समाहितः वेदान्तं
विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ९४ संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् नियतो वेदमभ्यस्य
पुत्रैश्वर्ये सुखं वसेत् ९५ एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः संन्यासेनापहत्यैनः प्राप्नोति पर
मां गतिम् ९६

निर्मोक्षलक्षणां प्राप्नुवन्ति ९३ दशलक्षणकमिति उक्तं दशलक्षणकं धर्मं संयतमनाः सन्ननुतिष्ठन् उपनिष
दाद्यर्थं गृहस्थावस्थायां यथोक्ताध्ययनधर्मानुरूपं गुरुसुखादवगम्य परिशोधितदेवादिऋणत्रयः संन्यासमनुतिष्ठेत् ९४ संन्यस्येति सर्वा
णि गृहस्थानुष्ठेयान्यग्निहोत्रादिकर्माणि परित्यज्य अज्ञातजन्तुवधादिकर्मजनितपापानि च प्राणायामादिना नाशयन् नियतेन्द्रिय उपनिष
दो ग्रंथतोऽर्थतश्चाभ्यस्य पुत्रैश्वर्ये इति पुत्रगृहे पुत्रोपकल्पितभोजनाच्छादनत्वेन वृत्तिचिन्तारहितः सुखं वसेत् अयमेवासाधारणो ध
र्मः कुटीचरकस्योक्तः इदमेव वक्तुं वेदसंन्यासिनामिति पूर्वमुक्तम् ९५ एवमिति एवमुक्तप्रकारेण वर्तमानोऽग्निहोत्रादिगृहस्थकर्मा

णिपरित्यज्यात्मसाक्षात्कारस्वरूपस्वकार्यप्रधानः स्वर्गादावपिबंधहेतुतयानिस्पृहःप्रव्रज्ययापापानिविनाश्यब्रह्मसाक्षात्कारेणप
रमांगतिंमोक्षलक्षणंप्राप्नोति ९६ एषइति ऋषीन्संबोध्यउच्यतेएषयुष्माकंब्राह्मणस्यसंबंधीक्रियाकलापोधर्मस्तस्यैवब्रह्मचा-
रिगृहस्थवानप्रस्थादिभेदेनचतुर्विधःपरत्राक्षयफलउक्तः इदानींराजसंबंधिनंधर्मंशृणुतअत्रचश्लोकेब्राह्मणस्यचातुराश्रम्योप
देशात्ब्राह्मणःप्रव्रजेदितिपूर्वमभिधानात् ९७ इतिश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांषष्ठोऽध्यायः ६ ५॰
राजधर्मानिति धर्मशब्दोऽत्रदृष्टादृष्टार्थानुष्ठेयपरः षाड्गुण्यादेरपिवक्ष्यमाणत्वात्राजशब्दोपिनात्रक्षत्रियजातिवचनः किंत्व-
भिषिक्तजनपदपुरपालयितृपुरुषवचनः अतएवाहयथावृत्तोभवेन्नृपःयथावदाचारोनृपतिर्भवेत्तथातस्यानुष्ठेयानिकथयि

एषवोभिहितोधर्मोब्राह्मणस्यचतुर्विधः पुण्योऽक्षयफलःप्रेत्यराज्ञांधर्मंनिबोधत ९७ इति
मानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांषष्ठोऽध्यायः ६ ५ ५ ५ ५ ५
राजधर्मान्प्रवक्ष्यामियथावृत्तोभवेन्नृपः संभवश्चयथातस्यसिद्धिश्चपरमायथा १ ब्राह्मंप्राप्तेन
संस्कारंक्षत्रियेणयथाविधि सर्वस्यास्ययथान्यायंकर्त्तव्यपरिरक्षणम् २ अराजकेहिलोकेऽस्मि
न्सर्वतोविद्रुतेभयात् रक्षार्थमस्यसर्वस्यराजानमसृजत्प्रभुः ३

ष्यामियथायेनप्रकारेणवाराजानमसृजत्प्र
भुः इत्यादिनातस्योत्पत्तिः यथाचदृष्टादृष्टफलसंपत्तिः तदपिवक्ष्यामि १ ब्राह्ममित्यादि ब्रह्मवेदस्तत्प्राप्त्यर्थतयाउपनयनसं
यथाशास्त्रंप्राप्नुवता क्षत्रियेणास्यसर्वस्यस्वविषयावस्थितस्यशास्त्रानुसारेणनियमतोरक्षणंकर्त्तव्यं एतेनक्षत्रियएवनान्योराज्या
धिकारीतिदर्शितंअतएवशास्त्रार्थतत्वंक्षत्रियस्यजीवनार्थंतथाक्षत्रियस्यतुरक्षणंस्वकर्मस्वश्रेष्ठंचवक्ष्यतिब्राह्मणस्यस्वापदिजीवे
क्षत्रियधर्मेणेत्यभिधास्यतिवैश्यस्यापिक्षत्रियधर्मंशूद्रस्यचक्षत्रियवैश्यकर्मणीजीवनार्थमापदिजगादनारदः नकथंचनकुर्वीत
ब्राह्मणःकर्मवार्षलम् वृषलःकर्मचब्राह्मंपतनीयेहितेतयोः उत्कर्षंचापकर्षंचतयोःकर्मनविद्यते मध्यमेकर्मणीहित्वासर्वसाधार
णेहितं रक्षणंवेदधर्मार्थंतपःक्षत्रस्यरक्षणमिति सर्वतोधर्मषड्भागोराज्ञोभवतिरक्षतइतिचवक्ष्यमाणत्वात् रक्षितुर्बलिषड्भागग्रहण

त्द्दयर्थमपियोरक्षन्बलिमादत्तइतिनरकपातंवक्ष्यति २ अराजकेति यस्माद्राजकेजगतिबलवद्भ्यात्सर्वतःप्रचलितेसर्वस्यास्य
चराचरस्यरक्षायैराजानंसृष्टवान्तस्मात्तेनरक्षणंकार्यकथंसृष्टवानित्याह ३ इंद्रानिलयमार्काणामित्यादि इंद्रवातयमसूर्याग्नि
वरुणचंद्रकुबेराणांमात्राअंशान्सारभूतान्आकृष्यराजानमसृजत् ४ यस्मादिति यस्मादिंद्रादीनांदेवश्रेष्ठानामंशेभ्योनृपतिः
सृष्टस्तस्मादेषसर्वप्राणिनोवीर्येणातिशेते ५ तपतीत्यादि अयंचराजास्वतेजसासूर्यइवपश्यतांचक्षूंषिमनांसिचसंतापयतिन
चैनंराजानंपृथिव्यांकश्चिदप्यभिमुखेनद्रष्टुंक्षमते ६ सइत्यादि एवंचाग्न्यादीनांपूर्वोक्तांशप्रभवत्वात्तत्कर्मकारित्वाच्चपर्याप्तमुक्तं
तेजस्वीत्यादिनानवमाध्यायेवक्ष्यमाणत्वात् सराजाशक्त्यतिशयेनाग्न्यादिरूपोभवतिततश्च ७ बालइत्यादि मनुष्यइतिबुद्ध्या

इंद्रानिलयमार्काणामग्नेश्चवरुणस्यच चंद्रवित्तेशयोश्चैवमात्रानिर्हृत्यशाश्वतीः ४ यस्मादे
षांसुरेंद्राणांमात्राभ्योनिर्मितोनृपः तस्मादभिभवत्येषसर्वभूतानितेजसा ५ तपत्यादित्यवच्चै
षचक्षूंषिचमनांसिच नचैनंभुविशक्नोतिकश्चिदप्यभिवीक्षितुम् ६ सोऽग्निर्भवतिवायुश्चसो
ऽर्कःसोमःसधर्मराट् सकुबेरःसवरुणःसमहेंद्रःप्रभावतः ७ बालोपिनावमंतव्योमनुष्यइ-
तिभूमिपः महतीदेवताह्येषानररूपेणतिष्ठति ८ एकमेवदहत्यग्निर्नरंदुरुपसर्पिणम् कु
लंदहतिराजाग्निःसपशुद्रव्यसंचयम् ९ कार्यंसोवेक्ष्यशक्तिंचदेशकालौचतत्त्वतः कुरुतेध-
र्मसिद्ध्यर्थंविश्वरूपंपुनःपुनः १०

बालोपिराजानावमंतव्यःयस्मान्महतीयंकाचिद्देवतामानुषरूपेणावतिष्ठतेएते
नदेवतावज्ञायांअधर्मादयोऽदृष्टदोषाउक्ताःसंप्रतिदृष्टदोषमाह ८ एकेत्यादि योऽग्नेरतिसमीपंअनभिहितःसन्उपसर्प-
तिसदुरुपसर्पीतमेकमेवाग्निर्दहतिनतत्पुत्रादिकंक्रुद्धोराजाग्नि पुत्रदारभ्रात्रादिरूपंकुलमेवगवाश्वादिपशुकनकवर्णादिधन-
संचयसहितंसापराधन्निहंति ९ कार्यमित्यादि सराजाप्रयोजनापेक्षयास्वशक्तिंदेशकालौचावेक्ष्यकार्यसिद्ध्यर्थंतत्तद्धिश्व-
रूपंबहूनिरूपाणिकरोतिजातिविवक्षयाबहुष्वेकवचनंअशक्तिदशायांक्षमतेशक्तिंप्राप्योन्मूलयतिएवमेकस्मिन्नपिदेशेकाले

नप्रयोजनानुरोधेनशत्रुर्वामित्रोवाउदासीनोवाभवतिततोराजवल्लभोहमितिबुद्ध्यानावज्ञेयः १० यस्येत्यादि पद्माशब्दः श्री पर्यायोपिगहस्तविवक्षयाऽत्रप्रयुक्तः यस्यप्रसादान्महतीश्रीर्भवतिअतः श्रीकामेनसेव्यः यस्यशात्रवः संतितानपिसंतोषितोहंति तेनन्नशत्रुवधकामेनाप्याराधनीयः यस्मैक्रुध्यतितस्यमृत्युंकरोतितस्माज्जीवनार्थिनानक्रोधनीयः यस्मात्सर्वेषांसूर्याग्निसो-मादीनांतेजोबिभर्त्ति ११ तमित्यादि तंराजानमज्ञतयायोद्वेष्टितस्याप्रीतिमुत्पादयतिसनिश्चितंक्रोधान्नश्यतियस्मात्तस्यविना शायशीघ्रंराजामनोनियुंक्ते १२ तस्मादित्यादि यतःसर्वतेजोमयोनृपतिस्तस्मादपेक्षितेषुयमिष्टंशास्त्रानुष्ठेयंशास्त्राविरुद्धं निश्चित्यव्यवस्थापयतिअनपेक्षितेषुचानिष्टंनियमंनातिक्रामेत् १३ तस्यार्थेसर्वेति तस्यराज्ञःप्रयोजनसिद्ध्यैसर्वप्राणिनां रक्षितारंधर्मस्वरूपंपुत्रंब्रह्मणोयत्केवलंतेजस्तेननिर्मितंनपांचभौतिकंदेहंब्रह्मापूर्वंसृष्टवान् १४ तस्येत्यादि तस्यदंडस्य

यस्यप्रसादेपद्माश्रीर्विजयश्चपराक्रमे मृत्युश्चवसतिक्रोधेसर्वतेजोमयोहिसः ११ तंयस्तुद्वेष्टिसं मोहात्सविनश्यत्यसंशयम् तस्यह्याशुविनाशायराजाप्रकुरुतेमनः १२ तस्माद्धर्मंयमिष्टेषुसव्यव-स्येन्नराधिपः अनिष्टंचाप्यनिष्टेषुतंधर्मंनविचालयेत् १३ तस्यार्थेसर्वभूतानांगोप्तारंधर्ममात्मज म् ब्रह्मतेजोमयंदंडमसृजत्पूर्वमीश्वरः १४ तस्यसर्वाणिभूतानिस्थावराणिचराणिच भयाद्भो-गायकल्पंतेस्वधर्मान्नचलंतिच १५ तंदेशकालौशक्तिंचविद्यांचावेक्ष्यतत्त्वतः यथार्हतःसंप्रणये न्नरेष्वन्यायवर्त्तिषु १६ सराजापुरुषोदंडःसनेताशासिताचसः चतुर्णामाश्रमाणांचधर्मस्यप्रतिभूः स्मृतः १७

भयेनचराचराःसर्वेप्राणिनःभोगंकर्त्तुंसमर्थाभवंति अन्यथाबलवतादुर्बलस्यधनदारादिग्रहणेतस्यापितदपे-क्ष्यबलिनेतिकस्यापिभागोनसिध्येत् वृक्षादीनांस्थावरादीनांछेदनेभोगासिद्धिः तथासतामपिनित्यनैमित्तिकस्वधर्मानुष्ठाना करणेयाम्ययातनाभयाच्चेति १५ तमित्यादि तंदंडंदेशकालौदंडस्यचशक्तिंविद्यादिकंयस्मिन्नपराधेयोदंडोर्हतिइत्यादिकंशा स्त्रानुसारेणतत्त्वतोनिरूप्यापराधिषुप्रवर्त्तयेत् १६ सइत्यादि सएवदंडोवस्तुतोराजातस्मिन्सतिराजशक्तियोगात्सएवपुरु

स्ततोन्येस्त्रियइवतद्विधेयत्वात् सएवनेतातेन कार्याणिनीयंतेशास्यंतेसएवशासिताउदाहृतत्वात् सएवचतुर्णामप्याश्रमाणांयोधर्म

स्तस्यसंपादनेप्रतिभूरिवप्रतिभूर्मुनिभिःस्मृतः १७ दंडःशास्तीति यस्माद्दंडःसर्वाःप्रजाआज्ञांकरोतितस्मात्साधूक्तंशासितेति

ज्ञेयंयस्मात् सएवप्रजारक्षतिततोयुक्तंराजेतिनिद्राणेष्वपिरक्षिषुदंडएवजागर्तितद्भयेनैवचौरादीनामप्रवृत्तेःदंडमेवधर्महेतुत्वात्

धर्मंजानंतिकारणेकार्योपचारःऐहिकपारत्रिकदंडभयादेवधर्मानुष्ठानात् १८ समीक्ष्येत्यादि सदंडःशास्त्रतःसम्यङ्निरूप्यापराधा

नुरूपेणदेहधनादिषुधृतःसर्वाःप्रजाःसानुरागाःकरोतिअविचार्यतुलोभादिनाप्रयुक्तःसर्वाणिबाह्यार्थपुत्रादीनिनाशयतिसर्वत-

इतिद्वितीयार्थेतसिः १९ यदीत्यादि यदिराजाऽनलसोभूत्वादंडप्रणयनंनकुर्यात्तदाशूलेकृत्वामत्स्यानिवबलवंतोदुर्बलान्अप

क्ष्यन् लृङन्तस्यपचिधातोरूपमिदंबलिनोऽल्पबलानांहिंसामकरिष्यन्इत्यर्थःशूलेमत्स्यानिवापक्ष्यन्इत्येषमेधातिथिगोविंदरा

दंडःशास्तिप्रजाःसर्वादंडएवाभिरक्षति दंडःसुप्तेषुजागर्तिदंडंधर्मंविदुर्बुधाः १८ समीक्ष्यसधृतः

सम्यक्सर्वारंजयतिप्रजाः असमीक्ष्यप्रणीतस्तुविनाशयतिसर्वतः १९ यदिनप्रणयेद्राजादंडंद-

ण्ड्येष्वतंद्रितः शूलेमत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः २० अद्यात्काकःपुरोडाशंश्वाचलिह्या

द्धविस्तथा स्वाम्यंचनस्यात्कस्मिंश्चित्प्रवर्त्ततांधरोत्तरम् २१ सर्वोदंडजितोलोकोदुर्लभोहिशुचिर्न

रः दंडस्यहिभयात्सर्वंजगद्भोगायकल्पते २२

जलिखितःपाठःजलेमत्स्यानिवाहिंस्युरितिचपाठांतरंअत्रबलवंतो

दुर्बलान्हिंस्युरितिमत्स्यन्यायएवस्यादित्युक्तम् २० अद्यादित्यादि यदिराजादंडंनाचरिष्यत्तदायज्ञेषुसर्वथाहविरनर्हःका

कःपुरोडाशमखादिष्यत्तथाकुक्कुरःपायसादिहविरलेक्ष्यन्नकस्यचित्कुत्रचित्स्वाम्यमभविष्यत्ततोबलिनातद्गृहणात्ब्रा

ह्मणादिवर्णानांचप्रध्येपदवरंशूद्रादितदेवोत्तरंप्रधानंप्रावर्तिष्यत २१ सर्वेति सर्वोयंलोकःदंडेनैवनियमितःसन्मार्गेऽवति

ष्ठतेस्वभावविशुद्धोहिमानुषःकष्टेनलभ्यतेतथासर्वमिदंजगत्दंडस्यैवभयादावश्यकभोजनादिरूपेपिभोगेसमर्थंभवति २२

देवेति उक्तमपिदंडस्यभोगसंपादकत्वंदार्ढ्यार्थंपुनरुच्यतेइंद्राग्निसूर्यवाय्वादयोदेवाःतथादानवगंधर्वराक्षसपक्षिसर्पाअपिज

गदीश्वरपरमार्थभयपीडिताएवचर्षदानाद्युपकारायप्रवर्त्तंते तथाचश्रुतिः भयादस्याग्निस्तपति भयात्तपतिसूर्यः भयादिंद्रश्चवा
युश्चमृत्युर्धावतिपंचमइति २२ दुष्येयुरिति दंडस्यानाचरणात् अनुचितेनवाप्रवर्त्तनात् सर्वेब्राह्मणादिवर्णाइतरेतरस्त्रीगम
नेनसंकीर्येरन् सर्वशास्त्रीयनियमाश्चतुर्वर्गफलाउत्सीदेयुः चौर्यसाहसादिनाचपरस्यापकारात् सर्वलोकसंक्षोभश्चजायेत २४ य-
त्रेति यत्रदेशेशास्त्रप्रमाणावगतः श्यामवर्णः लोहितवर्णअधिष्ठातृदेवताकोदंडोविचरतितत्रप्रजाव्याकुलानभवंतिदंडप्रणेता
यदिविषयानुरूपंसम्यक्जानाति २५ तस्येत्यादि तस्यदंडस्यप्रवर्त्तयितारं अभिषेकादिगुणयुक्तंनृपतिमवितथवादिनंसमीक्ष्य
कारिणंतत्तत्तत्त्वविचारोचितंप्रज्ञाशालिनंधर्मार्थकामानांज्ञातारंमन्वादयोप्याहुः २६ तमिति तंदंडंराजासम्यक्प्रवर्त्तयन्धर्मार्थक

देवदानवगंधर्वारक्षांसिपतगोरगाः तेपिभोगायकल्पंतेदंडेनैवनिपीडिताः २३ दुष्येयुःसर्ववर्णाश्च
भिद्येरन्सर्वसेतवः सर्वलोकप्रकोपश्चभवेद्दंडस्यविभ्रमात् २४ यत्रश्यामोलोहिताक्षोदंडश्च
रतिपापहा प्रजास्तत्रनमुह्यंतिनेताचेत्साधुपश्यति २५ तस्याहुःसंप्रणेतारंराजानंसत्यवादिनम्
समीक्ष्यकारिणंप्राज्ञंधर्मकामार्थकोविदम् २६ तंराजाप्रणयन्सम्यक्त्रिवर्गेणाभिवर्द्धते कामा
त्माविषमःक्षुद्रोदंडेनैवनिहन्यते २७ दंडोहिसुमहत्तेजोदुर्धरश्चाकृतात्मभिः धर्माद्विचलितंह
तिनृपमेवसबांधवम् २८ ततोदुर्गंचराष्ट्रंचलोकंचसचराचरम् अंतरिक्षगतांश्चैवमुनीन्देवांश्च
पीडयेत् २९ सोऽसहायेनमूढेनलुब्धेनाकृतबुद्धिना नशक्योन्यायतोनेतुंसक्तेनविषयेषुच ३०

तिपुनर्विषयाभिलाषीविषमःकोपनःक्षुद्रःच्छलान्वेषीनृपःसप्रकृतेनैवदंडेनामात्यादिनाकोपादधर्माद्वाविनाश्यते २७ दंडइति
यतोदंडःप्रकृष्टतेजःस्वरूपःसशास्त्रैरसंस्कृतात्मभिःदुःखेनध्रियतेअतोराजधर्मरहितंनृपमेवपुत्रबंधुसहितंनाशयति २८ ततइ
ति दोषाधनपेक्षयायोदंडःक्रियतेसबंधुनृपनाशानंतरंधन्व्यादिदुर्गंराष्ट्रंदेशंपृथिवीलोकंजंगमस्थावरसहितंहविःप्रदानजीवना
देवाइतिश्रुत्याहविःप्रदानाभावेअंतरिक्षगतान्ऋषीन्देवांश्चपीडयेदिति २९ सइत्यादि सदंडोमंत्रिसेनापतिपुरोहितादिसहायर-

मैर्ग्विगच्छ

हितेनमूर्खेणलोभवताशास्त्रासंस्कृतबुद्धिपरेणनृपतिनाशास्त्रतोनप्रणेतुंशक्यते ३० शुचिनेति अथादिशौचयुक्तेनसत्य
प्रतिज्ञेनयथाशास्त्रव्यवहारिणाशोभनसहायेनतत्त्वज्ञेनकर्तुंशक्यतेइतिपूर्वोक्तदोषप्रतिपक्षेगुणाअनेनश्लोकेनोक्ताः ३१ स्व
राष्ट्रइति आत्मदेशेयथाशास्त्रव्यवहारीस्यात् शत्रुविषयेषुतीक्ष्णदंडोभवेन्निसर्गस्नेहविषयेषुमित्रेष्वकुटिलःस्यान्नकार्यमित्रे
षु ब्राह्मणेषुचकृताल्पापराधेषुचक्षमावान्भवेत् ३२ एवमित्यादि शिलोंछेनेतिक्षीणकोषत्वंविवक्षितंक्षीणकोषस्यापिनृपते
रुक्ताचारवतोजलेतैलबिंदुरिवकीर्त्तिर्लोकेविस्तारयति३३ अतइति उक्ताचाराद्विपरीताचारवतोनृपतेरजितेंद्रियस्यजलेघृतबिंदु
रिवकीर्त्ति.संकोचयति ३४ स्वेस्वेइत्यादि क्रमेणस्वधर्मानुष्ठातॄणांब्राह्मणादिवर्णानांब्रह्मचार्याद्याश्रमाणांचविश्वसृजाराजार

शुचिनासत्यसंधेनयथाशास्त्रानुसारिणा प्रणेतुंशक्यतेदंडःसुसहायेनधीमता ३१ स्वराष्ट्रे
न्यायवृत्तःस्याद्भृशदंडश्चशत्रुषु सुहृत्स्वजिह्मःस्निग्धेषुब्राह्मणेषुक्षमान्वितः ३२ एवंवृत्त-
स्यनृपतेःशिलोंछेनापिजीवतः विस्तीर्यतेयशोलोकेतैलबिंदुरिवांभसि ३३ अतस्तुविपरीत
स्यनृपतेरजितात्मनः संक्षिप्यतेयशोलोकेघृतबिंदुरिवांभसि ३४ स्वेस्वेधर्मेनिविष्टानांसर्वेषा
मनुपूर्वशः वर्णानामाश्रमाणांचराजासृष्टोभिरक्षिता ३५ तेनयद्यत्सभृत्येनकर्तव्यंरक्षताप्र
जाः तत्तद्वोऽहंप्रवक्ष्यामियथावदनुपूर्वशः ३६ ब्राह्मणान्पर्युपासीतप्रातरुत्थायपार्थिवः त्रै
विद्यवृद्धान्विदुषस्तिष्ठेत्तेषांचशासने ३७

क्षितासृष्टः तस्मात्तेषांरक्षणमकुर्वतोराज्ञःप्रत्यवाय.स्वधर्मविर-
हिणांत्वरक्षणेपिनप्रत्यवायइत्यस्यतात्पर्यार्थः ३५ तेनेत्यादि वक्ष्यमाणावतारार्थोयंश्लोकः तेनराज्ञाप्रजारक्षणंकुर्वतासा-
मान्येनयद्यत्कर्त्तव्यंतत्तत्सर्वंयुष्माकमभिधास्यामि ३६ ब्राह्मणानिति प्रत्यहंप्रातरुत्थायब्राह्मणानृग्यजुःसामाख्यविद्या
त्रयग्रंथाभिज्ञान्विदुषइतिनातिशास्त्राभिज्ञान्सेवेततदाज्ञांकुर्यात् ३७ वृद्धानित्यादि तांश्चब्राह्मणान्वयस्तपस्यादिवृद्धा-
न् अर्थतोग्रंथतश्चवेदज्ञान्बहिरंतश्चार्थदानादिनाशुचीन्नित्यंसेवेतयस्माद्वृद्धसेवीसततंहिंस्रैराक्षसैरपिपूज्यतेतैरपितस्य

हितंक्रियतेस्मनरांमनुष्यैः ३८ तेभ्यइत्यादि सहजप्रज्ञयाअर्थशास्त्रादिज्ञानेनचविनीतोप्यतिशयार्थंतेभ्योविनयमभ्यसेत्
यस्माद्विनीतात्माराजानकदाचिन्नश्यति ३९ बहवइत्यादि करितुरगकोषादिपरिच्छदयुक्ता अपिराजानः विनयरहितानष्टाःब
हवश्चवनस्थानिपरिच्छदाअपिविनयेनराज्यंप्राप्नुवन्उभयत्रैवश्लोकद्वयेनदृष्टांतमाह ४० वेनइत्यादि वेनोनहुषश्चराजा
यवनस्यचपुत्रःसुदासोनामासुमुखोनिमिश्चाविनयादनश्यन् ४१ पृथुरिति पृथुर्मनुश्चविनयाद्राज्यंप्रापतुःकुबेरश्चविनया
द्धनाधिपत्यंलेभेगाधिपुत्रोविश्वामित्रश्चक्षत्रियःसन्तेनैवदेहेनब्राह्मण्यंप्राप्तवान् राज्यलाभावसरेब्राह्मण्यप्राप्तिरप्रसक्तता
पिविनयोत्कर्षार्थमुक्ताईदृशोयंशास्त्रानुष्ठाननिषिद्धवर्जनरूपोविनयोयदनेनक्षत्रियोपिदुर्लभंब्राह्मण्यंलभते ४२ त्रैविद्येभ्य

वृद्धांश्चनित्यंसेवेतविप्रान्वेदविदःशुचीन् वृद्धसेवीहिसततंरक्षोभिरपिपूज्यते ३८ तेभ्योऽ
धिगच्छेद्विनयंविनीतात्मापिनित्यशः विनीतात्माहिनृपतिर्नविनश्यतिकर्हिचित् ३९ बहवोविन
यान्नष्टाराजानःसपरिच्छदाः वनस्थाअपिराज्यानिविनयात्प्रतिपेदिरे ४० वेनोविनष्टोऽविनयान्न
हुषश्चैवपार्थिवः सुदासोयवनश्चैवसुमुखोनिमिरेवच ४१ पृथुस्तुविनयाद्राज्यंप्राप्तवान्मनुरेवच
कुबेरश्चधनैश्वर्यंब्राह्मण्यंचैवगाधिजः ४२ त्रैविद्येभ्यस्त्रयींविद्यांदंडनीतिंचशाश्वतीम् आ
न्वीक्षिकींचात्मविद्यांवार्त्तारंभांश्चलोकतः ४३ इंद्रियाणांजयेयोगंसमातिष्ठेद्दिवानिशम् जितेंद्रि
योहिशक्नोतिवशेस्थापयितुंप्रजाः ४४

इति त्रिवेदीरूपविद्याविज्ञःत्रिवेदीमर्थतोग्रंथतश्चाभ्यासेनब्रह्मचर्यदशा
यामेववेदग्रहणात्समाप्तस्यचराज्याधिकारात् अभ्यासार्थोयमुपदेशः दंडनीतिंचार्थशास्त्ररूपांअनुयोगक्षेमोपदेशिनींपारं
पर्यागतत्वेननित्यांतद्विद्भ्योऽधिगच्छेत्तथाआन्वीक्षिकींतर्कविद्यांभूतप्रवृत्तिप्रयुक्त्युपयोगिनींब्रह्मविद्यांचाभ्युदयव्यसनयो
र्हर्षविषादप्रशमनहेतुंशिक्षेत् कृषिवाणिज्यपशुपालनादिवार्त्तातदारंभाश्चनोपायार्थान् तदभिज्ञकर्षकादिभ्यः शिक्षेत् ४३
इंद्रियाणामित्यादि चक्षुरादीनांइंद्रियाणांविषयासक्तिवारणेसर्वकालंप्रयत्नंकुर्यात् यस्माज्जितेंद्रियः प्रजानियंतुंशक्नोतिन

तुविषयोपभोगव्यग्रः ब्रह्मचारिधर्मेषुसर्वपुरुषार्थउपादेयतया अभिहितोपींद्रियजयोराजधर्मेषुमुख्यत्वज्ञानार्थमनंतरवक्ष्यमा-
णव्यसननिवृत्तिहेतुत्वाच्चपुनरुक्तः ४४ दशेत्यादि दशकामसंभवानिअष्टौक्रोधजानिवक्ष्यमाणव्यसनानियत्नतस्त्यजेत् दुरंतानि
दुःखावसानानि आदौसुखयंति अंतेदुःखानिकुर्वंतियद्वा दुर्लभोअंतोयेषांतानिदुरंतानिनहिव्यसनिनस्ततोनिवर्त्तयितुंशक्यंतेव
र्जनप्रयोजनमाह ४५ कामजेष्विति यस्मात्कामजनितेषुव्यसनेषुप्रसक्तोराजाधर्मार्थाभ्यांहीयतेक्रोधजेषुप्रसक्तः प्रकृतिकोपाद्देह
नाशंप्राप्नोतितानिव्यसनानिनामतोदर्शयति ४६ मृगयेत्यादि आखेटकाख्योमृगवधोमृगयाअक्षादिक्रीडासकलकार्यविघातिनी
दिवानिद्रापरदोषकथनंस्त्रीसंभोगोमद्यपानजनितोमदः तौर्य्यत्रिकंनृत्यगीतवादित्राणिवृथाभ्रमणंएषदशपरिणामेदशकःसुखे

दशकामसमुत्थानितथाष्टौक्रोधजानिच व्यसनानिदुरंतानिप्रयत्नेनविवर्ज्जयेत् ४५ कामजेषु
प्रसक्तोहिव्यसनेषुमहीपतिः वियुज्यतेऽर्थधर्माभ्यांक्रोधजेष्वात्मनैवतु ४६ मृगयाक्षादिवा
स्वप्नःपरिवादःस्त्रियोमदः तौर्य्यत्रिकंवृथाट्याचकामजोदशकोगणः ४७ पैशून्यंसाहसंद्रो
हईर्ष्यासूयार्थदूषणम् वाग्दंडजंचपारुष्यंक्रोधजोपिगणोष्टकः ४८ द्वयोरप्येतयोर्मूलंयंसर्वे
कवयोविदुः तंयत्नेनजयेल्लोभंतज्जावेतावुभौगणौ ४९ पानमक्षाःस्त्रियश्चैवमृगयाचय-
थाक्रमम् एतत्कष्टतमंविद्याच्चतुष्ककामजेगणे ५०

न्त्वाप्रभवोगणः ४७ पैशून्यमिति पैशून्यमविज्ञातदो
षाविष्करणंसाहसंसाधोर्बंधनादिनिग्रहः द्रोहश्छद्मवधः ईर्ष्याऽन्यगुणासहिष्णुतापरगुणेषुदोषाविष्करणमसूया अर्थदूष-
णमर्थानामपहरणंदेयानामदानंचवाक्पारुष्यमाक्रोशादिदंडपारुष्यंताडनादिएषोष्टपरिमाणोव्यसनगणःक्रोधाद्भवति ४८
द्वयोरिति एतयोर्द्वयोरपिकामक्रोधजव्यसनसंघयोः कारणंस्मृतिकाराजानंतितंयत्नतोलोभंत्यजेत् यस्मादेतद्गुणद्वयंलोभाज्जा
यते क्वचिद्धनलोभतः क्वचित्प्रकारांतरलोभेनप्रवृत्तेः ४९ पानमिति मद्यपानमक्षैःक्रीडास्त्रीसंभोगोमृगयाचेतिक्रमपठितमेत
च्चतुष्कंकामजव्यसनमध्येबहुदोषत्वादतिशयेनदुःखहेतुंजानीयात् ५० ॥ ॥ ॥ ॥

दंडस्येत्यादि दंडपातनंवाक्पारुष्यंअर्थदूषणंचेतिक्रोधजेपिव्यसनगणेदोषबहुत्वादनिशायितदुःखसाधनंमन्येत् ५१ स-
प्तकेति अस्यपानादेः कामक्रोधसंभवस्यसप्तपरिमाणस्यव्यसनवर्गस्यसर्वस्मिन्नेवराजमंडलेप्रायेणावस्थितस्यपूर्वपूर्वव्यसनमु
त्तरोत्तरान्कष्टतरंप्रशस्तात्माजानीयात्तथाहिद्यूतात्पानंकष्टतरंमद्यपानेनमत्तस्यसंज्ञाप्रणाशात्यथेष्टचेष्टयादेहधनादिविरोधइ
त्यादयोदोषाः द्यूतेतुपाक्षिकोधनावाप्तिरप्यस्तिस्त्रीव्यसनात्द्यूतंदुष्टंद्यूतेहिवैरोद्भवादयोनीतिशास्त्रोक्तादोषाः मूत्रपुरीषवेग
धारणाच्चव्याधुत्पत्तिःस्त्रीव्यसनेपुनः अपत्योत्पत्त्यादिगुणयोगोप्यस्तिमृगयास्त्रीव्यसनयोःस्त्रीव्यसनंदुष्टंतत्रादर्शनंकार्याणांकाला
तिपातेनधर्मलोपादयोदोषाः मृगयायांतुव्यायामेनारोग्यादिगुणयोगोप्यस्तीत्येवंकामजत्वतुष्कस्यपूर्वगुणदोषंक्रोधजेष्वपित्रिषु
वाक्पारुष्याद्दंडपारुष्यंदुष्टंअंगच्छेदादेरशक्यसमाधानत्वात् वाक्पारुष्येतुकोपानलोदानमानपानीयसेकैःनशाक्यःशमयि
अर्थदूषणाद्वाक्पारुष्यंदोषवन्मर्मपीडाकरंवाक्प्रहारस्यदुश्चिकित्स्यत्वात् तदुक्तन्नसंरोहयतिवाक्क्षतंअर्थदूषणंतुप्रचुरतरा

दंडस्यपातनंचैववाक्पारुष्यार्थदूषणे क्रोधजेपिगणेविद्यात्कष्टमेतत्त्रिकंसदा ५१ सप्तकस्या
स्यवर्गस्यसर्वत्रैवानुषंगिणः पूर्वंपूर्वंगुरुतरंविद्याद्व्यसनमात्मवान् ५२ व्यसनस्यचमृत्योश्च
व्यसनंकष्टमुच्यते व्यसन्यधोधोव्रजतिस्वर्यात्यव्यसनीमृतः ५३ मौलान्शास्त्रविदःशूरान्-
लब्धलक्षान्कुलोद्गतान् सचिवान्सप्तचाष्टौवाप्रकुर्वीतपरीक्षितान् ५४

त्रिकस्यापिपूर्वपूर्वंदुष्टतरंयत्नतस्त्यजेत् ५२ व्यसनेति यद्यपिमृत्युव्यसनेद्वेअपीहलोकेसंज्ञाप्रणाशादिदुःखहेतुतयाशास्त्रा
दानाच्छक्यसमाधानंएवंक्रोधज-
नुष्ठानविरोधितयाचतुल्येतथापिव्यसनंकष्टतरंपरत्रापिनरकपातहेतुत्वात्तदाह्व्यसन्यधोधोव्रजतिबहून्नरकान्गच्छतिइत्य
र्थः अव्यसनीतुमृतःशास्त्रानुष्ठानप्रतिपक्षव्यसनाभावात्स्वर्गंगच्छतिएतेनातिसक्तिर्व्यसनेषुनिषिध्यतेनतुतस्यसेवनमपि
५३ मौलानिति मौलानपीहपितामहक्रमेणसेवकान्तेषामपिद्रोहादिनाव्यभिचारात्दृष्टादृष्टार्थशास्त्रज्ञान्विक्रांतान्ल-
ब्धलक्षान्लक्षादप्रच्युतशरशल्यादीन्आयुधविदइत्यर्थः विशुद्धकुलभवान्देवतास्पर्शादिनियतान्अमात्यान्ससा-

र्थेवामंत्रादौकुर्वीतयस्मात् ५४ अपीत्यादि सुकरेणापियत्क्रियते कर्मतदप्येकेनदुष्करं भवतिविशेषतोयन्महा फलंतत्कथमसहा
येनक्रियते ५५ तैरित्यादि तैःसचिवैःसहसामान्यंमंत्रेष्वगोपनीयंसंधिविग्रहादितान्निरूपयेत्तथातिष्ठत्यनेनेतिस्थानंदंडकोषपुर
राष्ट्रात्मकंचतुर्विधंचिंतयेत् दंड्यतेनेनेतिदंडोहस्त्यश्वरथपादातयः तेषांपोषणरक्षणादितच्चिंत्यकोशोर्थनिचयः तस्यायव्ययादि
पुरस्यरक्षणादिराष्ट्रंदेशः तद्वासिमनुष्यपश्वादिधारणक्षमत्वादिचिंतयेत्तथासमुदयंसमृध्यंते अस्मादर्थाइतिसमुदयोधान्यहि
रण्याद्युत्पत्तिस्थानंतन्निरूपयेत्तथागुप्तिंरक्षामात्मगतांराष्ट्रगतांचस्वपरीक्षितमन्नाद्यमद्यात्परीक्षिताः स्त्रियश्चैवमित्यादिनात्म
रक्षणंराष्ट्रस्यसंग्रहेनित्यमित्यादिनाराष्ट्ररक्षांचवक्ष्यतिलब्धस्यचधनस्यप्रशमनानिसत्पात्रेप्रतिपादनादीनिचिंतयेत्तथाचवक्ष्य
ति जित्वासंपूजयेद्देवानित्यादि ५६ तेषामिति तेषांसचिवानांरहसिनिभृतिपक्षतयाहृदयगतभावज्ञानसंभवात्प्रत्येकमभि

अपियत्सुकरंकर्मतदप्येकेनदुष्करम् विशेषतोऽसहायेनकिंतुराज्यंमहोदयम् ५५ तैःसार्द्धंचिंत
येन्नित्यंसामान्यंसंधिविग्रहम् स्थानंसमुदयंगुप्तिंलब्धप्रशमनानिच ५६ तेषांस्वंस्वमभिप्रायमु
पलभ्यपृथक्पृथक् समस्तानांचकार्येषुविदध्याद्धितमात्मनः ५७ सर्वेषांतुविशिष्टेनब्राह्मणेनविप
श्चिता मंत्रयेत्परमंमंत्रंराजाषाड्गुण्यसंयुतम् ५८ नित्यंतस्मिन्समाश्वस्तःसर्वकार्याणिनिःक्षिपेत्
तेनसार्द्धंविनिश्चित्यततःकर्मसमारभेत् ५९ अन्यानपिप्रकुर्वीतशुचीन्प्राज्ञानवस्थितान् सम्यगर्थ
समाहर्तॄनमात्यान्सुपरीक्षितान् ६०

प्रायंसमस्तानामपियुगपदभिप्रायंबुध्वाकार्येयदात्मनोहितंतत्कुर्यात् ५७
सर्वेषामिति एषामेवसर्वेषांसचिवानांमध्यादन्यतमेनधार्मिकत्वादिनाविशिष्टेनविदुषाब्राह्मणेनसहसंधिविग्रहादिवक्ष्यमाणगु
णषट्कोपेतंप्रकृष्टंमंत्रंन्निरूपयेत् ५८ नित्यमिति सर्वदातस्मिन्ब्राह्मणेसंजातविश्वासोमूलायानिकुर्यात्तानिसर्वकार्याणिसम
र्पयेत् तेनसहनिश्चित्यसर्वकर्मारभेत् ५९ अनित्यादि अन्यानपिअर्थदानादिनासुचीन्प्रज्ञाशालिनः सम्यग्धनार्जनशीलान्धर्मा-
दिनापरीक्षितान्कर्मसचिवान्कुर्यात् ६० निर्वर्त्ततेति अस्यराज्ञोयत्संख्याकैर्मनुष्यैः कर्मजातंसंपद्यतेतत्संख्याकान्मनुष्याना-

लस्यशूरान्क्रियासुसोत्साहान्तत्कर्मज्ञान्तत्रकुर्यात् ६१ तेषामिति तेषांसचिवानांमध्येविक्रांतांश्चतुरान्कुलांकुशनियमिता
न्सुशीनान्अर्थनिःस्पृहान्धनोत्पत्तिस्थानेनियुंजीत अस्यैवोदाहरणंआकरकर्मांतइतिआकरेषुसुवर्णाद्युत्पत्तिस्थानेषुकर्मांतेषुच
इक्षुधान्यादिसंग्रहस्थानेषु अंतर्निवेशनेभोजनशयनगृहांतःपुरादौभीरूंनियुंजीतशूराहितत्रराजानंप्रायेणैकाकिनंस्त्रीसूतंवाक
दाचित्शत्रूपजापदूषिताहन्युरपि ६२ दूतमिति दूतंचदृष्टादृष्टार्थशास्त्रज्ञंइंगितज्ञमभिप्रायसूचकंवचनस्वरादिआकारोदेहध-
र्मादिस्रुत्वप्रसादवैवर्ण्यादिरूपःप्रीत्यप्रीतिसूचकःचेष्टाकरास्फालनादिक्रियाकोपादिसूचिकातदीयतत्त्वज्ञंअर्थदानस्त्रीव्यसनाद्य
भावात्मकंशौचयुक्तंचतुरंकुलीनंकुर्य्यात्यस्मात् ६३ अनुरक्तइति जनेषुअनुरागवान्तेनप्रतिराजादेरपिअद्वेषविषयः अर्थस्त्री

निर्वर्त्येतास्ययावद्भिरितिकर्त्तव्यतानृभिः तावतोतंद्रितान्दक्षान्प्रकुर्वीतविचक्षणान् ६१ तेषाम
र्थेनियुंजीतशूरान्दक्षान्कुलोद्गतान् शुचीनाकरकर्मांतेभीरूनंतर्निवेशने ६२ दूतंचैवप्रकुर्वीत
सर्वशास्त्रविशारदम् इंगिताकारचेष्टज्ञंशुचिंदक्षंकुलोद्गतम् ६३ अनुरक्तःशुचिर्दक्षःस्मृतिमा-
न्देशकालवित् वपुष्मान्वीतभीर्वाग्मीदूतोराज्ञःप्रशस्यते ६४ अमात्येदंडआयत्तोदंडेवैनयि
कीक्रिया नृपतौकोशराष्ट्रेचदूतेसंधिविपर्य्ययौ ६५ दूतएवहिसंधत्तेभिनत्त्येवचसंहतान् दूतस्त
त्कुरुतेकर्मभिद्यतेयेनवानवा ६६

शौचयुक्तः तेनधनस्त्रीदानादिनाऽभेद्यः दक्षश्चतुरः तेनकार्यकालन्नातिक्राम
तिस्मृतिमान्तेनसंदेशंनविस्मरतिदेशकालज्ञः तेनदेशकालौज्ञात्वाअन्यदपिसंदिष्टंदेशकालोचितमन्यथाकथयतिस्वरूपःतेना
देयवचनः विगतभयःतेनाप्रियसंदेशस्यापिवक्तावाग्मीतेनसंस्कृतायुक्तिक्षमःएवंविधोदूतोराज्ञःप्रशस्योभवति ६४ अमात्यइ
ति अमात्येसेनापतौहस्त्यश्वरथपादाताद्यात्मकोदंडआयत्तः तदिच्छयातस्यकार्य्येषुप्रवृत्तेः विनययोगात्वैनयिकीयोविनयःस
दंडआयत्तःनृपतावर्थसंचयस्थानदेशावायत्तौराजापराधीनौनकर्त्तव्यौस्वयमेवचिंतनीयंधनंग्रामश्चदूतेसंधिविग्रहावायत्तौत
दिच्छयातत्प्रवृत्तेः ६५ दूतएवेति यस्माद्दूतएवहिभिन्नानांसंधिसंपादनेक्षमः संहतानांचभेदनेतथापरदेशेदूतःतत्कर्मकरोति

येनसंहताभियंतेतस्माद्दूतेसंधिविग्रहौनिपर्य्ययावायत्ताविति यदुक्तंतस्यैवायंप्रपंचः दूतस्यकार्यांतरमाह ६६ सविद्यादिति सदूतोऽस्यप्रतिराजस्यकर्त्तव्येआकारेंगितचेष्टांजानीयात् निगूढा अनुचराः प्रतिपक्षनृपस्यैवपरिजनाः तस्मिन्प्रयुक्ताः तत्सन्नि धापितेषामिंगितचेष्टितैः भृत्येषुचक्रुद्धलुब्धापमानितेषुप्रतिराजस्यकर्त्तुमीप्सितंजानीयात् ६७ बुध्वाचेति उक्तलक्षणदू तद्वारेणप्रतिपक्षराजस्यकर्त्तुमिष्टंसर्वंतत्त्वतोज्ञात्वा तथाप्रयत्नंकुर्यात् यथात्मनः पीडानभवति ६८ जांगलमिति अल्पोदकतृ णोयस्तूप्रवातःप्रचुरातपः सज्ञेयोजांगलोदेशोबहुधान्यादिसंयुतः प्रचुरधार्मिकजनंरोगोपसर्गादिरनाकुलंफलपुष्पतरुलता दिमनोहरंप्रणतसमीपवास्तव्यादविकादिजनंफलप्रकृषिवाणिज्याद्याजीवनमाश्रित्यावासंकुर्यात् ६९ धनुर्दुर्गमिति धनुर्दु

सविद्यादस्यकृत्येषुनिगूढेंगितचेष्टितैः आकारमिंगितंचेष्टांभृत्येषुचचिकीर्षितम् ६७ बुध्वाच सर्वंतत्त्वेनपरराजचिकीर्षितम् तथाप्रयत्नमातिष्ठेद्यथात्मानंनपीडयेत् ६८ जांगलंसस्यसंपन्न मार्यप्रायमनाविलम् रम्यमानतसामंतस्वाजीव्यंदेशमावसेत् ६९ धनुर्दुर्गंमहीदुर्गमब्दुर्गंवार्क्षमे ववा नृदुर्गंगिरिदुर्गंवासमाश्रित्यवसेत्पुरम् ७० सर्वेणतुप्रयत्नेनगिरिदुर्गंसमाश्रयेत् एषांहिबा हुगुण्येनगिरिदुर्गंविशिष्यते ७१ त्रीण्याद्यान्याश्रितास्त्वेषांमृगगर्त्ताश्रयाऽप्सराः त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः ७२

र्गंमरुवेष्टितंचतुर्दिशंपंचयोजनमनुदकंमहीदुर्गंपाषाणेनइष्टकेनवाविस्ताराद्द्विगुण्यो च्छ्रायेणद्वादशहस्ताद्युच्छ्रितेनसुद्धार्थमुपरिभ्रमणयोग्येनसावरणगवाक्षादियुक्तेनप्राकारेणवेष्टितंजलदुर्गंअगाधोदकेनसर्व तः परिवृतंवार्क्षदुर्गंबहिःसर्वतोयोजनमात्रंव्याप्यतिष्ठन्महावृक्षकंटकिगुल्मलताद्याचितंनृदुर्गंचतुर्दिगवस्थायिहस्त्यश्वरथयुक्त बहुपादातरक्षितंगिरिदुर्गंसर्वतःपृष्ठमतिदुरारोहंसंकोचैकमार्गोपेतंअंतर्नदीप्रस्रवणाद्युदकयुक्तंबहुसस्योत्पन्नक्षेत्ररक्षान्वितं एतेषुदुर्गेषुमध्यादन्यतमंदुर्गमाश्रित्यपुरंविरचयेत् ७० सर्वेणेति यस्मादेषांदुर्गाणांमध्यात्दुर्गगुणबहुत्वेनगिरिदुर्गमतिरिच्यते तस्मात्सर्वप्रयत्नेनतदाश्रयेत् गिरिदुर्गेशत्रुदुरारोहत्वंमहत्प्रदेशादल्पप्रयत्नप्रेरितशिलादिनाबहुविपक्षसैन्यव्यापादनमित्यादयो बहवोगुणाः ७१ त्रीणीति एषांदुर्गाणांमध्याद्यथोक्तानित्रीणिदुर्गाणिमृगादयआश्रिताः तत्र धनुर्दुर्गंमृगैराश्रितंमहीदुर्गं

गर्त्ताश्रितैर्मूषिकादिभिः अब्दुर्गं जलचरैर्नक्रादिभिः इतराणि त्रीणि वृक्षदुर्गादीनि वानरादय आश्रिताः तत्र वृक्षदुर्गं वानरैराश्रितं नृदुर्गं मानुषैः गिरिदुर्गं देवैः ७२ यथेत्यादि यथैतान्दुर्गवासिनो मृगादीन् व्याधादयः शत्रवो न हिंसंति एवं दुर्गाश्रितं राजानं न शत्रवः ७३ एकेति यस्मादेको धानुष्कः प्राकारस्थः शत्रूणां शतं योधयति प्राकारस्थं धानुष्कशतं च शत्रूणां दशसहस्राणि तस्मा[illegible] कर्त्तुसुपदिश्यते ७४ तमित्यादि तं दुर्गं खड्गाद्यायुधसुवर्णादिधनधान्यकरितुरगादिवाहनब्राह्मणभक्ष्यादिशिल्पि[illegible] स मृद्धं कुर्यात् ७५ तस्येत्यादि तस्य दुर्गस्य मध्ये पर्याप्तं पृथक् पृथक् स्त्रीगृहदेवागारायुधागाराग्निशालादियुक्तं परिख[illegible] सर्वर्त्तुकफलपुष्पादियोगेन सर्वर्त्तुकं सुधाधवलितं वाप्यादिजलयुक्तं वृक्षान्वितमात्मनो गृहं कारयेत् ७६ तदित्यादि तद्गृहमाश्रित्य

यथा दुर्गाश्रितानेतान्नोपहिंसंति शत्रवः तथारयो न हिंसंति नृपं दुर्गसमाश्रितम् ७३ एकः शतं योधयति प्राकारस्थो धनुर्द्धरः शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ७४ तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ७५ तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः गुप्तं सर्वर्त्तुकं शुभ्रं जलवृक्षसमन्वितम् ७६ तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम् कुले महति संभूतां हृद्यां रूपगुणान्विताम् ७७ पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजम् तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ७८ यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ७९ सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् स्याच्चाम्नायपरो लोके वर्त्तेत पितृवन्नृषु ८०

समानवर्णां शुभसूचकलक्षणोपेतां महाकुलप्रसूतां मनोहारिणीं सुरूपां गुणवतीं भार्यामुद्वहेत् ७७ पुरोहितमिति पुरोहितं चाथर्वणविधिना कुर्वीत ऋत्विजं च कर्माणि कर्त्तुं वृणुयात् ते चास्य राज्ञो गृह्योक्तानि त्रेतासंपाद्यानि कर्माणि कुर्युः ७८ यजेतेति राजा नानाप्रकारान् बहुदक्षिणान् अश्वमेधादियज्ञान् कुर्यात् ब्राह्मणेभ्यश्च स्त्रीगृहशय्यादीन् भोगान् सुवर्णवस्त्रादीनि धनानि दद्यात् ७९ सांवत्सरिकमिति राजा सत्क्रैरमात्यैर्वर्षग्राह्यं धान्यादिभागमानाययेत् लोके च करादिग्रहणे शास्त्रनिष्ठः स्यात् स्वदेशवासिषु नरेषु

पितृवत्स्नेहादिनावर्त्तेत ८० अध्यक्षानिति तत्रतत्र हस्त्यश्वरथपदाताद्यर्थादिस्थानेषु अध्यक्षानवेक्षितॄन्विविधान्पृथक्पृथक्
विपश्चितः कर्मकुशलान्कुर्यात् ते अस्यराज्ञः तेषु हस्त्यश्वादिस्थानेषु मनुष्याणांकुर्वतांसर्वाणिकार्याणिसम्यक्कार्यार्थमवेक्षेरन् ८१
आवृत्तानामिति गुरुकुलान्निवृत्तानां अधीतवेदानांब्राह्मणानांगार्हस्थ्यार्थिनांनियमतोधनधान्येनपूजांकुर्यात् यस्मादयंब्राह्मो
ब्राह्मणेषुस्थापितधनधान्यादिनिधिरिवनिधिः अक्षयोब्रह्मफलत्वात् अविनाशीराज्ञांशास्त्रेणोपदिश्यतेअतएव ८२ नतमिति
तंब्राह्मणस्थापितनिधिंनचौरोनापिशत्रवोहरंति अन्यनिधिवत् भूम्यादिस्थापितःस्थानभ्रांत्यावा दर्शनमुपैतितस्मादयमक्ष-
योअनंतफलोनिधिरिवनिधिः धनौघःसराज्ञाब्राह्मणेषुनिधातव्यःतेभ्योदेयमित्यर्थः ८३ नेत्यादि अग्नौयत्हविर्हूयतेतत्कदा

अध्यक्षान्विविधान्कुर्यात्तत्रतत्रविपश्चितः तेऽस्यसर्वाण्यवेक्षेरन्नृणांकार्याणिकुर्वताम् ८१
आवृत्तानांगुरुकुलाद्विप्राणांपूजकोभवेत् नृपाणामक्षयोह्येषनिधिर्ब्राह्मोभिधीयते ८२ नतंस्ते
नान्चामित्राहरंतिनचनश्यति तस्माद्राज्ञानिधातव्योब्राह्मणेष्वक्षयोनिधिः ८३ नस्कंदतेनव्यथ
तेनविनश्यतिकर्हिचित् वरिष्ठमग्निहोत्रेभ्योब्राह्मणस्यमुखेहुतम् ८४ सममब्राह्मणेदानंद्विगु-
णंब्राह्मणब्रुवे प्राधीतेशतसाहस्रमनंतंवेदपारगे ८५ पात्रस्यहिविशेषेणश्रद्दधानतयैवच अ
ल्पंवाबहुवाप्रेत्यदानस्यावाप्यतेफलम् ८६

चित् स्कंदते स्रवत्यधः पततिकदाचिद्व्यथतेशुष्यतिकदाचिद्दाहादिनान
श्यतिब्राह्मणस्यमुखेयत्हुतंपाण्यास्योहिद्विजःस्मृतइतिब्राह्मणहस्तदत्तमित्यर्थः तस्यनोक्तादोषाः तस्मादग्निहोत्रादिभ्यःश्रेष्ठंब्रा
ह्मणायदानमित्यर्थः ८४ सममित्यादि ब्राह्मणेतरक्षत्रादिविषयेयद्दानंतत्समफलंस्मृतंततोनाधिकंनचन्यूनंभवतियोब्राह्मणः
क्रियारहितआत्मानंब्राह्मणंब्रवीतिसब्राह्मणब्रुवःतद्विषयदानंपूर्वापेक्षयाद्विगुणफलंएवंप्राधीतेप्रक्रांताध्ययनेब्राह्मणेलक्षगु
णंफलंसमस्तशाखाध्यायिन्यनंतफलंसहस्रगुणमाचार्यइतिवातृतीयपदस्यपाठः ८५ पात्रस्येति विद्यातपोवृत्तियुक्ततयापात्र
स्यतारतम्यमपेक्ष्यशास्त्रोक्तयेतिप्रत्ययरूपायाश्रद्धयास्तारतम्यपात्रमासाद्यदानस्याल्पंमहाफलंपरलोकेलभ्यते ८६ ७ ७

समोत्तमाधमैरिति समबलेनाधिकबलेनहीनबलेनचराज्ञायुद्धार्थमाहूतोराजारक्षणंकुर्वन्युद्धान्ननिवर्त्तेतक्षत्रियेणयुद्धा
र्थमाहूतेनावश्यंयोद्धव्यमितिक्षात्रंधर्मंस्मरन्यस्मात् ८७ संग्रामेष्विति युद्धेष्वपराङ्मुखत्वंप्रजानांचरक्षणंब्राह्मणपरिचर्याए
तद्राज्ञामतिशयितंस्वर्गादिश्रेयःस्थानंअतएव ८८ आहवेष्विति राजानोमिथःस्पर्द्धमानायुद्धेऽन्योन्यंहंतुमिच्छंतःप्रकृष्टया
शक्त्यासंमुखीभूययुध्यमानाःस्वर्गंगच्छंतियद्यपिशत्रुजयधनलाभादिरूपंदृष्टमेवफलंनस्वर्गःतथापियुद्धाश्रितापराङ्मुखत्व
नियमस्यस्वर्गःफलमितिनदोषः ८९ नेत्यादि कूटान्यायुधानिवहिःकाष्ठादिमयानिअंतर्गुप्तनिशितशस्त्राणिएतैःसमरेयुध्यमा
नःशत्रून्नहन्यात्नापिकर्ण्याकारफलकैर्बाणैःनापिविषाक्तैःनाप्यग्निदीप्तफलकैः ९० नचेति स्वयंरथस्थोरथंत्यक्त्वास्थलारूढं

समोत्तमाधमैराजात्वाहूतःपालयन्प्रजाः ननिवर्त्तेतसंग्रामात् क्षात्रंधर्ममनुस्मरन् ८७ संग्रामे
ष्वनिवर्त्तित्वंप्रजानांचैवपालनम् शुश्रूषाब्राह्मणानांचराज्ञांश्रेयस्करंपरम् ८८ आहवेषुमिथो
ऽन्योन्यंजिघांसंतोमहीक्षितः युध्यमानाःपरंशक्त्यास्वर्गंयांत्यपराङ्मुखाः ८९ नकूटैरायुधै
र्हन्यात्युध्यमानोरणेरिपून् नकर्णिभिर्नापिदिग्धैर्नाग्निज्वलिततेजनैः ९० नचहन्यात्स्थला
रूढन्नक्लीबंनकृतांजलिम् नमुक्तकेशन्नासीनन्नतवास्मीतिवादिनम् ९१ नसुप्तन्नविसन्नाह
न्ननग्नन्ननिरायुधम् नायुध्यमानंपश्यन्तन्नपरेणसमागतम् ९२ नायुधव्यसनप्राप्तन्नार्त्तन्ना
तिपरिक्षतम् नभीतन्नपरावृत्तंसतांधर्ममनुस्मरन् ९३

नहन्यात् तथानपुंसकंबद्धांजलिंमुक्तकेशंउपविष्टं-
त्वदीयोहमित्येवंवादिनंनहन्यात् ९१ नसुप्तमिति नसुप्तंमुक्तसन्नाहंविवस्त्रंअनायुधमयुध्यमानंप्रेक्षकमन्येनसहयुध्यमानंच
नहन्यात् ९२ नेत्यादि भग्नखड्गाद्यायुधंपुत्रशोकादिनाआर्त्तंबहुप्रहाराकुलंभीतंयुद्धपराङ्मुखंशिष्टक्षत्रियाणांधर्मंस्मरन्
नहन्यात् ९३ यस्त्विति यस्तुयोधोभीतःपराङ्मुखस्सन्युद्धेशत्रुभिर्हन्यतेसपोषणकर्त्तुःप्रभोर्दुष्कृतंतत्सर्वंप्राप्नोतिशास्त्रप्रमाण-
केनसुकृतदुष्कृतेयथाशास्त्रंसंक्रमयोग्येएवसिध्यतःअतएवोपजीव्यशास्त्रेणबाधनात्नप्रतिपक्षानुमानोदयोपिएतच्चषष्ठेप्रि

येषु सुकृतमित्यत्राविष्कृतमस्माभिः पराङ्मुखहतस्य स्यात्पापमेतद्विवक्षितम् न तत्र भर्तृपापं स्यादिति गोविंदराजकः मेधातिथिस्त्व
र्थवादमात्रमेतन्निरूपयन् मन्येनैतद्द्वयं युक्तं व्यक्तमन्वर्थवर्जनात् अन्यदीयपुण्यपापे अन्यत्र संक्रमेते इति शास्त्रप्रामाण्याद्वेदांतसू
त्रकृता बादरायणेन निर्णीतोयमर्थः इति यथोक्तमेव रमणीयम् ९४ यच्चेत्यादि पराङ्मुखहतस्य यत्किंचित्सुकृतं परलोकार्थमार्जि
तं अनेनास्ति तत्सर्वं प्रभुर्लभते ९५ रथाश्वमित्यादि राज्ञः स्वामिनः सर्वधनग्रहणे प्राप्ते तदपवादार्थमाह रथाश्वहस्तिछत्रवस्त्रा
दिधनधान्यगवादिस्त्रियः सर्वाणि द्रव्याणि गुडलवणादीनि कुप्यं च सुवर्णरजतव्यतिरिक्तं ताम्रादिधनं यः पृथग्जितवांस्तत्तमानयति
तस्यैव तद्भवति सुवर्णरजतभूमिरत्नादिधनं पृष्टधनं तु राज्ञ एव समर्पणीयं एतदर्थमेवात्र परिगणनीयं अत एवाह ९६ राज्ञ इत्यादि उ-
द्धारं प्रोद्धारो राज्ञे दद्युः उद्ध्रियत इत्युद्धारः जितधनादुत्कृष्टधनं सुवर्णरजतकुप्यादि राज्ञे समर्पणीयं करितुरगादिवाहनमपि राज्ञे देयं

यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ९४ यच्चास्य सुकृतं किं
चिदमुत्रार्थमुपार्जितम् भर्ता तत्सर्वमादत्ते परावृत्तहतस्य तु ९५ रथाश्वं हस्तिनं छत्रं धनं धान्यं पशू
न्स्त्रियः सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ९६ राज्ञश्च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः
राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितम् ९७ एषोऽनुपस्कृतः प्रोक्तो योधधर्मः सनातनः अस्माद्ध
र्मान्न च्यवेत क्षत्रियो घ्नन्रणे रिपून् ९८ अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः रक्षितं वर्द्धयेच्चैव
वृद्धं पात्रेषु निःक्षिपेत् ९९

वाहनं च राज्ञ उद्धारं चेति गौतमवचनात् उद्धारदाने च श्रुतिः इंद्रो वै वृत्रं हत्वेत्यपक्रम्य स महा
न्भूत्वा देवता अब्रवीत् उद्धारं समुद्धरतेति राज्ञा चापृथग्जितं सहजितं सर्वयोधेभ्यो यथापौरुषं संविभजनीयम् ९७ एष इत्यादि
अविगर्हित एषोऽनादिसर्गप्रवाहसंभवतया नित्यो योधधर्म उक्तः युद्धे शत्रून्हिंसन् क्षत्रिय एतं धर्मं न त्यजेत् युद्धाधिकारित्वात्क्षत्रिय
ग्रहणं अन्योपि तत्स्थानपतितो न त्यजेत् ९८ अलब्धमिति अजितं भूमिहिरण्यादि जेतुमिच्छेत् जितं प्रयत्नतो रक्षेत् रक्षितं
च वाणिज्यादिना वर्द्धयेत् वृद्धं च पात्रेभ्यो दद्यात् ९९ एतदिति एतच्चतुःप्रकारं पुरुषार्थो यः स्वर्गादिस्तत्प्रयोजनं यस्मादेवंरूपं

जानीयात् अतो अनलसः सन्सर्वदा अनुष्ठानं कुर्यात् १०० अलब्धमिति अलब्धं यद्धस्त्यश्वरथपादातात्मकेन दंडेन जेतुमि
च्छेत् जितं च मत्यवेक्षणेन रक्षेत् रक्षितं च वृद्ध्युपायेन स्थलजलपथवाणिज्यादिना वर्द्धयेत् वृद्धं शास्त्रीयविभागेन पात्रेभ्यो दद्या
त् १०१ नित्यमिति नित्यं हस्त्यश्वादियुद्धादिशिक्षाभ्यासो दंडो यस्य स तथा स्यात् नित्यं च प्रकाशीकृतमस्त्रविद्यादिना पौरुषं यस्य
स तथा स्यात् नित्यं संवृतं संवरणीयं मंत्राचारचेष्टादिकं यस्य स तथा स्यात् नित्यं च शत्रोर्व्यसनादिरूपछिद्रानुसंधानं तत्परः स्यात्
१०२ नित्यमिति यस्मान्नित्योद्यतदंडस्य जगदुद्विजेदिति तस्मात्सर्वप्राणिनो दंडेनैवात्मसात्कुर्यात् १०३ अमाययेति मायया च्छ
द्मतया अमात्यादिषु न वर्त्तेत तथा सति सर्वेषामविश्वसनीयः स्यात् धर्मरक्षार्थं यथातत्त्वेनैव व्यवहरेत् यत्नकृतात्मपक्षरक्षश्च शत्रु-

एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनम् अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतंद्रितः १०० अलब्धमि
च्छेद्दंडेन लब्धं रक्षेदवेक्षया रक्षितं वर्द्धयेद्वृद्ध्या वृद्धं दानेन निःक्षिपेत् १०१ नित्यमुद्यतदंडः स्यान्नि
त्यं विवृतपौरुषः नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्य्यरेः १०२ नित्यमुद्यतदंडस्य कृत्स्नमुद्विजते
जगत् तस्मात्सर्वाणि भूतानि दंडेनैव प्रसाधयेत् १०३ अमाययैव वर्त्तेत न कथंचन मायया बुध्येता
रिप्रयुक्तां च मायां नित्यं स्वसंवृतः १०४ नास्य च्छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु गूहेत्कूर्म इवां
गानि रक्षेद्विवरमात्मनः १०५ बकवच्चिंतयेदर्थान्सिंहवच्च पराक्रमेत् वृकवच्चावलुंपेत शशवच्च वि
निष्पतेत् १०६

कृतां प्रकृतिभेदरूपां मायां चारद्वारेण जानीयात् १०४ नेत्यादि तथा यत्नं कुर्याद्यथास्य प्रकृतिभेदादि
छिद्रं शत्रुर्न्न जानाति शत्रोस्तु प्रकृतिभेदादिकं चारैर्जानीयात् कूर्मो यथा मुखचरणादीनि आत्मदेहे गोपयत्येवं राज्यांगान्यमात्या
दीनि दानसंमानादिना आत्मसात्कुर्यात् दैवाच्च प्रकृतिभेदादिरूपे छिद्रे जाते यत्नतः प्रतीकारं कुर्यात् १०५ बकवदिति यथा ब-
कोजलेमीन मतिचंचलस्वभावमपि मत्स्यग्रहणात् एकतानांतःकरणश्चिंतयत्येवं रहसि कृतविहितरक्षस्यापि विपक्षस्य देशग्रह
णादीनर्थांश्चिंतयेत् यथा च सिंहः प्रबलमतिस्थूलमपि दंतिबलं हंतुमाक्रमत्येवं अल्पबलो बलवतोपक्रांतः संश्रयाद्युपायांतरा

संभवेसर्वशक्त्याशत्रुंहंतुमाक्रामेत् यथाचवृकःपालकृतरक्षणमपिपशुंदैवात्पालानवधानमासाद्यव्यापादयत्येवंदुर्गाद्यवस्थि
तमपिरिपुंकथंचित्प्रमादमासाद्यव्यापादयेत् यथाशशःवधोद्धुरविविधव्याधमध्यगतोपिकुटिलगतिरुत्प्लुत्यपलायतेएवंस्वयम
वलोवलवदरिपरिवृतोपिकथंचिदरिव्यामोहमाधायगुणवत्पार्थिवांतरंसंश्रयितुमुपसर्पेत् १०६ एवमित्यादि एवमुक्तप्रका
रेणविजयप्रवृत्तस्यनृपतेःयेविजयविरोधिनोभवेयुः तान्सर्वान्सामदानभेददंडैरुपायैःवशमानयेत् १०७ यदीत्यादि तेचवि-
जयविरोधिनोयद्याद्यैस्त्रिभिरुपायैर्ननिवर्त्ततेतदाबलाद्देशोपमर्द्दादिनायुद्धेनशनकैर्लघुगुरुदंडक्रमेणदंडेनवशीकुर्यात् १०८
सामादीति चतुर्णामपिसामादीनामुपायानांमध्यात्सामदंडावेवराष्ट्रवृद्ध्यर्थंपंडिताःप्रशंसंतिसाम्निप्रयासधनव्ययसैन्यक्षया

एवंविजयमानस्ययेऽस्यस्युःपरिपंथिनः तानानयेद्वशंसर्वान्सामादिभिरुपक्रमैः १०७ यदितेतुन
तिष्ठेयुरुपायैःप्रथमैस्त्रिभिः दंडेनैवप्रसह्यैतां छनकैर्वशमानयेत् १०८ सामादीनामुपायानांचतु
र्णामपिपंडिताः सामदंडौप्रशंसंतिनित्यंराष्ट्राभिवृद्धये १०९ यथोद्धरतिनिर्दाताकक्षंधान्यंचरक्षति
तथारक्षेन्नृपोराष्ट्रंहन्याच्चपरिपंथिनः ११० मोहाद्राजास्वराष्ट्रंयःकर्षयत्यनवेक्षया सोचिराद्भ्रश्य
तेराज्याज्जीविताच्चसबांधवः १११ शरीरकर्षणात्प्राणाःक्षीयंतेप्राणिनांयथा तथाराज्ञामपिप्राणाः
क्षीयंतेराष्ट्रकर्षणात् ११२

द्दोषाभावात्दंडेतुनसद्भावेपिकार्यसिद्ध्यतिशयात् १०९ यथेत्यादि यथाक्षेत्रेधा
न्यतृणादिकयोःसहोत्पन्नयोरपिधान्यानिलवनकर्त्तारक्षतितृणादिकंचोद्धरतिएवंनृपतिःराष्ट्रेदुष्टान्हन्यात्नत्वदुष्टान्तदीय
सहजान्ज्ञात्वापिनिर्हन्ति दृष्टांतादवसीयतेशिष्टसहितंचराष्ट्रंरक्षेत् ११० मोहादित्यादि योराजाअनवेक्षयादुष्टशिष्ट
ज्ञानेनसर्वान्नेवस्वराष्ट्रीयजनान्शास्त्रीयधनग्रहणमारणादिकष्टेनपीडयतिसशीघ्रमेवजनपदवैरात्प्रकृतिकोपाधर्मैर्वाराजा
राज्याज्जीविताच्चपुत्रादिसहितोभ्रश्यते १११ शरीरकर्षणेति यथाप्राणभृतामाहारनिरोधादिनाशरीरशोषणात्प्राणाःक्षी-
यंतेएवंराज्ञामपिराष्ट्रपीडनात्प्रकृतिकोपादिनाप्राणाविनश्यंतितस्मात्स्वशरीरवद्राज्ञाराष्ट्रंरक्षणीयमित्युक्तम् ११२ ५

राष्ट्रस्येत्यादि राष्ट्रस्यरक्षणेचवक्ष्यमाणमिमसुपायमनुतिष्ठेत् यस्मात्संरक्षितराष्ट्रोराजाअनायासेनवर्द्धते ११३ द्वयोरिति
द्वयोर्ग्रामयोर्मध्येत्रयाणांचाग्रामाणांपंचानांवाशतानांगुल्मंरक्षितृपुरुषसमूहंसत्यप्रधानपुरुषाधिष्ठितंराष्ट्रस्यसंग्रहंरक्षास्थानं-
कुर्यात् अस्यलाघवगौरवापेक्षश्चोक्तविकल्पः ११४ ग्रामस्येति एकग्रामदशग्रामाद्यधिपतीन्कुर्यात् ११५ ग्रामइति विंश
तीशाइति ग्रामाधिपतिश्चौरादिदोषान्ग्रामेसंजातान् आत्मनाप्रतिकर्त्तुमक्षमो अत्तु स्कष्टतयास्वयंदशग्रामाधिपतयेकथयेत्ए
वंदशग्रामपतयोविंशतिग्रामस्वाम्यादिभ्यः कथयेयुः तथाचसतिसम्यक्चौरादिकंटकोद्धारोभवति ११६ ११७ यानीति एक
ग्रामाधिकृतस्यवृत्तिमाह यान्यन्नपानेंधनादीनिग्रामवासिभिःप्रत्यहंराज्ञेदेयानिनत्वब्दकरंधान्यानामष्टमोभागइत्यादिकंतानि

राष्ट्रस्यसंग्रहेनित्यंविधानमिदमाचरेत् सुसंगृहीतराष्ट्रोहिपार्थिवःसुखमेधते ११३ द्वयोस्त्रयाणां
पंचानामध्येगुल्ममधिष्ठितम् तथाग्रामशतानांचकुर्याद्राष्ट्रस्यसंग्रहम् ११४ ग्रामस्याधिपतिंकुर्य्या
द्दशग्रामपतिंतथा विंशतीशंशतेशंचसहस्रपतिमेवच ११५ ग्रामदोषान्समुत्पन्नान्ग्रामिकःशनै
कैःस्वयम् शंसेद्ग्रामदशेशायदशेशोविंशतीशिनम् ११६ विंशतीशस्तुतत्सर्वंशतेशायनिवेदयेत् शं
सेद्ग्रामशतेशस्तुसहस्रपतयेस्वयम् ११७ यानिराजप्रदेयानिप्रत्यहंग्रामवासिभिः अन्नपानेंधना
दीनिग्रामिकस्तान्यवाप्नुयात् ११८ दशीकुलंतुभुंजीतविंशीपंचकुलानिच ग्रामंग्रामशताध्यक्षःस
हस्राधिपतिःपुरम् ११९ तेषांग्राम्याणिकार्याणिपृथक्कार्याणिचैवहि राज्ञोन्यःसचिवःस्निग्धस्तानिप
श्येदतंद्रितः १२०

ग्रामाधिपतिर्दस्वयंगृह्णीयात् ११८ दशीकुलमिति अष्टागवंधर्महलंषड्गवंजीवितार्थिनाम् चतुर्गवंगृ
हस्थानांत्रिगवंब्रह्मघातिनामितिहारीतस्मरणात् षड्गवंमध्यमंहलमिति तथाविधहलद्वयेनयावतीभूमिर्वाह्यतेतत्कुलमितिवदंति त
द्दशग्रामाधिपतिर्वृत्त्यर्थंभुंजीतएवंविंशत्यधिपतिःपंचकुलानिशताधिपतिर्मध्यमंग्रामंसहस्राधिपतिर्मध्यमंपुरम् ११९ तेषामित्या
दि तेषांग्रामनिवासिप्रभृतीनांपरस्परविप्रतिपत्तौयानिग्रामभवानिकार्याणिकृताकृतानिचपृथक्कार्याणितान्यन्योराज्ञोचितकृत

तन्नियुक्तोऽनलसः कुर्वीत १२० नगरेति प्रतिनगरमेकैकमुच्चैःस्थानंकुलादिनामहांतंप्रधानरूपंघोररूपंहस्त्यश्वादिसामग्र्या
भयजनकंनक्षत्रादिमध्येभार्गवादिग्रहमिवतेजस्विनंकार्यद्रष्टारंनगराधिपतिंकुर्यात् १२१ सइत्यादि सनगराधिकृतस्तान्स-
र्वान् ग्रामाधिपत्यादीन् असतिप्रयोजनेसर्वदास्वयंसबलेनानुगच्छेत्तेषांचनगराधिकृतपर्यंतानांसर्वेषामेवयद्राष्ट्रेस्वचेष्टितंतत्तद्विष-
यनियुक्तैश्चरैः सम्यक्प्रजाः परिणयेदवगच्छेत् १२२ राज्ञोहीत्यादि यस्मात्येराज्ञोरक्षाधिकृतास्तेबाहुल्येनपरस्वग्रहणशीला
वंचकाश्चभवंति तस्मात्तेभ्यइमाःस्वात्मीयाःप्रजाराजारक्षेत् १२३ यइत्यादि येरक्षाधिकृताःकार्यार्थिभ्यएववाक्छलादिकंसुङ्ग
व्यलोभादशास्त्रीयधनग्रहणंपापबुद्धयः कुर्वीततेषांसर्वस्वंराजागृहीत्वादेशान्निःसारणंकुर्यात् १२४ राजकर्मेत्यादि राजोपयु

नगरेनगरेचैकंकुर्यात्सर्वार्थचिंतकम् उच्चैःस्थानंघोररूपंनक्षत्राणामिवग्रहम् १२१ सताननुप
रिक्रामेत्सर्वानेवसदास्वयम् तेषांवृत्तंपरिणयेत्सम्यग्राष्ट्रेषुतच्चरैः १२२ राज्ञोहिरक्षाधिकृताःपरस्वादा
यिनःशठाः भृत्याभवंतिप्रायेणतेभ्योरक्षेदिमाःप्रजाः १२३ येकार्यिकेभ्योऽर्थमेवगृण्हीयुःपापचेतसः
तेषांसर्वस्वमादायराजाकुर्यात्प्रवासनम् १२४ राजाकर्मसुयुक्तानांस्त्रीणांप्रेष्यजनस्यच प्रत्यहंकल्प
येद्वृत्तिंस्थानंकर्मानुरूपतः १२५ पणोदेयोऽवकृष्टस्यषडुत्कृष्टस्यवेतनम् षाण्मासिकस्तथाच्छादो
धान्यद्रोणस्तुमासिकः १२६

क्तकर्मनियुक्तानांस्त्रीणांदास्यादीनांकर्मकरजनस्यचउत्कृष्टमध्यमापकृष्टस्थानयोग्या
नुरूपेणप्रत्यहंकर्मानुरूपेणवृत्तिंकुर्यात्तामेवंदर्शयति १२५ पणइति अवकृष्टस्यगृहादिसंमार्जकोदकवाहादेः कर्मकरस्यव-
क्ष्यमाणलक्षणःपणोभृतिरूपः प्रत्यहंदातव्यः षाण्मासिकश्चाच्छादोवस्त्रयुगंदातव्यम् अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौचपुष्क
लम् पुष्कलानितुचत्वारिआढकःपरिकीर्तितः चतुराढकोभवेद्द्रोणइतिगणनयाधान्यद्रोणश्चप्रतिमासंदेयः उत्कृष्टस्यतुभृति
रूपाश्चषट्पणादेयाः अनयैवकल्पनयाषाण्मासिकानिषड्वस्त्रयुगानिप्रतिमासंषाण्मास्याद्रोणादेयाः अनयैवातिदिशामध्यम-
स्यपणत्रयंभृतिरूपंदातव्यंषाण्मासिकंचवस्त्रयुगत्रयंमासिकंचधान्यंद्रोणत्रयंदेयम् १२६ ७ ७ ७

क्रयविक्रयमित्यादि कियतामूल्येनक्रीतमिदवस्त्रंलवणादिद्रव्यंविक्रीयमाणंचात्रकियल्लभ्यतेकियद्दूरादानीतंकिमस्यवणिजो भक्तव्ययेनशाकसूपादिनापरिव्ययेनलग्नंकिमस्यारण्यादौचौरादिभ्योरक्षारूपेणक्षेमप्रतिविधानेनगतंकोऽस्यइदानींलाभयोग इत्येतदवेक्ष्यवणिजःकरान्दापयेत् १२७ यथेति यथाराजाऽवेक्षणादिकर्मणःफलेनयथाचवार्षिकवणिगादयःकृषिवाणिज्या दिकर्मणांफलेनसंबध्यते तथानिरूप्यराजासर्वदाराष्ट्रेकरान्गृण्हीयात् अत्रदृष्टांतमाह १२८ यथेत्यादि यथाजलौकोवत्स भ्रमराःस्तोकस्तोकानिरक्तक्षीरमधूनिअदंत्येवंराज्ञामूलधनमनुच्छिंदताऽल्पोऽल्पोराष्ट्रादब्दिकःकरोग्राह्यःतमाह १२९ पंचा शद्भागइत्यादि मूलादधिकयोःपशुहिरण्ययोःपंचाशद्भागोराज्ञाग्रहीतव्यः एवंधान्यानांषष्ठोऽष्टमोद्वादशोवाभागोराज्ञाग्राह्य

क्रयविक्रयमध्वानंभक्तंचसपरिव्ययम् योगक्षेमंचसंप्रेक्ष्यवणिजोदापयेत्करान् १२७ यथाफलेनयु ज्येतराजाकर्त्ताचकर्मणाम् तथावेक्ष्यनृपोराष्ट्रेकल्पयेत्सततंकरान् १२८ यथाल्पाल्पमदंत्याद्यंवा र्य्योकोवत्सषट्पदाः तथाल्पाल्पोग्रहीतव्योराष्ट्राद्राज्ञाब्दिकःकरः १२९ पंचाशद्भागआदेयोराज्ञापशु हिरण्ययोः धान्यानामष्टमोभागःषष्ठोद्वादशएववा १३० आददीताथषड्भागंद्रुमांसमधुसर्पिषां गंधौषधिरसानांचपुष्पमूलफलस्यच १३१ पत्रशाकतृणानांचचर्मणांवैदलस्यच मृन्मयानांचभांडा नांसर्वस्याश्ममयस्यच १३२ म्रियमाणोप्याददीतनराजाश्रोत्रियात्करम् नचक्षुधाऽस्यसंसीदेच्छ्रो त्रियोविषयेवसन् १३३ यस्यराज्ञस्तुविषयेश्रोत्रियःसीदतिक्षुधा तस्यापितत्क्षुधाराष्ट्रमचिरेणै वसीदति १३४

भूस्युत्कर्षापकर्षापेक्षयाकर्षणादिक्लेशालाघवगौरवापेक्षश्चायंबव्हल्पग्रहणविकल्पः १३० आददीते त्यादि पत्रशाकतृणानामित्यादि द्रुमशब्दोत्रवृक्षवाचकः वृक्षादीनांसमदशानांअश्ममयानांषष्ठोभागोलाभाद्गृहीतव्यः १३१ १३२ म्रियमाणेति क्षीणधनोपिराजाश्रोत्रियब्राह्मणात्करंनगृण्हीयात् नचतदीयदेशेवसन्श्रोत्रियःबुभुक्षयाअवसा दंगच्छेत् १३३ यस्येत्यादि यस्यराज्ञोदेशेश्रोत्रियःक्षुधावसन्नोभवतितस्यराष्ट्रमपिदुर्भिक्षादिभिःक्षुधाशीघ्रमवसादं

च्छतियतएवमतः १३४ श्रुतेति शास्त्राज्ञानानुष्ठानेज्ञात्वाअस्यतदनुरूपांधर्मादनपेतांजीविकामुपकल्पयेत् चौरादिभ्यश्चैनं-
औरसंपुत्रमिवपितारक्षेत् यस्मात् १३५ संरक्ष्यमाणइत्यादि सचश्रोत्रियोराज्ञासम्यग्रक्ष्यमाणोयंधर्मंप्रत्यहंकरोतितेनराज्ञ-
आयुर्द्रव्यराष्ट्राणिवर्द्धते १३६ यदिति राजास्वदेशेशाकपर्णादिस्वल्पवस्तुक्रयविक्रयादिनाजीवंतंनिकृष्टजनंस्वल्पकरंस्वंवर्षे
णदापयेत् १३७ कारुकानिति कारुकान्सूपकारादीन् शिल्पिभ्यईषदुत्कृष्टान् शिल्पिनश्चलोहकारादीन् शूद्रांश्चदेहक्ले-
शोपजीविनोभारिकादीन् मासिमास्येकंदिनंकर्मकारयेत् १३८ नोच्छिंद्यादिति प्रजास्नेहात्करशुल्कादेरग्रहणमात्मनो
मूलच्छेदः अतिप्रचुरकरादिग्रहणंपरेषांमूलोच्छेदःएतदुभयंनकुर्यात् आत्मनोमूलमुच्छिद्यकोशक्षयादात्मानंपीडयेत् पूर्वार्द्ध

श्रुतवृत्तेविदित्वास्यवृत्तिंधर्म्यांप्रकल्पयेत् संरक्षेत्सर्वतश्चैनंपित्रापुत्रमिवौरसम् १३५ संरक्ष्यमा-
णोराज्ञायंकुरुतेधर्ममन्वहम् तेनायुर्वर्द्धतेराज्ञोद्रविणंराष्ट्रमेवच १३६ यत्किंचिदपिवर्षस्यदापयेत्क
रसंज्ञितम् व्यवहारेणजीवंतंराजाराष्ट्रेपृथग्जनम् १३७ कारुकान्शिल्पिनश्चैवशूद्रांश्चात्मोपजीवि
नः एकैकंकारयेत्कर्ममासिमासिमहीपतिः १३८ नोच्छिंद्यादात्मनोमूलंपरेषांचातितृष्णया उच्छिंद
न्ह्यात्मनोमूलमात्मानंतांश्चपीडयेत् १३९ तीक्ष्णश्चैवमृदुश्चस्यात्कार्यंवीक्ष्यमहीपतिः तीक्ष्णश्चै
वमृदुश्चैवराजाभवतिसंमतः १४० अमात्यमुख्यंधर्मज्ञंप्राज्ञंदांतंकुलोद्गतम् स्थापयेदासनेतस्मि
न्खिन्नःकार्येक्षणेनृणाम् १४१ एवंसर्वंविधायेदमितिकर्तव्यमात्मनः युक्तश्चैवाप्रमत्तश्चपरिरक्षे
दिमाःप्रजाः १४२

त्परेषांचेत्यपिसंबध्यते परेषांमूलमुच्छिद्यतांश्चपीडयेत् १३९ तीक्ष्णेति विशेषमवगम्यक्वचित्कार्ये
तीक्ष्णः क्वचिन्मृदुश्चभवेत् नत्वेकरूपमालंबेत् यस्मादुक्तरूपोराजासर्वेषामभिमतोभवति १४० अमात्येति स्वयंकार्यदर्शनेखिन्नः
श्रेष्ठामात्यंधर्मविदंप्राज्ञंजितेंद्रियंकुलीनंतस्मिन्कार्यदर्शनस्थानेनियुंजीत १४१ एवमित्यादि एवमुक्तप्रकारेणसर्वमात्मनःकार्य
जातंसंपाद्योद्युक्तःप्रमादरहितआत्मीयाःप्रजारक्षेत् १४२ विक्रोशंतीति यस्यराज्ञोअमात्यादिसहितस्यपश्यतएवराष्ट्राद्राक्रोशं

स्यः प्रजाः तस्करादिभिरपिन्ह्रियंतेसमृतएवनतुजीवतिजीवनकार्याभावात्जीवनमपितस्यमरणमेवेत्यर्थः तस्मादप्रमत्तःप्रजार-
क्षेदितिपूर्वोक्तशेषंतदेवद्रढयति १४३ क्षत्रियेति धर्मांतरेभ्यःश्रेष्ठंक्षत्रियस्यप्रजारक्षणमेवप्रकृष्टोधर्मः यस्माद्यथोक्तउक्षण
फलकरादिभोक्ताराजाधर्मेणसंबध्यते १४४ उत्थायेति सभूपःरात्रेःपश्चिमयामउत्थायकृतमूत्रपुरीषोत्सर्गादिशौचोनन्यमनाः
कृताग्निहोत्रावसथ्यहोमोब्राह्मणान्पूजयित्वाशस्तलक्षणाद्युपेतांसभाममात्यादिदर्शनगृहंप्रविशेत् १४५ तत्रेति तस्यांसभायां
स्थितोदर्शनार्थमागताःप्रजाःसर्वाःसंभाषणदर्शनादिभिःप्रतिनंद्यप्रस्थापयेत्ताश्चप्रस्थाप्यमंत्रिभिःसहसंधिविग्रहादिचिंतयेत्
१४६ गिरिपृष्ठमिति पर्वतपृष्ठमारुह्यनिर्जनवनगृहस्थितोअरण्यदेशेवाविविक्तेमंत्रभेदकारिभिरनुपलक्षितःकर्मणामारंभो-

विक्रोशंत्योयस्यराष्ट्राद्ध्रियंतेदस्युभिःप्रजाः संपश्यतःसभृत्यस्यमृतःसनतुजीवति १४३ क्षत्रियस्य
परोधर्मःप्रजानामेवपालनम् निर्दिष्टफलभोक्ताहिराजाधर्मेणयुज्यते १४४ उत्थायपश्चिमेयामेकृ
तशौचःसमाहितः हुताग्निर्ब्राह्मणांश्चार्च्यप्रविशेत्सशुभांसभाम् १४५ तत्रस्थितःप्रजाःसर्वाःप्रति
नंद्यविसर्जयेत् विसृज्यचप्रजाःसर्वामंत्रयेत्सहमंत्रिभिः १४६ गिरिपृष्ठंसमारुह्यप्रासादंवारहोग
तः अरण्येनिःशलाकेवामंत्रयेदविभावितः १४७ यस्यमंत्रंनजानंतिसमागम्यपृथग्जनाः सकृ-
त्स्नांपृथिवींभुंक्तेकोशहीनोपिपार्थिवः १४८ जडमूकांधबधिरांस्तिर्यग्योनान्वयोतिगान् स्त्रीम्ले
च्छव्याधितव्यंगान्मंत्रकालेऽपसारयेत् १४९ भिंदंत्यवमतामंत्रंस्तिर्यग्योनास्तथैवच स्त्रियश्चै
वविशेषेणतस्मात्तत्रादृतोभवेत् १५०

पायः पुरुषद्रव्यसंपद्देशकालविभागोविनिपातप्रतीकारः कार्यसिद्धिरित्ये
वंपंचांगमंत्रंचिंतयेत् १४७ यस्येति यस्यराज्ञोमंत्रिभ्यःपृथगन्येजनामिलितास्यमंत्रंनजानंतिसक्षीणकोशोपिसर्वांपृथि
वींभुनक्ति १४८ जडांधबधिरेति बुद्धिवाक्चक्षुःश्रोत्रविकलान्तिर्यग्योनिभवांश्चशुकसारिकादीन् अतिवृद्धस्त्रीम्लेच्छरो
ग्यंगहीनांश्चमंत्रसमयेअपसारयेत्यस्मात् १४९ भिंदंतीत्यादि एतेजडादयोपिप्राचीनदुष्कृतवशेनप्राप्तजडादिभावाअध

र्भिकतयैवावमानितामंत्रभेदंकुर्वंतितथाशकादयोऽतिवृद्धाश्चस्त्रियश्चविशेषेणास्थिरबुद्धितयामंत्रंभिंदंतितस्मात्तदपसारणे यत्नवान्स्यात् १५० मध्यंदिनेति दिनमध्येरात्रिमध्येवाविगतचित्तखेदः शरीरक्लेशरहितश्चमंत्रिभिःसहएकाकीवाधर्मार्थकामा नन्नुष्ठातुंचिंतयेत् १५१ परस्परेति तेषांचधर्मार्थकामानांप्रायिकविरोधवतांविरोधपरिहारेणार्जनोपायंचिंतयेत् दुहितॄणांचदा नंस्वकार्यसिद्ध्यर्थंनिरूपयेत् कुमाराणांचपुत्राणांविनयाधाननीतिशिक्षार्थंरक्षणंचिंतयेत् १५२ दूतेति दूतानांसंगुप्तार्थले खहारित्वादिनापरराष्ट्रप्रस्थानंचिंतयेत् तथाप्रारब्धकार्यशेषंसमापयितुंचिंतयेत्स्त्रीणांचातिविषमचेष्टितत्वात् तथाहिश- स्त्रेणवेणीविनिगूहितेनविदूरथंवैमहिषीजघान विषप्रदिग्धेनचनूपुरेणदेवीविरक्ताकिलकाशिराजमित्याद्यवगम्यात्मरक्षार्थं चांतःपुरस्त्रीणांचेष्टितंसखीदास्यादिनानिरूपयेत् चराणांचप्रतिराजादिषुनियुक्तानांचरांतरैश्चेष्टितमवधारयेत् १५३ कृ-

मध्यंदिनेऽर्द्धरात्रेवाविश्रांतोविगतक्लमः चिंतयेद्धर्मकामार्थान्सार्द्धंतैरेकएववा १५१ परस्परवि रुद्धानांतेषांचसमुपार्ज्जनम् कन्यानांसंप्रदानंचकुमाराणांचरक्षणम् १५२ दूतसंप्रेषणंचैवका र्यशेषंतथैवच अंतःपुरप्रचारंचप्रणिधीनांचचेष्टितम् १५३ कृत्स्नंचाष्टविधंकर्मपंचवर्गंचतत्त्व तः

कृत्स्नमिति अष्टविधंकर्मसमग्रंचिंतयेत्तच्चोशनसोक्तम् आदानेचविसर्गेचतथाप्रेषनिषेधयोः पंचमेचार्थवचनेव्य वहारस्यचेक्षणे दंडशुद्ध्योःसदायुक्तस्तेनाष्टगतिकोनृपः अष्टकर्मादिवंयातिराजाशक्राभिपूजितः तत्रादानंकरादीनांविसर्गो भृत्यादिभ्योधनदानंप्रेषोमात्यादीनांदृष्टादृष्टानुष्ठानेननिषेधोदृष्टादृष्टविरुद्धक्रियासुअर्थवचनंकार्यसंदेहेराजाज्ञयैवतत्रनियमा त् व्यवहारईक्षणंप्रजानामृणादिविप्रतिपत्तौदंडः पराजितानांशास्त्रोक्तधनग्रहणंशुद्धिः पापेकर्मणिजातेतत्रप्रायश्चित्तसंपादन म् मेधातिथिस्तुअकृतारंभःकृतानुष्ठानमनुष्ठितविशेषणंकर्मफलसंग्रहः तथासामदानदंडभेदाएतदष्टविधंकर्मअथवावणि क्पथउदकसेतुबंधनंदुर्गकरणंकृतस्यसंस्कारनिर्णयःहस्तिबंधनंखनिखननंशून्यनिवेशनंदारुवनच्छेदनंचेत्याहतथाकापटि कोदास्थितगृहपतिवैदेहिकतापसव्यंजनात्मकंपंचविधंचारवर्गंपंचवर्गशब्दवाच्यंतत्त्वतश्चिंतयेत् तत्रपरमर्मज्ञःप्रगल्भछात्रः

कपटव्यवहारित्वात्कापटिकस्तंवृत्त्यर्थिनमर्थमानाभ्यामुपगृह्यरहसिराजाब्रूयात् यस्यदुर्वृत्तंपश्यसितत्तदानीमेवमयिवक्तव्यमितिप्र
व्रज्यारूढपतितउदास्थितः तंलोकेषुविदितदोषंप्रज्ञाशौचयुक्तंवृत्त्यर्थिनंकृत्वारहसिराजापूर्ववद्ब्रूयात् बहूत्सत्तिकमठेस्थापयेत्सतुर
सस्योत्पत्तिकंभूम्यंतरंचतद्व्यर्थमुपकल्पयेत्सचान्येषामपिप्रव्रजितानांराजचारकर्मकारिणांग्रासाच्छादनादिकंदद्यात् कर्षकः क्षीण
वृत्तिः प्रज्ञाशौचयुक्तोगृहपतिः व्यंजनस्तमपिपूर्ववदुक्त्वास्वभूमौकृषिकर्मकारयेत् वाणिजकः क्षीणवृत्तिः वैदेहिकव्यंजनस्तंपूर्वव
धनमानाभ्यामात्मीकृत्यवाणिज्यंकारयेत् मुंडोजटिलोवावृत्तिकामस्तापसव्यंजकः सोपिकश्चिदाश्रमेवसन्बहुमुंडजटिलांतरेकपट-
शिष्यगणवृतोयुक्तराजोपकल्पितवृत्तिः तापस्यंकुर्यात्मासद्विमासांतरितंप्रकाशंबदरादिमुष्टिमश्नीयात् रहसिचराजोपकल्पितंआ
हारंकल्पयेत् शिष्याश्चास्यातीतानागतज्ञानादिकंख्यापयेयुः तेनबहुलोकवेष्टनमासाद्यसर्वेषांविश्वसनीयत्वात्सर्वकार्यमकार्यंचपृच्छे

अनुरागापरागौचप्रचारंमंडलस्यच १५४ मध्यमस्यप्रचारंचविजिगीषोश्चचेष्टितम् उदासीनप्रचारंच
शत्रोश्चैवप्रयत्नतः १५५ एताःप्रकृतयोमूलंमंडलस्यसमासतः अष्टौचान्याःसमाख्याताद्वादशैवतुताः
स्मृताः १५६

तिअन्यस्यकुक्रियादिकंकथयंस्तेचरूपंपंचवर्गंयथावच्चिंतयेत् एवंपंचवर्गप्रकल्प्यतेनैवपंचवर्गद्वारेणप्रतिराज
स्यातीयानांचामात्यादीनांचअनुरागविरागौज्ञात्वातदनुरूपंचिंतयेत् वक्ष्यमाणस्यराजमंडलस्यप्रचारंकःसंध्यर्थीकोवाविग्रहार्थी
त्यादिकंचिंतयेत् तंचज्ञात्वातदनुगुणंचिंतयेत् १५४ मध्यमंचेति अरिविजिगीषोर्भूम्यनंतरः संहतयोरनुग्रहसमर्थो
संहतयोः समर्थःसमध्यमः तस्यप्रचारंचिंतयेत् तथाप्रज्ञोत्साहगुणप्रकृतिसमर्योविजिगीषुस्तस्यचेष्टितंचिंतयेत् तथाविजि
मध्यमानांसंहतानामनुग्रहेसमर्थोनिग्रहेचासंहतानांसमर्थःउदासीनः तत्रप्रचारंचिंतयेत् शत्रोश्चत्रिविधस्यापिसहजस्यअकृत्रि
मस्यभूम्यनंतरस्यचपूर्वापेक्षयाप्रयत्नतःप्रचारंचिंतयेत् १५५ एताइत्यादि एतामध्यमाद्याश्चतस्रःप्रकृतयः संक्षेपेणमंडलमू
अपरासामभिधास्यमानप्रकृतीनामाद्याःप्रकृतामूलमित्युच्यते अन्याश्चाष्टौसमाख्याताः तद्यथाअग्रतोऽरिभूमीनांमित्रमरिमित्रं
मित्रमित्रंअरिमित्रमित्रंचेति एवंचतस्रःप्रकृतयोभवंतिपश्चाच्चपार्ष्णिग्राहआक्रंदः पार्ष्णिग्राहासारः आक्रंदासारइतिचतस्रः एव

मधीमकृतयोभवंतिपूर्वोक्ताभिश्चमध्यमारिविजिगीषूदासीनशत्रुरूपाभिः मूलप्रकृतिभिःसहद्वादशैताःप्रकृतयःस्मृताः १५६
अमात्येति आसांमूलप्रकृतीनांचतसृणांअथनांशाखाप्रकृतीनांउक्तानांएकैकस्याःप्रकृतेःअमात्यदेशदुर्गकोशदंडाख्याःपंच-
द्रव्यप्रकृतयोभवंतिएताश्चपंचद्वादशानांप्रत्येकंभवंत्योद्वादशगुणजाताःषष्ठिरेवद्रव्यप्रकृतयोभवंतितथामूलप्रकृतिभिश्चतसृभिः
शाखाप्रकृतिभिश्चाष्टाभिःसहसंक्षेपतोद्विसप्ततिप्रकृतयोमुनिभिःकथिताः १५७ अनंतरमिति विजिगीषोर्नृपस्यांतरितंच
तुर्दिशमप्यरिप्रकृतिंविजानीयात् तथातत्सेविनमपि अरिमेवविद्यात् अरेरनंतरंविजिगीषोर्नृपस्यैकांतरंमित्रप्रकृतिंविद्यात्त
योश्चारिमित्रयोःपरंविजिगीषोरुदासीनप्रकृतिंविद्यात् आसामेवप्रकृतीनामग्रपश्चाद्भावभेदेनव्यपदेशभेदः अत्राग्रवर्त्तिनोअरि
व्यपदेशएवपश्चाद्वर्त्तिनस्त्वरित्वेपिपार्ष्णिग्राहव्यपदेशः १५८ तानिति तान्सर्वान्नृपतीन्सामभेददानदंडैरुपायैर्यथासंभवंव्यस्तैः
समस्तैर्वशीकुर्यात् अथवापौरुषेणदंडेनैवकेवलेननयेनसाम्नैववाकेवलेनात्मवशान्कुर्यात्तथाचोक्तम् सामदंडौप्रशंसंतिनित्यं

अमात्यराष्ट्रदुर्गार्थदंडाख्याःपंचचापराः प्रत्येकंकथितात्द्येताःसंक्षेपेणाद्विसप्ततिः १५७
अनंतरमरिंविद्यादरिसेविनमेवच अरेरनंतरंमित्रमुदासीनंतयोःपरम् १५८ तान्सर्वानभिसंद
ध्यात्सामादिभिरुपक्रमैः व्यस्तैश्चैवसमस्तैश्चपौरुषेणनयेनच १५९ संधिंचविग्रहंचैवयानमास
नमेवच द्वैधीभावंसंश्रयंचषड्गुणांश्चिंतयेत्सदा १६० आसनंचैवयानंचसंधिंविग्रहमेवच कार्य्यं
वीक्ष्यप्रयुंजीतद्वैधंसंश्रयमेवच १६१ संधिंतुद्विविधंविद्याद्राजाविग्रहमेवच उभेयानासनेचैवद्वि
विधःसंश्रयःस्मृतः १६२

राशभिरुध्यये- १५९ संधिमिति तत्रोभयत्रानुग्रहार्थेहस्त्यश्वरथहिरण्यादिनिबंधनेनावाभ्याम-
न्योन्यस्योपकर्त्तव्यमितिनियमबंधःसंधिःवैरंविग्रहाचरणाद्याधिक्येनयानंशत्रुप्रतिगमनमुपेक्षणमासनंस्वार्थसिद्ध्येबलस्यद्वि-
धाकरणंद्वैधीभावःशत्रुपीडितस्यप्रबलतरराजांतराश्रयणंसंश्रयःएतान्गुणानुपकारकान्सर्वदाचिंतयेत्षड्गुणाश्रयणेसत्यात्मन
उपचयःपरस्यापचयःतेगुणमाश्रयेत् १६० आसनमिति संध्यादिगुणानांनैरपेक्ष्येणानुष्ठानमनंतरमुक्तंतदुचितानुष्ठानार्थोयं-
मारंभःआत्मसमृद्धिपरहान्यादिकंकार्यंवीक्ष्यसंधायासनंविगृह्यवायानंद्वैधीभावसंश्रयेचकेनचित्संधिंकेनचित्विग्रहंदद्यादिक
मनुतिष्ठेत् १६१ संधिंत्विति संध्यादीन्षडेवगुणान्द्विप्रकारान्जानीयात्इत्यविवक्षार्थम् १६२ ७- ७ ७

समानेति तात्कालिकफललाभार्थमुत्तरकालीनफललाभार्थंवायत्रराजांतरेणसहान्यंप्रतियानादिकर्मक्रियतेससमानयान कर्मासंधिः यःपुनस्त्वमत्रयाहि अहमत्रयास्यामिइतिसांप्रतिकोत्तरकालीनफलार्थितयैवक्रियतेसोऽसमानयानकर्मेत्येवंद्विःप्रकारः संधिर्ज्ञातव्यः १६३ स्वयमित्यादि शत्रुजयरूपप्रयोजनार्थशत्रोर्व्यसनादिकंआकलय्यवक्ष्यमाणमार्गशीर्षादिकालादन्यदायथोक्तकालएववास्वयंकृतइतिएकोविग्रहः अपकृतमपकारः मित्रस्यापकारेराजांतरेणकृतेमित्ररक्षार्थमपरोविग्रहइत्येवंद्विविधोविग्रहः गोविंदराजेनतुमित्रेणचैवापकृतइतिपठितंव्याख्यातंचयः परस्यशत्रुःसविजिगीषोर्मित्रंतेनापकारेक्रियमाणेव्यसनिनिरात्राविति तस्माल्लिखितपाठार्थोवृद्धेर्गोविंदराजतः मेधातिथिप्रभृतिभिर्लिखितोस्वीकृतोमया १६४ एकाकिनइत्यादि आत्ययिकंकार्यंशत्रोर्व्यसनादिकंतस्मिन् अकस्माज्जातेशक्तस्यैकाकिनोयानमशक्तस्यमित्रसहितस्यइत्येवंयानंद्विविध

समानयानकर्माचविपरीतस्तथैवच तदात्वायतिसंयुक्तःसंधिर्ज्ञेयोद्विलक्षणः १६३ स्वयंकृतश्चकार्यार्थमकालेकालएववा मित्रस्यचैवापकृतेद्विविधोविग्रहःस्मृतः १६४ एकाकिनश्चात्ययिके कार्येप्राप्तेयदृच्छया संहतस्यचमित्रेणद्विविधंयानमुच्यते १६५ क्षीणस्यचैवक्रमशोदैवात्पूर्वकृतेनवा मित्रस्यचानुरोधेनद्विविधंस्मृतमासनम् १६६ बलस्यस्वामिनश्चैवस्थितिःकार्यार्थसिद्धये द्विविधंकीर्त्यतेद्वैधंषाड्गुण्यगुणवेदिभिः १६७ अर्थसंपादनार्थंचपीड्यमानस्यशत्रुभिः साधुषुव्यपदेशार्थंद्विविधःसंश्रयःस्मृतः १६८

मभिधीयते १६५ क्षीणस्येति प्राग्जन्मार्जितेनदुष्कृतेनऐहिकेनवापूर्वकृतेनक्रमशः क्षीणहस्त्यश्वकोशादिकस्यसमृद्धस्यापिवामित्रानुरोधेनतत्कार्यरक्षार्थमित्येवंद्विविधमासनंमुनिभिःस्मृतम् १६६ बलस्येति साध्यस्वप्रयोजनसिद्ध्यर्थंबलस्यहस्त्यश्वादेःसेनाधिपत्याधिष्ठितस्यएकत्रशत्रुनृपोपद्रववारणार्थमवस्थानमन्यत्रदुर्गदेशेराज्ञःकतिचिद्बलाधिष्ठितस्यावस्थानमेवंसंध्यादिगुणषट्कोपकारज्ञैःद्विविधंद्वैधंकीर्त्यते १६७ अर्थेति शत्रुभिःपीड्यमानस्यशत्रुपीडानिवृत्त्याख्यप्रयोजनसिद्ध्यर्थमसत्यामपियानकालेपीडायांभाविशत्रुपीडनशंकयाअमुकमयंमहाबलंनृपतिमाश्रि

तइतिसर्वत्रव्यपदेशोत्पादनार्थंबलवंतसुपाश्रयणमेवांद्विविधःसंश्रयःस्मृतः १६८ यदेत्यादि यदोत्तरकालेनिश्चितमात्मनआधिक्यं जानीयात्तदात्वेतत्काले अल्पधनाद्युपक्षयः तदात्वल्पसंगीकृत्यापिसंधिमाश्रयेत् १६९ यदेति यदामात्यादिकाःसर्वाःप्रकृतीः दानसंमानाद्यैरतीवहृष्टामन्येत आत्मानंचहस्त्यश्वकोशाद्यैःशक्तित्रयेणउपचितंतदाविग्रहमाश्रयेत् १७० यदेत्यादि यदात्मीयममात्यादिसैन्यं हर्षयुक्तंधनादिनापुष्टंतत्वतोजानीयात्शत्रोश्चामात्यादिबलंविपरीतंतदातलक्षीकृत्ययायात् १७१ यदेत्यादि यदापुनर्वाहनेन हस्त्यश्वादिनाबलेनचामात्यादिविपत्त्यादिपरिक्षीणोभवेत्तदासामोपदानदानादिनाशत्रून्प्रसांत्वयन्प्रयत्नेनासनमाश्रयेत् १७२ मन्येतेति यदायदाराजासर्वप्रकारेणबलीयांसमशक्यसंधानंचशत्रुंबुध्येततदाकतिचिद्बलसहितःस्वयंदुर्गमाश्रयेत् बलैकदेशेनचशत्रु

यदावगच्छेदायत्यामाधिक्यंध्रुवमात्मनः तदात्वेचाल्पिकांपीडांतदासंधिंसमाश्रयेत् १६९ यदाप्रकृष्टामन्येतसर्वास्तुप्रकृतीर्भृशम् अत्युच्छ्रितंतथात्मानंतदाकुर्वीतविग्रहम् १७० यदामन्येतभावेन हृष्टंपुष्टंबलंस्वकम् परस्यविपरीतंचतदायायाद्रिपुंप्रति १७१ यदातुस्यात्परिक्षीणोवाहनेनबलेनच तदासीतप्रयत्नेनशनकैःसांत्वयन्नरीन् १७२ मन्यतारिर्यदाराजासर्वथाबलवत्तरम् तदाद्विधाबलंकृत्वासाधयेत्कार्यमात्मनः १७३ यदापरबलानांतुगमनीयतमोभवेत् तदातुसंश्रयेत्क्षिप्रंधार्मिकंबलिनंनृपम् १७४ निग्रहंप्रकृतीनांचकुर्याद्योरिबलस्यच उपसेवेततन्नित्यंसर्वयत्नैर्गुरुंयथा १७५ यदितत्रापिसंपश्येद्दोषंसंश्रयकारितम् सुयुद्धमेवतत्रापिनिर्विशंकःसमाचरेत् १७६

विरोधमाचरेत् एवंद्विधाबलं कृत्वामित्रसंग्रहादिकंस्वकार्यंसाधयेत् १७३ यदेति यदातुसैन्यानाममात्यादिप्रकृतिदोषादिनातिशयेनग्राह्योभवतिबलंद्वैधंविधाप्युर्गाश्रयणेनापिनात्मरक्षाक्षमः तदाशीघ्रमेवधार्मिकंबलवंतंचराजानमाश्रयेत्कीदृशंतंबलवंतमित्याह १७४ निग्रहमिति यासांदोषेणासौगमनीयतमोजातस्तासांप्रकृतीनांयस्माच्चशत्रुबलादस्यभयमुत्पन्नंतयोर्द्वयोरपियःसंश्रितोनिग्रहक्षमस्तंनृपंसर्वयत्नैर्गुरुमिवनित्यंसेवेत १७५ यदीति अगतिकाहिगतिःसंश्रयोनामतत्रापियदिसंश्रयकृतंदोषंपश्येत्तदानिःसंशयोमूलाशोभनमेव

युद्धंतस्मिन्कालेसमाचरेत् दुर्बलेनापिबलवतोजयदर्शनात् निहतस्यचस्वर्गप्राप्तिः १७६ सर्वोपायैरिति सर्वैःसामादिभिरु
पायैःनीतिज्ञोराजातथायतेतयथास्यमित्रोदासीनशत्रवोऽभ्यधिकानभवंतिआधिक्येहितेषामसौग्राह्योभवति धनलोभेनमि-
त्रस्यापिशत्रवापत्तेः १७७ आयतिरिति सर्वेषांकार्याणामल्पानामपिआयतिमुत्तरकालेगुणंदोषंविचारयेत् वर्त्तमानकालं
चशीघ्रसंपादनाद्यर्थंविचारयेत् अतीतानांचसर्वकार्याणांगुणदोषौकिमेषांकृतंविघटितंवाकिंवावशिष्टमित्येवंयथावद्विचारयेत्
यस्मात् १७८ आयेति यःकार्याणांआगामिकगुणदोषज्ञःसगुणवत्कार्यमारभतेदोषवत्परित्यजतियश्चवर्त्तमानकाले
वावधार्यकार्यंकरोतिअतीतेकार्येयःकार्यशेषज्ञःसतत्कार्यसमाप्तौतत्फलंलभतेयस्मादेवंविधकालत्रयसावधानत्वान्नकदाचित्

सर्वोपायैस्तथाकुर्यान्नीतिज्ञःपृथिवीपतिः यथास्याभ्यधिकानस्युर्मित्रोदासीनशत्रवः १७७ आ
यतिंसर्वकार्याणांतदात्वञ्चविचारयेत् अतीतानाञ्चसर्वेषांगुणदोषौचतत्त्वतः १७८ आयत्यां
गुणदोषज्ञस्तदात्वेक्षिप्रनिश्चयः अतीतेकार्यशेषज्ञःशत्रुभिर्नाभिभूयते १७९ यथैनन्नाभि
संदध्युर्मित्रोदासीनशत्रवः तथासर्वंसंविदध्यादेषसामासिकोनयः १८० यदातुयानमातिष्ठेद
रिराष्ट्रंप्रतिप्रभुः तदानेनविधानेनयायादरिपुरंशनैः १८१ मार्गशीर्षेशुभेमासियायाद्यात्रांमही
पतिः फाल्गुनंवाथचैत्रंवामासौप्रतियथाबलम् १८२

शत्रुभिरभिभूयतेकिंबहुना १७९ यथेत्यादि यथै
नंराजानंमित्रादयउक्तानबाधेरन्तथासर्वंसंविधानंकुर्यात् इत्येषसांक्षेपिकोनयोनीतिः १८० यदेति यदापुनःशक्तःसन्श
त्रुराष्ट्रंप्रतियात्रामारभेत्तदा अनेनवक्ष्यमाणप्रकारेणशत्रुदेशमत्वरमाणोगच्छेत् १८१ मार्गशीर्षइति यश्चतुरंगबलोपेतोराजा
करिरथादिगमनविलंबेनविलंबितप्रयाणःतथाहैमंतिकसस्यबहुलंचपरराष्ट्रंजिगमिषुःसतुपगमनायशोभनेमार्गशीर्षेमासि
यात्रांकुर्यात् यःपुनश्चलप्रायोनृपतिःशीघ्रगतिर्वासर्वसस्यबहुलंपरराष्ट्रंयियासुःसफाल्गुनेचैत्रेवामासेस्वबलयोग्यकालानति
क्रमेणयायात् अतएवमन्वर्थव्यापारपरंसंक्षेपेणयाज्ञवल्क्यवचनम् यदासस्यगुणोपेतंपरराष्ट्रंतदाव्रजेत् १८२ ७ ७

अन्येष्विति उक्तकालव्यतिरिक्तेषु यदात्मनो निश्चितं जयमवगच्छेत् तदा स्वबलयोग्यकाले ग्रीष्मादावपि हस्त्यश्वादिबलश्रायो वि
गृह्यैव यात्रां कुर्यात् - शत्रोश्चामात्यादिप्रकृतिगोचरदंडपारुष्यादिव्यसने जाते । रिपक्षभूतायां तत्प्रकृतावपि उक्तकालादन्यत्रापि-
यायात् १८३ कृत्वेत्यादि संशोध्येति मूलेस्वीयदुर्गराष्ट्ररूपे पार्ष्णिग्राहसंविधानं प्रधानपुरुषाधिष्ठितरक्षार्थं सैन्यैकदेशस्था
पनरूपं प्रतिविधानं कृत्वा यात्रोपयोगि च वाहनायुधवर्मयात्राविधानं यथाशास्त्रं कृत्वा परमंडलगतस्य च येनास्यावस्थानं भवति त
दुपगृह्य तदीयान् भृत्यपक्षानात्मसात्कृत्वा चारांश्च कापटिकादीन् शत्रुदेशवार्त्ताज्ञापनार्थं प्रस्थाप्य सम्यक्कृतया जांगलानूपाटवि
कविषयभेदेन त्रिविधं पंथानं मार्गं शोधिततरुगुल्मादिच्छेदनिम्नोन्नतादिसमीकरणादिना संशोध्य तथा हस्त्यश्वरथपदातिसेना-
कर्मकरात्मकं षड्विधं बलं यथोपयोगमाहारौषधसत्कारादिना संशोध्य सांपरायिकं संपरायः संग्रामः तदुपचितविधिना शत्रुदेशम

अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयम् तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः १८३ कृत्वा
विधानं मूले तु यात्रिकं च यथाविधि उपगृह्यास्पदं चैव चारान्सम्यग्विधाय च १८४ संशोध्य त्रिवि
धं मार्गं षड्विधं च बलं स्वकम् सांपरायिककल्पेन यायादरिपुरं शनैः १८५ शत्रुसेविनि मित्रे च गूढे यु
क्ततरो भवेत् गतप्रत्यागते चैव स हि कष्टतरो रिपुः १८६ दंडव्यूहेन तन्मार्गं यायात्तु शकटेन वा व
राहमकराभ्यां वा सूच्या वा गरुडेन वा १८७

त्वरया गच्छेत् १८४ १८५ शत्रुसेविनीति यन्मित्रं गूढं कृत्वा शत्रुं
सेवते यश्च भृत्यादिः पूर्वं विरागाद्गतः पश्चादागतः तयोः सावधानो भवेत् यस्मात्तावतिशयेन दुर्निग्रहो रिपुः १८६ दंडेति दंडाकृ
तिर्व्यूहरचनादिदंडव्यूहः एवं शकटादिव्यूहा अपि तत्राग्रे बलाध्यक्षो मध्ये राजा पश्चात्सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपे घोटकाः
ततः पदातयः इत्येवं कृतरचनो दीर्घः सर्वतः समविन्यासो दंडव्यूहस्तेन तद्यातव्यं मार्गं सर्वतो भये सति यायात् सूच्याकाराग्रः पश्चा
त्पृथुलः शकटव्यूहस्तेन पृष्ठतो भये सति गच्छेत् सूक्ष्ममुखः पश्चाद्भागः पृथुमध्यो वराहव्यूहः एष एव पृथुतरमध्यो गरुडव्यूहः
ताभ्यां पार्श्वयोर्भये सति व्रजेत् वराहविपर्ययेण मकरव्यूहः तेनाग्रे पश्चाच्च उभयत्र भये सति गच्छेत् पिपीलिकापंक्तिरिव अग्रप

श्वाद्भावेनसंहतरूपतयायत्रयत्रसैनिकावस्थानंसशीघ्रवीरपुरुषमुखः सूचीव्यूहः तेनाग्रतोभयेसतियायात् १८७ यतइत्या
दि यस्यादिशः शत्रुभयमाशंकेततस्यामेव बलंविस्तारयेत्समविस्तृतपरिमंडलोमध्योपविष्टजिगीषुः पद्मव्यूहः तेनपुरान्निर्ग-
त्यसर्वदाकपटनिवेशनंकुर्यात् १८८ सेनापतीति हस्त्यश्वरथपदात्यात्मकस्यांगदशकस्यैकः पतिः कार्यः सचपत्तिकउच्यते पत्तिकद
शकस्यैकः पतिः सेनापतिरुच्यतेतद्दशकस्यैकः सेनानायकः सएवचबलाध्यक्षः सेनापतिबलाध्यक्षौसमस्तासुदिक्षुसंघर्षयुद्धार्थं
नियोजयेत् यस्याश्चदिशोयदाभयमाशंकेत्तदातामग्रेदिशंकुर्यात् १८९ गुल्मानित्यादि गुल्मान्सैन्यैकदेशान्आप्तपुरुषाधि
नूस्थानापसरणयुद्धार्थंकृतभेरीपटहशंखादिसंकेतान्अवस्थानयुद्धयोः प्रवीणान्निर्भयान् अव्यभिचारिणः सेनापतिबलाद
नदूरतः सर्वदिक्षुपरव्यप्रवेशवारणायशत्रुचेष्टापरिज्ञानायचनियोजयेत् १९० संहतेति अल्पान्योधान्संहतान्कृत्वाबहून्पुन-

यतश्च भयमाशंकेत्ततो विस्तारयेद्बलम् पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् १८८ सेनापति
बलाध्यक्षौ सर्वदिक्षु निवेशयेत् यतश्च भयमाशंकेत्प्राचीं तां कल्पयेद्दिशम् १८९ गुल्मांश्च स्थापये
दाप्तान् कृतसंज्ञान्समंततः स्थाने युद्धे च कुशलानभीरूनविकारिणः १९० संहतान्योधयेदल्पान्
कामं विस्तारयेद्बहून् सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत् १९१ स्यंदनाश्वैः समे युद्ध्येदनूपे नौ
द्विपैस्तथा वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले १९२ कुरुक्षेत्रांश्च मत्स्यांश्च पंचालान्शूरसेनजा
न् दीर्घांल्लघूंश्चैव नरानग्रानीकेषु योजयेत् १९३ र्यथेष्टंविस्तारयेत् सूच्यापूर्वोक्तयावज्राख्येनव्यूहेनत्रिधा
व्यवस्थितबलेनरचयित्वायोधान्योधयेत् १९१ स्यंदनाश्वैरित्यादि समभूभागेरथाश्वेनयुध्येततत्रतेनयुद्धसामर्थ्यात्तदा
नुगतोदकेनौकाहस्तिभिः तरुगुल्मावृतेधन्विभिर्गर्त्तकंटकपाषाणादिरहितस्थलेखड्गफलककुंताद्यैरायुधैर्युध्येत १९२
रुक्षेत्रानिति कुरुक्षेत्रभवान्मत्स्यान्विराटदेशनिवासिनः पंचालान् कान्यकुब्जाहिच्छत्रोद्भवान् शूरसेनजान्माथुरान्प्रायेण
पृथुशरीरत्वाच्छौर्याहंकारयोगात्सेनाग्रेयोजयेत् तथान्यदेशोद्भवानपिदीर्घलघुदेहान्मनुष्यान्युद्धाभिमानिनः सेनाग्रएवयो
जयेत् १९३ प्रहर्षयेदित्यादि बलंरचयित्वाजयेधर्मलाभः अभिमुखहतस्यस्वर्गप्राप्तिः पलायनेतुप्रभुदुरितग्रहणंनरकगमनं

चइत्याद्यर्थवादैः युद्धार्थमोत्साहयेत् तांश्चयोधान्केनाभिप्रायेणहृष्यंतिकुप्यंतिवेतिपरीक्षयेत् तथायोधानामरिभिःसहयु
ध्यमानानामपिसोपध्यनुपधिचेष्टाबुध्येत १९४ उपेत्यादि दुर्गाश्रयमदुर्गाश्रयगतंरिपुमयुध्यमानमप्यावेष्ट्यासीत अस्यच
देशमुत्सादयेत् तथाघासान्नोदकेंधनानिसर्वदाऽस्यापद्रव्यसंमिश्रणादिनादूषयेत् १९५ भिंद्यादित्यादि शत्रोरुपजीव्यानितडा
गादीनिनाशयेत् तथादुर्गप्राकारादीन्भिंद्यात् तत् परिखाश्चभेदेनपूरणादिनानिरुदकाः कुर्यात् एवंच शत्रून्शंकितमेवसस्यगव-
स्कंदयेत्तथाशक्तिगृण्हीयात् रात्रौचढक्काकाहलिकादिशब्देनवित्रासयेत्तदानींच १९६ उपेत्यादि उपजापार्हान्रिपुवंश्यान्राज्या
र्थिनः स्वस्थानमात्यादींश्चभेदयेत् उपजपेनात्मापकृतांचतेषांचेष्टांजानीयात् शुभग्रहदशादिनाशुभफलयुक्तेदैवेनगतेनिर्भयो
जयेप्सुर्युध्येत् १९७ साम्नेत्यादि प्रीत्यादरदर्शनहितकथनाद्यात्मकेनसाम्नाहस्त्यश्वरथहिरण्यादीनांचदानेनतत्प्रकृतीनांत

प्रहर्षयेद्बलंव्यूह्यतांश्चसम्यक्परीक्षयेत् चेष्टाश्चैवविजानीयादरीन्योधयतामपि १९४ उपरु
ध्यारिमासीतराष्ट्रंचास्योपपीडयेत् दूषयेच्चास्यसततंयवसान्नोदकेंधनम् १९५ भिंद्याच्चैवतडा
गानिप्राकारपरिखास्तथा समवस्कंदयेच्चैनंरात्रौवित्रासयेत्तथा १९६ उपजप्यानुपजपेद्बुध्येतैव
चतत्कृतम् युक्तेचदैवेयुध्येतजयप्रेप्सुरपेतभीः १९७ साम्नादानेनभेदेनसमस्तैरथवापृथ
क् विजेतुंप्रयतेतारीन्नयुद्धेनकदाचन १९८ अनित्योविजयोयस्माद्दृश्यतेयुध्यमानयोः प-
राजयश्चसंग्रामेतस्माद्युद्धंविवर्जयेत् १९९ त्रयाणामप्युपायानांपूर्वोक्तानामसंभवे तथायुध्ये
तसंपन्नोविजयेतरिपून्यथा २०० दनुयायिनांचराज्यार्थिनांभेदेनएतैःसमस्तैर्व्यस्तैर्वायथासामर्थ्यमरीन्जेतुं
यत्नंकुर्यात्नपुनःकदाचिद्युद्धेन १९८ अनित्येति यस्माद्युध्यमानयोर्बहुलबलस्याप्यल्पबलस्याप्यनपेक्षमेवानियमेनजय
पराजयौदृश्येतेतस्मात्सत्सूपायांतरेषुयुद्धंपरिहरेत् १९९ त्रयाणामित्यादि पूर्वोक्तानांत्रयाणामपिसामादीनामुपायानामसं
भवक्लेशातिजयपराजयसंदेहेपितथाप्रबलवान्सम्यग्युध्येतयथाशत्रून्जयेत् यतोजयेऽर्थलाभोअभिमुखमरणेचस्वर्गप्रा-
प्तिःनिःसंदिग्धेतुपराजयेयुद्धादपसरणंसाधीयोयथावक्ष्यतिआत्मानंसर्वदारक्षेद्इतिमेधातिथिर्गोविंदराजो २०० ६५

जित्वेति परराष्ट्रं जित्वातत्रयेदेवाः तान् धर्मप्रधानांश्चब्राह्मणान् भूमिसुवर्णादिदानसंमानादिभिः
दानादिनैवचेदंपूजनंतदाहयाज्ञवल्क्यः नातःपरतरोधर्मोनृपाणांयदुपार्जितम् विप्रेभ्योदीयतेद्रव्यंप्रजाभ्यश्चाभयंसदा त-
थादेवब्राह्मणार्थंमयैतद्दत्तमितितद्देशवासिनांपरिहारान्दद्यात् तथास्वाभिभक्त्यायैरस्माकमपकृतंतेषांमयाक्षांतमिदानीन्नि-
र्भयाःसंतःस्वस्वंस्वव्यापारमनुतिष्ठंत्विति अभयानिख्यापयेत् २०१ सर्वेषामिति एषांशत्रुनृपामात्यानांसर्वेषामेवसंक्षेपतोऽभि-
प्रायंज्ञात्वातस्मिन्राष्ट्रेबलनिहतराजवंश्यमेवराज्येऽभिषेचयेत् इदंकार्यंत्वयाइदन्नेतितस्यतदमात्यानांचनियमंकुर्यात् २०२
प्रमाणानीति तेषांचपरकीयानांधर्मादनपेतानाचारान्देशधर्मतयाशास्त्रेणाभ्युपेतान्प्रमाणीकुर्यात् एनंचाभिषिक्तममा-
त्यादिभिः सहरत्नादिदानेनपूजयेद्यस्मात् २०३ आदानमिति यद्यप्यभिलषितानांद्रव्याणांग्रहणंअप्रियकरंदानंचप्रिय-

जित्वासंपूजयेद्देवान्ब्राह्मणांश्चैवधार्मिकान् प्रदद्यात्परिहारांश्चख्यापयेदभयानिच २०१ स-
र्वेषांतुविदित्वैषांसमासेनचिकीर्षितम् स्थापयेत्तत्रतद्वंश्यंकुर्याच्चसमयक्रियाम् २०२ प्रमाणा-
निचकुर्वीततेषांधर्म्यान्यथोदितान् रत्नैश्चपूजयेदेनंप्रधानपुरुषैःसह २०३ आदानमप्रिय-
करंदानंचप्रियकारकम् अभीप्सितानामर्थानांकालेयुक्तंप्रशस्यते २०४ सर्वंकर्मेदमायत्तंविधा-
नेदैवमानुषे तयोर्दैवमचिंत्यंतुमानुषेविद्यतेक्रिया २०५ सहवापिव्रजेद्युक्तःसंधिंकृत्वाप्रयत्न-
तः मित्रंहिरण्यंभूमिंवासंपश्यंस्त्रिविधंफलम् २०६

कारकमित्युत्सर्गः तथापिसमयविशेषेदानमादानंच
प्रशस्यतेतस्मात्तस्मिन्कालएवंपूजयेत् २०४ सर्वमित्यादि यत्किंचित्संपाद्यंतत्प्राग्जन्मार्जितसुकृतदुष्कृतरूपेकर्मणि दै-
वशब्दाभिधेयेतथेहलोकार्जितमानुषशब्दवाच्येव्यापारआयत्तंतयोर्मध्येदैवंचिंतयितुमशक्यंमानुषेतुपर्यालोचनमस्ति
अतोमानुषद्वारेणैवकार्यसिद्धयेयतितव्यम् २०५ सहेत्यादि एवमुपक्रमणीयेनशत्रुणायुद्धंकार्यंयदिवासएवमित्रंतेनच
दत्तंहिरण्यंभूम्येकदेशोवार्पितंएतत्त्रयंयात्राफलम् तेनसहसंधिंकृत्वायत्नवान्व्रजेत् २०६

पार्ष्णिग्राहमित्यादि विजिगीषोररिंप्रतिनिर्यातस्ययः पृष्ठवर्त्तीनृपतिः देशाक्रमणाद्याचरतिसपार्ष्णिग्राहः तस्यतथाकुर्वतोयो नियामकः तस्यानंतरोनृपतिः सआक्रंदः तावपेक्ष्ययातव्यंमित्रीभूतादमित्राद्यायात्राफलंगृण्हीयात्तावनपेक्ष्यगृण्हन्कदाचि त्तत्कृतेनदोषेणगृह्यते २०७ हिरण्यभूमीति सुवर्णभूमिलाभेनतथाराजानवृद्धिमेतियथेदानींकृशमप्यागामिकालेवृद्धिसुतं स्थिरंमित्रंलब्ध्वावर्द्धते २०८ धर्मज्ञमिति धर्मज्ञंकृतोपकारस्यस्मर्त्तृसानुरागमनुरक्तंस्थिरकार्यारंभंभीतिमन्नकृतिकंयत्त- न्मित्रमतिशयेनशस्यते २०९ प्राज्ञमित्यादि विद्वांसंमहाकुलंविक्रांतंचतुरंदातारंउपकारस्मर्त्तारंसुखदुःखयोरेकरूपंशत्रुंदु रुच्छेदंपंडितावदंतितेनैवंविधशत्रुणासहसंधातव्यम् २१० आर्यतेत्यादि साधुत्वंपुरुषविशेषज्ञताविक्रांतत्वंकृपालुत्वंसर्वदा

पार्ष्णिग्राहंचसंप्रेक्ष्यतथाक्रंदंचमंडले मित्रादप्यमित्राद्यायात्राफलमवाप्नुयात् २०७ हिरण्य भूमिसंप्राप्त्यापार्थिवोनतथैधते यथामित्रंध्रुवंलब्ध्वाकृशमप्यायतिक्षमम् २०८ धर्मज्ञंच कृत- ज्ञंचतुष्टप्रकृतिमेवच अनुरक्तंस्थिरारंभंलघुमित्रंप्रशस्यते २०९ प्राज्ञंकुलीनंशूरंचदक्षंदातारमे वच कृतज्ञंधृतिमंतंचकष्टमाहुररिंबुधाः २१० आर्यतापुरुषज्ञानंशौर्यंकरुणवेदिता स्थौलल क्ष्यंचसततमुदासीनगुणोदयः २११ क्षेम्यांसस्यप्रदांनित्यंपशुवृद्धिकरीमपि परित्यजेन्नृपोभू मिमात्मार्थमविचारयन् २१२ आपदर्थंधनंरक्षेद्दारान्रक्षेद्धनैरपि आत्मानंसततंरक्षेद्दारैर- पिधनैरपि २१३

चस्थौललक्ष्यंबहुप्रदत्वंअतएवस्फर्वदान्यःस्थूललक्ष्यदानशौंडाबहुप्रदेइत्याभिधानिकाः स्थौल लक्ष्यमर्थेअसूक्ष्मदर्शित्वमितितुमेधातिथिगोविंदराजयोःपदार्थकथनमनोरमं एतदुदासीनगुणसामग्र्यंतस्मादेवंविधमुदा सीनमाश्रित्यउक्तलक्षणेनाप्यरिणासहयोद्धव्यम् २११ क्षेम्यामिति अनामयादिकल्याणक्षमासपिनदीमातृकतयासर्वदासर्व सस्यप्रदामपिप्रचुरतृणादियोगात्पशुवृद्धिकरीमपिभूमिमात्मरक्षार्थंअविलंबमानोराजानिजरक्षाप्रकारांतराभावात्परित्यजेत् परमात्मसर्वविषयोयंधर्मःस्मर्यते २१२ आपदर्थमित्यादि आपन्निवारणार्थंधनंरक्षणीयंधनपरित्यागेनापिदारान्रक्षेत् आ

त्मानंपुनः सर्वदादाराधनपरित्यागेनापिरक्षेत्सर्वेन एवात्मानंगोपायीतमितिश्रुतेःशास्त्रीयमरणव्यतिरेकेणात्मरक्षाइत्युप
देशात् २१३ सहेत्यादि कोशक्षयप्रकृतिकोपामित्रस्यव्यसनादिकाः सर्वाआपदोयुगपदतिशयेनउत्पन्नाज्ञात्वानमोहमुपे
यात् अपितुव्यस्तान्समस्तान्वासामादीनुपायान्शास्त्रज्ञःसंप्रयुंजीत २१४ उपेतारमिति उपेतारंआत्मानंउपेयंप्राप्तव्यंउ-
पायाः सामादयः सर्वैतेचपरिपूर्णाएतत्त्रयमवलंब्ययथासामर्थ्यंप्रयोजनसिद्धयेयत्नंकुर्यात् २१५ एवमिति एवमुक्तप्रकारेण
सर्वराजवृत्तंमंत्रिभिःसहविचार्यअनंतरमायुधाभ्यासादिनाव्यायामंकृत्वामध्यान्हेस्नानादिकमाध्यान्हिकंकृत्यंनिर्वर्त्यभोक्तुमं
तःपुरंविशेत् २१६ तत्रेति तत्रांतःपुरेआत्मतुल्यैर्भोजनकालवेदिभिरभेद्यैः सूपकारादिभिः कृतंसुष्ठुचपरीक्षितंचकोशादिद

सहसर्वाःसमुत्पन्नाः प्रसमीक्ष्यापदोभृशम् संयुक्तांश्चवियुक्तांश्चसर्वोपायान्सृजेद्बुधः २१४
उपेतारमुपेयंचसर्वोपायांश्चकृत्स्नशः एतत्त्रयंसमाश्रित्यप्रयतेतार्थसिद्धये २१५ एवंसर्वमिदं
राजासहसंमंत्र्यमंत्रिभिः व्यायाम्याप्लुत्यमध्यान्हे भोक्तुमंतःपुरंविशेत् २१६ तत्रात्मभूतैःकालज्ञै
रहार्यैःपरिचारकैः सुपरीक्षितमन्नाद्यमद्यान्मंत्रैर्विषापहैः २१७ विषघ्नैरगदैश्चास्यसर्वद्रव्या
णियोजयेत् विषघ्नानिचरत्नानिनियतोधारयेत्सदा २१८ परीक्षिताः स्त्रियश्चैनं व्यजनोदकधू
पनैः वेषाभरणसंशुद्धाःस्पृशेयुःसुसमाहिताः २१९ एवंप्रयत्नंकुर्वीतयानशय्यासनाशने स्नाने
प्रसाधनेचैवसर्वालंकारकेषुच २२०

श्निनसविषमन्नंदृष्ट्वाचकोराक्षिणीरक्तेभवतःविषापहैर्मंत्रैर्जपितमन्न
मद्यात् २१७ विषघ्नैरिति विषनाशिभिरौषधैः सर्वाणिभोज्यद्रव्याणियोजयेत् विषहरणानिचरत्नानियत्नवान्सर्वदाधारये
त् २१८ परीक्षिताइति स्त्रियश्चगूढचारद्वारेणकृतपरीक्षागुप्तायुधग्रहणविषलिप्ताभरणशंकयानिरूपितवेषाभरणाअन
व्यजनस्तःचामरस्नानपानाद्युदकधूपनैः एवंराजानंपरिचरेयुः २१९ एवमिति एवंविधपरीक्षादिप्रयत्नंवाहनशय्यासनाशन
स्नानानुलेपनेषुसर्वेषुचालंकरणार्थेषुकुर्यात् २२०

७ ७ ७

भक्तवानिति कृतभोजनश्चतत्रैवांतःपुरेभार्याभिःसहक्रीडेत्कालानतिक्रमेणाचसप्तमेदिवसस्यभागेतत्रविहृत्याष्टमेभागेपु
नःकार्याणिचिंतयेत् २२१ अलंकृतइति कृतालंकारःसन्नायुधजीविनंवाहनानिहस्त्यश्वादीनिसर्वाणिचशस्त्राणिखड्गादी
निअलंकाररचनादीनिपश्येत् २२२ संध्यांति गत्वेति ततःसंध्योपासनंकृत्वातस्मात्प्रदेशात्कक्षांतरंविविक्तप्रकोष्ठावकाशम
न्यद्गत्वागृहाभ्यंतरेधृतशस्त्रोरहस्याभिधायिनांचराणांस्वव्यापारंशृणुयात्ततस्तंचरंसंप्रेष्यपरिचारिकस्त्रीवृतःपुनर्भोक्तुमंतः
पुरंविशेत् २२३ २२४ तत्रेत्यादि तत्रांतःपुरेवादित्रशब्दैःश्रुतिसुखैःप्रहर्षितःपुनःकिंचिद्भुक्त्वानातितृप्तःकालानतिक्रमे
णागतार्द्धप्रहरायांरात्रौस्वप्यात् ततोरात्रेःपश्चिमयामेचविश्रांतःसन्नुत्तिष्ठेत् २२५ एतदिति एतद्यथोक्तप्रकारप्रजारक्षणा

भुक्तवान्विहरेच्चैवस्त्रीभिरंतःपुरेसह विहृत्यतुयथाकालंपुनःकार्याणिचिंतयेत् २२१ अलं
कृतश्चसंपश्येदायुधीयंपुनर्जनम् वाहनानिचसर्वाणिशस्त्राण्याभरणानिच २२२ संध्यांचोपा
स्यशृणुयादंतर्वेश्मनिशस्त्रभृत् रहस्याख्यायिनांचैवप्रणिधीनांचचेष्टितम् २२३ गत्वाकक्षां
तरंत्वन्यत्समनुज्ञाप्यतंजनम् प्रविशेद्भोजनार्थंचस्त्रीवृतोऽन्तःपुरंपुनः २२४ तत्रभुक्त्वापुनःकिं
चित्तूर्यघोषैःप्रहर्षितः संविशेत्तुयथाकालमुत्तिष्ठेच्चगतक्लमः २२५ एतद्विधानमातिष्ठेदरोगः
पृथिवीपतिः अस्वस्थःसर्वमेतत्तुभृत्येषुविनियोजयेत् २२६ इतिमानवेधर्मशास्त्रेभृगु
प्रोक्तायांसंहितायांराजधर्मोनामसप्तमोऽध्यायः ७ ॐ ॐ ॐ ॐ
व्यवहारान्दिदृक्षुस्तुब्राह्मणैःसहपार्थिवः मंत्रज्ञैर्मंत्रिभिश्चैवविनीतःप्रविशेत्सभाम् १

द्नीरोगोराजास्वयमनुतिष्ठेत् अस्वस्थःपुनःसर्वमेतद्योग्यश्रेष्ठामात्येषुसमर्पयेत् २२६ इतिश्रीकुल्लूकभट्टवि
रचितायांमन्वर्थमुक्तावल्यांसप्तमोऽध्यायः ७ ॐ ॐ ॐ व्यवहारानिति एवंविधविपक्षमहीक्षिद्भ्यः
प्रजानांरक्षणादयास्तवृत्तिस्तासामेवेतरेतरविवादजपीडापरिहारार्थम् ऋणादानाद्यष्टादशविवादेविरुद्धार्थार्थिप्रत्यर्थिवा

स्यजनितसंदेहहारी विचारएवव्यवहारः तदाह कात्यायनः विनानार्थेहसंदेहेहरणंहारउच्यते नानासंदेहहरणाद्व्यवहार इतिस्मृतः तान्व्यवहारान्द्रष्टुमिच्छन्पृथिवीपतिर्वक्ष्यमाणैरमात्यैश्चससमाध्यायोक्तपंचांगमंत्रैःसहविनीतोदान्त्यार्णिपादचापलविरहादलुन्द्धतः अविनीतोहिनृपेवादिप्रतिवादिनांप्रतिभाक्षयादसम्यगभिधानेतत्त्वनिर्णयोनस्यात् तादृशोवक्ष्यमाणां सभांप्रविशेत् व्यवहारदर्शनंचेदंप्रजानामितरेतरपीडायांतत्त्वनिर्णयेरक्षणार्थंवक्ष्यमाणदृष्टादृष्टात्मककरणफलेनैवफलवत् १ तत्रेत्यादि तस्यांचसभायांकार्यगौरवापेक्षायामुपविष्टोलघुनिकार्येउत्थितोपिचापाणिशब्दोबाहुपरः दक्षिणपाणिंउद्यम्य अनुद्भवेषालंकारः पूर्वत्रांगेंद्रियानौद्धत्यमुक्तंतादृशःकार्याणिविचारयेत् २ प्रत्यहमित्यादि तानिच ऋणादानादीनिकार्याणि अष्टादशसुव्यवहारमार्गेषुविषयेषुपठितानिदेशजातिकुलव्यवहारगतैःशास्त्रावगतैःसाक्षिद्व्यादिभिर्हेतुभिःपृथक्पृथक्प्रत्यहंविचारयेत् तान्येवाष्टादशगणयति ३ तेषामिति वेतनस्यैवचेति सीमेति स्त्रीपुंसेति तेषामष्टादशानांमध्येआदाविहऋणादानंक्वि

तत्रासीनःस्थितोवापिपाणिमुद्यम्यदक्षिणम् विनीतवेषाभरणःपश्येत्कार्याणिकार्यिणाम् २
प्रत्यहंदेशदृष्टैश्चशास्त्रदृष्टैश्चहेतुभिः अष्टादशसुमार्गेषुनिबद्धानिपृथक्पृथक् ३ तेषामाद्यमृ-
णादानन्निक्षेपोऽस्वामिविक्रयः संभूयचसमुत्थानंदत्तस्यानपकर्मच ४ वेतनस्यैवचादानंसंविद
श्चव्यतिक्रमः क्रयविक्रयानुशयोविवादःस्वामिपालयोः ५

यते तस्यस्वरूपमुक्तंनारदेन ऋणंदेयमदेयंचयेन यत्रयथाचरेत् दानग्रहणधर्माश्चतदृणादानमुच्यते ततश्चस्वधनस्यान्यस्मिन्अर्पणरूपोनिःक्षेपः अस्वामिनाचकृतोविक्रयः संभूयवणिगादीनांक्रियानुष्ठानम् दत्तस्यधनस्यापात्रबुद्ध्याक्रोधादिनावाग्रहणम् कर्मकरस्यभृतेरदानम् कृतव्यवस्थातिक्रमः क्रयेविक्रयेचकृतेपश्चात्तापाद्विप्रतिपत्तिः स्वामिपशुपालयोर्विवादः ग्रामादिसीमाविप्रतिपत्तिः वाक्पारुष्यमाक्रोशनादि दंडपारुष्यंताडनादि स्तेयमन्निन्हवेनधनग्रहणम् साहसंप्रसह्यधनहरणादि स्त्रियाश्चपरपुरुषसंपर्कः स्त्रीसहितस्य व्यवस्था पैतृकादिधनस्यचविभागः अक्षादिक्रीडाधर्मव्यवस्थापनपूर्वकंपक्षिमेषादिप्राणियोधनम् इत्येवअष्टादशएतानि व्यवहारप्रवृत्तेःस्थानानिसमाह्वयस्यप्राणिद्यूतरूपत्वेनद्यूतावांतरभेदत्वात् अष्टादशसंख्योपपत्तिः ४ ५ ६

६ ७ एषित्यादि एषुऋणादानादिषुव्यवहारस्थानेषुबाहुल्येनविवादंकुर्वतांमनुष्याणांअनादिपारंपर्यागतत्वेननित्यंधर्मम
वलंब्यकार्यनिर्णयंकुर्यात् भूयिष्ठशब्देनान्यान्यपिविवादपदानिसंतीतिसूचयति तानिचप्रकीर्णकशब्देननारदाद्युक्तानि अन-
एवनारदः नदृष्टंयच्चपूर्वेषुसर्वंतत्स्यात्प्रकीर्णकमिति ८ यदेत्यादि यदाकार्यांतराकुलतयारोगादिनावाराजास्वयंकार्यदर्शनंन
कुर्यात्तदातद्दर्शनार्थंकार्यदर्शनाभिज्ञंब्राह्मणंनियुंजीत ९ सोऽस्येति सब्राह्मणोऽस्यराज्ञोद्रष्टव्यानिकार्याणित्रिभिर्ब्राह्मणैःस
भायांसाधुभिर्धार्मिकैः कार्यदर्शनाभिज्ञैर्वृतः तामेवसभांप्रविश्योपविश्यस्थितोवानतुचंक्रम्यमाणः तस्यचित्तव्याक्षेपसंभवत्वात्ता
दृशाऋणादानादीनिकार्याणिपश्येत् १० यस्मिन्निति यस्मिन्स्थानेऋग्यजुःसामवेदिनस्त्रयोपिब्राह्मणाअवतिष्ठंतेराज्ञाधि

सीमाविवादधर्मश्चपारुष्येदंडवाचिके स्तेयंचसाहसंचैवस्त्रीसंग्रहणमेवच ६ स्त्रीपुंधर्मोविभा
गश्चद्यूतमाह्वयएवच पदान्यष्टादशैतानिव्यवहारस्थिताविह ७ एषुस्थानेषुभूयिष्ठंविवादंचरतां
नृणाम् धर्मंशाश्वतमाश्रित्यकुर्यात्कार्यविनिर्णयम् ८ यदास्वयंनकुर्यात्तुनृपतिःकार्यदर्शनम्
तदानियुंज्याद्विद्वांसंब्राह्मणंकार्यदर्शने ९ सोऽस्यकार्याणिसंपश्येत्सभ्यैरेवत्रिभिर्वृतः सभामेवप्र-
विश्याग्र्यामासीनःस्थितएववा १० यस्मिन्देशेनिषीदंतिविप्रावेदविदस्त्रयः राज्ञश्चाधिकृतोविद्वान्
ब्रह्मणस्तांसभांविदुः ११ धर्मोविद्धस्त्वधर्मेणसभांयत्रोपतिष्ठते शल्यंचास्यनकृंतंतिविद्धास्तत्रस-
भासदः १२ सभांवानप्रवेष्टव्यंवक्तव्यंवासमंजसम् अब्रुवन्विब्रुवन्वापिनरोभवतिकिल्बिषी १३

कृतश्चविद्वान्ब्राह्मणएवप्रकृतत्वादवतिष्ठतेतांसभांचतुर्मुखसभामिवमन्यते ११ धर्मइति भाःप्रकाशः तयासहवर्त्तंतइति
विद्वत्संहतिरेवात्रसभाशब्देनाभिमतायत्रदेशेसभांविद्वत्संहतिरूपांधर्मःसत्याभिधानजन्योअनृताभिधानजन्येनाधर्मेण
पीडितआगच्छतिअर्थिप्रत्यर्थिनोर्मध्येएकस्यसत्याभिधानादपरस्यमृषावादात्तेनसभासदोअस्यधर्मस्यपीडाकरत्वात् शल्य
मिवाधर्मंनोद्धरंतितदातेएवतेनाधर्मशल्येनविद्धाभवंति यतएवमतः १२ सभामिति सभामवगम्यव्यवहारार्थंतत्प्रवेशोनक

र्तव्यः पृष्टश्चेत्तदासत्यमेववक्तव्यम् अन्यथातूष्णीभवतिष्ठमानोमृषावदन्उभयथापिसद्यःपापीभवति मेधातिथिनातु स
भायानप्रवेष्टव्याइतिऋग्वेदपठितम् १३ यत्रेत्यादि यस्यांसभायांअर्थिप्रत्यर्थिभ्यांअधर्मेणधर्मोनिहन्यतेयत्रचसाक्षिभिः
सत्यमनृतेननाश्यतेसभासदांप्रेक्षमाणानांतानन्नादृत्यतेप्रतीकारक्षमानभवंतीत्यर्थः षष्ठीचानादरइतिअनेनषष्ठी तत्रतएव
सभासदस्तेनपापेनहताभवंति १४ धर्मइत्यादि यस्माद्धर्मएवातिक्रांतोऽइष्टानिष्टाभ्यांसहनाशयति नार्थिप्रत्यर्थ्यादिसएवना
तिक्रांतः ताभ्यांसहरक्षतितस्माद्धर्मोनातिक्रमणीयः माऽस्मान् त्वत्सहितान् अतिक्रांतोधर्मोऽवधीदितिसभ्यानासुत्प्र
भाड्विवाकस्यसंबोधनमिदम् १५ वृषइत्यादि कामान्वर्षतीतिवृषः वृषशब्देनधर्मएवाभिधीयतइति अलंशब्दोवारणार्थः य
स्माद्धर्मस्ययोवारणंकरोतितंदेवावृषलंजानंतिनजातिवृषलम् तस्माद्धर्मन्नोच्छिंद्यादितिधर्मव्यतिक्रमखंडनार्थंवृषलशब्दार्थ

यत्रधर्मोह्यधर्मेणसत्यंयत्रानृतेनच हन्यतेप्रेक्ष्यमाणानांहतास्तत्रसभासदः १४ धर्मएवहतोहंति
धर्मोरक्षतिरक्षितः तस्माद्धर्मोनहंतव्योमानोधर्मोहतोऽवधीत् १५ वृषोहिभगवान्धर्मस्तस्ययःकुरु
तेह्यलम् वृषलंतंविदुर्देवास्तस्माद्धर्मंनलोपयेत् १६ एकएवसुहृद्धर्मोनिधनेप्यनुयातियः शरी
रेणसमंनाशंसर्वमन्याद्धिगच्छति १७ पादोधर्मस्यकर्तारंपादःसाक्षिणमृच्छति पादस्सभासदस्स
र्वान्पादोराजानमृच्छति १८ राजाभवत्यनेनास्तुमुच्यतेचसभासदः एनोगच्छतिकर्तारन्निंदार्हो
यत्रनिंद्यते १९

निर्वचनम् १६ एकइत्यादि धर्मएवैकोमित्रंयोमरणेपिअभीष्टफलदानार्थमनुगच्छति यस्मादन्यत्स
र्वंभार्यापुत्रादिशरीरेणैवसहादर्शनंगच्छति तस्मात्पुत्रादिस्नेहापेक्षयापिधर्मोनहातव्यः १७ पादइत्यादि दुर्व्यवहारदर्शनाद
धर्मसंबंधीचतुर्थभागोऽर्थिनमधर्मकर्तारंप्रत्यर्थिनंवागच्छति परश्चतुर्थभागःसाक्षिणमसत्यवादिनम् अन्यपादःसभास
दस्सर्वान् अधर्मप्रवृत्त्यनिवारकान्व्याप्नोति पादश्चराजानंव्रजति सर्वेषांपापसंबंधोभवतीत्यत्रविवक्षितम् १८ राजेत्यादि
यस्यांपुनःसभायामसत्यवादिनिंदार्होऽर्थिप्रत्यर्थीवासम्यक्न्यायदर्शनेननिंद्यते तत्रराजानिष्पापोभवति सभासदश्चपापेन

नसंबध्यंते अर्थ्यादिकमेवकर्त्तारमुपैति १९ जातिमात्रेति ब्राह्मणजातिमात्रंयस्यविद्यतेनतुब्राह्मणकर्मास्तु स्थानंवाणिगादिव
त्सास्यादिद्वारेणस्फुटन्यायान्यायनिरूपणक्षमोब्राह्मणजातिरपिवायस्यसंदिग्धार्यानांब्राह्मणंब्रवीतिसवरंउक्तयोग्यब्राह्मणा
भावेनकश्चित्कार्यदर्शनेनृपतेर्भवेन्नतुधार्मिकोपिव्यवहारज्ञोपिशूद्रः ब्राह्मणोधर्मप्रवक्तेतिविधानादेवशूद्रनिवृत्तिःसिद्धायु
नर्न्नतुशूद्रइतिशूद्रनिषेधोयोग्यब्राह्मणाभावेक्षत्रियवैश्ययोरभ्यनुज्ञानार्थः अतएवकात्यायनः यत्रविप्रोनविद्वान्स्यात्क्षत्रि
यंतत्रयोजयेत् वैश्यंवाधर्मशास्त्रज्ञंशूद्रंयत्नेनवर्जयेत्यस्मात् २० यस्येत्यादि यस्यराज्ञोधर्मविवेचनंशूद्रःकुरुतेतस्यपश्यत
एवपंकेगौरिवतद्राष्ट्रमवसन्नंभवति २१ यदित्यादि यद्राष्ट्रंशूद्रबहुलंबहुलपरलोकाभाववादाक्रांतंद्विजशून्यंतत्सर्वंदुर्भि

जातिमात्रोपजीवीवाकामंस्याद्ब्राह्मणब्रुवः धर्मप्रवक्तानृपतेर्न्नतुशूद्रः कथंचन २० यस्यशूद्रस्तुकुरु
तेराज्ञोधर्मविवेचनम् तस्यसीदतितद्राष्ट्रंपंकेगौरिवपश्यतः २१ यद्राष्ट्रंशूद्रभूयिष्ठंनास्तिकाक्रांत
मद्विजम् विनश्यत्याशुतत्कृत्स्नंदुर्भिक्षव्याधिपीडितम् २२ धर्मासनमधिष्ठायसंवीतांगःसमाहितः
प्रणम्यलोकपालेभ्यःकार्यदर्शनमारभेत् २३ अर्थानर्थावुभौबुद्ध्वाधर्माधर्मौचकेवलौ वर्णक्रमेण
सर्वाणिपश्येत्कार्याणिकार्यिणाम् २४ बाह्यैर्विभावयेल्लिंगैर्भावमंतर्गतंनृणाम् स्वरवर्णेंगिताका
रैश्चक्षुषाचेष्टितेनच २५

क्षरोगपीडितंतत्शीघ्रंविनश्यति अग्नौप्रास्ताहुतिःसम्यगित्यस्याभावेनवृष्टिविरहात् उ
पजातदुर्भिक्षरोगाद्युपजातशांत्यर्थकर्माभावाच्च २२ धर्मासनमिति धर्मदर्शनार्थमासनउपविश्य आच्छादितदेहोऽनन्यमना
लोकपालेभ्यःप्रणामंकृत्वाकार्यदर्शनमनुतिष्ठेत् २३ अर्थानिति प्रजारक्षणोच्छेदाद्यात्मकावैहिकावर्थानर्थौबुद्ध्वापरलोका
र्थंधर्माधर्मौकेवलावनुरुध्ययथाविरोधोनभवतितथाकार्यार्थिनांकार्याणिपश्येत् बहुवर्णमेलकेब्राह्मणादिक्रमेणपश्येत् २४
बाह्यैरिति बाह्यैःस्वरादिलिंगैरित्यभिधानादेवावधारितव्यापारैः अर्थिप्रत्यर्थिनामंतर्गतमभिप्रायंनिरूपयेत् स्वरोगद्गदादिः व
र्णःस्वाभाविकवर्णादन्यादृशोमुखकालिमादिः इंगितमधोनिरीक्षणादिः आकारोदेहभवस्वेदरोमांचादिः चेष्टाहस्तास्फालनादिर्यस्मा
त् २५

आकारैरिति आकारादिभिः पूर्वोक्तैःगत्यास्वलत्पादादिकयाअंतर्गतमनोबुद्धिरूपेणपरिणतमवधार्यते २६ बालदायेति अना
थबालस्वामिकंपितृव्यादिभिरन्यायेनगृह्यमाणंतावद्राजारक्षेत्यावदसौषट्त्रिंशदब्दादिकंब्रह्मचर्यमित्याद्युक्तेनप्रकारेणगुरुकु
लात्समावृत्तोनभवति तादृशस्यावश्यकबाल्याविगमात् यस्त्वशक्त्यादिनाबालएवसमावर्त्ततेसोपियावदतीवबाल्योभवतितावत्त
स्यधनंरक्षेत् बाल्यंचषोडशवर्षपर्यंतम् बालआषोडशाद्वर्षादितिनारदवचनात् २७ वशेत्यादि वशासुवंध्यासुकृतदारांतरपरि
ग्रहःस्वामीनिर्वाहार्थोपकल्पितधनोपायासुनिरपेक्षः अपुत्रासुचस्त्रीषुप्रोषितभर्तृकासुनिष्कुलासुसपिंडरहितासुसाध्वीषुच
स्त्रीषुविधवासुरोगिणीषुचएवंतस्यापिबालधनस्येवराज्ञारक्षणंकर्त्तव्यम् अत्रचानेकशब्दोपादानेगोबलीवर्दन्यायेनपुनरुक्ति

आकारैरिंगितैर्गत्याचेष्टयाभाषितेनच नेत्रवक्त्रविकारैश्चगृह्यतेंऽतर्गतंमनः २६ बालदाया
दिकंरिक्थंतावद्राजानुपालयेत् यावत्सस्यात्समावृत्तोयावच्चातीतशैशवः २७ वशाऽपुत्रासुचै
वंस्याद्रक्षणंनिष्कुलासुच पतिव्रतासुचस्त्रीषुविधवास्वातुरासुच २८ जीवंतीनांतुतासांयेतद्ध
रेयुःस्वबांधवाः तांच्छिष्याच्चौरदंडेनधार्मिकःपृथिवीपतिः २९ प्रणष्टस्वामिकंरिक्थंराजात्र्यब्द
न्निधापयेत् अर्वाक्त्र्यब्दाद्धरेत्स्वामीपरेणनृपतिर्हरेत् ३० ममेदमितियोब्रूयात्सोनुयोज्योयथा-
विधि संवाद्यरूपसंख्यादीन्स्वामीतद्द्रव्यमर्हति ३१

परीहारः २८ जीवंतीनामिति वयमत्रानंतराधिकारिणोरक्ष्या
मइदंधनमित्यादिव्याजेनयेबांधवास्तासांजीवंतीनांतद्धनंगृण्हंतितान्वक्ष्यमाणचौरदंडेननधार्मिकोराजादंडयेत् २९ प्रणष्टेति
आज्ञातस्वामिकधनंराजाकस्यकिंप्रनष्टमित्येवंपटहादिनाउद्घोष्यराजद्वारादौरक्षितंवर्षत्रयंस्थापयेत् वर्षत्रयमध्येयदिधनस्वाम्या
गच्छतितदासएवगृण्हीयात् तदूर्ध्वंतुनृपतिर्विनियुंजीत ३० ममेदमित्यादि मदीयंधनमितियोवदतिसकिंरूपंकिंसंख्याकंकुत्र
णष्टंतद्धनमित्यादिविधानेनप्रष्टव्यः ततोयदिरूपसंख्यादीन्सत्यान्वदतितदासतत्रधनस्वामीतद्धनंग्रहीतुमर्हति ३१ अवेदयान
इत्यादि नष्टद्रव्यस्यदेशकालौअस्मिन्देशेअस्मिन्कालेनष्टमिति तथावर्णंसुवर्णाद्याकारकटकत्वादिपरिमाणंचयथावदजानन्नष्टद्

व्यसमदंडमर्हति देशकालादिसंवादेःपुनः ३२ आददीतेति यदेतद्राज्ञाप्रनष्टद्रव्यंप्राप्तंतस्मात्षड्भागंदशमंद्वादशंवारक्षादिनि
मित्तंपूर्वेषांसाधूनामयंधर्मइतिजानन्राजागृण्हीयात् धनस्वामिनोनिर्गुणत्वापेक्षश्चायंषड्भागादिग्रहणविकल्पः अवशिष्टंस्वामि
नेसमर्पयेत् ३३ प्रनष्टेति यद्द्रव्यंकस्यापिप्रनष्टंसत्राजपुरुषैःप्राप्तंरक्षायुक्तैःरक्षितंकृत्वास्थाप्यंतस्मिंश्चद्रव्येयांश्चौरान्गृण्हीया
त्तान्हस्तिनाघातयेत् गोविंदराजस्तु शताभ्यधिकेवधइतिदर्शनात्अत्रापिशतसुवर्णस्यमौल्यादिकत्रयहरणेवधमाह तन्न त
त्रसंधिकृत्वायच्चौर्यमितियत्स्वाम्येपिप्रनष्टराजरक्षितद्रव्यहरणेनैवविशेषेणवधविधानात्शतादभ्यधिकेवधइत्यस्यविशेषोपदि
ष्टवधतरविषयत्वात् ३४ ममायमितीति योमानुष स्वयन्निधिंलब्ध्वाअन्येनवानिधौप्राप्तेममायन्निधिरितिवदतिसत्येनप्रमाणे

अवेदयानोनष्टस्यदेशंकालंचतत्त्वतः वर्णरूपंप्रमाणंचततन्समंदंडमर्हति ३२ आददीताथषड्भागं
प्रनष्टाधिगतान्नृपः दशमंद्वादशंवापिसतांधर्ममनुस्मरन् ३३ प्रनष्टाधिगतंद्रव्यंतिष्ठेद्युक्तैरधिष्ठित
म् यांस्तत्रचौरान्गृण्हीयात्तान्राजेभेनघातयेत् ३४ ममायमितियोब्रूयान्निधिंसत्येनमानवः तस्या
ददीतषड्भागंराजाद्वादशमेववा ३५ अनृततुवदन्दंड्यःस्ववित्तस्यांशमष्टमम् तस्यैववानिधानस्य
संख्यायाल्पीयसींकलाम् ३६ विद्वांस्तुब्राह्मणोदृष्ट्वापूर्वोपनिहितन्निधिम् अशेषतोप्याददीतस
र्वस्याधिपतिर्हिसः ३७ यंतुपश्येन्निधिंराजापुराणंनिहितंक्षितौ तस्माद्द्विजेभ्योदत्वार्द्धमर्द्धंकोशेप्र
वेशयेत् ३८

नन्वस्वसंबंधंबोधयतितस्यपुरुषस्यनिर्गुणत्वसगुणत्वापेक्षयाततोनिधानात्अष्टभागंद्वादशभागंवाराजागृण्ही
यात् अवशिष्टंतस्यार्पयेत् ३५ अनृतमिति असौयंस्वीयमितिब्रुवन्स्वधनस्याष्टभागंदंड्यः यद्वा तस्यैवनिधेरसंतात्ल्पभागंगणयि
त्वायेनावसादन्नगच्छतिनविषयश्चल्पभनेतदंड्यः अल्पीयसीमितीयस्तुनंतनिर्देशात्पूर्वस्मादन्योयंदंडःविकल्पश्चनिर्गुणसगुणापेक्षः
३६ विद्वानित्यादि विद्वान्पुनर्ब्राह्मणःपूर्वमुपहितंनिधिंदृष्ट्वासर्वंगृण्हीयात् नषड्भागंदद्यात् यस्मात्सर्वस्यधनजातस्यप्रभुः अत
एवोक्तम् सर्वस्वंब्राह्मणस्येदमिति तस्मात्परनिहितविषयमेतद्वचनम् तथाचनारदः परेणनिहितंलब्ध्वाराजाप्यपहरेन्निधिम् रा

जा स्वामीनिधेःसर्वस्तर्नेयांब्राह्मणादृते याज्ञवल्क्योप्याह राजालब्ध्वानिधिंदद्यात्द्विजेभ्योर्द्धंद्विजःपुनः विद्वानशेषमादद्यात्ससर्व
स्यप्रभुर्यतः अतोयन्मेधातिथिगोविंदराजाभ्यांप्रमायमितियोब्रूयादित्युक्तंराजदेयार्थनिरासार्थंपित्रादिनिहितविषयत्वमेवास्य-
व्याख्यानम् तदनार्षम् नारदादिमुनिव्याख्याविपरीतंस्वकल्पितम् नमेधातिथिगोविंदराजव्याख्यानमाद्रिये ३७ यंत्विति यंपुनर
स्वामिकंपुरातनंभूम्यंतर्गतंनिधिंराजालभनेनस्माद्ब्राह्मणेभ्योऽर्द्धंदत्वाऽर्द्धमात्मीयधनागारेचप्रवेशयेत् ३८ निधीनामिति निधीनां
पुरातनानांअस्वकीयानांविद्वद्ब्राह्मणेतरलब्धानांसुवर्णाद्युत्पत्तिस्थानानांचार्द्धहरोराजायस्मादसौरक्षतिभूमेश्चप्रभुः ३९ दातव्य-
मिति प्रहृतंचौरैर्लौकिकानामपहृतंतद्राज्ञाचौरेभ्य आहृत्यधनस्वामिभ्योदेयम् तद्दत्तंराजास्वयमुपयुंजानश्चौरस्यपापंप्राप्नोति ४० जाति
जानेति धर्मान्ब्राह्मणादिजातिनियतान्याजनादीन्जानपदांश्चनियतदेशव्यवस्थितान् आत्मीयाविरुद्धान् देशजातिकुलधर्मांश्च

निधीनांतुपुराणानांधातूनामेवचक्षितौ अर्द्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ३९ दातव्यंसर्ववर्णे
भ्योराज्ञाचौरैर्हृतंधनम् राजातदुपयुंजानश्चौरस्याप्नोतिकिल्बिषम् ४० जातिजानपदान्धर्मान्श्रे
णीधर्मांश्चधर्मवित् समीक्ष्यकुलधर्मांश्चस्वधर्मंप्रतिपादयेत् ४१ स्वानिकर्माणिकुर्वाणादूरेसंतो
पिमानवाः प्रियाभवंतिलोकस्यस्वेस्वेकर्मण्यवस्थिताः ४२ नोत्पादयेत्स्वयंकार्यंराजानाप्यस्यपूरुषः
नचप्रापितमन्येनग्रसेदर्थंकथंचन ४३ यथानयत्यसृक्पातैर्मृगस्यमृगयुःपदम् नयेत्तथानुमानेनध-
र्मस्यनृपतिःपदम् ४४

आम्नायैरप्रतिषिद्धाः प्रमाणमितिगोतमस्मरणात् श्रेणीधर्मांश्चवणिगादिधर्मान्प्रतिनियतकुलव्यव
स्थितान् ज्ञात्वातदविरुद्धान्राजाव्यवहारेषुतद्धर्मान्व्यवस्थापयेन्यस्मात् ४१ स्वानीत्यादि जातिदेशकुलधर्मादीन्यात्मीयकर्माणि
तेष्वतः स्वेस्वेचनित्यनैमित्तिकादौकर्मणिवर्त्तमानाः दूरेपिसंतःसान्निध्यनिबंधनस्नेहाभावेपिलोकस्यप्रियाभवंतिप्रासंगिकमि-
दमभिधायपुनःप्रकृतमाह ४२ नोत्पादयेदिति राजाराजनियुक्तोवाधनलोभादिनाकार्यमृणादिविवादंनोत्पादयेत् तदाहकात्यायनः
राजात्वनिशतेनधनलोभेनवापुनः स्वयंकर्माणिकुर्वीतनराणामविवादिनाम् नचार्थिनाप्रत्यर्थिनावाआवेदितंविवादंधनादिलोभेनो
पेक्षेत ४३ यथेत्यादि यथामृगस्यशस्त्रहतस्यरुधिरपातैः व्याध-पदंस्थानंप्राप्नोति

सत्यमित्यादि व्यवहारदर्शनप्रवृत्तोराजाछलमपहायसत्यंपश्येत् तथार्थंच अर्थआदित्सान्मल्यर्थीयोऽर्थ्य अर्थवंतंगोहिरण्या-
दिधनविषयस्थंव्यवहारंपश्येत् नत्वहसनेनाक्षिनिकोचनेनोपहसितइत्यादिस्वल्पापराधं आत्मानंच तत्त्वनिर्णयेस्वर्गादिफलभागि
नंसाक्षिणःसत्यवादिनः देशंकालंच देशकालोचितंस्वरूपंव्यवहारस्वरूपंगुरुलघुतादिकंपश्येत् ४५ सद्भिरित्यादि विद्वद्भिर्धर्म-
प्रधानैर्द्विजातिभिर्यद्दृश्यमानशास्त्रमनुष्ठितंतद्देशकुलजात्यविरुद्धमादायव्यवहारनिर्णयंप्रकल्पयेत् एतत्सकलव्यवहारसाधार
णंपरिभाषात्मकमुक्तंसंप्रतिऋणादानमधिकृत्याह ४६ अधमर्णेति अधमर्णार्थसिद्ध्यर्थंप्रयुक्तधनसिद्ध्यर्थंधनस्वामिनाराजा
बोधितोवक्ष्यमाणलेख्यादिप्रमाणप्रतिपादितंधनमुत्तमर्णस्याधमर्णंप्रदापयेत् अधमर्णादुत्तमर्णायदापयेदित्यर्थः कथंदापयेदि

सत्यमर्थंचसंपश्येदात्मानमथसाक्षिणः देशंरूपंचकालंचव्यवहारविधौस्थितः ४५ सद्भिराचरितं
यत्स्याद्धार्मिकैश्चद्विजातिभिः तद्देशकुलजातीनामविरुद्धंप्रकल्पयेत् ४६ अधमर्णार्थसिद्ध्यर्थमुत्तम
र्णेनचोदितः दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ४७ यैर्यैरुपायैरर्थंस्वंप्राप्नुयादुत्तमर्णिकः
तैस्तैरुपायैःसंगृह्यदापयेदधमर्णिकम् ४८ धर्मेणव्यवहारेणछलेनाचरितेनच प्रयुक्तंसाधयेदर्थं
पंचमेनबलेनच ४९ यःस्वयंसाधयेदर्थमुत्तमर्णोऽधमर्णिकात् नसराज्ञाभियोक्तव्यःस्वकंसंसाधयन्धनम्
५०

त्याह ४७ यैर्यैरिति यैर्वक्ष्यमाणैरुपायैः संप्रयुक्तमर्थमुत्तमर्णोलभते तैस्तैरुपायैर्वशीकृतमर्थंदापयेत् तानुपायानाह ४८ धर्मेणे
त्यादि धर्मादिनाप्रयुक्तमर्थंसाधयेत्तत्रधर्मानाहबृहस्पतिः सुहृत्संबंधिसंदिष्टैःसाम्नाचानुगमेनच प्रायेणवाऋणीदाप्यो धर्मएषउदा
हृतः देयेधनेधर्मेणस्याविप्रतिपत्तौव्यवहारेण नयाचवक्ष्यति अर्थेपव्ययमानंत्विति मेधातिथिस्तु निस्वोयःसव्यवहारेणदापयित
व्यः अन्यत्कर्मोपकरणंधनंदत्वाकृषिवाणिज्यादिनाव्यवहारयितव्यः तदुत्पन्नंधनंतस्मात्तुगृण्हीयादित्याह छलादीनिबृहस्प
तिः छद्मनायाचितंचार्थमानीयऋणिकाद्बली अन्याहृतादिवाहृत्यदाप्यतेतत्रसोपधिः दारपुत्रपशून्हृत्वाकृत्वाद्वारोपवेशनम् यत्रा-
र्थोदाप्यतेऽर्थस्तंतदाचरितमुच्यते बध्वास्वगृहमानीयताडनाद्यैरुपक्रमैः ऋणिकोदाप्यतेयत्रबलात्कारःप्रकीर्तितः ४९ यइत्यादि यउ

नमर्णः संप्रतिपन्नमर्थमधमर्णात्स्वयंबलादिनासाधयतिसस्वीयंधनंसम्यक्साधयन् अस्मात्स्वनिवेद्याकिमितिबलादिकंकृतवान
सीतिनराज्ञानिषेद्धव्यः ५० अर्थइति नाहमस्मैधारयामीतिधनविषयेअपह्नवानं अधमर्णकरणेनलेख्यसाक्षिदिव्यादिनाप्रतिपा
दितमर्थमुत्तमर्णस्यराजाप्रदापयेत् दंडलेशंच अपन्हवेतुद्विगुणमितिवक्ष्यमाणदशभागदंडान्न्यूनमपिदंडंपुरुषशक्त्यादापयेत्
५१ अपेति उत्तमर्णस्यधनंदेहीतिसभायांप्राड्विवाकेनउक्तस्याधमर्णस्यनास्मैधारयामीतिअपलापेसतिअभियोक्तार्थादेश्यंध
नप्रयोगदेशवर्तिसाक्षिणन्निर्दिशेत् प्रायेणसाक्षिभिरेवस्त्रीमूर्खादिसाधारणकरणानिर्णयात्साक्षिसाक्ष्युपन्यासः अन्यद्वाकरणं
पत्रादिकथयेत् ५२ अदेश्यमिति अपदिश्येति असंभाष्यइति ब्रूहीत्यादि अदेश्यंयत्रदेशेअधमर्णस्यऋणग्रहणकालेसर्व
दावस्थानन्नसंभवतीतिनिर्दिश्यत्वादेशादिकन्नैतन्मयानिर्दिष्टमितिअपनयति यश्चपूर्वोक्तानर्थान्स्वर्थान्स्वोक्तान्विरुद्धान्

अर्थेऽपव्ययमानंतुकरणेनविभावितम् दापयेद्धनिकस्यार्थंदंडलेशंचशक्तितः ५१ अपह्नवेऽध
मर्णस्यदेहीत्युक्तस्यसंसदि अभियोक्तादिशेद्देश्यंकरणंवान्यदुद्दिशेत् ५२ अदेश्यंयश्चदिशति
निर्दिश्यापह्नुतेचयः यश्चाधरोत्तरानर्थान्विगीतान्नावबुध्यते ५३ अपदिश्यापदेश्यंचपुनर्यस्त्वप
धावति सम्यक्प्रणिहितंचार्थंपृष्टःसन्नाभिनंदति ५४ असंभाष्येसाक्षिभिश्चदेशेसंभाषतेमिथः
निरुच्यमानंप्रश्नंचनेच्छेद्यश्चापिनिष्पतेत् ५५

नावगच्छति यश्चममहस्तात्सुवर्णस्यपलमनेनगृहीतमितिनिर्दि
ष्टंनिर्दिश्यमत्पुत्रहस्ताद्गृहीतमितिएवमादिनायःपुनरपसरति यश्चसम्यक्प्रतिज्ञातमर्थंकस्मात्त्वयारात्रावसाक्षिकंद
दिप्राड्विवाकेनपृष्टःसन्नसमाधत्तेयश्चसंभाषणानर्हेनिर्जनादिदेशेसाक्षिभिःसहान्योन्यंसंभाषतेयश्चभाषार्थस्थि
यनितरामुच्यमानंप्राड्विवाकेनप्रश्नंनेच्छेत् यश्चनिष्पतेत्उक्ताश्चव्यवहारान्पुरा नाख्यायंर्थास्थानात्स्थानांत
त् यश्चब्रूहीत्युक्तोनकिंचिद्ब्रवीतिउक्तंसाध्यंनप्रमाणेप्रतिपादयतिपूर्वसाधनंअपरंसाध्यंतद्योनजानातिअसाधनमेवसाध
नत्वेननिर्दिशतिअसाध्यमेवमानेनशशशृंगगतंधनुर्जेयमित्यादिसाध्यत्वेननिर्दिशतिसतस्मात्साध्यादर्थाद्धीयते५३ ५४

५६ साक्षिणःसंतीति साक्षिणोममविद्यंतइत्युक्त्वातान्निर्दिशेत्युक्तोयोनोनिर्दिशतितंपूर्वोक्तैरेभिः कारणैर्धर्मस्थःशाङ्खिकः
पराजितंकथयेत् ज्ञातारःसंतिमेत्युक्त्वाइतिवापाठः अत्रछांदसमिकारस्यपररूपत्वम् ५७ अभियोक्तेति योऽर्थीसन्राजस्थाने
निवेद्यभाषायांनब्रूयात्तदाविषयगौरवापेक्षयाबध्योलघुनिविषयेदंड्यश्चधर्मतःस्यात्सत्यर्थीपुनर्यदिपक्षत्रयमध्येनब्रूयात्तदाध
र्मतएवपराजितःस्यात्नतुछलेन ५८ यइति यःप्रत्यर्थीयत्परिमाणधनमपनयति अर्थीवायत्परिमाणधनेमिथ्यावदतितावधा
र्मिकौअपन्हुतमिथ्योक्तधनाद्द्विगुणंदंडरूपंदापनीयौ अधर्मज्ञावितिवचनात्ज्ञानपूर्वापन्हवमिथ्योक्तिविषयमिदम् प्रमादादिना
पलापमिथ्याभियोगापन्हवेद्विगुणमितिशतदशमभागंवक्ष्यति ५९ पृष्टइति धनार्थिनोत्तमर्णेनराजपुरुषापकर्षकृताह्वानःशाङ्खि

ब्रूहीत्युक्तश्चनब्रूयात्उक्तंचनविभावयेत् नचपूर्वापरंविद्यात्तस्मादर्थात्सहीयते ५६ साक्षिणः
संतिमेत्युक्त्वादिशेत्युक्तोदिशेन्नयः धर्मस्थःकारणैरेतैर्हीनंतमपिनिर्दिशेत् ५७ अभियोक्तान
चेद्ब्रूयाद्बध्योदंड्यश्चधर्मतः नचेत्त्रिपक्षात्प्रब्रूयाद्धर्मंप्रतिपराजितः ५८ योयावन्निन्हुवीतार्थंमिथ्या
यावतिवावदेत् तौनृपेणह्यधर्मज्ञौदाप्यौतद्द्विगुणंदमम् ५९ पृष्टोऽपव्ययमानस्तुकृतावस्थोधने
षिणा त्र्यवरैःसाक्षिभिर्भाव्योनृपब्राह्मणसन्निधौ ६० यादृशाधनिभिःकार्याव्यवहारेषुसाक्षिणःता
दृशान्संप्रवक्ष्यामियथावाच्यमृतंचतैः ६१ गृहिणःपुत्रिणोमौलाःक्षत्रविट्शूद्रयोनयः अर्थ्युक्ताः
साक्ष्यमर्हंतिनयेकेचिदनापदि ६२

वाकेनपृष्टःसन्यदानधारयामीत्यपन्हवानोभवतितदानृपत्याधिकृतब्राह्मणसमक्षं
त्र्यवरैःसाक्षिभिः त्रयोवरान्यूनायेषांतैरर्थिनाभावनीयः ६० यादृशाइति धनिभिरुत्तमर्णादिभिःऋणादानादिव्यवहारेषुयथा-
विधाःसाक्षिणः कर्त्तव्याः तथाविधान्वदिष्यामि यथाचतैरपिवक्तव्यंतमपिप्रकारंवक्ष्यामि ६१ गृहिणइति कृतदारपरिग्रहाः
पुत्रवंतःतद्देशजाः क्षत्रियशूद्रवैश्यजातीयाः अर्थिनिर्दिष्टाःसंतःसाक्षित्वयोग्याभवंति तेहिकृतपरिकरपुत्रभयात्तद्देशवासिनावि
रोधाच्चनान्यथावदंतिनतुयेकेचित्ऋणादानादिव्यवहारेषुसाक्षिणःस्युःआपदितुवाग्दंडपारुष्यस्त्रीसंग्रहणादिषूक्तव्यतिरिक्ताःसा
क्षिणोभवंति ६२

आप्ताइत्यादि क्षत्रविट्शूद्रयोनयइतिउक्तत्वात्ततोब्राह्मणपरिग्रहार्थंसर्वेषुवर्णेषु इत्यभिधानंसर्ववर्णेषुमध्येयेयथार्थावगतवादिनः सर्वधर्मज्ञानोत्तरसहिताः तेसाक्षिणः कर्तव्याः उक्तविपरीतांश्चवर्ज्जयेत् ६३ नार्थसंबंधिनइत्यादि ऋणाद्यर्थसंबंधिनोऽमर्णाद्याः आप्तानिमित्राणिसहायास्तत्परिचारकाः शत्रवः स्थानांतरावगतकौटसाक्ष्याः रोगपीडितामहापातकादिदूषिताः साक्षिणोनकर्त्तव्याः लोभरागद्वेषस्मृतिभ्रंशादीनामन्यथाभिधानहेतूनांसंभवात् ६४ नसाक्षीति प्रभुत्वात्साक्षिधर्मेणप्रष्टुमयोग्यत्वात्नराजासाक्षीकार्यः कारुः सूपकारादिः कुशीलवोनटादिः तयोः स्वकर्मव्यग्रत्वात् प्रायेणधनलोभवत्त्वाच्चासाक्षित्वम् श्रोत्रियोप्यध्ययनाग्निहोत्रादिकर्मव्यग्रतयानसाक्षी लिंगस्थोब्रह्मचारी संगनिर्गतः परिव्राजकः तयोरपिस्वकर्मव्यग्रत्वात्ब्रह्मांशत्वाच्चासाक्षित्वम् श्रोत्रियग्रहणादध्ययनाग्निहोत्रादिव्यग्रेतरब्राह्मणस्यानिषेधः ६५ नाध्यधीनइति अध्यधीनोत्यंतपरतंत्रोगदासोनवक्तव्योविहितकर्मत्यागाल्लोकविगर्हितः दस्युः क्रूरकर्मा नचौरोनापितस्करइतिवक्ष्यमाणत्वात् विकर्मकृत्निषिद्धकर्मकारी एतेषांरागद्वेषादिसंभवात् नवृद्धः प्रायेणस्मृतिभ्रंशभवात् नबालोऽप्राप्तव्यवहारत्वात् नैकोविनाशभवासशंकयातस्यत्र्यवरैरितिविधानात् अर्थप्रतिषेधसिद्धौकस्यांचिदवस्थायांद्वयोरभ्यनुज्ञानार्थंनिषेधवचनम् अंत्यश्चांडालादिः कर्मानभिज्ञातत्वात् विकलेंद्रियउपलब्धिवैकल्यात्नसाक्षीकार्यः ६६ नार्त्तइति आर्त्तोबंधुविनाशादिना मत्तोमद्यादिना उन्मत्तउत्क्षेपभूतावेशादिना क्षुधापिपासादिनापीडितः श्रमार्त्तोमार्गगमनादिनाखिन्नः कामार्त्तउत्पन्नक्रोधः चौरश्चनसाक्षीकार्यइतिसर्वत्रसंबध्यते तत्रार्त्तादिर्बुद्धिवैकल्यात्चौरस्त्वधार्मिकत्वात् ६७

आप्ताः सर्वेषुवर्णेषु कार्याः कार्येषुसाक्षिणः सर्वधर्मविदोलुब्धाविपरीतांस्तुवर्जयेत् ६३ नार्थसंबंधिनोनाप्तानसहायानवैरिणः नदृष्टदोषाः कर्त्तव्यानव्याध्यार्त्तानदूषिताः ६४ नसाक्षीनृपतिः कार्योनकारुककुशीलवौ नश्रोत्रियोनलिंगस्थोनसंगेभ्योविनिर्गतः ६५ नाध्यधीनोनवक्तव्योनदस्युर्नविकर्मकृत् नवृद्धोनशिशुर्नैकोनांत्योनविकलेंद्रियः ६६ नार्त्तोनमत्तोनोन्मत्तोनक्षुत्तृष्णोपपीडितः नश्रमार्त्तोनकामार्त्तोनक्रुद्धोनापितस्करः ६७

स्त्रीणामित्यादि स्त्रीणामन्योन्यव्यवहारेऋणादानादौस्त्रियःसाक्षिण्योभवंति द्विजानांब्राह्मणक्षत्रियविशांसदृशाःसजातीयाःसा
क्षिणःस्युः एवंशूद्राःसाधवःशूद्राणां चांडालादीनांचांडालादयःसाक्षिणोभवेयुः एतच्चसजातीयसाक्ष्यभिधानमुक्तलक्षणसजा-
तीयसाक्ष्यसंभवेविजातीयाअपिसाक्षिणोभवंति अतएवयाज्ञवल्क्यः यथाजातियथावर्णंसर्वेसर्वेषुवास्मृताः ६८ अनुभावीति
गृहाभ्यंतरेऽरण्यादौवाचौरादिकृतोपद्रवेदेहोपघातेचाततायादिकृतेयःकश्चित्उपलभ्यतेसवादिनोरेवसाक्षीभवतिनतुऋणादा
नादिवदुक्तलक्षणोपेतः तदेवोदाहरणात्स्पष्टयति ६९ स्त्रियापीति अंतर्वेश्मादावुक्तसाक्ष्यभावेसतिस्त्रीबालवृद्धशिष्यबंधुदास
कर्मकराअपिसाक्षिणःस्युः ननुस्थिरबुद्धित्वादिनास्त्रीबालादीनांकथमप्यत्रापिसाक्षित्वमित्यत्राह ७० बालवृद्धेति बालवृद्ध-

स्त्रीणांसाक्ष्यंस्त्रियःकुर्युर्द्विजानांसदृशाद्विजाः शूद्राश्चसंतःशूद्राणामंत्यानामंत्ययोनयः ६८ अनु
भावीतुयःकश्चित्कुर्यात्साक्ष्यंविवादिनाम् अंतर्वेश्मन्यरण्येवाशरीरस्यापिचात्यये ६९ स्त्रियाप्य
संभवेकार्यंबालेनस्थविरेणवा शिष्येणबंधुनावापिदासेनभृतकेनवा ७० बालवृद्धातुराणांच
साक्ष्येषुवदतांमृषा जानीयादस्थिरांवाचमुत्सिक्तमनसांतथा ७१ साहसेषुचसर्वेषुस्तेयसंग्रह-
णेषुच वाग्दंडयोश्चपारुष्येनपरीक्षेतसाक्षिणः ७२ बहुत्वंपरिगृह्णीयात्साक्षिद्वैधेनराधिपः स
मेषुतुगुणोत्कृष्टान्गुणिद्वैधेद्विजोत्तमान् ७३

व्याधितानांउपप्लुतमनसांचसाक्ष्येअनृतंवदतांअस्थिरावाग्भव-
तिअतस्तामनुमानेनजानीयात् यथोक्तम् वाग्भिर्विभावयेल्लिंगैरिति ७१ साहसेष्विति गृहदाहादिषुसाहसेषाचार्यस्त्रीसंग्र
हणेवाग्दंडपारुष्येचगृहिणउक्तसाक्षिपरीक्षानकार्यास्त्रियाप्यसंभवेकार्यमित्यस्यैवायमुदाहरणप्रपंचः ७२ बहुत्वमित्यादि
साक्षिणांपरस्परविरुद्धानांबहुभिर्यदुक्तंतदेवनिर्णयार्थत्वेनराजागृह्णीयात् समेषुतुविरुद्धार्थाभिधायिषुगुणवतःप्रमाणीकुर्यात्
गुणवतामेवविप्रतिपत्तौद्विजोत्तमान् द्विजेषुयेउत्तमाःक्रियावंतइत्यर्थः अतएवबृहस्पतिःगुणिद्वैधेक्रियायुक्ताइति गोविंदराज
स्तु गुणवतांविप्रतिपत्तौद्विजोत्तमान्ब्राह्मणान्प्रमाणीकुर्यादित्याह ७३ ७ ७ ७ ७

समक्षेति चक्षुर्ग्राह्ये साक्षाद्दर्शनात् श्रोत्रग्राह्ये श्रवणात् साक्ष्यं सिध्यति तत्र साक्षी सत्यं वदन् धर्मार्थाभ्यां न मुच्यते सत्यवचनेन धर्मोपपत्तेर्दण्डाभावे ऽर्थहान्यभावात् ७४ साक्षीत्यादि साक्षी दृष्टश्रुतादन्यादृशं साधुसभायां वदन् अधोमुखो नरकं गच्छति परलोके च कर्मान्तरजन्यस्वर्गरूपफलादनेन पापेन हीयते ७५ यत्रेत्यादि यस्मिन् विषये साक्षी भव इत्येवमकृतोपि यत् किंचित् ऋणादानादि पश्यति वाक्पारुष्यादिकं शृणोति तत्रापि साक्षी स पृष्टः सन् यथोपलब्धं कथयेत् अयं त्वकृतसाक्षी सामान्येन मनोक्तः अस्य ग्रामश्च प्राड्विवाकश्च राजा चेत्यादिना नारदादिभिः षाड्विध्यमुक्तम् ७६ एक इत्यादि एको ऽलुब्ध इत्यत्राकारप्रश्लेषो द्रष्टव्यः एकोपि साक्षी लोभादिरहितः स्यात् अत एव व्यासः शुचिक्रियश्च धर्मज्ञः साक्षी यत्रानुभूतवाक् प्रमाणमेकोपि भवेत् साहसेषु विशेषतः मेधातिथिगोविंदराजाभ्यामेको लुब्धस्त्वसाक्षी स्यादिति पठितम् व्याख्यातं च लोभात्मक एकः साक्षी न भवति एवं

समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति तत्र सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते ७४ साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ७५ यत्रानिबद्धो ऽपीक्षेत शृणुयाद्वापि किंचन पृष्टस्तत्रापि तद्ब्रूयाद्यथादृष्टं यथाश्रुतम् ७६ एको ऽलुब्धस्तु साक्षी स्याद्बह्व्यः शुच्योपि न स्त्रियः स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येपि ये वृताः ७७ स्वभावेनैव यद्ब्रूयुस्तद्ग्राह्यं व्यावहारिकम् अतो यदन्यद्विब्रूयुर्धर्मार्थं तदपार्थकम् ७८

पि भवतीति स्त्रियः पुनरात्मशौचादियुक्ता बह्व्योप्यस्थिरबुद्धित्वात् ऋणादानाद्यैः पर्यालोचितेतु स्तेयवाग्दंडपारुष्यादौ स्त्रियाप्यसंभवे कार्यमिति साक्षित्वमुक्तम् अन्येपि ये स्तेयादिदोषैर्व्याप्तास्तेपि पर्यालोचितव्यवहारे साक्षिण्यो न भवंति अतव्यवहारे साक्षिणो न स्युः ७७ स्वभावेनेति यत्साक्षिणो भयादिव्यतिरेकेण स्वभावाद्यद्ब्रूयुः तद्व्यवहारनिर्णयार्थं ग्राह्यं यत्पुनः स्वाभाविकादन्यत् कुतोपि कारणाद्वदंति तद्धर्मविषये निःप्रयोजनं तन्न ग्राह्यम् ७८ सभांतरित्यादि सभामध्यं साक्षिणः संप्राप्तान् अर्थिप्रत्यर्थिसमक्षं राजाधिकृतो ब्राह्मणः प्रियोक्तिं स्वयन् वक्ष्यमाणप्रकारेण पृच्छेत् ७९ ६९ ६९

चालुब्धो गुणवान् कस्यांचिदवस्थायामेको

यद्द्वयोरिति यद्द्वयोरर्थिप्रत्यर्थिनोरनयोः परस्परमस्मिन्कार्ये चेष्टितं जानीयत तत्सर्वं सत्येन कथयत यतो युष्माकमत्र साक्षित्वम् ८०
सत्यमिति साक्षी साक्ष्ये कर्मणि सत्यं वदन्सन् उत्कृष्टान् ब्रह्मलोकान् प्राप्नोति पुष्कलानि हलोके चोत्कृष्टां ख्यातिं लभते यस्मा
देषा सत्यात्मिका वाक् चतुर्मुखेन पूजिता ८१ साक्ष्य इत्यादि यस्मात्साक्षी मृषावाक् कथयन् वरुणसंबंधिभिः पाशैः सर्परज्जुभिः ज
लोदरेण परतंत्रीकृतः शतं जन्मानि यावत् अत्यर्थं पीड्यते तस्मात्साक्ष्ये सत्यं ब्रूयात् ८२ सत्येनेत्यादि यस्मात्सत्येन पूर्वार्जितादपि
पापात्साक्षी मुच्यते धर्मश्चास्य सत्याभिधानेन वृद्धिमेति तस्मात्सर्ववर्णविषये साक्षिभिः सत्यं वक्तव्यम् ८३ आत्मैवेति यस्मा
त् शुभाशुभकर्मप्रतिष्ठा आत्मैवात्मनः शरणं तस्मादेवं स्वमात्मानं नराणां मध्यमादुत्तमं साक्षिणं मृषाभिधानेनावज्ञासीः ८४

सभांतः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ प्राड्विवाकोनुयुंजीत विधिनानेन सांत्वयन् ७९
यद्द्वयोरनयोर्वेत्थ कार्येऽस्मिन्चेष्टितं मिथः तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता ८० सत्यं साक्ष्ये
ब्रुवन्साक्षी लोकानाप्नोति पुष्कलान् इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ८१ साक्ष्येऽनृतं वदन्
पाशैर्बध्यते वारुणैर्भृशम् विवशः शतमाजातीस्तस्मात्साक्ष्यं वदेदृतम् ८२ सत्येन पूयते साक्षी ध
र्मः सत्येन वर्द्धते तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ८३ आत्मैव ह्यात्मनः साक्षी गतिरात्मा
तथात्मनः मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ८४ मन्यते वै पापकृतो न कश्चित्पश्यती
ति नः तांस्तु देवाः प्रपश्यंति स्वस्यैवांतरपूरुषः ८५ द्यौर्भूमिरापो हृदयं चंद्रार्काग्नियमानिलाः रा
त्रिः संध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् ८६

मन्यंत इति पापकारिण एवं मन्यंते अस्मान धर्मप्रवृत्तान्न कश्चित्पश्य
तीति तान्पुनर्वक्ष्यमाणा देवाः पश्यंति स्वस्यांतरपुरुषः पश्यति ८५ द्यौरित्यादि द्युलोकपृथिवीजलहृदयस्थजीवचंद्रादित्या
ग्नियमवायुरात्रिसंध्याद्वयधर्माः सर्वशरीराणां शुभाशुभधर्मज्ञाः दिवादीनां चाधिष्ठातृदेवतास्ति सा च शरीरिण्येकत्रावस्थापि
तात्सर्वं जानातीति आगमप्रामाण्यादेदांतदर्शनं तदंगीकृत्येदमुक्तम् ८६ देवब्राह्मणेति प्रतिमादेवताब्राह्मणसन्निधाने शुचीन्

न्द्विजातिप्रभृतीन्प्राङ्मुखानुदङ्मुखान्वास्वयंप्रयतःप्राड्विवाकः पूर्वाण्हेकालेयाथातथ्यंसाक्ष्यंपृच्छेत् ८७ ब्रूहीत्यादि ब्रूहीत्येवंशब्दमुच्चार्य्यब्राह्मणंपृच्छेत् सत्यंब्रूहीतिपार्थिवंक्षत्रियंपृच्छेत् गोबीजकनकापहारेयत्पापंतद्भवतोऽनृताभिधानेस्यादित्येवंवैश्यम् शूद्रंपुनःसर्वैर्वक्ष्यमाणपापैःसंबध्ययदिमृषावदसीतिपृच्छेत् ८८ ब्रह्मघ्नइति ब्राह्मणंहंतुःस्त्रीघातिनश्चयेनरकादिलोकाऋषिभिःस्मृताः येचमित्रद्रोहादिकारिणः येचोपकर्त्तुरपकारिणस्तेतवमिथ्यावदतोभवेयुः ८९ जन्मप्रभृतीत्यादि हेशोभनाधारयत्त्वयाजन्मतआरभ्यकिंचित्सुकृतंकृतंतत्सर्वंत्वदीयंकुक्कुरादिकंसंक्रामतियदित्वमसत्यंब्रवीषि ९० एकोहमित्यादि हेभद्रएकएवाहमस्मिजीवात्मकइतियदात्मानंमन्यसेमैवंमंस्थाः यस्मादेवपापानांपुण्यानांचद्रष्टामननान्मुनि

देवब्राह्मणसान्निध्येसाक्ष्यंपृच्छेदृतंद्विजान् उदङ्मुखान्प्राङ्मुखान्वापूर्वाण्हेवैशुचिःशुचीन् ८७ ब्रूहीतिब्राह्मणंपृच्छेत्सत्यंब्रूहीतिपार्थिवम् गोबीजकाञ्चनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः ८८ ब्रह्मघ्नोयेस्मृतालोकायेचस्त्रीबालघातिनः मित्रद्रुहःकृतघ्नस्यतेतेस्युर्ब्रुवतोमृषा ८९ जन्मप्रभृतियत्किंचित्पुण्यंभद्रत्वयाकृतम् तत्तेसर्वंशुनोगच्छेद्यदिब्रूयास्त्वमन्यथा ९० एकोहमस्मीत्यात्मानंयत्त्वंकल्याणमन्यसे नित्यंस्थितस्तेहृद्येषपुण्यपापेक्षितामुनिः ९१ यमोवैवस्वतोदेवोयस्तवैषहृदिस्थितः तेनचेदविवादस्तेमागंगांमाकुरून्गमः ९२

सर्वज्ञः तवहृदयेपरमात्मानित्यमवस्थितः तथाचश्रुतिः द्वासुपर्णासहजासखायासमानंवृक्षंपरिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति ९१ यमइति सर्वसंयमनाद्यमःपरमात्मावैवस्वतइतिदंडधारित्वात्देवनाद्देवः यस्तवैषहृदितिष्ठतितेनसहयथार्थकथनेनयदितवाविवादः यदात्वमनोगतमसावन्यज्जानातित्वंचान्यथाकथयसितदांतर्यामिनासहविप्रतिपत्तिःस्यात्एवंचात्रसत्याभिधानेनैवनिःपापः कृतकृत्योसिपापनिर्हरणार्थंमागंगांमाचकुरुक्षेत्रंयासीः मनूक्तमेवात्रगंगाकुरुक्षेत्रयोःसाम्यंमत्स्यपुराणेव्यासेनस्फुटीकृतम् कुरुक्षेत्रसमागंगायत्रतत्रावगाहितेति मेधातिथिगोविंदराजौतु विवस्वतःपुत्रोयोयमोदक्षिणादिक्पतिर्लोकतः कर्णगोचरीभूत

तवहृदयेपरिस्फुरतितेनसहयदितवाधर्मकारित्वाद्विवादोनास्तितदागंगांमाकुरुक्षेत्रंयासीरितिव्याचक्षाते ९२ नग्नइति यःसाक्ष्यं असत्यंवदेत्सनग्नः कृतमुंडनपरिभावोंऽधः कर्परेणोपलक्षितःभिक्षार्थीशत्रुकुलंगच्छेत् ९३ अवाक्इति योधर्मनिश्चयनिमि- त्तंपृष्टःसन् असत्यंब्रूयात्सपापवान् अधोमुखोमहांधकारेयोनरकस्तंगच्छति ९४ अंधइति यःसभांप्राप्तः तत्त्वार्थस्यायथार्थस्या भिप्रायं अनुपलभ्यमुखोच्चादिकसखलेशेनकथयतिसनरोंऽधइवसकंटकान् मत्स्यान् भक्षयतिकसखवुल्याभरत्तोदुःखमेवमहल्लभते ९५ यस्येति यस्यवदतःसर्वज्ञोंतर्यामीकिमयंसत्यंवदत्यनृतमितिनशंकेतकिंतुसत्यमेवायंवदतिनिर्विशंकःसंपद्यतेतस्माद्न्यं मयात्ततरंपुरुषंदेवानजानंति ९६ यावतइति यस्मिंस्तयानिमित्तेसाक्ष्येयत्संख्याकान् पित्रादिबांधवान्नरकेयोजयतितत्संख्या

नग्नोमुंडःकपालेनभिक्षार्थीक्षुत्पिपासितः अंधःशत्रुकुलंगच्छेद्यःसाक्ष्यमनृतंवदेत् ९३ अवाक्शिरास्तमस्यंधेकिल्बिषीनरकंव्रजेत् यःप्रश्नंवितथंब्रूयात्पृष्टःसन्धर्मनिश्चये ९४ अंधोमत्स्यानिवाश्नातिसनरःकंटकैःसह योभाषतेऽर्थवैकल्यमप्रत्यक्षंसभांगतः ९५ यस्यविद्वान्हिवदतःक्षेत्रज्ञोनाभिशंकते तस्मान्नदेवाःश्रेयांसंलोकेन्यंपुरुषंविदुः ९६ यावतोबांधवान्यस्मिन्हंतिसाक्ष्येनृतंवदन् तावतःसंख्ययातस्मिन्शृणुसौम्यानुपूर्वशः ९७ पंचपश्वनृतेहंतिदशहंतिगवानृते शतमश्वानृतेहंतिसहस्रंपुरुषानृते ९८ हंतिजातानजातांश्चहिरण्यार्थेऽनृतंवदन् सर्वंभूम्यनृतेहंतिमास्मभूम्यनृतंवदीः ९९

कान्क्रमेणपरिगणनयामयोच्यमानान्साधोशृणु अथवा यावतोबांधवान्यस्मिन्हंतियावतांबांधवानांहननफलंप्राप्नोतितावत्संख्याकान्शृणु पक्षद्वयेप्यनृतनिंदार्थमिदम् ९७ पंचेति पशुविषयेऽनृतेपंचबांधवान्नरकेयोजयति पंचानांबांधवानांहननफलंप्राप्नोति एवंदशगोविषयेसंख्यागौरवंचेदंप्रायश्चित्तगौरवार्थम् ९८ हंतीति हिरण्यार्थेअनृतंवदन्जातान् अजातांश्चपुत्रप्रभृतीन्नरकेयोजयति एषांहननफलंप्राप्नोति भूमिविषयेचानृतंवदन्सर्वप्राणिनांहननफलंप्राप्नोति तस्माद्भूमिविषयेऽनृतंमावदीरितिविशिष्याभिधानम् वैदूर्यादिष्वनृतंवदन्भूमिवद्दोषमाह ९९ ७ ७

अप्स्विति तडागकूपवाप्योदकविषयेऽनृते स्त्रीणां च मैथुनाख्योपभोगविषये अब्जेषु च रत्नेषु च मुक्तादिषु पाषाणमयेषु च वैदूर्या
दिषु अनृते भूमिवद्दोषमाह १०० एतानिति एतानसत्यभाषणदोषानधिगम्य दृष्टश्रुताननतिक्रमेण सर्वमेवांजसा तत्त्वतो ब्रूहि १०१
गोरक्षकानित्यादि गोरक्षणजीविनो वणिज्याजीविनः सूपकारादिकारुकर्मजीविनः दासकर्मजीविनः प्रतिषिद्धजीविनो ब्राह्मणान्म
ढ्नसाक्ष्यदर्शने शूद्रवत्पृच्छेत् १०२ तद्वदन्निति तद्वदन्साक्ष्यमन्यथापि जानन्मनुष्यो धर्मेण दयादिना व्यवहारेऽन्यथा वदन्स्व
र्गलोकान्न च्यवति यस्माद्यदेतन्निमित्तविशेषेणासत्याभिधानं तां दैवसंबंधिनीं वाचं मन्वादयो वदंति क्व पुनस्तदसत्यं वक्तव्यमित्य
त आह १०३ शूद्रेति यस्मिन्व्यवहारे सत्याभिधाने सति शूद्रवैश्यक्षत्रियब्राह्मणानां वधः संपद्यते तत्रासत्यं वक्तव्यं यस्मात् य

अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च १०० एतान्दो
षानवेक्ष्य त्वं सर्वाननृतभाषणे यथाश्रुतं यथादृष्टं सर्वमेवांजसा वद १०१ गोरक्षकान्वाणिजिकां
स्तथा कारुकुशीलवान् प्रेष्यान्वार्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत् १०२ तद्वदन्धर्मतोऽर्थे
षु जानन्नप्यन्यथा नरः न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदंति ताम् १०३ शूद्रविट्क्षत्रविप्राणां य
त्रर्तोक्तौ भवेद्वधः तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते १०४ वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सर
स्वतीम् अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम् १०५

स्मिन्विषये अनृतं यत्तत्प्राणरक्षणेन सत्याद्विशिष्य
ते एतच्च प्रमादस्खलिताधर्मविषयत्वे न तत्संतानधार्मिकसंधिकारस्तेनादिविषये तथा गौतमः नानृतवदने दोषो यज्जीवनं चेत्तदधी
नं तु पापीयसो जीवनमिति न च न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितमिति मनुनैव वक्ष्यमाणत्वान्न ब्राह्मणवधप्रसक्तिरिति वाच्य
म् उग्रदंडत्वाद्राज्ञः कथंचित्संभवात् अत्र वचने शूद्रादिक्रमेणाभिधानं वधस्यामंगलत्वात् १०४ वाग्दैवेति तेसाक्षिणोऽनृताभि-
धायिनो वाग्देवताकैश्चरुभिः सरस्वतीं यजेरन् तस्यानृताभिधानजनितपापस्य प्रकृष्टां शुद्धिं कुर्वाणाः साक्षिबहुत्वापेक्षं चेदम् न त्वे
कस्यैव साक्षिणः कपिंजलन्यायेन चरुत्रयम् यद्यपि वाग्देवताकेन चरोर्वाक्शब्देनैव देवतात्वं न सरस्वतीशब्देन विधिशब्दस्य मंत्रत्वेप

वः स्यादितिन्यायात्तथापिवाग्वैसरस्वतीतिश्रुतेर्वाक्सरस्वत्योरेकार्थत्वात्सरस्वतीमित्युपसंहारः अत्रप्रकरणेचेदंप्रायश्चित्ताभिधा
नंलाघवार्थम् तत्रक्रियमाणेशूद्रविट्क्षत्रियब्राह्मणवधविषयानृतवादिनइत्यपिवक्तव्यंस्यात् १०५ कूष्मांडैरिति कूष्मांडसं
ज्ञायजुर्वेदिकायद्देवादेवहेडनमित्येवमादयः तैर्मंत्रदेवतायैघृतमग्नौजुहुयात् यथाविधिपरिस्तरणादित्वात्स्वधर्मेणस्वगृह्योक्तेन
उदुत्तमंवरुणपाशमित्येतयावरुणदेवताकया आपोहिष्ठाइतितृचेनवाब्दैवताकेनजुहुयात् घृतमग्नावितिसर्वत्रानुषंगः १०६
त्रिपक्षादिति अव्याधितःसाक्षीऋणादानादिव्यवहारेत्रिपक्षपर्यंतंयदिसाक्ष्यंनवदेत्तद्विवादास्पदंसर्वमृणमुत्तमर्णस्यदद्यात्तस्य
चसर्वस्यऋणस्यदशमंभागंराज्ञोदंडंदद्यात् १०७ यस्येति यस्यसाक्षिणःउक्तसाक्ष्यस्यसप्ताहमध्येव्याध्यग्निदाहसन्निहितपु
त्रादिज्ञातिमरणानामन्यतमंभवतिदैवसूचितमिथ्याभिदोषत्वादृणमुत्तमर्णस्यदंडंचराज्ञादाप्यः १०८ असाक्षिकेष्विति अवि

कूष्मांडैर्वापिजुहुयाद्घृतमग्नौयथाविधि उदित्यृचावावारुण्यातृचेनाब्दैवतेनवा १०६ त्रिपक्षा
दब्रुवन्साक्ष्यमृणादिषुनरोऽगदः तदृणंप्राप्नुयात्सर्वंदशबंधंचसर्वतः १०७ यस्यदृश्येतसप्ताहादुक्त
वाक्यस्यसाक्षिणः रोगोऽग्निर्ज्ञातिमरणमृणंदाप्योदमंचसः १०८ असाक्षिकेषुत्वर्थेषुमिथोविवद
मानयोः अविंदंस्तत्त्वतःसत्यंशपथेनापिलंभयेत् १०९ महर्षिभिश्चदेवैश्चकार्यार्थंशपथाःकृ
ताः वसिष्ठश्चापिशपथंशेपेपैजवनेनृपे ११० नवृथाशपथंकुर्यात्स्वल्पेऽप्यर्थेनरोबुधः वृथाहि
शपथंकुर्वन्प्रेत्यचेहचनश्यति १११

द्यमानेषुसाक्षिकेषुव्यवहारेषुपरस्परंविवदमानयोस्तद्धेतोर्बलादिव्यतिरेकेण
सत्यमलभमानःप्राड्विवाकेनवक्ष्यमाणेनशपथेनउन्नयेत् १०९ महर्षिभिश्चेति सप्तर्षिभिर्देवैश्चइंद्रादिभिःसंदिग्धकार्यनिर्णया
र्थंशपथाःकृताः वसिष्ठोप्यनेनपुत्रशतंभक्षितमितिविश्वामित्रेणाक्रुष्टःस्वपरिशुद्धयेपियवनापत्येसुदाम्निराजनिशपथंचकार अ
नेकार्थत्वाद्धातूनांशपिरपिकरोत्यर्थः ११० नवृथेति स्वल्पेपिकार्येनवृथाशपथंपंडितःकुर्यात् वृथाशपथंकुर्वन्परलोकेइहलो
केचनाशंप्राप्नोति वृथाशपथमतिप्रसवार्थमाह १११ कामिनीष्विति बहुभार्यस्यनान्यामहंकामयेत्वमेवमत्प्रेयसीतिएवंविशिष्टः

रूरतलाभार्थंकामिनीविषयेविवाहविषयेचमया अन्यानवोढव्येत्यादौगवार्थंघासाद्युपहारेचअग्नौहोमार्थमिंधनाद्युपहारेब्रा
ह्मणरक्षार्थमंगीकृतधनादौवृथाशपथेपापन्नभवति ११२ सत्येनेति ब्राह्मणंसत्यशब्दोच्चारणेनशापयेत् क्षत्रियंवाहनायुधं
ममनिष्फलंस्यादित्येवंवैश्यंगोबीजकांचनानिचममनिष्फलानिस्युः शूद्रंचसर्वाणिमेपातकानिस्युरित्येवंशापयेत्कार्यगौरवला
घवापेक्षया ११३ अग्निमिति अग्निसन्निभंपंचाशत्पलिकमष्टांगुलमयःपिंडंहस्तद्वयेविन्यस्तसप्ताश्वत्थपत्रेशूद्रादिकंसप्त-
पदानिपितामहाद्युक्तविधानादाहारयेत् जलौकादिरहितजलेचैनंनिमज्जयेत् अशेषेतिकर्त्तव्यतास्मृत्यंतरेज्ञेया पुत्राणांदारा
णांचपृथक्शिरसिएनंस्पर्शयेत् ११४ यमिति यंप्रदीप्तोऽग्निर्नदहति आपश्चयन्नोर्ध्वंनयंतिनचार्त्तिमेवमहतींप्राप्नोतिसशप

कामिनीषुविवाहेषुगवांभक्ष्येतथेंधने ब्राह्मणाभ्युपपत्तौचशपथेनास्तिपातकम् ११२ सत्येनशाप
येद्विप्रंक्षत्रियंवाहनायुधैः गोबीजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः ११३ अग्निंवाहारयेदेनमप्सुचै
नंनिमज्जयेत् पुत्रदारस्यवाप्येनंशिरांसिस्पर्शयेत्पृथक् ११४ यमिद्धोनदहत्यग्निरापोनोन्मज्जयं
तिच नचार्त्तिमृच्छतिक्षिप्रंसज्ञेयःशपथेशुचिः ११५ वत्सस्यह्यभिशस्तस्यपुराभ्रात्रायवीयसा ना
ग्निर्ददाहरोमापिसत्येनजगतःस्पृशः ११६ यस्मिन्यस्मिन्विवादेतुकौटसाक्ष्यंकृतंभवेत् तत्तत्कार्यं
निवर्त्तेतकृतंचाप्यकृतंभवेत् ११७ लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैवच अज्ञानाद्बालभा
वाच्चसाक्ष्यंवितथमुच्यते ११८

थशुद्धोज्ञेयः अत्रप्रकृतमर्थवादमाह ११५ वत्सस्येति यस्मात्पूर्वकालेवत्सनाम्नऋषेर्न-
त्वंब्राह्मणःशूद्रापत्योसीत्येवकनीयसावैमात्रेयेणाभिक्रुष्टस्यनैतदेवमिति सयथार्थमग्निंप्रविष्टस्याग्निःसर्वस्यजगतःशुभाशु
कर्त्तव्येचारुभूतःसत्येनहेतुनारोमैकमपिवन्हिर्नदग्धवान् ११६ यस्मिन्निति यस्मिन्यस्मिन्व्यवहारेसाक्षिभिरनृतमुक्तमिति-
निश्चितंभवेत्तत्कार्यंसमाप्तमपिप्राड्विवाकःपुनरपिनिवर्त्तयेत् यदपिचदंडसमाप्तपर्यंतंतान्नीतंतदपिपुनःपरीक्षेत् ११७ लोभा-
दिति वक्ष्यमाणविशेषार्थंलोभादीन्पृथक्निर्दिशति लोभेनविपरीतज्ञानेनभयेनस्नेहेनकामेनक्रोधेनाज्ञानेनानवधाने

एषामिति एषांलोभादीनांमध्यादन्यतमस्मिन्निमित्तेसतियोमिथ्यासाक्ष्यंकथयेत्तस्यदंडविशेषाणिक्रमशोवदिष्यामि ११९
लोभादिति लोभेनमिथ्याभिधानेसतिवक्ष्यमाणानांसहस्रंदंड्यः मोहेनप्रथमंसाहसंवक्ष्यमाणंभयेनचवक्ष्यमाणौमध्यमसाह-
सौमैत्रात्प्रथमसाहसंचतुर्गुणम् १२० कामादिति स्त्रीसंभोगरूपकामानुरोधेनमिथ्यावदन्प्रथमसाहसंदशगुणंदंड्यः क्रोधे
तुपरंमध्यमसाहसंत्रिगुणंवक्ष्यमाणंअज्ञानत्वाद्द्विशतेबालिश्यात् अनवधानात्पणशतमेवदंड्यइतिसर्वत्रानुषंगः १२१ एतानिति
सत्यरूपधर्मस्यापरिलोपार्थमसत्यरूपाधर्मस्यचवारणार्थमेतान्कौटसाक्ष्यविषयेपूर्वैर्मुनिभिरुक्तान् दंडान्मन्वादयोआहुःएतच्चसर्व-
कौटसाक्ष्येभूयोभूयःकौटसाक्ष्यकरणेतुच १२२ कौटसाक्ष्यमिति क्षत्रियादीन्त्रीन्वर्णान्कौटसाक्ष्यात्पूर्वोक्तेनदंडयित्वाधार्मि-

एषामन्यतमेस्थानेयःसाक्ष्यमनृतंवदेत् तस्यदंडविशेषांस्तुप्रवक्ष्याम्यनुपूर्वशः ११९ लोभात्सह
स्रंदंड्यस्तुमोहात्पूर्वंतुसाहसम् भयाद्द्वौमध्यमौदंडौमैत्रात्पूर्वंचतुर्गुणम् १२० कामाद्दशगुणंपू
र्वंक्रोधात्तुत्रिगुणंपरम् अज्ञानाद्द्वेशतेपूर्णेबालिश्याच्छतमेवतु १२१ एतानाहुःकौटसाक्ष्येप्रोक्ता
न्दंडान्मनीषिभिः धर्मस्याव्यभिचारार्थमधर्मनियमायच १२२ कौटसाक्ष्यंतुकुर्वाणांस्त्रीन्वर्णान्धा
र्मिकोनृपः प्रवासयेद्दंडयित्वाब्राह्मणंतुविवासयेत् १२३ दशस्थानानिदंडस्यमनुःस्वायंभुवोऽब्रवी
त् त्रिषुवर्णेषुयानिस्युरक्षतोब्राह्मणोव्रजेत् १२४ उपस्थमुदरंजिह्वाहस्तौपादौचपंचमम् चक्षु
र्नासाचकर्णौचधनंदेहस्तथैवच १२५

राजास्वराष्ट्राद्विवासयेत् ब्राह्मणंतुधनदंडव्यतिरिक्तेनस्वराष्ट्रान्निःसारयेत् न-
जातुब्राह्मणंहन्यात्सर्वपापेष्ववस्थितम् राष्ट्रादेनंबहिःकुर्यात्समग्रधनमक्षतमितिधनसहितनिर्वासनस्याभिधास्यमानत्वात् गोविं
दराजस्तु पूर्वदंडेनदंडयित्वानग्नंकुर्यात्इतिव्याचष्टे मेधातिथिस्तु ब्राह्मणस्यविवासस्त्वंवासोपहरणंगृहभंगोवेत्याचष्टे १२३
दशेति हैरण्यगर्भोमनुर्दशदंडस्थानान्युक्तवान्यानिक्षत्रियादिवर्णत्रयविषयेभवंतिब्राह्मणःपुनर्महत्यपराधेअक्षतशरीरोदे
शान्निःसार्यते १२४ उपस्थेति लिंगादीन्येतानिदशदंडस्थानानि अतस्तदंगेनापराधेसतिप्रतिषेधगौरवापेक्षयातदंगताडन

येदनादिकर्त्तव्यम् अल्पापराधेयथाश्रुतंधनदंडः देहदंडोमारणंमहापातकादौ १२५ अनुबंधमिति पुनःपुनरिच्छातोअप
राधकरणमपेक्ष्यग्रामारण्यादिनाऽवस्थानंरात्र्यादिकंवा अपराधस्यापेक्ष्यसारंचापराधकारिणोधनशरीरादिसामर्थ्यमपराधंचगु
रुलघुभावेनचालोक्यदंडनीयेषुदंडंकुर्यात् एतच्चाभिहिताभिधास्यमानदंडशेषभूतम् १२६ अधर्मेति जीवतःख्यातिर्यशः मृ
तस्यख्यातिःकीर्त्तिः यस्मादनुबंधाद्यनपेक्ष्यदंडनमिहयशोनाशनंमृतस्यचकीर्त्तिनाशनंपरलोकेचधर्मांतरार्जितंस्वर्गप्रतिबंधकंत
स्मात्तत्परित्यजेत् १२७ अदंड्यानिति राजादंडानर्हान् धनलोभादिनादंडयन् दंडार्हान्स्वानुरोधादिनाउत्सृजन्महतीमख्यातिंप्रा
प्नोति १२८ वाग्दंडमिति नसाधुकृतवानसिमैवंभूयः कार्षीः इत्येवंवाग्भिर्भर्त्सनंप्रथमापराधेगुणवतःकुर्यात् तथापियदिनोपशा
म्यतितदाधिक्जन्ममाजीवहानिस्तेपापस्यभूयादित्येवमादितस्यकार्यम् तदापियद्यसन्मार्गान्ननिवर्त्ततेतदाधनदंडमस्यतृतीयंकु

अनुबंधंपरिज्ञायदेशकालौचतत्त्वतः सारापराधौचालोक्यदंडंदंड्येषुपातयेत् १२६ अधर्मदंड
नंलोकेयशोघ्नंकीर्त्तिनाशनम् अस्वर्ग्यंचपरत्रापितस्मात्तत्परिवर्ज्जयेत् १२७ अदंड्यान्दंडयन्रा
जादंड्यांश्चैवाप्यदंडयन् अयशोमहदाप्नोतिनरकंचैवगच्छति १२८ वाग्दंडंप्रथमंकुर्याद्धिग्दंडं
तदनंतरम् तृतीयंधनदंडंतुवधदंडमतःपरम् १२९ वधेनापियदात्वेतान्निग्रहीतुंनशक्नुयात्
तदेषुसर्वमप्येतत्प्रयुंजीतचतुष्टयम् १३० लोकसंव्यवहारार्थंयाःसंज्ञाःप्रथिताभुवि ताम्ररू
प्यसुवर्णानांताःप्रवक्ष्याम्यशेषतः १३१ जालांतरगतेभानौयत्सूक्ष्मंदृश्यतेरजः प्रथमंतत्प्रमाणा
नांत्रसरेणुंप्रचक्षते १३२

र्यात् एवमपिचेन्नावतिष्ठतेतदातः परंवधदंडंताडनाद्यंगच्छेदरूपंतस्यकुर्यान्नमारणम्
तोवक्ष्यति वधेनापियदात्वेतानिति १२९ वधेनेति व्यस्तेनांगच्छेदेनापिदंड्यान्वशीकर्त्तुंनशक्नुयात्तदा एतेषुसर्वंवाग्दंडादिच
तुष्टयंकुर्यात् १३० लोकेति ताम्ररूप्यसुवर्णानांयाःपणादिसंज्ञाःक्रयविक्रयादिलोकव्यवहारार्थंपृथिव्यांप्रसिद्धास्तादंडाद्युपयोगा
र्थंसाकल्येनकथयिष्यामि १३१ जालांतरेति गवाक्षविवरसूर्यरश्मिषुयत्सूक्ष्मंरजोदृश्यतेतद्दृश्यमानपरिमाणानांप्रथमंत्रसरेणुंव

त्र्यसेत्याद अष्टौत्रसरेणवोलिक्षैकापरिमाणेन ज्ञेयातास्तिस्रोलिक्षाराजसर्षपोज्ञेयः तेराजसर्षपास्त्रयोगौरसर्षपोज्ञेयः १३३
सर्षपाइति गौरसर्षपाःषट्मध्योनस्थूलोनापिसूक्ष्मोयवोभवतित्रिभिर्यवैः कृष्णलंरक्तिकेतिप्रसिद्धंपंचभिः कृष्णलैर्माषःषोड-
शमाषाःसुवर्णःस्यात्पुंलिंगश्चायंपरिमाणवचनः १३४ पलमिति चत्वारःसुवर्णाःपलंस्यात् दशपलानिधरणंकृष्णलद्वयंस
मंकृत्वातुलयाधृतंरूप्यमाषकोबोद्धव्यः १३५ तेषोडशेति तेषोडशरूप्यमाषकारौप्यधरणंपुराणश्चराजतोरजतसंबंधीस्यात्
कार्षिकःताम्रमयः कार्षापणःपणइतिविज्ञेयः कार्षिकश्चशास्त्रीयपलचतुर्थभागोबोद्धव्यः अतएवपलंकर्षचतुष्टयमित्याभिधा
निकाः १३६ धरणेति दशरूप्यधरणानिरौप्यशतमानोज्ञातव्यःचतुर्भिःसुवर्णैःनिष्कःप्रमाणेनबोद्धव्यः १३७ पणेति पंचाशद-

त्र्यसरेणवोष्टौविज्ञेयालिक्षैकापरिमाणतः ताराजसर्षपस्तिस्रस्तेत्रयोगौरसर्षपः १३३ सर्षपाःषट्यवो
मध्यस्त्रियवंत्वेककृष्णलम् पंचकृष्णलकोमाषस्तेसुवर्णस्तुषोडश १३४ पलंसुवर्णाश्चत्वारःपला
निधरणंदश द्वेकृष्णलेसमधृतेविज्ञेयोरौप्यमाषकः १३५ तेषोडशस्याद्धरणंपुराणश्चैवराजतः कार्षा
पणंतुविज्ञेयस्ताम्रिकःकार्षिकःपणः १३६ धरणानिदशज्ञेयःशतमानस्तुराजतः चतुःसौवर्णिकोनि
ष्कोविज्ञेयस्तुप्रमाणतः १३७ पणानांद्वेशतेसार्द्धेप्रथमःसाहसःस्मृतः मध्यमःपंचविज्ञेयःसहस्रंत्वे
वचोत्तमः १३८ ऋणेदेयेप्रतिज्ञातेपंचकंशतमर्हति अपन्हवेतद्द्विगुणंतन्मनोरनुशासनम् १३९ व
सिष्ठविहितांवृद्धिंसृजेद्वित्तविवर्द्धिनीम् अशीतिभागंगृण्हीयान्मासाद्वार्द्धुषिकःशते १४०

धिकेद्वेशतेप्रथम
साहसोमन्वादिभिःस्मृतःपंचशतानिमध्यमःसाहसोज्ञेयः पणसहस्रंतुउत्तमसाहसोज्ञेयः १३८ ऋणेति मयोत्तमर्णस्यधनंदेय
मितिसभायामधमर्णेनोक्तेसत्यधमर्णःपणशतात्पंचपणाइत्येवंदंडमर्हतियदातुसभायामपिनकिंचिदस्मैधारयामीतिएवमपल
पतितदापणशताद्दशपणाइत्येवंदंडमर्हतिइत्येवंमनुस्मृतोदंडप्रकारः १३९ वसिष्ठेति वसिष्ठेनोक्तांवृद्धिंधर्म्यलाभ्दनवृद्धिकरीं
वृद्धिजीवीगृण्हीयान्तामेवदर्शयति शतेप्रयुक्तेअशीतिभागंप्रतिमासंवृद्धिंगृण्हीयात् १४० ७ ७ ७

द्विकमिति द्विकंशतंहिगृण्हानोवृद्धिधनग्रहणेकिल्बिषीनभवति १४१ द्विकमिति ब्राह्मणादिवर्णानांक्रमेणद्विकं
त्रुकंपंचकंशतंसमभितोनाधिकंमासस्यसंबंधिनींवृद्धिंगृण्हीयात् नन्वशीतिभागोलघुद्विकशतग्रहणंगुरुकथमिमौब्राह्मण
स्यलघुगुरुकल्पौविकल्प्येताम् अत्रमेधातिथिगोविंदराजौतु पूर्वदृस्यानिर्वाहासंभवेद्विकशतपरिग्रहइतिव्याचक्षाते इदं
तुवदामः संबंधकेष्वशीतिभागग्रहणंबंधकरहितेतुद्विकशतवृद्धिपरिग्रहः तदाहयाज्ञवल्क्यः अशीतिभागोवृद्धिःस्यान्मासि
मासिसबंधके वर्णक्रमाच्छतंद्वित्रिचतुःपंचकमन्यथा वेदांतोद्गीतमहसोमुनेर्व्याख्यानमाद्रिये तद्विरुद्धंस्वबुध्याचनिबद्धमधु
नातनैः १४२ नत्वेति भूमिगोधनादौभोगार्थबंधकेदत्तेधनप्रयोगभवामनंतरोक्तांवृद्धिमुत्तमर्णोनलभतेकालसंरोधश्चिरका
लावस्थानात्द्विगुणीभूतमूलधनप्रवेशेपिननिसर्गोऽन्यस्यैदानन्नवान्यतोविक्रयः मेधातिथिगोविंदराजौतु आधेश्चिरकाला

द्विकंशतंवागृण्हीयात्सतांधर्ममनुस्मरन् द्विकंशतंहिगृण्हानोनभवत्यर्थकिल्बिषी १४१ द्विकंत्रि
कंचतुष्कंचपंचकंचशतंसमम् मासस्यवृद्धिंगृण्हीयाद्वर्णानामनुपूर्वशः १४२ नत्वेवाधौसोपकारे
कौसीदींवृद्धिमाप्नुयात् नचाधेःकालसंरोधान्निसर्गोस्तिनविक्रयः १४३ नभोक्तव्योबलादाधिर्भुं
जानोवृद्धिमुत्सृजेत् मूल्येनतोषयेच्चैनमाधिस्तेनोन्यथाभवेत् १४४ आधिश्चोपनिधिश्चोभौन
कालात्ययमर्हतः अवहार्यौभवेतांतौदीर्घकालमवस्थितौ १४५

वस्थानेपिननिसर्गोनान्यत्रबंधकेनार्पण
मितिव्याचक्षाते अत्रतुसर्वदेशीयशिष्टाचारविरोधःबंधकीकृतभूम्यादेरन्यत्राधीकरणसमाचारात् १४३ नभोक्तव्येति गोप्या-
धिविषयंवचनमिदंवस्त्रालंकारादिर्गोप्याधिर्बलान्नभोक्तव्यःभुंजानोवृद्धिमुत्सृजेत्भागमूल्येनाप्येनंतोषयेत् यद्वा भोगेनासा
रतामाधौनीतेसारावस्थाधिमूल्यदानेनस्वामिनंतोषयेत् अन्यथाबंधकचौरःस्यात् १४४ आधिश्चेति आधिर्बंधकःउपनिधी
यतइत्युपनिधिःप्रीत्याभोगार्थमर्पितंद्रव्यंनारदस्मृतिलक्षितौचनिक्षेपोपनिधी तावेवात्रोपनिधिशब्देनगृह्येते एतावाध्युपनि-
धीचिरकालमवस्थितावपिनकालात्ययमर्हतः यदैवस्वामिनाप्रार्थितौतदैवतस्यावहार्यौसमर्पणीयावित्यर्थः १४५ छ छ

दृश्यमानागोरुष्ट्रोश्वश्चवहन्दमनार्थंनिय
संभीत्येति यत्किंचिद्दशवर्षाणीत्यनंतरंभोगेनस्वत्वहानिंवक्ष्यतितदपवादार्थमिदम् दृश्यमानागोरुष्ट्रोश्वश्चवहन्दमनार्थंनिय संप्रीत्योप भुज्यमानन्नश्यतीतिवि
युक्तोवलीवर्दादिः एतेप्रीत्या अन्येनतु भुज्यमानाः कदाचिदपिस्वामिनोननश्यंतिप्रदर्शनार्थंइदंप्रीत्योपभुज्यमानन्ननश्यतीतिवि
वक्षितंसामान्योपक्रमंचेदंविशेषाभिधानमितिनपुंसकलिंगता १४६ यत्किंचिदिति यत्किंचिद्धनजातंसमक्षमेवप्रीत्यादिव्यतिरेके
णपरैर्दशवर्षाणि भुज्यमानंस्वामीप्रेक्षतेभाक्षस्वेत्यादिप्रतिषेधोक्तिंनरचयतिनासौतल्लब्धुंयोग्योभवतितस्यतत्रस्वाम्यंनिवर्त्तत इ-
तिभावः १४७ अजडेति जडोबुद्धिविकलः न्यूनषोडशवर्षः पोगंडः तथाचनारदः बालआषोडशाद्वर्षात्पोगंडश्चापिशब्दितः स
धनस्वामीयदिजडः पोगंडश्चनभवतितदीयदर्शनविषयेचतद्धनंभुज्यतेनदास्वामिनोव्यवहारेणनष्टंततोभोक्तुरेवतद्धनंभवति १४८
आधिरिति बंधोग्रामादिमर्यादाबालधनंनिक्षेपोवासनस्थमनाख्यायसमुद्रंयन्निधीयतइतिनारदोक्तउपनिधिलक्षणः दास्यादि

संप्रीत्या भुज्यमानानिननश्यंतिकदाचन धेनुरुष्ट्रोवहन्नश्वोयश्चदम्यःप्रयुज्यते १४६ यत्किं-
चिद्दशवर्षाणिसन्निधौप्रेक्षतेधनी भुज्यमानंपरैस्तूष्णीन्नसतल्लब्धुमर्हति १४७ अजडश्चेदपो
गंडोविषयेचास्यभुज्यते भग्नंतद्व्यवहारेणभोक्तातद्द्रव्यमर्हति १४८ आधिःसीमाबालधनंनिक्षे
पोपनिधिःस्त्रियः राजस्वंश्रोत्रियस्वंचनभोगेनप्रणश्यति १४९ यःस्वामिनाऽननुज्ञातमाधिंभुंक्ते-
विचक्षणः तेनार्द्धवृद्धिर्मोक्तव्यातस्यभोगस्यनिष्कृतिः १५० कुसीदवृद्धिर्द्वैगुण्यंनात्येतिसकृदाहृ
ता धान्येसदेलवेवाह्येनातिक्रामतिपंचताम् १५१ स्त्रियोराजश्रोत्रियधनानिउक्तेनदशवर्षभोगेननस्वामिनोन

श्यंतिनभोक्तुःस्वत्वंभजंते १४९ यःस्वामिनेति योरत्न्यादत्तंबंधंस्वाम्यनुज्ञाव्यतिरेकेणमूर्खोनिन्द्रवेन भुंक्तेतेननतस्यभोगस्य-
संभुक्त्यर्थमर्द्धवृद्धिर्मोक्तव्याबलभोगेनतुभोक्तव्येबलाधिभंजानेसतिसर्ववृद्धित्यागएवोक्तः १५० कुसीदेति वृद्ध्याधनप्रयोगः
कुसीदंतत्रयावृद्धिःसकृद्गृहीतासाद्वैगुण्यंनातिक्रामतिमूलवृद्धिर्द्विगुणैवभवतिप्रतिदिनप्रतिमासादिग्राह्यादितितात्पर्यम् धा
न्येपुनर्वृन्त्यादिःप्रयुक्तेसदवृक्षफलेलूयतइतिलवःऊर्णालोमतस्मिन्वाह्नीयेचबलीवर्दादौप्रयुक्तेचिरेणापिकालेनमूल-
धान्यादिनासहपंचगुणतांनातिक्रामेदिति १५१ कृतानुसारादिति कृतायावृद्धिर्द्विकंत्रिकमितिशास्त्रेणवर्णक्रमेणोक्तातस्याःशास्त्रा

नुसारादधिकाव्यतिरिक्ताकृता अनोन्यावृद्धिरकृतेत्यर्थः किंतुकृता अपिवृद्धिः वर्णक्रमेण द्विकत्रिकशतादिरूपैर्यामासेग्राह्या त-
थाचविष्णुः वृद्धिंदद्युरकृता अपिवत्सरातिक्रमेयथाभिहितांवर्णक्रमेण द्विकत्रिकादिनेत्यर्थः किंचकृतवृद्धावपिविशेषांतरमाह कु
त्सितात्ससरत्ययंपंथाइतिकुसीदपथः अपमधमर्णोयत्शूद्रविषयोक्तंपंचकंशतंद्विजातेरपिगृण्हातीत्येवकुत्सितःपंथाः पूर्वोक्ताद्व
ध्यवृद्धिकरादपकृष्टइत्येवंमन्वादयआहुः इयंचाकृतावृद्धिरुद्धारविषयेयाचनादूर्ध्वबोद्धव्यातदाहकात्यायनः प्रीतिदत्तंनवर्द्धेतयावं
न्नप्रतियाचितम् याच्यमानन्नदत्तंचेद्वर्द्धतेपंचकंशतम् १५२ नातीति मम्मैकस्मिन्मासिमासद्वयेमासत्रयेवागतेतस्यवृद्धिंविगण
य्यएकदादातव्येत्येवंविधनियमपूर्वकवृद्धिग्रहणमुत्तमर्णःसंवत्सरपर्यंतंकुर्यात् नातिक्रांतेसंवत्सरेनियमस्यवृद्धिंगृण्हीयात् नचश
स्त्रादृष्टमुक्तधर्म्यद्विकत्रिकशताद्यधिकांगृण्हीयात् अधर्मत्वबोधनार्थोनिषेधःचक्रवृद्ध्यादिचतुष्टयींचाशास्त्रीयान्नगृण्ह

कृतानुसारादधिकाव्यतिरिक्तानसिध्यति कुसीदपथमाहुस्तंपंचकंशतमर्हति १५२ नातिसांवत्सरीं
वृद्धिन्नचादृष्टांपुनर्हरेत् चक्रवृद्धिःकालवृद्धिःकारिताकायिकाचया १५३ ऋणंदातुमशक्तोयःक
र्तुमिच्छेत्पुनःक्रियाम् सदत्वानिर्जितांवृद्धिंकरणंपरिवर्त्तयेत् १५४ अदर्शयित्वातत्रैवहिरण्यंपरि
वर्त्तयेत् यावतासंभवेद्वृद्धिस्तावतींदातुमर्हति १५५

न् तासांस्वरूपमाह बृहस्पतिः कायिकाकायसंयुक्तामासग्रा
ह्याचकालिका वृद्धेर्वृद्धिश्चक्रवृद्धिःकारिताऋणिनाकृता तत्रचक्रवृद्धिःस्वरूपेणैवगर्हिता कालवृद्धौस्तद्विगुणाधिकग्रहणेन
थिकाचातिवाहदोहादि कारिताऋणिकेनयाऽनापत्कालएवउत्तमर्णपीडयाकृता चतस्रोपिवृद्धिरशास्त्रीयानगृण्हीयात् तथाचबृह
स्पतिः भागोयद्द्विगुणादूर्ध्वंचक्रवृद्धिश्चगृह्यते पूर्णंचसोदयंपश्चात्वार्द्धुष्यंतद्विगर्हितम् कात्यायनः ऋणिकेन कृतावृद्धिरधिका
संप्रकल्पिता आपत्कालकृतानित्यंदातव्याकारितातथा अन्यथाकारितावृद्धिर्नदातव्याकथंचन १५३ ऋणंदातुमिति योऽधमर्णो
धनदानासामर्थ्यात्पुनर्लेख्यादिक्रियांकर्त्तुमिच्छेत्सनिर्जितांउत्तमर्णःसत्यतयाआत्मसात्कृतांवृद्धिंकृत्वाकरणंलेख्यंपुनःकुर्यात्
१५४ अदर्शयित्वेति यदिदैवगत्यावृद्धिहिरण्यमपिसमग्रंदातुन्नशक्नोतितदातद्बृहीत्वैवतत्रैवपुनःक्रियमाणेलेख्यादौवृ

रण्यादिशोपमारोपयेत् यत्प्रमाणंचक्रवृद्धिधनंतदानींसंभवतितद्दातुमर्हति १५५ चक्रवृद्धिमिति चक्रवृद्धिशब्देनात्रचक्रवच्छ
कटादिभाररूपावृद्धिरभिमताचक्रवृद्धिमाश्रितउत्तमर्णोदेशकालव्यवस्थितः यदिवाराणसीपर्यंतंलवणादिशकटेनवहामितदाम
मेदंयद्धनंदातव्यमितिवेतनरूपदेशव्यवस्थितिः यदिमासंयावद्वहामितदामासंयद्धनंदातव्यमितिकालव्यवस्थितिः एवमभ्युपगतदे
शकालनियमस्योदेशकालौदैवादपूरयन्शकटादिनावहन्लाभरूपफलंसकलंनप्राप्नोत्यपितु १५६ समुद्रेति स्थलपथजलप
थयानेनिपुणाइयद्देशपर्यंतंइयत्कालपर्यंतंऊह्यमानेसतिएतावाँल्लाभोगृहीतुंयुक्तइत्येवंदेशलाभधनज्ञावणिगादयोयांवृद्धिंतथा
विषयेन्यवस्थापयंतिसैवलब्धव्यवस्थातत्राधिगमंधनप्राप्तिंप्रतिप्रमाणम् १५७ योपस्येति योमनुष्योपस्यदर्शनायप्रतिभूस्तिष्ठे
त्धनदानकालेमसायमधमर्णोदर्शनीयइतिसतंतस्मिन्कालउत्तमर्णस्यादर्शयन्तद्धनंदातुंयतेत् १५८ प्रातिभाव्यमिति प्र-

चक्रवृद्धिंसमारूढोदेशकालव्यवस्थितः अतिक्रामन्देशकालौनतत्फलमवाप्नुयात् १५६ समुद्र
यानकुशलादेशकालार्थदर्शिनः स्थापयंतितुयांवृद्धिंसातत्राधिगमंप्रति १५७ योपस्यप्रतिभूस्तिष्ठे
द्दर्शनायेहमानवः अदर्शयन्सततस्यप्रयच्छेत्स्वधनादृणम् १५८ प्रातिभाव्यंवृथादानमाक्षिकंसौ
रिकंचयत् दंडसुल्कावशेषंचनपुत्रोदातुमर्हति १५९ दर्शनप्रातिभाव्येतुविधिःस्यात्पूर्वचोदितः दा
नप्रतिभुविप्रेतेदायादानपिदापयेत् १६० अदातरिपुनर्दाताविज्ञातप्रकृतावृणम् पश्चात्प्रतिभुविप्रे
तेपरीप्सेत्केनहेतुना १६१ निरादिष्टधनश्चेत्तुप्रतिभूःस्यादलंधनः स्वधनादेवतद्दद्यान्निरादिष्टइतिस्थितिः
१६२

तिभूत्वेनयद्देयंधनंतत्प्रातिभाव्यंवृथादानंपरिहासनिमित्तंपंडादिभ्योदेयत्वेनपित्रांगीकृतंद्यूतनिमित्तंसुरानिमित्तंच
दंडंयद्देयंदंडंशुल्कंघट्टादिदेयंतदवशेषंचपितृसंबंधिनंपितरिमृतेपुत्रोदातुन्नार्हति १५९ दर्शनेति सुरानिमित्तंचयद्देयंदंडं
प्रातिभाव्यन्नपुत्रोदातुमर्हतीतियोयंपूर्वोपदेशःसदर्शनप्रतिभुवःपितुर्देयोज्ञेयः दानप्रतिभुवितुपितरिमृतेपुत्रंऋणंदापयेत् १६०
अदातरीति अदातरिदानप्रतिभुवोअन्यस्मिन्दर्शनप्रतिभुविप्रत्ययप्रतिभुविवाविज्ञातप्रातिभाव्यकारणमूलशोधनोचितधनग्रहणं
यस्यतस्मिन्मृतेदातोत्तमर्णःपश्चात्केनहेतुनाधनंप्राप्तुमिच्छेत्प्रतिभुवोमृतत्वात्तत्पुत्रस्यचादानप्रतिभूत्वेनादातृत्वादित्याशंक्याह
१६१

निरादिष्टेति असौदर्शनप्रतिभूः प्रत्ययप्रतिभूर्वायदिनिरादिष्टधनः अधमर्णेननिसृष्टधनः यावताधनेनासौप्रतिभूस्तच्छोधन पर्याप्तधनः तदात्मधनादेवतद्धनंनिरादिष्टोत्रनिरादिष्टधनपुत्रोलक्षणयोच्यतेऋणमुत्तमर्णायदद्यादितिशास्त्रसंप्रदायः १६२ मत्तोन्मत्तेति मद्यादिनामत्तउन्मत्तोव्याध्यादिपीडितोपहतास्वतंत्रबालवृद्धैरस्वतंत्रत्वेनपितृमातृनियुक्तादिव्यतिरेकेणकृतऋणादानव्यवहारोनसिध्यति १६३ सत्येति इदंमयानुष्ठेयमित्येवमादिकाया भाषालेख्यादिना स्थिरीकृतापियदिशास्त्रस्यारंपर्यातसद्यवहाराच्चबहिर्भाष्यतेसासत्यानभवतितदर्थोनानुष्ठेयः १६४ योगाधमनेति योगशब्दश्छलवाचकविक्रयदानप्रतिग्रहाः क्रियंतेनतस्ततोऽन्यत्रापिनिःक्षेपादौयत्रछद्मजानीयात्तस्तुतोनिःक्षेपादिनकृतंतत्सर्वंनिवर्त्तते १६५

मत्तोन्मत्तार्त्ताध्यधीनैर्बालेनस्थविरेणवा असंबद्धकृतश्चैवव्यवहारोनसिध्यति १६३ सत्यानभाषाभवतियद्यपिस्यात्प्रतिष्ठिता बहिश्चेद्भाष्यतेधर्मान्नियताद्व्यावहारिकात् १६४ योगाधमनविक्रीतंयोगदानप्रतिग्रहम् यत्रवाप्युपधिंपश्येत्तत्सर्वंविनिवर्त्तयेत् १६५ ग्रहीतायदिनष्टःस्यात्कुटुंबार्थेकृतोव्ययः दातव्यंबांधवैस्तत्स्यात्प्रविभक्तैरपिस्वतः १६६ कुटुंबार्थेऽध्यधीनोपिव्यवहारंयमाचरेत् स्वदेशेवाविदेशेवातंज्यायान्नविचालयेत् १६७ बलाद्दत्तंबलाद्भुक्तंबलाद्यच्चापिलेखितम् सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत् १६८ त्रयःपरार्थेक्लिश्यंतिसाक्षिणःप्रतिभूःकुलम् चत्वारस्तूपचीयंतेविप्रआढ्योवणिङ्नृपः १६९

ग्रहीतेति ऋणग्रहीतायदिमृतःस्यात्तेनपूर्वंविभक्ता तृकुं बसंवर्द्धनार्थंतदृणव्ययः कृतःतदानदृणंविभक्तैरविभक्तैश्चस्वधनाद्दातव्यम् १६६ कुटुंबार्थेइति ांतर निस्वामिसंबंधिकुटुंबव्ययनिमित्तंदासोपियदृणादानादिकुर्यात्स्वामीतत्तथापिनुमन्येत १६७ बलाद्दत्तमित्यादि बलाद्दत्तमप्रतिग्रात्यादिबलाद्भुक्तंभूम्यादिबलाल्लेखितंचकरादिपत्रादिप्रदर्शनंचैतत्सर्वान् बलकृतान्व्यवहारान्निवर्त्तनीयान्मनुराह १६८ त्रयः परार्थेइति साक्षिणःप्रतिभूःकुलंचधर्माधिव्यवहारद्रष्टारयएतेपरार्थंक्लेशमनुभवंतितस्मात्तेनेनसाक्ष्यंप्रातिभाव्यंव्यवहारईक्षणं

नांगीकारयितव्याः चत्वारःपुनः ब्राह्मणोत्तमर्णवणिग्राजानः पदार्थदानफलोपादानऋणाद्व्यार्पणाविक्रयव्यवहारेक्षणरूपंकु
र्णाधनोपचयंप्राप्नुवंति तस्माद्विद्योदातारं आद्योउत्तमर्णवणिक्क्रेतारंराजाव्यवहर्त्तारंबलेननप्रवर्त्तयेत् पूर्वश्लोकाभिहित
बलनिषेधस्यैवायंप्रपंचः १६९ अनादेयमिति क्षीणधनोपिराजानाग्राह्यमर्थंगृण्हीयात्समृद्धोपिस्वल्पमपिग्राह्यंधनंनत्यजे
त्यस्मात् १७० अनादेयस्येति अग्राह्यग्रहणात्शास्त्रीयग्राह्यपरित्यागात्तुराज्ञः पौरैरसामर्थ्यंख्याप्यते ततश्चसप्रेत्याधर्मे
णनरकादिभोगादिहाकीर्त्याविनश्यति १७१ स्वादानादिति न्यायधनग्रहणाद्वर्णानांसजातीयैःशास्त्रीयपरिणयनादिसंबं-
धात्प्रह्ववर्णसंसर्गाद्वर्णसंकरादित्यत्रापिरक्षणादितियोजनीयंप्रजानांदुर्बलानांबलवद्भ्योरक्षणात्सामर्थ्यमुपजायतेनृपस्यतत
श्चासाविहलोकपरलोकयोश्चवर्द्धतेयतएवम् १७२ तस्माद्यमेति तस्माद्यमइवराजावशीकृतक्रोधोजितेंद्रियःस्वकीयेपिप्रिया

अनादेयन्नाददीतपरिक्षीणोपिपार्थिवः नचादेयंसमृद्धोपिसूक्ष्ममप्यर्थमुत्सृजेत् १७० अनादे
यस्यचादानादादेयस्यचवर्जनात् दौर्बल्यंख्याप्यतेराज्ञःसप्रेत्येहचनश्यति १७१ स्वादानाद्वर्णसंस
र्गात्त्वबलानांचरक्षणात् बलंसंजायतेराज्ञःसप्रेत्येहचवर्द्धते १७२ तस्माद्यमइवस्वामीस्वयंहित्वाप्रि
याप्रिये वर्त्तेतयाम्ययावृत्त्याजितक्रोधोजितेंद्रियः १७३ यस्त्वधर्मेणकार्याणिमोहात्कुर्यान्नराधिपः
अचिरात्तंदुरात्मानंवशेकुर्वंतिशत्रवः १७४ कामक्रोधौतुसंयम्ययोऽर्थान्धर्मेणपश्यति प्रजास्तमनु
वर्त्तंतेसमुद्रमिवसिंधवः १७५

प्रियेपरित्यज्यप्रत्यंचेष्ट्यासर्वत्रसाम्यरूपयावर्त्तेत १७३ यस्त्वधर्मेणेति यःपुनर्नृपति
र्लोभादिव्यवहारादधर्मेणव्यवहारादीनिकार्याणिकुरुतेतंदुष्टचित्तंप्रकृतिपौरविरागात्क्षिप्रमेवशत्रवोनिगृण्हंति १७४ काम-
क्रोधेति योराजारागद्वेषौविहायधर्मेणकार्याणिनिरूपयतितंराजानंप्रजाभजंतेसमुद्रमिवनद्यः नद्योयथासमुद्रान्ननिवर्त्तंतेतेनै
वैकतांयांतिप्रजाअपितस्मान्नृपादनिवर्त्तिन्यःतदेकतानाभवंतीतिसाम्यम् १७५ यःसाधयंतमिति योऽधमर्णोराजवल्लभोह
मितिगर्वादुत्तमर्णस्वेच्छयाधनंसाधयंतंनृपेनिवेदयेत् सराज्ञाऋणचतुर्थभागंदंडंतस्यतद्धनंदापनीयम् १७६ ७ ७

कर्मणापीति समानजातिरपकृष्टजातिश्चाधमर्णोधनाभावेसतिस्वजात्यनुरूपकर्मकरणेनापिसमंकुर्यात् निवृत्तोत्तमर्णाधमर्ण व्यपदेशतयाधनिकसममात्मानंकुर्यात् समजातिरत्रब्राह्मणेतरः कर्मणाक्षत्रविट्शूद्रान्समानजातीयान्हीनांस्तुदापयेत् इतिकात्यायनेनविशोधितत्वात् श्रेयान्पुनरुत्कृष्टजातिर्नकर्मकारयितव्यः किंतुशनैःशनैःयथासंभवंतद्धनंदद्यात् १७७ अनेनेति अनेनयोक्तप्रकारेणपरस्परंविवदमानानामर्थिनांसाक्ष्यादिप्रमाणेननिर्णीतार्थानिकार्याणिविप्रतिपत्तिखंडनेनराजासमीकुर्यात् १७८ कुलजइति सत्कुलप्रसूतेसदाचारवतिधर्मवादिनिसत्याभिधायिनिबहुपुत्रादिपरिजनेऋजुकृतौमनुष्येव्यभिचाराभावान्निक्षेपंस्थापयेत् १७९ योयथेति योमनुष्योयेनप्रकारेणमुद्रासहितंसमुद्रंवाससाक्षिकंयमर्थंसुवर्णादियस्यहस्तेनिक्षिपेत्सोऽर्थस्तेननिर्दं

यःसाधयंतंछंदेनवेदयेद्धनिकंनृपे सराज्ञातच्चतुर्भागंदाप्यस्तस्यचतद्धनम् १७६ कर्मणापिसमंकुर्याद्धनिकायाधमर्णिकः समोवकृष्टजातिस्तुदद्याच्छ्रेयांस्तुतच्छनैः १७७ अनेनविधिनाराजामिथोविवदतांनृणाम् साक्षिप्रत्ययसिद्धानिकार्याणिसमतान्नयेत् १७८ कुलजेवृत्तसंपन्नेधर्मज्ञेसत्यवादिनि महापक्षेधनिन्यार्येनिक्षेपन्निक्षिपेद्बुधः १७९ योयथानिक्षिपेद्धस्तेयमर्थंयस्यमानवः सतथैवग्रहीतव्योयथादायस्तथाग्रहः १८० योनिक्षेपंयाच्यमानोनिक्षेप्तुर्नप्रयच्छति सयाच्यःप्राड्विवाकेनतन्निःक्षेप्तुरसन्निधौ १८१ साक्ष्यभावेप्रणिधिभिर्वयोरूपसमन्वितैः अपदेशैश्चसंन्यस्यहिरण्यंतस्यतत्त्वतः १८२

तथैवग्राह्योयस्मात्येनप्रकारेणसमर्पणंतेनैवप्रकारेणग्रहणंन्याय्यंससमुद्रस्थापितसुवर्णादेर्निक्षेप्तास्वयमेवमुद्रांभित्वायदावदतिममेदंतुलयित्वासमर्पयेत्यभिधानंदंडाद्यर्थम् १८० योनिक्षेपेति यःपुरुषोदेहिमेनिक्षिप्तंहिरण्यादिद्रव्यमित्येवंनिक्षेप्त्राप्रार्थ्यमानस्तस्ययदानसमर्पयतितदानिक्षेप्त्राज्ञापितेप्राड्विवाकेनतस्यनिक्षेप्तुरसन्निधौयाचनीयः किंकृत्वाकिंयाचनीयइत्याह १८१ साक्ष्येति प्रथमनिक्षेपेसाक्ष्यभावेस्वकीयसप्रत्ययैश्चारपुरुषैः अतिक्रांतबाल्यैःसौम्यादिभिर्नृपोपद्रवादिव्याजाभिधायिभिर्हिरण्यानितत्तेनतत्रनिक्षेपयित्वातैरेवचारपुरुषैःसनिक्षेपधारीप्राड्विवाकेनचारपुरुषनिक्षिप्त

क्रवर्णयाच्य: १८२ सयदीति सनिक्षेपधारीयथान्यस्तंसमुद्रंचायथाकृतंकटकमुकुटाकारेणरचितंयदितथैवप्रतिपद्येतसत्यमाक्षि
गृह्यतामितितदापरेणपूर्वनिक्षेप्त्राप्राड्विवाकेवेदिनायन्निक्षिप्तमित्यभियुज्यतेतत्रनकिंचिदस्तीतिज्ञातव्यम् १८३ तेषामिति तेषां
चारपुरुषाणांयन्निक्षिप्तंहिरण्यंयथान्यस्तंयदितन्नदद्यात्तदा द्वावपिनिक्षेपोज्ञापितचारसंबंधिनौसंपीड्यदापनीयःस्यादित्येवंरूपो
धर्मनिश्चयः योनिक्षेपमित्यादिश्लोकचतुष्टयस्यचेदृशएवपाठक्रमोमेधातिथिभोजदेवादिभिर्निश्चितः गोविंदराजस्तु साक्ष्यभावेप्र
णिधिभिरितिश्लोकोंऽतएवपठितःतदान्वनार्थसंगतिः नवास्त्याम्नायादरः १८४ निक्षेपइति निक्षिप्यतइतिनिक्षेपः मुद्रांकितम
गणितंवायन्निधीयतेसउपनिधिः ब्राह्मणपरिव्राजकवदुपदेशभेदः तौनिक्षेपोपनिधीनिक्षेप्तरिउपनिधातरिजीवतिमत्यनंतरे
तदीयपुत्रादौनदनंतरेत्वनधिकारिणिकदाचिन्नदेयौयतस्तस्यपुत्रादेरपिपितुरसमर्पणविनाशोतौनिक्षेपोपनिधीनश्यतःनिक्षेप

सयदिप्रतिपद्येतयथान्यस्तंयथाकृतम् नतत्रविद्यतेकिंचिद्यत्परैरभियुज्यते १८३ तेषान्नदद्या
द्यदितुतद्धिरण्यंयथाविधि उभौनिगृह्यदाप्यःस्यादितिधर्मस्यधारणा १८४ निक्षेपोपनिधीनित्यं
नदेयौप्रत्यनंतरे नश्यतोविनिपातेतावनिपातेत्वनाशिनौ १८५ स्वयमेवतुयोदद्यान्मृतस्यप्रत्यनंत
रे नसराज्ञानियोक्तव्योननिक्षेप्तुश्चबंधुभिः १८६ अच्छलेनैवचान्विच्छेत्तमर्थंप्रीतिपूर्वकम् विचा
र्यतस्यवावृत्तंसाम्नैवपरिसाधयेत् १८७ निक्षेपेष्वेषुसर्वेषुविधिःस्यात्परिसाधने समुद्रेनाप्नुयात्किं
चिद्यदितस्मान्नसंहरेत् १८८

धारिणानदेयौस्यातांपुत्रादेः पितुश्चपुनरविनाशोकदाचिदविनाशिनौस्यातांतस्मादनर्थसं
देहान्नदेयौ १८५ स्वयमेवेति निक्षेप्तुर्मृतस्यनिक्षेपधारीतद्धनाधिकारिणिपुत्रादौतदनभ्यर्थितःस्वयमेवयःसमर्पयतिसराज्ञानि
क्षेप्तुःपुत्रादिभिर्वान्यदपित्वयिनिःक्षिप्तमस्तीतिनाक्षेप्तव्यः यदिकथंचिद्भ्रांतिःस्यात्तदा १८६ अच्छलेनैवेति तत्रस्थेधनांतरसद्
भावलक्षणवाक्यंसामादिपरिहारेणैवप्रीतिपूर्वकंनिश्चिनुयात्नतुशाठ्यानादिव्यादिदानेन निक्षेपधारिणःशीलमवेक्ष्यधार्मिकोयमि
तिज्ञात्वासामप्रयोगेननिश्चिनुयात् १८७ निक्षेपेष्विति सर्वेषुनिक्षेपेषु अपक्रियमाणेषु एषसाक्ष्यभावेत्यादिपूर्वोक्तविधिनिर्णय

सिद्धौस्यात् सुद्रितादौपुनस्तस्यनिक्षेपधारीयदि त्वमसुद्रादिनानकिमप्यपहरेत्तदातस्मिन्नर्पितेनकिंदूषणंमाप्नुयात् १८८ चौ
रैरिति चौरैर्मुषितंउदकेन देशांतरंप्रापितंअग्निनावादग्धन्निःक्षेपन्निक्षेपधारीनदद्यात् यदिस्वयंतस्मान्नकिंचिदप्यपहरति
१८९ निक्षेपस्येति निक्षेपस्यापन्होतारमनिक्षिप्ययाचितारंसर्वैः सामादिभिः उपायैर्वैदिकैश्चशपथैरग्निहरणादिभिर्नृपोनि
रूपयेत् १९० योनिक्षेपमिति निक्षिप्तधनंयोनसमर्पयतियश्चानिक्षिप्तंप्रार्थयतितौद्वौसुवर्णमुक्तादौमहतिविषयेचौरवद्दंड्यौ
स्वल्पविषयेताम्रादौतत्समंदंडनीयौ १९१ निक्षेपेति निक्षेपापहारिणंनिक्षिप्तसमधनंदंडयेत् समशिष्टत्वात् अनिक्षिप्ययाचि-
तारमपि नचपुनरुक्तिः महत्यपराधेब्राह्मणेतरस्यचौरवदितिपूर्वश्लोकेनशारीरदंडस्यापिप्राप्तौनान्निवृत्त्यर्थमिदम् दापयेदिति

चौरैर्हृतंजलेनोढमग्निनादग्धमेववा नदद्याद्यदितस्मात्सनसंहरतिकिंचन १८९ निक्षेपस्यापह
र्तारमनिक्षेप्तारमेवच सर्वैरुपायैरन्विच्छेच्छपथैश्चैववैदिकैः १९० योनिक्षेपन्नार्पयतियश्चानिक्षि
प्ययाचते तावुभौचौरवच्छास्यौदाप्यौवातत्समंदमम् १९१ निक्षेपस्यापहर्त्तारंतत्समंदापयेद्दमम् त
थोपनिधिहर्त्तारमविशेषेणपार्थिवः १९२ उपधाभिश्चयःकश्चित्परद्रव्यंहरेन्नरः ससहायःसहंतव्यः
प्रकाशंविविधैर्वधैः १९३ निक्षेपोयःकृतोयेनयावांश्चकुलसन्निधौ तावानेवसविज्ञेयोविब्रुवन्द
डमर्हति १९४ मिथोदायःकृतोयेनगृहीतोमिथएववा मिथएवप्रदातव्योयथादायस्तथाग्रहः १९५

धनदंडनि
यमात् नचानेनपूर्वश्लोकवैयर्थ्यम् अस्यप्रथमापराधविषयत्वात्पूर्वोक्तेचाभ्यासेचौरोक्तमहासाहसादिधनदंडावरोधकत्वात् उप
निधिर्मुद्रादिविहितन्निहितधनम् तस्यापहर्त्तारंकथितविशेषणंराजादंडयेत् १९२ उपधेति राजात्वयिरुष्टःतस्मात्त्वांरक्षामिममा
धनंदेहिधनकन्यालाभोपकरणंवाऽनृतमतिःयःपरद्रव्यंगृण्हातिसच्छद्मधनसहकारिसहितोबहुजनसमक्षंकरचरणशिरश्छेदा
भिर्नानाप्रकारैर्वधोपायैःराज्ञाहंतव्यः १९३ निक्षेपोति यःसुवर्णादिर्यावत्परपरिमितोयेनसाक्षिसमक्षंनिक्षेपःकृतःतत्रपरिमाण
दिविप्रतिपत्तौसाक्षिवचनात्तावानेवविज्ञातव्यः विप्रतिपत्तिंकुर्वन् अप्येतदुक्तानुसारेणदंडदाप्यः १९४ मिथोदायइति रहसिरं

निक्षेपोर्पितोनिक्षेपधारिणाचरहस्येवप्रत्यर्पणीयः नप्रत्यर्पणेसाक्ष्यपेक्षंयस्मात् येनैवप्रकारेणदानंतेनैवप्रकारेणप्रत्यर्पणंदातव्यंइ-
तिश्रवणान्निक्षेपधारिणोयंनियमविधिः योयथानिक्षिपेद्हस्तइतितुनिक्षेप्तुर्नियमार्थग्रहीतव्यइतिश्रवणात् अतोनपौनरुक्त्यम् १९५
निक्षिप्तस्येति राजानिक्षिप्तस्यधनस्यासमुद्रस्यमुद्रादियुतस्यवाउपनिधिरूपस्यतथाप्रीत्याकतिचित्कालंभोगार्थमर्पितस्याने
नोक्तप्रकारेणन्यस्तधनधारिणमपीडयन्निर्णयंकुर्यात् १९६ विक्रीणीतेइति अस्वामीयःस्वामिनाचाननुगतःपरकीयंद्रव्यंवि
क्रीणीतेयस्तुतश्चौरमचौरमात्मानंमन्यमानंतंसाक्षिलन्नकारयेत् नकुत्रचिदपिप्रमाणीकुर्यादित्यर्थः १९७ अवहार्य्येति एषप
रस्वविक्रयीयदिस्वामिनोभ्रात्रादिपरत्वेनसान्वयःसंबंधीभवतितदाषट्पणशतानिअवहार्य्योदंडनीयः यदिपुनःस्वामिनःसं
बंधीनभवतिअपसरश्चनस्यात् अपसरत्यनेनास्मात्सकाशात्इत्यपसरःप्रतिग्रहक्रयादिःसयस्यस्वामिसंबंधिपुत्रादेःसकाशा

निक्षिप्तस्यधनस्यैवंप्रीत्योपनिहितस्यच राजाविनिर्णयंकुर्यादक्षिण्वन्न्यासधारिणम् १९६ विक्री
णीतेपरस्यस्वंयोऽस्वामीस्वाम्यसंमतः नतन्नयेतसाक्ष्यंतुप्रक्तेनमस्तेनमानिनम् १९७ अवहार्योभ
वेच्चैवसान्वयःषट्शतंदमम् निरन्वयोऽनपसरःप्राप्तःस्याच्चौरकिल्बिषम् १९८ अस्वामिनाकृतो
यस्तुदायोविक्रयएववा अकृतःसतुविज्ञेयोव्यवहारेयथास्थितिः १९९ संभोगोदृश्यतेयत्रनदृश्ये
तागमःक्वचित् आगमःकारणंतत्रनसंभोगइतिस्थितिः २०० विक्रयाद्योधनंकिंचिद्गृह्णीयात्कुलस
न्निधौ क्रयेणसविशुद्धंहिन्यायतोलभतेधनम् २०१

त्नास्तितदाचौरसंबंधिपापंप्राप्नोतिदंडनीयइत्यर्थः १९८ अस्वा
मिनेति अस्वामिनायत्कृतंयद्दत्तंविक्रीतंवातदकृतमेववोद्धव्यम् व्यवहारेयथामर्यादातथाकृतंनभवतीत्यर्थः १९९ संभोगइति
यस्मिन्वस्तुनिसंभोगोविद्यतेक्रयादिरूपस्त्वागमोनास्तितत्रागमएवप्रमाणंनभोगइतिशास्त्रमर्यादा २०० विक्रयादिति विक्रीय
तेअस्मिन्नितिविक्रयदेशोविक्रयः ततोयःक्रेयधनंकिंचिद्व्यवहर्तृसमूहसमक्षंक्रियतेक्रयेणेतिक्रयोमूल्यंतेनयस्माद्गृह्णीयात् अ
तोन्यायतएवास्वामिविक्रेतृसकाशात्क्रयणाद्विशुद्धंधनंलभते २०१ अथेति अथमूलमस्वामीविक्रेतामरणाद्देशांतरादिगम

नादिनाहर्त्तुंशक्यतेप्रकाशक्रयणेचासौनिश्चितः नदादंडानर्हएवक्रेताराज्ञामुच्यतेनष्टधनस्वामीन्चयदस्वामिनाविक्रीतंद्रव्यं
क्रेतुर्हस्ताल्लभ्यते अत्रचविषयोर्द्धमूल्यंक्रेतुर्दत्वास्वधनंस्वामिनाग्राह्यंतदाहबृहस्पतिः वणिग्वीथीपरिगतंविज्ञातंराजपूरुषैः अ
विज्ञाताश्रयात्क्रीतंविक्रेतायत्रवामृतः स्वामीदत्वार्द्धमूल्यंतुप्रगृह्णीयात्स्वकंधनम् अर्द्धंद्वयोरपहृतंतत्रस्याद्व्यवहारतः २०२
न्येति कुंकुमादिद्रव्यंकुसुंभादिनामिश्रीकृत्यनविक्रेतव्यन्नचासारंसारमित्यभिधायनचतुलादिनान्यूनन्नपरोक्षावस्थितन्नरोगा
दिनास्थगितरूपं अत्रास्वामिविक्रयसादृश्यादस्वामिविक्रयदंडएवस्यात् २०३ अन्यांचेति शुल्कदेयाशुल्कव्यवस्थाकालेनिरव
द्यांदर्शयित्वायदिसावद्यावरायदीयतेतदाद्वेअपिकन्येतेनैवैकेनशुल्केनासौवरःपरिणयतइतिमनुराह शुल्कग्रहणपूर्वककन्या-
यादानस्यविक्रयरूपत्वादर्थक्रयविक्रयसाधर्म्येणास्यात्राभिधानम् २०४ नोन्मत्तेति उन्मत्तायास्तथाकुष्ठवत्यायाश्चानुभूतमैथु

अथमूलमनाहार्य्यंप्रकाशक्रयशोधितः अदंड्योमुच्यतेराज्ञानाष्टिकोलभतेधनम् २०२ नान्यद
न्येनसंसृष्टरूपंविक्रयमर्हति नचासारंनचन्यूनन्नदूरेणतिरोहितम् २०३ अन्यांचेद्दर्शयित्वान्यावो
ढुःकन्याप्रदीयते उभेतेएकशुल्केनवहेदित्यब्रवीन्मनुः २०४ नोन्मत्तायानकुष्ठिन्यानचयास्पृष्टमैथु
ना पूर्वंदोषानभिख्याप्यप्रदातादंडमर्हति २०५ ऋत्विग्यदिवृतोयज्ञेस्वकर्मपरिहापयेत् तस्यक
र्मानुरूपेणदेयोंऽशस्सहकर्तृभिः २०६ दक्षिणासुचदत्तासुस्वकर्मपरिहापयन् कृत्स्नमेवलभेतां-
शमन्येनैवचकारयेत् २०७ यस्मिन्कर्मणियास्तुस्युरुक्ताःप्रत्यंगदक्षिणाः सएवताआददीतभजे
रन्सर्वएववा २०८

नातस्याब्राह्मणादिविवाहात्पूर्वमुन्मादादीन्दोषान्वरस्यकथयित्वादंडार्होनभवतितेनाकथनेदंडइतिग
म्यतेयस्तुदोषवतींकन्यामितिवक्ष्यति अथसंभूयसमुत्थानमाह २०५ ऋत्विगिति यज्ञेकृतवरणऋत्विक्यदिकिंचित्कर्मकृ
त्वाव्याध्यादिनाकर्मत्यजतितदातस्येतरऋत्विग्भिःपर्यालोच्यकृतानुसारेणदक्षिणांशोदेयः २०६ दक्षिणेति माध्यंदिनस
दक्षिणाकालेदक्षिणासुदत्तासुव्याध्यादिनाकर्मपरित्यजन्नपिशाठ्यात्कृत्स्नमेवदक्षिणाभागंलभेत्कर्मशेषंप्रकृतमन्येन
रयेत् २०७ यस्मिन्निति यस्मिन्कर्मण्याधानादौअंगमंगंप्रतियादक्षिणायत्संबंधेनश्रुताःस्युःसएवताआददीतनतत्तद्भाग

मात्रंसर्वेविभज्यगृण्हीरन्निति संशयः अत्रसिद्धांतमाह २०८ रथमिति केषांचित्शाखिनामाधानेऽध्वर्यवेरथोदेयत्वेनाम्नायते ब्रह्मणेचाश्वःउद्गात्रेसोमक्रयवहनशकटमतोव्यवस्थाम्नानसामर्थ्याद्यादक्षिणायत्संबंधत्वेन श्रूयतेसएवतामाददीतसंप्रतियज्ञेवि धानेदक्षिणाविभागमाह २०९ सर्वेषामिति तंशतेनदीक्षयतीतिश्रूयतेतत्रसर्वेषांषोडशानांऋत्विजांमध्येयेमुख्याऋत्विजःहोत्रध्वर्युब्रह्मोद्गातारःसमग्रदक्षिणायास्तेअर्द्धहराः अष्टचत्वारिंशद्गोभाजोभवंति अतएवकात्यायनेनयद्द्वादशाद्येभ्यइतिप्रत्येकंद्वादशगोदानंविहितम् यद्यपितस्यार्द्धंपंचाशद्भवतितथापीहन्यूनार्द्धग्रहणेनापिइमेअर्द्धिनउच्यंतेसामीप्यादपरेमैत्रावरुणयोःप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तेमुख्यर्त्विक्गृहीतदक्षिणार्द्धग्रहणेनार्द्धिनउच्यंतेतृतीयिनोऽच्छावाकनेष्टाग्नीध्रप्रतिहर्त्तारःतेमुख्यर्त्विक्गृहीतस्यतृतीयमंशंलभंतेपादिनस्तुग्रावस्तुन्नेतृपोतृसुब्रह्मण्याएतेमुख्यर्त्विक्गृहीतस्यचतुर्थमंशंलभंतेएतच्चषड्द्वितीयेभ्यःचत

रथंहरेतचाध्वर्युर्ब्रह्माधानेचवाजिनम् होतावापिहरेदश्वमुद्गाताचाप्यनःक्रये २०९ सर्वेषामर्द्धिनोमुख्यास्तदर्द्धेनार्द्धिनोपरे तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्चपादिनः २१० संभूयस्वानिकर्माणिकुर्वद्भिरिहमानवैः अनेनविधियोगेनकर्त्तव्यांशप्रकल्पना २११ धर्मार्थंयेनदत्तंस्यात्कस्मैचिद्याचतेधनम् पश्चाच्चनतथातत्स्यान्नदेयंतस्यतद्भवेत् २१२ यदिसंसाधयेत्तत्तुदर्पाल्लोभेनवापुनः राज्ञादाप्यःसुवर्णंस्यात्तस्यस्तेयस्यनिष्कृतिः २१३ दत्तस्यैषोदिताधर्म्यायथावदनपक्रिया अतऊर्ध्वंप्रवक्ष्यामिवेतनस्याऽनपक्रियाम् २१४

स्तत्तृतीयेभ्यस्त्रिस्त्रश्चतुर्थेभ्यइतिसूत्रयताकात्यायनेनस्फुटीकृतम् २१० संभूयेति मिलित्वागृहनिर्माणादीनिस्वकर्माणिलोकेस्थपतिसूत्रधारादिभिश्चमनुष्यैःकुर्वद्भिरनेनयज्ञदक्षिणाविधिनाश्रयणेनव्यापाराद्यपेक्षयाभागकल्पनाकार्या इदानींदत्तानपकर्माह २११ धर्मार्थमिति येनयागादिकर्मार्थंकस्मैचिद्याचमानायधनंदत्तंप्रतिश्रुतंवापश्चाच्चतद्धनमसौयागार्थंनविनियुंजीततदातद्दत्तमपिग्राह्यंप्रतिश्रुतंचनदेयंयदाहगौतमःप्रतिश्रुत्याप्यधर्मसंयुक्तायनदद्यात् २१२ यदिति यदितद्दत्तमसौगृहीत्वालोभादहंकाराद्वानत्यजतिप्रतिश्रुतंवाधनंबलेनगृण्हातितदातस्यचौर्यप्रायस्यसंशान्त्यर्थंराज्ञासुवर्णंदंडंदापनीयोभवति २१३ दत्तस्येति

एतद्वृत्तस्याप्रतिपादनंधर्मादनपेतंतदुक्तंअतोऽनंतरंभृतेरसमर्पणादिकंवक्ष्यामि २१४ भृतइति योभृतिपरिक्रीतोव्याध्यपीडितोयथानिरूपितंकर्माहंकारान्नकुर्यात्कर्मानुरूपेणसुवर्णादिकृष्णलान्यष्टौदंडनीयः वेतनंचास्यनदेयम् २१५ आर्त्तइत्यादि यदाव्याध्यादिपीडयाकर्मनकरोतियादृक्भाषितंतादृक्कर्मकुर्यात्वेतनंचचिरकालादपिलभेतैव २१६ यथोक्तमिति यत्कर्मयथाभाषितंपीडितोऽन्येनकारयेत्स्वस्थोवानकुर्यात्नापिकारयेत्तस्यकिंचित्शेषस्यकृतस्यकर्मणोवेतनन्नदेयम् २१७ एषधर्मइति शाव्यवस्थावेतनादानास्यकर्मणोनिःशेषेणोक्ताअतोऽनंतरंसंविद्व्यतिक्रमकारिणंदंडादिव्यवस्थांवदिष्यामि २१८ योग्रामेति मदेशशब्दाभ्यांतद्वासिनोलक्ष्यंतेसंघोवणिगादिसमूहः इदमस्माभिः कर्त्तव्यंपरिहार्यंनामित्येवंरूपंसंकेतंसत्यादिशपथेनकृत्वात-

भृतोनार्त्तोनकुर्याद्योदर्पात्कर्मयथोदितम् सदंड्यः कृष्णलान्यष्टौनदेयंचास्यवेतनम् २१५ आर्त्तस्तुकुर्यात्स्वस्थःसन्यथाभाषितमादितः सदीर्घस्यापिकालस्यतल्लभेतैववेतनम् २१६ यथोक्तमार्त्तःस्वस्थोवायस्तत्कर्मनकारयेत् नतस्यवेतनंदेयमल्पोनस्यापिकर्मणः २१७ एषधर्मोऽखिलेनोक्तोवेतनादानकर्मणः अतऊर्ध्वंप्रवक्ष्यामिधर्मंसमयभेदिनाम् २१८ योग्रामदेशसंघानांकृत्वासत्येनसंविदम् विसंवदेन्नरोलोभात्तंराष्ट्राद्विप्रवासयेत् २१९ निगृह्यदापयेच्चैनंसमयव्यभिचारिणम् चतुःसुवर्णान्षण्निष्कांश्छतमानंचराजतम् २२० एतद्दंडविधिंकुर्याद्धार्मिकःपृथिवीपतिः ग्रामजातिसमूहेषुसमयव्यभिचारिणाम् २२१ क्रीत्वाविक्रीयवाकिंचिद्यस्येहानुशयोभवेत् सोऽंतर्दशाहात्तद्द्रव्यंदद्याच्चैवाददीतच २२२

न्मध्येयोनरोलोभादिनानिःक्रामेत्तंराजाराष्ट्रान्निर्वासयेत् २१९ निगृह्येति अथचैनंसंविद्व्यतिक्रमकारिणंनिबध्यचतुरःसुवर्णान्षण्निष्कान्प्रत्येकंचतुःसुवर्णपरिमितान्राजतंचशतमानंविंशत्यधिकरक्तिकाशतत्रयपरिमाणंत्रयमेतद्विषयल्पधिंधर्मप्रधानोराजानुतिष्ठेत् २२१ क्रीत्वेति क्रीत्वाविक्रीयवाकिंचिद्द्रव्यंविनश्वररूपंस्थिरार्घ्यंभूमिताम्रादियस्यलोकेपश्चात्तापो

जायतेनसाधुमयाक्रीतमितिसक्रीतंदशाहमध्येप्रत्यर्पयेत् विक्रीतंचागृण्हीयात् २२२ परेणेति दशाहादूर्द्ध्वंक्रीतन्नत्यजेत् नापिविक्रीतंविक्रयिकोबलेनदापयेत् विक्रीतंबलेनगृण्हन् परित्यजन् राज्ञाषट्शतानिदंड्यः २२३ यस्त्विति नोन्मत्तायाइतिसामान्येनोक्तंदंडविशेषाभिधानार्थमिदमुन्मादादिदोषानकथयित्वादोषवतींकन्यांवराययःप्रयच्छतितस्यराजास्वयमादरेणषण्णवतिपणान् दंडंकुर्यात् अनुशयप्रसंगेनैतत्कन्यागतमुच्यते २२४ अकन्येति नेयंकन्याक्षतयोनिरियमितियोमनुष्योद्वेषेणब्रूयात्तस्याउक्तदोषमविभावयन् पणशतंराजादंडंप्रकल्पयेत् शुक्तश्चास्याकन्येतिवादिनोदंडोयस्मात् २२५ पाणिग्रहेति अर्यमणंनुदेवंकन्याअग्निमयक्षतेत्येवमादयोवैदिकामनुष्याणांमंत्राःकन्याशब्दश्रवणात्कन्यास्वेवव्यवस्थितानाकन्याविषयेक्वचित्शास्त्रेधर्म्यविवाहसिद्धयेव्यवस्थिताअसमवेतार्थास्यात् अतएवाह ताःक्षतयोनयोवैवाहिकमंत्रैःसंस्क्रियमाणाअपियस्मादपगतधर्मविवा

परेणतुदशाहस्यनदद्यान्नापिदापयेत् आददानोददच्चैवराज्ञादंड्यःशतानिषट् २२३ यस्तुदोषवतींकन्यामनाख्यायप्रयच्छति तस्यकुर्यान्नृपोदंडंस्वयंषण्णवतिपणान् २२४ अकन्येतितुयःकन्यांब्रूयाद्द्वेषेणमानवः सशतंप्राप्नुयाद्दंडंतस्यादोषमदर्शयन् २२५ पाणिग्रहणिकामंत्राःकन्यास्वेवप्रतिष्ठिताः नाकन्यासुक्वचिन्नॄणांलुप्तधर्मक्रियाहिताः २२६ पाणिग्रहणिकामंत्रानियतंदारलक्षणम् तेषान्निष्ठातुविज्ञेयाविद्वद्भिःसप्तमेपदे २२७

हादिशालिन्योभवंतिनासौधर्म्योविवाहइत्यर्थः नतुक्षतयोनेर्वैवाहिकमंत्रहोमादिनिषेधकमिदं यागार्भिणीसंस्क्रियतेतयावोढुःकन्यासमुद्भवमितिक्षतयोनेरपिमनुनैवविवाहसंस्कारस्यवक्ष्यमाणत्वात् देवलेनतु गांधर्वेषुविवाहेषुपुनर्वैवाहिकोविधिः कर्त्तव्यश्चत्रिभिर्वर्णैःसमयेनाग्निसाक्षिकइतिगांधर्वेषुविवाहेषुहोममंत्रादिविधिरुक्तः गांधर्वश्चोपगमनपूर्वकोपिभवतितस्यक्षत्रियविषयेसधर्मत्वंमनुनोक्तंअतःसामान्यविशेषन्यायात्इतरविषयोयंक्षतयोनिविवाहस्याधर्मत्वोपदेशः २२६ पाणिग्रहणिकेति वैवाहिकामंत्रानियतंनिश्चितंभार्यात्वेनिमित्तंमंत्रैर्यथाशास्त्रप्रयुक्तैर्भार्यात्वेननिष्पत्तेः तेषांतुमंत्राणांसप्तासप्तपदीभवेतिमंत्रेणकल्पनयासप्तमेदत्तेपदेभार्यात्वनिष्पत्तेःशास्त्रज्ञैःनिष्प

निर्विज्ञेयाएवंचसप्तपदीदानात्प्राग्भार्यात्वानिष्पत्तेःसत्यनुशयेजह्यान्नोर्ध्वम् २२७ यस्मिन्निति नकेवलंक्रयएवअन्यत्रापि
यस्मिन्यस्मिन्संबंधिलेनादौकार्येयस्य पश्चात्तापोजायतेतमनेनदशाहविधिनाधर्मादनपेतेमार्गेनृपःस्थापयेत् २२८ पशुष्वि
ति गवादिपशुविषयेस्वामिनांपालानांव्यतिक्रमेजातेविवादंसत्यधर्म्ययथातथाव्यवस्थयावक्ष्यामि २२९ दिवेति दिवापशूनां
पालहस्तन्यस्तानांयोगक्षेमविषयेपालस्यगर्हणीयता रात्रौपुनःपालप्रत्यर्पितानांस्वामिगृहस्थितानांस्वामिनोदोषोऽन्यथातुय
दिरात्रावपिपालहस्तगताभवंतितत्रदोषउत्पन्नेपालएवगर्हणीयतांप्राप्नोति २३० गोपःक्षीरेति योगोपालाख्योभृत्यःक्षीरेण
नभक्तादिनास्वस्वाम्यनुज्ञयाधर्षितोगोभ्यःश्रेष्ठामेकांगांभृत्यर्थंदुह्यात्साभक्तादिरहितेगोपालेभृतिःस्यात् एवंचैकगवीक्षीर

यस्मिन्यस्मिन्कृतेकार्य्येयस्येहानुशयोभवेत् तमनेनविधानेनधर्म्येपथिनिवेशयेत् २२८ पशु
षुस्वामिनांचैवपालानांचव्यतिक्रमे विवादंसंप्रवक्ष्यामियथावद्धर्मतत्त्वतः २२९ दिवावक्तव्यता
पालेरात्रौस्वामिनितद्गृहे योगक्षेमेऽन्यथाचेत्तुपालोवक्तव्यतामियात् २३० गोपःक्षीरभृतोयस्तुस
दुह्याद्दशतोवराम् गोस्वाम्यनुमतेभृत्यःसास्यात्पालेऽभृतेभृतिः २३१ नष्टंविनष्टंकृमिभिःश्वहतं
विषमेमृतम् हीनंपुरुषकारेणप्रदद्यात्पालएवतु २३२ विघुष्यतुहृतंचौरैर्नपालोदातुमर्हति यदि
देशेचकालेचस्वामिनःस्वस्यशंसति २३३ कर्णौचर्मचवालांश्चबस्तिंस्नायुंचरोचनाम् पशुषुस्वामि
नांदद्यान्मृतेष्वंगानिदर्शयेत् २३४

दानेनदशागाःपालयेदित्युक्तम् २३१ नष्टमिति नष्टंदृष्टिपथातीतंकृमिभिर्नाशि
तंश्वभिःखादितंहतंविवरादिपातमृतंप्रदर्शनंचैनत्पालसंबंधिरक्षकाख्यपुरुषव्यापाररहितंमृतंपलायितंगवादिपशुपाल
एवतुस्वामिनेदद्यात् २३२ विघुष्येति चौरैःपुनःपटहादिविघुष्यहृतंपालोदातुंनार्हति विघुष्येतिचौराणांबहुलप्रबल
त्वकथनपरंसन्निहितेदेशेहरणकालानंतरमेवात्मीयस्वामिनःकथयति २३३ कर्णाविति स्वयंमृतेषुपशुषुकर्णचर्मलांगूल
प्रवालान्नाभेरधोभागस्नायुरोचनाःस्वामिनांदद्यात् अन्यानिचचिन्हानिशृंगखुरादीनिदर्शयेत् २३४ ७ ७

तस्मिन्नजाविके वृकैः परिवृतेसतिपालेनाग

अजाविकेति अजाश्च अविकाश्च अजाविकंगवाश्वप्रभृतीनिचेति द्वंद्वैकवद्भावः तासांचेति तासामजाविकानांपालेनानियमितानांयत्नाद्यदि
च्छतियामजामेडकांवावनेवृकोहन्यात्सपालस्यदोषःस्यात् २३५ तासांचेति तासामजाविकानांपालेनानियमितानांयत्नाद्यदि
कश्चित्कुतश्चिदुत्प्लुत्यालक्षितोयांकांचिद्धन्यात्नपालस्तत्रदोषभाक् २३६ धनुःशतमिति चतुर्हस्तोधनुः शम्यायष्टिःतस्याः
पातः प्रक्षेपोग्रामसमीपेसर्वास्कंदिक्षुचत्वारिहस्तशतानित्रीन्वायष्टिप्रक्षेपान्यावत्पशुप्रचारार्थसस्यवपनादिसंरोधपरिहारःका
र्यःनगरसमीपेपुनरयंत्रिगुणः कर्त्तव्यः २३७ तत्रापरीति तस्मिन्परिहारस्थानेयदिकेनचिददत्तावृतिकंधान्यंउप्यतेतच्चेत्पशवोभ
क्षयेयुः तत्रपशुपालानांनृपोदंडंनकुर्यात् २३८ वृतिमिति तत्रपरिहारस्थानेक्षेत्रेवृतिंकंटकादिमयींतथाविधामुच्छ्रितांकुर्यात्या

अजाविकेतुसंरुद्धेवृकैःपालेत्वनायति यांप्रसह्यवृकोहन्यात्पालेतत्किल्बिषंभवेत् २३५ तासांचे
दवरुद्धानांचरंतीनांमिथोवने यामुत्प्लुत्यवृकोहन्यान्नपालस्तत्रकिल्बिषी २३६ धनुःशतंपरीहारोग्रा
मस्यस्यात्समंततः शम्यापातास्त्रयोवापित्रिगुणोनगरस्यतु २३७ तत्रापरिवृतंधान्यंविहिंस्युःपशवो
यदि नतत्रप्रणयेद्दंडन्नृपतिःपशुरक्षिणाम् २३८ वृतिंतत्रप्रकुर्वीतयामुष्ट्रोनविलोकयेत् छिद्रंच
वारयेत्सर्वंश्वसूकरमुखानुगम् २३९ पथिक्षेत्रेपरिवृतेग्रामांतीयेऽथवापुनः सपालःशतदंडार्होविपा
लान्वारयेत्पशून् २४० क्षेत्रेष्वन्येषुतुपशुःसपादपणमर्हति सर्वत्रतुसदोदेयःक्षेत्रिकस्येतिधारणा
२४१ अनिर्दशाहांगांसूतांवृषान्देवपशूंस्तथा सपालान्वाविपालान्वानदंड्यान्मनुरब्रवीत् २४२

मपरपार्श्वेउष्ट्रोनविलोकयेत्तस्यांचयत्किंचिच्छिद्रंश्वसूकरमुखप्रवेशयोग्यंतत्सर्वमावृणुयात् २३९ पथीति वर्त्मसमीपग्रामस
मीपवर्तिनिवापरिहारस्थेक्षेत्रेदत्तवृतौसपालः पशुःपालानिवारितोह्यादिनाकथंचित्सविशेषयदाभक्षयतितदापणशतंदंड्यःप
शोश्चदंडासंभवात्पालएवदंड्यःविपालान्पुनर्भक्षणप्रवृत्तान्क्षेत्ररक्षकोनिवारयेत् २४० क्षेत्रेष्विति वर्त्मग्रामांतव्यतिरिक्तेषु
पशुर्भक्षयन्सपादंपणंदंडमर्हति अत्रापिपालएवदंड्यःसर्वत्रक्षेत्रेपशुभक्षितंफलस्वामिनेपालेनस्वामिनावायथापराधंदातव्य
मितिनिश्चयः २४१ अनिर्दशाहामिति प्रसूतामनिर्गतदशाहांतथाचक्रशूलांकितोत्सृष्टवृषान्हीरहृदादिप्रतिमासंबंधिपशून्

पालरहितान्वासस्यभक्षणप्रवृत्तान्मनुरदंडयानाह उत्सृष्टवृषाणामपिगर्भार्थंगोकुलेपालेंद्ररिणात्सपालत्वसंभवः २४२ क्षेत्रियस्येति क्षेत्रकर्त्तार्थपशुसस्यभक्षणे अयथाकालंवपनादौवापराधेसति यावतोराजभागस्यतेन हानिः कृतातनोदशगुणादंडःस्यात् क्षेत्रिकाविदितेभृत्यानामुक्तापराधे क्षेत्रिकस्यैव दशगुणार्द्धदंडः क्षेत्रसस्यप्रसंगाच्चेदमुक्तम् २४३ एतदिति स्वामिनांपालानांचारक्षणादपराधेपशूनांचसस्यभक्षणरूपेधर्मप्रधानोभूपतिरेतत्पूर्वोक्तंकर्त्तव्यमनुतिष्ठेत् २४४ सीमामिति द्वयोर्ग्रामयोर्मर्यादांप्रतिविप्रतिपत्तावुत्पन्नायांज्येष्ठेमासिग्रीष्मरवितापसंशुष्कतृणत्वात्प्रकटीभूतेषुसीमालिंगेषुराजासीमांनिश्चिनुयात् २४५ सीमावृक्षानिति न्यग्रोधादीन्वृक्षान्क्षीरिणउदुंबरादीन्चिरस्थायित्वात्सीमालिंगभूतान्कुर्वीत २४६ गुल्मा

क्षेत्रियस्यात्ययेदंडोभागाद्दशगुणोभवेत् ततोऽर्द्धदंडोभृत्यानामज्ञानात्क्षेत्रियस्यतु २४३ एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः स्वामिनांचपशूनांचपालानांचव्यतिक्रमे २४४ सीमांप्रतिसमुत्पन्नेविवादेग्रामयोर्द्वयोः ज्येष्ठेमासिनयेत्सीमांसुप्रकाशेषुसेतुषु २४५ सीमावृक्षांश्चकुर्वीतन्यग्रोधाश्वत्थकिंशुकान् शाल्मलीन्सालतालांश्चक्षीरिणश्चैवपादपान् २४६ गुल्मान्वेणूंश्चविविधान्शमीवल्लीस्थलानिच शरान्कुब्जकगुल्मांश्चतथासीमाननश्यति २४७ तडागान्युदपानानिवाप्यःप्रस्रवणानिच सीमासंधिषुकार्याणिदेवतायतनानिच २४८ उपच्छन्नानिचान्यानिसीमालिंगानिकारयेत् सीमाज्ञानेनृणांवीक्ष्यनित्यंलोकेविपर्ययम् २४९

निति गुल्मान्प्रकांडरहितान्वेणूंश्चप्रचुरकंटकत्वाल्पकंटकत्वादिभेदेननानाप्रकारान्सीमावृक्षान्वल्लीर्लताःस्थानानिकृत्रिमोन्नतभूभागान्शरान्कुब्जकगुल्मांश्चप्रचुराऽल्पभोगत्वेनादरार्थंपृथक्निर्देशान्सीमालिंगभूतान्कुर्यात् एवंकृतेसीमाननश्यति २४७ तडागानिति तडागकूपदीर्घिकाजलनिर्गमप्रमार्गदेवगृहाणिसीमारूपेणग्रामद्वयसंधिस्थानेषुकर्त्तव्यानि एतेषुसीमानिर्णयायविख्याप्यकृते उदकाद्यर्थिजनाअपिश्रुतिपरंपरयाचिरकालेपिसाक्षिणोभवंति २४८ उपच्छन्नानीत्यादि सीमानिर्णयेसर्वदाऽस्मिन्लोके

मनुष्याणांविभ्रममज्ञानंदृष्ट्वाऽभिहितव्यतिरिक्तानिगूढानिवक्ष्यमाणानिसीमाचिन्हानिकारयेत् २४९ अश्मेति यानीति मस्त
स्थिगोवालतुषभस्मकर्परिकाशुष्कगोमयपक्केष्टकांऽगारपाषाणकर्परसिकताअन्यान्यप्येवंप्रकाराणिकालांजनकार्पासाऽस्थिप्र
तीनियानिचिरकालेनापिभूमिरात्मसात्नकरोतितानिग्रामयोःसंधिषुसीमायांप्रक्षिप्यकुंभेष्वेतानिसीमांतेषुनिधापयेदितिबृह
स्पतिवचनात्स्थूलपाषाणव्यतिरिक्तानिकुंभेषुकृत्वाप्रच्छन्नानिभूमौनिखायधारयेत् २५० २५१ एतैरिति विवदमानयो-
र्ग्रामयोःप्रागुक्तैरेतैरुक्तचिन्हैराजासीमामुन्नयेत्वसतोऽपुनरविच्छिन्नयाभुक्त्यासीमानिर्णयोनतुत्रिपुरुषादिकतयातस्याधिः
सीमेतिपर्युदस्तत्वात् ग्रामद्वयसंधिस्थनद्यादिप्रवाहेनचपारावारग्रामयोःसीमांनिश्चिनुयात् २५२ यदीति यदिप्रच्छन्नप्रकाश

अश्मनोऽस्थीनिगोवालांस्तुषान्भस्मकपालिकाः करीषमिष्टकांगारांच्छर्करावालुकास्तथा २५० या
निचैवंप्रकाराणिकालाद्भूमिर्नभक्षयेत् तानिसंधिषुसीमायामप्रकाशानिकारयेत् २५१ एतैर्लिंगैर्न
येत्सीमांराजाविवदमानयोः पूर्वभुक्त्याचसततमुदकस्यागमेनच २५२ यदिसंशयएवस्यात् लिंगाना
मपिदर्शने साक्षिप्रत्ययएवस्यात्सीमावादविनिर्णयः २५३ ग्रामीयककुलानांचसमक्षंसीम्निसा-
क्षिणः प्रष्टव्याःसीमलिंगानितयोश्चैवविवादिनोः २५४ तेपृष्टास्तुयथाब्रूयुःसमस्ताःसीम्निनिश्चय
म् निबध्नीयात्तथासीमांसर्वांस्तांश्चैवनामतः २५५ शिरोभिस्तेगृहीत्वोर्वीस्रग्विणोरक्तवाससः सुकृ
तैःशापिताःस्वैस्वैर्नयेयुस्तेसमंजसम् २५६

लिंगदर्शनेपिप्रच्छन्नांगारादितुपाअमीस्थानांतरेनीत्वानिखातानायं-
सीमातरुर्न्यग्रोधः इत्यादिसमस्तएवयदिसंदेहःस्यात् तदासाक्षिप्रमाणएवसीमाविवादनिश्चयोभवेत् २५३ ग्रामीति ग्रामिक-
जनसमूहानांग्रामद्वयस्थनियुक्तयोर्वादिप्रतिवादिनोश्चसमक्षंसीमाविषयेसीमालिंगसंदेहेलिंगानिसाक्षिणःप्रष्टव्याः २५४ ते
इति तेपृष्टाःसाक्षिणःसमस्ताइदंधेनसीमाविषयेनयेनप्रकारेणानिश्चयंब्रूयुःतेनप्रकारेणाविस्मरणार्थंपत्रेसीमांलिखेत्तांश्चस
र्वानेयसाक्षिणोनामविभागतोलिखेत् २५५ शिरोभिरिति तेसाक्षिणइतिसामान्यश्रवणोपरक्तस्रग्वासससःसीमांनयेयुरितिशा

त्नवल्त्यवचनात्रक्तपुष्पमालाधारिणोलोहितवाससोमस्तकेमृल्लोष्टानिगृहीत्वायदस्माकंसुकृतंतन्निष्फलंस्यादितिएवमा
त्मीयैःसुकृतैःशापिताःसंतःतांसीमांयथाशक्तिनिर्णयेयुः २५६ यथोक्तेति तेसत्यप्रधानाःसाक्षिणःशास्त्रोक्तेनविधानेननिर्ण
यस्थानिष्पापाभवंति अतथ्येनतुनिश्चिन्वंतःप्रत्येकंपणशतद्वयंदंडंदाप्याभवेयुः २५७ साक्ष्येति तत्रसंधिविवादसाक्ष्यभावे
चतुर्दिशांसमंतभवाःसामंतास्तत्स्वामिनःचत्वारोग्रामवासिनः साक्षिधर्मेणराजसमक्षंसीमानिर्णयंकुर्युः २५८ सामंतेति साक्षि
धर्मेणराजसमक्षमनुभवेननिर्णयमकुर्वतांग्रामवासिनांग्रामनिर्माणकालप्रदारभ्यमौलानांपुरुषक्रमेणतद्ग्रामस्थानांसीमासाक्षि
णामभावइमान्वक्ष्यमाणान्सन्निहितवनचारिणःपृच्छेत् २५९ व्याधेति लुब्धकान्पक्षिवधजीविनःगोपालान्मत्स्यजीविनोमूलो

यथोक्तेननयंतस्तेपूयंतेसत्यसाक्षिणः विपरीतंनयंतस्तुदाप्याःस्युर्द्विशतंदमम् २५७ साक्ष्यभा
वेतुचत्वारोग्रामाःसामंतवासिनः सीमाविनिर्णयंकुर्युःप्रयताराजसन्निधौ २५८ सामंतानामभावेतु
मौलानांसीम्निसाक्षिणाम् इमानप्यनुयुंजीतपुरुषान्वनगोचरान् २५९ व्याधांछाकुनिकान्गोपा
न्कैवर्तान्मूलखानकान् व्यालग्राहानुंछवृत्तीनन्यांश्चवनचारिणः २६० तेपृष्टास्तुयथाब्रूयुःसीमा
संधिषुलक्षणम् तत्तथास्थापयेद्राजाधर्मेणग्रामयोर्द्वयोः २६१ क्षेत्रकूपतडागानामारामस्यगृहस्य
च सामंतप्रत्ययोज्ञेयःसीमासेतुविनिर्णयः २६२ सामंताश्चेन्मृषाब्रूयुःसेतौविवदतांनृणाम् सर्वेपृथक्
पृथग्दंड्याराज्ञामध्यमसाहसम् २६३

त्पाटनजीविनःसर्पग्राहिणः शिलोंछवृत्तीनन्यांश्चफलपुष्पेंधनाद्यर्थंवनव्यवहारिणः
पृच्छेत् एतेहिस्वप्रयोजनार्थंतेनग्रामेणसर्वदावनंगच्छेयुःतद्ग्रामसीमाभिज्ञाःसंभवंति २६० तेपृष्टाइति तेव्याधादयःपृष्टास्सीमासं
धिषुग्रामसंधिषुयेनप्रकारेणचिन्हंब्रूयुः तत्तेनैवप्रकारेणराजाद्वयोर्ग्रामयोःसीमांव्यवस्थापयेत् २६१ क्षेत्रेति एकग्रामेपिक्षेत्रकूप
तडागानांगृहाणांसीमासेतुविवादेसमस्तदेशवासिसाक्षिप्रमाणकएवमर्यादाचिन्हनिश्चयोविज्ञेयोनव्याधादिप्रमाणकः २६२ सामंतो
सीमाचिन्हनिमित्तंविवदमानानांमनुष्याणांयदिसामंतादेशवासिनोमिथ्याब्रूयुस्तदातेसर्वेप्रत्येकंराज्ञामध्यमसाहसंदंडनीयाःए

चासामंतरूपाणांपूर्वोक्तद्विशतोदमोज्ञेयः २६३ गृहमिति गृहतडागोद्यानक्षेत्राणामन्यतमंमारणंबंधनादिभयकथनपूर्वमाक्र
हरणेपंचपणशतानिदंडनीयःस्यात्स्वातंत्र्याद्द्विशतोदमः २६४ सीमेति लिंगसाक्ष्यभावेसीमायांपरिच्छेत्तुमशक्यायांराजैवधर्म
ज्ञःपक्षपातरहितोग्रामद्वयमध्यवर्त्तिनींविवादविषयांभूमिंयेषामेवग्रामवासिनांउपकारातिशयोभवतितद्व्यतिरेकेणन्चमहा
दस्तेषामेवदद्यादितिशास्त्रव्यवस्था २६५ एषइति एषसीमानिश्चयोधर्मोनिःशेषेणउक्तः अतऊर्ध्वंवाक्पारुष्यंवक्ष्यामिदंडपा
रुष्यात्वाक्पारुष्यप्रवृत्तेःपूर्वमभिधानंअनुक्रमस्तुल्यांतुपारुष्येदंडवाचिकेइतिदंडशब्दस्यान्यायव्यवहारत्वात्पूर्वंनिर्देशः २६६
शतमिति द्विजस्यचौरेत्याक्षेपरूपंपरुषमुक्त्वाक्षत्रियःपणशतंदंडमर्हतिएवंसार्द्धशतंद्वेवाशतेलाघवगौरवापेक्षयावैश्यःशू
द्रोप्येवंब्राह्मणाक्रोशेताडनादिरूपंवधमर्हति २६७ पंचाशदिति ब्राह्मणःक्षत्रियस्योक्तरूपाक्षेपेकृतेपंचाशत्पणान्दंड्यःवै

गृहंतडागमारामंक्षेत्रंवाभीषयाहरन् शतानिपंचदंड्यःस्यादज्ञानाद्द्विशतोदमः २६४ सीमायास
विषह्यायास्स्वयंराजैवधर्मवित् प्रदिशेद्भूमिमेतेषामुपकारादितिस्थितिः २६५ एषोऽखिलेनाभिहि
तोधर्मःसीमाविनिर्णये अतऊर्ध्वंप्रवक्ष्यामिवाक्पारुष्यविनिर्णयम् २६६ शतंब्राह्मणमाक्रुश्यक्ष-
त्रियोदंडमर्हति वैश्योप्यर्द्धशतंद्वेवाशूद्रस्तुवधमर्हति २६७ पंचाशद्ब्राह्मणोदंड्यःक्षत्रियस्याभिशं
सने वैश्येस्यादर्द्धपंचाशच्छूद्रेद्वादशकोदमः २६८ समवर्णेद्विजातीनांद्वादशैवव्यतिक्रमे वादेष्वव
चनीयेषुतदेवद्विगुणंभवेत् २६९ एकजातिर्द्विजातींस्तुवाचादारुणयाक्षिपन् जिह्वायाःप्राप्नुयाच्छे
दंजघन्यप्रभवोहिसः २७०

श्येशूद्रेचयथोक्ताक्रोशेकृतेपंचविंशतिर्द्वादशपणाःक्रमेणब्राह्मणस्यदंडःस्यात् २६८
समेति द्विजातीनांसमानजातिविषयेयथोक्ताक्रोशेकृतेद्वादशपणोदंडः अवचनीयेषुपुनराक्रोशवादेषुमातृभगिन्याद्यश्लील
रूपेषुतदेवेतिनपुंसकनिर्देशात् शतंब्राह्मणमाक्रुश्येत्यादियदुक्तंतदेवद्विगुणंदंडरूपंभवेत् २६९ एकेति शूद्रोद्विजातीन्पा
तकादिनावाचाक्रुश्यजिह्वाच्छेदंलभेत् यस्मादसौपादाख्यान्निकृष्टांगाज्जातः २७१ नामेति अभिद्रोहआक्रोशः ब्राह्मण
हेलंयज्ञदत्तब्राह्मणापसदइत्याक्रोशेननामजात्यादिग्रहणंकुर्वतोलोहकीलोऽग्निनाप्रदीप्तोदशांगुलोमुखेषुक्षेप्तव्यः २७१

धर्मेति कथंचिद्धर्मलेशमवगम्यायंते धर्मोनुष्ठेय इति ब्राह्मणस्याहंकाराद्युपदिशतोऽस्यशूद्रस्यमुखेकर्णयोश्चज्वलत्तैलंराजाप्रक्षेपयेत् २७२ श्रुतेति समानजातिविषयमिदंदंडलाघवान्नतुशूद्रस्यद्विजात्याक्षेपविषयम् नत्वयैतत्श्रुतन्नभवान्नतद्देशजातो नतवेयंजातिर्नतवशरीरसंस्कारस्नपनपनादिकर्मकृतमित्याहंकारेणमिथ्याब्रुवन्द्विशतंदंडंदाप्यःस्यात् वितथेनेतितृतीयाविधानेप्रकृत्यादिभ्यउपसंख्यानमितितृतीया २७३ काणमिति एकाक्षिविकलंपादविकलंअन्यमपिवातथाविधंहस्ताद्यंगविकलंसत्येनापिकाणादिशब्देनब्रुवन् अत्यंताल्पंतदाकार्षापणंदंडंदाप्यः २७४ मातेति आक्षारितःक्षारितोऽभिशप्तइत्याभिधानिकाःमात्रादीन्पातकादिनाऽभिशपन्गुरोश्चपंथानमत्यजन्दंड्यः अत्राहभार्यादीनांगुरुपापाभिशापेनदंडसाम्यंसमाधेयम् मेधातिथिस्तु

नामजातिग्रहंत्वेषामभिद्रोहेणकुर्वतः निःक्षेप्योऽयोमयःशंकुर्ज्वलन्नास्येदशांगुलः २७१ धर्मोपदेशंदर्पेणविप्राणामस्यकुर्वतः तप्तमासेचयेत्तैलंवक्त्रेश्रोत्रेचपार्थिवः २७२ श्रुतंदेशंचजातिंचकर्मशारीरमेवच वितथेनब्रुवन्दर्पाद्दाप्यःस्याद्द्विशतंदमम् २७३ काणंवाप्यथवाखंजमन्यंवापितथाविधम् तथ्येनापिब्रुवन्दाप्योदंडंकार्षापणावरम् २७४ मातरंपितरंजायांभ्रातरंतनयंगुरुम् आक्षारयञ्छतंदाप्यःपंथानंचाददद्गुरोः २७५ ब्राह्मणक्षत्रियाभ्यांतुदंडःकार्योविजानता ब्राह्मणेसाहसःपूर्वःक्षत्रियेत्वेवमध्यमः २७६ विट्शूद्रयोरेवमेवस्वजातिंप्रतितत्त्वतः छेदवर्जंप्रणयनंदंडस्येतिविनिश्चयः २७७

आक्षारणंभेदनमित्यर्थःमातृपुत्रपित्रादीनांपरस्परभेदनकर्तुरयंदंडविधिरितिव्याख्यातवान् २७५ ब्राह्मणेति ब्राह्मणक्षत्रियाभ्यांपरस्परंपतनीयाक्रोशेकृतेदंडशास्त्रज्ञेनराज्ञादंडःकार्यः दंडमेवविशेषेणाह ब्राह्मणेक्षत्रियाक्रोशिनिप्रथमसाहसःकार्योब्राह्मणाक्रोशिनिपुनःक्षत्रियेमध्यमसाहसः २७६ विडिति वैश्यशूद्रयोरन्योन्यजातिंप्रतिपतनीयाक्रोशेब्राह्मणक्षत्रियवत्वैश्येशूद्राक्रोशिनिप्रथमसाहसःशूद्रेवैश्याक्रोशिनिमध्यमसाहसइत्येवंरूपंदंडस्यप्रणयनंजिह्वाच्छेदरहितंयथावत्कर्तव्यमितिशास्त्रनिश्चयः एवंचैकजातिर्द्विजातीस्तितिप्रागुक्तजिह्वाच्छेदोवैश्येनिवारितोब्राह्मणक्षत्रियाक्रोशविषयएवावति-

एषइति एषोऽनंतरोक्तोवाक्पारुष्यस्ययथावद्दंडविधिरुक्तोऽनंतरंताडनादेर्दंडपारुष्यस्यनिर्णयंवक्ष्यामः २७८ येनेति अंत्यजः शूद्रोयेनकेनचित्करचरणादिनांगेनसाक्षाद्दंडादिनाऽव्यवहितेनद्विजातिप्रहारेतदेवांगमस्यछेत्तव्यमित्ययंमनोरुपदेशःमनुग्रहणमादरार्थंअस्यैवोत्तरःप्रपंचः २७९ पाणिमिति प्रहर्तुंपाणिंदंडंवोद्यम्यपाणिच्छेदंलभतेपादेनकोपात्प्रहरणेपादच्छेदंप्राप्नोति २८० सहेति ब्राह्मणेनसहासनोपविष्टःशूद्रःकट्यांतप्तलोहकृतचिन्होपदेशोनिर्वासनीयःस्फिचंवास्ययथानम्रियतेतथाछेदयेत् २८१ अवनीति दर्पेणश्लेष्मणाब्राह्मणानपमानयतःशूद्रस्यराजाह्यवोष्ठौछेदयेत्मूत्रप्रक्षेपेणापमानयतोमेढ्रंशर्द्धनंकुत्सितोगुदशब्दःतेनावमानयतोदर्पात्प्रमादात्गुदंच्छेदयेत् २८२ केशेष्विति दर्पादित्यनुवर्त्तते अहंकारेणकेशेषुगृण्हतः

एषदंडविधिःप्रोक्तोवाक्पारुष्यस्यतत्त्वतः अतऊर्द्ध्वंप्रवक्ष्यामिदंडपारुष्यनिर्णयम् २७८ येनकेनचिदंगेनहिंस्याच्चेच्छ्रेष्ठमंत्यजः छेत्तव्यंतत्तदेवास्यतन्मनोरनुशासनम् २७९ पाणिमुद्यम्यदंडंवापाणिच्छेदनमर्हति पादेनप्रहरन्कोपात्पादच्छेदनमर्हति २८० सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः कट्यांकृतांकोनिर्वास्यःस्फिचंवास्यावकर्त्तयेत् २८१ अवनिष्ठीवतोदर्पाद्द्वावोष्ठौछेदयेन्नृपः अवमूत्रयतोमेढ्रमवशर्द्धयतोगुदम् २८२ केशेषुगृण्हतोहस्तौछेदयेदविचारयन् पादयोर्दाढिकायांचग्रीवायांवृषणेषुच २८३ त्वग्भेदकःशतंदंड्योलोहितस्यचदर्शकः मांसभेत्तातुषण्णिष्कान्प्रवास्यस्त्वस्थिभेदकः २८४ वनस्पतीनांसर्वेषामुपभोगंयथायथा तथातथादमःकार्योहिंसायामितिधारणा २८५

शूद्रस्यपीडाऽस्यजातानजातेत्यविचारयन्हस्तौछेदयेत्पादयोःश्मश्रुणिचग्रीवायांवृषणेहिंसार्थंगृण्हतो १ च्छेदमेवकुर्यात् २८३ त्वग्भेदेति चर्ममात्रभेदकृत्समानजातिर्न्नशूद्रःब्राह्मणस्यदंडलाघवंपणशतंदंडनीयःतथारक्तोत्पादकोपिशतमेवदंड्यःमांसभेदीषण्णिष्कान्देयोऽस्थिभेदकस्तद्देशान्निर्वास्यः २८४ वनस्पतीति वृक्षाद्युद्भिदांसर्वेषांयेनयेनप्रकारेणउपभोगःफलपुष्पपत्रादिनाउत्तममध्यमरूपोभवतितथातथाहिंसायामप्युत्तमसाहसादिर्दंडोविधेयइतिनिश्चयःत

म॰स॰
१५४

फलोपभोगद्रुमच्छेदीतूत्तमंसाहसंपुष्पोपभोगच्छेदीमध्यमंवल्लीगुल्मलताच्छेदीकार्षापणशतंतृणच्छेद्येकंकार्षापणंच्चपणएव मनुनाप्युक्तोवेदितव्यः २८५ मनुष्याणांपशूनांपीडोत्पादनार्थंप्रहारेकृतेसतियथायथापीडाधिक्यंतथातथादंडमप्यधिकंकुर्यात् एवंमर्मस्थानादौत्वग्भेदनादिषुकृतेषुत्वग्भेदकःशतंदंड्यइत्युक्तोप्यधिकोदुःखविशेषापेक्षयाकर्त्तव्यः २८६ अंगेति अंगानांकरचरणानांव्रणशोणितयोश्चपीडनायांसत्यांसमुत्थानव्ययंयावताकालेनपूर्वावस्थाप्राप्तिःसमुत्थानसंबंधोभवतितावत्कालेनपथ्यौषधादिनायावान्व्ययोभवतितमसौदापनीयः अथतंव्ययंपीडोत्पादकोनदातुमिच्छतितदायःसमुत्थानव्ययोयश्चदंडस्तमेनंदंडत्वेनराज्ञादाप्यः २८७ द्रव्येति द्रव्याण्युक्तविशेषदंडानिकटकानिताम्रघटादीनियोयस्यज्ञानादज्ञानाद्वानाशयेत्सतस्यद्रव्यांतरादिनातुष्टिमुत्पादयेत्राज्ञश्चविनाशितद्रव्यसमंदंडंदद्यात् २८८ चर्मेति चर्मणिचर्मघटितवरत्रादौचर्मकाष्ठमृत्ति

मनुष्याणांपशूनांचदुःखायप्रहृतेसति यथायथामहद्दुःखंदंडंकुर्यात्तथातथा २८६ अंगावपीडनायांचव्रणशोणितयोस्तथा समुत्थानव्ययंदाप्यःसर्वदंड मथापिवा २८७ द्रव्याणिहिंस्याद्योयस्यज्ञानतोऽज्ञानतोपिवा सतस्योत्पादयेत्तुष्टिंराज्ञोदद्याच्चतत्समम् २८८ चर्मचार्मिकभांडेषुकाष्ठलोष्ठमयेषुच मूल्यात्पंचगुणोदंडःपुष्पमूलफलेषुच २८९ यानस्यचैवयातुश्चयानस्वामिनएवच दशातिवर्त्तनान्याहुःशेषेदंडोविधीयते २९० छिन्ननास्येभग्नयुगेतिर्यक्प्रतिमुखागते अक्षभंगेचयानस्यचक्रभंगेतथैवच २९१

कानिर्मितेषुचभांडेषुपुष्पमूलफलेषुपरस्यनाशितेषुमूल्यात्पंचगुणोदंडोराज्ञोदेयःस्वनश्चतुष्टिरुत्पादनीयैव- २८९ यानस्येति यानस्यरथादेर्यातुःसारथ्यादेर्यानस्वामिनश्चयस्यतद्यानंतेषांछिन्ननास्यादीनिदशनिमित्तानिदंडमतिक्रम्यवर्त्तंतेएषुनिमित्तेषुसत्सुप्राणिमारणेद्रव्यनाशेचप्रकृतेयानस्वामिनांदंडोनभवतीतिमन्वादयआहुःएतद्व्यतिरिक्तनिमित्तेचपुनर्दंडोऽनुशीयते २९० छिन्नेति छेदनेति नासायांभवन्नास्यंशरीरावयवत्वाद्यत् साचेहबलीवर्दनासासंबंधिनीरज्जुः छिन्ननास्यरज्जौबलीवर्दादिकेभग्नयुगाख्येकाष्ठेरथादौभूमिवैषम्यादिनातिरश्चीनंवागतेतथाचक्रांतःप्रविष्टस्यकाष्ठभंगेयंत्राणांचर्मबंधनानांछेदनेयोक्त्रस्यपश्चाद्ग्रीवारज्जौरश्मेःप्रहरणस्यछेदनेअपसरापसरेत्युच्चैःशब्देसा

उ॰
८

१४

थ्यादिनाकृतेचयानेनप्राणिहिंसाद्रव्यविनाशयोः कृतयोःसारथ्यादेर्दंडोनास्तीतिमनुराह २९१ २९२ यत्रेति यत्रसारथेरकौश
लाद्यानमन्यथाव्रजतितत्र हिंसायामशिक्षितसारथ्यनियोगस्वामीद्विशतंदाप्यःस्यात् २९३ प्राजकेति यदिसारथिःकुशलःस्या
त्तदासारथिरेवोक्तद्विशतंदमंवक्ष्यमाणंचमनुष्यमारण इत्यादिकंदंडमर्हतिनस्वामीअकुशलेतुतस्मिन्सारथिस्वामिव्यतिरिक्ता
अन्येपियानारूढाअकुशलसारथिकयानारोहणात्सर्वेप्रत्येकंशतंशतंदंड्याः २९४ सचेदिति सचेत्प्राजकः संमुखागतैः पशुरगवा
दिभीरथांतरेणवासंरुद्धःस्वरथगमनानवधानात्सत्यकृसमर्पणाक्षमःसंकटेपिस्वरयतुरगान्प्रेरयन् तुरगैरथेनवारथावयवैर्वा-
प्राणिनोव्यापादयतितत्राविचारितोदंडः कर्त्तव्यएवसकृदपराधेकीदृशइत्याह २९५ मनुष्येति तत्रमनुष्यमारणेप्राजकस्यानव

छेदनेचैवयंत्राणांयोक्त्ररश्म्योस्तथैवच आक्रंदेचाप्यपैहीतिनदंडंमनुरब्रवीत् २९२ यत्रापवर्
तेतयुग्यंवैगुण्यात्प्राजकस्यतु तत्रस्वामीभवेद्दंड्योहिंसायांद्विशतंदमम् २९३ प्राजकश्चेद्भवेदाप्तः
प्राजकोदंडमर्हति युग्यस्थाःप्राजकेऽनाप्तेसर्वे दंड्याःशतंशतम् २९४ सचेत्तुपथिसंरुद्धः पशुभिर्वा
रथेनवा प्रमापयेत्प्राणभृतस्तत्रदंडोऽविचारितः २९५ मनुष्यमारणेक्षिप्रंचौरवत्किल्बिषंभवे-
त् प्राणभृत्सुमहत्स्वर्द्धंगोगजोष्ट्रहयादिषु २९६ क्षुद्रकाणांपशूनांतुहिंसायांद्विशतोदमः पंचाश
त्तुभवेद्दंडःशुभेषुमृगपक्षिषु २९७ गर्दभाजाविकानांतुदंडःस्यात्पंचमाषिकः माषकस्तुभवेद्दंडः
श्वसूकरनिपातने २९८

धानात् यानेनहृतएवचौरदंडोत्तमसाहसंभवेत्नतुमारणरूपःप्राणभृत्सुमहत्स्वर्द्धमितिश्र-
वणात् गोगजादिषुमहत्सुप्राणिषुमारितेषुउत्तमसाहसस्यार्द्धंपंचशतदंडोभवेत् २९६ क्षुद्रेति क्षुद्रकाणांपशूनांजातिवि-
शेषोपदिष्टभवानांबाल्यादीनांवयसाचकिशोरादीनांमारणेद्विशतोदंडःस्यात् शुभेषुमृगेषुरुरुपृषतादिषुपक्षिषुचशुकहंससा
रसादिषुपक्षिषुहतेषुपंचाशत्दंडोभवेत् २९७ गर्दभेति गर्दभछागेडकादीनांपुनर्मारणेपंचरूप्यमाषकपरिमाणोदंडःस्यात्
नचात्रहैरण्यमाषग्रहणंउत्तरोत्तरलघुदंडाभिधानात्श्वसूकरमारणेषुपुनरौप्यमाषपरिमाणोदंडःस्यात् २९८ ॥ ॥

भार्येति भार्यापुत्रादयः कृतापराधा रज्ज्वा वातिलघुवेणुशलाकया वा ताड्या भवेयुः शिक्षार्थताडनविधानादत्र दंडापवादः २९९ पृष्ठत इति रज्ज्वादिभिरपि देहस्य पृष्ठदेशे ताडनीयाः नतु शिरसि उक्तव्यतिरेकेण प्रहरणो वाग्दंडधनदंडरूपं चौरदंडं प्राप्नुयात् ३०० एष इति एष दंडरूपस्य निर्णयो निःशेषेणोक्तः अतऊर्ध्वं चौरदंडविनिर्णये विधानं वक्ष्यामि ३०१ परमेति चौराणां नियमने राजा परमं सुरूपं यत्नं कुर्यात् यस्माच्चौरनिग्रहाद्राज्ञः ख्यातिर्निरुपद्रवतया राष्ट्रं वृद्धिमेति ३०२ अभयेति हि अवधारणे चौराणां नियमनेन यो नृपतिः साधूनामभयं ददाति स एव पूज्यः पूर्वेषां श्लाघ्यो भवति सत्रं गवायनादिकतु विशेषं यत् यस्मात् सत्रमिव सत्रं तदभय दानाच्चौरनिग्रहरूपाभयदक्षिणं सर्वदैव तस्य वृद्धिमेति अन्यद्धि नियतकालीनं नियतदक्षिणं च एतत् सर्वकालीनमभयदक्षिणं

भार्या पुत्रश्च दासश्च प्रेष्यो भ्राता च सोदरः प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा २९९ पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथंचन अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ३०० एषोऽखिलेनाभिहितो दंडपारुष्यनिर्णयः स्तेनस्यातः प्रवक्ष्यामि विधिं दंडविनिर्णये ३०१ परमं यत्नमातिष्ठेत् स्तेनानां निग्रहे नृपः स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्द्धते ३०२ अभयस्य हि यो दाता स पूज्यः सततं नृपः सत्रं हि वर्द्धते तस्य सदैवाभयदक्षिणम् ३०३ सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः ३०४ यदधीते यद्यजते यद्ददाति यदर्चति तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात् ३०५ रक्षन्धर्मेण भूतानि राजा वध्यांश्च घातयन् यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ३०६

व्यतिरेककल्पनालंकारः ३०३ सर्वत इति प्रजा रक्षतो राज्ञः सर्वस्य भृतिदातुर्वणिगादेर्भृत्यदातुश्च श्रोत्रियादेः सकाशात् धर्मषड्भागो न सुकृत इति वाच्यम् भृत्या धर्मषड्भागेन च परिक्रीतस्य शास्त्रीयत्वात् ३०४ यदेति यः कश्चिज्जपयागदानदेवतार्चादीनि करोति तस्य राजा पालनेन षड्भागं प्राप्नोति ३०५ रक्षेति भूतानि सर्वाणि स्थावरजंगमादीनि यथाशास्त्रं दंडप्रणयनरूपेण धर्मेण र चेति वाक्यं भवति अरक्षतश्चाधर्मादपि लोकेन कृतात् षड्भागः स्यात् तस्माद्यत्नतः स्तेननिग्रहेण राजा रक्षणं कुर्यात् नच भृतिक्रीतत्वात्

वध्यांश्वस्तेनादीन् ताडयन्प्रत्यहंलक्षदक्षिणैर्यज्ञैर्यजतेतज्जन्यंपुण्यंप्राप्नोतीतिभावः ३०६ योऽरक्षन्निति योराजारक्षामकुर्वन्बलिंधान्यादेः षड्भागंग्रामवासिभ्यः प्रतिमासंवाभाद्रपौषनियमेनग्राह्यंशुल्कंस्थलजलपथादिनावणिज्याकारितेभ्योनियतस्थानेषुद्रव्यानुसारेणग्राह्यंदानमितिप्रसिद्धंप्रतिभागंफलकुसुमशाकतृणाद्युपायनंप्रतिदिनग्राह्यंदंडंव्यवहारादौगृण्हातिसमृतः सन्सद्यएवनरकंयाति ३०७ अरक्षितेति योराजानरक्षतिअथचधान्यादिषड्भागंबलिरूपंगृण्हातितंसर्वलोकानांसकलपापहारिणंजानीयात् ३०८ अनपेक्षितमिति लंघितशास्त्रमर्यादंपरलोकाभावशालिनमनुचितदंडादिनाधनग्राहिणंरक्षणरहितम् करंधान्यादेर्भक्षितारंराजानंनरकगामिनंजानीयात् ३०९ अधार्मिकमिति अधार्मिकंचौरादिकमपराधापेक्षयात्रिभिरुपायैःप्रयत्नेननियमयेत्तानाह कारागारप्रवेशनेननिगडादिबंधनेनकरचरणछेदनादिनानाप्रकारहिंसनेन ३१० निग्रहेणेति पापशा

योऽरक्षन्बलिमादत्तेकरंशुल्कंचपार्थिवः प्रतिभागंचदंडंचससद्योनरकंव्रजेत् ३०७ अरक्षितारंराजानंबलिषड्भागहारिणम् तमाहुःसर्वलोकस्यसमग्रमलहारकम् ३०८ अनपेक्षितमर्यादंनास्तिकंविप्रलुंपकम् अरक्षितारमत्तारंनृपंविद्यादधोगतिम् ३०९ अधार्मिकंत्रिभिर्न्यायैर्निगृण्हीयात्प्रयत्नतः निरोधनेनबंधेनविविधेनवधेनच ३१० निग्रहेणहिपापानांसाधूनांसंग्रहेणच द्विजातयइवेज्याभिःपूयंतेसततंनृपाः ३११ क्षंतव्यंप्रभुणानित्यंक्षिपतांकार्यिणांनृणाम् बालवृद्धातुराणांचकुर्वताहितमात्मनः ३१२ यःक्षिप्तोमर्षयत्यार्तैस्तेनस्वर्गेमहीयते यस्त्वैश्वर्यान्नक्षमतेनरकंतेनगच्छति ३१३

लिनांनिग्रहेणसाधूनांसंग्रहेणद्विजातयइवमहायज्ञादिभिःसर्वकालंनृपतयःपवित्रीकुर्वंति तस्माद्धार्मिकान्निगृण्हीयात्साधूंश्चानुगृण्हीयात् ३११ क्षंतव्यमिति कार्यार्थिप्रत्यर्थिनांदुःखेनाक्षेपोक्तिंरचयतांतथाबालवृद्धव्याधितानांवक्ष्यमाणमात्मीयमुपकारमिच्छताप्रभुणाक्षमणीयम् ३१२ यःक्षिप्तेति दुःखितैराक्षिप्तःसहतेयःतेनस्वर्गलोकेपूजांलभतेप्रभुत्वदर्शनान्नसहतेयःतेननरकंगच्छति ३१३ राजेतिस्कंधेति यद्यपिसुवर्णस्तेयकृद्विप्रइत्यादिनाप्रायश्चित्तमुक्त

णेवक्ष्यतितथापिसुवर्णस्तेयंप्रतिराजरूपदंडतामस्यदंडप्रकरणेदर्शयितुंपाठःब्राह्मणसुवर्णस्यचौरेणमुक्तकेशेनवेगाद्गच्छताम
याब्राह्मणसुवर्णमपहृतमितिसंख्यापयतामुसलाख्यमायुधंखादिरमयंवा दंडमुभयतस्तीक्ष्णांशक्तिंलोहमयंवादंडंस्कंधेगृही-
त्वाराजसमीपंगन्तव्यंततोब्राह्मणसुवर्णहार्य्यहमतोऽनेनमुसलादिनामांव्यापादयइत्येवंराज्ञेवक्तव्यम् ३१४ ३१५ शासनेति
कृन्मुसलादिप्रहारेणप्राणपरित्याजनान्मृतकल्पस्यजीवतोपिपरित्यागात्वासचौरस्तस्मात्पापात्प्रमुच्यते अतएवयाज्ञवल्क्यः
मृतकल्पःप्रहारार्त्तोजीवन्नपिविशुद्ध्यतीति पुनस्तेनकरुणादिभिरहत्वास्तेनस्ययत्पापंतद्राजामाप्नोति. ३१६अन्नादइति ब्रह्म
हायस्तत्संबंधियोन्नमत्तितस्मिन्सोस्वपापंसंक्रामयति भ्रूणहान्नभोक्तुःपापंभवतीतिएतदत्रविवक्षितंनतुब्रह्मघ्नःपापनश्य
तितथाभार्याव्यभिचारिणीजारपतिंक्षममाणेभर्त्तरिपापंसंश्लेषयतिशिष्यश्चसंध्याग्निकार्याद्यकरणजन्यंपापंगुरौसहमानेन्यस्

राजास्तेनेनगंतव्योमुक्तकेशेनधावता आचक्षाणेनतत्स्तेयमेवंकर्मास्मिशाधिमाम् ३१४ स्कंधेना
दायमुसलंलगुडंवापिखादिरम् शक्तिंचोभयतस्तीक्ष्णामायसंदंडमेववा ३१५ शासनाद्वाविमोक्षाद्वा
स्तेनःस्तेयाद्विमुच्यते अशासित्वातुतंराजास्तेनस्याप्नोतिकिल्बिषम् ३१६ अन्नादेभ्रूणहामार्ष्टिपत्यौभा
र्य्यापचारिणी गुरौशिष्यश्चयाज्यश्चस्तेनोराजनिकिल्बिषम् ३१७ राजभिर्धृतदंडास्तुकृत्वापापानिमा
नवाः निर्मलाःस्वर्गमायांतिसंतःसुकृतिनोयथा ३१८ यस्तुरज्जुंघटंकूपाद्धरेद्भिंद्याच्चयःप्रपाम् सदं
डंप्राप्नुयान्माषन्तच्चतस्मिन्समाहरेत् ३१९ धान्यंदशभ्यःकुंभेभ्योहरतोऽभ्यधिकंवधः शेषेप्येकादशगु
णंदाप्यस्तस्यचतद्धनम् ३२०

तियाज्यश्चाविधिप्रतिक्रामन्याजकेक्षममाणेपापंनिःक्षिपतिस्तेनश्चराजन्युपेक्ष्यमाणेपापं
समर्पयतितस्माद्राज्ञास्तेनोनिगृहीतव्यः ३१७ राजेति, सुवर्णस्तेयादीनिपापानिकृत्वापश्चाद्राजभिर्विहितदंडामनुष्याःसंतःप्रति
बंधकदुरिताभावात्पूर्वार्ज्जितपुण्यवशेनसाधवःसुकृतकारिणइवस्वर्गंगच्छंतिएवंप्रायश्चित्तवद्दंडस्यापिपापक्षयहेतुत्वमुक्तम्
३१८ यस्त्विति कूपसमीपेरज्जुघटयोःजलोर्ध्वधारणायधृतयोरज्जुंघटंवाहरेत्योवापानीयदानगृहंविदारयेत्ससौवर्णमाषंदंडंप्रा
प्नुयात्पन्निर्दिष्टंतुसौवर्णमाषंतत्रप्रकल्पयेदितिकात्यायनवचनात् तच्चरज्ज्वादितस्मिन्कूपेसमर्पयेत् ३१९ धान्यमिति द्विपलशतं

द्रोणोविंशतिद्रोणश्चकुंभः दशसंख्येभ्यः कुंभेभ्योऽधिकंधान्यंहरतोवधः सचहर्त्तृस्वामिगुणवत्तापेक्षयाताडनांगच्छेदमारणोज्ञे
शेषेपुनरेकस्मादारभ्यदशकुंभपर्यंतहरणोन्नित्तुतैकादशगुणंदाप्यःस्वामिनश्चापहृतंदाप्यः ३२० तथेति यथाधान्येनवधउक्त
स्तथातुलापरिच्छेद्यानांसुवर्णरजतादीनामुत्कृष्टानांचवाससांपश्चादीनांपञ्चाशताधिकेवधःकर्त्तव्यएवविषयसमीकरणंचात्रदेश-
कालापहर्तृजातिगुणापेक्षयापरिहरणीयंएवंसुत्तरत्रापिज्ञेयम् ३२१ पंचेति पूर्वोक्तानांपंचाशदूर्ध्वंयावदपहारे कृतेहस्तच्छेदनं
मन्वादिभिरभिहितंशेषेत्वेकपलादारभ्यपंचाशत्पलपर्यंतापहारेअपहृतगुणादेकादशगुणंदंडंदाप्यः ३२२ पुरुषेति महाकुल
जातानांमनुष्याणांविशेषेणस्त्रीणामहाकुलप्रसूतानांश्रेष्ठानांचरत्नानांवज्रवैदूर्यादीनांअपहारेवधमर्हति ३२३ महेति महतां
पशूनांहस्त्यश्वादिगोमहिष्यादीनांतथाखङ्गादीनांशस्त्राणांकल्याणघृतादेश्चौषधस्यचदुर्भिक्षादिरूपंकालंकार्य्यप्रयोजनंचसंदस

तथाधरिममेयानांशतादभ्यधिकेवधः सुवर्णरजतादीनामुत्तमानांचवाससाम् ३२१ पंचाशतस्त्वभ्य
धिकेहस्तच्छेदनमिष्यते शेषेत्वेकादशगुणंमूल्याद्दंडंप्रकल्पयेत् ३२२ पुरुषाणांकुलीनानान्नारीणां
चविशेषतः मुख्यानांचैवरत्नानांहरणेवधमर्हति ३२३ महापशूनांहरणेशस्त्राणामौषधस्यच काल
मासाद्यकार्यंचदंडंराजाप्रकल्पयेत् ३२४ गोषुब्राह्मणसंस्थासुछूरिकायाश्चभेदने पशूनांहरणेचैव
सद्यःकार्य्योऽर्द्धपादिकः ३२५ सूत्रकार्पासकिण्वानांगोमयस्यगुडस्यच दध्नःक्षीरस्यतक्रस्यपानीयस्य
तृणस्यच ३२६ वेणुवैदलभांडानांलवणानांतथैवच मृन्मयानांचहरणेमृदोभस्मनएवच ३२७

द्दिनियोगरूपंनिरूप्यराजाताडनांगच्छेदरूपंदंडंप्रकल्पयेत् ३२४ गोष्विति ब्राह्मणसंबंधिनीनांगवामपहारेवंध्यायाश्चगोर्वाह
नार्थंनासाछेदनेपशूनांचाजैडकानांदंडभूयस्त्वाद्यागाद्यर्थानांहरणेऽनंतरमेवछिन्नार्द्धपादकःकार्यः ३२५ सूत्रेति वेणुवैदलेति
गत्स्येति अन्येति ऊर्णादिसूत्रकार्पासिकस्यचकिण्वस्यसुराबीजद्रव्यस्यचस्थूलवेणुखंडनिर्मितजलाहरणभांडादीनांयद्यप्यन्यत्
समुद्रसंभवमृगचर्मखड्गशृंगादिअन्येषामप्येवंविधानामसारप्रायाणांमनःशिलादीनांपक्वान्नानामोदनव्यतिरिक्तानामप्यपूपमोद-
कादीनांच कार्पासादिशब्दार्थानांप्रसिद्धानांचापहारेकृतमूल्याद्द्विगुणोदंडःकार्यः ३२६ ३२७

३२८ ३२९ पुष्पेष्विति पुष्पेषु हरिते क्षेत्रस्थे धान्ये गुल्मलतावृक्षेषु परिवृतेषु अनपावृतवृक्षेषु वक्ष्यमाणश्लोके धान्यादिषु निर्देशात्परिवपनसंभवाच्च धान्येषु अन्येषु समर्थपुरुषभारहार्येषु हृतेषु देशकालाद्यपेक्षया स्ववर्णस्य रौप्यस्य वा पंचकृष्णलमाषपरिमाणो दंडः स्यात् ३३० परीति अपासितेषु वृक्षेषु धान्येषु शाकादिषु चापहृतेषु अन्वयो द्रव्यस्वामिनां संबंधः येन सह कश्चिदपि संबंधो नास्ति एकग्रामवासादिः तत्र शतं दंड्यः सान्वये तु पंचाशत्पणो देयः खलस्थेषु च धान्येषु अयं दंडः तत्र हि रिपूयंते गृहे चैकादशगुणो दंडः आगुक्तः ३३१ स्यादिति य द्रव्यापहारादिकं कर्म द्रव्यस्वामिसमक्षं बलाद्धृतं तत्साहसं स्यात् सहो बलं तद्भवं साहसं अतइह स्तेयदंडो न कार्यः एतदर्थं स्तेयप्रकरणस्य पाठः यत्पुनः स्वामिपरोक्षापहृतं तत्स्तेयं भवेत् यच्चहृ

मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवम् ३२८ अन्येषां चैवमादीनामद्यानामोदनस्य च पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः ३२९ पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च अन्येष्वपरिपूतेषु दंडः स्यात्पंचकृष्णलः ३३० परिपूतेषु धान्येषु शाकमूलफलेषु च निरन्वये शतं दंडः सान्वयेऽर्द्धशतं दमः ३३१ स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् निरन्वयं भवेत्स्तेयं हृत्वापव्ययते च यत् ३३२ यस्त्वेतान्युपक्लृप्तानि द्रव्याणि स्तेनयेन्नरः तमाद्यं दंडयेद्राजा यश्चाग्निं चोरयेद्गृहात् ३३३ येनयेन यथांगेन स्तेनो नृषु विचेष्टते तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ३३४ पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः नादंड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ३३५

तेन तदपि स्तेयमेव ३३२ यस्त्वेतानिति यः पुनरेतानि सूत्रादिद्रव्याणि उपभोगार्थं कृतसंस्काराणि मनुष्यश्चोरयेत् यश्च त्रेताग्निं चाग्निगृहाच्चोरयेत्तं राजा प्रथमं साहसं दंडयेत् अग्निस्वामिनश्चाधानोपक्षयो दातव्यः गोविंदराजस्तु लौकिकाग्निं चोरयतो दंड इत्याह तदयुक्तम् अल्पापराधे गुरुदंडस्यान्याय्यत्वात् ३३३ येनेति येनयेनांगेन हस्तपादादिना येन प्रकारेण संधिच्छेदादिना चौरो मनुष्येषु विरुद्धं धनापहारादिकं चेष्टते तस्य तदेवांगं प्रसंगनिवारणाय राजा छेदयेत् तत्र धनस्वाम्युत्कर्षापेक्षयाऽयमंगच्छेदः ३३४ पित्तेति पिताचार्यमित्रभ्रातृमातृपत्नीपुत्रपुरोहितानां मध्यात्स्वधर्मे यो नावतिष्ठते स राज्ञो दंडनीयो नास्ति अपितु दंडनीया

त्वा अपन्हु-

मिनिम्श्वयःस्वार्थदंडस्तु
कार्येति यत्रापराधेराजव्यतिरिक्तोजनःकार्षापणंदंडनीयोभवेत्तस्मिन्नपराधेराजापणसहस्रंदंडनीयइतिनिश्चयःस्वार्थदंडस्तु
कार्येति यत्रापराधेराजव्यतिरिक्तोजनःकार्षापणंदंडनीयोभवेत्तस्मिन्नपराधेराजापणसहस्रंदंडनीयइतिनिश्चयः ३३६ अष्टेति ब्राह्मणेति तद्दोषगुणविद्विद्वसइतिस
क्रमवेशयेत्ब्राह्मणेभ्योवादद्यात् ईशोदंडस्यवारुणइतिवक्ष्यमाणत्वात् ३३६ अष्टेति ब्राह्मणेति तद्दोषगुणविद्वसइतिस
र्वत्रसंबध्यतेयस्मिन्स्तेयेयोदंडउक्तःसस्तेयगुणदोषज्ञस्यशूद्रस्याष्टभिरापाद्यतेगुण्यतेइति अष्टगुणःकर्त्तव्यः षोडशगुणोगु-
णदोषज्ञस्यवैश्यस्य द्वात्रिंशद्गुणस्तथाविधक्षत्रियस्य चतुःषष्टिगुणोगुणदोषविदुषोब्राह्मणस्य शतगुणोवाअष्टाविंशत्यधिक
शतगुणोवा गुणातिशयापेक्षयाब्राह्मणस्यैव ३३७ ३३८ वानस्पत्यमिति अविरूढवनस्पतीनांपुष्पाणिस्ववदाददीतफला
निचापरिवृतानांइतिगोतमवचनात् अपरिरतवानस्पत्यादीनांमूलफलंहोमीयाग्न्यर्थंचदारुगोग्रासार्थंचतृणंपरकीयमस्तेयं

कार्षापणंभवेद्दंड्योयत्रान्यःप्राकृतोजनः तत्रराजाभवेद्दंड्यःसहस्रमितिधारणा ३३६ अष्टापाद्यं
तुशूद्रस्यस्तेयेभवतिकिल्बिषम् षोडशैवतुवैश्यस्यद्वात्रिंशत्क्षत्रियस्यच ३३७ ब्राह्मणस्यचतुःषष्टिः
पूर्णंवापिशतंभवेत् द्विगुणावाचतुःषष्टिस्तद्दोषगुणविद्धिसः ३३८ वानस्पत्यंमूलफलंदार्वग्न्यर्थंतथै
वच तृणंचगोभ्योग्रासार्थमस्तेयंमनुरब्रवीत् ३३९ योदत्तादायिनोहस्ताल्लिप्सेतब्राह्मणोधनम् या
जनाध्यापनेनापियथास्तेनस्तथैवसः ३४० द्विजोध्वगःक्षीणवृत्तिर्द्वाविक्षूद्वेचमूलके आददानःपर
क्षेत्रान्नदंडंदातुमर्हति ३४१ असंधितानांसंधातासंधितानांचमोक्षकः दासाश्वरथहर्त्ताचप्राप्तःस्या
च्चौरकिल्बिषम् ३४२

मनुराहतस्मान्नदंडोनाप्यधर्मः ३३९ योदत्तेति अदत्तादायिनश्चौरस्यहस्तात्योब्राह्मणोया
जनाध्यापनप्रतिग्रहैरपिपरकीयधनंज्ञात्वालब्धुमिच्छेत्सचौरवच्चौरतुल्योज्ञेयः अतःसइवदंड्यः ३४० द्विजेति द्विजाति
पथिकःक्षीणपाथेयःद्वाविक्षूदंडोद्वेवामूलकेपरकीयक्षेत्राद्गृह्णन् दंडदानयोग्योनभवति ३४१ असंधीति अबद्धानामश्वा
दीनांपरकीयानांयोदर्पेण बंधयितावद्धानांमदुरादीमोचयितायोदासाश्वरथापहारीसचौरदंडंप्राप्नुयात्स्वगुरुलघ्वपराधानु
सारेणमारणांगच्छेदनधनाद्यपहाररूपोवोढव्यः ३४२ अनेनेति अनेनोक्तविधानेनराजाचौरनियमनंकुर्वाणःइहलोके

ख्यातिंपरलोकेचोत्कृष्टसुखंप्राप्नुयात् इदानींसाहसमाह ३४३ ऐंद्रमिति सर्वाधिपत्यलक्षणंपदंख्यातिंचाविनाशिनीमनुपक्षयां चातिशयेनप्राप्तुमिच्छन्राजाबलेनगृहदाहधनग्रहणकारिणंमनुष्यंक्षणमपिनोपेक्षेत् ३४४ वागिति वाक्पारुष्यकृताच्चौराच्च दंडपारुष्यकारिणश्चमनुष्यात्साहसकृन्मनुष्योऽतिशयेनपापकारीबोद्धव्यः ३४५ साहसइति योराजासाहसेप्रवर्त्तमानंक्षमतेसपापकृतामुपेक्षणादधर्मबुद्ध्याविनश्यतिउपक्रम्यमाणोराष्ट्रेतयासज्जनविद्वेषंचगच्छति ३४६ नमित्रेति मित्रवाक्येनबहुधनप्राप्त्या वासर्वभूतभयजनकान्साहसिकान्राजानत्यजेत् ३४७ शस्त्रमिति आत्मनेति ब्राह्मणादिभिस्त्रिभिर्वर्णैःखड्गाद्यायुधंग्रहीतव्यंयस्मिन्कालेवर्णानामाश्रमिणांचसाहसकारादिभिर्धर्मःकर्त्तुंनदीयतेतथात्रैवर्णिकानामराजकेषुराष्ट्रेषुपरचक्रागमनादि

अनेनविधिनाराजाकुर्वाणस्तेननिग्रहम् यशोऽस्मिन्प्राप्नुयाल्लोकेप्रेत्यचानुत्तमंसुखम् ३४३ ऐंद्रंस्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययम् नोपेक्षेतक्षणमपिराजासाहसिकन्नरम् ३४४ वाग्दुष्टात्तस्कराच्चैवदंडेनैवचहिंसतः साहसस्यनरःकर्त्ताविज्ञेयःपापकृत्तमः ३४५ साहसेवर्त्तमानंतुयोमर्षयतिपार्थिवः सविनाशंव्रजत्याशुविद्वेषंचाधिगच्छति ३४६ नमित्रकारणाद्राजाविपुलाद्वाधनागमात् समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ३४७ शस्त्रंद्विजातिभिर्ग्राह्यंधर्मोयत्रोपरुध्यते द्विजातीनांचवर्णानांविप्लवेकालकारिते ३४८ आत्मनश्चपरित्राणेदक्षिणानांचसंगरे स्त्रीविप्राभ्युपपत्तौचघ्नन्धर्मेणनदुष्यति ३४९ गुरुंवाबालवृद्धौवाब्राह्मणंवाबहुश्रुतम् आततायिनमायांतंहन्यादेवाविचारयन् ३५०

कालजनितेस्त्रीसंगरादौप्राप्ते तथात्मरक्षार्थंदक्षिणाधनगवाद्यपहारनिमित्तेचसंग्रामेस्त्रीब्राह्मणरक्षार्थंचधर्मयुद्धेनन्यगतिकतयापरान्हिंसन्नदोषभागीभवतिपरमारणेप्यत्रसाहसदंडोनकार्यः ३४८ ३४९ गुरुंवेति गुरुबालवृद्धबहुश्रुतब्राह्मणानामन्यतमंवधोद्यतमागच्छंतंविद्यावित्तादिभिरुत्कृष्टंपलायनादिभिरपिस्वनिस्तरणाशक्तोनिर्विचारंहन्यात्अतएवउशनाः गृहीतशस्त्रमाततायिनंहत्वानदोषः कात्यायनश्चगुरुशब्दोल्लेखेनमनूक्तःश्लोकमेवव्यक्तंव्याख्यातवान् आतता

थिनिचोत्कृष्टेतपःस्वाध्यायजन्मतः वधस्तत्रतुनैवस्यातापंहीनेवधोभृगुः मेधातिथिगोविंदराजौतुस्त्रीविप्राभ्युपपत्तौचप्रनृधर्मे
णनदुष्यतीतिपूर्वस्यापमनुवादः गुर्वादिकमपिहन्यात्किमुतान्यमपीतिव्याचक्षाते ३५० नाततेति जनसमक्षंरहसिवावधोह
तस्यमारणेहंतुर्नकश्चिदपिअधर्मदंडःप्रायश्चित्तस्योदोषोभवतियस्मात्हंतृगतोमन्युःक्रोधाभिमानिनीदेवताहन्यमानगतंक्रोधं
विवर्द्धयतिसाहसेत्वापराधगौरवापेक्षयामारणांगच्छेदनधनग्रहणादयोदंडाःकार्याः इदानींस्त्रीसंग्रहमाह ३५१ परदारेति पर
दारसंभोगायप्रवृत्तान्मनुष्यगणानुद्वेजनकरैर्दंडैर्नासौष्ठकर्तनादिभिरंकयित्वादेशान्निःसारयेत् ३५२ तादिति यस्मात्परदारा
भिगमनात्संमूलोवर्णस्यसंकरःसंपद्यतेयेनवर्णसंकरेणविशकल्पलोकयजमानाभावात्अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठ
त्यस्याभावेसतिवृष्ट्यास्यजगन्मूलविनाशोऽधर्मोजगन्नाशायसंपद्यते ३५३ परस्येति तत्स्त्रीप्रार्थनादिदोषैःपूर्वमुत्पन्नाभि

नाततायिवधेदोषोहंतुर्भवतिकश्चन प्रकाशंवाप्रकाशंवामन्युस्तन्मन्युमृच्छति ३५१ परदाराभि
मर्षेषुप्रवृत्तान्नृन्महीपतिः उद्वेजनकरैर्दंडैश्छिन्नयित्वाप्रवासयेत् ३५२ तत्समुत्थोहिलोकस्य
जायतेवर्णसंकरः येनमूलहरोऽधर्मःसर्वनाशायकल्पते ३५३ परस्यपत्न्यापुरुषःसंभाषांयोजय
न्रहः पूर्वमाक्षारितोदोषैःप्राप्नुयात्पूर्वसाहसम् ३५४ यस्त्वनाक्षारितःपूर्वमभिभाषेतकारणात्
नदोषंप्राप्नुयात्किंचिन्नहितस्यव्यतिक्रमः ३५५ परस्त्रियंयोभिवदेत्तीर्थेऽरण्येवनेऽपिवा नदीनां
वापिसंभेदेससंग्रहणमाप्नुयात् ३५६

रपवादप्रार्थनाभिशापादिभिःपुरुषउचितकारणव्यतिरेकेणपरभार्ययासंभा
षणंकुर्वन्प्रथमसाहसंदंडंप्राप्नुयात् ३५४ यस्त्विति यःपुनःपूर्वंतत्स्त्रीप्रार्थनाभिशापरहितःकेनचित्कारणेनजनसमक्षम
भिभाषणंकुर्यान्नसपुनर्दंड्यत्वादिदोषंप्राप्नुयात्तस्मान्नकश्चित्तस्यापराधोस्ति ३५५ परेति तीर्थादिरण्यवनादिकंनिर्ज्जनदे-
शोपलक्षणमात्रंयःपुरुषःपरस्त्रियमुदकहरणमार्गेऽरण्येग्रामाद्बहिर्गुल्मलताकीर्णेनिर्ज्जनेदेशेवनेबहुवृक्षसंततेनदीनांसंग-
मेपूर्वमनाक्षारितोपिकारणादपिसंभाषेत्ससंग्रहणंसहस्रपणंदंडंवक्ष्यमाणंप्राप्नुयात् सम्यग्गृह्यतेज्ञायतेयेनपरस्त्रीसंभोगा

भिलाषइतिसंग्रहणम् ३५६ उपचारेति स्रग्गंधानुलेपनप्रेषणाद्युपचार करणंकेलिः परिहासालिंगनादिः अलंकारवस्त्राणां स्पर्शनमेकखट्वासनमित्येतत्सर्वसंग्रहणंमन्वादिभिःस्मृतम् ३५७ स्त्रियमिति यःस्त्र्यनुचितेस्तनजघनादिदेशेस्त्रियंस्पृशेत्तयावाचपलादिकेस्पृष्टः क्षमतेतदाऽन्योन्यांगीकरणेसर्वसंग्रहणंमन्वादिभिःस्मृतम् ३५८ अब्राह्मणेति अब्राह्मणोऽत्र शूद्रः दंडभूयस्त्वात् ब्राह्मण्यामनिच्छंत्यांसुत्तमसंग्रहणंप्राणांतंदंडमाप्नोतिचतुर्णामपिब्राह्मणादीनांवर्णानांधनपुत्रादीनामतिशयेनदाराःसर्वदारक्षणीयाः तेनप्रसंगनिवृत्त्यर्थउत्कृष्टसंग्रहणादपिसर्ववर्णैर्भार्यारक्षणीया ३५९ भिक्षुकेति भिक्षाजीविनःस्तुतिपाठकाःयज्ञार्थंकृतदीक्षकाः सूपकारादयःभिक्षादिस्वकार्यार्थंगृहिस्त्रीभिःसहसंभाषणमनिवारिताःकुर्युः

उपचारक्रियाकेलिःस्पर्शोभूषणवाससाम् सहखट्वासनंचैवसर्वंसंग्रहणंस्मृतम् ३५७ स्त्रियंस्पृशेददेशेयःस्पृष्टोवामर्षयेत्तया परस्परस्यानुमतेसर्वंसंग्रहणंस्मृतम् ३५८ अब्राह्मणःसंग्रहणेप्राणांतंदंडमर्हति चतुर्णामपिवर्णानांदारारक्ष्यतमाःसदा ३५९ भिक्षुकावंदिनश्चैवदीक्षिताःकारवस्तथा संभाषणंसहस्त्रीभिःकुर्युरप्रतिवारिताः ३६० नसंभाषांपरस्त्रीभिःप्रतिषिद्धःसमाचरेत् निषिद्धोभाषमाणस्तुसुवर्णंदंडमर्हति ३६१ नैषचारणदारेषुविधिर्नात्मोपजीविषु सज्जयंतिहितेनारीर्निगूढाश्चारयंतिच ३६२ किंचिदेवतुदाप्यःस्यात्संभाषांताभिराचरन् प्रैष्यासुचैकभक्तासुरहःप्रव्रजितासुच ३६३

एवंचैषांसंग्रहणाभावः ३६० नसंभाषामिति स्वामिनानिषिद्धःस्त्रीभिःसंभाषणन्नकुर्यात्प्रतिषिद्धःसंभाषणमाचरन्राज्ञःषोडशमाषात्मकसुवर्णदानयोग्योभवति ३६१ नैवइति परस्त्रियंयोभिवदेदित्यादिसंभाषणनिषेधविधिर्नटगायनादिदारेषुनास्तितथाभार्यापुत्रःस्वकीतनुरित्युक्तत्वात् भार्यैवात्माऽनयाउपजीवंतिधनलाभायतस्यालाभंस्वमंतेयेतेषुनटादिव्यतिरिक्तेष्वपियेदारास्तेष्वप्येवंनिषेधविधिर्नास्तियस्माच्चारणाआत्मोपजीविनश्चपरपुरुषानानीयतैःस्वभार्यासंश्लेषयंतेस्वयमागतांश्चप्रच्छन्नपुरुषान्प्रच्छन्नाभूत्वास्वज्ञानंविभावयंतोव्यवहारयंति ३६२ किंचिदिति निर्ज्जनदेशेचारणा

ब्राह्मणोपजीविभिस्त्रीभिः संभाषणं कुर्वन्स्वल्पदंडलेशं राज्ञा दाप्यः तासामपि परदारत्वात्तथा दासीभिरवरुद्धाभिर्बौद्धाभिर्ब्रह्मचारिणीभिः संभाषां कुर्वन्किंचिद्दंडमात्रं दाप्यः स्यात् ३६३ योकामेति यस्तुल्यजातिरनिच्छंतीं कन्यां गच्छति स तत्क्षणादेव लिंगच्छेदनादिकं वधमर्हति इच्छंतीं पुनर्गच्छन्वधार्हो मनुष्यो न भवति ३६४ कन्यामिति कन्यां संभोगार्थमुत्कृष्टजातिपुरुषं सेवमानां स्वल्पमपि दंडं न दापयेत् हीनजातिं पुनः सेवमानां यत्नात्स्थापयेत् यथावानिवृत्तकामा स्यात् ३६५ उत्तमामिति हीनजातिरुत्कृष्टामिच्छंतीं जात्यपेक्षया गच्छेदन मारणात्मकं वधमर्हति समानजातीयां पुनरिच्छंतीं गच्छन्यदि पिता मन्यते तदा पितुः शुल्कानुरूपमर्थं वा दद्यान्न च दंड्यः सा च कन्या तेनैव वोढव्या ३६६ अभीति यो मनुष्यः प्रसह्य बलात्कारेण समानजातीयां गमनवर्ज्जमहंकारेणांगुलिप्रक्षेपमात्रेणैव नाशयेत्तस्य शीघ्रमेवांगुलिद्वयच्छेदः कर्त्तव्यः षट्पणशतानि चायं दंड्यः स्यात्

योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति। सकामान्दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ३६४ कन्यां भजंतीमुत्कृष्टं न किंचिदपि दापयेत्। जघन्यं सेवमानां तु संयतां वासयेद्गृहे ३६५ उत्तमां सेवमानस्तु जघन्यो वधमर्हति। शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि ३६६ अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः। तस्याशु कर्त्ये अंगुल्यौ दंडं चार्हति षट्शतम् ३६७ सकामां दूषयंस्तुल्यो नांगुलिच्छेदमाप्नुयात्। द्विशतं तु दमं दाप्यः प्रसंगविनिवृत्तये ३६८ कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः। शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ३६९ या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौंड्यमर्हति। अंगुल्योरेव वाच्छेदं खरेणोद्वहनं तथा ३७० ३६७ सकामामिति समानजातिरिच्छंतीं कन्यामंगुलिप्रक्षेपमात्रेण नाशयन्नांगुलिच्छेदमाप्नोति किंत्वतिप्रसक्तिनिवारणाय द्विशतं दंडं दाप्यः ३६८ कन्यैवेति या कन्यैव परामंगुलिप्रक्षेपेण नाशयेत् तस्या द्विशतो दंडः स्यात्कन्याशुल्कं च कन्यापितुर्दद्यात् शिफाप्रहारांश्च दश प्राप्नुयात् ३६९ यात्विति या पुनः कन्यां अंगुलिप्रक्षेपेण स्त्री नाशयेत्स्यात्तत्क्षणादेव शिरोमुंडनं अंगुल्याः क्षेपादंगुल्योरेवच्छेदनं गर्दभेण च राजमार्गे वहनमर्हति ३७० भर्त्तेति या स्त्री प्रबलधनिकापित्रादिबांधवदर्पेण शौर्य्यादिगुणदर्पेण च पतिं पुरुषांतरोपगमनाल्लंघयेत् तां राजा बहुजनाकीर्णदेशे श्वभिर्भ-

क्षयेत् ३७१ पुंसामिति अनंतरोक्तजारंपापकारिणंपुरुषमयोमयशयनेप्रज्वलितोराजादाहयेत्तत्रशयनेवध्यघातिनः
ष्ठानिनिःक्षिपेयुः यावत्सापकारीदग्धःस्यात् ३७२ संवत्सरेति परस्त्रीगमनेनदुष्टस्यपुंसोदंडितस्यचसंवत्सरातिक्रमेणा-
भिशस्तस्यपूर्वदंडाद्विगुणोदमःकार्यः तथाव्रात्यजायागमनेयोदंडःपरिकल्पितःचांडाल्यासहनिर्देशात्चांडालीगमनरूपः
तथाचांडालीगमनेयोदंडःसहस्रंत्वंत्यजस्त्रियमितिसंवत्सरेत्वतीतेयदीतामेवव्रात्यजायांतामेवचांडालींपुनर्गच्छतितदा
णःकर्त्तव्यः एतत्सर्वस्यैवोदाहरणद्वयंव्रात्यजायागमनेपिचांडालीगमनदंडप्रदर्शनार्थंसर्वस्यैवतुपूर्वाभिशस्तदंडितस्यसं॰
रातिक्रमेपुनस्तामेवगच्छतःपूर्वाद्विगुणोदंडोबोद्धव्यः ३७३ शूद्रइति भर्त्रादिभीरक्षितामरक्षितांवाद्विजातिस्त्रियंयदिशूद्रो
गच्छेत्तदाऽरक्षितांरक्षारहितांगच्छन्लिंगसर्वस्वाभ्यांवियोजनीयः अत्रांगविशेषाश्रवणेपि आर्यस्त्र्यभिगमनेलिंगोद्धारःसर्व

भर्त्तारंलंघयेद्यातुस्त्रीज्ञातिगुणदर्पिता तांश्वभिःखादयेद्राजासंस्थानेबहुसंस्थिते ३७१ पुमांसंदाह
येत्पापंशयनेतप्तआयसे अभ्यादध्युश्चकाष्ठानितत्रदह्येतपापकृत् ३७२ संवत्सराभिशस्तस्यदुष्टस्य
द्विगुणोदमः व्रात्ययासहसंवासेचांडाल्यातावदेवतु ३७३ शूद्रोगुप्तमगुप्तंवाद्वैजातंवर्णमावसन् अ-
गुप्तमंगसर्वस्वैर्गुप्तंसर्वेणहीयते ३७४ वैश्यःसर्वस्वदंडःस्यात्संवत्सरनिरोधतः सहस्रंक्षत्रियोदंड्यो
मौंड्यंमूत्रेणचार्हति ३७५ ब्राह्मणींयद्यगुप्तांतुगच्छेतांवैश्यपार्थिवौ वैश्यंपंचशतंकुर्यात्क्षत्रियंतुसह
स्रिणम् ३७६

स्वहरणंगोप्तांचेद्वधोऽधिकइतिगोतमवचनाल्लिंगच्छेदः रक्षितायांतुगच्छन्शरीरधनहीनःकर्त्तव्यः
३७४ वैश्यइति वैश्यस्यब्राह्मणीगमनेसंवत्सरंबंधादनंतरंसर्वस्वग्रहणरूपोदंडःकार्यः क्षत्रियागमनेतुवैश्यश्चक्षत्रिया-
तिवक्ष्यति क्षत्रियोगुप्ताब्राह्मणीगमनेसहस्रंदंडनीयःखरमूत्रेणचास्यमुंडनंकर्त्तव्यम् ३७५ ब्राह्मणीमिति अरक्षितांतुब्रा
ह्मणींयदिवैश्यक्षत्रियौगच्छतः तदावैश्यंपंचशतमुक्तंकुर्यात् क्षत्रियंपुनःसहस्रदंडोपेतंवैश्येन्वायंपंचशतदंडःशूद्राक्रमा-
दिनानिर्गुणजातिमात्रोपजीविब्राह्मणीगमनविषयःतदितरब्राह्मणीगमनेवैश्यस्यापिसहस्रंदंडएव ३७६ ७ ७

उभेति तावेवोभावपि क्षत्रियवैश्यौ ब्राह्मण्यारक्षितया सहकृतमैथुनौ शूद्रवत्सर्वेण हीयेते इति दंड्यौ यद्वा कंठे आवेष्य द
ग्ध्यौ तत्र वैश्यं लोहितदर्भैः क्षत्रियं शरपत्रैर्वा वेष्ट्य इति वसिष्ठोक्तो विशेषो ग्राह्यः पूर्वं सहस्रं क्षत्रियो दंड्यो वैश्यः सर्वस्वमित्यु
क्तत्वादयं प्राणांतिकदंडो गुणवद्ब्राह्मणीविषयो बोद्धव्यः ३७७ सहस्रमिति रक्षितां विप्रां ब्राह्मणो बलेनोपगच्छन्सहस्रं दंड्यः
स्यात् इच्छंत्या पुनः सकृन्मैथुने पंचशतानि दंडनीयो भवेत् ३७८ मौंड्यमिति ब्राह्मणस्य मारणवधस्थाने शिरोमुंडनं दंडः
शास्त्रेणोपदिश्यते क्षत्रियादीनां पुनरुक्तेन घातेन दंडो भवति ३७९ नजात्वित्यादि ब्राह्मणं सर्वपापकारिणमपि कदाचिन्न ह
न्यात् अपितु सर्वस्वयुक्तमक्षतशरीरं राष्ट्रान्निर्वासयेत् ३८० नब्राह्मणेति ब्राह्मणवधान्महान्पृथिव्यामधर्मो नास्ति तस्माद्रा

उभावपि तु तावेव ब्राह्मण्या गुप्तया सह विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना ३७७ सहस्रं ब्राह्म
णो दंड्यो गुप्तां विप्रां बलाद्व्रजन् शतानि पंच दंड्यः स्यादिच्छंत्या सह संगतः ३७८ मौंड्यं प्राणांतिको दं
डो ब्राह्मणस्य विधीयते इतरेषां तु वर्णानां दंडः प्राणांतिको भवेत् ३७९ नजातु ब्राह्मणं हन्यात्सर्वपापे
ष्वपि स्थितम् राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ३८० नब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि त
स्मादस्य वधं राजा मनसापि न चिंतयेत् ३८१ वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् यो ब्राह्म
ण्यामगुप्तायां तावुभौ दंडमर्हतः ३८२ सहस्रं ब्राह्मणो दंडं दाप्यो गुप्ते तु ते व्रजन् शूद्रायां क्षत्रियविशोः
साहस्रो वै भवेद्दमः ३८३

जा सर्वपापकारिणो ब्राह्मणस्य मनसापि वधं न चिंतयेत् ३८१ वैश्यश्चेति रक्षितां क्षत्रियां
यदि वैश्यो गच्छेत् क्षत्रियो वा यदा रक्षितां वैश्यां तदा तयोर्ब्राह्मण्यामगुप्तायां गमने यो दंडः उक्तो वैश्यं पंचशतं कुर्यात्क्षत्रियं तु सह
स्रिणमिति स एव दंडो वैश्यक्षत्रिययोर्भवतः अयं च वैश्यस्य रक्षितक्षत्रियागमने पंचशतरूपो दंडो लघुत्वात् गुणवद्वैश्यस्य निर्गु
णजातिमात्रोपजीविक्षत्रियायाः शूद्राफ्तांत्यादिगमनविषयो बोद्धव्यः क्षत्रियस्य रक्षितवैश्यायां ज्ञानतो युक्तः सहस्रं दंडः ३८२
सहस्रमित्यादि क्षत्रियावैश्ये रक्षिते ब्राह्मणो व्रजन्सहस्रं दंडं दापनीयः शूद्रायां रक्षितायां क्षत्रियवैश्ययोर्गमने सहस्रमेव दंडः स्यात्
३८३

क्षत्रियेति अरक्षितक्षत्रियागमने वैश्यस्य पंचशतानि दंडः स्यात् क्षत्रियस्य अरक्षितागमने गर्दभमूत्रेण मुंडनं पंचशतरूपं वा दंडमाप्नुयात् ३८४ अगुप्तेति अरक्षितां क्षत्रियां वैश्यां शूद्रां वा ब्राह्मणो गच्छन् पंचशतानि दंड्यः स्यात् अंते भवोंऽत्यजः यस्माद् धर्मो नास्ति चांडालादिस्तस्य स्त्रियं गच्छन् सहस्रं दंड्यः ३८५ यस्येति यस्य राज्ञो राष्ट्रे चौरः परदारगामी परुषवादी गृहदाहादि साहसकारी दंडपारुष्यकर्त्ता च नास्ति स राजा शक्रपुरं याति ३८६ एतेषामिति एतेषां स्तेनादीनां पंचानां स्वराष्ट्रे निग्रहः समानजातीयेषु राजसु मध्ये राजा साम्राज्यकृत् इहलोके च यशस्करो भवति ३८७ ऋत्विजमिति यो याज्यः ऋत्विजं कर्मानुष्ठानसमर्थं अतिपातकादिदोषरहितमृत्विग्वा याज्यमदुष्टं त्यजति तयोः शतं शतं दंडः कार्य इति दंडप्रसंगादिदमुक्तम् ३८८ नमातेति मातृपितृभा

क्षत्रियायामगुप्तायां वैश्ये पंचशतं दमः मूत्रेण मौंड्यमिच्छेत्तु क्षत्रियो दंडमेव वा ३८४ अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् शतानि पंच दंड्यः स्यात्सहस्रं त्वंत्यजस्त्रियम् ३८५ यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् न साहसिकदंडघ्नौ स राजा शक्रलोकभाक् ३८६ एतेषां निग्रहो राज्ञः पंचानां विषये स्वके साम्राज्यकृत्सजात्येषु लोके चैव यशस्करः ३८७ ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक् त्यजेद्यदि शक्तं कर्मण्यदुष्टं च तयोर्दंडः शतं शतम् ३८८ न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति त्यजन्नपतितानेतान्राज्ञा दंड्यः शतानि षट् ३८९ आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः न विब्रूयान्नृपो धर्मं चिकीर्षन् हितमात्मनः ३९० यथार्हमेतानभ्यर्च्य ब्राह्मणैः सह पार्थिवः सांत्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत् ३९१

र्यपुत्राः त्यागमपोषणशुश्रूषणाद्यकरणात्मकं नार्हंति तस्मादेतान्पातकादिरहितान्परित्यजन् एकैकपरित्यागे राज्ञा षट् शतानि दंड्यः ३८९ आश्रमेति द्विजातीनां गार्हस्थ्याश्रमविषये कार्ये अयं शास्त्रार्थो नायं शास्त्रार्थ इति परस्परं जातविवादानां राजा स्वीयहितं चिकीर्षुरयं शास्त्रार्थ इति सहसान्विशेषेण न ब्रूयात् ३९० यथार्हेति यो यादृशीं पूजामर्हति तं तथा पूजयित्वा अन्यैर्ब्राह्मणैः सह प्रथमं प्रीत्या अपगतकोपं कृत्वा ततः एषां यः स्वधर्मः तं बोधयेत् ३९१ ७ ७

भातीति निरंतरगृहवासीप्रातिवेश्यः तदंतरगृहवासी अनुवेश्यः यस्मिन्नुत्सवे विंशतिरन्ये ब्राह्मणा भोज्यंते तत्र प्रातिवेश्यानुवेश्यौ प्रातिवेश्य ब्राह्मणातिक्रमकारी चेति विष्णुवचनात् ब्राह्मणौ भोजनार्हावभोजयन् ब्राह्मण उत्तरत्र हिरण्यादिग्रहणादिह रौप्यमाषं दंडमर्हति ३९२ श्रोत्रियेति विद्याचारवान् तथाविधमेव गुणवंतं विभवकार्येषु विवाहादिषु प्रकृतत्वात् प्रातिवेश्यानुवेश्यौ एव भोजयन् तदन्नं भोजिताद्द्विगुणमन्नं दाप्यो हिरण्यमाषकं च राज्ञः ३९३ अंधइति अंधो वधिरः पंगुः संपूर्णसप्ततिवर्षः समस्येति प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया श्रोत्रियेषु धनधान्यशुश्रूषादिनोपकारकाः केनचिदपि क्षीणकोषेणापि राज्ञा लब्धुग्राह्याकरं ना दापनीयाः ३९४ श्रोत्रियमिति विद्याचारवंतं ब्राह्मणं रोगिणं पुत्रवियोगादिदुःखितं बालवृद्धदरिद्रमहाकुलप्रसूतोदारचरितान् राजा दानमा

प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे अर्हावभोजयन् विप्रो दंडमर्हति माषकम् ३९२ श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्वभोजयन् तदन्नं द्विगुणं दाप्यो हिरण्यं चैव माषकम् ३९३ अंधो जडः पीठसर्पी सप्तत्या स्थविरश्च यः श्रोत्रियेषूपकुर्वंश्च न दाप्याः केनचित्करम् ३९४ श्रोत्रियं व्याधितार्त्तौ च बालवृद्धावकिंचनम् महाकुलीनमार्य्यं च राजा संपूजयेत्सदा ३९५ शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ३९६ तंतुवायो दशपलं दद्यादेकपलाधिकम् अतोन्यथा वर्त्तमानो दाप्यो द्वादशकं दमम् ३९७ शुल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः कुर्य्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ३९८

नहितकरणैः संपूजयेत्सदा ३९५ शाल्मलीति शाल्मल्यादिवृक्षसंबंधिफलके अपरुषे रजकः शनैः शनैर्वासांसि प्रक्षालयेत् न परकीयैर्वस्त्रैरन्यवस्त्राणि नयेत् न चान्यवासांसि अन्यपरिधानार्थं दद्यात् यद्येवं कुर्यात्तदासौ दंड्यः स्यात् ३९६ तंतुवायइति तंतुवायो वस्त्रनिर्माणार्थं दशपलानि सूत्रं गृहीत्वा पिष्टभक्ष्याद्यनुप्रवेशादेकादशपलं वस्त्रं दद्यात् यदि ततो न्यूनं दद्यात्तदा द्वादशपणान् राज्ञा दाप्य: स्वामिनश्च तुष्टिः कर्त्तव्यैव ३९७ शुल्केति स्थलजलपथव्यवहारतो राजग्राह्यो भागः शुल्कं तस्य स्थानेषु ये कुशलाः तथा सर्वपण्यानां सारासारज्ञाः ते पण्येषु यमर्घं मूल्यमनुरूपं कुर्युः ततो लाभधनाद्विंशतिभागं राजा गृह्णीयात्

राज्ञइति राज्ञःसंबंधितयायानिविक्रेयद्रव्याणिप्रख्यातानिराजोपयोगीनिहस्त्यश्वादीनिचतद्देशोद्भवानिचप्रतिषिद्धानिचयथादुर्भिक्षे धान्यंदेशांतरंननेयमितितानिलोभाद्देशांतरंनयतोवणिजःसर्वहरणंराजाकुर्यात् ३९९ शुल्कमिति शुल्कमोक्षायउत्पथेनगच्छ तिअकालेरात्र्यादौवाक्रयविक्रयंकरोतिशुल्कखंडनार्थंविक्रेयद्रव्यस्यअल्पांसंख्यावक्तिराजदेयमपह्नापितमष्टगुणंदंडरूपतयादाप्यः ४०० आगममिति कियतोदूरादागतमितिदेशांतरीयद्रव्यस्यागमनंकियद्दूरंनीयतइतिस्वदेशोद्भवस्यनिर्गमंकियत्कालस्थितंकिय न्मूल्यंलभतइतिस्थितंतथाकियतीवृद्धिरस्यत्रकर्मकाराणांभक्ताच्छादनादिनाकियानपक्षयइत्येवंविचार्यतथावणिजांक्रेतॄणां यथापीडानभवतितथासर्वपण्यानांक्रयविक्रयौकारयेत् ४०१ पंचरात्रइति आगमनिर्गमोपाययोगादेःपण्यनामनियतत्वात्

राज्ञःप्रख्यातभांडानिप्रतिषिद्धानियानिच तानिनिर्हरतोलोभात्सर्वहारंहरेन्नृपः ३९९ शुल्कस्था नंपरिहरन्नकालेक्रयविक्रयी मिथ्यावादीचसंख्यानेदाप्योऽष्टगुणमत्ययम् ४०० आगमंनिर्गमं स्थानंतथावृद्धिक्षयावुभौ विचार्यसर्वपण्यानांकारयेत्क्रयविक्रयौ ४०१ पंचरात्रेपंचरात्रेपक्षेप क्षेथवागते कुर्वीतचैषांप्रत्यक्षमर्घसंस्थापनंनृपः ४०२ तुलामानंप्रतीमानंसर्वंचस्यात्सुलक्षि तम् षट्सुषट्सुचमासेषुपुनरेवपरीक्षयेत् ४०३ पणंयानंतरेदाप्यंपौरुषोऽर्द्धपणंतरे पादंपशु श्चयोषिच्चपादार्द्धंरिक्तकःपुमान् ४०४ भांडपूर्णानियानानितार्यंदाप्यानिसारतः रिक्तभांडानियं त्किंचित्पुमांसश्चापरिच्छदाः ४०५

अस्थिरार्घादीनांपंचरात्रेपंचरात्रेगतेस्थिरप्रायार्घाणांपक्षेपक्षेगतेवणिजामर्घविद प्रत्यक्षंनृपतिराप्तपुरुषैर्व्यवस्थांकुर्यात् ४०२ तुलेति तुलामानंसुवर्णादीनांपरिच्छेदार्थंयत्क्रियतेतत्सर्वंस्वनिरूपितंयथास्यात् षट्सुषट्सुमासेषुगतेषुपुनस्तत्सर्वंसभ्यपुरुषैर्नृपतिःपरीक्षयेत् ४०३ पणमिति भांडपूर्णानियानानीतिवक्ष्यतितेनारिक्तशक टादियानंतरविषयेपणंदाप्यंएवंपुरुषभारेऽर्द्धपणंतरपण्यंदाप्यःपशुश्चगवादिःपणचतुर्थभागंभाररहितोमनुष्यःपणाष्टभागं दापनीयः ४०४ भांडेति पण्यद्रव्यपूर्णानिशकटादीनिद्रव्यगतोत्कर्षापेक्षयाद्रव्यरहितानिगोणीकंबलादिषुयत्किंचित्तार्यंदा

अपरिच्छदादरिद्राउक्तपदार्थदानापेक्षयायत्किंचिद्दापनीयाः ४०५ दीर्घेति पूर्वंपारावारेतरणार्थमुक्तंइदानींनदीमार्गेदूराध्वनि गंतव्येप्रबलवेगस्थिरोदकनद्यादिदेशग्रीष्मवर्षादिकालापेक्षयातरमूल्यंकल्पनीयंएतच्चनदीतीरेबोद्धव्यंसमुद्रेतुवाताधीनपोत गमनत्वान्न्यायत्तलाभावेतरपण्यविशेषज्ञापकंनदीवद्द्वियोजनादिकंनास्तिततस्तत्रोचितमेवतरपण्यंग्राह्यम् ४०६ गर्भिणीति संजातगर्भास्त्रीमासद्वयादूर्द्धंतथाप्रव्रजितोभिक्षुर्मुनिर्वानप्रस्थोब्राह्मणाश्चलिंगिनोब्रह्मचारिणःतरमूल्यंतरेनदाप्याः ४०७ यन्नावीति नौकारूढानांयत्किंचिन्नाविकापराधेननष्टंद्रव्यंतन्नाविकैरेवमिलित्वायथाभागंदातव्यम् ४०८ एषनाविति नाविका पराधात्पदुदकेनष्टंतन्नाविकैरेवदातव्यंपूर्वोक्तमनूदितंदैविकेनास्तिनिग्रहइतिविधातुन्नौयायिनामेषव्यवहारस्यनिर्णयउक्तः दैवोपजातवातादिनानौभंगेनधनादिनाशेनाविकानांनदंडः ४०९ वाणिज्यमिति वाणिज्यंकुसीदकृषिपशुरक्षणानिवैश्यंकारयेत्

दीर्घाध्वनियथादेशंयथाकालंतरोभवेत् नदीतीरेषुतद्विद्यात्समुद्रेनास्तिलक्षणम् ४०६ गर्भिणीतु द्विमासादिस्तथाप्रव्रजितोमुनिः ब्राह्मणालिंगिनश्चैवनदाप्यास्तारिकंतरे ४०७ यन्नाविकिंचिद्दासा न्नाविशीर्येतापराधतः तद्दासैरेवदातव्यंसमागम्यस्वतोंशतः ४०८ एषनौयायिनामुक्तोव्यवहारस्यनि र्णयः दासापराधतस्तोयेदैविकेनास्तिनिग्रहः ४०९ वाणिज्यंकारयेद्वैश्यंकुसीदंकृषिमेवच पशूनां रक्षणंचैवदास्यंशूद्रंद्विजन्मनाम् ४१० क्षत्रियंचैववैश्यंचब्राह्मणोवृत्तिकर्षितौ बिभृयादानृशं स्येनस्वानिकर्माणिकारयन् ४११ दास्यंतुकारयंल्लोभाद्ब्राह्मणःसंस्कृतान्द्विजान् अनिच्छतःप्राभ वत्याद्राज्ञादंड्यःशतानिषट् ४१२

शूद्रंचराजाद्विजातीनांदास्यंकारयेत् अकुर्वाणोवैश्यशूद्रौराज्ञोदंड्याविति च मर्यायमिहोपदेशः ४१० क्षत्रियमित्यादि ब्राह्मणःक्षत्रियवैश्यौभृत्यभावेनपीडितौकरुणयास्वानिकर्माणिरक्षणकृष्यादीनिकार यन्ग्रासाच्छादनादिनापोषयेत् एवंबलवान्ब्राह्मण तावुपगतावविभ्रन्राज्ञादंडनीयइतिप्रकरणसामर्थ्याद्गम्यते ४११ दास्यंत्विति प्रगयतोभाव प्राभवत्यंब्राह्मणःकृतोपनयनान्द्विजातीनिच्छतःप्रफलेनलोभाद्दास्यकर्मपादधावनादिकारयन्षट्शतानिदंड्यः ४१२ शूद्रंत्विति शूद्रंपुनर्भक्तादिभृतमभृतंवादास्यंकारयेत्यस्मादसौब्राह्मणस्यदास्यायेवप्रजापतिनासृष्टः ४१३ ७ ७

नस्वामीति यस्मादसौध्वजाहृतत्वादिनादासत्वंगतः सतेनत्यक्तःस्वदास्याभावेपिशूद्रोब्राह्मणस्यदास्यान्नविमुच्यतेतस्माद्दास्यंशूद्रस्यसहजंकः शूद्रत्वजातिमिवदास्यमपनयतिअदृष्टार्थमप्यवश्यंशूद्रेणब्राह्मणादिद्विजशुश्रूषाकर्त्तव्येत्येवपरमेतत् अन्यथावक्ष्यमाणदास्यकरणपरिगणनमनर्थकंस्यात् ४१४ ध्वजेति संग्रामसकाशाज्जितोभक्तलाभाद्युपगतोभक्तदासः तथादासीपुत्रःमूल्येनक्रीतोऽन्येनदत्तःपित्रादिक्रमागतः दंडादिधनशुध्यर्थंस्वीकृतदास्यभावः इत्येतानिसप्तध्वजाहृतत्वादीनिदासत्वकरणानि ४१५ भार्य्येति पुत्रभार्यादासास्त्रयोऽमीनिर्द्धनाएवमन्वादिभिः स्मृतायस्मात्यद्धनंतेऽर्जयंतियस्यतेभार्यादयस्तस्यतद्धनंभवतिएतच्चभार्यादीनांपारतंत्र्यप्रदर्शनार्थपरं अध्यग्न्यादेःषड्विधस्यस्त्रीधनस्यवक्ष्यमाणत्वात् धनसाध्यादृष्टार्थकर्मोपदेशार्थंनभार्यादीनांपत्न्यधिकरणेपत्न्यर्थेपियागाधिकारस्यउक्तत्वात्स्त्रीपुंसयोर्मध्यएकधनेचानुमतिद्वारेणस्त्रियाअपिकर्तृत्वात् ४१६ विस्रब्ध

शूद्रंतुकारयेद्दास्यंक्रीतमक्रीतमेववा दास्यायैवहिसृष्टोसौब्राह्मणस्यस्वयंभुवा ४१३ नस्वामिनानिसृष्टोपिशूद्रोदास्याद्विमुच्यते निसर्गजंहितत्तस्यकस्तस्मात्तदपोहति ४१४ ध्वजाहृतोभक्तदासोगृहजःक्रीतदत्रिमौ पैत्रिकोदंडदासश्चसप्तैतेदासयोनयः ४१५ भार्यापुत्रश्चदासश्चत्रयएवाधनाःस्मृताः यत्तेसमधिगच्छंतियस्यतेतस्यतद्धनम् ४१६ विस्रब्धंब्राह्मणःशूद्राद्द्रव्योपादानमाचरेत् नहितस्यास्तिकिंचित्स्वंभर्तृहार्य्यधनोहिसः ४१७ वैश्यशूद्रौप्रयत्नेनस्वानिकर्माणिकारयेत् तौहिच्युतौस्वकर्मभ्यःक्षोभयेतामिदंजगत् ४१८ अहन्यहन्यवेक्षेतकर्मांतान्वाहनानिच आयव्ययौचनियतावाकरान्कोशमेवच ४१९

मिति निर्विचिकित्समेवप्रकृताद्दासशूद्राद्धनग्रहणंकुर्यात् ब्राह्मणोयतस्तस्यकिंचिदपिस्वंनास्तियस्माद्भर्तृग्राह्यधनोऽसौ एवंचापदिबलादपिदासात्ब्राह्मणोधनंगृण्हन्नराज्ञादंडनीयइत्येवमर्थमेतदुच्यते ४१७ वैश्येति वैश्यंकृष्यादिनिशूद्रंचद्विजातिशुश्रूषादीनिकर्माणिप्रयत्नोराजाकारयेत् यस्मात्तौस्वकर्मभ्यश्च्युतावशास्त्रीयोपार्ज्जितधनग्रहणमदादिनाजगदाकुलीकुर्यातम् ४१८ अहनीति प्रत्यहंतदधिकृतद्वारेणप्रारब्धदृष्टादृष्टार्थकर्मणान्निष्पत्तिंनृपतिर्न्निरूपयेत्तथाहस्त्यश्वादीनिकिमद्यप्रविष्टंकिंनिःसृतमितिसुवर्णरत्नोत्पत्तिस्थानानिभांडागारंचावेक्ष्यतद्व्यवहारदर्शनासक्तोपिराजाधर्मान्नपरि

सजेदितिदर्शयितुमुक्तस्यापिपुनर्वचनम् ४१९ एवमिति एवमुक्तप्रकारेणएतान्सर्वान्नृणादानादीन् व्यवहारान् तत्त्वतोनिर्णयेनं नन्नयन् पापंसर्वमपहायस्वर्गादिप्राप्तिरूपामुत्कृष्टांगतिंलभते ४२० इतिश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यामष्टमोऽध्यायः ८ ७ ७ ७ पुरुषेति पुरुषस्यपत्न्याश्चधर्मायहितेऽन्योन्याऽव्यभिचारिलक्षणेवर्त्मनिवर्त्तमानयोः संयुक्तवियुक्तयोश्चधर्मान्पारंपर्यागतत्वेननित्यान्वक्ष्यामिदंपत्योःपरस्परधर्मव्यतिक्रमेसत्यन्यतरज्ञानेदंडेनापिस्वधर्मव्यवस्थानं राज्ञाकर्त्तव्यमितिव्यवहारमध्येऽस्योपदेशः १ अस्वेति स्वीयैर्भर्त्रादिभिःसदास्त्रियःस्वाधीनाःकार्याअनिषिद्धेष्वपिरूपरसादिविषयेषुप्रसक्ताअपिआत्मवशाःकार्याः २ पितेति पिताविवाहात्पूर्वस्त्रियंरक्षेत्पश्चाद्भर्त्तातदभावेपुत्राःतस्मान्नस्त्रीकस्यांचिदप्यवस्थायांस्वातंत्र्यंभजेत् भर्त्तारक्षतियौवनइत्यादिप्रायिकमभर्तृपुत्रायास्सन्निहितायाःपित्रादिभिरपिरक्षणात् ३ कालेइति प्र

एवंसर्वानिमान्राजाव्यवहारान्समापयन् व्यपोह्यकिल्बिषंसर्वंप्राप्नोतिपरमांगतिम् ४२० इतिमानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायामष्टमोऽध्यायः ८ ७ ७ ७ ७
पुरुषस्यस्त्रियाश्चैवधर्म्येवर्त्मनितिष्ठतोः संयोगेविप्रयोगेचधर्मान्वक्ष्यामिशाश्वतान् १ अस्वतंत्राःस्त्रियःकार्याःपुरुषैःस्वैर्दिवानिशम् विषयेषुचसज्जंत्यःसंस्थाप्याआत्मनोवशे २ पितारक्षतिकौमारेभर्त्तारक्षतियौवने रक्षंतिस्थविरेपुत्रानस्त्रीस्वातंत्र्यमर्हति ३ कालेदातापितावाच्योवाच्यश्चानुपयन्पतिः मृतेभर्त्तरिपुत्रस्तुवाच्योमातुररक्षिता ४ सूक्ष्मेभ्योपिप्रसंगेभ्यःस्त्रियोरक्ष्याविशेषतः द्वयोर्हिकुलयोःशोकमावहेयुररक्षिताः ५

दानकालेपितातामददन्गर्ह्योभवतिप्रदानंप्रागृतोरितिगौतमवचनात् ऋतोःप्राक्प्रदानकालःपतिश्चऋतुकालेपत्नीमगच्छन्गर्हणीयोभवतिपत्यौमृतेमातरमरक्षन्पुत्रोनिंद्यःस्यात् ४ सूक्ष्मेभ्य इति स्वल्पेभ्योपिदुःसंगेभ्योदौःशील्यसंपादकेभ्योविशेषेणस्त्रियोरक्षणीयाःकिंपुनर्महद्भ्यःयस्मादुपेक्षितरक्षणाद्द्वयोःपितृभर्तृगणयोःसंतापंदापयेयुः ५ इममिति सर्वेषांब्राह्मणादिवर्णानांभार्यारक्षणलक्षणंधर्मंवक्ष्यमाणश्लोकरीत्यासर्वधर्मेभ्यः

उत्कृष्टंजानंतोअंधपंग्वादयोपिभार्यारक्षितुंयतेरन् ६ स्वामिति यस्माद्भार्यारक्षतोरक्षणं असंकीर्णविशुद्धापत्योत्पादनेनस्वसंततिंतथाशिष्टसमाचारंपितृपितामहाद्यन्वयंआत्मानंविशुद्धसंताननिमित्तौर्ध्वदेहिकलाभेनस्वधर्मंचविशुद्धभार्यस्याधानादाव्यधिकाराद्रक्ष्यतितस्मात्स्त्रियोरक्षितुंयतेतेतिपूर्वस्यविशेषः ७ पतिरिति पतिःशुक्ररूपेणभार्यांसंप्रविश्यगर्भमापाद्यतस्यांभार्यायांपुत्ररूपेणजायते तथाचश्रुतिः आत्मावैपुत्रनामासीति जायायास्तदेवजायात्वंयतोऽस्यांपतिःपुनर्जायते तथाचबह्वृचब्राह्मणंपतिर्जायांप्रविशतिगर्भोभूत्वेहमातरंतस्यांपुनर्नवोभूत्वादशमेमासिजायतेतज्जायाजायाभवतियदस्यांजायतेपुनः ततश्चासौरक्षणीयेत्येतदर्थनामनिर्वचनम् ८ यादृशमिति यस्माद्यादृशंपुरुषंशास्त्रेणविहितंप्रतिषिद्धंवानादृशशास्त्रोक्तपुरुषसेव-

इमंहिसर्ववर्णानांपश्यंतोधर्ममुत्तमम् यतंतेरक्षितुंभार्यांभर्त्तारोदुर्बला अपि ६ स्वांप्रसूतिंचरित्रंच कुलमात्मानमेवच स्वंचधर्मंप्रयत्नेनजायांरक्षन्हिरक्षति ७ पतिर्भार्यांसंप्रविश्यगर्भोभूत्वेहजायते जायायास्तद्धिजायात्वंयदस्यांजायतेपुनः ८ यादृशंभजतेहिस्त्रीसुतंसूतेतथाविधम् तस्मात्प्रजाविशुद्ध्यर्थंस्त्रियंरक्षेत्प्रयत्नतः ९ नकश्चिद्योषितःशक्तःप्रसह्यपरिरक्षितुम् एतैरुपाययोगैस्तुशक्यास्ताःपरिरक्षितुम् १० अर्थस्यसंग्रहेचैनांव्ययेचैवनियोजयेत् शौचेधर्मेन्नपक्त्यांचपारिणाह्यस्यचेक्षणे ११ अरक्षितागृहेरुद्धाःपुरुषैराप्तकारिभिः आत्मानमात्मनायास्तुरक्षेयुस्ताःसुरक्षिताः १२

नेनोत्कृष्टंनिषिद्धपुरुषसेवनेननिकृष्टंपुत्रंजनयतितस्मादपत्यविशुद्ध्यर्थंपत्नीयत्नतोरक्षेत्कथंरक्षणीयेत्यतआह ९ नेति कश्चिद्बलात्संरोधादिनापिस्त्रियोरक्षितुन्नशक्तस्तत्रापिव्यभिचारदर्शनात् किंत्वेतैर्वक्ष्यमाणैरक्षणोपायप्रयोगैस्तारक्षयितुंसमर्थःतानुपायानाह १० अर्थेति धनस्यसंग्रहणेविनियोगेचद्रव्यशरीरशुद्धौभर्तुश्चशुश्रूषादिकेऽन्नसाधनेपारिणाह्यस्यगृहोपकरणस्यशय्यासनकुंडकटाहादेरवेक्षणेएनान्नियोजयेत् ११ अरक्षिताइति आप्ताश्चतेआज्ञाकारिणश्चतैःपुरुषैर्गृहेअप्यरक्षिताभवंतियादुःशीलतयानात्मानंरक्षंतियास्तुधर्मज्ञतयाआत्मानमात्मनारक्षंतिताएवसुरक्षिताभवंतिअतोधर्माध्र

फलस्वर्गनरकप्राप्त्युपदेशेन आसांसंयमः कार्यइतिमुख्यरक्षणोपायकथनपरमिदम् १२ पानमिति मद्यपानं असत्पुरुषसंस
र्गः भर्त्रासहविरहः इतस्ततश्चभ्रमणं अकालस्वापः परगृहनिवासइत्येतानिषट्स्त्रियाव्यभिचाराख्यदोषजनकानितस्मादेतेभ्यो
एतारक्षणीयाः १३ नैताइति नैताःकमनीयंरूपंविचारयंतिनचासांयौवनादिकेवयसिआदरोभवतिकिंतुसरूपंकुरूपंवापुमानि
त्येतावतैवतमुपभुंजते १४ पौंश्चल्येति पुंसोदर्शनेसंभोगाद्यभिलाषशीलत्वात्चित्तस्थैर्याभावात्स्वभावतःस्नेहरहितत्वाच्चए
तायत्नेनापिलोकेरक्षिताःसत्योव्यभिचाराश्रयणेनभर्तृषुविक्रियांगच्छंति १५ एवमिति एवंश्लोकद्वयोक्तमासांस्वभावंहिरए
गर्भसृष्टिकालजनितंज्ञात्वारक्षणार्थंमहांतंयत्नंपुरुषःकुर्यात् १६ शय्येति शयनोपवेशनालंकरणशीलत्वंकामक्रोधानार्ज्ज

पानंदुर्ज्जनसंसर्गःपत्याचविरहोटनम् स्वप्नोन्यगेहवासश्चनारीसंदूषणानिषट् १३ नैतारूपंपरीक्षंते
नासांवयसिसंस्थितिः सुरूपंवाविरूपंवापुमानित्येवभुंजते १४ पौंश्चल्याच्चलचित्ताच्चनैःस्नेह्याच्चस्व
भावतः रक्षितायत्नतोपीहभर्त्तृष्वेताविकुर्वते १५ एवंस्वभावंज्ञात्वासांप्रजापतिनिसर्गजम् परमंयत्न
मातिष्ठेत्पुरुषोरक्षणंप्रति १६ शय्यासनमलंकारंकामंक्रोधमनार्जवम् द्रोहभावंकुचर्यांचस्त्रीभ्यो
मनुरकल्पयत् १७ नास्तिस्त्रीणांक्रियामंत्रैरितिधर्मेव्यवस्थितः निरिंद्रियाह्यमंत्राश्चस्त्रियोऽनृत
मितिस्थितिः १८ तथाचश्रुतयोबह्व्योनिगीतानिगमेष्वपि स्वालक्षण्यपरीक्षार्थंतासांशृणुतनिष्कृतीः
१९

वपरहिंसाकुत्सिताचारत्वानिसर्गादौमनुःस्त्रिभ्यःकल्पितवान्तस्माद्यत्नतोरक्षणीयाः १७ नास्तीति जातकर्मादिक्रिय
स्त्रीणामंत्रैर्नास्तिइत्येषाशास्त्रमर्यादाव्यवस्थितातनश्चमंत्रवत्संस्कारगणाभावान्ननिष्पापांतःकरणाइंद्रियंप्रमाणंधर्मप्रमाण
श्रुतिस्मृतिरहितत्वान्नधर्मज्ञाअमंत्राःपापापनोदनमंत्रजपरहितत्वात् जातेपिपापेतन्निर्णेजनाक्षमाः अनृतवदशुभाःस्त्रियइ
तिशास्त्रमर्यादातस्माद्यत्नतोरक्षणीयाइत्यत्रतात्पर्यम् १८ तथाचेति व्यभिचारशीलत्वंस्त्रीणांस्वभावइत्युक्तंतत्रश्रुतिप्रमाणत
योपन्यस्यतितथाबह्व्यःश्रुतयोबहूनिश्रुतिवाक्यानिनचैतद्वियोब्राह्मणास्मोऽब्राह्मणावेत्येवमादीनिनिगमेषुस्वालक्षण्यंव्यभि

चारशीलत्वंतत्परिज्ञानार्थंपठितानितासांश्रुतीनांमध्येयानिष्कृतिरूपाव्यभिचारप्रायश्चित्तभूतास्ताःश्रुतीःशृणुतएकस्याःश्रुतेर्वक्ष्यमाणत्वात् श्रुतिंशृणुतेत्यर्थःस्त्रपांस्त्रपोभवंतीतिद्वितीयैकवचनेबहुवचनम् १९ यदिति कश्चित्पुत्रोमातुर्मानसव्यभिचारमवगम्यब्रूतेमनोवाक्कायकर्मभिःपतिव्यतिरिक्तंपुरुषंयानकामयतेसापतिव्रतातततोऽन्याअपतिव्रताममामाताअपतिव्रतासतीपरगृहान्गच्छंतीयत्प्रलुलुभेपरपुरुषंप्रतिसंजातलोभाऽभूत्तत्पुरुषसंकल्पदुष्टंमातृरजोरूपंरेतोममपिताशोधयत्वित्यस्यस्त्रियाव्यभिचारशीलत्वस्यैतदितिकरणांतंमंत्रपादत्रयंज्ञापकंअयंचमंत्रश्चातुर्मास्यादिषुविनियुक्तः संप्रतिमानसव्यभिचारप्रायश्चित्तरूपतामस्यमंत्रस्याह २० ध्यायेति भर्तुरप्रियंयत्किंचित्पुरुषांतरगमनंस्त्रीमनसाचिंतयतितस्यमानसस्यव्यभिचारस्यएषप्रकृतोमंत्रःसम्यक्शोधनोमन्वादिभिरुच्यतेमातेतिश्रवणात्पुत्रस्यैवायंप्रायश्चित्तरूपोमंत्रो मातुः २१ यादृग्गुणेनेति यथारूपेणप्रशस्तेनाप्रशस्तेनवास्त्रीविवाहविधिनासंयुज्यतेसाभर्तृसदृशगुणाभवतियथासमुद्रेणसंयुज्यमानानदीस्वादूदकापिक्षारजलाजायतेभर्तुर्यत्नसमानास्यस्त्रीरक्षणोपायांतरोपदेशार्थमिदंअत्रोत्कर्षदृष्टांतमाह २२ अक्षेति अक्षमालाख्यानिकृष्टयोनिजावसिष्ठेनपरिणीतातथाचटकामंदपालाख्येनऋषिणासंगतापूज्यतांगता २३ एताइति यद्यपिद्वेप्रकृतेतथापिप्रदर्शनार्थत्वमनयोर्मत्वाएताइतिबहुवचनंकृतंएताश्चान्याश्चसत्यवत्यादयोनिकृष्टप्रसूतयःस्वभर्तृगुणैःप्रकृष्टैरस्मिन्लोकेउत्कृष्टतांप्राप्ताः २४ एषेति एषलोकाचारोजायापतिविषयःसदाशुभउक्तः इदानीमिहलोकेपरलो

यन्मेमाताप्रलुलुभेविचरंत्यपतिव्रता तन्मेरेतःपितावृक्तामित्यस्यैतन्निदर्शनम् २० ध्यायत्यनिष्टंयत्किंचित्पाणिग्राहस्यचेतसा तस्यैषव्यभिचारस्यनिन्हवःसम्यगुच्यते २१ यादृग्गुणेनभर्त्रास्त्रीसंयुज्येतयथाविधि तादृग्गुणासाभवतिसमुद्रेणेवनिम्नगा २२ अक्षमालावसिष्ठेनसंयुक्ताऽधमयोनिजा शारंगीमंदपालेनजगामाभ्यर्हणीयताम् २३ एताश्चान्याश्चलोकेऽस्मिन्नपकृष्टप्रसूतयः उत्कर्षंयोषितःप्राप्ताःस्वैःस्वैर्भर्तृगुणैःशुभैः २४ एषोदितालोकयात्रानित्यंस्त्रीपुंसयोःशुभा प्रेत्येहच सुखोदर्कान्प्रजाधर्मान्निबोधत २५

केचउत्तरकालशुभसुखहेतून् किंक्षेत्रिणोऽपत्यमुतबीजिनइत्यादीन्प्रजाधर्मान्शृणुत २५ प्रजेति यद्यप्यासांरक्षणार्थंदोषा
उक्तास्तथापियद्यप्रतीकारात्तेषांएतास्स्त्रियोमहोपकारागर्भोत्पादनार्थंबहुकल्याणभाजनभूताः वस्त्रालंकारादिदानेनसंमानार्हाः
स्वगृहेशोभाकारिण्यः स्त्रियःश्रियश्चगेहेषुतुल्यरूपानानयोर्विशेषोविद्यतेयथानिःश्रीकंगृहन्नराजतेएवंनिःस्त्रीकमिति अपिच
२६ उत्पादेति अपत्यस्यजननंजातस्यपरिपालनंप्रतिदिनंचातिथिमित्रभोजनादेर्लौकिकव्यवहारस्यप्रत्यक्षंभार्येवनिदानम् २७
अपत्यमिति अपत्योत्पादनमुक्तमप्येतत् अभ्यर्हितत्वज्ञापनार्थंपुनरभिधानंधर्मकार्याणि अग्निहोत्रादीनिपरिचर्याउत्कृष्टारति.
पितॄणामात्मनश्चापत्यजननादिनास्वर्गइत्येतत्सर्वंभार्याधीनम् २८ पतिमिति यास्त्रीमनोवाग्देहसंयतासतीति विशेषणोपादानसा
मर्थ्यान्मनोवाग्देहैर्यैवनव्यभिचरतिसाभर्त्रासहार्जितान्स्वर्गादिलोकानाप्नोतिइहलोकेविशिष्टैः साध्वीत्युच्यते २९ व्यभिचारेति

प्रजनार्थंमहाभागाःपूजार्हागृहदीप्तयः स्त्रियःश्रियश्चगेहेषुनविशेषोऽस्तिकश्चन २६ उत्पादनमपत्य
स्यजातस्यपरिपालनम् प्रत्यहंलोकयात्रायाःप्रत्यक्षंस्त्रीनिबंधनम् २७ अपत्यंधर्मकार्याणिशुश्रूषा
रतिरुत्तमा दाराधीनस्तथास्वर्गःपितॄणामात्मनश्चह २८ पतिंयानाभिचरतिमनोवाग्देहसंयता साभ
र्तृलोकानाप्नोतिसद्भिःसाध्वीतिचोच्यते २९ व्यभिचारात्तुभर्तुःस्त्रीलोकेप्राप्नोतिनिंद्यताम् सृगाल
योनिंचाप्नोतिपापरोगैश्चपीड्यते ३० पुत्रंप्रत्युदितंसद्भिःपूर्वजैश्चमहर्षिभिः विश्वजन्यमिमंपुण्यमुप
न्यासंनिबोधत ३१ भर्तुःपुत्रंविजानंतिश्रुतिद्वैधंतुभर्तरि आहुरुत्पादकंकेचिदपरेक्षेत्रिणंविदुः ३२

पुरुषांतरसंपर्कात्स्त्रीलोकेनिंद्यतांजन्मांतरेचसृगालजातिंप्राप्नोतिपापरोगादिभिश्चपीड्यते पंचमाध्यायेस्त्रीधर्मउक्तमप्य
तच्छ्लोकद्वयंतदपत्यर्थत्वेनमहाप्रयोजनतयापुनःपठितम् ३० पुत्रमिति पुत्रमधिकृत्यशिष्टैर्मन्वादिभिः पूर्वमुत्पन्नैश्चमहा
अभिहितमिमंवक्ष्यमाणंसर्वजनहितंविचारंशृणुत ३१ भर्तुरिति भर्तुःपुत्रोभवतीतिमुनयोमन्यंते भर्तरिद्विःप्रकाराश्रुतिर्वर्त्त
तेकेचिदुत्पादकमवोढारमपिभर्तारंतेनपुत्रेणपुत्रिणमाहुः अन्येतुवोढारंभर्तारमनुत्पादकमपिअन्यजनितेनपुत्रेणपुत्रिणमाहुः
३२ क्षेत्रेति व्रीह्याद्युत्पत्तिस्थानंक्षेत्रंतत्तुल्यास्त्रीमुनिभिःस्मृतापुरुषश्चव्रीह्यादिबीजतुल्यःस्मृतः यद्यपिरेतोबीजंतथापित

दधिकरणत्वात्पुरुषो बीजमितिव्यपदिश्यते क्षेत्रबीजसमायोगात्सर्वप्राणिनामुत्पत्तिः एवंचोभयोः कारणत्वस्याविशिष्टत्वात्-
युक्तो विप्रतिपत्तिः किंयत्संबंधि क्षेत्रंतस्यापत्यंउतयदीयंबीजंतस्येति ३३ विशिष्टमिति क्वचिद्बीजंप्रधानंजायतेयद्दर्थसुतायामिति
न्यायेनोत्पन्नो वाजिनोत्त्रुध इवसोमस्यतथाव्यासत्र्यृष्यशृंगादयोवाजिनामेवस्मृताः क्वचित्क्षेत्रस्यप्राधान्यंयथायंतल्पजः प्रमीत
स्यइतिवक्ष्यति अतएवविचित्रवीर्यक्षेत्रे क्षत्रियायांब्राह्मणोत्पादिता अपिधृतराष्ट्रादयः क्षेत्रियाः क्षत्रिणएवपुत्राबभूवुः यत्रपु
नर्बीजयोन्योः साम्यंतत्रयोदेवजनयितानदपत्यंभवतितत्रबीजप्राधान्यापेक्षंतावदाहुः ३४ बीजेति बीजक्षेत्रयोर्बीजंप्रधानम-
भिधीयते यस्मात्सर्वेषांभूतारब्धानांउत्पत्तिर्बीजगतवर्णस्वरूपादिचिन्हैःउपलक्षिता दृश्यते ३५ यादृशमिति यज्जातीयंबीजं

क्षेत्रभूतास्मृतानारी बीजभूतःस्मृतःपुमान् क्षेत्रबीजसमायोगात्संभवःसर्वदेहिनाम् ३३ विशि
ष्टंकुत्रचिद्बीजंस्त्रीयोनिस्त्वेवकुत्रचित् उभयंतुसमंयत्रसाप्रसूतिःप्रशस्यते ३४ बीजस्यचैवयो-
न्याश्चबीजमुत्कृष्टमुच्यते सर्वभूतप्रसूतिर्हिबीजलक्षणलक्षिता ३५ यादृशंतूप्यते बीजं क्षेत्रेकालो
पपादिते तादृग्रोहतितत्तस्मिन्बीजंस्वैर्व्यंजितंगुणैः ३६ इयंभूमिर्हिभूतानांशाश्वतीयोनिरुच्यते
नचयोनिगुणान्कांश्चिद्बीजंपुष्यतिपुष्टिषु ३७ भूमावप्येककेदारेकालोप्तानिकृषीवलैः नानारूपा
णिजायंतेबीजानीहस्वभावतः ३८ व्रीहयःशालयोमुद्गास्तिलामाषास्तथायवाः यथाबीजंप्ररोहंति
लसुनानीक्षवस्तथा ३९

व्रीह्यादिग्रीष्मादिकालेवर्षादिनासंस्कृतेक्षेत्रेउप्यतेतज्जातीयमेवतद्बीजमात्मीयैर्वर्णादि
भिरुपलक्षितंतस्मिन्क्षेत्रेजायते एवमन्वयप्रकारेण बीजप्राधान्यंप्रदर्श्यव्यतिरेकमुखेनदर्शयितुमाह ३६ इयमिति हिरवा
श्चिदपिभूर्लत्वरूपत्वादीन् बीजंस्वविषयेषुकरकांडाद्यवस्थासुभजतेभजत्यर्थत्वात्पुष्यतेःसकर्मतातस्माद्यो
भावान्नक्षेत्रप्राधान्यंअपिच ३७ भूमाविति भूमावेकस्मिन्नपिकेदारेकर्षकैर्वपनकालोप्तानिव्रीहिमुद्गादीनिनानारूपाण्ये
वबीजस्वभावाज्जायंतेनतुभूमेरेकत्वादेकरूपाणिभवंतितथाहि ३८ व्रीहीति व्रीहयःषष्टिकाःशालयःकलमाद्याःतथामु

दयोबीजस्वभावानतिक्रमेणनानारूपाणिजायंतेएवंचसति ३९ अन्यदिति व्रीहिरुप्तोमुद्गादिर्जायतइत्येतन्नसंभवतियस्मा
द्यदेवबीजंउप्यतेतत्तदेवजायतेएवंबीजगुणानुवर्त्तनात्क्षेत्रधर्मानुवृत्तेश्चव्रीह्यादौमनुष्येष्वपिबीजप्राधान्यम् संप्रतिक्षेत्रप्राधान्य
माह ४० तदिति तद्बीजंसहजमज्ञावताप्रिन्नादिवत्शिष्टेनज्ञानंवेदः एवंविज्ञानमपितदंगादिशास्त्राणितद्वेदिना आयुरिच्छता
नकदाचित्परजायायांवपनीयम् ४१ अत्रेति अतीतकालज्ञाअस्मिन्नर्थेवायुप्रोक्तागाथाः छंदोविशेषयुक्तानिवाक्यानिकथयं
तियथापरपुरुषेणपरपत्न्यांबीजंनवप्तव्यमिति ४२ नश्यतीति यथान्येनविद्धंमृगंकृष्णसारंतस्मिन्नेवच्छिद्रेपश्चादन्यस्यविध्यतः
आविद्धःक्षिप्तःशरोनिष्फलोभवतिपूर्वहंत्रैवहतत्वात्तस्यैवतन्मूलत्वात्एवंपरपत्न्यांउप्तंबीजंशीघ्रमेवनिष्फलंभवतिगर्भग्रह

अन्यदुप्तंजातमन्यदित्येतन्नोपपद्यते उप्यतेयद्धियद्बीजंतत्तदेवप्ररोहति ४० तत्प्राज्ञेनविनीतेनज्ञान
विज्ञानवेदिना आयुष्कामेनवप्तव्यंनजातुपरयोषिति ४१ अत्रगाथावायुगीताःकीर्त्तयंतिपुराविदः
यथाबीजंनवप्तव्यंपुंसापरपरिग्रहे ४२ नश्यतीषुर्यथाविद्धःखेविद्धमनुविध्यतः तथानश्यतिवैक्षि
प्तंबीजंपरपरिग्रहे ४३ पृथोरपीमांपृथिवींभार्यांपूर्वविदोविदुः स्थाणुच्छेदस्यकेदारमाहुःशल्यवतो
मृगम् ४४ एतावानेवपुरुषोयज्जायात्माप्रजेतिह विप्राःप्राहुस्तथाचैतद्योभर्त्तासास्मृतांगना ४५

णानंतरंक्षेत्रिणःसद्यःफललाभात् ४३ पृथोरिति इमामपिपृथ्वींपृथुनापूर्वंपरिगृहीतत्वात् अनेकराजसंबंधेपिपृथोर्भार्या
मित्यतीतज्ञाजानंतितस्मात्स्थाणुंच्छिंदतिस्थाणुच्छेदः कर्मण्यण्येनस्थाणुमुत्पाट्यक्षेत्रंकृतंतस्यैवतत् क्षेत्रंवदंतितथाशरादि
शल्यंयेनपूर्वंमृगेक्षिप्तंतस्यैवतंमृगमाहुः एवंचपूर्वपरिगृहीतुःस्वामित्वाद्वोढुरेवापत्यंभवतिनजनयितुः ४४ एतावानिति नैकः
पुरुषोभवतिअपितुभार्यास्वदेहमपनीयापत्यानीत्येतत्परिमाणएवपुरुषः तथाचवाजसनेयब्राह्मणम् अर्द्धोहवाएषआत्मनस्त
स्मात्यज्जायांनविंदतेनैतावत्प्रजायतेअसर्वोहितावद्भवतिअथयदैवजायांविंदतेऽथप्रजायतेतर्हिसर्वोभवति तथाचैतद्वेदवि
दोविप्रावदंतियोभर्त्तासैवभार्यास्मृतेतिएवंचतस्यामुत्पादितंभर्त्तुरेवापत्यंभवतीतियतश्चदंपत्योरैक्यमतः ४५ ७ ७

नेति निष्क्रयोविक्रयः विसर्गस्त्यागः नताभ्यांस्त्रीभर्त्तुर्भार्यात्वादपैत्येवंपूर्वंप्रजापतिनास्मृतंनित्यंधर्मंमन्यामहेएवंचक्रयादिना
पिपरस्त्रियमात्मसात्कृतात दुत्पादितापत्यंक्षेत्रिणएवभवतिनबीजिनः ४६ सकृदित्यादि पित्रादिधनविभागोभ्रातॄणांधर्मतः
कृतःसकृदेवभवतिनपुनरन्यथाक्रियतइतितथाकन्यापित्रादिनासकृदेकस्मैदत्तानपुनरन्यस्मैदीयतेएवंच अन्येनपूर्वमन्यस्मै
दत्तायांपश्चात्पित्रादिभिःप्राप्तायामपिजनितमपत्यंनबीजिनोभवतीत्येतदर्थमस्योपन्यासः तथाकन्यातोन्यस्मिन्नपिगवादि
द्रव्येसकृदेवददानीत्याहनपुनस्तदन्यस्मैदीयतइतित्रीण्येतानिसाधूनांसकृद्भवंति यद्यपिकन्यादानस्यसकृत्करणंप्रकृतोपयु
क्तंतथापिप्रसंगादंशदानयोरपिसकृत्ताभिधानंसकृदाहददानीत्यनेनैवकन्यादानस्यापिसकृत्करणसिद्धौप्रकृतोपयोगित्वादेव
पृथगभिधानम् ४७ यथेति यथागवादिषुपरकीयेष्वात्मवृषभादिकन्नियुज्यवत्सोत्पादकोनतद्भागीतथापरकीयभार्यास्वपि

नानिष्क्रयविसर्गाभ्यांभर्त्तुर्भार्याविमुच्यते एवंधर्मंविजानीमःप्राक्प्रजापतिनिर्मितम् ४६ स-
कृदंशोनिपततिसकृत्कन्याप्रदीयते सकृदाहददानीतित्रीण्येतानिसतांसकृत् ४७ यथागोश्वो
ष्ट्रदासीषुमहिष्यजाविकासुच नोत्पादकःप्रजाभागीतथैवान्यांगनास्वपि ४८ येऽक्षेत्रिणोबी
जवंतःपरक्षेत्रप्रवापिणः तेवैसस्यस्यजातस्यनलभंतेफलंक्वचित् ४९ यदन्यगोषुवृषभोवत्सा
नांजनयेच्छतम् गोमिनामेवतेवत्सामोघंस्कंदितमार्षभम् ५०

नोत्पादकःप्रजाभागीभवति ४८ येइति
क्षेत्रस्वामिनोयेनभवंतिअथबीजस्वामिनःसंतःपरक्षेत्रेबीजंवपंतितेतत्रक्षेत्रजातस्यधान्यादेःफलंक्वचिदपिदेशेनलभंत
इतिप्रकृतस्यदृष्टांतः ४९ यदन्येति यदन्यदीयगवीषुवृषभोवत्सशतानपिजनयेत्सर्वेतेवत्साःस्त्रीगवीस्वामिनोभवंत्येवन
वृषभस्वामिनःवृषभस्ययत्शुक्रसेचनंतद्वृषभस्वामिनोनिष्फलमेवभवतियथागोश्वोष्ट्रेत्यनेनोत्पादकस्यप्रजाभागित्वन्न
भवतीत्येतत्परत्वेनदृष्टांतउक्तःअयंतुक्षेत्रस्वामिनःप्रजाभागित्वंभवतीत्येतत्परत्वेनअतोनपुनरुक्तिः ५० तथेवेति यथा
गवादिगर्भेषुतथैवापत्यरहिताःसंतःपरकीयभार्यायांयेबीजंवपंतितेक्षेत्रस्वामिनामेवापत्यलक्षणमर्थंकुर्वंतिबीजसेत्र.

त्पत्यारव्यंफलन्नलभते ५१ फलमिति यदस्यामुत्पत्स्यतेऽपत्यंतदावयोरुभयोरेवैवंयत्रनियमोनकृतस्तत्रनिःसंदिग्धमेवक्षेत्रिणोऽपत्यंउक्तरीत्याबीजात्क्षेत्रंबलवत् ५२ क्रियेति यदत्रापत्यंभविष्यतितदावयोरेवेतिनियम्यैतत्क्षेत्रंस्वामिनाबीजवपनार्थंयद्बीजिनोदीयतेतस्यापत्यस्यलोकेबीजिक्षेत्रिणोद्वावपिभागिनौदृष्टौ ५३ ओघेति यद्बीजंजलवेगवाताभ्यांअन्यदीयक्षेत्रादानीतंयस्यक्षेत्रेजायतेतत्क्षेत्रस्वामिनएवतद्बीजंभवतिनतुयेनबीजमुप्तंसतत्फलंलभतेएवंचस्वभार्याक्रमेणापरभार्यागमनेममायंपुत्रोभविष्यतिसेवागमेपिक्षेत्रिणएवापत्यमित्यनेनदर्शितम् ५४ एषेति एषैवव्यवस्थागवाश्वादीनांसंततिंप्रतिज्ञातव्यायत्क्षेत्रस्वाम्येवगवाश्वादेःसंततिस्वामीनतुवृषभादिस्वामी नियमेतुकृतेसत्येतयोरेवसंततिस्वाम्यम् ५५ एतेति एतद्बीजयो-

तथैवाक्षेत्रिणोबीजंपरक्षेत्रप्रवापिणः कुर्वंतिक्षेत्रिणामर्थंनबीजीलभतेफलम् ५१ फलंत्वनभिसंधायक्षेत्रिणांबीजिनांतथा प्रत्यक्षंक्षेत्रिणामर्थोबीजाद्योनिर्गरीयसी ५२ क्रियाभ्युपगमात्त्वेतद्बीजार्थंयत्प्रदीयते तस्येहभागिनौदृष्टौबीजीक्षेत्रिकएवच ५३ ओघवाताहृतंबीजंयस्यक्षेत्रेप्ररोहति क्षेत्रिकस्यैवतद्बीजनवप्तालभतेफलम् ५४ एषधर्मोगवाश्वस्यदास्युष्ट्राजाविकस्यच विहंगमहिषीणांचविज्ञेयःप्रसवंप्रति ५५ एतद्वःसारफल्गुत्वंबीजयोन्योःप्रकीर्तितम् अतःपरंप्रवक्ष्यामियोषितांधर्ममापदि ५६ भ्रातुर्ज्येष्ठस्यभार्यायागुरुपत्न्यनुजस्यसा यवीयसस्तुयाभार्यास्नुषाज्येष्ठस्यसास्मृता ५७ ज्येष्ठोयवीयसोभार्यांयवीयान्वाग्रजस्त्रियम् पतितौभवतोगत्वानियुक्तावप्यनापदि ५८

न्योःप्राधान्याप्राधान्यंमुख्याकमुक्तंअतोऽनंतरंस्त्रीणांसंतानाभावेयत्कर्त्तव्यंतद्वक्ष्यामि ५६ भ्रातुरिति ज्येष्ठस्यभ्रातुर्याभार्यासाकनिष्ठस्यभ्रातुर्गुरुपत्नीभवतिकनिष्ठस्यचभ्रातुर्याभार्यासाज्येष्ठभ्रातुःस्नुषामुनिभिःस्मृता ५७ ज्येष्ठइति ज्येष्ठकनिष्ठभ्रातरावितरेतरभार्यांगत्वासंतानाभावंविनानियुक्तावपिपतितौस्याताम् ५८ देवरेति संतानाभावेस्त्रियापत्यादिगुरुनियुक्तयादेवरादन्यस्माद्वासपिंडाद्वक्ष्यमाणघृताक्तादिनियमवत्पुरुषगमनेनेष्टाप्रजाउत्पाद

थितव्याईप्सितेत्यभिधानमर्थात्कार्याक्षमपुत्रोत्पत्तौपुनर्गमनार्थम् ५९ विधवेति विधवायामित्यपत्योत्पादनयोग्यपत्यभाव
परमिदंजीवत्यापिपत्यौअयोग्यपत्यादिगुरुनियुक्तोघृताक्तसर्वगात्रोमौनीरात्रावेकपुत्रंजनयेत्नकथंचित्द्वितीयम् ६० द्वितीये
ति अन्येपुनराचार्यानियोगात्पुत्रोत्पादनविधिज्ञाअपुत्रएकपुत्रइतिशिष्टप्रवादादनिष्पन्नन्नियोगप्रयोजनमन्यमानाःस्त्रीषुपु-
त्रोत्पादनंद्वितीयंधर्मतोमन्यंते ६१ विधवेति विधवादिकायान्नियोगप्रयोजनेगर्भधारणेयथाशास्त्रंसंपन्नेसतिज्येष्ठोभ्राताक
निष्ठभ्रातृभार्याचपरस्परंगुरुवत्स्नुषावच्चव्यवहरेताम् ६२ नियुक्ताविति ज्येष्ठकनिष्ठभ्रातरौयौपरभार्यायान्नियुक्तौघृताक्तादि
विधानंत्यक्तास्वेच्छातोवर्त्तेयातांतौस्नुषागगुरुदारगौपतितौभवेतांएवन्नियोगमविधायदूषयितुमाह ६३ नान्येति ब्राह्मणादि

देवराद्वासपिंडाद्वास्त्रियासम्यङ्नियुक्तया प्रजेप्सिताधिगंतव्यासंतानस्यपरिक्षये ५९ विधवायान्नि
युक्तस्तु घृताक्तोवाग्यतोनिशि एकमुत्पादयेत्पुत्रन्नद्वितीयंकथंचन ६० द्वितीयमेकेप्रजनंमन्यंतेस्त्री
षुतद्विदः अनिर्वृतन्नियोगार्थंपश्यंतोधर्मतस्तयोः ६१ विधवायान्नियोगार्थेनिर्वृतेतुयथाविधि
गुरुवच्चस्नुषावच्चवर्त्तेयातांपरस्परम् ६२ नियुक्तौयौविधिंहित्वावर्त्तेयातांतुकामतः तावुभौपतितौ
स्यातांस्नुषागगुरुतल्पगौ ६३ नान्यस्मिन्विधवानारीनियोक्तव्याद्विजातिभिः अन्यस्मिन्हिनियुंजा-
नाधर्मंहन्युःसनातनम् ६४ नोद्वाहिकेषुमंत्रेषुनियोगःकीर्त्यतेक्वचित् नविवाहविधावुक्तंविधवावेद
नंपुनः ६५ अयंद्विजैर्हिविद्वद्भिःपशुधर्मोविगर्हितः मनुष्याणामपिप्रोक्तोवेनेराज्यंप्रशासति ६६

भिर्विधवास्त्रीभर्त्तुरन्यस्मिन्देवरादौननियोजनीयास्त्रियमन्यस्मिन्नियुंजानाः तेस्त्रीणामेकपतित्वधर्ममनादिसिद्धन्नाशयेयुः
६४ नोद्वाहिकेष्विति अर्यमणन्नुदेवमित्येवमादिषुविवाहप्रयोजनकेषुमंत्रेषुक्वचिदपिशाखायान्ननियोगः कथ्यतेनचविवाहवि
धायकशास्त्रेऽन्येनपुरुषेणसपुनर्विवाहउक्तः ६५ अयमिति यस्मादयंपशुसंबंधीमनुष्याणामपिव्यवहारोविद्वद्भिर्निंदितः
योयमधार्मिकेवेनेराज्ञिराज्यंकुर्वाणेतेनकर्त्तव्यतयाप्रोक्तःअतोवेनादारभ्यप्रवृत्तोयमादिमानितिनिंद्यते ६६ ७ ५

समहीमिति सवेनोमहींसमग्रां पूर्वंपालयन् अतएवराजर्षिश्रेष्ठोनतुधार्मिकत्वात्कामोपहतबुद्धिर्भ्रातृभार्यागमनरूपंवर्णसंकरंप्रावर्त्तयत् ६७ ततइति वेनकालात्प्रभृतियोमृतभर्तृकादिस्त्रियंशास्त्रार्थाज्ञानादपत्यनिमित्तंदेवरादौनियोजयतितंसाधवो नियतंगर्हयंते अयंचस्वोक्तनियोगनिषेधः कलियुगविषयः तदाहबृहस्पतिः उक्तानियोगामुनिनानिषिद्धाःस्वयमेवतु युगक्रमादशक्योयंकर्त्तुमन्यैर्विधानतः तपोज्ञानसमायुक्ताः कृतत्रेतायुगेनराः द्वापरेचकलौनृणांशक्तिहानिर्हिनिर्मिता अनेकधाकृताः पुत्राऋषिभिर्यैःपुरातनैः नशक्यंतेधुनाकर्त्तुंशक्तिहीनैरिदंतनैः अतोयज्ञोविंदराजेनयुगविशेषव्यवस्थामज्ञात्वासर्वदेवरभावेनियोगादनियोगपक्षःश्रेयानितिस्वमनीषयाकल्पितंतन्मुनिव्याख्याविरोधान्नाद्रियामहे प्रायशोमनुवाक्येषुमुनिव्याख्यनमेवहि नापराध्योस्मिविदुषांकाहंसर्वविदःकुधीः नियोगप्रकरणत्वात्कन्यागतंविशेषमाह ६८ यस्याइति यस्याःकन्याया

समहीमखिलांभुंजन्राजर्षिप्रवरःपुरा वर्णानांसंकरंचक्रेकामोपहतचेतनः ६७ ततःप्रभृतियोमोहात्प्रमीतपतिकांस्त्रियम् नियोजयत्यपत्यार्थंतंविगर्हन्तिसाधवः ६८ यस्याम्रियेतकन्यायावाचासत्येकृतेपतिः तामनेनविधानेननिजोविंदेतदेवरः ६९ यथाविध्यधिगम्यैनांशुक्लवस्त्रांशुचिव्रताम् मिथोभजेताप्रसवात्सकृत्सकृदृतावृतौ ७० नदत्वाकस्यचित्कन्यांपुनर्दद्याद्विचक्षणः दत्वापुनःप्रयच्छन्हिप्राप्नोतिपुरुषानृतम् ७१ विधिवत्प्रतिगृह्यापित्यजेत्कन्यांविगर्हिताम् व्याधितांविप्रदुष्टांवाछद्मनाचोपपादिताम् ७२

वाग्दानेकृतेसतिभर्त्ताम्रियतेतामनेनवक्ष्यमाणेनानुष्ठानेनभर्त्तुःसोदरभ्रातापरिणयेत् ६९ यथेति सदेवरोविवाहविधिनाएनांस्वीकृत्यशुक्लवस्त्रांकायवाङ्मनःशौचशालिनीमागर्भग्रहणात्प्रत्यृतावेकैकवारंगच्छेत् एवंकन्यायानियोगप्रकारत्वात्विवाहस्याग्रहणंचगमनोपदेशाद्यस्मैवाग्दत्तातस्यैवतदपत्यंभवति ७० नदत्वेति कस्मैचिद्वाचाकन्यांदत्वातस्मिन्मृतेदानगुणदोषज्ञस्तामन्यस्मैनदद्यात् यस्मादेकस्मैदत्वान्यस्मैददत्पुरुषानृतंसहस्रकृतदोषंप्राप्नोतिसप्तपदीकरणस्याजातत्वात्भार्यात्वानिष्पत्तेःपुनर्दानाशंकायामिदंवचनम् ७१ विधिवदिति अद्भिरेवद्विजाग्र्या

णामित्येवमादिविधिनाप्रतिगृह्यापिकन्यांवैधव्यलक्षणोपेतांरोगिणींक्षतयोनित्वाद्यभिशापवतीमधिकांगादिगोपनच्छ
ग्नोपपादितांसप्तपदीकरणात्प्राक्ज्ञातांत्यजेत्ततश्चतत्त्यागेदोषाभावइत्येतदर्थंन्नतुत्यागार्थम् ७२ यस्त्विति यःपुनर्दोषव
तींकन्यांदोषाननभिधायददातितस्यकन्यादातुर्दुरात्मनोदानंतत्समर्पणेनव्यर्थंकुर्यात् एतदपित्यागेदोषाभावकथनार्थम्
७३ विधायेति कार्येसतिमनुष्यःपत्न्याग्रासाच्छादनादिप्रकल्प्यदेशांतरंगच्छेत् यस्माद्ग्रासाद्यभावपीडितास्त्रीशीलवत्यपि
पुरुषांतरसंपर्कंभजेत् ७४ विधायेति भक्ताच्छादनादिदत्वापत्यौदेशांतरंगतेदेहप्रसाधनपरगृहगमनरहिताजीवेत्अद
त्वापुनर्गतेसूत्रनिर्माणादिभिरनिंदितशिल्पेनजीवेत् ७५ प्रोषितइति गुर्वाज्ञासंपादनादिधर्मकार्यनिमित्तंप्रोषितःपतिर-
ष्टौवर्षाणिपत्न्याप्रतीक्षणीयःऊर्ध्वंपतिसन्निधिंगच्छेत् तदाहवसिष्ठः प्रोषितपत्नीपंचवर्षाण्युपासीतऊर्ध्वंपतिसकाशंग

यस्तुदोषवतींकन्यामनाख्यायोपपादयेत् तस्यतद्वितथंकुर्यात्कन्यादातुर्दुरात्मनः ७३ विधायवृ
त्तिंभार्यायाःप्रवसेत्कार्यवान्नरः अवृत्तिकर्षिताहिस्त्रीप्रदुष्येत्स्थितिमत्यपि ७४ विधायप्रोषित
वृत्तिंजीवेन्नियममास्थिता प्रोषितेत्वविधायैवजीवेच्छिल्पैरगर्हितैः ७५ प्रोषितोधर्मकार्यार्थंप्रती
क्ष्योऽष्टौनरःसमाः विद्यार्थंषड्यशोऽर्थंवाकामार्थंत्रींस्तुवत्सरान् ७६ संवत्सरंप्रतीक्षेतद्विषंतींयोषि
तंपतिः ऊर्ध्वंसंवत्सरात्त्वेनांदायंहृत्वानसंवसेत् ७७ अतिक्रामेत्प्रमत्तंयामत्तंरोगार्त्तमेववा साचीन्
मासान्परित्याज्याविभूषणपरिच्छदा ७८ उन्मत्तंपतितंक्लीबमबीजंपापरोगिणम् नत्यागोऽस्तिद्विष
त्याश्चनचदायापवर्त्तनम् ७९ च्छेदितिविद्यार्थंप्रोषितःषड्वर्षाणिप्रतीक्ष्यः निजविद्याविभाजनेनयशोर्थमपिप्रोषितः

पतिःषडेवभार्यांतरोपभोगार्थंगतस्त्रीणिवर्षाणि ७६ संवत्सरमिति पतिविषयसंजातद्वेषांस्त्रियंवर्षंयावत्प्रतीक्षेत्ततऊर्ध्वम
पिद्विषंतींस्वदत्तमलंकारादिधनंहृत्वानोपगच्छेत् ग्रासाच्छादनमात्रंतुदेयमेव ७७ अतीति यास्त्रीद्यूतादिप्रमादवंतंमद्यजन
कपानादिनामत्तंव्याधितंवाशुश्रूषाद्यकरणेनावजानातिसाविगतालंकारशय्यादिपरिच्छदात्रीन्मासान्नोपगंतव्या ७८ उन्मत्त
मिति वातादिक्षोभादप्रकृतिस्थंपतितमेकादशाध्यायेवक्ष्यमाणन्नपुंसकमबीजंवाध्यरेतस्त्वादिनाबीजरहितंकुष्ठाद्युपेतंच

ल्पमदर्शनंपरन्नतु नियमार्थंमायेणैतावताकालेनगृहीतवेदो भवतित्रिभागवयस्कान्न कन्यावोढुर्यूनोयोग्येतिगृहीतवेदश्चाप्रकु
र्वाणकोगृहस्थाश्रमस्त्विनिनविलंबेतेतिसत्वरइत्यस्यार्थः ९४ देवेति भगोर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाइत्यादिमं
त्रलिंगात्पादेवैर्दत्ताभार्यातांपतिर्लभतेनतुस्वेच्छयातांसतींदेवानांप्रियंकुर्वन्ग्रासाच्छादनादिनासदाद्वेषाद्युत्पन्नामपिपोषयेत्
९५ प्रजनेति यस्माद्गर्भग्रहणार्थंस्त्रियःसृष्टागर्भाधानार्थंचमनुष्याःतस्माद्गर्भोत्पादनसेवानयोरग्न्याधानादिरपिधर्मःपत्न्यासह
साधारणःक्षौमेवसानावग्नीनादधीयातामित्यादिवेदेऽभिहितःतस्माद्भार्यांबिभृयादितितिपूर्वोक्तस्यशेषः ९६ कन्येति कन्या
यांदत्तशुल्कायांसत्यामसंजातविवाहायांयदिशुल्कदोवरोम्रियतेनतदादेवरायपित्रादिभिर्वाऽसौकन्यादातव्यायदिसास्वीकरोति
यस्याम्रियतइतिमागुक्तंनियोगरूपंइदंतुशुल्कग्रहणविषयम् ९७ आददीतेति शास्त्रानभिज्ञःशूद्रोपिपुत्रींददन्शुल्कंनगृ

देवदत्तांपतिर्भार्यांविंदतेनेच्छयात्मनः तांसाध्वींबिभृयान्नित्यंदेवानांप्रियमाचरन् ९५ प्रजनार्थं
स्त्रियःसृष्टाःसंतानार्थंचमानवाः तस्मात्साधारणोधर्मःश्रुतौपत्न्यासहोदितः ९६ कन्यायांदत्त
शुल्कायांम्रियेतयदिशुल्कदः देवरायप्रदातव्यायदिकन्यानुमन्यते ९७ आददीतनशूद्रोपिशु
ल्कंदुहितरंददन् शुल्कंहिगृण्हन्कुरुतेछन्नंदुहितृविक्रयम् ९८ एतत्तुनपरेचक्रुर्नापरेजातु
साधवः यदन्यस्यप्रतिज्ञायपुनरन्यस्यदीयते ९९ नानुशुश्रुमजात्वेतत्पूर्वेष्वपिहिजन्मसु शुल्क
संज्ञेनमूल्येनछन्नंदुहितृविक्रयम् १००

ण्हीयात् किंपुनःशास्त्रविद्द्विजातिःयस्मात्शुल्कंगृण्हन्गुप्तंदुहितृविक्रयं
कुरुतेनकन्यायाःपित्रेत्यनेननिषिद्धमपिशुल्कग्रहणंकन्यायामपिगृहीतशुल्कायांशास्त्रीयनियमदर्शनात्शुल्कग्रहणेशास्त्री
यत्वशंकायांपुनस्तन्निषिध्यते ९८ एतदिति एतत्पुनःपूर्वेशिष्टानकदाचित्कृतवंतोनाप्यपरेवर्त्तमानकालाःकुर्वंतियदन्यस्यक
न्यामंगीकृत्यपुनरन्यस्मैदीयतइतिएतच्चगृहीतशुल्ककन्यामदत्वाकस्यचित्कन्यायामितितुगृहीतशुल्कविषयम् ९९ नेति पूर्व
कल्पेष्वप्येतद्वृत्तमितिकदाचित्वयन्नश्रुतवंतोयत्शुल्काभिधानेनमूल्येनकश्चित्साधुर्गूढंदुहितृविक्रयमकार्षीदितिशुल्कनि
षेधार्थवादः १००

अन्योन्येति भार्यापत्योर्मरणांतंयावत्धर्मार्थकामेषुपरस्पराव्यभिचारःस्यादित्येवसंक्षेपतः स्त्रीपुंसयोःप्रकृष्टोधर्मोज्ञातव्यः तयान्नसति १०१ तयेति स्त्रीपुंसौकृतविवाहौतथासदायत्नंकुर्यातांयथाधर्मार्थकामविषयेवियुक्तौपरस्परन्नव्यभिचरेताम् १०२ एषइति एषभार्यापत्योरन्योन्यानुरागयुक्तोधर्मोयुष्माकमुक्तः संतानाभावेचापत्यप्राप्तिरुक्ता इदानींदायतइति दायः पित्रादिधनंतस्यविभागव्यवस्थांशृणुत १०३ ऊर्ध्वमिति भ्रातरोमिलित्वापितृमरणादूर्द्ध्वविभागहेतुमाह यस्मात्ते पुत्राजीवतोःपित्रोस्तदीयधनेस्वामिनोनभवंतिमातुरपिप्रकृतत्वात्सेतृकमित्यनेनमातृकस्यापिग्रहणंअयंचपितृमरणविभागोजीवतः पितुरिच्छाभावेद्रष्टव्यः पितुरिच्छयाजीवत्यपितस्मिन्विभागः तदाहयाज्ञवल्क्यः विभागंचेत्पिताकुर्यादि

अन्योन्यस्याव्यभिचारोभवेदामरणांतिकः एषधर्मःसमासेनज्ञेयःस्त्रीपुंसयोःपरः १०१ तथानित्यंयतेयातांस्त्रीपुंसौतुकृतक्रियौ यथानाभिचरेतांतौवियुक्तावितरेतरम् १०२ एषस्त्रीपुंसयोरुक्तोधर्मोवोरतिसंहितः आपद्यपत्यप्राप्तिश्चदायभागन्निबोधत १०३ ऊर्ध्वंपितुश्चमातुश्चसमेत्यभ्रातरःसमम् भजेरन्पैतृकंरिक्थमनीशास्तेहिजीवतोः १०४ ज्येष्ठएवतुगृह्णीयात्पित्र्यंधनमशेषतः शेषास्तमुपजीवेयुर्यथैवपितरंतथा १०५ ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवः पितॄणामनृणश्चैवसतस्मात्सर्वमर्हति १०६ यस्मिन्नृणंसन्नयतियेनचानन्त्यमश्नुते सएवधर्मजःपुत्रःकामजानितरान्विदुः १०७

च्छयाविभजेत्सुतानिति यदापुनर्ज्येष्ठोधार्मिकोभवतितदा १०४ ज्येष्ठेति ज्येष्ठएवपितृसंबंधिधनंगृह्णीयात्कनिष्ठाःपुनर्ज्येष्ठंभक्ताच्छादनाद्यर्थंपितरमिवउपजीवेयुः एवंचसर्वेषांसहैवावस्थानम् १०५ ज्येष्ठेति उत्पन्नमात्रेणज्येष्ठेनसंस्काररहितेनापिमनुष्यःपुत्रवान्भवतिततश्चनापुत्रस्यलोकोस्तीतिश्रुतेः तथाप्रजयापितृभ्यइतिश्रुतेःपुत्रेणजातमात्रेण पितॄणामनृणश्चसइतिअतोज्येष्ठएवधनमर्हतिपूर्वस्यअनुजास्तेनसाम्नावर्त्तेरन् १०६ यस्मिन्निति यस्मिन्जातेऋणंशोधयतियेनजातेनामृतत्वंप्राप्नोति तथाचश्रुतिः ऋणमस्मिन्संनयत्यमृतत्वंचग

पतिमपरिचरंत्यास्त्यागोनकरणीयोनचधनग्रहणंकरणीयम् ७९ मद्येति निषिद्धमद्यपानरताअसाध्व्याचाराभर्तुःप्रतिकू लाचरणशीलाकुष्ठादिव्याधियुक्ताभृत्यादिताडनशीलासततमतिव्ययकारिणीयाभार्याभवेत्साधिवेत्तव्यातस्यांसत्यामन्योविवाहःकार्यः ८० वंध्येति प्रथमऋतुमारभ्याविद्यमानप्रसूताअष्टमेवर्षेऽधिवेदनीयामृतापत्यादशमेवर्षेस्त्रीजनन्येकादशेऽप्रियवादिनीसद्यएवयद्यपुत्राभवतिपुत्रवत्यांतुतस्यांधर्मप्रजासंपन्नेदारेनान्यांकुर्वीतान्यतरापायेतुकुर्वीतेत्यापस्तंबनिषेधादधिवेदनन्नकार्यम् ८१ येति यापुनर्व्याधितासतीपत्युरनुकूलाभवतिशीलवतीचस्यात्तामनुज्ञाप्यान्योविवाहःकार्यःकदाचिच्चासौनावमाननीया ८२ अर्धीति यापुनःकृतवेदनास्त्रीकुपितानिर्गच्छतिसातदहरेवरज्ज्वादिनाबध्वास्थापनीयाआकोप-

मद्यपासाधुवृत्ताचप्रतिकूलाचयाभवेत् व्याधिताचाधिवेत्तव्याहिंस्राऽर्थघ्नीचसर्वदा ८० वंध्याष्टमेऽधिवेद्याब्देदशमेतुमृतप्रजा एकादशेस्त्रीजननीसद्यस्त्वप्रियवादिनी ८१ यारोगिणीस्यात्तुहिता संपन्नाचैवशीलतः सानुज्ञाप्याधिवेत्तव्यानावमान्याचकर्हिचित् ८२ अधिविन्नातुयानारीनिर्गच्छेद्दुषितागृहात् सासद्यःसन्निरोद्धव्यात्याज्यावाकुलसन्निधौ ८३ प्रतिषिद्धापिचेद्यातुमद्यमभ्युदयेष्वपि प्रेक्षासमाजंगच्छेद्वासादंड्याकृष्णलानिषट् ८४ यदिस्वाश्चापराश्चैवविंदेरन्योषितोद्विजाः तासांवर्णक्रमेणस्याज्ज्यैष्ठ्यंपूजाचवेश्मच ८५ भर्तुःशरीरशुश्रूषांधर्मकार्यंचनैत्यकम् स्वाचैवकुर्यात्सर्वेषान्नास्वजातिःकथंचन ८६

निवृत्तेःपित्रादिकुलसन्निधौवात्याज्या ८३ प्रतीति यापुनःक्षत्रियादिकास्त्रीभर्त्रादिनिवारिताविवाहाद्युत्सवेष्वपिनिषिद्धमद्यंपिबेत्नृत्यादिस्थानजनसमूहंवागच्छेत्सासुवर्णकृष्णलानिषट्व्यवहारप्रकरणाद्राज्ञादंडनीया ८४ यदीति यदिद्विजातयःस्वजातीयाविजातीयाश्चउद्वहेयुस्तदातासांद्विजातिक्रमेणवाकुसंमानदायविभागोत्कर्षार्थंज्येष्ठत्वंपूजाचवस्त्रालंकारादिदानेनगृहंचप्रधानंस्यात् ८५ भर्तुरिति भर्तुर्देहपरिचर्यामन्नदानादिरूपान्धर्मकार्यंचभिक्षादानातिथिपरिवेशनहोमीयद्रव्योपकल्पनादिशास्त्रीयहिकंसर्वेषांद्विजातीनांसजातिभार्यैवकुर्यान्नतुकदा

चिद्विजातीयेति ८६ यस्त्विति यः पुनः स्वजातीयया सन्निहितया देहशुश्रूषादिकं कर्त्तव्यं विजातीयया मौर्ख्यात् कारयेत् स यथा
ब्राह्मण्याः शूद्राज्जातो ब्राह्मणचांडालः तथैव पूर्वैर्ऋषिभिर्दृष्ट इति पूर्वानुवादः ८७ उत्कृष्टेति कुलाचारादिभिरुत्कृष्टाय सरू
पाय समानजातीयाय वराय अप्राप्तकालामपि विवाहयेदष्टवर्षामेवं धर्मो न हीयते इति दक्षस्मरणात् तस्मादपि कालात् प्रागपि कन्यां
ब्राह्मविवाहविधिना दद्यात् ८८ काममिति संजातार्त्तवापि कन्या वरं मरणपर्यंतं पितृगृहे तिष्ठेत् न पुनरेनां विद्यागुणरहिताय
कदाचित् पित्रादिर्दद्यात् ८९ त्रीणीति पित्रादिर्गुणवत्तराय अदीयमाना कन्या संजातार्त्तवा सती त्रीणि वर्षाणि प्रतीक्षेत वर्षत्रया
त् पुनरूर्ध्वमधिकगुणवरालाभे समानजातिगुणं वरं स्वयं वृणीत ९० अदीयेति पित्रादिभिरदीयमाना कुमारी यथोक्तकाले यदि

यस्तु तत्कारयेन्मोहात् स्वजात्या स्थितयान्यया यथा ब्राह्मणचांडालः पूर्वदृष्टस्तथैव सः ८७ उत्कृष्टाया
भिरूपाय वराय सदृशाय च अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ८८ काममामरणात्तिष्ठेद्गृहे क
न्यर्त्तुमत्यपि न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ८९ त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती
ऊर्ध्वं तु कालादेतस्माद्विंदेत सदृशं पतिम् ९० अदीयमाना भर्त्तारमधिगच्छेद्यदि स्वयम् नैनः किं
चिदवाप्नोति न च यं साधिगच्छति ९१ अलंकारं नाददीत पित्र्यं कन्या स्वयंवरा मातृकं भ्रातृदत्तं वा स्ते
ना स्याद्यदि तं हरेत् ९२ पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् स हि स्वाम्यादतिक्रामेदृतूनां प्र
रः ९४ त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्व

भर्त्तारं स्वयं वृणुते तदासौ न किंचित् पापं प्राप्नोति न च तत्पतिः पापं प्राप्नोति ९१ अलमिति स्वयंवृतपतिका कन्या वरस्ते
करणात् पूर्वं पितृमातृभ्रातृभिर्दत्तमलंकारं तेभ्यः समर्पयेत् यदा नार्पयेत्तदा चौरी स्यात् ९२ पित्रेनेति ऋतुयुक्तां कन्यां वरः परि
णयन् पित्रे शुल्कं न दद्यात् यस्मात्स पिता ऋतुकार्यापत्योत्पत्तिनिरोधात् कन्यायाः स्वामित्वाद्धीयते ९३ त्रिंशदिति त्रिंशद्वर्षः पु
मान् द्वादशवर्षवयस्कां मनोहारिणीं कन्यामुद्वहेत् चतुर्विंशतिवर्षो वाऽष्टवर्षां गार्हस्थ्यधर्मे वसादं गच्छति त्वरावान् एतच्च योग्यका

-च्छति पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् इति स एव पितुर्ऋणापनयनहेतुना जातः पुत्रो भवति तेनैकेन एवऋणापनयनाद्युपकारस्यकृतत्वात् इतरांस्तु कामजानाहुः योजानंति ततश्च सर्वधनं गृह्णीयादित्यस्यैवायमपि विशेषः १०७ पितेवेति ज्येष्ठो भ्राता विभागाभावे-अनुजान् भ्रातॄन्भक्ताच्छादनादिभिः पितेव बिभृयात् अनुजाश्च भ्रातरः पुत्रा इव ज्येष्ठे भ्रातरि धर्मायवर्त्तेरन् १०८ ज्येष्ठ इति अकृतविभागो ज्येष्ठो यदि धार्मिको भवति तदानुजानामपि तदनुयायित्वेन धार्मिकत्वात् ज्येष्ठः कुलं वृद्धिं नयति यद्यधार्मिको भवति तदाऽनुजानामपि तदनुयायित्वात् ज्येष्ठः कुलं नाशयति तथा गुणवान् ज्येष्ठो लोके पूज्यतमः साधुभिश्चागर्हितो भवति १०९ यो ज्येष्ठ इति यो ज्येष्ठोऽनुजेषु भ्रातृषु पितृवद्वर्त्तते स पितेव मातेवागर्हणीयो भवति यः पुनस्तथा न वर्त्तते स मातुलादिबंधुवदर्चनीयः ११० एवमिति एवमविभक्ता भ्रातरः सह संवसेयुः यदि वा धर्मकामनया कृतविभागाः पृथग्वसेयुः यस्मात् पृथगवस्थाने सति पृथक्पृथक् पंचमहाय-

पितेव पालयेत्पुत्रान्ज्येष्ठो भ्रातॄन्यवीयसः पुत्रवच्चापि वर्त्तेरन्ज्येष्ठे भ्रातरि धर्मतः १०८ ज्येष्ठः कुलं वर्द्धयति विनाशयति वा पुनः ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः १०९ यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्यस्तु बंधुवत् ११० एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया पृथग्विवर्द्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया १११ ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ततोऽर्द्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः ११२ ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम् ११३

ज्ञाद्यनुष्ठानधर्मः तेषां वर्द्धते तस्माद्विभागक्रिया धर्म्या तथा च बृहस्पतिः एकपाकेन वसतां पितृदेवद्विजार्चनम् एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे १११ ज्येष्ठस्येति उद्ध्रियत इत्युद्धारः ज्येष्ठस्याविभक्तसाधारणधनादुद्धृत्य विंशतितमो भागः सर्वद्रव्येभ्यश्च यत् श्रेष्ठं तद्दातव्यम् मध्यमस्य चत्वारिंशत्तमो भागो देयः कनिष्ठस्य पुनरशीतितमो भागो दातव्यः अवशिष्टं धनं समं कृत्वा विभजनीयम् ११२ ज्येष्ठश्चेति ज्येष्ठकनिष्ठौ पूर्वश्लोके यथोक्तमुद्धारं गृह्णीयाताम् ज्येष्ठकनिष्ठव्यतिरिक्ता ये मध्यमास्तेषामेवानंतरज्येष्ठकनिष्ठतामनपेक्ष्य मध्यमस्योक्तचत्वारिंशद्भागः प्रत्येकं दातव्यः मध्यमानामनंतरज्येष्ठकनिष्ठदेयभागवैषम्यवारणार्थमिदम् ११३ सर्वेषामिति सर्वेषां धनप्रकाराणां मध्यात् यत् श्रेष्ठं धनं ज्येष्ठः

तद्रत्नंगृह्णीयात्सर्वद्रव्याच्चयद्वरमित्युक्तमनूदितंसमुच्चयबोधनाययच्चैकमपिप्रकृष्टंद्रव्यंविद्यतेतदपिज्येष्ठएवगृह्णीयात्तथाद-
शतःपशूनामितिगोतमस्मरणात् दशभ्योगवादिपशुभ्यएकैकंश्रेष्ठंज्येष्ठोलभतेइदंचयदिज्येष्ठोगुणवानितरेनिर्गुणास्तद्विषयंस
र्वेषांसमगुणत्वेतु ११४ उद्धारइति दशतःप्राप्नुयाद्वरमितियोयमुद्धारउक्तःसोयमध्ययनादिकर्मसुप्रवृत्तानांभ्रातॄणांज्येष्ठस्यनास्ति
नचापियत्किंचिदस्यदेयमितिद्रव्यंपूजावृद्धिकरंज्येष्ठायदेयंएवंचसमगुणेषूद्धारप्रतिषेधदर्शनात्सर्वत्रगुणोत्कर्षविशेषापेक्षयोद्धा
रोवैषम्येबोद्धव्यः ११५ एवमिति एवमुक्तप्रकारेणसमुद्धृतविंशद्भागाधिकेधनेसमान् भागान् भ्रातॄणांकल्पयेत् विंशतितमभा
गादौपुनरनुद्धृतेइयंवक्ष्यमाणभागकल्पनाभवेत् ११६ एकेति एकाधिकमंशंद्वावंशावितियावत्ज्येष्ठपुत्रोगृह्णीयात् अधिक
मर्द्धंयत्रांशोसार्द्धमंशंज्येष्ठादनन्तरजातोगृह्णीयात्कनिष्ठाःपुनरेकैकमंशंगृह्णीयुरितिव्यवस्थितोधर्मः इदंतुज्येष्ठतदनुजयोर्वि

सर्वेषांधनजातानामाददीताग्र्यमग्रजः यच्चसातिशयंकिंचिद्दशतश्चाप्नुयाद्वरम् ११४ उद्धारोनदश
स्वस्तिसंपन्नानांस्वकर्मसु यत्किंचिदेवदेयंतुज्यायसेमानवर्द्धनम् ११५ एवंसमुद्धृतोद्धारेसमानंशा
न्प्रकल्पयेत् उद्धारेनुद्धृतेत्वेषामियंस्यादंशकल्पना ११६ एकाधिकंहरेज्ज्येष्ठःपुत्रोध्यर्द्धंततोऽनुजः अं
शमंशंयवीयांसइतिधर्मोव्यवस्थितः ११७ स्वेभ्योंशेभ्यस्तुकन्याभ्यःप्रदद्युर्भ्रातरःपृथक् स्वात्स्वादंशा
च्चतुर्भागंपतिताःस्युरदित्सवः ११८

द्यादिगुणवत्त्वापेक्षयाकनिष्ठानांचनिर्गुणत्वेबोद्धव्यंज्येष्ठतदनुजयोरधिक
दानदर्शनात् ११७ स्वेभ्यइति ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारोभ्रातरःस्वजात्यपेक्षयास्वेभ्यश्चतुरोंशान्हरेयुः विप्रइत्या
दिनावक्ष्यमाणेभ्योभागेभ्यआत्मीयात्मीयाद्भागाच्चतुर्थभागंपृथक्कन्याभ्योअनूढाभ्योभगिनीभ्यः यायस्यसोदर्याभगिनी
सतस्याएवसंस्कारार्थमितिएवंदद्युः तथाचयाज्ञवल्क्यः असंस्कृतास्तुसंस्कार्याभ्रातृभिःपूर्वसंस्कृतैः भगिन्यश्चनिजादं
शाद्दत्वांशंतुतुरीयकम् यदिभगिनीसंस्कारार्थंचतुर्भागंदातुंनेच्छन्तितदापतिताभवेयुः एतेनैकजातीयवैमात्रेयभगिनीसद्भावे
पिसोदर्यभगिनीभ्यश्चतुर्थभागदानमवगन्तव्यम् ११८ अजेति एकशफाअश्वादयः छागमेषादिएकशफसहितंविभागका

ऽसमं कृत्वाविभक्तुमशक्यंतन्नविभजेत्किंतुज्येष्ठस्यैवतत्स्यात्नतुतत्तुल्यद्रव्यांतरदानेनसमीकृत्यविक्रीयवातन्मूल्यंविभजे
त् अजाविकमितिपशुद्वंद्वाद्विभाषैकवद्भावः ११९ यवीति कनिष्ठोयदिज्येष्ठभ्रातृभार्यायान्नियोगेनपुत्रंजनयेत्तदातेनपि-
तृपितृव्येनसहतस्यक्षेत्रजस्यसमोविभागःस्यान्नतुपितृवत्सोद्धारोभवतिइतिविभागव्यवस्थानियताअनियोगोत्पन्नस्यानंशि
त्वंवक्ष्यतियद्यपिसमेसभ्रातरःसममित्युक्तंतथाप्यस्मादेवलिंगात्सोत्रस्यापिमृतपितृकस्यपितृव्यविभागोस्तीतिगम्यते १२०
उपेति ज्येष्ठभ्रातुःक्षेत्रजःपुत्रोपिपितेवसोद्धारविभागीयुक्तइमांशंकांनिराकृत्यपूर्वोक्तमेवद्रढयतिअप्रधानंक्षेत्रजःपुत्रःप्रधा
नस्यक्षेत्रिणःपितुर्द्धर्मेणसोद्धारविभागग्रहणरूपेणसंबध्यतेक्षेत्र्यपिपितातद्वारेणापत्योत्पादनेप्रधानंतस्मात्पूर्वोक्तेनैवधर्मेण
विभागव्यवस्थारूपेणपितृव्येनसहतंक्षेत्रजंविभजेदितिपूर्वस्यैवशेषः १२१ पुत्रइति यदिप्रथमोढायांकनीयान्पुत्रोजातःप-

अजाविकंसैकशफन्नजातुविषमंभजेत् अजाविकंतुविषमंज्येष्ठस्यैवविधीयते ११९ यवीयान्ज्ये
ष्ठभार्यायांपुत्रमुत्पादयेद्यदि समस्तत्रविभागःस्यादितिधर्मोव्यवस्थितः १२० उपसर्जनंप्रधानस्य
धर्मतोनोपपद्यते पिताप्रधानंप्रजनेतस्माद्धर्मेणतंभजेत् १२१ पुत्रःकनिष्ठोज्येष्ठायांकनिष्ठायांच
पूर्वजः कथंतत्रविभागःस्यादितिचेत्संशयोभवेत् १२२ एकंवृषभमुद्धारंसंहरेतसपूर्वजः ततोऽपरे
ज्येष्ठवृषास्तदूनानांस्वमातृतः १२३ ज्येष्ठस्तुजातोज्येष्ठायांहरेद्वृषभषोडशाः ततःस्वमातृतःशेषाभ
जेरन्नितिधारणा १२४

श्चादूढायांचज्येष्ठः तदातत्रकथंविभागोभवेदितिसंशयोयदिस्यात्किंमातुरुद्वाहक्रमेणपुत्र-
स्यज्येष्ठत्वमुतस्वजन्मक्रमेणेतितदाह१२२ एकमिति पूर्वस्यांजातःपूर्वजःआपोःसंज्ञाछंदसोर्बहुलमितिह्रस्वत्वंसकनिष्ठोप्येकं
वृषभमुद्धारंगृण्हीयात्ततःश्रेष्ठवृषभादन्येयेसंत्यश्रेष्ठवृषभाःतेतस्माज्ज्येष्ठिनेयात्मातृतऊनानांकनिष्ठेयानांप्रत्येकंए
कैकशोभवंतीतिमातुरुद्वाहक्रमेणज्येष्ठ्यम् १२३ ज्येष्ठइति प्रथमोढायांपुनर्योजातोजन्मनाचभ्रातृभ्योज्येष्ठःसवृषभःषोडशोया
सांगवांतागृण्हीयात्पंचदशगाएकंवृषभमित्यर्थःततोनंतरंयेऽन्येचद्वीभ्योजातास्तेस्वमातृभागतऊढज्येष्ठापेक्षयाशेषाभागा

दिधिमजेरन्निति निश्चयः १२४ सदृशेति समानजातीयस्त्रीषुजातानांपुत्राणांजातिगतविशेषाभावेसतिनमातृक्रमेणज्यैष्ठ्य मृषिभिरुच्यतेजन्मज्येष्ठानांतुपूर्वोक्तएवविंशतिभागादिरुद्धारोवोद्धव्यः एवंचमातृज्यैष्ठ्यस्यविहितप्रतिषिद्धत्वात् षोडशीग्रहणा ग्रहणवद्विकल्पः सचगुणवन्निर्गुणतयाभ्रातॄणांगुरुलघुत्वावगमाद्व्यवस्थितः अतएवजन्मविद्यागुणज्येष्ठोत्र्यंशंदायाद्वाप्नुया त्इतिबृहस्पत्यादिभिर्जन्मज्येष्ठस्यविद्याद्युत्कर्षेणोद्धारोत्कर्षउक्तः निर्गुणस्यैकवृषभमितिमंदगुणस्यवृषभषोडशाइतिमातृज्यै ष्ठ्याश्रयणेनउद्धारोवोद्धव्यः मातृज्यैष्ठ्यविधिंत्वनुवादंमेधातिथिरवदत् गोविंदराजस्त्वन्यतमजगौनकेवलंविभागेजन्मज्यैष्ठ्यंकिं तु १२५ जन्मेति सुब्रह्मण्याख्योमंत्रोज्योतिष्टोमइतिइंद्रस्याह्वानार्थंप्रयुज्यतेतत्रप्रथमपुत्रेणपितरमुपविश्याह्वानंक्रियतेअ मुकपितायजतइत्येवमृषिभिःस्मृतंतथायमयोर्गर्भेएककालंनिषिक्तयोरपिजन्मक्रमेणएवंज्येष्ठतास्मृतागर्भेष्वितिबहुवचनंस्त्री

सहशास्त्रीषुजातानांपुत्राणामविशेषतः नमातृतोज्यैष्ठ्यमस्तिजन्मतोज्यैष्ठ्यमुच्यते १२५ जन्म ज्येष्ठनचाह्वानंसुब्रह्मण्यास्वपिस्मृतम् यमयोश्चैवगर्भेषुजन्मतोज्येष्ठतास्मृता १२६ अपुत्रोऽनेन विधिनासुतांकुर्वीतपुत्रिकाम् यदपत्यंभवेदस्यांतन्ममस्यात्स्वधाकरम् १२७ अनेनतुविधानेनपु राचक्रेयपुत्रिकाः विवृद्ध्यर्थंस्ववंशस्यस्वयंदक्षःप्रजापतिः १२८ ददौसदशधर्मायकश्यपायत्रयोद श सोमायराज्ञेसत्कृत्यप्रीतात्मासप्तविंशतिम् १२९

द्व्यपेक्षया १२६ अपुत्रेति अविद्यमानपुत्रोयदस्यामप त्यंजायतेतन्ममश्राद्धाद्यौर्ध्वदेहिककरंस्यादितिकन्यादानकालेजामात्रासहसंप्रतिपत्तिरूपेणविधानेनदुहितरंपुत्रिकांकु र्यात् अत्रपरप्रतिपत्तिरूपमनुवादमाह १२७ अनेनेति दक्षःप्रजापतिःपुत्रोत्पादनविषयज्ञः स्ववंशवृद्ध्यर्थमनेनोक्तविधा नेनकृत्स्नादुहितरःपूर्वंपुत्रिकाःस्वयंकृतवान्कार्त्स्न्येअथशब्दः १२८ ददाविति सदक्षोभाविपुत्रिकापुत्रलाभेनप्रीता अलंकारादिनासत्कृत्यदशपुत्रिकाधर्माय त्रयोदशकश्यपायसप्तविंशतिंचंद्रायद्विजानामोषधीनांचराज्ञेदत्तवान्स न्येषामपिपुत्रिकाकरणेलिंगदशेत्यादिचबह्वीनामपिपुत्रिकाकरणज्ञापकम् १२९.

यथैवेति आत्मस्थानीयः पुत्र आत्मा वै पुत्रनामासीति मंत्रलिंगात्तत्समा च दुहिता तस्या अप्यंगेभ्य उत्पादनात् अतस्तस्यां पुत्रिकायां पितुरात्मस्वरूपायां विद्यमानायामपुत्रस्य मृतस्य पितुर्धनं पुत्रिकाव्यतिरिक्तः कथमन्यो हरेत् १३० मातुरिति मातुर्यद्धनं तत्तस्यां मृतायां कुमारीभाग एव स्यात् न पुत्राणां तत्र भागः कुमारीत्वानूढाभिप्रेता तथा गोतमः स्त्रीधनं दुहितॄणामदत्तानामप्रतिष्ठितानां च अपुत्रस्य च मातामहस्य दौहित्र एव अकृतत्वात्पौत्रिकेयः समग्रं धनं गृह्णीयात् १३१ दौहित्रेति दौहित्रः अकृतत्वात्पौत्रिकेय एव तस्य मातामहधनग्रहणं अनंतरोक्तं जनकधनग्रहणपिंडदानार्थोयमारंभः पितृशब्दस्य तत्रैव प्रसिद्धत्वात् अन्यस्य पौत्रिकेयः पुत्रांतररहितस्य जनकस्य समग्रं धनं गृह्णीयात् स एव पितृमातामहाभ्यां द्वौ पिंडौ दद्यात् पिंडदानं श्राद्धोपलक्षणार्थं पौत्रिकेयत्वेन जनकधनग्रहणपिंडदानव्या

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा तस्यामात्मनि तिष्ठंत्यां कथमन्यो धनं हरेत् १३० मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः दौहित्र एव च हरेदपुत्रस्याखिलं धनम् १३१ दौहित्रो ह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् स एव दद्याद्द्वौ पिंडौ पित्रे मातामहाय च १३२ पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः तयोर्हि मातापितरौ संभूतौ तस्य देहतः १३३ पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः १३४ अपुत्रायां मृतायां तु पुत्रिकायां कथंचन धनं तत्पुत्रिकाभर्ता हरेतैवाविचारयन् १३५

मोहनिरासार्थं वचनम् १३२ पौत्रेति पौत्रपौत्रिकेययोर्लोके धर्मकृत्येन कश्चिद्विशेषोस्ति यस्मात्तयोर्मातापितरौ तस्य देहादुत्पन्नाविति पूर्वस्यैवानुवादः १३३ पुत्रिकेति कृतायां पुत्रिकायां यदि तत्कर्तुः पुत्रोऽनंतरं जायते तदा तयोर्विभागकाले समो विभागो भवेत् नोद्धारः पुत्रिकायै देयः यस्माज्ज्येष्ठाया अपि तस्या उद्धारविषये ज्येष्ठता नादरणीया १३४ अपुत्रेति अपुत्रायां पुत्रिकायां कथंचन मृतायां तदीयधनं तद्भर्तैवाविचारयन् गृह्णीयात्पुत्रिकायाः पुत्रसमत्वेनानपत्यस्य पत्नीरहितस्य मृतपुत्रस्य पितुर्धनग्रहणप्रसक्तौ तन्निवारणार्थमिदं वचनम् १३५ अकृतेति अकृता वा कृता वेति पुत्रिकाया एव द्वैविध्यं तत्र यदपत्यं भवेदस्यातन्मम स्यात्स्वधाकरमिति अभिधाय कन्यादानकाले वरानुमत्या या क्रियते सा कृता अभिसंधिमात्रकृता वाग्व्य

दिविभजेरन्निति निश्चयः १२४ सदृशीति समानजातीयस्त्रीषु जातानां पुत्राणां जातिगतविशेषाभावे सति न मातृक्रमेण ज्यैष्ठ्य मृषिभिरुच्यते जन्मज्येष्ठानां तु पूर्वोक्त एव विंशतिभागादिरुद्धारो बोद्धव्यः एवं च मातृज्यैष्ठ्यस्य विहितप्रतिषिद्धत्वात् षोडशीग्रहणाग्रहणवद्विकल्पः सत्वगुणवन्निर्गुणतया चात्मातृणां गुरुलघुत्वावगमाद्व्यवस्थितः अत एव जन्मविद्यागुणज्येष्ठोऽन्यंशं दाप्तुइति बृहस्पत्यादिभिर्जन्मज्येष्ठस्य विद्याद्युत्कर्षेणोद्धारोत्कर्ष उक्तः निर्गुणस्यैकवृषभमिति मंदगुणस्य वृषभषोडशादिति मातृज्यैष्ठ्याश्रयणेन उद्धारो बोद्धव्यः मातृज्यैष्ठ्य विधिं त्वनुवादं मेधातिथिरवदत् गोविंदराजस्त्वन्यतमं जगौ न केवलं विभागे जन्मज्यैष्ठ्यं किंतु १२५ जन्मेति स्वब्राह्मण्याख्यो मंत्रो ज्योतिष्टोम इति इंद्रस्याह्वानार्थं प्रयुज्यते तत्र प्रथमपुत्रेण पितरमुपविश्याह्वानं क्रियते अमुकपिता यजत इत्येवमृषिभिः स्मृतं तथा यमयोर्गर्भ एककालं निषिक्तयोरपि जन्मक्रमेण एवं ज्येष्ठता स्मृता गर्भेष्विति बहुवचनं स्त्री

सदृशस्त्रीषु जातानां पुत्राणामविशेषतः न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते १२५ जन्मज्येष्ठेन चाह्वानं सुब्राह्मण्यास्वपि स्मृतम् यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता १२६ अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् १२७ अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः १२८ ददौ स दश धर्माय कश्यपाय त्रयोदश सोमाय राज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिम् १२९

हुत्वापेक्षया १२६ अपुत्रेति अविद्यमानपुत्रो यदस्यामपत्यं जायते तन्मम श्राद्धाद्यौर्ध्वदैहिककरं स्यादिति कन्यादानकाले जामात्रा सह संप्रतिपत्तिरूपेण विधानेन दुहितरं पुत्रिकां कुर्यात् अत्र परप्रतिपत्तिरूपमनुवादमाह १२७ अनेनेति दक्षः प्रजापतिः पुत्रोत्पादनविषयज्ञः स्ववंशवृद्ध्यर्थमनेनोक्तविधानेन कृत्स्नाः दुहितरः पूर्वं पुत्रिकाः स्वयं कृतवान् कार्त्स्न्ये अथशब्दः १२८ ददाविति स दक्षो भाविपुत्रिकापुत्रलाभेन प्रीतात्मा अलंकारादिना सत्कृत्य दश पुत्रिका धर्माय त्रयोदश कश्यपाय सप्तविंशतिं चंद्राय द्विजानामोषधीनां च राज्ञे दत्तवान् सत्कारवचनमन्येषामपि पुत्रिकाकरणे लिंगं दशेत्यादि च बह्वीनामपि पुत्रिकाकरणज्ञापकम् १२९.

यथैवेति आत्मस्थानीयःपुत्रआत्मावैपुत्रनामासीतिमंत्रलिंगात्तत्समाचदुहितातस्याअप्यंगेभ्यउत्पादनात् अतस्तस्यांपुत्रिका यांपितुरात्मस्वरूपायांविद्यमानायामपुत्रस्यमृतस्यपितुर्धनंपुत्रिकाव्यतिरिक्तःकथमन्योहरेत् १३० मातुस्त्विति मातुर्यद्धनंतत्तस्यांमृता यांकुमारीभागएवस्यात्नपुत्राणांतत्रभागःकुमारीत्वानूढाभिप्रेतातथागोतमः स्त्रीधनंदुहितॄणामदत्तानामप्रतिष्ठितानांच अपुत्र-स्यचमातामहस्यदौहित्रएवप्रकृतत्वात्पौत्रिकेयःसमग्रंधनंगृण्हीयात् १३१ दौहित्रेति दौहित्रःप्रकृतत्वात्पौत्रिकेयएवतस्यमातामह धनग्रहणंअनंतरोक्तंजनकधनग्रहणपिंडदानार्थोयमारंभःपितृशब्दस्यतत्रैवप्रसिद्धत्वात् अन्यस्यपौत्रिकेयःपुत्रांतररहितस्यजन कस्यसमग्रंधनंगृण्हीयात्सएवपितृमातामहाभ्यांद्वौपिंडौदद्यात्पिंडदानंश्राद्धोपलक्षणार्थंपौत्रिकेयत्वेनजनकधनग्रहणपिंडदानयो

यथैवात्मातथापुत्रःपुत्रेणदुहितासमा तस्यामात्मनितिष्ठंत्यांकथमन्योधनंहरेत् १३० मातुस्तुयौतकंयत्स्यात्कुमारीभागएवसः दौहित्रएवचहरेदपुत्रस्याखिलंधनम् १३१ दौहित्रोह्यखिलंरिक्थमपुत्रस्यपितुर्हरेत् सएवदद्याद्द्वौपिंडौपित्रेमातामहायच १३२ पौत्रदौहित्रयोर्लोकेनविशेषोऽस्ति धर्मतः तयोर्हिमातापितरौसंभूतौतस्यदेहतः १३३ पुत्रिकायांकृतायांतुयदिपुत्रोऽनुजायते समस्त त्रविभागःस्याज्ज्येष्ठतानास्तिहिस्त्रियाः १३४ अपुत्रायांमृतायांतुपुत्रिकायांकथंचन धनंतत्पुत्रिका भर्त्ताहरेतैवाविचारयन् १३५

मोहनिरासार्थवचनम् १३२ पौत्रेति पौत्रपौत्रिकेययोर्लोकेधर्मकृत्येनकश्चिद्विशेषोऽस्तियस्मात्तयोर्मातापितरौतस्यदेहादुत्पन्नावितिपूर्वस्यैवानुवादः १३३ पुत्रिकेति कृतायांपुत्रिकायांयदितत्कर्त्तुःपुत्रोऽनंतरंजायतेतदातयोर्विभागकालेसमोविभागोभवेत् नोद्धारःपुत्रिकायैदेयःयस्मात्ज्येष्ठायाअपितस्याउद्धारविषयेज्येष्ठतानादरणीया १३४ अपुत्रेति अपुत्रायांपुत्रिकायांकथंचनमृतायांतदीयधनंतद्भर्त्तैवाविचारयन्गृण्हीयात्पुत्रिकायाःपुत्रसमत्वेनानपत्यस्यपत्नीरहितस्यमृतपुत्रस्यपितुर्धनग्रहणमसक्तौतन्निवारणार्थमिदंवचनम् १३५ अकृतेति अकृतावाकृतावेतिपुत्रिकायाएवद्वैविध्यंतत्रयदपत्यंभवेदस्याःतन्ममस्यात्स्वधाकरमित्यभिधायकन्यादानकालेवरानुमत्यायाक्रियतेसाकृताभिसंधिमात्रकृतावान्या

वहारेणनकृता तथागोतमः अभिसंधिमात्रात्पुत्रिकामेकेषामितिअतएवपुत्रिकाधर्मशंकयेतिभागविर्यास्त्यत्वमुक्तम् पुत्रिकेयकृ
ताभकृतापुत्रंसमानजातीयाद्वोदुरुत्पादयेत्तेनदौहित्रेणपौत्रकार्यकरणात्पौत्रिकेयवान्मातामहः पौत्रीतयाचासौतस्मैपिंडंदद्यात्
गोविंदराजस्त्वकृतावेत्यपुत्रिकैवदुहितातत्पुत्रोपिमातामहधनेपौत्रिकेयइवमातामहश्राद्धादिसत्वेप्यधिकारीत्याह तन्नपुत्रिकायाःपु
त्रतुल्यत्वादपुत्रिकापुत्रिकयोरतुल्यत्वेनतत्पुत्रयोस्तुल्यत्वायोग्यत्वादिति १३६ पुत्रेणेति पुत्रेणजातेनस्वर्गादिलोकान्प्राप्नोती-
ति पौत्रेणतेष्वेवचिरकालमवतिष्ठतेतदनंतरंपुत्रस्यपौत्रेणादित्यलोकंप्राप्नोति अस्यचदायभागप्रकरणेअभिधानंपितुर्दनेप-
त्न्यादिसद्भावेपिपुत्रस्यतदभावेपौत्रस्यइत्येवंपुत्रसंतानाधिकारबोधनार्थम् १३७ पुन्नाम्नेति यस्मात्पुन्नामधेयनरकात्सुतःपि
तरंत्रायतेतस्मात् त्राणात् आत्मनैवब्रह्मणापुत्रइतिप्रोक्तः तस्मान्महोपकारकत्वात्पुत्रस्यपुक्तंतदीयपुंसंतानस्यदायभागित्वमि

अकृतावाकृतावापियंविंदेत्सदृशात्सुतम् पौत्रीमातामहस्तेनदद्यात्पिंडंहरेद्धनम् १३६ पुत्रेणलो
कान्जयतिपौत्रेणानंत्यमश्नुते अथपुत्रस्यपौत्रेणब्रध्नस्याप्नोतिविष्टपम् १३७ पुन्नाम्नोनरका
द्यस्मात्त्रायतेपितरंसुतः तस्मात्पुत्रइतिप्रोक्तःस्वयमेवस्वयंभुवा १३८ पौत्रदौहित्रयोर्लोकेविशे
षोनोपपद्यते दौहित्रोपिह्यमुत्रैनंसंतारयतिपौत्रवत् १३९ मातुःप्रथमतःपिंडंनिर्वपेत्पुत्रिकासु
तः द्वितीयंतुपितुस्तस्यास्तृतीयंतत्पितुःपितुः १४० उपपन्नोगुणैःसर्वैःपुत्रोयस्यतुदत्रिमः सहरेतै
वतद्रिक्थंसंप्राप्तोप्यन्यगोत्रतः १४१

तिपूर्ववदर्थोर्थमिदम् १३८ पौत्रेति दौहित्रःपुत्रिकापुत्रःपुत्रदौहित्रयोर्लोकेक
श्चिद्विशेषोनसंभाव्यतेयस्माद्दौहित्रोपिमातामहंपरलोकेपौत्रवन्निस्तारयति एतच्चपौत्रिकेयस्यपौत्रेणसाम्यप्रतिपादनार्थंपुत्रिका
करणानंतरजातपुत्रेणसहधनेतुल्यभागबोधनार्थम् १३९ मातुरित्यादि पौत्रिकेयःप्रथमंमात्रेपिंडंद्वितीयंमातुःपित्रेतृतीयंमातुः
पितामहायदद्यात् पित्रादीनांतुपित्रेमातामहायचेत्यक्तत्वात्पितृक्रमेणैवपिंडदानम् १४० उपपन्नेति पुत्रात्रिक्थहराःपितु-
रित्येतिद्वादशपुत्राणामेवऋक्थहरत्वंवक्ष्यतिदशापरेतुक्रमशइतिऔरसक्षेत्रजाभावेदत्तस्यपितुर्ऋक्थहरत्वंप्राप्तमेवअतःसत्य-
प्यौरसपुत्रेदत्तकस्यसर्वगुणोपपन्नस्यपितृऋक्थभागप्राप्त्यर्थमिदंवचनंयस्यदत्तकःपुत्रोअध्ययनादिसर्वगुणोपपन्नोभवति

सोऽन्यगोत्रादागतोपिसत्यौरसेपितृरिक्थभागंगृह्णीयात् अतएवऔरसःपुत्रःपित्र्यस्यवसुनःप्रभुरितिऔरसस्यसर्वोक्ति
र्पाभिधानात्तेननास्यसमभागित्वंकिंतुक्षेत्रजोक्तषष्ठभागित्वमेवास्यन्याय्यम् गोविंदराजस्तुऔरसक्षेत्रजाभावेसर्वगुणोपपन्न
स्यैवदत्तकस्यपितृरिक्थभागित्वार्थमिदंवचनमित्यवोचत्तन्नकृत्रिमादीनामपिगुणानांपितृरिक्थभागित्वंदत्तकस्यतुतत्पूर्वपठि
तस्यापिसर्वगुणोपपन्नस्यैवेत्यन्याय्यत्वात् १४१ गोत्रेति गोत्रधनेजनकसंबंधिनीदत्तकोनकदाचिद्गृह्णीयात् पिंडश्चगोत्ररिक्था
नुगामीयस्यगोत्ररिक्थेभजतेतस्यैवसपिंडोदीयतेतस्मात्पुत्रंददतोजनकस्यस्वधापिंडश्राद्धादितत्पुत्रकर्तृकन्निवर्त्तते १४२ अनि
युक्तेति योगुर्वादिनियोगंविनाजातोयश्चसपुत्रायानियोगेनापिदेवरादेःकामादुत्पादितस्तावुभौक्रमेणजारोत्पन्नकामाभिलाषजौ
धनभागन्नार्हतः १४३ नियुक्तेति नियुक्तायामपिस्त्रियंघृताभ्यक्तत्वादिनियोगेतिकर्त्तव्यतांविनापुत्रोजातःसक्षेत्रिकस्यपितुर्द्धनं

गोत्ररिक्थेजनयितुर्नहरेद्दत्त्रिमःक्वचित् गोत्ररिक्थानुगःपिंडोव्यपैतिददतःस्वधा १४२ अनियु
क्तासुतश्चैवपुत्रिण्याप्तश्चदेवरात् उभौतौनार्हतोभागंजारजातककामजौ १४३ नियुक्तायामपि
पुमान्नार्य्यांजातोऽविधानतः नैवार्हःपैतृकंरिक्थंपतितोत्पादितोहिसः १४४ हरेत्तत्रनियुक्तायां
जातःपुत्रोयथौरसः क्षेत्रिकस्यतुतद्बीजंधर्मतःप्रसवश्चसः १४५ धनंयोबिभृयाद्भ्रातुर्मृतस्यस्त्रिय
मेवच सोऽपत्यंभ्रातुरुत्पाद्यदद्यात्तस्यैवतद्धनम् १४६

लब्धुन्नार्हतियस्मादसौपतितेनोत्पादितः नियुक्तोयो
विधिंहित्वेत्यनेनपतितस्योक्तत्वात् १४४ हरेदिति तत्रनियुक्तायांयोजातःक्षेत्रजःपुत्रऔरसइवधनंहरेत्यस्मात्तत्स्यकार
णभूतंबीजंतत्क्षेत्रस्वामिनएवतत्कार्यंकरणत्वात् अपत्यमपिचधर्मतस्तदीयंतत्यवीयान्ज्येष्ठभार्यायांपुत्रमुत्पादयेद्यदीत्य
नेनक्षेत्रजस्यपितामहधनेपितृव्येनसहसमभागस्यप्रोक्तत्वात् गुणवतःक्षेत्रजस्यऔरसवत्सोद्धारभागप्राप्त्यर्थमिदंऔरस
तुल्यत्वाभिधानम् १४५ धनमिति योमृतस्यभ्रातुःस्थावरजंगमंधनंपत्न्यारक्षणाक्षमयासमर्पितंरक्षेत्तांचपुष्णीयात्स
नियोगधर्मेणतस्यामुत्पादितस्यभ्रातुरपत्यस्यदद्यात्एतच्चधनंयोबिभृयात्भ्रातुरित्यभिधानात्विभक्तभ्रातृविषयंयवीयान्

ज्येष्ठभार्यायामितिसमभागाभिधानात् १४६ येति यास्त्रीगुर्वादिभिरनुज्ञातादेवराद्वा ऽन्यतोवासपिंडात्पुत्रमुत्पादयेत्सयदिक
मजोभवतितदातमऋक्थभाजंमन्वादयोवदंति अकामजएवऋक्थभागीमचव्याहृतोनारदेन मुखान्मुखंपरिहरन्गात्रैर्गात्रा
ण्यसंस्पृशन् कुलेतदवशेषेचसंतानार्थंनकामतइति १४७ एतदिति समानजातीयासुभार्यासुएकेनभर्त्राजातानामेष विभागवि
धिर्बोद्धव्यः इदानींनानाजातीयासुस्त्रीषुबह्वीषुउत्पन्नानांपुत्राणांविभागंशृणुत १४८ ब्राह्मणेति ब्राह्मणस्ययदिक्रमेणब्राह्म
ण्याद्यास्चतस्रोभार्याभवेयुःतदातासांनिष्पन्नेषु अयंवक्ष्यमाणोविभाग विधिर्मन्वादिभिरुक्तः १४९ कीनाशेति कीनाशःकर्ष
कःगवांसक्तोवृषोयानमश्वादिअलंकारोअंगुरीयकादिवेश्मगृहंचप्रधानंयावंतश्चांशास्तेष्वेकःप्रधानभूतोंशइत्येतब्राह्मणी
पुत्रस्योद्धारार्थंदेयंअवशिष्टंवक्ष्यमाणरीत्याविभजनीयम् १५० त्र्यंशमित्यादि त्रीनंशान्ब्राह्मणोधनाद्गृण्हीयात्द्वौक्षत्रि

यानियुक्तान्यतःपुत्रंदेवराद्वाप्यवाप्नुयात् तंकामजमऋक्थीयंवृथोत्पन्नंप्रचक्षते १४७ एत-
द्विधानंविज्ञेयंविभागस्यैकयोनिषु बह्वीषुचैकजातानांनानास्त्रीषुनिबोधत १४८ ब्राह्मणस्यानु
पूर्व्येणचतस्रस्तुयदिस्त्रियः तासांपुत्रेषुजातेषुविभागेऽयंविधिःस्मृतः १४९ कीनाशोगोवृषोयान
मलंकारश्चवेश्मच विप्रस्यौद्धारिकंदेयमेकांशश्चप्रधानतः १५० त्र्यंशंदायाद्धरेद्विप्रोद्वावंशौक्षत्रि
यासुतः वैश्याजःसार्द्धमेवांशमंशंशूद्रासुतोहरेत् १५१ सर्वंवाऋक्थजातंतद्दशधापरिकल्प्यच ध
र्म्यंविभागंकुर्वीतविधिनानेनधर्मवित् १५२ चतुरोंशान्हरेद्विप्रस्त्रीनंशान्क्षत्रियासुतः वैश्यापुत्रो
हरेद्व्यंशमंशंशूद्रासुतोहरेत् १५३

यासुतः सार्द्धंवैश्यापुत्रः अंशंशूद्रासुतः एवंचयत्रब्राह्मणीक्षत्रियापुत्रौद्वावेवविद्येते
तत्रपंचधाकृतेधनेत्रयोभागाब्राह्मणस्यद्वौक्षत्रियापुत्रस्य अनयैवदिशाब्राह्मणीवैश्यापुत्रादौचकल्पनाकार्या १५१ सर्वमिति
यद्वासर्वंमृक्थप्रकारमनुक्तोद्धारंदशधाकृत्वाविभागंधर्मज्ञोधर्मादनपेतंविभागंअनेनवक्ष्यमाणविधिनाकुर्वीत १५२ चतुरइति
चत्वारोभागाब्राह्मणस्यत्रयःक्षत्रियापुत्रस्यएवंब्राह्मणीवैश्यापुत्रादौद्विबहुपुत्रेषुचकल्पनाकार्या १५३ ॥ ॥ ॥

यद्यपीति यदिब्राह्मणोद्विजातिस्त्रीसुसर्वासुविद्यमानपुत्रःस्यात् अविद्यमानपुत्रोवातथापिशूद्रापुत्रायानंतराधिकारीयःतन्नथे
सदशमभागादधिकंधर्मतोनदद्यात् अयंचशूद्रापुत्रविषयेनिषेधादविद्यमानसजातिपुत्रस्यक्षत्रियावैश्यापुत्रौसर्वरिक्थहरौ-
स्याताम् १५४ ब्राह्मणेति ब्राह्मणक्षत्रियवैश्यानांशूद्रापुत्रोधनभाक्नभवतिकिंतुयदेवधनमस्मैपितादद्यात्तदेवतस्यभवेत् ए
तंचपूर्वोक्तविभागनिषेधात् विकल्पःसचगुणवद्गुणापेक्षः अथवाअनूढशूद्रापुत्रविषयोयंदशमभागनिषेधः १५५ समवर्णेति
द्विजातीनांसमानजातिभार्यासुयेपुत्राजातास्तेसर्वेज्येष्ठायोद्धारंदत्वा अवशिष्टंसमभागंकृत्वाज्येष्ठेनसहान्येविभजेरन् १५६ शूद्रेति
शूद्रस्यपुनःसमानजातीयैवभार्योपदिश्यतेनोत्कृष्टा अपकृष्टावातस्यांचयेजातास्तेयदिपुत्रशतमपितदासमभागाएवभवेयुः तेनोद्धा

यद्यपिस्यात्तुसत्पुत्रोप्यसत्पुत्रोपिवाभवेत् नाधिकंदशमाद्दद्याच्छूद्रापुत्रायधर्मतः १५४ ब्राह्मण
क्षत्रियविशांशूद्रापुत्रोनरिक्थभाक् यदेवास्यपितादद्यात्तदेवास्यधनंभवेत् १५५ समवर्णासुयेजा
ताःसर्वेपुत्राद्विजन्मनाम् उद्धारंज्यायसेदत्वाभजेरन्नितरेसमम् १५६ शूद्रस्यतुसवर्णैवनान्याभा
र्याविधीयते तस्यांजाताःसमांशाःस्युर्यदिपुत्रशतंभवेत् १५७ पुत्रान्द्वादशयानाहनृणांस्वायंभु
वोमनुः तेषांषड्बंधुदायादाःषडदायादबांधवाः १५८ औरसःक्षेत्रजश्चैवदत्तःकृत्रिमएवच गू
ढोत्पन्नोऽपविद्धश्चदायादाबांधवाश्चषट् १५९ कानीनश्चसहोढश्चक्रीतःपौनर्भवस्तथा स्वयंद
त्तश्चशौद्रश्चषडदायादबांधवाः १६०

रःकस्यचिन्नदेयः १५७ पुत्रानिति यान्द्वादशपुत्रान्हैरण्यगर्भोमनुराहतेषां
मध्यादाद्याःषड्बांधवाःगोत्रदायादाश्चतस्माद्बांधवत्वेनसपिंडसमानोदकानांपिंडोदकदानादिकुर्वंत्यनंतराभावेचगोत्रदायंगृण्हं
तिपितृरिक्थस्यमातुलस्यसुतरिक्थस्यहराःपितुरितिद्वादशविधपुत्राणामेववक्ष्यमाणत्वात् उत्तरेषट्नगोत्रधनहराभवंतिबांधवास्तु
भवंतिततश्चबंधुकार्यमुदकक्रियादिकुर्वंति मेधातिथिस्तुषडदायादबांधवाइत्यादिउत्तरषट्कस्यादायत्वसबांधवत्वंचाहतन्नबो
धापनेनबंधुत्वस्याभिहितत्वात्तदाह कानीनंचसहोढंचक्रीतंपौनर्भवंतथा स्वयंदत्तंनिषादंचगोत्रभाजःप्रचक्षते १५८ औरसइ
ति औरसादयोवक्ष्यमाणाःषट्रिक्थभाजोबांधवाश्चभवंति १५९ कानीनश्चेति कानीनादयोवक्ष्यमाणलक्षणाःषट्गोत्ररिक्थह

शनभवंति यथं वाश्च भवंतीति व्याख्यातं औरसेनसह क्षेत्रजादीनां पाठात्तुल्यत्वाशंकायां तन्निरासार्थमाह १६० यादृशमिति तृणा दिनिर्मितं कुत्सितोडुपादिभिरुदकं तरन्यथाविधं फलमाप्नोति तथाविधमेव कुपुत्रैः क्षेत्रजादिभिः पारलौकिकं दुःखं दुरुत्तरमाप्नोति इत्यनेन क्षेत्रजादीनां मुख्यौरसपुत्रवत्संपूर्णकार्यकरणाक्षमत्वं न भवतीति दर्शितम् १६१ यदीति अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसौ रिक्थी पिंडदाता च धर्मत इति याज्ञवल्क्योक्तविषये यदा क्षेत्रिकस्य पितुः क्षेत्रजानंतरमौरसः पुत्रो भवति तदा तावौरसक्षेत्रजौ एकरिक्थिनौ एकस्य पितुर्यद्यपि रिक्थार्हौ भवतः तथापि यद्यस्य जनकसंबंधितद्देवसगृण्हीयात् न क्षेत्रजः क्षेत्रिकपितुः यत्तु वक्ष्यतिषष्ठंतु क्षेत्रजस्यांशंप्रदद्यात्पैतृकाद्धनात् औरसोविभजन्दायमिति तत्पुत्रबहुलस्य यत्तु याज्ञवल्क्यः उभयसंबंधिरिक्थहरत्वमुक्तं तत्क्षेत्रिकपितुरौरसपुत्राभावे बोद्धव्यम् मेधातिथिगोविंदराजौ तु औरसमनियुक्तापुत्रं च विषयी-

याहृशंफलमाप्नोतिकुप्लवैःसंतरन्जलम् ताहृशंफलमाप्नोतिकुपुत्रैःसंतरंस्तमः १६१ यद्येकरिक्थिनौस्यातामौरसक्षेत्रजौसुतौ यस्ययत्पैतृकंरिक्थंसतद्गृण्हीतनेतरः १६२ एकएवौरसःपुत्रःपित्र्यस्यवसुनःप्रभुः शेषाणामानृशंस्यार्थंप्रदद्यात्तुप्रजीवनम् १६३ षष्ठंतुक्षेत्रजस्यांशंप्रदद्यात्पैतृकाद्धनात् औरसोविभजन्दायंपित्र्यंपंचममेववा १६४ औरसक्षेत्रजौपुत्रौपितृरिक्थस्यभागिनौ दशापरेतुक्रमशोगोत्ररिक्थांशभागिनः १६५ स्वक्षेत्रेसंस्कृतायांतुस्वयमुत्पादयेद्धियम् तमौरसंविजानीयात्पुत्रंप्रथमकल्पितम् १६६ कर्मश्लोकव्याख्यानंसते तन्न अनियुक्तापुत्रस्याक्षेत्रजत्वादनियुक्तासुतश्चेत्यनेन तस्य रिक्थग्रहणनिषेधात्पद्येकरिक्थिनावित्यनन्वयाच्च १६२ एकइति व्याध्यादिनाप्रथममौरसपुत्राभावे क्षेत्रजादिषु कृतेषु पश्चाद्दोषधादिनाविगतव्याधेरौरसउत्पन्ने सतीदमुच्यते औरसएवैकः पुत्रः पितृधनस्वामी शेषाणां क्षेत्रजव्यतिरिक्तानां तस्य षष्ठांशादेर्वक्ष्यमाणत्वात् पापसंबंधपरिहारार्थं ग्रासाच्छादनं दद्यात् १६३ षष्ठमिति औरसः पुत्रः पितृसंबंधिदायं विभजन् क्षेत्रजस्य षष्ठमंशं पंचमं वा दद्यात् निर्गुणसगुणापेक्षश्चायं विकल्पः १६४ औरसेति औरसक्षेत्रजौ पुत्रावुक्तप्रकारेण पितृधनहरौ स्यातां अन्ये पुनर्दश दत्तकादयः क्रमशो गोत्रभाजो भवंति पूर्वाभावे परः पर इत्येवंक्रमेण धनांशाहराश्च १६५ स्वइति स्वभार्यायां कन्यावस्थायामेव कृतविवाहसंस्कारायां

स्वयमुत्पादयेत्तंपुत्रंऔरसंमुख्यंविद्यात् सवर्णायांसंस्कृतायामुत्पादितमौरसपुत्रंविद्यादितिबौधायनदर्शनात् सजातीयायामेव स्वयमुत्पादित औरसोज्ञेयः १६६ यइति योमृतस्यनपुंसकस्यप्रसवविरोधिव्याध्युपेतस्यभार्यायां घृताक्तत्वादिनियोगधर्मेणगुरु नियुक्तायांजात सक्षेत्रज पुत्रोमन्वादिभिःस्मृतः १६७ मातेति शुक्रशोणितसंभवःपुरुषोमातापितृनिमित्तकः तस्यप्रदानविक्रय परित्यागेषुमातापितरौप्रभवतइतिवसिष्ठस्मरणात् मातापितावापरस्परानुज्ञयायंपुत्रं परिग्रहीतुःसमानजातीयंतस्यैवपुत्राभा वनिमित्तायामापदिप्रीतियुक्तंनतुभयादिनाउदकपूर्वंदद्यात्सदत्रिमाख्यःपुत्रोविज्ञेयः १६८ सदृशमिति यंपुनःसमानजातीयपि त्रोःपारलौकिकश्राद्धादिकरणाकरणाभ्यांगुणदोषौभवतइत्येवमादिज्ञंपुत्रगुणैश्चमातापित्रोराराधनादियुक्तंपुत्रंकुर्यात्सकृत्रि-

यस्तल्पजःप्रमीतस्यक्लीबस्यव्याधितस्यवा स्वधर्मेणनियुक्तायांसपुत्रःक्षेत्रजःस्मृतः १६७ मातापि तावादद्यातांयमद्भिःपुत्रमापदि सदृशंप्रीतिसंयुक्तंसज्ञेयोदत्रिमःसुतः १६८ सदृशंतुप्रकुर्याद्यंगुण दोषविचक्षणम् पुत्रंपुत्रगुणैर्युक्तंसविज्ञेयश्चकृत्रिमः १६९ उत्पद्यतेगृहेयस्यनचज्ञायेतकस्यसः स गृहेगूढउत्पन्नस्तस्यस्याद्यस्यतल्पजः १७० मातापितृभ्यामुत्सृष्टंतयोरन्यतरेणवा यंपुत्रंपरिगृण्हीयादपविद्धःसउच्यते १७१ पितृवेश्मनिकन्यातुयंपुत्रंजनयेद्रहः तंकानीनंवदेन्नाम्नावोढुःकन्या समुद्भवम् १७२ यागर्भिणीसंस्क्रियतेज्ञाताज्ञातापिवासती वोढुःसगर्भोभवतिसहोढइतिचो च्यते १७३

माख्यःपुत्रोवाच्यः १६९ उत्पद्यइति यस्यगृहेअवस्थितायाभार्यायाःपुत्रमुत्पद्यतेसजातीयोयंभवतीतिज्ञा नेपिकस्मात्पुरुषविशेषाज्जातोसावितिनज्ञायतेसगृहेअप्रकाशमुत्पन्नस्तस्यपुत्रः स्याद्यदीयायांभार्यायाजातः १७० मातेति मा तापितृभ्यांत्यक्तंतयोरन्यतरमरणेन अन्यतरेणवात्यक्तंपुत्रंस्वीकुर्यात्सोपविद्धाख्य पुत्रउच्यते १७१ पित्रेति पितृगृहेकन्या यंपुत्रंअप्रकाशंजनयेत्तंकन्यापरिणेतुःपुत्रंनाम्नाकानीनंवदेत् १७२ येति यागर्भवती अज्ञातगर्भावापरिणीयतेसगर्भस्त स्याजातः परिणेतुःपुत्रोभवतिसहोढइतिव्यपदिश्यते १७३ क्रीणीयेति यःपुत्रार्थमातापित्रोः सकाशात्यंक्रीणीयात्सक्रीत

कस्तस्यपुत्रोभवतिकेतुर्गुणैस्तत्स्योहीनोवाभवेन्नतत्रजातितःसादृश्यवैसादृश्ये सजातीयेषयंप्रोक्तस्तानयेत्सुमयाविधिरितियाज्ञवल्क्येनसर्वेषामेवपुत्राणांसजातीयत्वाभिधानत्वेनमनावपिक्रीतव्यतिरिक्ताःसर्वेपुत्राःसजातीयावोद्धव्याः १७४ येति याभर्त्रापरित्यक्तामृतभर्तृकावास्वेच्छयाअन्यस्यपुनर्भार्याभूत्वायमुत्पादयेत्सउत्पादकस्यपौनर्भवःपुत्रउच्यते १७५ साचेदिति सास्त्रीयद्यक्षतयोनिःसत्यन्यमाश्रयेत्तदातेनपौनर्भवेनभर्त्रापुनर्विवाहाख्यंसंस्कारमर्हतियद्वाकौमारपतिमुत्सृज्यान्यमाश्रित्यपुनस्तमेवप्रत्यागताभवतितदातेनकौमारेणभर्त्रापुनर्विवाहाख्यंसंस्कारमर्हति १७६ मातेति योमृतमातापितृकस्त्यागोचितकारणंविनाद्वेषादिनाताभ्यांत्यक्तोवा आत्मानंयस्मैददातिसस्वयंदत्ताख्यःतस्यपुत्रोमन्वादिभिःस्मृत. १७७ यमिति विन्यास्तेषविधिःस्मृतइतिया

क्रीणीयाद्यस्त्वपत्यार्थंमातापित्रोर्यमंतिकात् सक्रीतकःसुतस्तस्यसदृशोऽसदृशोपिवा १७४ या पत्यावापरित्यक्ताविधवावास्वयेच्छया उत्पादयेत्पुनर्भूत्वासपौनर्भवउच्यते १७५ साचेदक्षतयोनिःस्याद्गतप्रत्यागतापिवा पौनर्भवेनभर्त्रासापुनःसंस्कारमर्हति १७६ मातापितृविहीनोयस्त्यक्तोवास्यादकारणात् आत्मानंस्पर्शयेद्यस्मैस्वयंदत्तस्तुसःस्मृतः १७७ यंब्राह्मणस्तुशूद्रायांकामादुत्पादयेत्सुतम् सपारयन्नेवशवस्तस्मात्पारशवःस्मृतः १७८ दास्यांवादासदास्यांवायःशूद्रस्यसुतोभवेत् सोनुज्ञातोहरेदंशमितिधर्मोव्यवस्थितः १७९ क्षेत्रजादीन्सुतानेतानेकादशयथोदितान् पुत्रप्रतिनिधीनाहुःक्रियालोपान्मनीषिणः १८०

ज्ञवल्क्यदर्शनात्परिणीतायामेवशूद्रायांब्राह्मणःकामार्थंपुत्रंजनयेत्सजीवन्नेवशवतुल्यइतिपारशवःस्मृतःयद्यप्ययंपित्रुपकारार्थंश्राद्धादिकरोत्येवतथाप्यसंपूर्णोपकारकत्वात्शवव्यपदेशः १७८ दास्यामिति ध्वजाहृताद्युक्तलक्षणायांदास्यांदाससंबंधिन्यांवादास्यांशूद्रस्ययःपुत्रोजायतेसपित्रापरिणीतापुत्रैःसमांशभागोभवान्भवत्विति अनुज्ञातस्तुल्यभागंलभतइतिशास्त्रव्यवस्थानियता १७९ क्षेत्रजेति एतान्क्षेत्रजादीन्एकादशपुत्रान्पुत्रोत्पादनविधिलोपःपुत्रकर्त्तव्यश्राद्धादिलोपश्चमाभूदित्येवमर्थंपुत्रप्रतिच्छंदकान्मुनयआहुः १८० ७ ७

यइति यएतेक्षेत्रजादयोऽन्यबीजोत्पन्नाः पुत्रा औरसपुत्रप्रसंगेनोक्ताः तेयद्बीजोत्पन्नास्तस्यैवपुत्राभवंतिनक्षेत्रिकादेरितिसत्यौ
रसेपुत्रेपुत्रिकायांचसत्यांनतेकर्त्तव्याइत्येवंपरमिदंअन्यबीजजाइत्येकादशपुत्रोपलक्षणार्थंस्वबीजजातावपिपौनर्भवशौद्रौनक
र्त्तव्यौअतएवबृहस्पतिः आज्यंविनायथातैलंसद्भिःप्रतिनिधिःस्मृतः तथैकादशपुत्रास्तुपुत्रिकौरसयोर्विना १८१ भ्रातॄणा
मिति भ्रातॄणामेकमातापितृकाणांमध्येयद्येकःपुत्रवान्स्यात् अन्येचपुत्ररहितास्तदातेनैकपुत्रेणसर्वान्भ्रातॄन्सपुत्रान्मनु
राहततश्चतस्मिन्सतिअन्येपुत्रप्रतिनिधयोनकर्त्तव्याः सएवपिंडदोंशहरश्चभवतीत्यनेनोक्तंएतच्चपत्नीदुहितरश्चैवपितरौभ्रात
रस्तथा तत्सुताइतियाज्ञवल्क्यवचनाद्भ्रातृपर्यंताभावेबोद्धव्यः १८२ सर्वासामिति एकपतिकानांसर्वासांस्त्रीणांमध्येयद्येका
पुत्रवतीस्यात् तदातेनपुत्रेणसर्वास्ताःपुत्रयुक्तामनुराह १८३ श्रेयसइति औरसादीनांसर्वेषांपुत्राणांमध्येक्रमेणतत्त्वात् औरसादी

यएतेऽभिहिताःपुत्राःप्रसंगादन्यबीजजाः यस्यतेबीजतोजातास्तस्यतेनेतरस्यतु १८१ भ्रातॄणा
मेकजातानामेकश्चेत्पुत्रवान्भवेत् सर्वांस्तांस्तेनपुत्रेणपुत्रिणोमनुरब्रवीत् १८२ सर्वासामेकप
त्नीनामेकाचेत्पुत्रिणीभवेत् सर्वास्तास्तेनपुत्रेणप्राहपुत्रवतीर्मनुः १८३ श्रेयसःश्रेयसोलाभेपा
पीयान्रिक्थमर्हति बहवश्चेत्तुसदृशाःसर्वेरिक्थस्यभागिनः १८४ नभ्रातरोनपितरःपुत्रारिक्थह
राःपितुः पिताहरेदपुत्रस्यरिक्थंभ्रातरएवच १८५

नुपक्रम्यतेषांपूर्वःपूर्वःश्रेयान्सएवदायहरःसचान्यान्बिभृया
दितिविष्णुवचनात् औरसादीनांपुत्राणांपूर्वपूर्वाभावेपरःपररिक्थमर्हतिपूर्वसद्भावेपरसंवर्द्धनंसएवकुर्यात् एवंचासिद्धेशूद्रा
पुत्रस्यद्वादशपुत्रमध्येपाठः क्षेत्रजादिसद्भावेधनानर्हत्वज्ञापनार्थत्वेनसाधकः अन्यथातुक्षत्रियावैश्यापुत्रवदौरसत्वात् क्षेत्रजादि
सद्भावेपिधनंलभेतपूर्वस्यपरसंवर्द्धनमात्रंचापवादेतरविषयेद्रष्टव्यंक्षेत्रजगुणवद्दत्तकपुत्रयोः पंचमंषष्ठंवाभागंऔरसोदद्यादिति
विहितत्वात् यदितुसमानरूपाःपौनर्भवादयोबहवःपुत्रास्तदासर्वएवविभज्यरिक्थंगृण्हीयुः १८४ नेति नसोदरभ्रातरोन
पितरःकिंतुऔरसाभावेक्षेत्रजादयोगौणपुत्राःपितृरिक्थहराभवंतीतिअनेनोच्यतेऔरसस्यतुएकएवौरसःपुत्रइत्यनेनैवसि

-इत्वात् अविद्यमानमुख्यामुख्यपुत्रस्यपत्नीदुहितृरहितस्यत्वपिताधनंगृण्हीयात्तेषामभावेभ्रातरोधनंगृण्हीयुः एतच्चानंतरंप्रपंच यिष्यामः इदानींक्षेत्रजानामप्यपुत्रपितामहादिधनेप्यधिकारंदर्शयितुमाह १८५ त्रयाणामिति त्रयाणांपित्रादीनांउदकदानंका र्यंत्रिभ्यएवचतेभ्यःपिंडोदेयःचतुर्थस्यपिंडोदकयोर्दातापंचमस्यात्रसंबंधोनास्तितस्माद्युक्तोऽपुत्रपितामहादिधनेगौणपौत्राणाम- धिकारः औरसपुत्रपौत्रयोश्चपुत्रेणलोकान्जयतीत्यनेनैवात्रपितामहादिधनभागित्वमुक्तम् १८६ अनंतरइति अस्यसामान्यव- चनस्योक्तौरसादिसपिंडमात्रविषयत्वेवैयर्थ्यात्तत्रश्चानुक्तपत्न्यादिदायप्राप्त्यर्थमिदम् सपिंडमध्यात्सन्निकृष्टतरोयःसपिंडःपु- मान्स्त्रीवातस्यमृतधनंभवतितत्रैकएवौरसःपुत्रइत्युक्तत्वात्सएवमृतधनेस्वाधिकारीक्षेत्रजगुणवद्दत्तकयोस्तुयथोक्तंपंचमंषष्ठं वाभागंदद्यात्क्षेत्रजादिपुत्राणांसंवर्द्धनमात्रंकुर्यात् औरसाभावेपुत्रिकातत्पुत्रश्चदौहित्रएवचहरेदपुत्रस्याखिलंधनमित्युक्तत्वा दौरसपुत्ररहितएवतत्रापुत्रोविवक्षितःतदभावेक्षेत्रजादयएकादशपुत्राःक्रमेणपितृधनाधिकारिणः परिणीतशूद्रापुत्रस्तुदश मभागमात्राधिकारीनाधिकंदशमाद्द्यात्शूद्रापुत्रायेत्यायुक्तत्वात्दशमभागावशिष्टंधनंसन्निकृष्टसपिंडोगृण्हीयात्त्रयोदशवि

त्रयाणामुदकंकार्यंत्रिषुपिंडःप्रवर्त्तते चतुर्थःसंप्रदातैषांपंचमोनोपपद्यते १८५ अनंतरःसपिंडा द्यस्तस्यतस्यधनंभवेत् अतऊर्ध्वंसकुल्यःस्यादाचार्यःशिष्यएववा १८७

धपुत्राभावेपत्नीसर्वभर्तृधनभा गिनी यदाहयाज्ञवल्क्यः पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा तत्सुतोगोत्रजोबंधुःशिष्यस्सब्रह्मचारिणः एषामभावेपूर्वस्य धनभागुत्तरोत्तरः स्वर्यातस्यह्यपुत्रस्यसर्ववर्णेष्वयंविधिः बृहस्पतिरप्याह आम्नायेस्मृतितंत्रेचलोकाचारेचसूरिभिः शरीरार्द्धंस्मृ ताजायापुण्यापुण्यफलेसमा यस्यनोपरताभार्यादेहार्द्धंतस्यजीवतिजीवत्यर्द्धशरीरेतुकथमन्यःसमाप्नुयात् सकुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः अपुत्रस्यप्रमीतस्यपत्नीतद्भागहारिणी पूर्वप्रणीताग्निहोत्रंमृतेभर्त्तरितद्धनम् विंदेत्पतिव्रतानारीधर्मएष सनातनः जंगमंस्थावरंहेमकुप्यंधान्यमथांबरम् आदायदापयेच्छ्राद्धंमासषाण्मासिकादिकम् पितृव्यगुरुदौहित्रान्भर्तृस्व स्त्रीयमातुलान् पूजयेत्कव्यपूर्ताभ्यांवृद्धानाथातिथींस्त्रियः तत्सपिंडावांधवावायेतस्याःपरिपंथिनः हिंस्युर्धनानितान्राजा चौरदंडेनशासयेत् एवंमनुः अपुत्राशयनंभर्त्तुःपालयंतीव्रतेस्थिता पत्न्येवदद्यात्तत्पिंडंकृत्स्नमर्थंलभेतच यदुक्तम् स्त्रीणां

तुजीवनंदद्यादितिसंवर्द्धनमात्रवचनंतच्चशीलाधार्मिकसविकारयौवनस्थपत्नीविषयंअतोयन्मेधातिथिनापत्नीनामंशभागित्वं
निषिद्धमुक्तंतदसंबद्धम् पत्नीनामंशभागित्वंबृहस्पत्यादिसंमतम् मेधातिथिर्निराकुर्वन्नप्रीणातिसतांमनः पत्न्यभावेप्युत्रिका
दुहितातदभावेपितामाताचतयोरभावेसोदर्यभ्रातातदभावेतत्सुतः मातर्यपिचवृत्तायांपितुर्माताहरेद्धनंइतिवक्ष्यमाणत्वात्-
पितृमाता तदभावेअन्योपिसन्निकृष्टसपिंडोमृतधनंगृण्हीयात् तद्यथापितामहसंतानेऽविद्यमानेप्रपितामहसंतानएवतद-
प्युक्तम् अतऊर्ध्वंसपिंडसंतानाभावेसमानोदकआचार्यःशिष्यश्चक्रमेणधनंगृण्हीयात् १८७ सर्वेषामिति एषामभावइति
वक्तव्येसर्वेषामभावइतियदुक्तंतत्सब्रह्मचार्यादेरपिधनहारित्वार्थंसर्वेषामभावेब्राह्मणावेदत्रयाध्यायिनोबाह्यांतरशौचयुक्ता
जितेंद्रियाधनहारिणोभवंतितएवचपिंडदाःतथासतिधनिनोमृतस्यश्राद्धादिधर्महानिर्नभवति १८८ अहार्य्यमिति ब्राह्म
णसंबंधिधनंनराज्ञाकदाचिद्ग्राह्यमितिशास्त्रमर्यादा किंतूक्तलक्षणाभावेब्राह्मणमात्रेभ्योपिदेयं क्षत्रियादिधनंपुनःपूर्वोक्तऋक्थ

सर्वेषामप्यभावेतुब्राह्मणाऋक्थभागिनः त्रैविद्याःशुचयोदांतास्तथाधर्मोनहीयते १८८ अ
हार्य्यंब्राह्मणद्रव्यंराज्ञानित्यमितिस्थितिः इतरेषांतुवर्णानांसर्वाभावेहरेन्नृपः १८९ संस्थितस्या
नपत्यस्यसगोत्रात्पुत्रमाहरेत् तत्रयदृक्थजातंस्यात्तत्तस्मिन्प्रतिपादयेत् १९० द्वौतुयौविवदेया-
तांद्वाभ्यांजातौस्त्रियाधने तयोर्यद्यस्यपित्र्यंस्यात्तत्सगृण्हीतनेतरः १९१

हराभावेराजागृण्हीयात् १८९ सं
स्थितेति अनपत्यस्यमृतस्यभार्यासमानगोत्रात्पुंसोगुरुनियुक्तासतीनियोगधर्मेणपुत्रमुत्पादयेत्तस्मिन्मृतविषयेयत्
धनजातंभवेत्तत्तस्मिन्पुत्रेसमर्पयेत् देवराद्वासपिंडाद्वाइत्युक्तत्वात् सगोत्रान्नियोगप्राप्त्यर्थंतज्जन्यऋक्थभागित्वार्थमिदम्
१९० द्वाविति यद्येकऋक्थिनौस्यातामित्यौरसक्षेत्रजयोरुक्तमिदंत्वौरसपौनर्भवविषयंयदौरसभर्त्तुर्मृतत्वात्बालाप
त्यतयास्वामिधनंस्वीकृत्यपौनर्भवभर्त्तुःसकाशात्पुत्रांतरंजनयेत्तस्यापिचपौनर्भवस्यभर्त्तुर्मृतत्वात्ऋक्थहराभावात्धनंगृह
तवतीपश्चात्तौद्वाभ्यांजातौयदिविवदेयातांस्त्रीहस्तगतधनेतयोर्यस्ययज्जनकस्यधनंसतदेवगृण्हीयात्नत्वन्यपितृजोन्यज
नकस्य १९१ जनन्यामिति मातरिमृतायांसोदर्याभ्रातरोभगिन्यश्चसोदर्याअनूढामातृधनंसमंकृत्वागृण्हीयुःऊढास्तुधनानु-

रूपंसंमानंलभंते तदाहवृहस्पतिः स्त्रीधनंस्यादपत्यानांदुहिताचतदंशिनी अपुत्राचेत्समूढातुलभतेमानमात्रकम् तत
श्चानूढानांपितृधनइवोढानांमातृधनंभ्रात्रास्वाच्चतुर्थभागोदेयः १९२ याइति तासांदुहितॄणांयाअनूढादुहितरःताभ्योपि
तामहीधनाद्यथातासांपूजाभवतितथाप्रीत्याकिंचिद्दातव्यम् १९३ अध्येति अध्यग्नीत्यव्ययंविभक्तिसमीपेत्यादिनासू
त्रेणसमीपार्थेअव्ययीभावःविवाहकालेअग्निसन्निधौयत्पित्रादिदत्तंतदध्यग्निस्त्रीधनंतदाहकात्यायनः विवाहकालेयत्स्त्री
भ्योदीयतेह्यग्निसन्निधौ तदध्यग्निकृतंसद्भिःस्त्रीधनंपरिकीर्तितम् यत्तुपितृगृहाद्भर्तृगृहंनीयमानयालब्धंतदध्यावाह
निकम् तथाचकात्यायनः यत्पुनर्लभतेनारीनीयमानातुपैतृकात् अध्यावाहनिकन्नामतत्स्त्रीधनमुदाहृतम् यत्तुप्रीति-

जनन्यांसंस्थितायांतुसमंसर्वेसहोदराः भजेरन्मातृकंरिक्थंभगिन्यश्चसनाभयः १९२ यास्ता
सांस्युर्दुहितरस्तासामपियथार्हतः मातामह्याधनात्किंचित्प्रदेयंप्रीतिपूर्वकम् १९३ अध्यग्न्य
ध्यावाहनिकंदत्तंचप्रीतिकर्मणि भ्रातृमातृपितृप्राप्तंषड्विधंस्त्रीधनंस्मृतम् १९४ अन्वाधेयंच
यद्दत्तंपत्याप्रीतेनचैवयत् पत्यौजीवतिवृत्तायाःप्रजायास्तद्धनंभवेत् १९५ ब्राह्मदैवार्षगांधर्व
प्राजापत्येषुयद्वसु अप्रजायामतीतायांभर्तुरेवतदिष्यते १९६ यत्त्वस्याःस्याद्धनंदत्तंविवा
हेष्वासुरादिषु अप्रजायामतीतायांमातापित्रोस्तदिष्यते १९७

हेतुकर्मणिभर्त्रादिदत्तंतथाभ्रात्रापि
त्रसमयांतरेयद्दत्तंएवंषट्प्रकारकंस्त्रीधनंस्मृतम् १९४ अन्वेति अन्वाधेयंव्याख्यातकात्यायनेन विवाहात्परतोयत्तुलब्धं
भर्तृकुलेस्त्रिया अन्वाधेयंतदुक्तंतुसर्वबंधुकुलेतथा विवाहादूर्ध्वंभर्तृकुलेपितृकुलेवायत्स्त्रियालब्धंभर्त्राचप्रीतेनद
त्तंयत् अध्यग्न्यादिपूर्वश्लोकेउक्तंतद्भर्तरिजीवतिमृतायाःस्त्रियाःसर्वधनंतदपत्यानांभवति १९५ ब्राह्मेति ब्राह्मादिषुपं
चसुविवाहेषूक्तलक्षणेषुयत्स्त्रियःषड्विधंधनंतदनपत्यायांमृतायांभर्तुरेवमन्वादिभिरिष्यते १९६ यदिति यत्पुनःस्त्रिया
आसुरराक्षसपैशाचेषूक्तलक्षणेषुयत्स्त्रियाःषड्विधधनमपितदनपत्यायांमृतायांमातापित्रोरिष्यते १९७ ७ ७

स्त्रियामिति ब्राह्मणस्यनानाजातीयासुस्त्रीषु क्षत्रियादिस्त्रियामनपत्यपतिकायांमृतायांतस्याः पित्रादत्तंधनंसजातिविजातिसापत्न्य
कन्यापुत्रसद्भावेपिब्राह्मणीसापत्न्येयीकन्यागृह्णीयात्तदभावेतदपत्यस्यतद्धनंभवेत् १९८ नेति भ्रात्रादिबहुसाधारणात्कुटुंबध
नात्भार्यादिभिःस्त्रीभीरत्नालंकाराद्यर्थंधनसंचयनन्नकर्त्तव्यन्चापिचभर्त्तुराज्ञांविनाभर्त्तृधनादपिकार्यंततश्चनेदंस्त्रीधनम् १९९
पत्याविति भर्त्तरिजीवतितत्संमताभिर्योऽलंकारःस्त्रीभिर्धृतःतस्मिन्मृतेविभागकालेतंपुत्रादयोनभजेरन् भजमानाःपापिनो
भवंति २०० अनंशाविति नपुंसकपतितजात्यंधश्रोत्रविकलोन्मत्तजडमूकाश्चयेचकुणिपंग्वादयोविकलेंद्रियास्तेपित्रादिधनहरान
भवंति किंतुग्रासाच्छादनभागिनस्तदेवाह २०१ सर्वेषामिति सर्वेषामेषांक्लीबादीनांशास्त्रज्ञेनऋक्थहारिणायावज्जी

स्त्रियांतुयद्भवेद्वित्तंपित्रादत्तंकथंचन ब्राह्मणीतद्धरेत्कन्यातदपत्यस्यवाभवेत् १९८ ननिर्हारंस्त्रि
यःकुर्युःकुटुंबाद्बहुमध्यगात् स्वकादपिचवित्ताद्धिस्वस्यभर्त्तुरनाज्ञया १९९ पत्यौजीवतियःस्त्रीभि
रलंकारोधृतोभवेत् नतंभजेरन्दायादाभजमानाःपतंतिते २०० अनंशौक्लीबपतितौजात्यंधबधि
रौतथा उन्मत्तजडमूकाश्चयेचकेचिन्निरिंद्रियाः २०१ सर्वेषामपितुन्याय्यंदातुंशक्त्यामनीषिणा
ग्रासाच्छादनमत्यंतंपतितोह्यददद्भवेत् २०२ यद्यर्थितातुदारैःस्यात्क्लीबादीनांकथंचन तेषा
मुत्पन्नतंतूनामपत्यंदायमर्हति २०३ यत्किंचित्पितरिप्रेतेधनंज्येष्ठोधिगच्छति भागोयवीयसांत
त्रयदिविद्यानुपालिनः २०४ अविद्यानांतुसर्वेषामीहातश्चेद्धनंभवेत् समस्तत्रविभागःस्यादपि
त्र्यइतिधारणा २०५

ग्रासाच्छादनंदेयंअददतापीस्यात् २०२ यदिति कथंचनेत्यभिधानात्क्लीबादयोविवाहानर्हाइ
सूचितंयदिकथंचिदेषांविवाहेच्छाभवेत्तदाक्लीबस्यक्षेत्रजउत्पन्नेअन्येषामुत्पन्नापत्यानामपत्यंधनभाग्भवति २०३ यत्किं
चिदिति पितरिमृतेसतिभ्रातृभिःसहाविभक्तोज्येष्ठःकिंचित्स्वेनपौरुषेणधनंलभतेततोधनात्विद्याभ्यासवतांकनिष्ठभ्रातृणां
भागोभवतिनेतरेषाम् २०४ अविद्यानामिति सर्वेषांभ्रातृणांकृषिवाणिज्यादिचेष्टयायदिधनंस्यात्तदापित्र्यवर्जितेतस्मिन्

धनैस्त्वार्जितेसमोविभागःस्यान्नतूद्धारःआपित्र्यइतिनिश्चयः २०५ विद्येति विद्यामैत्रीविवाहार्जितंमाधुपर्किकंमधुपर्के
ऽपूज्यतयायल्लब्धंतस्यैवतत्स्यात्यत्किंचित्पितरीत्यस्यायमपवादः विद्याधनंचव्याहृतंकात्यायनेन परभक्तप्रदानेनप्राप्ता
विद्यायदान्यतः तयाप्राप्तंचविधिनाविद्याप्राप्तंतदुच्यते उपन्यस्तेचयल्लब्धंविद्ययापणपूर्वकम् विद्याधनंतुतद्विद्याद्विभागे
नविभज्यते शिष्यादार्त्विज्यतःप्रश्नात्संदिग्धप्रश्ननिर्णयात् अज्ञानशंसनाद्वादाल्लब्धंप्राज्यधनाच्चयत् विद्याधनंतुतत्प्राहु
र्विभागेनविभज्यते अतोयन्मेधातिथिगोविंदराजाभ्यांमाधुपर्किकमार्त्विज्यधनंव्याख्यातंतदयुक्तम् विद्याधनत्वात् २०६ भ्रा
तॄणामिति राजानुगमनादिकर्मणायोधनमर्जितुंशक्तोभ्रातॄणांसाधारणंधनंनेच्छतिसस्वीयादंशात्किंचिदुपजीवनंदत्वाभ्रा
तृभिःपृथक्कार्यःतेनतत्पुत्रास्तत्रधनेकालांतरेनविवदंते २०७ अनुपघ्नन्निति पितृधनानुपघातेनयत्कृष्यादिक्लेशादर्जयेत्

विद्याधनंतुयद्यस्यतत्तस्यैवधनंभवेत् मैत्र्यमौद्वाहिकंचैवमाधुपर्किकमेवच २०६ भ्रातॄणांय
स्त्वनीहेतधनंशक्तःस्वकर्मणा सनिर्भाज्यःस्वकादंशात्किंचिद्दत्वोपजीवनम् २०७ अनुपघ्नन्
पितृद्रव्यंश्रमेणयदुपार्जितम् स्वयमीहितलब्धंतन्नाकामोदातुमर्हति २०८ पैतृकंतुपितार्द्र
व्यमनवाप्तंयदाप्नुयात् नतत्पुत्रैर्भजेत्सार्द्धमकामःस्वयमर्जितम् २०९ विभक्ताःसहजीवंतो-
विभजेरन्पुनर्यदि समस्तत्रविभागःस्याज्ज्यैष्ठ्यंतत्रनविद्यते २१० येषांज्येष्ठःकनिष्ठोवाहीयेतांश
प्रदानतः म्रियेतान्यतरोवापितस्यभागोनलुप्यते २११ सोदर्याविभजेरंस्तंसमेत्यसहिताःसमम्
भ्रातरोयेचसंसृष्टाभगिन्यश्चसनाभयः २१२

तत्स्वेच्छयाप्रासमानिच्छन्भ्रातृभ्योदातुंनार्हति २०८ पैतृकमिति य
त्तुनःपितृसंबंधिधनंतेनासामर्थ्येनोपेक्षितत्वादनवाप्तंपुत्रःशक्त्याप्राप्नुयात्तत्स्वयमर्जितमनिच्छन्पुत्रैःसहनविभजेत् २०९ विभ
क्ताइति पूर्वंसोद्धारंनिरुद्धारंवाविभक्ताभ्रातरःपश्चादेकीकृत्यधनंसहजीवंतोयदिपुनर्विभागंकुर्वंतितदातत्रसमोविभागःज्ये
ष्ठस्योद्धारोनदेयः २१० येषामिति येषांभ्रातॄणांमध्येकश्चिद्विभागकालेप्रव्रज्यादिनास्वांशाद्धीयेत्मृतोवाभवेत्तस्य भागोनलुप्येत्
किंतु २११ सोदर्याइत्यादि सोदर्याभ्रातरःसमागम्यसहिताःभगिन्यश्चसोदर्यास्तमंशंसमंकृत्वाविभजेरन्सोदर्याणांसापत्न्या

नामपिमध्यात्त्वमिश्रीकृतधनत्वेनैकयोगक्षेमास्तेविभजेयुःसमंसर्वेसोदर्याःसपत्न्यावाएतच्चपुत्रपत्नीपितृमात्रभावेद्रष्टव्यम्
२१२ योज्येष्ठइति योज्येष्ठोभ्रातालोभात्कनीयसोभ्रातॄन्वंचयेत्सज्येष्ठभ्रातृपूजाशून्यःसोद्धारभागरहितश्चराजदंड्यश्चस्यात्
२१३ सर्वएवेति अपतिताअपियेभ्रातरोद्यूतवेश्यासेवादिविकर्मासक्तास्तेभ्रस्थंनार्हंतिनचकनिष्ठेभ्योऽनुकल्प्यज्येष्ठः
धनादात्मार्थमसाधारणधनंकुर्यात् २१४ भ्रातॄणामिति भ्रातॄणांपित्रासहावस्थितानांअविभक्तानांयदिसहधनार्जनार्थमुत्थानं
भवेत्तदाविभागकालेनकस्यचित्पुत्रस्याधिकंपिताकदाचिद्दद्यात् २१५ ऊर्ध्वमिति यदाजीवतैवपित्रापुत्राणामिच्छयाविभागःकृ
तः तदाविभागादूर्ध्वंजातःपुत्रःपितरिमृतेपितृऋक्थमेवगृण्हीयात् येकृतविभागाःपित्रासहपुनर्मिश्रीकृतधनास्तैःसहासोपितरि

योज्येष्ठोविनिकुर्वीतलोभाद्भ्रातॄन्यवीयसः सोज्येष्ठःस्यादभागश्चनियंतव्यश्चराजभिः २१३ स
र्वएवविकर्मस्थानार्हंतिभ्रातरोधनम् नचादत्त्वाकनिष्ठेभ्योज्येष्ठःकुर्वीतयौतकम् २१४ भ्रातॄणा
मविभक्तानांयद्युत्थानंभवेत्सह नपुत्रभागंविषमंपितादद्यात्कथंचन २१५ ऊर्ध्वंविभागाज्जात
स्तुपित्र्यमेवहरेद्धनम् संसृष्टास्तेनवायेस्युर्विभजेतसतैःसह २१६ अनपत्यस्यपुत्रस्यमातादायम
वाप्नुयात् मातर्यपिचवृत्तायांपितुर्माताहरेद्धनम् २१७ ऋणेधनेचसर्वस्मिन्प्रविभक्तेयथावि
धि पश्चाद्दृश्येतयत्किंचित्तत्सर्वंसमतांनयेत् २१८ वस्त्रंपत्रमलंकारंकृतान्नमुदकंस्त्रियः योग
क्षेमंप्रचारंचनविभाज्यंप्रचक्षते २१९

मृतेविभजेत् २१६ अनपत्येति अनपत्यस्यपुत्रस्यधनंमातागृण्हीयात्पूर्वंपिता
हरेदपुत्रस्यऋक्थमित्युक्तत्वात् इहमाताहरेदित्यादियाज्ञवल्क्येनपितरावित्येकशेषकरणात् विष्णुनाचअपुत्रस्यधनंपत्न्यभिगा
मितदभावेदुहितृगामितदभावेपितृगामीत्येकशेषस्यैवकृतत्वात् मातापितरौविभज्यगृण्हीयाताम् मातरिमृतायांपत्नीपितृभ्र
तृभ्रातृजाभावेपितुर्माताधनंगृण्हीयात् २१७ ऋणइति ऋणेपित्रादिधार्यमाणेधनेचदेयेसर्वस्मिन्यथाशास्त्रंविभक्तेसतिप
श्चात्किंचित्पैतृकंऋणंधनंवाविभागकालेऽज्ञातमुपलभ्येततत्सर्वंसमंकृत्वाविभजनीयंनतुशोध्यंभ्रात्रन्नवाज्येष्ठस्योद्धारोदेयः२१८
वस्त्रमिति वस्त्रंवाहनमाभरणंअविभागकालेयद्येनोपभुक्तंतत्तस्यैवनविभाज्यंएतच्चनातिन्यूनाधिकमूल्यविषयंयत्तुबहुमूल्य

मामरणादिकंतद्विभाज्यमेवतद्विषयमेवविक्रीयवस्त्राभरणमिति बृहस्पतेर्विभागवचनं कृतान्नमोदनसक्त्वादितन्नविभजनीयं तथातिमत्तुरतरमूल्यंसक्त्वादितावन्मात्रमूल्यधनेनकृतान्नंचाकृतान्नेनपरिवर्त्यविभज्यतइतिबृहस्पतिवचनाद्विभजनीयमेवउदकंकूपादिगतंसर्वैरुपभोग्यमविभजनीयम् स्त्रियोदास्याद्यायाःकल्यभागानभवंतितानविभाज्याःकिंतुतुल्यंकर्मकारयितव्याः योगक्षेमंमंत्रिपुरोहितादियोगक्षेमहेतुत्वात्प्रचारोगवादीनांप्रचारमार्गःएतत्सर्वंमन्वादयोऽविभाज्यमाहुः २१९ अयमिति एषदायभागःपुत्राणांक्षेत्रजादीनांक्रमेणविभागकरणप्रकारोयुष्माकमुक्तः इदानींद्यूतव्यवस्थांशृणुत २२० द्यूतमिति द्यूतसमाह्वयौवक्ष्यमाणलक्षणौराजास्वराष्ट्रान्निवर्त्तयेत्यस्मादेतौद्वौदोषौराज्ञांविनाशकारिणौ २२१ प्रकाशमिति प्रकटमेतच्चौर्यंयत् द्यूतसमाह्वयौतस्मात्तन्निवारणेराजानित्यंयत्नयुक्तःस्यात् २२२ अप्राणीति अक्षकुशलादिभिरप्राणैर्यत्क्रियतेतल्लोकेद्यूतंकथ्यते यः

अयमुक्तोविभागोवःपुत्राणांचक्रियाविधिः क्रमशःक्षेत्रजादीनांद्यूतधर्मंनिबोधत २२० द्यूतंसमाह्वयंचैवराजाराष्ट्रान्निवारयेत् राजान्तकरणावेतौद्वौदोषौपृथिवीक्षिताम् २२१ प्रकाशमेततास्कर्यंयद्देवनसमाह्वयौ तयोर्नित्यंप्रतीघातेनृपतिर्यत्नवान्भवेत् २२२ अप्राणिभिर्यत्क्रियतेतल्लोकेद्यूतमुच्यते प्राणिभिःक्रियतेयस्तुसविज्ञेयःसमाह्वयः २२३ द्यूतंसमाह्वयंचैवयःकुर्यात्कारयेतवा तान्सर्वान्घातयेद्राजाशूद्रांश्चद्विजलिंगिनः २२४ कितवान्कुशीलवान्क्रूरान्पाषंडस्थांश्चमानवान् विकर्मस्थान्शौंडिकांश्चक्षिप्रंनिर्वासयेत्पुरात् २२५

पुनःप्राणिभिःमेषकुक्कुटादिभिःपणपूर्वकंक्रियतेससमाह्वयोज्ञेयः लोकप्रसिद्धयोरप्यनयोर्लक्षणकथनंपरिहारार्थम् २२३ द्यूतमिति द्यूतसमाह्वयौयःकुर्यात्योवासभिकःकारयेत्तेषामपराधापेक्षयाराजाहस्तच्छेदादिवधंकुर्यात् यज्ञोपवीतादिद्विजचिन्हधारिणःशूद्रान्हन्यात् २२४ कितवेति द्यूतादिसेविनोनर्त्तकगायनान्वेदविद्विषःश्रुतिस्मृतिबाह्यव्रतधारिणअनापदिपरकर्मजीविनःशौंडिकान्मद्यपान्मनुष्यान्क्षिप्रंराजाराष्ट्रान्निर्वासयेदितिकितवप्रसंगेनान्येषामप्यभिधानमत्रहेतुमाह २२५

एतइति एतेकितवादयोगूढचौराराज्ञोराष्ट्रेवसंतोनित्यंवंचनार्थकक्रिययासज्जनान्पीडयंति २२६ द्यूतमिति नेदानीमेवपरंकिंतु
पूर्वस्मिन्नपिकल्पेद्यूतमेतदतिशयेनवैरकरंदृष्टं अतःप्राज्ञःपरिहासार्थमपितन्नसेवेत २२७ प्रच्छन्नमिति योमनुष्यःतत्द्यूतं
गूढंप्रकटंवाकृत्वासेवेततस्ययथानृपतेरिच्छाभवतितथाविधोदंडोभवति इदानींपराजितानांधनाभावेसतीदमाह २२८ क्षत्रेति
क्षत्रवैश्यशूद्रजातीयोनिर्धनत्वेनदंडंदातुमसमर्थःतदुचितकर्मकरणेनदंडशोधनंकुर्यात् ब्राह्मणःपुनःयथालाभंक्रमेणदद्या
न्नकर्मकारयितव्यः २२९ स्त्रीति स्त्रीबालादीनांपुनःशिफावेणुदलप्रहाररज्जुबंधनादिभिर्दमनंराजाकुर्यात् २३० येनियुक्तास्त्वि
ति येव्यवहारावेक्षणादिषुकार्येषुराज्ञानियुक्ताउत्कोचधनतेजसाधिकारंलभंतःस्वाम्यादीनांकार्यंनाशयेयुः तान्गृहीतसर्वस्वा

एतेराष्ट्रेवर्त्तमानाराज्ञःप्रच्छन्नतस्कराः विकर्मक्रिययानित्यंबाधंतेभद्रिकाःप्रजाः २२६ द्यूतमेत-
त्पुराकल्पेदृष्टंवैरकरंमहत् तस्माद्द्यूतंनसेवेतहास्यार्थमपिबुद्धिमान् २२७ प्रच्छन्नंवाप्रकाशंवा
तन्निषेवेतयोनरः तस्यदंडविकल्पःस्याद्यथेष्टंनृपतेस्तथा २२८ क्षत्रविट्शूद्रयोनिस्तुदंडंदातुम
शक्नुवन् आनृण्यंकर्मणागच्छेद्विप्रोदद्याच्छनैःशनैः २२९ स्त्रीबालोन्मत्तवृद्धानांदरिद्राणांचरो-
गिणाम् शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमम् २३० येनियुक्तास्तुकार्येषुहन्युःकार्याणिका
र्यिणाम् धनोष्मणापच्यमानास्तान्निस्स्वान्कारयेन्नृपः २३१ कूटशासनकर्तॄंश्चप्रकृतीनांचदूषकान्
स्त्रीबालब्राह्मणघ्नांश्चहन्याद्द्विट्सेविनस्तथा २३२ तीरितंचानुशिष्टंचयत्रक्वचनयद्भवेत् कृतंत
द्धर्मतोविद्यान्नतद्भूयोनिवर्त्तयेत् २३३

न्राजाकारयेत् २३१ कूटेति कूटराजाज्ञालेखकान्अमात्यानांचभेदकान्
स्त्रीबालब्राह्मणघातिनःशत्रुसेविनश्चराजाहन्यात् २३२ तीरितमिति यत्रक्वचिदृणादानादिव्यवहारेयत्कार्यंधर्मतस्तीरितंपार-
तीरकर्मसमाप्तावितिचुरादौपठ्यतेशास्त्रव्यवस्यानिर्णीयते अनुशिष्टंदंडपर्यंततांचनीतंस्यात् तत्कृतंसंगीकुर्यात्नपुनर्निवर्त्तये
त्एतच्चाकारणात् अतःकारणकृतंविवर्त्तयेदेव २३३ अमात्याइति राजामात्याःप्राड्विवाकोवाव्यवहारेक्षणेनियुक्तोयदसम्य

ग्व्यवहारनिर्णयंकुर्युःतत्स्वयंराजाकुर्यात्पणसहस्रंतान्दंडयेत्इदंचोत्कोचधनग्रहणेतरविषयंउत्कोचग्रहणेयेनियुक्तास्त्वित्य
कस्मात् २३४ ब्रह्महेति योमनुष्योब्राह्मणंहतवान्सब्रह्महासुरापोद्विजातिःपैष्ट्याःपाताब्राह्मणश्चपैष्टीमाध्वीगौडीनांतस्करो
ब्राह्मणसुवर्णहारीमनुष्यःकश्चिद्गुरुपत्नीगामीत्येतेसर्वेप्रत्येकंमहापातकिनोबोद्धव्याः २३५ चतुर्णामिति चतुर्णामप्येषांम-
हापातकिनांप्रायश्चित्तमकुर्वतांशारीरंधनग्रहणेनचधनसंबंधंअपराधानुसारेणधर्मादनपेतंवक्ष्यमाणंदंडंकुर्यात् २३६ गुरु
तल्पइति नांक्याराज्ञाललाटेस्युःइतिवक्ष्यमाणत्वात्ललाटमेवांकनस्थानमवगम्यतेतत्रगुरुपत्नीगमनेयावज्जीवस्थायितप्त
लोहेनललाटेभगाकृतिंगुरुपत्नीगमनचिन्हंकार्यंएवंसुरापानेकृतेपातुर्द्दीर्घंसुराध्वजाकारंसुवर्णापहारेसत्यपहर्त्तुःकुक्कुरपा

अमात्याःप्राड्विवाकोवायत्कुर्युःकार्यमन्यथा तत्स्वयंनृपतिःकुर्यात्तान्सहस्रंचदंडयेत् २३४ ब्र
ह्महाचसुरापश्चस्तेयीचगुरुतल्पगः एतेसर्वेपृथक्ज्ञेयामहापातकिनोनराः २३५ चतुर्णामपिचै
तेषांप्रायश्चित्तमकुर्वताम् शारीरंधनसंयुक्तंदंडंधर्म्यंप्रकल्पयेत् २३६ गुरुतल्पेभगःकार्यःसुरा
पानेसुराध्वजः स्तेयेचश्वपदंकार्यंब्रह्महण्यशिराःपुमान् २३७ असंभोज्याह्यसंयाज्याअसंपा-
ठ्याविवाहिनः चरेयुःपृथिवींदीनाःसर्वधर्मबहिष्कृताः २३८ ज्ञातिसंबंधिभिस्त्वेतेत्यक्तव्याःकृत
लक्षणाः निर्दयानिर्नमस्कारास्तन्मनोरनुशासनम् २३९ प्रायश्चित्तंतुकुर्वाणाःसर्ववर्णायथोदि
तम् नांक्याराज्ञाललाटेस्युर्दाप्यास्तूत्तमसाहसम् २४०

दरूपंकार्यंब्रह्महणिकबंधःपुमान्कर्त्तव्यः २३७ असं
भोज्याइति अन्नादिकंनैतेभोजयितव्याःनचैतेयाजनीयाःनाप्येतेअध्यापनीयानाप्येतैःकन्यादानसंबंधःकर्त्तव्यःएतेचनिर्द्धन
त्वात्याचनादिभ्योप्यमुक्ताःसर्वश्रौतादिकर्मवर्जिताःपृथिवींपर्यटेयुः २३८ ज्ञातीति ज्ञातिभिःसंबंधिभिर्मातुलाद्यैरेतेकृतां
कास्त्यजनीयाःनचैषांदयाकार्यानाप्येतेनमस्कार्याइतीयंमनोराज्ञा २३९ प्रायश्चित्तमिति शास्त्रविहितंप्रायश्चित्तंपुनःकुर्वा
णाब्राह्मणादयस्त्रयोवर्णाराज्ञाललाटेअंकनीयानभवेयुःउत्तमसाहसंपुनर्दंडनीयाः २४०

आगइति इतरे कृतवंतस्त्विस्युत्तरश्लोके श्रूयमाणमकामतइतिचात्रापियोजनीयं तेनाकामतइतिएष्वपराधेषुगुणवतोब्राह्मणस्य मध्यमसाहसोदंडःकार्यः पूर्वोक्तस्तूत्तमसाहसोनिर्गुणस्यद्रष्टव्यः कामतस्तेष्वपराधेषुधनधान्यादिपरिच्छदसहितोब्राह्मणोदेशान्निर्वास्यः २४१ इतरइति ब्राह्मणादन्येपुनः क्षत्रियादयः एतानिपापानिअनिच्छंतः कृतवंतःसर्वस्वहरणमर्हंतिइदंचसर्वस्वहरणंपूर्वोक्तेनोत्तमसाहसेनवृत्तसपेक्षयाव्यवस्थापनीयंइच्छयापुनरेषामेतेष्वपराधेषुप्रवासनंवधोर्हतिप्रवासनंप्रशासनन्निसूदनंहिंसनमितिवधपर्यायंप्रवासनशब्दंपठंत्याभिधानिकाः २४२ नाददीतेति धार्मिकोराजामहापातकसंबंधिधनंनगृण्हीयान्लोभात्पुनःसंगृण्हन्महापातकदोषेणसंसृज्यतेकातर्हिदत्तधनस्यप्रतिपत्तिरित्येतदर्थमाह २४३ अप्स्विति तद्दंडधनंनद्यादिजलेप्रक्षि

आगःस्वब्राह्मणस्यैवकार्योमध्यमसाहसः विवास्योवाभवेद्राष्ट्रात्सद्रव्यःसपरिच्छदः २४१ इतरे कृतवंतस्तुपापान्येतान्यकामतः सर्वस्वहारमर्हंतिकामतस्तुप्रवासनम् २४२ नाददीतनृपःसाधुर्महापातकिनोधनम् आददानस्तुतल्लोभात्तेनदोषेणलिप्यते २४३ अप्सुप्रवेश्यतंदंडंवरुणायोपपादयेत् श्रुतवृत्तोपपन्नेवाब्राह्मणेप्रतिपादयेत् २४४ ईशोदंडस्यवरुणोराज्ञांदंडधरोहिसः ईशःसर्वस्यजगतोब्राह्मणोवेदपारगः २४५ यत्रवर्जयतेराजापापकृद्भ्योधनागमम् तत्रकालेनजायंतेमानवादीर्घजीविनः २४६ निष्पद्यंतेचसस्यानियथोप्तानिविशांपृथक् बालाश्चनप्रमीयंतेविकृतंनचजायते २४७

पेद्वरुणायदद्यात्श्रुतसंपन्नब्राह्मणायवादद्यात् २४४ ईशइति महापातकिदंडधनस्यवरुणःस्वामीयस्माद्राज्ञामपिदंडधारित्वात्प्रभुः तथाब्राह्मणःसमस्तवेदाध्यायीसर्वस्यजगतःप्रभुः अतःप्रभुत्वात्तौदंडधनमर्हतः २४५ यत्रेति निष्पद्यंतइति यत्रदेशेप्रकृतंमहापातकिधनंराजानगृण्हातितत्रपरिपूर्णेनकालेनमनुष्याउत्पद्यंतेदीर्घायुषश्चभवंति वैश्यानांचयथैवधान्यादिसस्यान्युप्तानितथैवपृथक्पृथक्जायंतेअकालेनवालाम्रियंतेदीर्घजीविनइत्युक्तेप्याद्यर्थंबालानांपुनर्वचनंव्यंगंचनकिंचिद्भूतमुत्पद्यते २४६ २४७ ब्राह्मणानिति शरीरपीडाधनग्रहणादिनाशूद्रमिच्छातोब्राह्मणान्बाधमा-

नंछेदादिभिरुद्वेगकरैर्वधोपायैर्न्नृपोहन्यात् २४८ यावानिति अवध्यस्यवधेयावानधर्मोनृपतेः शास्त्रेणज्ञातः तावानेववध्यस्य
त्यागेपियथाशास्त्रंदंडंतुकुर्वतोधर्मः स्यात्तस्मात्तंकुर्यात् २४९ उदितइति अष्टादशऋणादानादिषुव्यवहारपदेषुपरस्परंविवदमा
नयोरर्थिप्रत्यर्थिनोः कार्यनिर्णयोयंविस्तरेणोक्तः २५० एवमिति अनेनोक्तप्रकारेणधर्मादनपेतान् निर्णयंकुर्वन्राजाजनानुरा
गात् देशान्लब्धुमिच्छेत्लब्धांश्चसम्यक्पालयेत्एवंसम्यग्व्यवहारलब्धप्रदेशामास्यर्थमुक्तम् २५१ सम्यगिति जांगलंसस्यसं
पन्नइत्युक्तरीत्यासम्यगाश्रितदेशस्तत्रसप्तमाध्यायोक्तप्रकारेण कृतदुर्गश्चौरसाहसिकादिकंटकनिराकरणेप्रकृष्टयत्नंसदाकुर्यात्

ब्राह्मणान्बाधमानंतुकामादवरवर्णजम् हन्याच्चित्रैर्वधोपायैरुद्वेजनकरैर्न्नृपः २४८ यावानवध्य
स्यवधेतावान्वध्यस्यमोक्षणे अधर्मोनृपतेर्दृष्टोधर्मस्तुविनियच्छतः २४९ उदितोयंविस्तरशोमिथो
विवदमानयोः अष्टादशसुमार्गेषुव्यवहारस्यनिर्णयः २५० एवंधर्म्याणिकार्याणिसम्यक्कुर्वन्महीप
तिः देशानलब्धाल्लिप्सेतलब्धांश्चपरिपालयेत् २५१ सम्यङ्निविष्टदेशस्तुकृतदुर्गश्चशास्त्रतः कंट
कोद्धरणेनित्यमातिष्ठेद्यत्नमुत्तमम् २५२ रक्षणादार्यवृत्तानांकंटकानांचशोधनात् नरेंद्रास्त्रिदिवंयां
तिप्रजापालनतत्पराः २५३ अशासंस्तस्करान्यस्तुबलिंगृण्हातिपार्थिवः तस्यप्रक्षुभ्यतेराष्ट्रंस्वर्गा
च्चपरिहीयते २५४ निर्भयंतुभवेद्यस्यराष्ट्रंबाहुबलाश्रितम् तस्यतद्वर्द्धतेनित्यंसिच्यमानइवद्रुमः
२५५ द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान् प्रकाशांश्चाप्रकाशांश्चचारचक्षुर्महीपतिः २५६

२५२ रक्षणादिति यस्मात्साध्वाचाराणांरक्षणाच्चौरादीनांचशासनात्प्रजापालनयुक्ताराजानःस्वर्गंगच्छंति तस्मात्कंटकोद्धरणेय
त्नंकुर्यात् २५३ अशासन्निति यथापुनर्नृपतिश्चौरादीननिराकुर्वन्षड्भागाद्युक्तंकरंगृण्हातितस्येराष्ट्रवासिनोजनाःकुप्यंतिक
र्मांतरार्जिताप्यस्यस्वर्गप्राप्तिरनेनदुष्कृतेनप्रतिबध्यते २५४ निर्भयमिति यस्यराज्ञोबाहुवीर्याश्रयेणराष्ट्रंचौरादिभयरहितंभ
वतितस्यनित्यंतद्वृद्धिंगच्छतिउदकसेकेनेववृक्षः २५५ द्विविधेति चारएवचोरज्ञानेहेतुत्वाच्चक्षुरिवयस्यासौराजाचारैरेव

टत्तयादिप्रकाशान्यायेनपरधनग्राहिणोजानीयात् २५६ प्रकाशेति तेषांपुनश्चौरादीनांमध्याद्येतुलामतिमानल्लोष्टत्तयादिनाहि रण्यादिपण्यविक्रयिणः परधनमनुचितेनगृण्हंतितेप्रकाशवंचकास्तेनाःचौराःसंधिच्छेदादिनागुप्ताऽटव्याश्रयाश्चपरधनंगृण्हंतितेप्रच्छन्नवंचकाःकिंच २५७ उत्कोचकाइति असभ्यागिति एवमिति उत्कोचकायेकार्यिभ्योधनंगृहीत्वाकार्यमयुक्तंकुर्वंति औपाधिकाभयदर्शनात्येधनमुपजीवंतिवंचकायेसुवर्णादिद्रव्यंगृहीत्वाऽपद्रव्यप्रक्षेपेणवंचयंतिकितवाद्यूतसूभाङ्क्यदेविनः धनपुत्रलाभादिमंगलममलमादिश्ययेवर्तंतेतेमंगलदेशवृत्ताःभद्राः कल्याणाकारप्रच्छन्नपापायेधनग्राहिणः ईक्षणिकाहस्तरेखाद्यवलोकनेनशुभाशुभफलकथनजीविनः महामात्राहस्तिशिक्षाजीविनःचिकित्सकाःचिकित्साजीविनः असभ्यकारिणइतिमहामात्रचिकित्सकविशेषणंशिल्पयुक्ताश्चित्रलेखाद्युपायजीविनःतेप्यनुपजीव्यमानशिल्पोपायप्रोत्साहनेनधनंगृण्हंति पण्यस्त्रियश्चपर

प्रकाशवंचकास्तेषांनानापण्योपजीविनः प्रच्छन्नवंचकास्त्वेतेयेस्तेनाटविकादयः २५७ उत्कोचकाश्चौपधिकावंचकाःकितवास्तथा मंगलादेशवृत्ताश्चभद्राश्चेक्षणिकैःसह २५८ असभ्यकारिणश्चैवमहामात्राश्चिकित्सकाः शिल्पोपचारयुक्ताश्चनिपुणाःपण्ययोषितः २५९ एवमादीन्विजानीयात्प्रकाशांल्लोककंटकान् निगूढचारिणश्चान्याननार्यानार्यलिंगिनः २६० तान्विदित्वासुचरितैर्गूढैस्तत्कर्मकारिभिः चारैश्चानेकसंस्थानैःप्रोत्साद्यवशमानयेत् २६१ तेषांदोषानभिख्याप्यस्वेस्वेकर्मणितत्त्वतः कुर्वीतशासनंराजासम्यक्सारापराधतः २६२

वशीकरणकुशलाइत्येवमादीन्प्रकाशांलोकवंचकान्चारैर्जानीयात् अन्यानपिप्रच्छन्नचारिणःशूद्रादीन्ब्राह्मणादिवेषधारिणोधनग्राहिणोजानीयात् २५८ २५९ २६० तानिति तानुक्तान्वंचकान्सभ्यैःप्रच्छन्नैस्तत्कर्मकारिभिर्वणिजांवणिग्भ्य एवमादिभिःपुरुषैरेतद्व्यतिरिक्तैःससमाध्यायोपदिष्टकापटिकादिभिश्चारैरनेकस्थानस्थैर्ज्ञात्वाप्रोत्साद्यस्ववशान्कुर्यात् २६१ तेषामिति तेषांप्रकाशाप्रकाशतस्कराणांस्वकर्मणिचौर्यादौयेपारमार्थिकादोषाःसंधिच्छेदादयःतान्लोकेप्रख्याप्यतत्कृतधनशरीरादिसामर्थ्यापेक्षयाचराजादंडंकुर्यात् २६२

नहीति यस्माच्चौराणांपापाचरणबुद्धीनांविनीतवेषेणपृथिव्यांचरतांदंडव्यतिरेकेणपापक्रियायांनियमंकर्त्तुमशक्यंअतएषांदंडं कुर्यात् २६३ सभेति जीर्णेति एवमिति सभाग्रामनगरादौनियतंजनसमूहस्थानंप्रपाजलदानगृहंअपूपविक्रयवेश्मपण्यस्त्रीगृहंमद्यान्नविक्रयस्थानानिचतुष्पथाःप्रख्याततरुमूलानिजनसमूहस्थानानिजीर्णवाटिकाअटव्यःशिल्पगृहाणिशून्यगृहाणिआम्रादिवनानिकृत्रिमोद्यानानिएवंप्रकारान्सैन्यैःपदातिसमूहैःस्थावरजंगमैःएकस्थानस्थितैःप्रचारिभिश्चान्यैश्चारैस्तस्करनिवारणार्थंचारयेत्साहाय्येणैवंविधेऽन्नपानस्त्रीसंभोगस्त्वमद्यर्थेच्छेपणार्थंतस्कराअवतिष्ठंते २६४ २६५ २६६ तदीति तेषांसाहाय्यंप्रतिपाद्यमानैस्तच्चरितानुवृत्तिभिःसंधिच्छेदादिकर्मानुष्ठानवेदिभिः पूर्वचौरैश्चारस्रूपैश्चौरमायानिपुणैःतस्करान्जानीयादु

नहिदंडादृतेशक्यः कर्त्तुंपापविनिग्रहः स्तेनानांपापबुद्धीनान्निभृतंचरतांक्षितौ २६३ सभाप्रपापूपशालावेशमद्यान्नविक्रयाः चतुष्पथाश्चैत्यवृक्षाः समाजाःप्रेक्षणानिच २६४ जीर्णोद्यानान्यरण्यानिकारुकावेशनानिच शून्यानिचाप्यगाराणिवनान्युपवनानिच २६५ एवंविधान्नृपोदेशान्गुल्मैःस्थावरजंगमैः तस्करप्रतिषेधार्थंचारैश्चाप्यनुचारयेत् २६६ तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः विद्यादुत्सादयेच्चैवनिपुणैःपूर्वतस्करैः २६७ भक्ष्यभोज्योपदेशैश्चब्राह्मणानांचदर्शनैः शौर्यकर्मापदेशैश्चकुर्युस्तेषांसमागमम् २६८ येतत्रनोपसर्पेयुर्मूलप्रणिहिताश्चये तान्प्रसह्यनृपोहन्यात्समित्रज्ञातिबांधवान् २६९

त्सादयेच्च २६७ भक्ष्येति तेपूर्वचौराश्चरभूताआगच्छंतास्मद्गृहंगच्छामःतत्रमोदकपायसादीन्यश्नीमःइत्येवंभक्ष्यभोज्यव्याजेनास्माकंदेशेब्राह्मणोस्तिसोभिलषितार्थसिद्धिंजानातितंपश्यामइत्येवंब्राह्मणानांदर्शनैःकश्चिदेकएवबहुभिःसहयोत्स्यतेतंपश्यामइत्येवंशौर्यकर्मव्याजेनतेषांचौराणांराज्ञोदंडधारकपुरुषैःसमागमंकुर्युःग्रहयेयुश्च २६८ येइति येचौरास्तत्रभक्ष्यभोज्यादौनिग्रहणशंकयानोपसर्पंतियेचमूलेराजनियुक्तपुराणचौरवधेप्रणिहिताःसावधानभूताःनसंगतिंभजंतेतांश्चौरांस्तेभ्यएवज्ञात्वातदेकतापन्नमित्रपित्रादिज्ञातिस्वजनसहितान्बलादाक्रम्यराजाहन्यात्

नहोढेनेति धार्मिकोराजाहृतद्रव्यसंधिच्छेदोपकरणव्यतिरेकेणानिश्चितचौरभावंनघातयेत्किंतुद्रव्येणचौर्योपकरणेनचनिश्चि
तचौरभावमविचारयन्घातयेत् २७० ग्रामेष्विति ग्रामादिष्वपियेकेचिच्चौराणांचौरत्वंज्ञात्वाभक्तदाः चौर्योपयुक्तभांडादिगृहाव-
स्थानंयेददतितानपिनैरंतर्याद्यपराधगौरवापेक्षयाघातयेत् २७१ राष्ट्रेष्विति येराष्ट्रेषुरक्षानियुक्ताःयेचसीमांतवासिनोनराःसं
तःचौर्योपदेशेमध्यस्थाभवंतितान्चौरवत्क्षिप्रंदंडयेत् २७२ यश्चापीति याजनप्रतिग्रहादिनापरस्ययागदानादिधर्ममुत्पाद्ययो
जीवतिसधर्मजीवनोब्राह्मणःसोपियोधर्ममर्यादायाश्च्युतोभवतितमपिस्वधर्मातिरिक्तदंडेनोपतापयेत् २७३ ग्रामेति
ठनेनस्कंधादिक्रियमाणेहिताभंगेजलसेतुभंगेजातेक्षेत्रोपपन्नसस्यनाशनेवृत्तिभंगेचेतिमेधातिथिःपथिचौरदर्शनेतन्निकटं

नहोढेनविनाचौरंघातयेद्धार्मिकोनृपः सहोढंसोपकरणंघातयेदविचारयन् २७० ग्रामेष्वपिचये केचिच्चौराणांभक्तदायकाः भांडावकाशदाश्चैवसर्वांस्तानपिघातयेत् २७१ राष्ट्रेषुरक्षाधिकृतान् सामंतांश्चैवचोदितान् अभ्याघातेषुमध्यस्थान्शिष्याच्चौरानिवद्रुतम् २७२ यश्चापिधर्मसमयात्प्रच्युतोधर्मजीविनः दंडेनैवतमप्योषेत्स्वकाद्धर्माद्धिविच्युतम् २७३ ग्रामघातेहिताभंगेपथिमोषाभिदर्शने शक्तितोनाभिधावंतोनिर्वास्याःसपरिच्छदाः २७४ राज्ञःकोशापहर्तॄंश्चप्रतिकूलेषुचस्थितान् घातयेद्विविधैर्दंडैररीणांचोपजापकान् २७५ संधिंछित्वातुयेचौर्यंरात्रौकुर्वंतितस्कराः तेषांछित्वानृपोहस्तौतीक्ष्णशूलेनिवेशयेत् २७६

वर्त्तिनोयथाशक्तितोयेरक्षान्नकुर्वंतितेशय्यागवाश्वादिपरिच्छदसहितादे
शान्निर्वासनीयाः २७४ राज्ञइति राज्ञोधनगृहात्धनापहारिणस्तथातदाज्ञाव्याघातकारिणःशत्रूणांचराज्ञासहवैरिवृद्धिकारि
णोअपराधापेक्षयाकरचरणजिह्वाछेदनादिभिर्नानाप्रकारदंडैर्घातयेत् २७५ संधिमिति योरात्रौसंधिच्छेदंकृत्वापरधनंतस्क
रामुष्णंतितेषांराजाहस्तद्वयंछित्वातीक्ष्णेशूलेआरोपयेत् २७६ अंगुलीरिति पटप्रांतादिस्थितंसुवर्णादिकंग्रंथिमोक्षणेनयश्चो
रयतिसग्रंथिभेदःतस्यप्रथमेद्रव्यग्रहणेअंगुलीश्छेदयेत् तेचांगुष्ठतर्ज्जन्यौ उत्क्षेपकग्रंथिभेदौकरसंदंशहीनकावितिया .

वचनात् द्वितीयेग्रहणेहस्तपादौछेदयेत्तृतीयेग्रहणेवधार्होभवति २७७ अग्निदानिति ग्रंथिभेदादिकारिणोविज्ञायअग्निभक्त
शस्त्रावस्थानप्रदान्मुष्यतइतिमोषश्चौरधनंतस्यावस्थापकान्चौरवद्राजानिगृण्हीयात् २७८ तडागेति यःस्नानदानादिनाज
लोपकारकंभागंसेतुभेदादिनाविनाशयतितमप्सुमज्जनेनप्रकारांतरेणवाहन्यात् यद्यायदितडागंपुनःसंस्कुर्यात्तदोत्तमसाहसंदं
ड्यः २७९ कोष्ठेति राजसंबंध्यादिषुधनागारायुधगृहयोर्देवप्रतिमागृहस्यवहुधनव्ययसाध्यस्यविनाशकान्हस्त्यश्वरथस्यवाप
हर्तॄन्शीघ्रमेवहन्यात्यत्तुसंक्रमध्वजयष्टिप्रतिमाभेदिनःपंचशतदंडंवक्ष्यतिसोऽस्मादेवदेवतागारभेदकस्यवधविधानान्मृन्मयंपू
जितोक्षितदेवताप्रतिमाविषयीत्रद्रष्टव्यः २८०यस्त्विति यःपुनःप्रजार्थपूर्वकेनचित्कृतस्यतडागस्यउदकमेवगृण्हातिकृत्स्नतडा

अंगुलीग्रंथिभेदस्यछेदयेत्प्रथमेग्रहे द्वितीयेहस्तचरणौतृतीयेवधमर्हति २७७ अग्निदान्भ
क्तदांश्चैवतथाशस्त्रावकाशदान् सन्निधातॄंश्चमोषस्यहन्याच्चोरमिवेश्वरः २७८ तडागभेदकंह
न्यादप्सुशुद्धवधेनवा यद्वापिप्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम् २७९ कोष्ठागारायुधागारदेवता
गारभेदकान् हस्त्यश्वरथहर्तॄंश्चहन्यादेवाविचारयन् २८० यस्तुपूर्वनिविष्टस्यतडागस्योदकंह
रेत् आगमंवाप्यपांभिंद्यात्सदाप्यःपूर्वसाहसम् २८१ समुत्सृजेद्राजमार्गेयस्त्वमेध्यमनापदि स
द्वौकार्षापणौदद्यादमेध्यंचाशुशोधयेत् २८२ आपद्गतोऽथवावृद्धोगर्भिणीबालएववा परिभा
षणमर्हतितच्चशोध्यमितिस्थितिः २८३ चिकित्सकानांसर्वेषांमिथ्याप्रचरतांदमः अमानुषेषुप्र
थमोमानुषेषुतुमध्यमः २८४

गोदकनाशनेवधदंडःप्रागुक्तःतथोदकगमनमार्गंसेतुबंधादिनायोनाशयतिसप्रथम-
साहसंदंड्यः २८१ समुत्सृजेति अनार्त्तःसन्योराजपथेषुपुरीषंकुर्यात्सपणद्वयंदंडंदद्यात्तच्चामेध्यंशीघ्रमेवापसारयेत् २८२
आपद्गतइति व्याधितवृद्धगर्भिणीबालानदंडनीयाः किंतुतेपुनःकिंकृतमितिपरिभाषणीयाः तच्चामेध्यंशोधनीयाइतिशास्त्रमर्या
दा २८३ चिकित्सकेति सर्वेषांकायशल्यादिभिषजांदुश्चिकित्सांकुर्वतांदंडःकर्त्तव्यः तत्रगवाश्वादिविषयेदुश्चिकित्सायांप्रथम

हसदंडोमानुषविषयेपुनर्मध्यमसाहसः २८४ संक्रमेति संक्रमोजलोपरिगमनार्थंकाष्ठशिलादिरूपः ध्वजःचिन्हंराजद्वारादौयष्टि पुष्करिण्यादौप्रतिमाश्चक्षुद्रामृन्मय्यादयस्तासांविनाशकःपंचशतपणान्दद्यात् तच्चविनाशितंद्रव्यंपुनर्नवंकुर्यात् २८५अदूषिते ति अदुष्टद्रव्याणांअपद्रव्यप्रक्षेपेणदूषणेमणीनांचपाषाणवज्रादीनांअभेद्यानांविद्रावणेवेध्यानामपिमुक्तादीनामनवस्थानवेधनेप्र थमसाहसोदंडःकार्यःसर्वत्रपरकीयद्रव्यनाशेद्रव्यांतरदानादिनास्वामितुष्टिःकार्या २८६समैरिति समैःसममूल्यदातृभिःसहोत्कृ ष्टापकृष्टद्रव्यदानेनयोविषमंव्यवहरतिसममूल्यंद्रव्यंदत्वायःकस्यचिद्बहुमूल्यंकस्यचिदल्पमूल्यंगृण्हातिसोऽर्थबंधविशेषापेक्षया प्रथमसाहसंदंडंप्राप्नुयात् २८७ बंधनेति प्राकारेति बंधनगृहाणिसर्वजनदृश्येराजगृहपुरादिसंबंधिनःप्राकारस्यभेदकंतदीया

संक्रमध्वजयष्टीनांप्रतिमानांचभेदकः प्रतिकुर्याच्चतत्सर्वंपंचदद्याच्छतानिच २८५ अदूषिता नांद्रव्याणांदूषणेभेदनेतथा मणीनामपवेधेचदंडःप्रथमसाहसः २८६ समैर्हिविषमंयस्तुचरेद्वै मूल्यतोपिवा समाप्नुयाद्दमंपूर्वंनरोमध्यममेववा २८७ बंधनानिचसर्वाणिराजामार्गेनिवेशयेत् दुः खितायत्रदृश्येरन्विकृताःपापकारिणः २८८ प्राकारस्यचभेत्तारंपरिखाणांचपूरकम् द्वाराणांचै वभंक्तारंक्षिप्रमेवप्रवासयेत् २८९ अभिचारेषुसर्वेषुकर्तव्योद्विशतोदमः मूलकर्मणिचानाप्तेःकृ त्यासुविविधासुच २९० अबीजविक्रयीचैवबीजोत्कृष्टंतथैवच मर्यादाभेदकश्चैवविकृतंप्राप्नुया द्वधम् २९१

नामेवपरिखाणांपूरयितारंतत्कृतानांद्वाराणांभंजकंशीघ्रमेवदेशान्निर्वासयेत् २८८ २८९ अभिचारइति अ भिचारहोमादिषुशास्त्रीयेषुमारणोपायेषुलौकिकेषुचमूलनिखननपदपांसुग्रहणादिषुकृतेषुअनुत्पन्नमरणफलेषुद्विशतपण ग्रहणरूपोदंडःकर्तव्यः मरणेतुमानुषमारणदंडःएवंमातृपितृभार्यादिव्यतिरिक्तैःअसत्यैर्वामोह्यधनग्रहणाद्यर्थंवशीकरणेत थाकृत्यासूच्चाटनापाटवादिहेतुषुक्रियमाणासुनानाप्रकारासुद्विशतपणदंडएवकर्तव्यः २९० अबीजेति अबीजंबीजप्ररोहास मर्थंव्रीह्यादिप्ररोहसमर्थमितिकृत्वायोविक्रीणीतेतथातिशयमेवकतिचित्उत्कृष्टप्रक्षेपेणसर्वमिदंसोत्कर्षमितिकृत्वायोविक्रीणी

तेयश्चग्रामनगरादिसीमांविनाशयतिसविकृतनासाकरचरणकर्णादिरूपंवधंप्राप्नुयात् २९१ सर्वेति सर्वकंटकानांमध्येअतिशयेनपापतमंस्वर्णकारंतुलाच्छद्मकपटपरिवर्त्तपद्रव्यप्रक्षेपादिनाहेमादिचौर्य्येप्रवर्त्तमानंअनुबंधापेक्षयांगाविशेषेणसर्वदेहंवाखंडशःच्छेदयेत् २९२ सीतेति कृष्यमाणभूमिद्रव्याणांहलकुद्दालादीनामपहरणेखड्गादीनांचशस्त्राणांऔषधस्यचकल्याणघृतादेःचौर्य्येसत्युपयोगकालेतरकालापेक्षयाप्रयोजनापेक्षयाचराजादंडंकुर्यात् २९३ स्वाम्येति स्वामीराजाअमात्योमंत्र्यादिःपुरंराज्ञःकृतदुर्गनिवासनगरंराष्ट्रंदेशःकोषोवित्तनिचयःदंडोहस्त्यश्वरथपादातंमित्रंत्रिविधंसप्तमाध्यायोक्तमित्येताःसप्तप्रकृतयोअंगानिसप्तांगमिदंराज्यमित्युच्यतेततःकिमित्याह २९४ सप्तेति आसांराज्यप्रकृतीनांसप्तानांक्रमे

सर्वकंटकपापिष्ठंहेमकारंतुपार्थिवः प्रवर्त्तमानमन्यायेच्छेदयेल्लवशःक्षुरैः २९२ सीताद्रव्यापहरणेशस्त्राणामौषधस्यच कालमासाद्यकार्यंचराजादंडंप्रकल्पयेत् २९३ स्वाम्यमात्यौपुरंराष्ट्रंकोषदंडौसुहृत्तथा सप्तप्रकृतयोह्येताःसप्तांगंराज्यमुच्यते २९४ सप्तानांप्रकृतीनांतुराज्यस्यासांयथाक्रमम् पूर्वंपूर्वंगुरुतरंजानीयाद्व्यसनंमहत् २९५ सप्तांगस्येहराज्यस्यविष्टब्धस्यत्रिदंडवत् अन्योन्यगुणवैशेष्यान्नकिंचिदतिरिच्यते २९६

रस्यविनाशमपेक्ष्यपूर्वस्याःपूर्वस्याविनाशविषयेगरीयोव्यसनंजानीयात् तथाहिभिन्नव्यसनात्स्वबलव्यसनंगरीयःसंपन्नबलस्यैवानुग्रहेसामर्थ्यात् एवंबलात्कोषोगरीयान्कोषनाशेबलस्यापिनाशात् कोषाद्राष्ट्रंगरीयःराष्ट्रनाशेकुतःकोषोत्पत्तिः एवंराष्ट्राद्दुर्गनाशोपिदुर्गादेवयवसेंधनादिसंपन्नाद्राज्यरक्षासिद्धेः दुर्गादमात्योगरीयान्प्रधानामात्यनाशेसर्वांगवैकल्यात् अमात्यादपिआत्मासर्वस्यात्मार्थत्वात्तस्मादुत्तरापेक्षयापूर्वंयत्नतोरक्षेत् २९५ सप्तेति उक्तसप्तांगवतोलोकेराष्ट्रस्यत्रिदंडवदन्योन्यसंबंधस्यपरस्परविलक्षणोपकारणान्नकिंचिदंगमधिकंभवतियद्यपिपूर्वश्लोकेपूर्वपूर्वांगस्याधिक्यमुक्तंतथाप्येषामंगानांमध्यादन्यस्यांगसंबंधिनमुपकारमन्यदंगंकर्त्तुंनशक्नोतितस्मादुत्तरोत्तरांगमप्यपेक्षणीयमित्येवंपरोयमाधिक्यनिषेधःअप्रसिद्ध्यतित्रिदंडमेवदृष्टांतः तद्धिचतुरंगुलगोवालवेष्टनादन्योन्यसंबंधन्नचतन्मध्येत्रिदंड

धारणशास्त्रार्थेकश्चिद्दंडोधिकोभवति २९६ तेष्विति यस्मात्तेषुतेषुसंपाद्येषुकार्येषुतत्तदंगस्यातिशयोभवतितत्कार्यमन्येनकर्त्तुम
शक्तेः एवंचयेनांगेनयत्कार्यसंपाद्यतेतस्मिन्कार्येतदेवप्रधानमुच्यते ततश्चान्योन्यगुणविशेषादियदुक्तंतदेवानेनस्फुटीकृतम्
२९७ चारेणेति सप्तमाध्यायोक्तकापटिकादिना बलस्योत्साहयोगेन कर्मणांचहस्तिबधवणिक्पथादीनामनुष्ठानेनजातांशत्रोरात्म
नश्चशक्तिंराजासदाजानीयात् २९८ पीडनेति पीडनानिमारकादीनिकामक्रोधोद्भवानिदुःखानिस्वपरचक्रगतानितेषांचगुरुल
घुभावंपर्यालोच्यसंधिविग्रहादिकार्यमारभेत् २९९ आरभेतेति राजास्वराज्यवृद्धिपरापचयनिमित्तानिकार्याणिकथंचिदिदंसंजा
तमितिच्छलान्यपिआरभ्यात्मनाखिन्नः पुनःपुनस्तान्यारभेतैवयस्मात्कर्माणिसृज्यमानंपुरुषंश्रीर्नितरांसेवतेतथानाब्राह्मणेनाना
श्रयेश्रीरस्तीतिमरोहितापिशोषमेतिनचयुगानुरूपेणकर्माणिफलंतीतिराज्ञोदासितव्यंयत. ३०० कृतमिति कृतत्रेताद्वापरकलयोरा

तेषुतेषुतुकृत्येषुतत्तदंगंविशिष्यते येनयत्साध्यतेकार्यंतत्तस्मिन्श्रेष्ठमुच्यते २९७ चारेणोत्साह
योगेनक्रिययैवचकर्मणाम् स्वशक्तिंपरशक्तिंचनित्यंविद्यान्महीपतिः २९८ पीडनानिचसर्वाणिव्य
सनानितथैवच आरभेततत:कार्यंसंचिंत्यगुरुलाघवम् २९९ आरभेतैवकर्माणिश्रांतःश्रांतःपुनः
पुनः कर्माण्यारभमाणंहिपुरुषंश्रीर्निषेवते ३०० कृतंत्रेतायुगंचैवद्वापरंकलिरेवच राज्ञोवृत्तानि
सर्वाणिराजाहियुगमुच्यते ३०१ कलिःप्रसुप्तोभवतिसजाग्रद्द्वापरंयुगम् कर्मस्वभ्युद्यतस्त्रेतावि
चरंस्तुकृतंयुगम् ३०२ इंद्रस्यार्कस्यवायोश्चयमस्यवरुणस्यच चंद्रस्याग्नेःपृथिव्याश्चतेजोवृत्तंनृ
पश्चरेत् ३०३ ज्ञ एवंचेष्टितविशेषाः तैरेवसत्यादिविशेषप्रवृत्तेः तस्माद्राजैवकृतादियुगमभिधीयतेकीदृक्चेष्टितःकृता
दियुगमित्यतआह ३०१ कलिरिति अज्ञानालस्यादिनायदानिरुद्यमोराजाभवतितदाकलिःस्यात् यदाजानन्नपिनानुतिष्ठति
तदाद्वापरम् यदाकर्मानुष्ठानेअवस्थितस्तदात्रेता यथाशास्त्रंपुनःकर्माण्यनुतिष्ठन्विचरतितदाकृतयुगंतस्माद्राज्ञाकर्मानु-
ष्ठानपरेणभाव्यमितिअत्रतात्पर्यंनतुवास्तव्यकृतयुगाद्यपलापे ३०२ इंद्रस्येति इंद्रादिवीर्यसंबंधिनोऽस्यानुरूपंचरितंराजा
नुतिष्ठेत्तथाचराजाकंटकोद्धारेणप्रतापानुरागाभ्यांसंयुज्येंद्रस्यचरितमनुतिष्ठेदित्याह ३०३ वार्षिकेति ऋतुसंवत्सरपक्षाश्रय-

णेनइदमुच्यतेयथाश्रावणादींश्चतुरोमासानिंद्रःसस्यादिसिद्ध्यैवर्षतिएवमिंद्रचरितंअनुतिष्ठन्राजास्वदेशायातसाधूनभिल
षितार्थैःपूरयेत् ३०४ अष्टाविति यथासूर्योमार्गशीर्षादींष्टमासान्रश्मिभिस्तोकंस्तोकंरसमीषत्तापेनादत्तेतथाराजाशास्त्री
यकरानपीडयासदागृह्णीयात्यस्मादेतदस्यार्कव्रतम् ३०५ प्रविश्येति यथाप्राणाख्योवायुःसर्वजंतुष्वंतःप्रविश्यविचरति
एवंचारद्वारेणस्वपरमंडलजालेषुचिकीर्षितार्थज्ञानार्थमंतःप्रवेष्टव्यम् यस्मादेतन्मारुतंचरितम् ३०६ यमेति यद्यपियमस्यश
त्रुमित्रेनस्तस्तथापितन्निंदकार्चकयोःशत्रुमित्रयोर्यथायमःशत्रुमित्रमरणकालेतुल्यवन्नियमयतिएवंराज्ञाऽपराधकालेप्रजाः
पणीयाः यस्मादेतदस्ययाम्यंव्रतम् ३०७ वरुणेनेति योवरुणस्यरज्जुभिर्बंधयितुमिष्टःसयथातेनाविशंकितःपाशैर्बद्धएवलक्ष्य

वार्षिकांश्चतुरोमासान्यथेंद्रोऽभिप्रवर्षति तथाभिवर्षेत्स्वंराष्ट्रंकामैरिंद्रव्रतंचरन् ३०४ अष्टौ
मासान्यथादित्यस्तोयंहरतिरश्मिभिः तथाहरेत्करंराष्ट्रान्नित्यमर्कव्रतंहितत् ३०५ प्रविश्यसर्व
भूतानियथाचरतिमारुतः तथाचारैःप्रवेष्टव्यंव्रतमेतद्धिमारुतम् ३०६ यथायमःप्रियद्वेष्यौप्राप्ते
कालेनियच्छति तथाराज्ञानियंतव्याःप्रजास्तद्धियमव्रतम् ३०७ वरुणेनयथापाशैर्बद्धएवाभि
दृश्यते तथापापान्निगृह्णीयाद्व्रतमेतद्धिवारुणम् ३०८ परिपूर्णंयथाचंद्रंदृष्ट्वाहृष्यंतिमानवाः
तथाप्रकृतयोयस्मिन्सचांद्रव्रतिकोनृपः ३०९ प्रतापयुक्तस्तेजस्वीनित्यंस्यात्पापकर्मसु दुष्टसाम
तहिंस्रश्चतदाग्नेयंव्रतंस्मृतम् ३१० यथासर्वाणिभूतानिधराधारयतेसमम् तथासर्वाणिभूता
निबिभ्रतःपार्थिवंव्रतम् ३११

तेतथापापकारिणोऽविशंकितान्नेवयावन्नपारयंतेतावच्छासयेत् यस्मादेतदस्यवारुणं
व्रतम् ३०८ परिपूर्णमिति यथापूर्णेंदुदर्शनेनमनुष्याहर्षमुत्पादयंत्येवमप्रसादाद्योयस्मिन्दृष्टेतुष्टिमुपगच्छंतिसचंद्राचारचारी
नरेंद्रः ३०९ प्रतापयुक्तइत्यादि पापकारिषुसदादंडपातेनप्रचंडोऽनलसःस्यात्तथाप्रतिकूलामात्यहिंसनशीलोभवेत्तदस्याग्नि
संबंधिव्रतंस्मृतम् ३१० यथेति यथापृथिवीसर्वाणिउच्चावचानिस्थावरजंगमानिउत्कृष्टापकृष्टानिसमंकृत्वाधारयतेतद्वदृ

निकगुणवद्भूतानितदितराणिच दीनानाथादिसर्वभूतानिरक्षणधनदानादिनासामान्येनधारयतःपृथिवीसंबंधिव्रतंभवति ३११
एतैरिति एतैरुक्तोपायैरन्यैश्चानुक्तैरपिस्वबुद्धिप्रयुक्तोराजाऽनलसःसन्स्वराष्ट्रेयेचौरावसंतियेचपरराष्ट्रेसंतस्तद्देशमागत्यमुष्णं
तितान्उभयप्रकारान्निगृह्णीयात्सोऽग्निर्भवतिवायुश्चेत्यादिनापूर्वसिद्धवदुक्तमग्न्यादिरूपत्वंद्दहत्तुतद्गुणत्यागेनस्फुटीकृतमि-
त्यपुनरुक्तिः ३१२ परामिति कोपक्षयादिनाप्रकृष्टामप्यापदंप्राप्तोराजाब्राह्मणान्नप्रकोपयेत्यस्मात्तेरुष्टाःसबलवाहनंसद्यए
वशापाभिचाराभ्यांहन्युः तथाहि ३१३ यैरिति यैर्ब्राह्मणैरभिशापेनसर्वभक्ष्योऽग्निःकृतःसमुद्रश्चापेयजलश्चंद्रश्चक्षययुक्तःप
श्चात्पूरितःतान्कोपयित्वाकोननश्येत् किंच ३१४ लोकानामिति येस्वर्गादिलोकान्परानन्यांश्चलोकपालान्सृजंतीतिसं-

एतैरुपायैरन्यैश्चयुक्तोनित्यमतंद्रितः स्तेनान्राजानिगृण्हीयात्स्वराष्ट्रेपरएवच ३१२ परामप्याप
दंप्राप्तोब्राह्मणान्नप्रकोपयेत् तेह्येनंकुपिताहन्युःसद्यःसबलवाहनम् ३१३ यैःकृतःसर्वभक्ष्योग्नि
रपेयश्चमहोदधिः क्षयीचाप्यायितःसोमःकोननश्येत्प्रकोप्यतान् ३१४ लोकानन्यान्सृजेयुर्येलोक
पालांश्चकोपिताः देवान्कुर्युरदेवांश्चकःक्षिण्वंस्तान्समृध्नुयात् ३१५ यानुपाश्रित्यतिष्ठंतिलो-
कादेवाश्चसर्वदा ब्रह्मचैवधनंयेषांकोहिंस्यात्तान्जिजीविषुः ३१६ अविद्वांश्चैवविद्वांश्चब्राह्मणो
दैवतंमहत् प्रणीतश्चाप्रणीतश्चयथाग्निर्दैवतंमहत् ३१७ श्मशानेष्वपितेजस्वीपावकोनैवदु
ष्यति हूयमानश्चयज्ञेषुभूयएवाभिवर्द्धते ३१८

भाव्यतेदेवांश्चमानुषादीन्कुर्वंतितान्पीडयन्कःसमृद्धिंप्राप्नु
यात्अपिच ३१५ यानित्यादि यान्ब्राह्मणान्यजनयाजनकर्तृकान्नाश्रित्याग्नौप्रास्ताहुतिरितिन्यायेनपृथिव्यादिलोकादेवाश्च-
स्थितिंलभंतेवेदएवचयेषांअभ्युदयसाधनतयायाजनाध्यापनादिनाधनोपायत्वाच्चतान्जीवितुमिच्छन्कोहिंस्यात् एवंतर्हि
विद्वांसंब्राह्मणंसेवेतेत्यतआह ३१६ अविद्वानिति यथाहितोऽनाहितोवाग्निर्महतीदेवताएवंमूर्खोविद्वांश्चप्रकृष्टादेवतेति ३१७
श्मशानेष्वित्यादि एवंयद्यप्यनिष्टेवर्त्तंतेसर्वकर्मसुतथापिब्राह्मणाःपूज्याःपरमंदैवतंहितत्यथाग्निर्महातेजाःश्मशानेशवंदहन्कार्ये

पिनैवदुष्टोभवतिकिंतुपुनरपियज्ञेषुहूयमानोऽभिवर्द्धते ३१८ एवंयद्यपीति एवंकुत्सितकर्मस्वपिसर्वेषुयद्यपिब्राह्मणाःप्रवर्त्तंते तथापिसर्वप्रकारेणपूज्याःतथाप्रकृष्टंतद्दैवतंस्तकत्यर्थत्वाच्चास्यनयथाश्रुतार्थविरोधःशंकनीयः ३१९ क्षत्रस्येति क्षत्रियस्य णान्प्रतिसर्वथापीडानुवृत्तस्यब्राह्मणाएवशापाभिचारादिनासम्यग्नियंतारःयस्मात्क्षत्रियोब्राह्मणात्संभूतःब्राह्मणबाहुप्रसूत त्वात्तथाच ३२० अद्भ्यइति जलब्राह्मणपाषाणेभ्योऽग्निक्षत्रियशस्त्राणिजातानितेषांसंबंधितेजःसर्वत्रदहनाभिभवच्छेदना र्थकंकार्यंकरोतिस्वकारणेषुजलब्राह्मणपाषाणाख्येषुदहनाभिभवच्छेदनरूपंकार्यंन्नकरोति ३२१ नेति ब्राह्मणरहितक्ष त्रियोर्द्धिन्नयातिशांतिकपौष्टिकव्यवहारेक्षणादिधर्मविरहात् एवंक्षत्रियरहितोपिब्राह्मणोनवर्द्धतेरक्षांविनायागादिकर्म-

एवंयद्यप्यनिष्टेषुवर्त्तंतेसर्वकर्मसु सर्वथाब्राह्मणाःपूज्याःपरमंदैवतंहितत् ३१९ क्षत्रस्यातिप्रवृद्ध स्यब्राह्मणान्प्रतिसर्वशः ब्रह्मैवसन्नियंतृस्यात्क्षत्रंहिब्रह्मसंभवम् ३२० अद्भ्योग्निर्ब्रह्मतःक्षत्रम- श्मनोलोहमुत्थितम् तेषांसर्वत्रगंतेजःस्वासुयोनिषुशाम्यति ३२१ नाब्रह्मक्षत्रमृध्नोतिनाक्षत्रंब्रह्म वर्द्धते ब्रह्मक्षत्रंचसंपृक्तमिहचामुत्रवर्द्धते ३२२ दत्वाधनंतुविप्रेभ्यःसर्वदंडसमुत्थितम् पुत्रेराज्यं समासृज्यकुर्वीतप्रायणंरणे ३२३ एवंचरन्सदायुक्तोराजधर्मेषुपार्थिवः हितेषुचैवलोकस्यसर्वान्भृ- त्यान्नियोजयेत् ३२४ एषोऽखिलःकर्मविधिरुक्तोराज्ञःसनातनः इमंकर्मविधिंविद्यात्क्रमशोवैश्यशूद्र योः ३२५

निष्पत्तेःकिंतुब्राह्मणःक्षत्रियश्चपरस्परसंबद्धएवेहलोकेपरलोकेचधर्मार्थकाममोक्षावाप्त्यावृद्धिमेतिदंडप्रक रणेन्वेयंब्राह्मणस्तुतिःब्राह्मणानामेवाधिपानामपिलघुदंडप्रयोगनियमार्थायदातुरिशिष्टदर्शनेनाचिकित्सव्याधिनावाआसन्नमृ त्युर्भवतितदा ३२२ दत्वेति महापातकिव्यतिरिक्तविनियुक्तावशिष्टसर्वदंडधनंब्राह्मणेभ्योदत्वापुत्रेराज्यंसमर्प्यासन्नमृत्युःफला तिशयप्राप्तयेसंग्रामेप्राणत्यागंकुर्यात् संग्रामासंभवेत्वनशनादिनापि ३२३ एवमिति एवमध्यायत्रयोक्तराजधर्मेषुव्यवहार्य्यमाणो राजासर्वदायत्नवान्प्रजाहितेषुसर्वान्भृत्यान्नियोजयेत् ३२४ एषइति एतद्राज्ञःकर्मानुष्ठानंपारंपर्यागततथानित्यंसमग्रमुक्तंइ

दानींवैश्यशूद्रक्रमेणवक्ष्यमाणंइदंकर्मानुष्ठानंजानीयात् ३२५ वैश्यस्त्विति वैश्यः कृतोपनयनपर्यंतसंस्कारः विवाहादिकंकृत्वाजी
विकायांवक्ष्यमाणायांकृष्यादिकार्यपशुपालनेनचसदासमायुक्तःस्यात् पशुरक्षणस्य वार्त्तात्वेपिप्राधान्यस्थापनार्थंपृथग्विधानंत
थाचोत्तरश्लोकाभ्यांप्राधान्यंदर्शयति ३२६ प्रजापतिरिति यस्माद्ब्रह्मापशून्सृष्ट्वारक्षणार्थंवैश्यायदत्तवान् अतोवैश्येनरक्षणी
याइतिपूर्वानुवादःप्रजाश्चसर्वाःसृष्ट्वाब्राह्मणायराज्ञेचदत्तवानितिप्रसंगादेतदुक्तम् ३२७ नचेति पशुरक्षणंनकरोमीतिवैश्येन
इच्छानकार्याअतःकृष्यादिवृत्तिसंभवेपिवैश्येनपशुरक्षणमवश्यंकरणीयंवैश्येचपशुरक्षणंकुर्वत्यन्यःपशुरक्षणन्नकारयितव्यः
किंच ३२८ मणीति मणिमुक्ताविद्रुमलोहवस्त्राणांगंधानांकर्पूरादीनांरसानांलवणादीनांउत्तममध्यमानांदेशकालापेक्षयामू-

वैश्यस्तुकृतसंस्कारःकृत्वादारपरिग्रहम् वार्त्तायांनित्ययुक्तःस्यात्पशूनांचैवरक्षणे ३२६ प्रजापति
र्हिवैश्यायसृष्ट्वापरिददेपशून् ब्राह्मणायचराज्ञेचसर्वाःपरिददेप्रजाः ३२७ नचवैश्यस्यकामःस्या
न्नरक्षेयंपशूनिति वैश्येचेच्छतिनान्येनरक्षितव्याःकथंचन ३२८ मणिमुक्ताप्रवालानांलोहानांतां
तवस्यच गंधानांचरसानांचविद्यादर्घबलाबलम् ३२९ बीजानामुप्तिविच्चस्यात्क्षेत्रदोषगुणस्यच
मानयोगंचजानीयात्तुलायोगांश्चसर्वशः ३३० सारासारंचभांडानांदेशानांचगुणागुणान् लाभाला
भंचपण्यानांपशूनांपरिवर्द्धनम् ३३१

ल्योत्कर्षापकर्षंवैश्यःजानीयात् ३२९ बीजेति बीजानांसर्वेषांवपनविधिज्ञः
स्यात् इदंबीजमस्मिन्कालेतत्रसंहतंचोसंप्ररोहतीत्येवंतथेदमूषरमिदंसस्यप्रदमित्यादिक्षेत्रदोषगुणज्ञश्चस्यात् मानोपा-
यांश्चप्रस्थद्रोणादीन्तुलोपायांश्चसर्वान्तत्त्वतोजानीयात् यथान्योनवंचयति ३३० सारेति इदमुत्कृष्टमेतदपकृष्टमित्येकजा-
तीनामपिद्रव्याणांविशेषंजानीयात्तथादेशानांप्राक्प्रभिमादीनांक्वचिद्बहुमूल्यंचेत्यादिदेशगुणदोषौतुल्येतविक्रेयद्रव्याणांचे
यताकालेनइयानपचयउपचयोवेतिविद्यात्तथाऽस्मिन्देशेकालेअनेनचतृणोदकयवादिनापशवोवर्द्धंतेअनेनक्षीयंतइतिएतदपि
जानीयात् ३३१ भृत्येति गोपालमहीपालानामितीदमस्यदेयमितिदेशकालकर्मानुरूपंवेतनंजानीयात् गौडदाक्षिणात्यादीनांच

मनुष्याणान्नानाप्रकाराम्भाषाविक्रयाद्यर्थंविद्यात्तथाइदंद्रव्यमेवंस्थाप्यतेअनेनचसंयुक्तंचिरंतिष्ठतीतिबुध्येतततयेदंद्रव्य
मस्मिन्देशेकालेनचेयताविक्रीयतइतिएतदपिजानीयात् ३३२ धर्मेणेति धर्मेणविक्रयादिनाउक्तप्रकारेणधनवृद्धौप्रकृष्टंय
त्नंकुर्यात्हिरण्यादिदानमपेक्ष्यान्नमेवप्राणिभ्योविशेषेणदद्यात् ३३३ विप्रेति शूद्रस्यपुनर्वेदविदांगृहस्थानांस्वधर्मानुष्ठा
नेनयशोयुक्तानांयापरिचर्यासैवप्रकृष्टस्वर्गादिश्रेयोहेतुर्धर्मः ३३४ शुचिरिति बाह्याभ्यंतरशौचोपेतः स्वजात्यपेक्षयाउत्कृष्ट
द्विजातिपरिचरणशीलोऽपरुषभाषीनिरहंकारः प्राधान्येनब्राह्मणादयः तदभावेक्षत्रियवैश्यास्त्रयोपिस्वजातितउत्कृष्टास्तदाश्र
यउत्कृष्टंजातिंप्राप्नोति ३३५ एषइति एषवर्णानामनापदिचतुर्णामपिकर्मविधिर्धर्मउक्तः आपद्यपियस्तेषांधर्मः संकीर्णश्चइ

भृत्यानांच भृतिंविद्याद्भाषाश्चविविधानृणाम् द्रव्याणांस्थानयोगांश्च क्रयविक्रयमेवच ३३२ ध
र्मेणचद्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम् दद्याच्चसर्वभूतानामन्नमेवप्रयत्नतः ३३३ विप्राणांवेदवि
दुषांगृहस्थानांयशस्विनाम् शुश्रूषैवतुशूद्रस्यधर्मोनैःश्रेयसः परः ३३४ शुचिरुत्कृष्टशुश्रूषुर्मृ
दुवागनहंकृतः ब्राह्मणाद्याश्रयोनित्यमुत्कृष्टांजातिमश्नुते ३३५ एषोऽनापदिवर्णानामुक्तः कर्म
विधिः शुभः आपद्यपिहियस्तेषांक्रमशस्तन्निबोधत ३३६ इतिमानवेधर्मशास्त्रेभृगुप्रो
क्तायांसंहितायांनवमोऽध्यायः ९ ॐ ॐ ॐ अधीयीरंस्त्रयोवर्णाः स्वकर्मस्था
द्विजातयः प्रब्रूयाद्ब्राह्मणस्तेषान्नेतरावितिनिश्चयः १

दंचक्रमेणशृणुत ३३६ इतिश्रीकुल्लूकभट्ट
विरचितायांमन्वर्थमुक्तावल्यांनवमोऽध्यायः ९ ॐ ॐ ॐ अधीयीरन्निति वैश्यशूद्रधर्मानंतरंसंकीर्णानांच
संभवमितितस्मिन्नाच्येवर्णेभ्यएवसंकीर्णानामुत्पत्तेः वर्णानुवादार्थंत्रैवर्णिकस्यप्रधानधर्ममध्ययनंब्राह्मणस्यचाध्यापन
मनुवदतिब्राह्मणादयस्त्रयोवर्णाः अध्ययनात्तु भूतस्वकर्मानुष्ठातारोवेदंपठेयुः एषांपुनर्मध्येब्राह्मणएवाध्यापनंकुर्यात्नक्ष
त्रियवैश्याविसयन्निश्चयः प्रब्रूयाद्ब्राह्मणः पुनस्तेषामित्यनेनैवक्षत्रियवैश्ययोरध्यापननिषेधसिद्धौनेतराविति पुनर्निषेधव

अ॰
९

च्वनंप्रायश्चित्तगौरवार्थंकिंच १ सर्वेति सर्वेषांवर्णानांजीवनोपायंयथाशास्त्रंब्राह्मणोजानीयात्तेभ्यश्चोपदिशेत्स्वयंचयथोक्तवन्नि
यमभनुतिष्ठेत्अत्रानुवादः २ वैशेष्यादिति जात्युत्कर्षात्प्रकृतिः कारणंहिरण्यगर्भोत्तमांगरूपकारणोत्कर्षान्नियम्यतेऽनेनेतितथा
वेदाऽध्ययनाध्यापनव्याख्यानादियुक्तसातिशयवेदधारणात् अतएवब्रह्मणश्चैवधारणादितिसातिशयवेदधारणेनैवब्राह्मणोत्क
र्षउक्तः गोविंदराजस्तुस्नातकव्रतानांधारणादितिव्याख्यातवान् तन्नक्षत्रियादिसाधारणादिस्थिरस्योपनयनाख्यस्यक्षत्रियाद्यपेक्ष
याधानस्यैवविधानेनिरोधात्वर्णानामध्यापनवृत्त्युपदेशयोर्ब्राह्मणएवेश्वरः ३ ब्राह्मणइति ब्राह्मणादयस्त्रयोवर्णाद्विजास्तेषामुपन
यनविधानात् शूद्रःपुनश्चतुर्थोवर्णएकजातिरुपनयनाभावात्पंचमःपुनर्वर्णोनास्तिसंकीर्णजातीनांत्वश्वतरवत्मातापितृजातिव्य
तिरिक्तजात्यंतरत्वंअयंचवर्णलोपदेशःशास्त्रेसंव्यवहरणार्थ. ४ सर्वेति ब्राह्मणादिषुवर्णेषुचतुर्ष्वपिसमानजातीयासुयथाशास्त्रंप

सर्वेषांब्राह्मणोविद्याद्वृत्त्युपायान्यथाविधि प्रब्रूयादितरेभ्यश्चस्वयंचैवतथाभवेत् २ वैशेष्यात्प्र
कृतिश्रैष्ठ्यान्नियमस्यचधारणात् संस्कारस्यविशेषाच्चवर्णानांब्राह्मणःप्रभुः ३ ब्राह्मणःक्षत्रियोवै
श्यस्त्रयोवर्णाद्विजातयः चतुर्थएकजातिस्तुशूद्रोनास्तितुपंचमः ४ सर्ववर्णेषुतुल्यासुपत्नीष्वक्ष
तयोनिषु आनुलोम्येनसंभूताजात्याज्ञेयास्तएवते ५

रिणीतास्वक्षतयोनिषु आनुलोम्येनब्राह्मणेनब्राह्मण्यां
क्षत्रियेणक्षत्रियायांइत्यनेनानुक्रमेणयेजातास्तेमातापित्रोर्जात्यायुक्तास्तज्जातीयाएवज्ञातव्याः आनुलोम्यग्रहणंचात्रमंदोपयुक्त
मुत्तरश्लोकेउपयोक्ष्यते गवाश्वादिवदवयवविशेषस्यब्राह्मणजात्यभिव्यंजकाभावादेतद्ब्राह्मणादिलक्षणमुक्तम् अत्रचपत्नीग्र
हणादन्यपत्नीजनितानान्नब्राह्मणादिजातित्वम् तथाचदेवलः द्वितीयेनतुयःपित्रासवर्णायांप्रजायते अवावटइतिख्यातःशूद्र
धर्मासजातितः व्रतहीनानसंस्कार्याःस्वतंत्रास्वपियेसुताः उत्पादिताःसवर्णेनव्रात्याइवबहिष्कृताः व्यासः येतुजाताःसमानासुसं
स्कार्यास्युरतोन्यथा याज्ञवल्क्योपि सवर्णेभ्यःसवर्णासुजायंतेहिसजातयः इत्यभिधायविन्नास्वेषविधिःस्मृतइतिब्रुवाणःपत्नी-
त्वादितस्यैवब्राह्मणादिजातित्वनिमित्तकाय ५ स्त्रीष्विति आनुलोम्येनाव्यवहितवर्णजातीयासुभार्यासुद्विजातिभिर्येउत्पादिताः

पुत्राः यथाब्राह्मणेनक्षत्रियायांक्षत्रियेणवैश्यायांतान्मातुर्हीनजातीयत्वदोषान्गर्हितान् पितृसदृशानाहुर्नतुपितृसजातीयान् मन्वादयआहुः पितृसदृशग्रहणान्मातृजातेरुत्कृष्टाःपितृजातितोनिकृष्टाज्ञेयाः एतेषांचनामानिमूर्द्धाभिषिक्तमाहिष्यकरणाख्यानियाज्ञवल्क्यादिभिरुक्तानि वृत्तयश्चैषांलक्षणेनोक्ताः हस्त्यश्वरथशिक्षा अस्त्रधारणंचमूर्द्धाभिषिक्तानाम् नृत्यगीतनक्षत्रजीवनंसस्यरक्षाचमाहिष्याणांद्विजातिशुश्रूषाधनधान्याध्यक्षताराजसेवांतःपुररक्षाचपारशवोग्रकरणानामिति ६ अनंतरेति एवंपारंपर्यागतनयानित्योविधिरनंतरभार्योत्पन्नानामुक्तः एकेनद्वाभ्यांचव्यवहितासूत्पन्नानांयथाब्राह्मणेनवैश्यायांक्षत्रियेण शूद्रायांब्राह्मणेनशूद्रायामिमंवक्ष्यमाणंधर्मादनपेतंविधिंजानीयात् ७ ब्राह्मणादिति कन्याग्रहणादत्रऊढायामित्यध्याहार्यंविन्नास्वेषविधिःस्मृतइतियाज्ञवल्क्येनस्फुटीकृतत्वाच्चब्राह्मणाद्वैश्यकन्यायांऊढायामंबष्ठाख्योजायतेशूद्रकन्यायामूढायांनिषादउत्प

स्त्रीष्वनंतरजातासु द्विजैरुत्पादितान्सुतान् सदृशानेवतानाहुर्मातृदोषविगर्हितान् ६ अनंतरासुजातानांविधिरेषसनातनः द्व्येकांतरासुजातानांधर्म्यंविद्यादिमंविधिम् ७ ब्राह्मणाद्वैश्यकन्यायामंबष्ठोनामजायते निषादःशूद्रकन्यायांयःपारशवउच्यते ८ क्षत्रियाच्छूद्रकन्यायांक्रूराचारविहारवान् क्षत्रशूद्रवपुर्जंतुरुग्रोनामप्रजायते ९ विप्रस्यत्रिषुवर्णेषुनृपतेर्वर्णयोर्द्वयोः वैश्यस्यवर्णेचैकस्मिन्षडेतेऽपसदाःस्मृताः १० क्षत्रियाद्विप्रकन्यायांसूतोभवतिजातितः वैश्यान्मागधवैदेहौराजविप्रांगनासुतौ ११

द्यतेयतःसंज्ञांतरेणपारशवश्चोच्यते ८ क्षत्रियादिति क्षत्रियाच्छूद्रकन्यायामूढायांक्रूरचेष्टःक्रूरकर्मरतिश्चक्षत्रशूद्रस्वभावउग्राख्यःपुत्रोजायते ९ विप्रस्येति ब्राह्मणस्यक्षत्रियादित्रयस्त्रीषुक्षत्रियस्यवैश्यादिवर्णस्त्रियोःवैश्यस्यचशूद्रायांवर्णत्रयाणांएतेषुषट्पुत्राःसवर्णपुत्रकार्यापेक्षयाअपसदाअवसन्नानिकृष्टाःस्युः एवमनुलोमानुक्त्वाप्रतिलोमानाह १० क्षत्रियादिति अत्रविवाहासंभवात्कन्याग्रहणंस्त्रीमात्रप्रदर्शनार्थम् ब्राह्मण्यांक्षत्रियाज्जात्यासूतनामासंजायते वैश्याद्यथाक्रमंक्षत्रियाब्राह्मण्योर्मागधवैदेहाख्यौपुत्रौभवतः एषांचवृत्तयोमनुनैवाभिधास्यंते ११ ᳲ ᳲ

शूद्रादिति शूद्राद्वैश्याक्षत्रियाब्राह्मणीषुक्रमेणायोगवः क्षत्तानृणामधमश्चांडालश्चवर्णानांसंकरोयेषुजनयितव्येषु तेवर्णसंकराजा यंते १२ एकांतरइति एकांतरेपिवर्णेब्राह्मणाद्वैश्यकन्यायामंबष्ठःक्षत्रियाच्छूद्रकन्यायामुग्रः एतावानुलोम्येनयथास्पर्शाद्यर्हौतद्वदेकां तरेप्रतिलोमजननेपिशूद्रात्क्षत्रियायांक्षत्तावैश्याद्ब्राह्मण्यांवैदेहः एतावपिस्पर्शादियोग्यौविज्ञेयौ एकांतरोत्पन्नयोःस्पर्शाद्यनुज्ञाना दनंतरोत्पन्नानांस्पर्शादियोग्यत्वंसिद्धंभवतिअतश्चांडालएवैकःप्रतिलोमतःस्पर्शादौनिरस्यते १३ पुत्राइति मातृदोषादितित्रूपन्य सेत् अनंतरग्रहणमनंतरवच्चैकांतरद्व्यंतरजातिस्त्रीषु आनुलोम्येनउत्पन्नाः पूर्वमुक्ताःपुत्रास्तान्हीनजातिमातृदोषान्मातृदोष व्यपदेश्यानाचक्षते मातृपितृव्यतिरिक्तसंकीर्णजातित्वेपिएषांमातृजातिव्यपदेशकथनंमातृजातिसंस्कारादिधर्मप्राप्त्यर्थम् १४

शूद्रादायोगवःक्षत्ताचंडालश्चाधमोनृणाम् वैश्यराजन्यविप्रासुजायंतेवर्णसंकराः १२ एकांतरेत्वा नुलोम्यादंबष्ठोग्रौयथास्मृतौ क्षत्तृवैदेहकौतद्वत्प्रातिलोम्येपिजन्मनि १३ पुत्रायेनंतरस्त्रीजाःक्रमे णोक्ताद्विजन्मनाम् ताननंतरनाम्नस्तुमातृदोषात्प्रचक्षते १४ ब्राह्मणादुग्रकन्यायामावृतोनामजाय ते आभीरोंबष्ठकन्यायामायोगव्यांतुधिग्वणः १५ आयोगवश्चक्षत्ताचचंडालश्चाधमोनृणाम् प्राति लोम्येनजायंतेशूद्रादपसदास्त्रयः १६ वैश्यान्मागधवैदेहौक्षत्रियात्सूतएवतु प्रतीपमेतेजायंतेपरेप्यप सदास्त्रयः १७ जातोनिषादाच्छूद्रायांजात्याभवतिपुक्कसः शूद्राज्जातोनिषाद्यांतुसवैकुक्कुटकःस्मृ तः १८

ब्राह्मणादिति क्षत्रियेणशूद्रायामुत्पन्नाउग्राउग्राचासौकन्याचेतिउग्रकन्यातस्यांब्राह्मणादावृतनामाजायते ब्राह्मणेन वैश्यायामुत्पन्नाअंबष्ठातस्यांब्राह्मणादाभीराख्योजायते शूद्रेणवैश्यायामुत्पन्नाआयोगवीतस्यांब्राह्मणाद्धिग्वणोजायते १५ आयोगेति आयोगवःक्षत्ताचंडालश्चमनुष्याणामधमइत्येतेत्रयोव्युत्क्रमेणवैश्याक्षत्रियाब्राह्मणीषुपुत्रकार्यादपगतास्त्रयःशू द्राज्जायंते पुत्रकार्याक्षमत्वप्रतिपादनार्थमुक्तानामप्येषांपुनर्वचनंएवमुत्तरश्लोकेउक्तानामपि १६ वैश्यादिति क्षत्रियाब्राह्मण्योर्मा गधवैदेहौक्षत्रियाद्ब्राह्मण्यांसूतइत्येवंप्रातिलोम्येनापरेपित्रयःपुत्रकार्यादपजायंते १७ जातइति निषादाच्छूद्रायांजातोजात्या-

पुक्कसोभवतिनिषादांपुनःशूद्रायांजातःसकुक्कुटकनामास्मृतः १८ क्षत्तुरिति शूद्रेणवैश्यायांजातः क्षत्ताक्षत्रियेणशूद्रायांजा-
ताउग्रातेनतस्यांजातःश्वपाकइत्युच्यतेवैदेहकेनअंबष्ठ्यांब्राह्मणेनवैश्याजातायांवेणइतिकथ्यते, १९ द्विजातयइति द्विजातयः
सवर्णासुस्त्रीषुयान्पुत्रानुत्पादयंतितेचेदुपनयनाख्यव्रतहीनाभवंतितदातानकृतोपनयनान्व्रात्याइत्यनयासंज्ञयाव्यपदिशेद
तऊर्ध्वंत्रयोप्येतेइत्युक्तमपिव्रात्यलक्षणंप्रतिलोमजपुत्रवदस्यापिउपकाराक्षमपुत्रत्वप्रदर्शनार्थमस्मिन्संकीर्णप्रकरणेअनूदितम्
२० व्रात्यादिति व्रात्याद्ब्राह्मणात्सवर्णास्वित्यनुवृत्तेः ब्राह्मण्यांपापस्वभावोभूर्ज्जकंटकोजायतेतथाआवंत्यवाटधानपुष्पधशैखा
जायंतेएकस्यचैतानिदेशभेदप्रसिद्धानिनामानि २१ झल्लोमल्लश्चेति क्षत्रियाद्व्रात्यात्सवर्णायांझल्लमल्लनिच्छिविनटकरणखसद्र-

क्षत्तुर्जातस्तथोग्रायांश्वपाकइतिकीर्त्यते वैदेहकेनत्वंबष्ठ्यामुत्पन्नोवेणउच्यते १९ द्विजातयः
सवर्णासुजनयंत्यव्रतांस्तुयान् तान्सावित्रीपरिभ्रष्टान्व्रात्यानितिविनिर्दिशेत् २० व्रात्यात्तुजायते
विप्रात्पापात्माभूर्जकंटकः आवंत्यवाटधानौचपुष्पधःशैखएवच २१ झल्लोमल्लश्चराजन्याद्व्रात्यान्नि
च्छिविरेवच नटश्चकरणश्चैवखसोद्रविडएवच २२ वैश्यात्तुजायतेव्रात्यात्सुधन्वाचार्यएवच कारु
षश्चविजन्माचमैत्रःसात्वतएवच २३ व्यभिचारेणवर्णानामवेद्यावेदनेनच स्वकर्मणांचत्यागेन
जायंतेवर्णसंकराः २४ संकीर्णयोनयोयेतुप्रतिलोमानुलोमजाः अन्योन्यव्यतिषक्ताश्चतान्प्रवक्ष्या
म्यशेषतः २५ सूतोवैदेहकश्चैवचंडालश्चनराधमः मागधःक्षत्तृजातिश्चतथाऽयोगवएवच २६

विडाख्याजायंते एतान्यप्येकस्यैवनामानि २२ वैश्यादिति वैश्यात्पुनर्व्रात्यात्सवर्णायांसुधन्वाचार्यकारुषविजन्ममैत्रसात्वताख्याजा
यंतेएकस्यचैतान्यपिनामानि २३ व्यभिचारेणेति ब्राह्मणादिवर्णानामन्योन्यस्त्रीगमनेनसगोत्रादिविवाहेनउपनयनरूपस्वकर्मत्या
गेनवर्णसंकरोनामजायते अतोयुक्तमस्मिन्प्रकरणेव्रात्यानामभिधानम् २४ संकीर्णमिति येसंकीर्णयोनयःप्रतिलोमैरनुलोमैश्च
परस्परसंबंधात्जायंतेतान्विशेषेणवक्ष्यामि २५ सूतइति एतेयदुक्तलक्षणाःसूतादयःउत्तरार्थमनूद्यंते २६ ७ ७

एतेइति एतेपूर्वोक्ताःषट्प्रतिलोमजाःस्वयोनिषुस्वतोत्पत्तिंकुर्वंति यथाशूद्रेणवैश्यायांजातआयोगवः आयोगव्यामेवमातृजातौ वैश्यायांप्रवरास्तक्षत्रियाब्राह्मणीयोनिषुचकारादपकृष्टायामपिशूद्रजातौसर्वत्रसदृशान्वर्णान्जनयंतिसदृशत्वंचनपित्रपेक्ष याकिंतुमातृजात्यादिषुचातुर्वर्ण्यस्त्रीष्वेवापत्तृत्वोअधिकगर्हितपुत्रोत्पत्तेर्वक्ष्यमाणत्वात्तत्सदृशान्पितृतोऽधिकगर्हितान्स्व- जातावपिजनयंतीत्येतावदेवाप्रासत्वात् अनेनविधीयते किंतुजघन्यवर्णेनोत्तमवर्णस्त्रीषुजनितत्वात्क्रियादुष्टाआयोगवाद्याः प्रतिलोमजाःक्रियादुष्टाभ्यांचमातापितृभ्यांतुल्याभ्यामपिजनितेआयोगवादिपुत्रेब्रह्महंत्रनंतरजनितोब्रह्महंतृमातापितृजनितवत् अधिकदुष्टएवन्याय्यःसुरुब्राह्मणादिजातीयेनशूद्रब्राह्मण्यादिसजातीयायांजनितः नतुक्रियादुष्टोभयजनितोपि २७ यथेति य- थात्रयाणांवर्णानांक्षत्रियवैश्यशूद्राणांमध्याद्वयोर्वर्णयोः क्षत्रियवैश्ययोर्गमनेब्राह्मणस्यानुलोम्याद्विजउत्पद्यतेसजातीयायांच

एतेषट्सदृशान्वर्णान्जनयंतिस्वयोनिषु मातृजात्यांप्रसूयंतेप्रवरासुचयोनिषु २७ यथात्रयाणां वर्णानांद्वयोरात्मास्यजायते आनंतर्यात्स्वयोन्यांतुतथाबाह्येष्वपिक्रमात् २८ तेचापिबाह्यान्सुब हूंस्ततोप्यधिकदूषितान् परस्परस्यदारेषुजनयंतिविगर्हितान् २९ यथैवशूद्रोब्राह्मण्यांबाह्यंजं तुंप्रसूयते तथाबाह्यतरंबाह्यश्चातुर्वर्ण्येप्रसूयते ३०

द्विजोजायते एवंबाह्येष्वपिक्षत्रियवैश्याभ्यांवैश्यक्षत्रियाभ्यांक्षत्रि याब्राह्मण्योर्जातेषूत्कर्षापकर्षोभवतिशूद्रजातप्रतिलोमापेक्षयाद्विजाद्युत्पन्नप्रतिलोमप्राशस्त्यार्थमिदम् मेधातिथिस्तुद्विजत्वप्रति पादकमेतत्एषांवचनमुपनयनार्थमित्याह तन्नप्रतिलोमजास्तुधर्महीनाइतिगौतमेनसंस्कारनिषेधात् २८ तेचापीति तेचायोग- वादयःषट्परस्परजातीयासुभार्यासुसुबहून्आनुलोम्येप्यधिकदुष्टान्सत्क्रियाबहिर्भूतान्जनयंति तद्यथा आयोगवःक्षत्तृजा- यायामात्मनोहीनतरंजनयति तथाक्षत्ताप्यायोगव्यामात्मनोहीनतरमुत्पादयति एवमन्येष्वपिप्रतिलोमेषुद्रष्टव्यम् २९ यथैवेति य थाब्राह्मण्यांशूद्रोऽपकृष्टंचंडालाख्यंप्राणिनंप्रसूयतेजनयतिएवंबाह्यश्चंडालादिवर्णचतुष्टयेचंडालादिभ्योप्यपकृष्टंपुत्रंप्रसूयते

एतदेव विस्तारयति ३० प्रतिकूलमिति अत्र मेधातिथिगोविंदराजयोर्व्याख्यानं चातुर्वर्ण्यबाह्यश्चंडालक्षत्रायोगवाः शूद्रप्रभवा स्त्रयश्चातुर्वर्ण्ये गच्छंत आत्मनो हीनतरान् परस्परापेक्षया प्रकृष्टोत्कृष्टपंचदशप्रभवत्वात् वर्णान्संपादयंति तद्यथा चंडालः शूद्रायामात्मनो हीनतरं वैश्यां क्षत्रियां ब्राह्मणीं जातेष्वपउत्कृष्टं जनयति एवं वैश्यायां ततोऽप्यपसदं क्षत्रियायां ब्राह्मणीजाताद् उत्कृष्टं जनयति ततोऽपसदं क्षत्रियायां ब्राह्मणीजाताद् उत्कृष्टं ततोऽपि हीनं ब्राह्मण्यां जनयति एवं क्षत्रायोगवावपि चातुर्वर्ण्ये चतुरश्चतुरोऽजनयत इत्येते शूद्रेतरेभ्यश्चंडालक्षत्रायोगवेभ्यः चातुर्वर्ण्ये द्वादशप्रभेदा उत्पद्यंते आत्मनाच चंडाल क्षत्रायोगवास्त्रय इत्येवं शूद्रप्रभवाः पंचदश उत्पद्यंते एवं वैश्यक्षत्रियब्राह्मणप्रभवाः प्रत्येकं पंचदश संभवंति एवं षष्ठिश्चातुर्वर्ण्येन सह चतुःषष्ठिप्रभेदा भवंतीति तेतु परस्परगमनेन नानावर्णान् जनयंतीति नैतन्मनोहरं पूर्वश्लोके षण्णां प्रतिलोमजानां प्रकृतत्वात्तद्विस्तारकथनत्वाच्चास्य अत्रापि श्लोके प्रतिकूलं वर्त्तमाना इत्युपादानात्प्रतिलोममात्रविषयोयं श्लोको नानुलोमजविषयः तथाच वैश्यक्षत्रियब्राह्मणप्रभवाश्च पंचदश

प्रतिकूलं वर्त्तमाना बाह्या बाह्यतरान् पुनः हीना हीनान्प्रसूयंते वर्णान्पंचदशैव तु ३१

संभवंत्येवं षष्ठिरिति न संगच्छते न च संभवमात्रेणैव इयं षष्ठिरुक्ता न दुष्टतया शूद्रप्रभवा योगवक्षत्तृचंडाला एव चातुर्वर्ण्यसंतानोपेताः पंचदश गर्हिता इति वाच्यं यतो वैश्यक्षत्रियाभ्यामपि प्रतिलोमत उत्पादितानां त्रयाणां हीनत्वात्तैरपि चातुर्वर्ण्ये जनितानां गर्हितत्वस्य तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयत इति मनुनैवानंतरं स्फुटमुक्तत्वात् सुवाभ्यामपि तथैव व्याख्यातत्वात् चातुर्वर्ण्येन सह चतुःषष्ठिरिति नैव प्रकृतम् नहि संकीर्णप्रकरणे शूद्रचातुर्वर्ण्यगणनोचिता किंच वर्णान् पंचदश प्रसूयंते इति श्रूयमाण द्वादशजनानुक्त्वा तेचात्म नाचंडालक्षत्रायोगवास्त्रय इत्येवं शूद्रप्रभवाः पंचदशेति न युक्तम् अपिचात्मना सह पंचदश संपादयंतीति न संगच्छते असंपाद्य द्वादशात्मनः पंचदश संपद्यंत इति च व्याख्याने ऽध्याहार एव दोषः तस्मादेवं व्याख्यायते प्रतिकूलं वर्त्तमानाः प्रतिलोमजाः बाह्याद्विजप्रति लोमजेभ्यो निकृष्टत्वात् शूद्रप्रभवायोगवक्षत्तृचंडालास्त्रयः पूर्वश्लोकादनुवर्त्तमाने चातुर्वर्ण्ये स्वजातौ एते षट् सहशानित्यत्रस-

जात्यत्पन्नस्यपितृत्तोगर्हितत्वाभिधानात् आत्मापेक्षया बाह्यंतरान् प्रत्येकंपंचदशपुत्रान्जनयंति तद्यथा आयोगवश्चातुर्वर्ण्य-
स्त्रीषुवायोगव्यांआत्मनोनिकृष्टान् पंचपुत्रान्जनयंतिएवंक्षत्तृचांडालावपिप्रत्येकंपंचपुत्रान्जनयतइत्थंबाह्यास्त्रयःपंचदशपुत्रान्
जनयंतितथानुलोमजेभ्योहीनावैश्यक्षत्रियप्रभवामागधवैदेहसूताआत्मापेक्षयाहीनान् पूर्ववच्चातुर्वर्ण्यस्त्रीषुसजातौप्रत्येकंपंच
पुत्रान्जनयंतोहीना अपित्रयः पंचदशैवपुत्रान्जनयंतिएवंत्रिंशदेतेभवंति अथवा बाह्यशब्दोहीनशब्दश्चप्रत्येवमतिलोमजाना
ह अत्र बाह्याश्चंडालक्षत्रायोगववैदेहमागधसूताःषट्यथोक्तमुत्कर्षान् प्रातिलोम्येनस्त्रीषुवर्त्तमाना बाह्येतरान्पंचदशैवपुत्रा
न्जनयंति तद्यथा चंडालाःक्षत्रियादिषुपंचसुस्त्रीषु क्षत्रायोगव्यादिषुचतसृषु आयोगवोवैदेह्यादितिसृषुवैदेहोमागधीसू
त्योः मागधःसूत्यांसूतस्त्तप्रतिलोमाभावात् प्रातिलोम्येन पंचदशैवपुत्रान्जनयतिपुनरितिनिर्देशात् हीनाःसूतादयश्चांडालांताः

प्रसाधनोपचारज्ञमदासंदासजीवनम् सैरिंध्रंवागुरावृत्तिंसूतेदस्युरयोगवे ३२ मैत्रेयकंतुवैदेहो माधूकंसंप्रसूयते नृन्प्रशंसत्यजस्रंयोघंटाताडोरुणोदये ३३ निषादोमार्गवंसूतेदासंनौकर्मजी विनम् कैवर्त्तमितियंप्राहुरार्यावर्त्तनिवासिनः ३४ मृतवस्त्रभृत्सुनारीषुगर्हितान्नाशनासुच भवंत्या योगवीष्वेतेजातिहीनाःपृथक्त्रयः ३५

षट्यथोक्तमपकर्षात् आनुलोम्येनापिप्रतिलोमोक्तरीत्यात्मापेक्षयाहीनान्
पंचदशैवपुत्रान्जनयंतिएवंत्रिंशदेतेभवंति ३१ प्रसाधनेति केशाचरणादिप्रसाधनांगसंवाहनादिदासकर्मजीवनंपाशबंधनेनमृ
गादिवधाख्यवृत्त्यंतरजीवनंसैरिंध्रनामानंमुखबाहूरुपज्जानामितिश्लोकेवक्ष्यमाणोदस्युरायोगवस्त्रीजातोशूद्रेणवैश्यायामुत्प-
न्नायांजनयतितच्चास्यमृगादिमारणंदेवपित्रौषधार्थंचेदितव्यम् ३२ मैत्रेयेति वैश्याद्ब्राह्मण्यांजातोवैदेहःप्रकृतायामायोगव्यांमैत्रेया
ख्यंमधुरभाषिणंजनयतियःप्रातर्घंटामाहत्यराजप्रभृतीन्सततंनृत्यर्थंस्तौति ३३ निषादइति ब्राह्मणेनशूद्रायांजातोनिषादःप्रागु
क्तायामायोगव्यांमार्गवंदासापरनामानंनौव्यवहारजीविनंजनयतिआर्यावर्त्तदेशवासिनःकैवर्त्तशब्देनकीर्त्तयंति ३४ मृतेति सैरिं
ध्रमैत्रेयमार्गवाहीनजातीयास्त्रयःमृतवस्त्रपरिधानासुक्रूरासूच्छिष्टादिभक्तान्नाशनायोगवीषुपितृभेदाद्भिन्नाभवंति ३५ ६९

एतदेवविस्तारयति ३० प्रतिकूलमिति अत्रमेधातिथिगोविंदराजयोर्व्याख्यानंचातुर्वर्ण्यबाह्यश्चंडालक्षत्रायोगवाः शूद्रप्रभवा
स्त्रयश्चातुर्वर्ण्येगच्छंतआत्मनोहीनतरान्परस्परापेक्षयाप्रकृष्टोत्कृष्टपंचदशप्रभवत्वान्वर्णान्संपादयंति तद्यथाचंडालःशूद्रा
यामात्मनोहीनतरंवैश्यात्क्षत्रियाब्राह्मणीजातेभ्यउत्कृष्टंजनयतिएवंवैश्यायांततोप्यपसदंक्षत्रियायांब्राह्मणीजातादुत्कृष्टंज
नयतिततोपसदंक्षत्रियायांब्राह्मणीजातादुत्कृष्टंततोपिहीनंब्राह्मण्यांजनयतिएवंक्षत्रायोगवावपिचातुर्वर्ण्येचतुरश्चतुरोऽजन
यनइत्येतेशूद्रेतरेभ्यश्चंडालक्षत्रायोगवेभ्यःचातुर्वर्ण्येद्वादशप्रभेदाउत्पद्यंतेआत्मनाचचंडालक्षत्रायोगवास्त्रयइत्येवंशूद्रप्र
भवाःपंचदशउत्पद्यंतेएवंवैश्यक्षत्रियब्राह्मणप्रभवाःप्रत्येकंपंचदशासंभवंतिएवंषष्ठिश्चातुर्वर्ण्येनसहचतुःषष्ठिप्रभेदाभवंतितेतु
परस्परगमनेननानावर्णान्जनयंतीति नैतन्मनोहरंपूर्वश्लोकेषण्णांप्रतिलोमजानांप्रकृतत्वात्तद्विस्तारकथनत्वाच्चास्य अत्रापिश्लो
केप्रतिकूलंवर्त्तमानाइत्युपादानात्प्रतिलोममात्रविषयोयंश्लोकोनानुलोमजविषयः तथाचवैश्यक्षत्रियब्राह्मणप्रभवाश्चपंचदश

प्रतिकूलंवर्त्तमानाबाह्याबाह्यतरान्पुनः हीनाहीनान्प्रसूयंतेवर्णान्पंचदशैवतु ३१

संभवंत्येवंषष्ठिरितिनसंगच्छतेनचसंभवमात्रेणैवइयंषष्ठिरुक्तानदुष्टतयाशूद्रप्रभवायोगवक्षत्तृचंडालाएवचातुर्वर्ण्यसंतानोपेताः
पंचदशगर्हिताइतिवाच्यंयतोवैश्यक्षत्रियाभ्यामपिप्रतिलोमतउत्पादितानांत्रयाणांहीनत्वात्तैरपिचातुर्वर्ण्येजनितानांगर्हितत्वंतथा
बाह्यतरंबाह्यश्चातुर्वर्ण्येप्रसूयतइतिमनुनैवानंतरंस्फुटमुक्तत्वात् युवाभ्यामपितथैवव्याख्यातत्वात्चातुर्वर्ण्येनसहचतुःषष्ठिरिति
सर्वेनैवप्रकृतम् नहिसंकीर्णप्रकरणेशब्दचातुर्वर्ण्यगणनोचिताकिंचवर्णान्पंचदशप्रसूयंतेइतिश्रूयमाणाद्वादशजनात्तुरुक्तातेचात्म
नाचंडालक्षत्रायोगवास्त्रयइत्येवंशूद्रप्रभवाःपंचदशेतिनयुक्तम् अपिचात्मनासहपंचदशासंपादयंतीतिनसंगच्छतेअसंपाद्यद्वाद
शात्मनःपंचदशसंपद्यंतइतिचव्याख्यानेऽध्याहारएवदोषः तस्मादेवंव्याख्यायतेप्रतिकूलंवर्त्तमानाःप्रतिलोमजाःबाह्याद्विजप्रति
लोमजेभ्योनिकृष्टत्वात् शूद्रप्रभवायोगवक्षत्तृचंडालास्त्रयःपूर्वश्लोकादनुवर्त्तमानेचातुर्वर्ण्येस्वजातौएतेषट्सदृशानित्यत्रस-

तादयः प्रतिलोमजास्ते शूद्रधर्माणो नैषामुपनयनमस्ति ४१ तपइति सजातिजानंतरजास्तपःप्रभावेण विश्वामित्रवद्बीजप्रभावे ण ऋष्यशृंगादिवत्कृतत्रेतादौ मनुष्यमध्ये जात्युत्कर्षं गच्छंति अपकर्षं च वक्ष्यमाणहेतुना यांति ४२ शनकैरिति इमा वक्ष्यमाणाः क्षत्रियजातयः उपनयनादिक्रियालोपेन ब्राह्मणानां च याजनाध्यापनप्रायश्चित्ताद्यर्थदर्शनाभावेन शनैः शनैर्लोके शूद्रतां प्राप्ताः ४३ पौंड्रेति पौंड्रादिदेशोद्भवाः क्षत्रियाः संतः क्रियालोपादिना शूद्रत्वमापन्नाः ४४ मुखेति ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादि ना या जातयो बाह्या जातास्ते म्लेच्छभाषायुक्ता आर्यभाषोपेता वा ते दस्यवः सर्वे स्मृताः ४५ येइति ये द्विजानामानुलोम्येन उत्पन्नाः षडे तेऽपसदाः स्मृता इति तेषामपि पितृतो जघन्यत्वेनापसदशब्देन प्रागभिधानादपध्वंसजास्ते द्विजात्युपकारकैरेव निंदितैर्वक्ष्यमाणैः

तपोबीजप्रभावैस्तु ते गच्छंति युगे युगे उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ४२ शनकैस्तु क्रियालो पादिमाः क्षत्रियजातयः वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ४३ पौंड्रकाश्चौड्रद्रविडाः कांबोजा यव नाः शकाः पारदा पल्हवाश्चीनाः किराता दरदाः खशाः ४४ मुखबाहूरुपज्जानां या लोके जातयो बहिः म्ले च्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ४५ ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः ते निंदितैर्वर्त्तये युर्द्विजानामेव कर्मभिः ४६ सूतानामश्वसारथ्यमंबष्ठानां चिकित्सनम् वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ४७ मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च मेदांध्रचुंचुमद्गूनामारण्यपशुहिंसनम् ४८ क्षत्तुग्रपुक्कसानां तु बिलौकोवधबंधनम् धिग्वणानां चर्मकार्यं वेणानां भांडवादनम् ४९

कर्मभिर्जीवे युः ४६ सूतेति सूतानामश्वदमनयोजनादिरथसारथ्यं जीवनार्थं अंबष्ठानामाकायशल्यादिचिकित्सा वैदेहकानामंतःपुरं मागधानां स्थलपथवणिज्या ४७ मत्स्येति निषादानामुक्तानां मत्स्यवधः आयोगवस्य काष्ठतक्षणं मेदांध्रचुंचुमद्गूनां आरण्यपशुमारणम् चुंचुमद्गू च वैदेहकबंदिस्त्रियो ब्राह्मणेन जातौ बौधायनेनोक्तौ बोद्धव्यौ बंदीस्त्री च क्षत्रियेण शूद्रायां जाता सोग्रैव ग्राह्या ४८ क्ष त्त्रग्रेति क्षत्त्रादीनां बिलनिवासिगोधादिवधबंधनं धिग्वणानां तद्विक्रयजीवनं च धिग्वणानामित्यौशनसदर्शनात् अतएवकारस

कारावरइति वैदेह्यामेवजायतइतिउत्तरत्रश्रवणात् अत्राप्याशंकायांसैवसंबध्यतेनिषादाद्वैदेह्यांजातःकारावराख्यश्चर्मच्छेदन
कारीजायतेअतएवऔशनसेकारावाराणांचर्मच्छेदनाचरणमेववृत्तित्वेनोक्तम् वैदेहकसौरिंध्रभेदाख्यौग्रामबहिर्वासिनौअंत
रानिर्देशाद्वैदेहकेनचवैदेह्यांजातस्यगर्हितवैदेहकस्याप्युचितत्वात् कारावरनिषादजात्योश्चात्रश्लोकेसन्निधानात्कारावरनि
षादस्त्रियोरेवक्रमेणजायते ३६ चंडालादिति वैदेह्यांचंडालात्पांडुसोपाकाख्योवेणुव्यवहारजीवीजायतेनिषादेनचवैदेह्या
मेवाहिंडिकाख्योजायतेअस्यचबंधनस्थानेषुबाह्यसंरक्षणादाहिंडिकोनामित्यौशनसेवृत्तिरित्युक्ता समानमाता पितृकत्वेपिका
रावराहिंडिकयोर्वृत्तिभेदसंश्रवणात्व्यपदेशभेदः ३७ चंडालेनेति शूद्रायान्निषादेनजातायांपुक्कस्यांचंडालेनजातःसोपाका
ख्यःपापात्मसर्वदासाधुभिर्निंदितोमारणोचितापराधस्यमूलभूतस्यव्यसनंराजादेशेनमारणंतेनवृत्तिर्यस्यसजायते ३८ निष

कारावरोनिषादात्तुचर्मकारःप्रसूयते वैदेहिकादंध्रमेदौबहिर्ग्रामप्रतिश्रयौ ३६ चंडालात्पांडु
सोपाकस्त्वक्सारव्यवहारवान् आहिंडिकोनिषादेनवैदेह्यामेवजायते ३७ चंडालेनतुसोपाको
मूलव्यसनवृत्तिमान् पुक्कस्यांजायतेपापःसदासज्जनगर्हितः ३८ निषादस्त्रीतुचंडालात्पुत्रमं
त्यावसायिनम् श्मशानगोचरंसूतेबाह्यानामपिगर्हितम् ३९ संकरेजातयस्त्वेताःपितृमातृप्रद-
र्शिताः प्रच्छन्नावाप्रकाशावावेदितव्याःस्वकर्मभिः ४० सजातिजानंतरजाःषट्सुताद्विजधर्मिणः
शूद्राणांतुसधर्माणःसर्वेऽपध्वंसजाःस्मृताः ४१

निषादीचंडालात्अंत्यावसायिसंज्ञंचंडालादिभ्योपिदुष्टतमंश्मशान
वासिनंतद्वृत्तिंचजनयति ३९ संकरइति वर्णसंकरविषयेएताजातयोयस्येयंजनयित्री अयंजनकःसएवंजातीयःपितृमातृकथनपूर्व
कंदर्शिताः तथागूढाःप्रकटावातज्जात्युक्तकर्मानुष्ठानेनज्ञातव्याः ४० सजातीति द्विजातिसमानजातीयासुजाताः तथानुलो-
म्येनोत्पन्नाः ब्राह्मणेनक्षत्रियावैश्ययोःक्षत्रियेणवैश्यायामेवंषट्पुत्राद्विजधर्मिणउपनेयाः ताननंतरजास्त्विति यदुक्तंतत्तज्जा
तिव्यपदेशार्थंसंस्कारार्थमितिकस्यचिद्भ्रमःस्यात् अतएषांद्विजातिसंस्कारार्थमिदंवचनम् येपुनरन्येद्विजात्युत्पन्नाअपिसू-

तादयः प्रतिलोमजास्तेऽशूद्रधर्माणोनैषामुपनयनमस्ति ४१ तपइति सजातिजानंतरजास्तपःप्रभावेणविश्वामित्रवद्वीजप्रभावे
णऋष्यशृंगादिवत्कृतत्रेतादौमनुष्यमध्येजात्युत्कर्षंगच्छंति अपकर्षंचवक्ष्यमाणहेतुनायांति ४२ शनकैरिति इमावक्ष्यमाणाः
क्षत्रियजातयःउपनयनादिक्रियालोपेनब्राह्मणानांचयाजनाध्यापनप्रायश्चित्ताद्यर्थदर्शनाभावेनशनैःशनैर्लोकेशूद्रतांप्राप्ताः ४३
पौंड्रेति पौंड्रादिदेशोद्भवाःक्षत्रियाःसंतःक्रियालोपादिनाशूद्रत्वमापन्नाः ४४ मुखेति ब्राह्मणक्षत्रियवैश्यशूद्राणांक्रियालोपादि
नायाजातयोवास्याजाताम्लेच्छभाषायुक्ताआर्यभाषोपेतावातेदस्यवःसर्वेस्मृताः ४५ येइति येद्विजानामानुलोम्येनउत्पन्नाःषडे
तेऽपसदाःस्मृताइति तेषामपिपितृतोजघन्यत्वेनापसदशब्देनप्रागभिधानादपध्वंसजास्तेद्विजानुपकारकैरेवाभिंदितैर्वक्ष्यमाणैः

तपोबीजप्रभावैस्तुतेगच्छंतियुगेयुगे उत्कर्षंचापकर्षंचमनुष्येष्विहजन्मतः ४२ शनकैस्तुक्रियालो
पादिमाःक्षत्रियजातयः वृषलत्वंगतालोकेब्राह्मणादर्शनेनच ४३ पौंड्रकाश्चौड्रद्रविडाःकांबोजायव
नाःशकाः पारदापल्हवाश्चीनाःकिराताददराःखशाः ४४ मुखबाहूरुपज्जानांयालोकेजातयोबहिः म्ले
च्छवाचश्चार्यवाचःसर्वेतेदस्यवःस्मृताः ४५ येद्विजानामपसदायेचापध्वंसजाःस्मृताः तेनिंदितैर्वर्तये
युर्द्विजानामेवकर्मभिः ४६ सूतानामश्वसारथ्यमंबष्ठानांचिकित्सनम् वैदेहकानांस्त्रीकार्यंमागधानां
वणिक्पथः ४७ मत्स्यघातोनिषादानांत्वष्टिस्त्वायोगवस्यच मेदांध्रचुंचुमद्गूनामारण्यपशुहिंसनम्
४८ क्षत्त्रुग्रपुक्कसानांतुबिलौकोवधबंधनम् धिग्वणानांचर्मकार्यंवेणानांभांडवादनम् ४९

कर्मभिर्जीवि

षुः ४६ सूतेति सूतानामश्वदमनयोजनादिरथसारथ्यंजीवनार्थंअंबष्ठानामाकायशल्यादिचिकित्सावैदेहकानामंतःपुरंमागधानां
स्थलपथवणिज्या ४७ मत्स्येति निषादानामुक्तानांमत्स्यवधःआयोगवस्यकाष्ठतक्षणंमेदांध्रचुंचुमद्गूनांआरण्यपशुमारणम्
चुंचुमद्गूचनैदेहकवंदिस्त्रियोर्ब्राह्मणेनजातौबौधायनेनोक्तौबोद्धव्यौवंदीस्त्रीचक्षत्रियेणशूद्रायांजातासोग्रैवग्राह्या ४८ क्ष-
त्त्रेति क्षत्रादीनांबिलनिवासिगोधादिवधबंधनंधिग्वणानांतद्विक्रयजीवनंचधिग्वणानामित्यौशनसदर्शनात् अतएवकारस्व

रेभ्यः एषांवृत्तिच्छेदः वेणानांकांस्यमुरजादिवाद्यभांडवादनम् ४९ चैत्येति ग्रामादिसमीपेख्यातवृक्षश्चैत्यद्रुमः तन्मूलेश्मश
नपर्वतवनसमीपेषुन्दात्मप्रकाशकाःस्वकर्मभिर्जीवंतोवसेयुः ५० चंडालेति वासांसीति प्रतिश्रयोनिवासः चांडालश्वपाकानांतु
ग्रामाद्बहिर्निवासःस्यात् पात्ररहिताःकर्त्तव्यायत्रलोहादिपात्रेतैर्भुक्तंतत्संस्कृत्यापिनव्यवहर्त्तव्यंधनंचैषांकुक्कुरखरंनवृषभादि
वासांसिचशववस्त्राणिभिन्नशरावादिषुचभोजनंलोहवलयादिचालंकरणंसर्वदाचभ्रमणशीलत्वम् ५१ ५२ नतैरिति ध
र्मानुष्ठानसमयेचंडालश्वपाकैःसहदर्शनादिव्यवहारंनकुर्यात् तेषांचऋणदानग्रहणादिव्यवहारं विवाहश्चसमानजातीयैःस-
हान्योन्यंस्यात् ५३ अन्नमेषामिति अन्नमेषां परायत्तंकार्यंसाक्षादेभ्योनदेयंकिंतुप्रेष्यैर्भिन्नपात्रेदातव्यम् तेचरात्रौग्रामनगरयो

चैत्यद्रुमश्मशानेषुशैलेषूपवनेषुच वसेयुरेतेविज्ञाता वर्त्तयंतःस्वकर्मभिः ५० चंडालश्वपचानांतु
बहिर्ग्रामात्प्रतिश्रयः अपपात्राश्चकर्त्तव्याधनमेषांश्वगर्दभम् ५१ वासांसिमृतचेलानिभिन्नभांडेषु
भोजनम् कार्ष्णायसमलंकारःपरिव्रज्याचनित्यशः ५२ नतैःसमयमन्विच्छेत्पुरुषोधर्ममाचरन् व्यव
हारोमिथस्तेषांविवाहःसदृशैःसह ५३ अन्नमेषांपराधीनंदेयंस्याद्भिन्नभाजने रात्रौनविचरेयुस्ते-
ग्रामेषुनगरेषुच ५४ दिवाचरेयुःकार्य्यार्थंचिह्निताराजशासनैः अबांधवंशवंचैवनिर्हरेयुरितिस्थि-
तिः ५५ वध्यांश्चहन्युःसततंयथाशास्त्रंनृपाज्ञया वध्यवासांसिगृण्हीयुःशय्याश्चाभरणानिच ५६
वर्णापेतमविज्ञातंनरंकलुषयोनिजम् आर्यरूपमिवानार्यंकर्मभिःस्वैर्विभावयेत् ५७

र्नपर्यटेयुः ५४ दिवेति दिवाग्रामादौक्रयविक्रयार्थंराजाज्ञयाचिन्हांकिताः संतःपर्यटेयुः अनाथंचशवंग्रामान्निर्हरेयुरितिशा-
स्त्रमर्यादा ५५ वध्यांश्चेति वध्यांश्चशास्त्रानतिक्रमेणशूलारोपणादिनासर्वदाराजाज्ञयाहन्युः तद्वस्त्रशय्यालंकारांश्चगृण्हीयुः
५६ वर्णेति वर्णत्वादपेतंमनुष्यंसंकरजातंलोकेनस्तथात्वेनाविज्ञातंअतएवार्यसदृशंवस्तुतःपुनरनार्य्यंनिंदितानुरूपाभिश्चे-
ष्टाभिर्वक्ष्यमाणाभिर्निश्चिनुयात् ५७ अनार्यतेति निष्ठुरत्वपरुषभाषित्वहिंस्रत्वविहिताननुष्ठानत्वानिसंकरजातित्वंप्रसि

नृलोकेप्रकटीकुर्वंतियस्मात् ५८ पित्र्यंवेति असौसंकरजातोदुष्टयोनिः पितृसंबंधिदुष्टस्वभावत्वंसेवतेमातृसंबंधिवोभयसंबं-
धिवानकदाचिदसावात्मकारणंगोपयितुंशक्नोति ५९ कुलेति महाकुलप्रसूतस्यापियस्ययोनिसंकरःप्रच्छन्नोभवतिसमनुष्योजन-
कस्वभावंस्तोकंप्रचुरंवासेवतएव ६० यत्रेति यत्रभिन्नादेशे एतेवर्णसंकरावर्णानांदूषकाजायंतेतद्राष्ट्रंराष्ट्रवासिजनैःसहशीघ्रमेवना-
शमेति तस्माद्राज्ञावर्णानांसंकरोनिरसनीयः ६१ ब्राह्मणेति गोब्राह्मणस्त्रीबालानामन्यतरस्यापिपरित्राणार्थंदुष्टप्रयोजनानपे-
क्षःप्राणत्यागःप्रतिलोमजानांस्वर्गप्राप्तिकारणम् ६२ अहिंसेत्यादि हिंसात्यागोयथार्थाभिधानम् अन्यायेनपरधनस्याग्रहणंमृ-
ज्जलादिनाविशुद्धिरिंद्रियसंयमइत्येवंधर्मसंक्षेपंचातुर्वर्ण्येऽप्येवंमनुराहप्रकरणसामर्थ्यात्संकीर्णानामप्ययंधर्मोवेदितव्यः

अनार्यतानिष्ठुरताक्रूरतानिष्क्रियात्मता पुरुषंव्यंजयंतीहलोकेकलुषयोनिजम् ५८ पित्र्यंवाभज-
तेशीलंमातुर्वोभयमेववा नकथंचनदुर्योनिःप्रकृतिंस्वांनियच्छति ५९ कुलेमुख्येऽपिजातस्यय-
स्यस्याद्योनिसंकरः संश्रयत्येवतच्छीलंनरोऽल्पमपिवाबहु ६० यत्रत्वेतेपरिध्वंसाज्जायंतेवर्णदूषकाः
राष्ट्रिकैःसहतद्राष्ट्रंक्षिप्रमेवविनश्यति ६१ ब्राह्मणार्थेगवार्थेवादेहत्यागोऽनुपस्कृतः स्त्रीबालाभ्युपप-
त्तौचबाह्यानांसिद्धिकारणम् ६२ अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः एतंसामासिकंधर्मंचातुर्व-
र्ण्येऽब्रवीन्मनुः ६३ शूद्रायांब्राह्मणाज्जातःश्रेयसाचेत्प्रजायते अश्रेयान्श्रेयसींजातिंगच्छत्यासप्त-
माद्युगात् ६४

इदानींसर्ववर्णेषुतुल्यास्तित्वक्तलक्षणव्यतिरेकेणापिब्राह्मण्यादिदर्शयितुमाह ६३ शूद्रेति शूद्रायांब्रा-
ह्मणाज्जातःपारशवाख्योवर्णःप्रजायतइतिसामर्थ्यात्स्त्रीरूपःस्यात् सायदिस्त्रीब्राह्मणेनोढासतीप्रसूयतेसादुहितरमेवज-
नयतिसाप्यन्येनब्राह्मणेनोढासतीदुहितरमेवजनयतिसाप्येवमेवंसप्तमेयुगेजन्मनिसपारशवाख्योवर्णोबीजप्राधान्यात् ब्रा-
ह्मण्यंप्राप्नोति आसप्तमाद्युगादित्यभिधानात्सप्तमेजन्मनिब्राह्मणःसंपद्यतइत्यर्थः ६४ शूद्रइति एवंपूर्वश्लोकोक्तरीत्याशूद्रो
ब्राह्मणतांयातिब्राह्मणः शूद्रतामेतिब्राह्मणोत्रब्राह्मणात्शूद्रायांसुतस्तनः पारशवोज्ञेयःसयदिपुमान्केवलशूद्रोढाहेनतस्यांपुमां-

समेवजनयतिसोपिकेवलःशूद्रोढ्याहेनापरंपुमांसमेवमेजनयतिसोप्येवंतदासब्राह्मणःसप्तमंजन्मप्राप्तःकेवलंशूद्रतांक्रमेणप्राप्नो
तिएवंक्षत्रियाद्वैश्याच्चशूद्रायांजातस्योत्कर्षापकर्षौजानीयात् किंतुजातेरपकर्षात्जात्युत्कर्षोयुगेज्ञेयःसप्तमेपंचमेपिवाइतियाज्ञ
वल्क्यदर्शनाच्च क्षत्रियाज्जातस्यपंचमेजन्मनिउत्कर्षापकर्षौवोद्धव्यौवैश्याज्जातस्यततोप्युत्कर्षात् याज्ञवल्क्येनापिशब्देनपक्षां
तरस्यसंगृहीतत्वात् चउद्व्यास्यानुरोधाच्चतृतीयेजन्मनिउत्कर्षापकर्षौज्ञेयौ अनेनैवन्यायेन ब्राह्मणेनवैश्यायांजातस्यपंचमेज
न्मनिउत्कर्षापकर्षौक्षत्रियायांजातस्यतृतीयेक्षत्रियेणवैश्यायांजातस्यतृतीयएव ६५ अनार्येति एकःशूद्रायांयदृच्छयाअनू
ढायामपिब्राह्मणादुत्पन्नोअन्यश्च ब्राह्मण्यांशूद्राज्जातः द्वयोर्मध्ये कश्चोत्पन्नस्यश्रेयस्त्वमितिचेत्संशयःस्यात् संशयबीजंच
याबीजोत्कर्षात् ब्राह्मणात्शूद्रायांजातःसाधुःशूद्रःएवंक्षेत्रोत्कर्षाद्ब्राह्मण्यामपिशूद्रेणजातःकिमितिसाधुःशूद्रोनस्यात् तत्र

शूद्रोब्राह्मणतामेतिब्राह्मणश्चैतिशूद्रताम् क्षत्रियाज्जातमेवंतुविद्याद्वैश्यात्तथैवच ६५ अनार्या
यांसमुत्पन्नोब्राह्मणात्तुयदृच्छया ब्राह्मण्यामप्यनार्यात्तुश्रेयस्त्वंक्वेतिचेद्भवेत् ६६ जातोनार्यामना
र्यायामार्यादार्योभवेद्गुणैः जातोऽप्यनार्यादार्यायामनार्यइतिनिश्चयः ६७ तावुभावप्यसंस्कार्यावि
तिधर्मोव्यवस्थितः वैगुण्याज्जन्मनःपूर्वउत्तरःप्रतिलोमतः ६८ सुबीजंचैवसुक्षेत्रेजातंसंपद्यतेयथा
तथाऽर्याज्जातआर्यायांसर्वसंस्कारमर्हति ६९

निर्णयमाह ६६ जातइति शूद्रायांस्त्रियांब्राह्मणाज्जातःस्मृत्यु
क्तैः पाकयज्ञादिभिर्गुणैरनुष्ठीयमानैर्युक्तः प्रशस्योभवतिशूद्रेणपुनर्ब्राह्मण्यांजातः प्रतिलोमतउत्पन्नतयाशूद्रधर्मेष्वप्य
नधिकारादप्रशस्यइतिनिश्चयःन्यायप्राप्तोप्यर्थोवचनप्रामाण्यादत्रबोध्यते ६७ तावुभाविति पारशवचंडालौद्वावप्यनुपनेया
वितिव्यवस्थिताशास्त्रमर्यादापूर्वःपारशवःशूद्राजातत्वेनजातिवैगुण्यादनुपनेयःप्रातिलोम्येनशूद्रेणब्राह्मण्यांजातत्वात्
इत्युत्तरत्वेनानुपनेयः ६८ सुबीजमिति यथाशोभनबीजंशोभनक्षेत्रेजातंसमृद्धंभवतिएवंद्विजातेर्द्विजातिस्त्रियांसवर्णाया
मानुलोम्येनच क्षत्रियावैश्ययोर्जातःसवर्णसंस्कारंक्षत्रियवैश्यसंस्कारंचसर्वश्रौतस्मार्त्तंचार्हतिनच पारशवचंडालावि
त्यादर्थार्थमेतत् दर्शनांतराण्युक्तस्यैवार्थस्यस्थैर्यार्थमाह ६९ बीजमिति केचिसंडिताबीजंस्तुवंतिहरण्यादुत्पन्नश्चर्ष्यशृं

गादेर्ब्रह्मसुनित्वदर्शनात् अपरेपुनः क्षेत्रंस्तुवंतिक्षेत्रस्वामिपुत्रत्वदर्शनात् अन्येपुनर्बीजक्षेत्रेउभेअपिस्तुवंतिस्तबीजस्यसुक्षेत्रे समृद्धिदर्शनात् एतस्मिन्नभेदेवक्ष्यमाणेयंव्यवस्थाज्ञेया ७० अक्षेत्रइति ऊषरप्रदेशेबीजमुप्तंफलमदददंतरालएवविनश्यति शोभनमपिक्षेत्रंबीजरहितंस्थंडिलमेवकेवलंस्यात् नतुसस्यमुत्पद्यतेतस्मात्स्वस्वेकन्निंदयास्तबीजंचैवस्तक्षेत्रइतिप्रागुक्तंउभयप्रा धान्यमेवाभिहितम् इदानींबीजप्राधान्यपक्षेदृष्टांतमाह ७१ यस्मादिति यस्माद्बीजमाहात्म्येनतिर्यग्जातिहरिण्यादिजाताअपि ऋष्यशृंगादयोमुनित्वंप्राप्ताः पूजिताश्चअभिवाद्यत्वादिनावेदज्ञानादिनाप्रशस्तावाचासंस्तुताः तस्माद्बीजंप्रस्तूयतेएतच्चबीजप्रा धान्यनिगमनंबीजयोन्योर्मध्येबीजोत्कृष्टाजातिःप्रधानमित्येवंपरतयाबोद्धव्यम् ७२ अनार्यमिति शूद्रंद्विजातिकर्मकारिणंद्विजा

बीजमेकेप्रशंसंतिक्षेत्रमन्येमनीषिणः बीजक्षेत्रेतथैवान्येतत्रेयंतुव्यवस्थितिः ७० अक्षेत्रेबीजमु त्सृष्टमंतरैवविनश्यति अबीजकमपिक्षेत्रंकेवलंस्थंडिलंभवेत् ७१ यस्माद्बीजप्रभावेणतिर्यग्जाऋ षयोऽभवन् पूजिताश्चप्रशस्ताश्चतस्माद्बीजंप्रशस्यते ७२ अनार्यमार्यकर्माणमार्यंचानार्यकर्मिणं संप्रधार्याब्रवीद्धातानसमौनासमाविति ७३ ब्राह्मणाब्रह्मयोनिस्थायेस्वकर्मण्यवस्थिताः तेसम्यगु पजीवेयुःषट्कर्माणियथाक्रमम् ७४ अध्यापनमध्ययनंयजनंयाजनंतथा दानंप्रतिग्रहश्चैवषट्क र्माण्यग्रजन्मनः ७५ षण्णांतुकर्मणामस्यत्रीणिकर्माणिजीविका याजनाध्यापनेचैवविशुद्धाच्चप्रतिग्र हः ७६

तंचशूद्रकर्मकारिणंब्रह्माविचार्यनसमौनासमावित्यवोचत् यतः शूद्रोद्विजातिकर्मापिनद्विजातिसमःतस्यानधिकारि णोद्विजातिकर्माचरणेपितत्साम्याभावात् एवंशूद्रकर्मापिद्विजातिःनशूद्रसमःनिषिद्धसेवनेनजात्युत्कर्षस्यानपायात् नाप्यसमौ निषिद्धाचरणेनोभयोःसाम्यात् तस्माद्यद्यस्यविगर्हितंतत्तेननकर्तव्यमितिसंकरपर्यंतवर्णधर्मोपदेशः इदानींब्राह्मणानामापद्ध र्मप्रतिपादयिष्यन्निदमाह ७३ ब्राह्मणाइति येब्राह्मणाब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाःस्वकर्मानुष्ठाननिरताश्चतेषट्कर्माणि वक्ष्यमाणान्यध्यापनादीनिक्रमेणसम्यगनुतिष्ठेयुः तानिकर्माण्याह ७४ अध्येति अध्यापनाध्ययनेसांगस्यवेदस्य तथायजन याजनेदानप्रतिग्रहौचेतिएतानिषट्कर्माणिब्राह्मणस्यवेदितव्यानि ७५ षण्णामिति अस्यब्राह्मणस्यएषामध्यापनादीनांष

णांकर्मणामध्यायाजनमध्यापनंद्विजातिभ्योधनंलिप्सेत्प्रशस्तेभ्योद्विजइतिवचननिर्देशाद्विजातेःप्रतिग्रहइत्येतानित्रीणिकर्माणिजीवनार्थानिज्ञेयानि ७६ त्रयोधर्माइति ब्राह्मणापेक्षयाक्षत्रियस्याध्यापनयाजनप्रतिग्रहाख्यानिवृत्त्यर्थानित्रीणिकर्माणिनिवर्तंते अध्ययनयागदानानितुतस्यापिभवंति ७७ वैश्यंप्रतीति यथाक्षत्रियस्याध्यापनयाजनप्रतिग्रहानिवर्त्ततेतथावैश्यस्यापीतिशास्त्रव्यवस्था यस्मान्मनुःप्रजापतिःतौक्षत्रियवैश्यौप्रतितानिवृत्त्यर्थानिकर्माणिकर्त्तव्यत्वेननोक्तवान्एवंवैश्यस्याप्यध्ययनयागदानानिभवंति ७८ शस्त्रास्त्रेति शस्त्रंखड्गादिअस्त्रंबाणादिएतद्धारणंप्रजारक्षणायक्षत्रियस्यचवृत्त्यर्थम् वाणिज्यपशुरक्षणकर्माणिवैश्यस्यजीवनार्थानि धर्मार्थाःपुनरनयोर्दानाध्ययनयागाभवंति ७९ वेदेति वेदाभ्यासोऽध्यापनवृत्त्यर्थाभ्यांसद्वोप

त्रयोधर्मानिवर्त्तंतेब्राह्मणात्क्षत्रियंप्रति अध्यापनंयाजनंचतृतीयश्चप्रतिग्रहः ७७ वैश्यंप्रतितथैवैतेनिवर्त्तेरन्निति स्थितिः नतौप्रतिहितान्धर्मान्मनुराहप्रजापतिः ७८ शस्त्रास्त्रभृत्त्वंक्षत्रस्यवणिक्पशुकृषिर्विशः आजीवनार्थंधर्मस्तुदानमध्ययनंयजिः ७९ वेदाभ्यासोब्राह्मणस्यक्षत्रियस्यचरक्षणम् वार्त्ताकर्मैववैश्यस्यविशिष्टानिस्वकर्मसु ८० अजीवंस्तुयथोक्तेनब्राह्मणःस्वेनकर्मणा जीवेत्क्षत्रियधर्मेणसह्यस्यप्रत्यनंतरः ८१ उभाभ्यामप्यजीवंस्तुकथंस्यादितिचेद्भवेत् कृषिगोरक्षमास्थायजीवेद्वैश्यस्यजीविकाम् ८२

देशात्तद्ब्राह्मणस्य प्रजारक्षणंक्षत्रियस्य वाणिज्यंपाशुपाल्यंवैश्यस्य एतान्येतेषांवृत्त्यर्थकर्मसुश्रेष्ठानि अधुनाआपद्धर्ममाह ८० अजीवन्निति यथोक्तेनाध्यापनादिस्वकर्मणाब्राह्मणोनित्यकर्मानुष्ठानकुटुंबसंवर्द्धनपूर्वकमजीवन् क्षत्रियकर्मणाग्रामनगररक्षणादिनाजीवेत् यस्मात्क्षत्रियधर्मोस्यसन्निकृष्टवृत्तिः ८१ उभाभ्यामिति ब्राह्मणउभाभ्यांस्ववृत्तिभ्यामजीवन्केनप्रकारेणवर्त्ततेतियदिसंशयःस्यात्तदाकृषिपशुरक्षणेआश्रित्यवैश्यस्यवृत्तिमनुतिष्ठेत् कृषिगोरक्षंवाणिज्यदर्शनार्थंतथाच विक्रेयाणिवक्ष्यतिस्वयंकृतंचेदंकृष्यादिब्राह्मणापवृत्तिः अस्वयंकृतस्यऋतामृताभ्यांजीवेतइत्यादिनापद्येवनिहितत्वात् संप्रतिकृष्यादेर्बलाबलमाह ८२ वैश्येति ब्राह्मणःक्षत्रियोऽपिवावैश्यवृत्त्यापिजी

वन्भूमिष्ठजंतुहिंसाबहुलांबलीवर्द्दादिपराधीनां कृषिं यत्नतस्त्यजेत् अतः पशुपालनाद्यभावे कृषिः कार्येति द्रष्टव्यम् क्षत्रियोपि
वेत्कृपादानात्क्षत्रियस्याप्यात्मीयवृत्त्यभावे वैश्यवृत्तिरस्तीत्यभिगम्यते ८३ कृषिमिति साध्विदं जीवनमिति कृषिं केचिन्मन्यंते-
सा पुनर्जीविका साधुभिर्निंदिता यस्माद्धलकुद्दालादिलोहमुखं तं काष्ठं भूमिं भूमिष्ठजंतूंश्च हंति ८४ इदं तु वृत्तीति ब्राह्मणस्य क्षत्रि
यस्य चात्मीयवृत्तेरसंभवे धर्मप्रतियथोक्तन्निष्ठां तत्त्वं त्यजतो वैश्येन यद्विक्रेतव्यं द्रव्यजातं तदर्जितं वक्ष्यमाणवर्ज्जनीयं धनवृद्धिकरं
विक्रेयं तानि वर्जनीयान्याह ८५ सर्वेति सर्वान् चोद्यमानानधर्मान् यथासिद्धार्थं तिलपाषाणलवणपशुमनुष्यान्न विक्रीणीत
रसत्वेनैव लवणस्य निषेधसिद्धौ विशेषेण निषेधो दोषगौरवज्ञापनार्थं तच्च प्रायश्चित्तगौरवार्थमेव मन्यस्यापि पृथग्निषेधो व्या-

वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोपि वा हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ८३ कृषिं सा
ध्विति मन्यंते सा वृत्तिः सद्विगर्हिता भूमिं भूमिशयांश्चैव हंति काष्ठमयोमुखम् ८४ इदं तु वृत्तिवैकल्या-
त्त्यजतो धर्मनैपुणम् विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनम् ८५ सर्वान् रसानपोहेत कृतान्नं च तिलैः
सह अश्मनो लवणं चैव पशवो ये च मानुषाः ८६ सर्वं च तांतवं रक्तं शाणक्षौमाविकानि च अपि चेत्स्यु
ररक्तानि फलमूले तथौषधीः ८७ अपः शस्त्रं विषं मांसं सोमं गंधांश्च सर्वशः क्षीरं क्षौद्रं दधि घृतं तैलं
मधु गुडं कुशान् ८८ आरण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च मद्यं नीलिं च लाक्षां च सर्वांश्चैकशफां
स्तथा ८९

ख्येयः ८६ सर्वमिति सर्वं तंतुनिर्मितं वस्त्रं कुसुंभादिरक्तं वर्जयेत् शणक्षुमातंतुमयान्याविकलोमभवानि
च यद्यलोहितान्यपि भवेयुः तथापि न विक्रीणीत तथा फलमूलगुडूच्यादीनि वर्ज्जयेत् ८७ अप इति जललोहविषमांससोम
क्षीरदधिघृततैलगुडदर्भान् तथा गंधवंति सर्वाणि कर्पूरादीनि क्षौद्रं माक्षिकं मधु मधूच्छिष्टं सप्तामरसधूच्छिष्टेति याज्ञवल्क्येन प
ठितं वर्जयेत् ८८ आरण्यानिति आरण्यान्सर्वान् हस्त्यादीन्दंष्ट्रिणः सिंहादीन् तथा पक्षिजलजंतून् मद्यादीन् एकशफान् अश्वादी
न्न विक्रीणीत ८९ काममिति कर्षकः स्वयमेव कर्षणेन तिलानुत्पाद्य द्रव्यांतरेण मिश्रानुत्पत्त्यनंतरमेव न तुलाभार्यकालांतरं प्र-

तादृशधर्मनिमित्तमिच्छतोविक्रीणीतनिषिद्धस्यतिलविक्रयस्यधर्मार्थमयंप्रतिप्रसवः ९० भोजनेति भोजनाभ्यंगदानव्यतिरि
क्तंयदन्यन्निषिद्धंविक्रयादितिलानांकुरुतेतेनपितृभिःसहकृमिलंप्राप्तःकुक्कुरपुरीषेमज्जति ९१ सद्यइति मांसलाक्षालवणवि
क्रयैर्ब्राह्मणस्तत्क्षणादेवपततीतिदोषगौरवख्यापनार्थमेतत् पंचानामेवमहापातकिनांपातित्यहेतूनांवक्ष्यमाणत्वात् क्षीरवि
क्रयात्त्र्यहेणशूद्रतांप्राप्नोतिएतदपिदोषगौरवात्प्रायश्चित्तगौरवख्यापनार्थम् ९२ इतरेषामिति ब्राह्मणउक्तेभ्योमांसादिभ्यो
ऽन्येषामनिषिद्धानांपण्यानांइच्छातोनतुप्रमादात्द्रव्यांतरसंश्लिष्टानांसप्तरात्रविक्रयणेनवैश्यत्वंगच्छति ९३ रसेति रसागुडादयोरसै
र्घृतादिभिःपरिवर्तनीयाः लवणंपुनःरसांतरेणनपरिवर्तनीयंसिद्धान्नंचामान्नेनपरिवर्तनीयंतिलाधान्येनधान्यप्रस्थेनेत्येवंतत्-

काममुत्पाद्य कृष्यांतुस्वयमेवकृषीवलः विक्रीणीततिलान्शूद्रान् धर्मार्थमचिरस्थितान् ९० भोजना
भ्यंजनाद्दानाद्यदन्यत्कुरुतेतिलैः कृमिभूतःश्वविष्ठायांपितृभिःसहमज्जति ९१ सद्यःपततिमांसेन
लाक्षयालवणेनच त्र्यहेणशूद्रीभवतिब्राह्मणःक्षीरविक्रयात् ९२ इतरेषांतुपण्यानांविक्रयादिहका
मतः ब्राह्मणःसप्तरात्रेणवैश्यभावन्नियच्छति ९३ रसारसैर्निमातव्यानत्वेवलवणंरसैः कृतान्नंचा
कृतान्नेनतिलाधान्येनतत्समाः ९४ जीवेदेतेनराजन्यःसर्वेणाप्यनयंगतः नत्वेवज्यायसींवृत्तिमभिम
न्येतकर्हिचित् ९५ योलोभादधमोजात्याजीवेदुत्कृष्टकर्मभिः तंराजानिर्धनंकृत्वाक्षिप्रमेवप्रवासयेत्
९६ वरंस्वधर्मोविगुणोनपारक्यःस्वनुष्ठितः परधर्मेणजीवन्हिसद्यःपततिजातितः ९७

त्समाःपरिवर्तनीयाः ९४ जीवे
दिति क्षत्रियःआपदंप्राप्तःएतेनेत्यभिधायसर्वेणेत्यभिधानात्ब्राह्मणगोचरतयानिषिद्धेनापिरसादिविक्रयणेनवैश्यवज्जी
वेन्नपुनःकदाचिद्ब्राह्मणजीविकामाश्रयेत् नकेवलंक्षत्रियः क्षत्रियवदन्योपि ९५ योलोभादिति योनिकृष्टजातिःसन् लोभादु
त्कृष्टजातिविहितकर्मभिर्जीवेत् तंराजागृहीतसर्वस्वंकृत्वातदानीमेवदेशान्निःसारयेत् ९६ वरमिति विगुणमपिस्वकर्मकर्तुं
न्याय्यंनपरकीयंसंपूर्णमपियस्माज्जात्यंतरविहितकर्मणाजीवन्तत्क्षणादेवस्वजातितःपततीतिदोषोत्कर्षनार्थः ९७

वैश्यइति वैश्यःस्ववृत्त्याजीवितुमशक्नुवन्शूद्रवृत्त्यापिद्विजातिशुश्रूषयाउच्छिष्टभोजनादीन्यकुर्वन्वर्त्तेतनिस्तीर्णापत्क्रमशःशू
द्रवृत्तितोनिवर्त्तेत ९८ अशक्नुवन्निति शूद्रःद्विजातिशुश्रूषांकर्त्तुमक्षमःक्षुदवसन्नपुत्रकलत्रःसूपकारादि कर्मभिर्जीवेत् ९९
यैरिति पूर्वोक्तकारुकर्मविशेषाभिधानार्थइदंयैःकर्मभिःकृतैर्द्विजातयःपरिचर्यंतेतानिचकर्माणितक्षणादीनिशिल्पानिचचित्रलि
खितादीनिनानाप्रकाराणिकुर्यात् १०० वैश्येति ब्राह्मणोवृत्त्यभावपीडितोअवसादंगच्छन्क्षत्रियवैश्यवृत्तिमनुतिष्ठेत्स्वधर्मोवि
गुणइत्युक्तत्वात्स्ववृत्तावेववर्त्तमानइमांवक्ष्यमाणांवृत्तिमनुतिष्ठेत् अतश्चविगुणप्रतिग्रहादिस्ववृत्त्यसंभवेपरवृत्त्याश्रयणंज्ञेयम्
१०१ सर्वतइति ब्राह्मणआपदंप्राप्तःसर्वेभ्योपिनिंदिततमेभ्यःक्रमेणप्रतिग्रहंकुर्यात् अत्रार्थांतरन्यासोनामालंकारःयस्मात्पवित्र

वैश्योजीवन्स्वधर्मेणशूद्रवृत्त्यापिवर्त्तयेत् अनाचरन्नकार्याणिनिवर्त्तेतचशक्तिमान् ९८ अशक्नुवंस्तु
शुश्रूषांशूद्रःकर्त्तुंद्विजन्मनाम् पुत्रदारात्ययंप्राप्तोजीवेत्कारुककर्मभिः ९९ यैःकर्मभिःप्रचरितैःशुश्रूष्यंते
द्विजातयः तानिकारुककर्माणिशिल्पानिविविधानिच १०० वैश्यवृत्तिमनातिष्ठन्ब्राह्मणःस्वेपथिस्थि
तः अवृत्तिकर्षितःसीदन्निमंधर्मंसमाचरेत् १०१ सर्वतःप्रतिगृह्णीयाद्ब्राह्मणस्त्वनयंगतः पवित्रंदुष्य
तीत्येतत्धर्मतोनोपपद्यते १०२ नाध्यापनाद्याजनाद्वागर्हिताद्वाप्रतिग्रहात् दोषोभवतिविप्राणांज्व-
लनांबुसमाहिते १०३ जीवितात्ययमापन्नोयोऽन्नमत्तियतस्ततः आकाशमिवपंकेननसपापेनलिप्यते
१०४ अजीगर्त्तःसुतंहंतुमुपासर्पद्बुभुक्षितः नचालिप्यतपापेनक्षुत्प्रतीकारमाचरन् १०५

गंगारथ्योदकादिनादु
ष्यतीत्येतत्शास्त्रस्थित्यानोपपद्यतेयस्मात् १०२ नाध्यापनादिति ब्राह्मणानामापदिगर्हिताध्यापनयाजनप्रतिग्रहैरधर्मोनभवति
यस्मात्स्वभावतःपवित्रत्वेनाग्न्युदकतुल्यास्ते १०३ जीवितेति यःप्राणात्ययंप्राप्तःप्रतिलोमजादन्नमश्नातिसोंऽतरिक्षमिवकर्द
मेनपापेननसंबध्यते अत्रपरकृतिरूपोऽर्थवादः १०४ अजीगर्त्तइति ऋषिरजीगर्त्ताख्योबुभुक्षितःसन्पुत्रंशुनःशेफनामानं
स्वयंविक्रीतंयज्ञेगोशतलाभायविशसिताभूत्वाहंतुंप्रचक्रमेनचक्षुत्प्रतीकारार्थंतथाकुर्वन्पापेनलिप्तःएतच्चबह्वृचब्राह्मणेशु
नःशेफाख्यानेषुव्यक्तमुक्तम् १०५

श्वमांसमिति वामदेवाख्यऋषिर्द्धर्माधर्मज्ञः क्षुधार्त्तः प्राणत्राणार्थंश्वमांसंखादितुमिच्छन्दोषेणनलिप्तवान् १०६ भरद्वाज
इति भरद्वाजाख्योमुनिः महातपस्वीपुत्रसहितोनिर्जनेवनेअरण्येउषित्वाक्षुत्पीडितोवृधनाम्नस्तक्ष्णोबह्वीर्गाःप्रतिगृहीतवान्
१०७ क्षुधार्त्तइति ऋषिर्विश्वामित्रोधर्माधर्मज्ञः क्षुत्पीडितः चंडालहस्ताद्गृहीत्वाकुक्कुरजघनमांसंभक्षितुमध्यवसितवान् १०८
प्रतिग्रहादिति गर्हितानामप्यध्यापनयाजनप्रतिग्रहाणांमध्यात्ब्राह्मणस्यासत्प्रतिग्रहोनिकृष्टःपरलोकेनरकहेतुः ततश्चापदि
प्रथमंनिंदिताध्यापनयाजनयोःप्रवर्त्तितव्यंतदसंभवेत्वसत्प्रतिग्रहइत्येवंपरमेतत् अत्रहेतुमाह १०९ याजनेति याजनाध्यापने
आपद्यनापदिचउपनयनसंस्कृतात्मनांद्विजातीनामेवक्रियतेप्रतिग्रहस्तुपुनर्निकृष्टजातेः शूद्रादपिक्रियतेतस्मादसौताभ्यांगर्हितः११

श्वमांसमिच्छन्नार्त्तोऽत्तुंधर्माधर्मविचक्षणः प्राणानांपरिरक्षार्थंवामदेवोनलिप्तवान् १०६ भरद्वाजःक्षु
धार्त्तस्तुसपुत्रोविजनेवने बह्वीर्गाःप्रतिजग्राहवृधोस्तक्ष्णोमहातपाः १०७ क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वा
मित्रःश्वजाघनीम् चंडालहस्तादादायधर्माधर्मविचक्षणः १०८ प्रतिग्रहाद्याजनाद्वातथैवाध्यापनादपि
प्रतिग्रहःप्रत्यवरःप्रेत्यविप्रस्यगर्हितः १०९ याजनाध्यापनेनित्यंक्रियेतेसंस्कृतात्मनाम् प्रतिग्रहस्तुक्रि
यतेशूद्रादप्यन्त्यजन्मनः ११० जपहोमैरपैत्येनोयाजनाध्यापनैःकृतम् प्रतिग्रहनिमित्तंतुत्यागेनतप
सैवच १११ शिलोञ्छमप्याददीतविप्रोऽजीवन्यतस्ततः प्रतिग्रहाच्छिलःश्रेयांस्ततोप्युञ्छःप्रशस्यते ११२
सीदद्भिःकुप्यमिच्छद्भिर्धनेवापृथिवीपतिः याच्यःस्यात्स्नातकैर्विप्रैरदित्संस्त्यागमर्हति ११३

णादसत्प्रतिग्रहयाजनाध्यापनैर्यदुपपन्नंतत्प्रायश्चित्तप्रकरणेवक्ष्यमाणक्रमेणजपहोमैर्नश्यतिअसत्प्रतिग्रहजनितंपुनःप्रतिग्र जपइति एनोग्रह
हीतद्रव्यत्यागेनमासंगोष्ठेपयःपीत्वेत्येवमादिवक्ष्यमाणतपसाऽपगच्छति १११ शिलोञ्छेति ब्राह्मणःस्ववृत्त्याऽजीवन्यतस्ततो
पिशिलोंछंगृण्हीयात् नतुतत्संभवेऽसत्प्रतिग्रहंकुर्यात्यस्मात्प्रतिग्रहात्शिलःप्रशस्तःमंजर्यात्मकानेकधान्योन्नयनंशि-
लस्ततोप्युञ्छःश्रेष्ठःएकैकधान्यादिगुडकोच्चयनमुञ्छः ११२ सीदेति स्नातकैर्ब्राह्मणैर्धनाभावात्धर्मार्थंकुटुंबावसादंगच्छद्भिः

कृतर्णरजतव्यतिरिक्तं धान्यवस्त्रादिकुप्यधनं यागाद्युपयुक्तं हिरण्याद्यपि आपत्प्रकरणात्क्षत्रियोऽस्तु शास्त्रवर्त्ती याचितव्यः स्यात्
यश्च दातुं नेच्छति कृपणत्वेनावधारितः स त्याज्यो न याचनीय इत्यर्थः मेधातिथिगोविंदराजौ तु त्यागमर्हतीति तस्य त्यागेन वक्तव्यमिति
व्याचक्षाते ११३ अकृतंचेति अकृतमनुप्तसस्यं क्षेत्रं तत्कृतादुप्तसस्यात्प्रतिग्रहे दोषरहितं तथा गोछागमेषहिरण्यधान्यसिद्धार्था
नामध्यात्पूर्वपूर्वं अदुष्टम् ततश्चैषां पूर्वपूर्वासंभवे परः परो ज्ञेयः ११४ सप्तेति दायाद्याः सप्त धनागमाः यथाधनाधिकारं धर्मादनपेतास्त
त्र दायोऽन्वयागतधनं लाभो निध्यादेः मैत्र्यादिलब्धस्य च क्रयः प्रसिद्धः एते त्रयश्चतुर्णामपि वर्णानां धर्म्याः जयधनं विजयलेन क्षत्रि
यस्य धर्म्यं प्रयोगो वृध्यादिधनस्य कर्मयोगश्च कृषिवाणिज्ये एतौ प्रयोगौ वैश्यधर्म्यौ सत्प्रतिग्रहो ब्राह्मणस्य धर्म्यः एवंचैतेषां धर्मत्ववच
नादेतदभावे अन्येषु आपद्विहितेषु वृत्तिकर्मसु प्रवर्त्तितव्यं तदभावे चापद्विहितेषु प्रवृत्तो न दोषस्तदर्थमेतदिहोच्यते ११५ विद्येति आ

अकृतंच कृतात्क्षेत्राद्गौरजाविकमेव च हिरण्यं धान्यमन्नं च पूर्वंपूर्वमदोषवत् ११४ सप्त वित्तागमा ध
र्म्या दायो लाभः क्रयो जयः प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ११५ विद्या शिल्पं भृतिः सेवा गोरक्ष्यं वि
पणिः कृषिः धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः ११६ ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत्
कामं तु खलु धर्मार्थं दद्यात्पापीयसेऽल्पिकाम् ११७ चतुर्थमाददानोऽपि क्षत्रियो भागमापदि प्रजा रक्षन्
परं शक्त्या किल्बिषात्प्रतिमुच्यते ११८

पत्प्रकरणाज्जीवनहेतव इति निर्देशात् एषां मध्ये यथा वृत्त्याऽयस्यानापदि न जीवनं तया
तस्यापद्यभ्यनुज्ञायते यथा ब्राह्मणस्य भृतिसेकादिः एवं शिल्पादावपि ज्ञेयं विद्या वेदविद्याव्यतिरिक्ता वैद्यतर्कविषापनयनादिविद्या
सर्वेषामापदि जीवनार्थं न दुष्यति शिल्पं गंधयुक्त्यादिकरणं भृतिः प्रैष्यभावेन वेतनग्रहणं सेवा पराज्ञासंपादनं गोरक्ष्यं पशुपाल्यं
विपणिर्वणिज्या कृषिः स्वयंकृता धृतिः संतोषः तस्मिन्सति अल्पकेनापि जीव्यते भैक्ष्यं भिक्षासमूहः कुसीदं वृध्या धनप्रयोगः स्वयं
कृतोऽपि इत्येभिर्दशभिरापदि जीवनीयम् ११६ ब्राह्मण इति ब्राह्मणः क्षत्रियो वापि वृध्यादिधनमापद्यपि न प्रयुंजीत किंतु निकृष्ट
कर्मणा धर्मार्थमनुकल्पितपापवृत्त्याऽप्रयुंजीत इदानीं राज्ञामापद्धर्ममाह ११७ चतुर्थमिति राज्ञो धान्यादीनामष्टम इत्याद्युक्तस

आपदिधान्यादेश्चतुर्थमपिभागंकरार्थंगृण्हन्परयाशक्त्याप्रजारक्षणेअधिककरग्रहणपापेननसंबध्यतेकस्मात्पुनरापद्यपिरा
ज्ञोपिरक्षणमुच्यतेयस्मात् ११८ स्वधर्मइति राज्ञःशत्रुविजयःस्वधर्मोविजयफलंयुद्धमिसर्थःप्रजारक्षणप्रयुक्तः यदिकुतश्चिद्भयं
स्यात्तदानयुद्धपराङ्मुखोभवेत्एवंचशस्त्रेणवैश्यान्दस्युभ्योरक्षित्वातेभ्योधर्मादनपेतमासत्पुरुषैर्बलिमाहारयेत्कोसौबलिस्त
माह ११९ धान्यइति धान्येविंशउपचये वैश्यानामष्टमंभागंशुल्कमाहारयेत् धान्यानांद्वादशोपिभागउक्तः आपद्ययमष्टमउच्य
ते अत्यंतापदिभागुक्तश्चतुर्थोवेदितव्यः तत्रापिविंशोग्राह्यस्तथाहिबल्यादीनांकार्षापणस्थानानांविंशतितमंभागंशुल्कंगृण्हीया
त्तत्रापिपंचाशद्भागआदेयोराज्ञापशुहिरण्ययोरित्यापदिपंचाशद्भागउक्तः आपद्ययंविंशउच्यते तथाशूद्राःकारवः सूपकारादयः
शिल्पिनः तक्षादयः कर्मणैवोपकुर्वीतिनतुतेभ्यआपद्यपिकरोग्राह्यः १२० शूद्रस्त्विति शूद्रोब्राह्मणशुश्रूषयाऽजीवन्यदिवृत्ति

स्वधर्मोविजयस्तस्यनाहवेस्यात्पराङ्मुखः शस्त्रेणवैश्यान्रक्षित्वा धर्म्यमाहारयेद्बलिम् ११९ धान्ये
ष्टमंविंशंशुल्कंविंशकार्षापणावरम् कर्मोपकरणाःशूद्राः कारवःशिल्पिनस्तथा १२० शूद्रस्तुवृत्ति-
माकांक्षन्क्षत्रमाराधयेद्यदि धनिनंवाप्युपाराध्यवैश्यंशूद्रोजिजीविषेत् १२१ स्वर्गार्थमुभयार्थं
वाविप्रानाराधयेत्तुसः जातब्राह्मणशब्दस्यसाह्यस्यकृतकृत्यता १२२ विप्रसेवैवशूद्रस्यविशिष्टंकर्म
कीर्त्यते यदतोऽन्यद्धिकुरुतेतद्भवत्यस्यनिष्फलम् १२३ प्रकल्प्यातस्यतैर्वृत्तिःस्वकुटुंबाद्यथार्हतः श
क्तिंचावेक्ष्यदाक्ष्यंचभृत्यानांचपरिग्रहम् १२४

माकांक्षेत्तदाक्षत्रियंपरिचर्यतदभावेधनिनंवैश्यंपरिचर्यजीवितुमिच्छेत्
द्विजातिशुश्रूषणासामर्थ्येतुमारुक्तानिकर्माणिकुर्यात् १२१ स्वर्गार्थमिति स्वर्गमास्यर्थंस्ववृत्तिलिप्सार्थंवाब्राह्मणानेवशूद्रःपरिचरे
त्तस्माज्जातोब्राह्मणाश्रितोयमितिशब्दोयस्यशाकपार्थिवादित्वात्समासः सास्यशूद्रस्यकृतकृत्यतातद्व्यपदेशतया असौकृतकृत्यो
भवतियतएवमतः १२२ विप्रेति ब्राह्मणपरिचर्यैवशूद्रस्यकर्मांतरेभ्यःप्रकृष्टंकर्मशास्त्रेऽभिधीयतेयस्मादेतद्व्यतिरिक्तंयदसौकर्म-
कुरुतेतदस्यनिष्फलंभवतीतिपूर्वस्तुत्सर्थंनत्वन्यनिवृत्तयेपाकयज्ञादीनामपितत्स्यविहितत्वात् १२३ प्रकल्प्येति तस्यैपरिचार .

द्रव्यपरिचर्यासामर्थ्यंकर्मोत्साहंपुत्रदारादिभर्त्तव्यपरिमाणंचावेक्ष्यतैर्ब्राह्मणैःस्वगृहादनुरूपाजीविकाकल्पनीया १२४ उच्छिष्ट
मिति तस्मैभक्ताश्रितशूद्रायभुक्तावशिष्टान्नंब्राह्मणैर्देयंएवंचनशूद्रायमतिंदद्यान्नोच्छिष्टमित्यनाश्रितशूद्रविषयमवतिष्ठ
तेतस्माज्जीर्णवस्त्रासारधान्यजीर्णवस्त्रपरिच्छदोस्मैदेयः १२५ नशूद्रइति लशुनादिभक्षणेनशूद्रेनकिंचित्पातकंभवतिनतुब्र
ह्मवधादावपिअहिंसासत्यमित्यादेश्चातुर्वर्ण्यसाधारणत्वेनविहितत्वात् नचाप्युपनयनादिसंस्कारमर्हतिनास्याग्निहोत्रादिधर्मेअ
धिकारोस्तिअविहितत्वात् नचशूद्रविहितत्वात्पाकयज्ञादिधर्मादस्यनिषेधःएवंचास्यसर्वस्यासिद्धार्थत्वात्अयंश्लोकउत्तरार्थवादः
१२६ धर्मेति येपुनःशूद्राःस्वधर्मवेदिनोधर्मप्राप्तिकामास्त्रैवर्णिकानामाचारमनिषिद्धमाश्रितास्तेनमस्कारेणमंत्रेणपंचयज्ञान्न
हापयेदितियाज्ञवल्क्यवचनात् नमस्कारमंत्रेणतंत्रांतररहितंपंचयज्ञादिधर्मान्कुर्वाणानप्रत्यवयंतिख्यातिंचलोकेलभंते १२७

उच्छिष्टमन्नंदातव्यंजीर्णानिवसनानिच पुलाकाश्चैवधान्यानांजीर्णाश्चैवपरिच्छदाः १२५ नशूद्रेपा
तकंकिंचिन्नचसंस्कारमर्हति नास्याधिकारोधर्मेस्तिनधर्मात्प्रतिषेधनम् १२६ धर्मेप्सवस्तुधर्मज्ञाः
सतांवृत्तमनुष्ठिताः मंत्रवर्ज्यंनदुष्यंतिप्रशंसांप्राप्नुवंतिच १२७ यथायथाहिसद्वृत्तमातिष्ठत्यनसू
यकः तथातथेमंचामुंचलोकंप्राप्नोत्यनिंदितः १२८ शक्तेनापिहिशूद्रेणनकार्योधनसंचयः शूद्रोहिध
नमासाद्यब्राह्मणानेवबाधते १२९ एतेचतुर्णांवर्णानामापद्धर्माःप्रकीर्तिताः यान्सम्यगनुतिष्ठंतो
व्रजंतिपरमांगतिम् १३०

यथेति परगुणानिंदकःशूद्रोयथायथाद्विजात्याचारमनिषिद्धमनुतिष्ठतितथातथाजनैर
निंदितइहलोकेउत्कृष्टःस्मृतःस्वर्गादिलोकंचप्राप्नोति १२८ शक्तेनापीति धनार्जनसमर्थेनापिशूद्रेणपोष्यवर्गसंवर्द्धनपंचय
ज्ञाद्युचितादधिकबहुधनसंचयोनकर्त्तव्यःयस्मात्शूद्रोधनंप्राप्यशास्त्रानभिज्ञत्वेनधनमदात्शुश्रूषायाश्चाकरणात्ब्राह्म
णानेवपीडयतीत्युक्तस्यानुवादः १२९ एतेइति अमीचतुर्णांवर्णानांआपद्यनुष्ठेयाधर्माउक्तायान्सम्यगाचरंतोविहितानुष्ठाना
न्निषिद्धानाचरणाच्चनिष्पापतयाब्रह्मज्ञानलाभेनपरमांगतिंमोक्षलक्षणांलभंते १३०

एषधर्मेति अयंचतुर्णांवर्णानामाचारः समग्रतः कथितः अतऊर्ध्वंप्रायश्चित्तानुष्ठानंशुभमभिधास्यामि १३१ इतिश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांदशमोऽध्यायः १० ७ ७ ७ सांतानिकमिति नवैतानिति नन्वतःपरंप्रवक्ष्यामि प्रायश्चित्तविधिंशुभमिति प्रायश्चित्तस्यवक्तव्यतयाप्रतिज्ञातत्वात् सांतानिकादिभ्योदेयमित्यादेःकःप्रस्तावःउच्यते दानेनाकार्यकारिण इतिप्रागुक्तत्वात् दानेनवधनिर्णेकंसर्पादीनामशक्नुवन्नित्यादेश्चवक्ष्यमाणत्वात् प्रकृष्टप्रायश्चित्तार्थकदानपात्रोपन्यासःप्रकृतोपयुक्त एववर्णाश्रमधर्मादिव्यतिरिक्तप्रायश्चित्तादिनैमित्तिकधर्मकथनार्थत्वाच्चाध्यायस्य अन्यस्यापिनैमित्तिकधर्मस्यात्रोपन्यासोयुक्तः स प्रयोजनत्वाद्विवाहस्यसांतानिकोविवाहार्थीवक्ष्यमाणो अवश्यकर्तव्यज्योतिष्टोमादियागंचिकीर्षुः अध्वगः पांथः सर्ववेदसः कृतसर्वस्व दक्षिणविश्वजित्याग विद्यागुरोर्ग्रासाच्छादनाद्यर्थं एवंपितृमात्रर्थीवपिस्वाध्यायार्थीस्वाध्यायाध्ययनकालीनाच्छादनाद्यर्थीब्रह्मचा

एषधर्मविधिःकृत्स्नश्चातुर्वर्ण्यस्यकीर्तितः अतःपरंप्रवक्ष्यामिप्रायश्चित्तविधिंशुभम् १३१ इति-
मानवेधर्मशास्त्रेभृगुप्रोक्तायांसंहितायांदशमोऽध्यायः १० ७ ७ ७ सांतानिकंयक्ष्यमाण
मध्वगंसर्ववेदसम् गुर्वर्थंपितृमात्रर्थंस्वाध्यायार्थ्युपतापिनः १ नवैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्म
भिक्षुकान् निःस्वेभ्योदेयमेतेभ्योदानंविद्याविशेषतः २ एतेभ्योहिद्विजाग्र्येभ्योदेयमन्नंसदक्षिणम् इ
तरेभ्योबहिर्वेदिकृतान्नंदेयमुच्यते ३ सर्वरत्नानिराजातुयथार्हंप्रतिपादयेत् ब्राह्मणान्वेदविदुषोय
ज्ञार्थंचैवदक्षिणाम् ४ कृतदारोऽपरान्दारान्भिक्षित्वायोधिगच्छति रतिमात्रंफलंतस्यद्रव्यदातुस्तु
संततिः ५

रीउपतापीरोगी एतान्नवब्राह्मणान्धर्मभिक्षाशीलान्स्नातकान्जानीयात् एतेभ्योनिर्द्धनेभ्योगोहिरण्यादिदीय
तइतिदानंविद्याविशेषानुरूपेणदद्यात् १ २ एतेभ्यइति एतेभ्योनवब्राह्मणश्रेष्ठेभ्यो अंतर्वेदिसदक्षिणमन्नंदातव्यम् एत
द्व्यतिरिक्तेभ्यःपुनःसिद्धान्नंबहिर्वेदिदेयत्वेनोपदिश्यतेधनदानेत्वनियमः ३ सर्वेति राजापुनःसर्वरत्नानिमणिमुक्तादीनियागोपयो
गयानिचदक्षिणार्थंधनंविद्यानुरूपेणवेदविदोब्राह्मणान्स्वीकारयेत् ४ कृतेति यःसभार्यःसंतत्यर्थादिनिमित्तमंतरेणापरान्दा-
रान्भिक्षित्वाकरोतितस्यरतिमात्रंफलंधनदातुःपुनस्तदुत्पन्नान्यपत्यानिभवंतीतिनिंदातिशयःनैवंविधेनधनंयाचित्वाऽन्योविवाहः

कर्त्तव्य· नाप्येवंविधाय नियमतो धनं देयमिति ५ धनानीति धनानि गोभूहिरण्यादीनि शक्त्यनतिक्रमेण ब्राह्मणेषु वेदज्ञेषु विविक्तेषु पुत्रकलत्राद्यवसक्तेषु प्रतिपादयेत्तद्दानाच्च स्वर्गप्राप्तिर्भवतीति ६ यस्येति यस्यावश्यपोष्यभरणार्थं वर्षत्रयपर्याप्तं तदधिकं वा भक्तं स्यात्स काम्यसोमयागं कर्त्तुमर्हति नित्यस्य पुनर्यथाकथंचिदवश्यकर्त्तव्यत्वात् नायं निषेधः अत एव समांते सौमिके मखे शितिनि-त्यविषयत्वमुक्तवान् ७ अत इति त्रैवार्षिकधनादल्पधने सति यः सोमयागं करोति तस्य प्रथमसोमयागो नित्योपि न संपन्नो भवति किमुत द्वितीययाग काम्यः ८ शक्त इति यो बहुधनत्वाद्दानशक्तः सन् अवश्यभरणीये पितृमात्रादिज्ञातिजने दौर्गत्यात् दुःखोपेते सति यशोर्थमन्येभ्यो ददाति स तस्य दानविशेषो धर्मप्रतिरूपको न तु धर्म एव मध्वापातो मधुरोपक्रमः प्रथमं यशस्करत्वात् विषास्वादश्चा

धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत् वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते ६ यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हति ७ अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः स पीतसोमपूर्वोपि न तस्याप्नोति तत्फलम् ८ शक्तः परजने दाता स्वजने दुःखजीविनि मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ९ भृत्यानामुपरोधेन यत्करोत्यौर्ध्वदेहिकम् तद्भवत्यसुखोदर्कं जीवतश्च मृतस्य च १० यज्ञश्चेत्प्रतिरुद्धः स्यादेकेनाङ्गेन यज्वनः ब्राह्मणस्य विशेषेण धार्मिके सति राजनि ११ यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः कुटुंबात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये १२

तेन रकफलत्वात्तस्मादेतन्नकार्यम् ९ भृत्यानामिति पुत्रदाराद्यवश्यभर्त्तव्यपीडनेन यत् पारलौकिकधर्मबुद्ध्या दानादि करोति तस्य दातुर्जीवतो मृतस्य च तद्दानं दुःखफलं भवतीति पूर्वकीर्त्यादिदृष्टार्थदानप्रतिषेधः अयं त्वदृष्टार्थदानप्रतिषेधः १० यज्ञश्चेति यो वैश्य इति क्षत्रियादेर्यजमानस्य विशेषतो ब्राह्मणस्य यदि यज्ञ इतरांगसंपत्तौ सत्यामेकेनांगेनासंपूर्णः स्यात् तदा यो वैश्यो बहुपश्वादिधनः पाकयज्ञादिरहितो असोमयाजी तस्य गृहात्तदंगोचितं द्रव्यं बलेन चौर्येण वाहरेत् एतच्च धर्मप्रधाने सति राजनि कार्यं स हि शास्त्रार्थमनुतिष्ठंतं न निगृह्णाति ११ १२ आहरेदिति यज्ञस्य द्वित्रांगवैकल्ये सति तानि त्रीणि वांगानि द्वे वांगे वैश्यादलाभे सति निर्विशंकं शूद्रस्य गृहात् बलेन चौर्येण वाहरेत् य

स्माच्छूद्रस्यक्वचिदपियज्ञसंबंधोनास्तिनयज्ञार्थंधनंशूद्राद्भिक्षेतेतिवक्ष्यमाणप्रतिषेधःशूद्राद्याचनस्यनतुबलग्रहणादेः
१२ यइति योनाहिताग्निःगोशतपरिमाणधनआहिताग्निर्वाऽसोमयाजीगोसहस्रपरिमितधनः द्वयोरपिगृहाभ्यांप्रकृतमंगद्र
यंत्र्यंवाशीघ्रंब्राह्मणेनद्वाभ्यामाहरणीयंब्राह्मणक्षत्रियाभ्यामपिब्राह्मणआहरेत् क्षत्रियस्यतुअदस्यु । स्वहर
णंनिषेधयिष्यति १४ आदानेति प्रतिग्रहादिना आदानंधनग्रहणंनित्यंयस्यासौआदाननित्यःब्राह्मणःतस्मादिष्टापूर्त दानर-
हितात्यज्ञांगद्रव्यत्रयार्थयांयाच्नायांकृतायांअददतोबलेनचौर्येणवाहरेत् तथाकृतेअपहर्तुःख्यातिःप्रकाशते
द्भिमेति १५ तथैवेति सायंप्रातर्भोजिनोपदेशात्त्रिरात्रोपवासेवृत्तेचतुर्थेऽहनिप्रातःसप्तमेभक्तेदानादिधर्मरो ॥ ।
भर्यंचौर्यादिनाहर्त्तव्यम् १६ खलादिति धान्यादिमर्दनस्थानात्क्षेत्राद्वागृहाद्वायतोवाअन्यस्मात्स्वदेशात् धान्यंहीनकर्मसंबंधि

आहरेत्त्रीणिवाद्वेवाकामंशूद्रस्यवेश्मनः नहिशूद्रस्ययज्ञेषुकश्चिदस्तिपरिग्रहः १३ योनाहिताग्निः
शतगुरयज्वाचसहस्रगुः तयोरपिकुटुम्बाभ्यामाहरेदविचारयन् १४ आदाननित्याच्चादातुराहरेदप्र
यच्छतः तथायशोस्यप्रथतेधर्मश्चैवप्रवर्द्धते १५ तथैवसप्तमेभक्तेभक्तानिषडनश्नता अश्वस्तन-
विधानेनहर्त्तव्यंहीनकर्मणः १६ खलात्क्षेत्रादगाराद्वायतोवाप्युपलभ्यते आख्यातव्यंतुतत्तस्मैपृच्छ
तेयदिपृच्छति १७ ब्राह्मणस्वंनहर्त्तव्यंक्षत्रियेणकदाचन दस्युनिष्क्रिययोस्तुस्वमजीवन्हर्त्तुमर्ह-
ति १८ योऽसाधुभ्योऽर्थमादायसाधुभ्यःसंप्रयच्छति सकृत्वाप्लवमात्मानंसंतारयतिताबुभौ १९

लभ्यतेततोहर्त्तव्यंयदिवासौधनस्वामीपृच्छतिकिन्निमित्तंकृतंइतिपृच्छतेनिमित्तंचौर्यादेर्वक्तव्यम् १७ ब्राह्मणेति
पिनिमित्तेषु क्षत्रियेणब्राह्मणस्वंधनंततोपकृष्टत्वात्नहर्त्तव्यंसमानन्यायतयातुवैश्यशूद्राभ्यांउत्कृ .
ष्टकृद्धिहितानुष्ठायिनोःपुनर्ब्राह्मणक्षत्रिययोरत्यंतापदिक्षत्रियोहर्त्तुमर्हति १८ योऽसाधुभ्यइति योहीनकर्मादिभ्यःउ
त्कृष्टेभ्योऽभिहितेष्वपिनिमित्तेषुउक्तानुरूपंयज्ञांगादिसाधनंकृत्वासाधुभ्यउत्कृष्टेभ्यऋत्विगादिभ्योधनंददातिसयस्याप
हरतितद्दुरितंनाशयतियस्मैतद्ददातितद्दौर्गत्याभिघातादित्येवंद्वावप्यात्मानमुडुपंकृत्वादुःखान्मोचयति १९ ॥ ॥

यद्धनमिति यज्ञशीलानांयद्धनंतद्यागादौविनियोगात्देवस्वंविद्वांसोमन्यंतेयागादिशून्यानांतुयद्द्रव्यंतद्धर्मविनियोगाभावादासुरस्व
मुच्यतेअतस्तदप्यपहृत्ययागसंपादनात्तद्देवस्वंकर्तव्यम् २० नतस्मिन्निति तस्मिन्नुक्तनिमित्तेचौर्यबलात्कारंकुर्वाणेधर्मप्रधानोरा
जादंडन्नकुर्यात्यस्माद्राज्ञोमूढत्वाद्ब्राह्मणःक्षुधावसादंप्राप्नोतिततश्च २१ तस्येति तस्यब्राह्मणस्यावश्यभरणीयपुत्रादिवर्गंज्ञात्वा
श्रुताचारोचिततदनुरूपांवृत्तिंकल्पयेत् २२ कल्पयित्वेति अस्यब्राह्मणस्यजीविकांविधायशत्रुचौरादेःसर्वतोरक्षयेत् यस्माद्ब्रा
ह्मणाद्रक्षितात्तस्यधर्मषड्भागंप्राप्नोति २३ नयज्ञार्थमिति यज्ञसिद्ध्यैधनंब्राह्मणःकदाचिन्नशूद्राद्याचेत् यस्माच्छूद्राद्याचि
त्वायज्ञंकुर्वाणोमृतश्चंडालोभवतिअतोयाचननिषेधात्शूद्रादयाचितोपस्थितंयज्ञार्थमप्यविरुद्धम् २४ यज्ञार्थमिति येज्ञसिद्ध्य

यद्धनंयज्ञशीलानांदेवस्वंतद्विदुर्बुधाः अयज्वनांतुयद्वित्तमासुरस्वंतदुच्यते २० नतस्मिन्धारयेद्दंड
न्धार्मिकःपृथिवीपतिः क्षत्रियस्यहिबालिश्याद्ब्राह्मणःसीदतिक्षुधा २१ तस्यभृत्यजनंज्ञात्वास्वकुटुं
बान्महीपतिः श्रुतशीलेचविज्ञायवृत्तिंधर्म्यांप्रकल्पयेत् २२ कल्पयित्वाऽस्यवृत्तिंचरक्षेदेनंसमंततः रा
जाहिधर्मषड्भागंतस्मात्प्राप्नोतिरक्षितात् २३ नयज्ञार्थंधनंशूद्राद्विप्रोभिक्षेतकर्हिचित् यजमानोहिभि
क्षित्वाचंडालःप्रेत्यजायते २४ यज्ञार्थमर्थंभिक्षित्वायोनसर्वंप्रयच्छति सयातिभासतांविप्रःकाकतांवा
शतंसमाः २५ देवस्वंब्राह्मणस्वंवालोभेनोपहिनस्तियः सपापात्मापरेलोकेगृध्रोच्छिष्टेनजीवति २६
इष्टिंवैश्वानरींनित्यंनिर्वपेदब्दपर्यये क्लृप्तानांपशुसोमानांनिष्कृत्यर्थमसंभवे २७ आपत्कल्पेनयो
धर्मंकुरुतेनापदिद्विजः सनाप्नोतिफलंतस्यपरत्रेतिविचारितम् २८ र्थंधनंयाचित्वायोयज्ञेसर्वन्नविनियुंक्ते
सशतंवर्षाणिभासत्वंकाकत्वंवाप्राप्नोति २५ देवस्वमिति प्रतिमादिदेवतार्थमुत्सृष्टंधनंदेवस्वंब्राह्मणस्वंचयोलोभादपहरतिसपा
पस्वभावोजन्मांतरेगृध्रोच्छिष्टेनजीवति २६ इष्टिमिति समाप्तेवर्षेद्वितीयवर्षस्यप्रवृत्तिरब्दपर्ययंचैत्रसुक्लादिवर्षप्रवृत्तिःतत्रसं
स्थैवैश्वानरीमिष्टिंविहितसोमयागासंभवेतदकरणदोषनिर्हरणार्थंसर्वदाशूद्रादितउक्तधनग्रहणरूपामिष्टिंकुर्यात् २७ आपदि
ति आपद्विहितेनविधिनायोऽनापदिधर्मानुष्ठानंद्विजःकुरुतेतस्यतत्परलोकेनिष्फलंभवतीतिमन्वादिभिर्विचारितम् २८ ७

विश्वेरिति विश्वेदेवाख्यैर्देवैः साध्यैश्चतथामहर्षिभिर्ब्राह्मणैर्मरणाद्भीतैरापत्सुमुख्यस्यविधेःसोमादेर्वैश्वानर्यादिःप्रतिनिधिर
नुष्ठितोऽसौमुख्यासंभवेकार्यःनतुमुख्यसंभवे २९ प्रभुरिति योमुख्यानुष्ठानसंपन्नःसन्आपाद्विहितेनप्रतिनिधिनाअनुष्ठानं
करोतितस्यदुर्बुद्धेःपारलौकिकंअभ्युदयरूपंप्रत्यवायपरिहारार्थंफलंचनभवति आपत्कल्पेनयोधर्ममित्यनेनोक्तमप्येतत्शास्त्रा
दरार्थंपुनरुच्यते ३० नेति धर्मज्ञोब्राह्मणःकिंचिदप्यपकृतन्नराज्ञःकथयेत् अपितुस्वशक्त्यैववक्ष्यमाणाभिचारादिनापका
रिणोमनुष्यान्निगृण्हीयात् ततश्चस्वकीयधर्मविरोधादपकृष्टापराधकरणेसत्यभिचारादिनदोषायेत्येवंपरमतमेनतत्नत्वभि
चारोविधीयतेराजनिवेदनंवानिषिध्यते ३१ स्ववीर्यादिति यस्मात्स्वसामर्थ्याद्राजसामर्थ्याच्चपराधीनराजसामर्थ्यापेक्षया.

विश्वेश्चदेवैःसाध्यैश्चब्राह्मणैश्चमहर्षिभिः आपत्सुमरणाद्भीतैर्विधेःप्रतिनिधिःकृतः २९ प्रभुःप्रथम
कल्पस्ययोऽनुकल्पेनवर्त्तते नसांपरायिकंतस्यदुर्मतेर्विद्यतेफलम् ३० नब्राह्मणोवेदयेतकिंचिद्राज
निधर्मवित् स्ववीर्येणैवतान्शिष्यान्मानवानपकारिणः ३१ स्ववीर्याद्राजवीर्याच्चस्ववीर्यंबलवत्तरम्
तस्मात्स्वेनैववीर्येणनिगृण्हीयादरीन्द्विजः ३२ श्रुतीरथर्वांगिरसीःकुर्यादित्यविचारयन् वाक्शस्त्रं
वैब्राह्मणस्यतेनहन्यादरीन्द्विजः ३३ क्षत्रियोबाहुवीर्येणतरेदापदमात्मनः धनेनवैश्यशूद्रौतुजपहो
मैर्द्विजोत्तमः ३४ विधाताशासितावक्तामैत्रोब्राह्मणउच्यते तस्मैनाकुशलंब्रूयान्नशुष्कांगिरमीरयेत् ३५

मर्थ्यमेवस्वाधीनत्वाद्बलीयः तस्मात्स्वेनवीर्येणैवशत्रून्ब्राह्मणोनिगृण्हीयात्तत्किंस्ववीर्यमित्याह ३२ श्रुतीरिति अथर्ववेदअं
गिरसीर्दृष्टाभिचारश्रुतीरविचारयन्कुर्यात् तदर्थमभिचारमनुतिष्ठेत्इत्यर्थः यस्मादभिचारमंत्रोच्चारणात्मिकाब्राह्मणस्यवागेव
शस्त्रकार्यकरणात्शस्त्रंतेनब्राह्मणःशत्रून्हन्यात् ३३ क्षत्रियइति क्षत्रियःस्वपौरुषेणशत्रुतःपरिभवलक्षणामात्मनआपदन्नि
स्तरेत् वैश्यशूद्रौपुनःप्रतिकर्त्रेधनदानेनब्राह्मणस्त्वभिचारात्मकैर्जपहोमैः ३४ विधातेति विहितकर्मणामनुष्ठातापुत्रशिष्या
दीनांशास्ताप्रायश्चित्तादिधर्माणांवक्तासर्वभूतमैत्रीप्रधानोब्राह्मणउच्यतेतस्मैनिगृह्यतामयमित्येवंअनिष्टन्नब्रूयात्नाप्याक्रो

शंवाचंवागदंड धिगदंडरूपंतस्योच्चारयेत् ३५ नवैइति कन्या अनूढापितरुणीतथाअल्पाध्यायिमूर्खव्याध्यादिपीडितानुपनीताः श्रौतान्सायंप्रातर्होमान्नकुर्युः ह्वायेदितिप्रसक्तावयंकन्यादीनांप्रतिषेधः ३६ नरकइति एतेकन्यादयोहोमंकुर्वाणानरकंगच्छंति यस्यतदग्निहोत्रंप्रतिनिधिरूपेणकुर्वंतिसोपिनरकंगच्छतितस्मात्श्रौतकर्मप्रवीणःसमस्तवेदाध्यायीहोताकार्यः ३७ प्राजाप त्यमिति आधानेप्राजापत्यमश्वंप्रजापतिदेवताकंधनसंपत्तौसत्यांब्राह्मणोदक्षिणामदत्वाकृतेप्याधानेअनाहिताग्निर्भवतिआधा नफलन्नलभतेतस्मादाधानेअश्वंदक्षिणांदद्यात् ३८ पुण्यानीति श्रद्धावान्वशीकृतेंद्रियःयज्ञव्यतिरिक्तानितीर्थयात्रादीनिक र्माणिपुण्यानिकुर्वीतनतुशास्त्रोक्तदक्षिणातोऽल्पदक्षिणैर्यजेतयज्ञोपकारार्थत्वाद्दक्षिणायाःस्वल्पेनाप्युद्वेगादिदोषनिषेधार्थ

नवैकन्यानयुवतिर्नाल्पविद्योनबालिशः होतास्यादग्निहोत्रस्यनार्त्तोनासंस्कृतस्तथा ३६ नरकेहिपतंत्येते जुह्वतःसचयस्यतत् तस्माद्वैतानकुशलोहोतास्याद्वेदपारगः ३७ प्राजापत्यमदत्वाश्वमग्न्याधेयस्यदक्षिणा म् अनाहिताग्निर्भवतिब्राह्मणोविभवेसति ३८ पुण्यान्यन्यानिकुर्वीतश्रद्दधानोजितेंद्रियः नत्वल्पदक्षिणै र्यज्ञैर्यजेतेहकथंचन ३९ इंद्रियाणियशःस्वर्गमायुःकीर्त्तिंप्रजाःपशून् हंत्यल्पदक्षिणोयज्ञस्तस्मान्नाल्पध नोयजेत् ४० अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणःकामकारतः चांद्रायणंचरेन्मासंवीरहत्यासमंहितत् ४१ येशूद्रादधिगम्यार्थमग्निहोत्रमुपासते ऋत्विजस्तेहिशूद्राणांब्रह्मवादिषुगर्हिताः ४२

मिदंवचनम् ३९ इंद्रि याणीति चक्षुरादीनिइंद्रियाणिजीवतःख्यातिरूपंयशःस्वर्गायुषीमृतस्यख्यातिरूपांकीर्त्तिमपत्यानिपशूंश्चाल्पदक्षिणोय- ज्ञः नाशयतितस्मादल्पदक्षिणादानेनयागंनकुर्यात् ४० अग्निहोत्रीति अग्निहोत्री ब्राह्मणः इच्छातोग्निषुसायंप्रातर्होमानकृत्वा मासंचांद्रायणंचरेत्यस्माद्वीरःपुत्रःतस्यहत्याहननंतत्तुल्यमेतत्तथाचश्रुतिःवीरहावाएषदेवानांभवतियोऽग्निमुद्वासयतेअन्येतुमा समपविध्येतिसमर्थयंति ४१ येशूद्रादिति येशूद्रादधिगम्यार्थंप्राप्यसामान्याभिधानेनयाचनेनवा अर्थस्त्रीकृत्यवृषलाग्न्युपसेविना मितिवक्ष्यमाणलिंगादाधानपूर्वकमग्निहोत्रमनुतिष्ठंतितेशूद्राणामेवयाजकाःनतुतेषांतत्फलंभवतिअतस्तेवेदवादिषुनिंदिताः ४२

तेषामिति तेषांशूद्रधनाहिताग्निपरिचारिणांमूर्खाणांमूर्ध्निपादंदत्वाशूद्रःतेनदानेनसततंपरलोकेदुःखेभ्योनिस्तरतिननुयज
मानानांफलंभवति ४३ अकुर्वन्निति नित्यंयद्विहितंसंध्योपासनादिनैमित्तिकंच शवस्पर्शादौस्नानादितदकुर्वन्तथाप्रतिषिद्धंहिं
साद्यनुतिष्ठन्नविहितनिषिद्धेषु अत्यंतासक्तिंकुर्वन्नरोमनुष्यंजातिमात्रंप्रायश्चित्तमर्हतिनान्निंद्रियार्थेषुसर्वेषुनप्रसज्येतकामतइ
तिनिषेधात् निंदितपदेनैवप्रसक्तश्चेंद्रियार्थेष्वपिसंगृहीतंअतःपृथक्नवक्तव्यंउच्यतेअस्यस्नातकव्रतेषुपाठात्तत्रव्रतानीमानि
धारयेदित्युपक्रमान्नायंप्रतिषेधः किंतुव्रतविधिःतर्हिअकुर्वन्विहितंकर्मेत्यनेनैवप्राप्तत्वात्पृथक्नवक्तव्यमितिचेन्नस्नातकेतरविषय-
त्वेनास्यसविषयत्वात् ४४ अकामतइति अबुद्धिकृतेपापेप्रायश्चित्तंभवतीत्याहुःपंडिताःएकेपुनराचार्याःकामतःकृतेपापेप्रायश्चि
त्तंभवतीत्याहुःएतच्चपृथक्श्रुत्यभिधानंप्रायश्चित्तगौरवार्थंश्रुतिनिदर्शनादिति इंद्रोयतीन्सालावृकेभ्यःप्रायच्छत्तमश्लीला

तेषांसततमज्ञानांवृषलाग्न्युपसेविनाम् पदामस्तकमाक्रम्यदातादुर्गाणिसंतरेत् ४३ अकुर्वन्विहितं
कर्मनिंदितंचसमाचरन् प्रसक्तश्चेंद्रियार्थेषुप्रायश्चित्तीयतेनरः ४४ अकामतःकृतेपापेप्रायश्चित्तंवि
दुर्बुधाः कामकारकृतेप्याहुरेकेश्रुतिनिदर्शनात् ४५ अकामतःकृतंपापंवेदाभ्यासेनशुध्यति काम
तस्तुकृतंमोहात्प्रायश्चित्तैःपृथग्विधैः ४६ प्रायश्चित्तीयतांप्राप्यदैवात्पूर्वकृतेनवा नसंसर्गंव्रजेत्सद्भिः
प्रायश्चित्तेऽकृतेद्विजः ४७

वागेत्यवदत्सप्रजापतिमुपाधावत्तस्मात्तमुपहव्यंप्रायच्छदिति अस्यार्थः इंद्रोयतीन्बुद्धि
दत्तवान्सप्रायश्चित्तार्थंप्रजापतिसमीपमगमत्तस्मैप्रजापतिरुपहव्याख्यंकर्मप्रायश्चित्तंदत्तवान् अतःकामकारकृतेप्य प्रायश्चि
त्तम् ४५ अकामतइति अनिच्छातःकृतंपापंवेदाभ्यासेनशुध्यतिनश्यतिवेदाभ्यासेनेतिकामकृतविषयप्रायश्चित्तापेक्षयालघु
प्रायश्चित्तोपलक्षणार्थंप्रायश्चित्तांतरेणापिविधानात्रागद्वेषादिव्यामूढतयापुनरनिच्छातःकृतंनानाप्रकारैःप्रायश्चित्तैर्विधाधनत-
पोभिःशुध्यतीतिगुरुप्रायश्चित्तपरंअतःपूर्वोक्तस्यैवायमभ्याहारः यद्यपिअधिकारनिरूपणंप्रकृतप्रायश्चित्तंत्वनंतरंवक्ष्यतितथा
प्यज्ञानात्लघुप्रायश्चित्ताधिकारीज्ञानात्गुरुप्रायश्चित्तेअधिक्रियतइतिअधिकारनिरूपणमेवेदम् ४६ प्रायश्चित्तीयतामिति

दैवात्प्रमादादन्यशरीरकृतेन पूर्वजन्मार्जितदुष्कृतेन क्षयरोगादिभिः सूचितेन प्रायश्चित्तीयतां प्राप्य अकृते प्रायश्चित्ते साधुभिः सह-
याजनादिना संसर्गं न गच्छेत् ४७ इहेति इह जन्मनि निषिद्धाचरणैः केचित्पूर्वजन्मकृतैः दुष्टस्वभावा मनुष्याः कौनख्यादिरूपविप
र्ययं प्राप्नुवंति ४८ सुवर्णेति पिशुन इति अन्नहर्त्तेति एवंकर्मेति ब्राह्मणसुवर्णचौरः कुत्सितनखत्वं प्राप्नोति निषिद्धसुरापः श्यावदंत
तां ब्रह्महा क्षयरोगित्वं गुरुभार्यागामी विकोपमेहनत्वं पिशुनो विद्यमानदोषाभिधायी दुर्गंधिनासत्वं अविद्यमानदोषाभिधायको दुर्ग
धिमुखत्वं धान्यचौरो ऽंगहीनत्वं धान्यादेरपद्रव्येण मिश्रणकर्त्ता अतिरिक्तांगत्वं अन्नचौरो मंदानलत्वं अननुज्ञाताध्यायी मूकत्वं वस्त्र
चौरः श्वेतकुष्ठत्वम् अश्वचौरः खंजत्वं एवं बुद्धिवाक्चक्षुःश्रोत्रविकला विकृतरूपाः साधुविगर्हिता श्च प्राग्जन्मार्जितोपभुक्तदुष्कृत

दीपहर्त्ता भवेदंधः काणो निर्वापकस्तथा हिंसारुचिः सदा रोगी वातांगः पारदारिकः

इह दुश्चरितैः केचित्केचित्पूर्वकृतैस्तथा प्राप्नुवंति दुरात्मानो नरा रूपविपर्ययम् ४८ सुवर्णचौरः कौन
ख्यं सुरापः श्यावदंतताम् ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ४९ पिशुनः पौतिनासिक्यं सूचकः
पूतिवक्त्रताम् धान्यचौरोऽंगहीनत्वमातिरैक्यं तु मिश्रकः ५० अन्नहर्त्तामयावित्वं मौक्यं वागपहारकः
वस्त्रापहारकः श्वैत्र्यं पंगुतामश्वहारकः ५१ एवं कर्मविशेषेण जायंते सद्विगर्हिताः जडमूकांधबधिरा वि-
कृताकृतयस्तथा ५२ चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये निंद्यैर्हि लक्षणैर्युक्ता जायंते ऽनिष्कृतैन
सः ५३

शेषेणोत्पद्यंते ४९ ५० ५१ ५२ चरितेति यस्मादनिष्कृतमनाशितमेनो यैस्ते अनिष्कृतैनसः अकृतप्रायश्चि
त्ताः परलोकोपभुक्तदुष्कृतशेषेण निंद्यैर्लक्षणैः कुनखित्वादिभिर्जायंते तस्माद्विशुद्धये पापनिर्हरणार्थं प्रायश्चित्तं सदा कर्त्तव्यं एवं भि
न्नेजुहोतीतिवत् नैमित्तिकमात्रं प्रायश्चित्तं किंल निष्कृतैनस इत्युपादानात् तथा विशुद्धये चरितव्यमित्युपदेशात् पापक्षयार्थिन ए-
वाधिकारः तथाहि प्रायश्चित्तं हि चरितव्यमिति विधावधिकारापेक्षायां फलमात्रनिर्देशादिति रात्रिसत्रन्यायेन श्रूयमाणमेव विशुद्धय
इति फलमधिकारिविशेषणं युक्तं इममेवार्थं स्फुटयति याज्ञवल्क्यः विहितस्याननुष्ठानान्निंदितस्य च सेवनात् अनिग्रहाच्चेंद्रियाणां
नरः पतनमृच्छति तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये पतनमृच्छति पापं प्राप्नोतीत्यर्थः विशुद्धये पापविनाशाय बहून्वर्ग

णान् घोरान् नरकान्प्राप्यतत्क्षयात् संसारान्प्रतिपद्यंते महापातकिनस्त्विमानित्यादिना महापातक्यादीनान्नरकादिप्राप्तिं वक्ष्यति नंतन्नैमित्तिकमात्रत्वंप्रायश्चित्तानां संगच्छते तस्माद्ब्रह्मवधाद्विजनितपापक्षयार्थिन एवप्रायश्चित्तविधावधिकार इति ज्ञेयम् ५३ ब्रह्महत्येति ब्राह्मणप्राणवियोगफलको व्यापारो ब्रह्महत्या नचसाक्षादन्यस्यामिनियुज्यतेत थागोहिरण्यग्रहणादिनिमित्तकार्यकस्यापितदुद्देशेन ब्राह्मणमरणे ब्रह्महत्यानन्वेवमिषुकारस्यापी षूत्पादनद्वारेण तथावध्यस्यापिहंतृगतमन्यूत्पादनद्वारा ब्रह्महत्यास्यात् उच्यते शास्त्रतो यस्यब्राह्मणहंतृत्वंप्रतीयते स एव ब्रह्महंता अत एव शातातपः गोभूहिरण्यग्रहणे स्त्रीसंबंधकृतेऽपिवा यमुद्दिश्यत्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं एवंचान्यान्यपिशास्त्रीयाण्येवब्रह्मवधनिमित्तानि ज्ञेयानि तथारागाद्द्वेषात्प्रमादाद्वास्वतः परत एव वा ब्राह्मणंघातयेद्यस्तमाहुर्ब्रह्मघातकं इति प्रयोजकस्यापिहंतृत्वंशास्त्रीयम् तथानिषिद्धसुरापानंब्राह्मणसुवर्णहरणंगुरुभार्यागमनं एतैश्चसह संसर्गः

ब्रह्महत्यांसुरापानंस्तेयंगुर्वंगनागमः महांतिपातकान्याहुः संसर्गश्चापितैःसहः ५४ अनृतंचसमुत्कर्षेराजगामिचपैशुनम् गुरोश्चालीकनिर्बंधःसमानिब्रह्महत्यया ५५ ब्रह्मोज्झतावेदनिंदा कौटसाक्ष्यं सुहृद्वधः गर्हितानाद्ययोर्जग्धिः सुरापानसमानिषट् ५६ निक्षेपस्यापहरणंनराश्वरजतस्यच भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृतम् ५७ रेतःसेकःस्वयोनीषुकुमारीष्वंत्यजासुच सख्युःपुत्रस्यच-स्त्रीषुगुरुतल्पसमंविदुः ५८

संवत्सरेणपतीतिइत्येतानि महापातकान्याहुः महापातकसंज्ञाचेयंवक्ष्यमाणस्योपपातकादिसंज्ञालाघवार्थम् ५४ अनृतमिति जात्युत्कर्षनिमित्तमुत्कर्षभाषणंयथाब्राह्मणोहमिति अब्राह्मणोब्रवीति राजनिवास्तेनादीनांपरेषांमरणफलकंदोषाभिधानंगुरोश्चानृताभिशंसनंतथाचगोतमः गुरोरनृताभिशंसनमिति महापातकसमानीति एतानिब्रह्महत्यासमानीति ५५ ब्रह्मोज्झतेति ब्राह्मणअधीतवेदस्यानभ्यासेन विस्मरणं असत्शास्त्राश्रयणेनवेदकुत्सनंसाक्ष्येमृषाभिधानं ब्राह्मणस्यवधः निषिद्धस्यलशुनादेर्भक्षणं अनाद्यस्यपुरीषादेरदनम् मेधातिथिस्तुनभोक्ष्यतइति संकल्प्ययद्भुज्यते तदनाद्यमित्याचष्टे एतानिसुरापानसमानि ५६ निक्षेपइति ब्राह्मणसुवर्णव्यतिरिक्तनिःक्षेपस्यहरणंतथामनुष्यतुरगरूप्यभूमिहीरकमणीनांहरणंसुवर्णस्तेयतुल्यम् ५७ रेतःसेकइति सोदर्यभगिनीचंडालीसखिपुत्रभार्यासुयोरेतःसेकस्तंगुरुभार्यागमनसमानमाहुः एतेषां

भेदेनसमीकरणंयद्येनसमीकरणंतस्यतेनप्रायश्चित्तार्थंयत्कौटसाक्ष्यसुहृद्वधयोःसुरापानसमीकरणंब्रह्महत्याप्रायश्चित्तंवक्ष्यतितद्विकल्पार्थंयत्पुनर्गुरोरलीकनिर्बंधस्यब्रह्महत्यासमीकृतस्यपुनरुपरिशङ्कब्रह्महत्याप्रायश्चित्तनिर्देशःसमीकृतानांन्यूनप्रायश्चित्तंभवतीतिज्ञापनार्थंतथाचलोकेराजसमःसचिवइत्युक्तेसचिवस्यन्यूनतैवगम्यतेअत्रोपदेशिकप्रायश्चित्तेअतिदिश्यतांप्रायश्चित्तंतन्न्यूनंप्रायश्चित्तंसमीकृतानांच इदानीमुपपातकान्याह ५८ गोवधइत्यादि परिवित्तितानुजेनोढइति कन्यायादूषणमिति व्रात्यतेति सवैति इंधनेति अनाहितेति धान्येति गोहननंजातिकर्मदुष्टानांयाजनंपरपत्नीगमनंआत्मविक्रयःमातृपितृगुरूणांचसुश्रूषाद्यकरणंसर्वदाब्रह्मयज्ञत्यागःनवेदविस्मरणंब्रह्मोज्झतेत्यनेनोक्तत्वात् अग्नेश्चस्मार्तस्यत्यागःश्रौतानामग्निहोत्र्यपविध्याग्नीनित्युक्तत्वात्सुतस्यचसंस्कारभरणाद्यकरणंकनीयसाआदौविवाहेकृतेज्येष्ठस्यपरिवित्तित्वंभवतिदाराग्निहोत्रसंयोगइत्यादिनाप्रागुक्तंकनिष्ठस्यपरिवेत्तृत्वंतयोश्चकन्याप्रदानंतयोरेवविवाहहोमादियागेचार्त्विज्यंकन्यायाश्चैथुनवर्जमंगुलीप्रक्षेपादिनःदूषणंरेतःसेकपर्यंतमैथुनेषुतुरेतःसेकःस्वयोनीषुकुमारीष्वंत्यजासुचइत्युक्तत्वात्प्रतिषिद्धं द्विजीवनंब्रह्मचारिणोमैथुनंतडागोद्यानभार्यापत्यानांविक्र

गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रयाः गुरुमातृपितृत्यागःस्वाध्यायाग्न्योःसुतस्यच ५९

यःयथाकालमनुपनयनंव्रात्यता तथाचोक्तंअतऊर्ध्वंत्रयोप्येतेयथाकालमसंस्कृताःइति बांधवानांपितृव्यादीनांअननुवृत्तिःप्रतिनियतवेतनग्रहणपूर्वकमध्यापनंप्रतिनियतवेतनप्रदानपूर्वकमध्ययनंच अविक्रय्यादीनांतिलादीनांविक्रयःसुवर्णाद्युत्पत्तिस्थानेषुराजाज्ञयाअधिकारःमहतांप्रवाहप्रतिबंधहेतूनांसेतुबंधादीनांप्रवर्तनंओषधीनांजातिमात्रादीनांहिंसनंएतच्चज्ञानपूर्वकाभ्यासक्रियायांप्रायश्चित्तगौरवात्पत्तूलूष्टजानांओषधीनामित्यादिनावक्ष्यतितत्सकृद्धिंसायांप्रायश्चित्तलाघवाद्भार्यादिस्त्रीणांवेश्यात्वंकृत्वातदुपजीवनंश्येनादियज्ञेनानपराद्धस्यमारणंमंत्रौषधिनावशीकरणंपाकादिदृष्टप्रयोजनार्थंसात्त्रमेववृक्षच्छेदनं अनातुरस्यदेवपित्राद्युद्देशमंतरेणपाकाद्यनुष्ठानंनिंदितान्नस्यलशुनादेःसकृदनिच्छयाभक्षणंइच्छापूर्वकाभ्यासभक्षणेपुनर्गर्हितानाद्यपाज्ञेन्धिरित्युक्तत्वात्सत्यधिकारेअग्न्यनाधानंसुवर्णादन्यस्यसारद्रव्यस्यापहारणंऋणानांचऋणैस्त्रिभिर्ऋणवान्नरोजायतेतदनपकरणंश्रुतिस्मृतिविरुद्धशास्त्रशिक्षणंनृत्यगीतवादित्रोपसेवनंधान्यताम्रलोहादेःपशूनांचचौर्यंद्विजातीनांपीतमद्यायाःस्त्रियागमनंस्त्रीशूद्रवैश्यक्षत्रियहननंअ

इत्यर्थकर्माभावबुद्धिः एतत्प्रत्येकमुपपातकंबांधवत्यागइत्यनेनैवमात्रादीनांत्यागप्राप्तौपृथग्वचननिर्देशार्थंपितृव्यादिबांधवत्यागेनाव-
श्यमेवप्रायश्चित्तंभवतिकिंतुमात्रादित्यागप्रायश्चित्तान्न्यूनमपिभवति ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ब्राह्मणस्ये
ति ब्राह्मणस्यदंडहस्तादिनापीडाक्रियायदतिशयदुर्गंधितयाऽघ्रेयंलशुनपुरीषादितस्यमद्यस्यचाघ्राणंकुटिलत्वंवक्रतापुंसिचमुखा
दौमैथुनंइत्येतत्प्रत्येकंजातिभ्रंशकरंस्मृतम् ६७ खरेति गर्दभतुरगोष्ट्रमृगहस्तिछागमेषमत्स्यसर्पमहिषाणांप्रत्येकंवधःसंकरीकर-

परिवित्तितानुजेनोढेपरिवेदनमेवच तयोर्दानंचकन्यायास्तयोरेवचयाजनम् ६० कन्यायादूषणंन्वै
ववार्द्धुष्यंव्रतलोपनम् तडागारामदाराणामपत्यस्यचविक्रयः ६१ व्रात्यताबांधवत्यागोभृत्याध्यापनं
मेवच भृताच्चाध्ययनादानमपण्यानांचविक्रयः ६२ सर्वाकरेष्वधीकारोमहायंत्रप्रवर्त्तनम् हिंसौषधी
नांस्त्र्याजीवोऽभिचारोमूलकर्मच ६३ इंधनार्थमशुष्काणांद्रुमाणामवपातनम् आत्मार्थंचक्रियारंभो
निंदितान्नादनंतथा ६४ अनाहिताग्नितास्तेयमृणानामनपक्रिया असच्छास्त्राधिगमनंकौशील
व्यस्यचक्रिया ६५ धान्यकुप्यपशुस्तेयमद्यपस्त्रीनिषेवणम् स्त्रीशूद्रविट्क्षत्रवधोनास्तिक्यंचोप-
पातकम् ६६ ब्राह्मणस्यरुजःकृत्याघ्रातिरघ्रेयमद्ययोः जैह्म्यंचमैथुनंपुंसिजातिभ्रंशकरंस्मृतम् ६७
खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा संकरीकरणंज्ञेयंमीनाहिमहिषस्यच ६८ निंदितेभ्योधना-
दानंवाणिज्यंशूद्रसेवनम् अपात्रीकरणंज्ञेयमसत्यस्यचभाषणम् ६९ कृमिकीटवयोहत्यामद्यानु
गतभोजनम् फलैधःकुसुमस्तेयमधैर्यंचमलावहम् ७० एतान्येनांसिसर्वाणियथोक्तानिपृथक्पृथक्
यैर्यैर्व्रतैरपोह्यंतेतानिसम्यङ्निबोधत ७१ णंज्ञेयम् ६८ निंदितइति अप्रतिग्राह्यधनेभ्यःप्रतिग्रहोवाणिज्यंशूद्रस्यपरिच

र्याअनृताभिधानंइत्येतत्प्रत्येकमपात्रीकरणंज्ञेयम् ६९ कृमीति कृमयःक्षुद्रजंतवःतेभ्यईषत्स्थूलाःकीटाःतेषांवधःपक्षिणां
गतंयद्भोज्यमपिशाकाद्येकत्रपिटकादौकृत्वामद्येनसहानीतंतस्यभोजनम् मेधातिथिस्तुमद्यानुगतंमद्यसंस्पृष्टमाह तन्नतत्रप्राय
स्वात्फलकाष्ठपुष्पाणांचचौर्यंअल्पेःपचयेपिअत्यंतंनवैक्लव्यंएतत्सर्वंप्रत्येकंमलिनीकरणम् ७०एतानीति एतानिब्रह्महत्यादीनिपापानिमे

देनयथोक्तानियैर्यैर्व्रतैःप्रायश्चित्तरूपैर्नाश्यंतेतानिशृणुत ७१ ब्रह्महेति. योब्राह्मणंहतवान्सवनेकुटींकृत्वाहतस्यशिरःकपालंत
दभावेअन्यस्यापिचिन्हंकृत्वाअरण्येभैक्षभुगात्मनःपापनिर्हरणायद्वादशवर्षाणिवसेत्व्रतंकुर्यात् अत्रापिकृतवपनोनिवसेदितिव-
क्ष्यतिअनंतरोक्ताअपिविशेषाग्राह्याः तथाचयमः सप्तागाराण्यपूर्वाणियान्यसंकल्पितानिच संविशेत्तानिशनकैर्विधूमेभुक्तवज्जने भ्रू
णघ्नेदेहिमेभिक्षामेनोविख्याप्यसंचरेत् एककालंचरेद्भैक्ष्यंतदलब्ध्वोदकंपिबेत् अयंचद्वादशवार्षिकविधिःब्राह्मणस्याज्ञानकृतब्रा
ह्मणवधे इयंविशुद्धिरुदिताप्रमाप्याकामतोद्विजमितिवक्ष्यमाणत्वात् क्षत्रियवैश्यशूद्राणांतुक्रमेणैतद्द्वादशवार्षिकंद्विगुणंत्रिगुणं
चतुर्गुणंचद्रष्टव्यम् यथोक्तंभविष्यपुराणे द्विगुणाःक्षत्रियाणांतुवैश्यानांत्रिगुणाःस्मृताः चतुर्गुणास्तुशूद्राणांपर्षदुक्तामहात्मनाम्
पर्षदुच्यव्रतंप्रोक्तंशन्द्रयेपापकर्मणाम् यावद्भिर्ब्राह्मणैर्ब्राह्मणानांसभाततोद्विगुणैःक्षत्रियाणांद्रष्टव्यव्यवहारदर्शनाद्यर्थासभाभ
वेत्त्रिगुणैर्वैश्यैर्वैश्यानांचतुर्भिःशूद्रैःशूद्राणामितिसंभवाच्च क्षत्रियादीनांत्रयाणांव्रतमपिद्विगुणत्रिगुणचतुर्गुणमित्यर्थः एतानिचम-

ब्रह्महाद्वादशसमाःकुटींकृत्वावनेवसेत् भैक्षाश्यात्मविशुद्ध्यर्थंकृत्वाशवशिरोध्वजम् ७२ लक्ष्यंशस्त्र
भृतांवास्याद्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौवासमिद्धेत्रिरवाक्शिराः ७३ नूक्तब्रह्मवधप्रायश्चित्तवचना

निगुणवत्कृतनिर्गुणब्राह्मणहननविषयत्वेनभविष्यपुराणेव्याख्यातानि हंताचेत्गुणवान्वीरअकामान्निर्गुणोहतः कर्तव्यानिमनूक्ता
निकृत्वावैआश्वमेधिकम् ब्रह्महाद्वादशाब्दानिकुटींकृत्वावनेवसेत् गच्छेदवभृथंवापिअकामान्निर्गुणे हते जातिशक्तिगुणापेक्षंस-
कृद्बुद्धिकृतंतथा अनुबंधादिविज्ञायप्रायश्चित्तंप्रकल्पयेत् इतिविश्वामित्रवचनात्प्रायश्चित्ताधिक्यमूहनीयम् कामकृतेतुब्राह्मणव-
धेद्विगुणंब्रह्मवधप्रायश्चित्तंचतुर्विंशतिवर्षंतदाहांगिराः अकामतःकृतेपापेप्रायश्चित्तंनकामतः स्यात्त्वकामकृतेयत्तुद्विगुणंबुद्धिपूर्व-
के ७२ लक्ष्यमिति धनुःशराद्यायुधधारिणांब्रह्मवधपापक्षयार्थमयंलक्षीभूतइत्येवंजानतांस्वेच्छयाबाणलक्ष्यभूतोवावतिष्ठेत् याव
न्मृतोमृतकल्पोवाविशुध्येत्तदाहयाज्ञवल्क्यः संग्रामेवाहतोलक्ष्यभूतःशुद्धिमवाप्नुयात् मृतकल्पःप्रहारार्तोजीवन्नपिविशुद्ध्यति अ
ग्नौप्रदीप्तेवाऽधोमुखस्त्रीन्वारान्शरीरंप्रक्षिपेत् तथाप्रास्येतयथाम्रियेतेत्यापस्तंबवचनात् एवंप्रक्षिपेत्एतत्प्रायश्चित्तद्वयमनंतरे-
वक्ष्यमाणंचयजेतवाश्वमेधेनेत्येवंप्रायश्चित्तत्रयमिदंकामतःक्षत्रियस्यब्राह्मणवधविषयंमनुश्लोकमेवलिखितायथाव्याख्यानंभविष्य

पुराणे लक्ष्यंशस्त्रभृतांवास्यात्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौवासमिद्धेत्रिरवाक्शिराः यजेतवाश्वमेधेन क्षत्रियोविप्रघा
तकः प्रायश्चित्तत्रयंस्येतत्क्षत्रियस्यप्रकीर्त्तितम् क्षत्रियोनिर्गुणोधीरंब्राह्मणंवेदपारगम् निहत्यकामतोवीरलक्ष्यःशस्त्रभृतोभवेत्
नतुर्वेदविदंधीरंब्राह्मणंचाग्निहोत्रिणम् निहत्यकामादात्मानंक्षिपेदग्नाववाक्शिराः निर्गुणंब्राह्मणंहत्वाकामतोगुणवान्गुह यष्टा
वाअश्वमेधेन क्षत्रियोयोमहीपतिः ७३ यजेतेति यजेतवाश्वमेधेनेत्यनंतरंव्याख्यातंस्वर्जितायागविशेषेणगोसवेनवा अभिजितावि-
श्वजितावात्रिवृताअग्निष्टुतावायाजयेत्एतानिचाज्ञानतोब्रह्मवधेप्रायश्चित्तानित्रैवर्णिकस्यविकल्पितानि तदुक्तंभविष्यपुराणे स्वर्जि
तादेश्चयद्वीरकर्मणांपृतनापते अनुष्ठानंद्विजातीनांवधेत्वमतिपूर्वके ७४ जपन्निति वेदानांमध्यादेकंवेदंजपन्स्वल्पाहारःसंयतेंद्रि
योब्रह्महत्यापापनिर्हरणाययोजनानांशतंगच्छेत् एतदप्यज्ञानकृतेजातिमात्रब्राह्मणवधेत्रैवर्णिकस्यप्रायश्चित्तंतथाचभविष्यपुरा

यजेतवाश्वमेधेनस्वर्जितागोसवेनवा अभिजिद्विश्वजिद्भ्यांवात्रिवृताग्निष्टुतापिवा ७४ जपन्वान्यत
मंवेदंयोजनानांशतंव्रजेत् ब्रह्महत्यापनोदायमितभुङ्नियतेंद्रियः ७५ सर्वंस्वंवेदविदुषेब्राह्मणायोप
पादयेत् धनंवाजीवनायालंगृहंवाससपरिच्छदम् ७६ हविष्यभुग्वाऽनुसरेत्प्रतिस्रोतःसरस्वतीम् ज
पेद्वानियताहारस्त्रिर्वैवेदस्यसंहिताम् ७७

णेअयमेवश्लोकःपठितोव्याख्यातश्च जातिमात्रंयदाविप्रंहन्यादमतिपूर्वं
कम् वेदविच्चाग्निहोत्रीचतदातस्यभवेदिदम् ७५ सर्वस्वमिति सर्वस्वंवावेदविदेब्राह्मणायदद्यात्यावद्धनंजीवनायसमर्थंगृहंवागृ
होपयोगिधनधान्यादियुतं अतःसर्वस्वंवागृहंवाससपरिच्छदंदद्यात्जीवनायालमितिवचनात्जीवनपर्याप्तसर्वस्वंगृहंवादद्यात्नततो
ऽल्पंएतच्चजातिमात्रब्राह्मणवधेब्राह्मणस्यप्रायश्चित्तम् तथाचभविष्यपुराणम् जातिमात्रंयदाहन्यात्ब्राह्मणंब्राह्मणोगुह वेदा-
भ्यासविहीनोवैधनवानग्निवर्जितः प्रायश्चित्तंतदाकुर्यादिदंपापविशुद्धये धनंवाजीवनायालंगृहंवाससपरिच्छदम् ७६ हविष्येति
नीवारादिहविष्यान्नभोजीविख्यातप्रसरणादारभ्यपश्चिमादवस्रोतःप्रतिसरस्वतीयायात्एतच्चजातिमात्रब्राह्मणवधेज्ञानपूर्वके
तथाभविष्यपुराणे जातिमात्रेहतेविप्रेदेवेंद्रमतिपूर्वकम् हंतायदावेदहीनोधनेनचप्रवर्जितः तदैतत्कल्पयेत्तस्यप्रायश्चित्तंनिबो
धमे हविष्यभुक्सरेद्वापिप्रतिस्रोतःसरस्वतीम् अथवापरिमिताहारस्त्रीन्वाऽऽवृत्य वेदसंहिताम् संहिताग्रहणात्पदक्रमव्युदासः

अत्रापिभविष्यपुराणीयोविशेषः जातिमात्रंतुयोहन्यात्विप्रंत्वमतिपूर्वकम् ब्राह्मणोर्थेनगुणवान्तेनेदंपरिकल्पयेत् जपेद्वा
नियताहारस्त्रिर्वैवेदस्यसंहिताम् ऋचोयजूंषिसामानित्रैविद्यस्त्वंसकोत्तम ७७ कृतेति इदानींसमाप्तेद्वादशेवर्षेइत्युपदेशात्द्वाद
शवार्षिकस्यविशेषमाह लूनकेशनखश्मश्रुर्गोब्राह्मणहितेरतः गोब्राह्मणोपकारान्कुर्वन्ग्रामसमीपेगोष्ठपुण्यदेशवृक्षमूलान्यतमे
निवसेत्वनेकुटींकृत्वेत्यस्यविकल्पार्थमिदम् ७८ ब्राह्मणार्थइति प्रक्रांतेद्वादशवार्षिके‌ऽन्तराग्न्युदकहिंसकाद्याक्रांतब्राह्मणस्यगो
र्वापरित्राणार्थंप्राणान्परित्यजन्ब्रह्महत्ययामुच्यते गोब्राह्मणानांतत्परित्राणायामृतोपिमुच्यते ७९ त्र्यवरइति स्तेनादिभिर्ब्रा
ह्मणसर्वस्वेऽपह्रियमाणेतदानयनार्थंनिर्व्याजंयथाशक्तिप्रयत्नंकुर्वन्तत्रत्रिवारान्युद्धेप्रवर्त्तमानोनानीतेपिसर्वस्वेब्रह्महत्यापापात्

कृतवापनोनिवसेद्ग्रामांतेगोव्रजेपिवा आश्रमेवृक्षमूलेवागोब्राह्मणहितेरतः ७८ ब्राह्मणार्थेगवार्थे
वासद्यःप्राणान्परित्यजेत् मुच्यतेब्रह्महत्यायागोप्तागोर्ब्राह्मणस्यच ७९ त्रिवारंप्रतिरोद्धावासर्वस्व
मवजित्यवा विप्रस्यतन्निमित्तेवाप्राणालाभेविमुच्यते ८० एवंदृढव्रतोनित्यंब्रह्मचारीसमाहितः स
माप्तेद्वादशेवर्षेब्रह्महत्यांव्यपोहति ८१ शिष्ट्वावाभूमिदेवानांनरदेवसमागमे स्वमेनोऽवभृथस्नातो
हयमेधेविमुच्यते ८२

मुच्यते अथवाप्रथमवारएवविप्रसर्वस्वंअपहृतंजित्वाअर्पयतितथापिमुच्यते यद्वा धनापहारक
स्तेनः स्तैन्यैवब्राह्मणसंवर्द्धनमरणेप्रवर्त्ततेतथादायाद्यपहृतधनदानेनतंजीवयतितदापितन्निमित्तेतस्यप्राणालाभेब्रह्महत्यापापा
न्मुच्यतेएतदितरप्रकारांतरेणतुरक्षणेगोप्तागोर्ब्राह्मणस्यचेत्यपुनरुक्तिः ८० एवमिति एवमुक्तप्रकारेणसर्वदानियमोपहितःस्त्रीसं
योगादिशून्यःसंयतमनाःसमाप्तेद्वादशेवर्षेब्रह्महत्यापापंनाशयतिएवंब्राह्मणार्थइत्यादिसर्वप्रक्रांतद्वादशवार्षिकस्यबोद्धव्यम् ८१
शिष्ट्वेति अश्वमेधेब्राह्मणानामृत्विजांक्षत्रियस्ययजमानस्यसमागमेस्वब्रह्महत्यापापंशिष्ट्वानिवेद्यअवभृथस्नातोब्रह्महत्यापा-
पान्मुच्यतेद्वादशवार्षिकस्योपसंस्कृतत्वात् अतंत्रमेवेदंप्रायश्चित्तंयाच्चभविष्यपुराणे यदातुगुणवान्विप्रोहत्वाविप्रंतुनिर्गुणम्
अकामतस्तदागच्छेत्स्नानंन्वैवाश्वमेधिकम् गोविंदराजस्तुअश्वमेधविवर्जितसकलप्रायश्चित्तशेषतअस्यप्रक्रांतद्वादशवार्षिक

प्रायश्चित्तस्यांतराऽवभृथस्नानेनतेनैवशुद्धिरित्याह तदयुक्तंभविष्यपुराणवचनविरोधात् ८२ धर्मेति यस्माद्ब्राह्मणोधर्मस्यकारणं ब्राह्मणेनधर्मोपदेशोकृतेधर्मानुष्ठानात्राजानस्याग्रं भातंमन्वादिभिरुच्यतेताभ्यांब्राह्मणक्षत्रियाभ्यांसमूलाग्रधर्मतरुनिष्पत्तेः तस्मात्तेषांसमागमेअश्वमेधेपापंनिवेद्यावभृथस्नातः शुध्यंतीतिअस्यैवविशेषः ८३ ब्राह्मणइति ब्राह्मणउत्पत्तिमात्रेणैवकिंपुनः श्रुतादिभिर्देवानामपिपूज्यःकृतरांमनुष्याणांलोकस्यचमत्यक्षवत्प्रमाणंतदुपदेशस्यप्रामाण्यात्यस्मात्तत्रवेदएवकारणंवेदमूलकत्वादुपदेशस्ययतएवमतः ८४ तेषामिति तेषांविदुषांब्राह्मणानांमध्येवेदज्ञास्त्रयोपिकिंमुताधिकाःयत्पापनिर्हरणायप्रायश्चित्तंब्रूयुः तत्पापिनाविशुद्धयेभवति यस्माद्विदुषांवाक्पावित्रीततश्चप्रकाशप्रायश्चित्तार्थेविदुषामपिपरिषदवश्यंकार्यारहस्यप्रायश्चित्तेपुनरेतन्नास्तिरहस्यत्वविरोधात् ८५

धर्मस्यब्राह्मणोमूलमग्रंराजन्यउच्यते तस्मात्समागमेतेषामेनोविख्याप्यशुध्यति ८३ ब्राह्मणःसंभवेनैवदेवानामपिदैवतम् प्रमाणंचैवलोकस्यब्रह्मात्रैवहिकारणम् ८४ तेषांवेदविदोब्रूयुस्त्रयोप्येनःसुनिष्कृतिम् सातेषांपावनायस्यात्पवित्रंविदुषांहिवाक् ८५ अतोन्यतममास्थायविधिंविप्रःसमाहितः ब्रह्महत्याकृतंपापंव्यपोहत्यात्मवत्तया ८६

अतइति अस्मात्प्रायश्चित्तगणादन्यतमंप्रायश्चित्तंब्राह्मणादिःसंयतमनाआश्रित्यप्रशस्तार्थतयाब्रह्महत्याकृतंपापमपनुदतिएतच्चब्रह्मवधादिप्रायश्चित्तविधानंसकृत्पापकरणविषयंपापावृत्तौ तावर्त्तनीयंएनसिगुरुणिगुरूणिलघुनिलघूनिइतिगोतमस्मरणात् पूर्णेचानस्यनस्यज्ञातशूद्रहत्याव्रतंचरेत् इतिबहुमारणेप्रायश्चित्तबहुलस्यवस्यमाणत्वाच्चविधेःप्राथमिकादस्माद्द्वितीयेद्विगुणंस्मृतम् तृतीयेत्रिगुणंप्रोक्तंइतिगोतमस्मरणात् गृहदाहादिनायुगपदनेकब्राह्मणहननेतुभविष्यपुराणीयोविशेषः ब्राह्मणोब्राह्मणंवीरब्राह्मणौवाबहून्गुह निहत्ययुगपद्वीरएकंप्राणांतिकंचरेत् कामतस्तुयदाहन्याद्ब्राह्मणान्कुरुसत्तम तदात्मानंदहेदग्नौविधिनायेनतच्छृणु एतच्चाज्ञानविषयंसर्वमेवैतत् तथाअकामतोयदाहन्यात्ब्राह्मणान्ब्राह्मणोगुह चरेद्व्रतेनतथाघोरेयावत्प्राणपरिक्षयम् एतच्चाज्ञानवधेप्रकृतत्वाद्युगपन्मारणविषयंक्रमप्रमारणेतुविधेःप्राथमिकादस्मादित्यावृत्तिविधायकंवेदवचनात् ८६

हत्वेति प्रकृतत्वाद्ब्राह्मणगर्भविषयंस्त्रीपुन्नपुंसकत्वेनाविज्ञातंक्षत्रियंवैश्यंचयागप्रवृत्तंहत्वा आत्रेयींच स्त्रियंब्राह्मणीं तथात्रेयींचं ब्राह्मणीमितियमस्मरणात् हत्वाब्रह्महत्याप्रायश्चित्तंकुर्यात् आत्रेयीचरजस्वलाऋतुस्नातोच्यतेरजस्वलांऋतुस्नातामात्रेयीमिति वसिष्ठस्मरणात् एवंचानात्रेयीब्राह्मणीवधेत्रैवार्षिकंउपपातकंयथोक्तंस्त्रीशूद्रविट्क्षत्रवध इतियत्तूत्तरश्लोकेहत्वाचस्त्रीसुहृद्ध मितितदाहिताग्निब्राह्मणस्यब्राह्मणीभार्याविषयम् तथाचांगिराः आहिताग्नेर्ब्राह्मणस्यहत्वापत्नीमनिंदिताम् ब्रह्महत्याव्रतं कुर्यात्आत्रेयीघ्नस्तथैवच ८७ उक्त्वेति हिरण्यभूम्यादियुक्तसाक्ष्येअनृतमुक्त्वागुरोश्चमिथ्याभिशापमुत्पाद्य निक्षेपंचब्राह्मणसु वर्णादन्यद्रजतादिद्रव्यंक्षत्रियादेःसुवर्णमपिचापहृत्यस्त्रीवधंचयथाव्याख्यातंहत्वामित्रंचाब्राह्मणंहत्वाब्रह्महत्याप्रायश्चित्तंकुर्या त् ८८ इयमिति एतत्तुप्रायश्चित्तंविशेषउपदेशांतरेणाकामतोब्राह्मणवधेऽभिहितंकामतस्तु ब्राह्मणंवधेनेयन्निष्कृतिः नैतस्या

हत्वागर्भमविज्ञातमेतदेवव्रतंचरेत् राजन्यवैश्यौचेजानावात्रेयीमेवचस्त्रियम् ८७ उक्त्वाचैवानृतं साक्ष्येप्रतिरुध्यगुरुंतथा अपहृत्यचनिःक्षेपंकृत्वाचस्त्रीसुहृद्वधम् ८८ इयंविशुद्धिरुदिताप्र- माप्याकामतोद्विजम् कामतोब्राह्मणवधेनिष्कृतिर्नविधीयते ८९ सुरांपीत्वाद्विजोमोहादग्निवर्णां सुरांपिबेत् तयासकायेनिर्दग्धेमुच्यतेकिल्बिषात्ततः ९०

यश्चित्तंकिंत्वतोद्विगुणादिकमरणात्मकमितिप्रायश्चित्त- गौरवार्थंनतुप्रायश्चित्ताभावार्थम् कामतस्तुकृतंमोहात्प्रायश्चित्तैःपृथग्विधैःइतिपूर्वोक्तविरोधात् ८९ सुरामिति सुराशब्दःपैष्टी मात्रेमुख्योनतुगौडीमाध्वीषु त्रितयानुगतैकरूपाभावात्प्रत्येकंचशक्तिकल्पनेशक्तित्रयकल्पनागौरवप्रसंगात् गौड्यादिमदिरासुगुण वृत्त्यापिसुराशब्दप्रयोगोपपत्तेः अतएवभविष्यपुराणे सुराचपैष्टीमुख्योक्तानतस्यास्त्वितरेसमे पैष्ट्याःपानेनचैतासांप्रायश्चित्तंनिबो धत यमेनोक्तम् महाबाहोसमाःसर्वामदिराभदयोगतः एतासामितिनिर्द्धारणेषष्ठीएतासांगौडीमाध्वीपैष्टीनांप्रकृतानांमध्येपैष्टी- पानेमनूक्तंप्रायश्चित्तंसुरांपीत्वाद्विजोमोहादितिनिबोधतेत्यर्थः मुख्यांसुरांपैष्टींरागादिव्यामूढतयाद्विजोब्राह्मणादिश्चपीत्वाअग्नि वर्णांसुरांपिबेत्तयासुरयाशरीरेनिर्दग्धेसतिद्विजस्तस्मात्पापान्मुच्यते एतच्चगुरुत्वात्कामकारकृतसुरापानविषयम् तथाचबृहस्पतिः

सुरापानेकामकृतेज्न्नलं नीतां विनिःक्षिपेत् मुखेतयासनिर्दग्धोमृतःशुद्धिमवाप्नुयात् ९० गोमूत्रमिति गोमूत्रजलगोक्षीरगव्यघृ
तगोमयरसानामन्यतममग्निस्पर्शंकृत्वायावन्मरणंपिबेत् ९१ कणान्वेति अथवाविकृतवासाजटावान्सुराभाजनचिन्हः सूक्ष्म
वयवान् आकृष्टतैलंतिलंवारात्रावेकवारंसंवत्सरपर्यंतंसुरापानपापनाशनार्थंभक्षयेत् इदमबुद्धिपूर्वकंअमुख्यसुरापानेद्रष्टव्यम् न
तुगुणांतरवैकल्पिकलघुत्वात् ९२ सुरेति यस्मात्तंडुलपिष्टसाध्यत्वात्सुरा अन्नमलंमलशब्देनचपापमुच्यते तस्माद्ब्राह्मणक्षत्रियवैश्या
पैष्टींसुरांनपिबेयुः इत्यनेनप्रतिषेधेसतिएतदतिक्रमेसुरांपीत्वेतिप्रायश्चित्तं अन्नमलानुवादाच्चपैष्टीनिषेधएवस्फुटः त्रैवर्णिकस्यमनुने
वोक्तः ९३ गौडीति यागुडेनकृतासागौडीएवंपिष्टेनकृतापैष्टीमधुकवृक्षोमधुःतत्पुष्पैः कृतासामाध्वीएवंत्रिःप्रकारासुराज्ञा

गोमूत्रमग्निवर्णंवापिबेदुदकमेववा पयोघृतंवामरणाद्गोशकृद्रसमेववा ९१ कणान्वाभक्षयेदब्दंपिण्या
कंवासकृन्निशि सुरापानापनुत्त्यर्थंवालवासाजटीध्वजी ९२ सुरावैमलमन्नानांपाप्माचमलमुच्यते त
स्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेत् ९३ गौडीपैष्टीचमाध्वीचविज्ञेयात्रिविधासुरा यथैवैकातथा
सर्वानपातव्याद्विजोत्तमैः ९४ यक्षरक्षःपिशाचान्नंमद्यंमांससुरासवम् तद्ब्राह्मणेननात्तव्यंदेवानाम-
श्नताहविः ९५

रासाम्यनिबोधनमितरसुरापेक्षयाब्राह्मणस्यगौडीमाध्वीपानेप्रायश्चित्त गौरवार्थम् यथावैकापैष्टीसु
सुरापूर्ववाक्यनिषिद्धत्वात्त्रैवर्णिकस्यापेक्षयातथापूर्वागौडीमाध्वीचद्विजोत्तमैर्नपातव्या ९४ यक्षेति मद्यमत्रनिषिद्धंपैष्टीगौडीमा
ध्वीव्यतिरिक्तंनवविधंवोद्धव्यंतान्याहपुलस्त्यः पानसद्राक्षमाध्वीकंखार्जूरंतालमैक्षवम् माध्वीकंटांकमार्द्वीकमैरेयन्नारिकेरजम्
सामान्यानिद्विजातीनांमद्यान्येकादशैवच द्वादशंतुसुरामद्यंसर्वेषामधमंस्मृतम् मांसंचप्रतिषिद्धंसुराचत्रिप्रकाराप्रोक्ता असृतइ
तिआसवोमद्यानामवस्थाविशेषः मद्यःकृतसंसाधनोसंजातमद्यस्वभावः यमधिकृत्यइदंपुलस्त्योक्तप्रायश्चित्तम् द्राक्षेक्षुटंकखर्जूरपन
सादेश्चयोरसः सद्योजातंतुपीत्वातुत्र्यहाच्छुद्धोद्विजोत्तमः एवंमद्यादित्रुष्टयंयक्षरक्षःसंबंध्यन्नंनतस्तद्ब्राह्मणेनदेवानांहविर्भक्षय
तानाशितव्यम् निषिद्धायाः सुरायाइहोपादानंयक्षरक्षःपिशाचान्नतयानिंदार्थम् अत्रकेचिद्देवानामश्नताहविरितिपुंलिंगनिर्देशा-

ब्राह्मणस्यपुंसएवमद्यप्रतिषेधोनस्त्रियाइत्याहुःतदसत् पतिलोकंनसायातिब्राह्मणीयासुरांपिबेत् इहैवसाशुनीगृध्रीसूकरीचो
पजायते इतियाज्ञवल्क्यादिस्मृतिविरोधात् ९५ अमेध्यइति ब्राह्मणोमद्यपानमदमूढबुद्धिःसन् अशुचौवापतेत्वेदवाक्यंवाउच्चार
येत्ब्रह्महत्याद्यकार्यंवाकुर्यात् अतस्तेनमद्यपानंनकार्यमितिपूर्वस्यैवानुवादः ९६ यस्येति यस्यब्राह्मणस्यकायगतंब्रह्मजीवात्माएक
वारमपिमद्येनाप्लाव्यतेतथाचैकवारमपियोब्राह्मणोमद्यंपिबतितस्यब्राह्मण्यंव्यपैतिशूद्रतांसमाप्नोतितस्मान्मद्यंसर्वथैवनपातव्यं ९७
एषेति इदंसुरापानजनितपापस्यनानाप्रकारंप्रायश्चित्तमभिहितंतस्मात्परंब्राह्मणसुवर्णहरणपापस्यनिष्कृतिंवक्ष्यामि ९८ सुवर्णेति
अपहृतसुवर्णंतुब्राह्मणस्ययतःस्वयमितिशातातपस्मरणात् ब्राह्मणसुवर्णचौरोब्राह्मणोराजानंगत्वाब्राह्मणसुवर्णापहारंस्वीयंक
र्मकथयन्ममनिग्रहंकरोत्विितिब्रूयात्ब्राह्मणग्रहणंमनुष्यमात्रप्रदर्शनार्थम् प्रायश्चित्तीयतेनरइतिप्रकृतत्वात् क्षत्रियादीनांचप्राय-

अमेध्येवापतेन्मत्तोवैदिकंवाप्युदाहरेत् अकार्यमन्यत्कुर्याद्वाब्राह्मणोमदमोहितः ९६ यस्यकाय
गतंब्रह्ममद्येनाप्लाव्यतेसकृत् तस्यव्यपैतिब्राह्मण्यंशूद्रत्वंचसगच्छति ९७ एषाविचित्राभिहिता
सुरापानस्यनिष्कृतिः अतऊर्ध्वंप्रवक्ष्यामिसुवर्णस्तेयनिष्कृतिम् ९८ सुवर्णस्तेयकृद्विप्रोराजानम
भिगम्यतु स्वकर्मख्यापयन्ब्रूयान्मांभवाननुशास्त्विति ९९ गृहीत्वामुसलंराजासकृद्धन्यात्तुतंस्व
यम् वधेनशुध्यतिस्तेनोब्राह्मणस्तपसैववा १०० श्चित्ताभिधानात् ९९ गृहीत्वेति स्कंधेनादायमुसलमित्यादेरु
क्तत्वात्तेनार्पितमुसलादिकंगृहीत्वास्तेयकारिणंमनुष्यमेकवारंराजास्वयंहन्यात् सचस्तेनोवधेनमुसलाभिघातेनहतोमुक्तोपिवाशु
द्धिरितियाज्ञवल्क्यस्मरणात् मृतोवामृतकल्पोवाजीवन्तस्मात्पापान्मुच्यतेब्राह्मणःपुनस्तपसैववेत्येवकारदर्शनात् नथान्ननजातुब्रा
ह्मणंहन्यात्सर्वपापेष्वपिस्थितमितितपसैवशुध्यतिअतएवमन्वर्थव्याख्यानपरेभविष्यपुराणे यदेतद्वचनंवीर ब्राह्मणस्तपसैववा त
स्तेनस्यमरणादिहन्ब्राह्मणस्यसुराधिप तपसैवेत्यनेनेहप्रतिषेधोवधस्यतु वाशब्दश्चक्षत्रियादीनामपितपोविकल्पार्थःब्राह्मणस्यतु
तपएवेतिनियमोनतुब्राह्मणस्यैवतपःअतएवभविष्यपुराणे इतरेषामपिविभोतपोनप्रतिषिध्यतइति तदेवतपआह १०० तपसेति
तपसास्वर्णस्तेयेउत्पन्नंपापंद्विजोनिर्हर्तुमिच्छन् अरण्यग्रहणाद्वायव्याचम्पहारणिपद्धतमुक्तंतत्कुर्यात् एतच्चद्वादशवार्षिकं

क्लेशगौरवात् क्षत्रियादीनां मरणेन विकल्पितत्वाच्च ब्राह्मणसंबंधिनः सुवर्णापहरणे पंचकृष्णलकोमाषस्ते सुवर्णस्तु षोडशेति सुवर्णपरिमाणं द्रष्टव्यम् अतोन्यूनस्य परिमाणापेक्षया मनूक्तपरिमाणस्य ग्रहीतुं न्याय्यत्वात् यत्त्वधिकपरिमाणं भविष्यपुराणे श्रूयते तत्तथानुबंधविशिष्टापहारे तथाविध प्रायश्चित्तविषयमेव तथा भविष्यपुराणे क्षत्रियाद्यास्त्रयो वर्णा निर्गुणाह्यथ तत्पराः गुणाढ्यस्य तु विप्रस्य पंच निष्कान् हरंति चेत् निष्कानेकादश तथा दग्ध्वात्मानं तु पावके शुद्ध्येयुर्मरणाद्वा स्वचरेद्ब्रह्मात्मशुद्धये १०१ एतैरिति ब्राह्मणसुवर्णस्तेयजनितपापमेभिर्व्रतैर्द्विजो निर्हरेत् व्रततपसोर्द्वयोरुक्तत्वात् एतैरिति बहुवचनं संबंधा-मपि प्रायश्चित्तं कल्पनीयमिति ज्ञापनार्थम् गुरुस्त्रीगमननिमित्तं पुनः पापमेभिर्वक्ष्यमाणैः प्रायश्चित्तैर्निर्हरेत् १०२ गुर्विति

तपसापनुनुत्सुस्तु सुवर्णस्तेयजं मलम् चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम् १०१ एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत् १०२ गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये सूर्मीं ज्वलंतीं स्वाश्लिष्येन्मृत्युना स विशुध्यति १०३ स्वयं वा शिश्नवृषणावुत्कृत्याधाय चांजलौ नैर्ऋतीं दिशमातिष्ठेदानिपातादजिह्मगः १०४ खट्वांगी चीरवासा वा श्मश्रुलो विजने वने प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः १०५ चांद्रायणं वा त्रीन्मासानभ्यस्येन्नियतेंद्रियः हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये १०६

दीनि कर्माण्युक्तत्वात् गुरुः पिता तल्पं भार्या गुरुतल्पं गुरुभार्या तद्गामी गुरुभार्यागः विख्याप्य लोहमये तप्ते शयने स्वप्यात् लोहमयीं स्त्रीप्रकृतिं कृत्वा ज्वलंतीमालिंग्य मृत्युं प्राप्य विशुद्धो भवति १०३ स्वयं वेति लिंगवृषणौ छित्त्वा अंजलौ कृत्वा यावत् शरीरपातमवक्रगतिः सन् दक्षिणपश्चिमां दिशं गच्छेत् एवं च उक्तप्रायश्चित्तद्वयं गुरुत्वसवर्णगुरुभार्याविषयं ज्ञानतो रेतोविसर्गपर्यंतं मैथुनविषयम् १०४ खट्वांगीति खट्वांगं बिभ्रद्ब्रह्मवधलांछनः केशनखलोमधारी संयतमना निर्जने वने वर्षमेकं प्राजापत्यव्रतं चरेत् एवं च वक्ष्यमाणप्रायश्चित्तं च लघुत्वात् भार्यादिक्रमेणाज्ञानविषयं बोद्धव्यम् १०५ चांद्रायणमित्यादि यद्वा गुरुभार्यापापनिर्हरणाय संयतेंद्रियः फलमूलादिना हविष्येण नीवारादिकृतयवाग्वा वा त्रीन् मासान् चांद्रा

पणात्याचरेत् एतच्च पूर्वोक्तादपि लघुत्वात् असाध्वीमसवर्णां वा गुरुभार्यां गच्छतो द्रष्टव्यम् १०६ एतैरित्यादि एभिरुक्तव्रतैर्ब्रह्महत्यादिमहापातककारिणः पापं निर्हरेयुः गोवधाद्युपपातककारिणः पुनर्वक्ष्यमाणप्रकारेणानेकरूपव्रतैः पापानि निर्हरेयुः १०७ उपेति अनेनविधिना यस्तेतियावत्कुलकं उपपातकयुक्तो गोघाती शिथिलयवागूरूपेण प्रथममासं यवान्पिबेत् स शिरसं मुंडितशिराः लूनश्मश्रुः तेन हतगोचर्मणाच्छादितदेहो मासत्रयमेव गोष्ठे वसेत् गोमूत्रेणाचरेत् स्नानं संयतेंद्रियः कृत्रिमलवणवर्जितं हविष्यमन्नमेकाहं भुक्त्वा द्वितीये ह्निसायं द्वितीयतृतीयमासावश्नीयात् मासद्वयमेव दिवा प्रातस्तामनुगच्छेत्तासां च गवां खुरप्रहारादूर्ध्वमुत्थितं रजस्तिष्ठन्नास्वादयेत् कंडूयनादिना ताः परिचर्य प्रणम्य च रात्रौ भित्त्यादिकमनुवेश्य उपविष्ट आसीत तथा कृतनिर्विगतक्रोधः उत्थितासु गोषु पश्चादुत्तिष्ठेत् व्रजेच्च

एतैर्व्रतैरपोहेयुर्महापातकिनोमलम् उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः १०७ उपपातकसंयुक्तो गोघ्नोमासंयवान्पिबेत् कृतवापोवसेद्गोष्ठेचर्मणातेनसंवृतः १०८ चतुर्थकालमश्नीयादक्षारलवणंमितम् गोमूत्रेणाचरेत्स्नानंद्वौमासौनियतेंद्रियः १०९ दिवानुगच्छेद्गास्तास्तु तिष्ठन्नूर्ध्वंरजःपिबेत् शुश्रूषित्वानमस्कृत्यरात्रौवीरासनंवसेत् ११० तिष्ठंतीष्वनुतिष्ठेत्तुव्रजंतीष्वप्यनुव्रजेत् आसीनासुतथासीनोनियतोवीतमत्सरः १११ आतुरामभिशस्तांवाचौरव्याघ्रादिभिर्भयैः पतितांपंकलग्नांवासर्वोपायैर्विमोचयेत् ११२ उष्णेवर्षतिशीतेवामारुतेवातिवाभृशम् नकुर्वीतात्मनस्त्राणंगोरकृत्वातुशक्तितः ११३ आत्मनोयदिवान्येषांगृहेक्षेत्रेथवाखले भक्षयंतींनकथयेत्पिबंतंचैववत्सकम् ११४ अनेनविधिना यस्तुगोघ्नोगामनुगच्छति सगोहत्याकृतंपापंत्रिभिर्मासैर्व्यपोहति ११५ परिभ्रमंतीषु पश्चात्ततः परिभ्रमेत् उपविष्टासु गोषूपविशेत् व्याधितां चौरव्याघ्रादिभयहेतुभिराक्रांतां पतितां कर्दमलग्नां वा यथाशक्ति मोचयेत् तथा उष्णे आदित्ये तपति मेघे च वर्षति शीते चोपस्थिते मारुते चात्यर्थं वाति गोर्यथाशक्ति रक्षामकृत्वा आत्मनस्त्राणं न कुर्यात् तथा आत्मनो अन्येषां वा गेहे क्षेत्रे खले पु सस्यादिभक्षणं कुर्वतीं वत्सं च क्षीरं पिबंतं न कथयेत् अनेनोक्तविधानेन यो गोघ्नो गाः परिचरति स गोवधजनितपापं त्रिभिर्मासैरपनुदति १०८ १०९ ११० १११ ११२ ११३ ११४ ११५ ७ ७ ७

वृषभेति वृषएकादशोयासांताःसम्यगनुष्ठितप्रायश्चित्तोदद्यात् अविद्यमानेतावतिधनेसर्वस्वंवेदज्ञेभ्योब्राह्मणेभ्योदद्यात्
११६ एतदेवेति अपरेतूपपातकिनोवक्ष्यमाणावकीर्णिवर्जिताःपापनिर्हरणार्थमेतद्देवगोवधप्रायश्चित्तंचांद्रायणंवालघुत्वात्कुर्युःचां
द्रायणंतुलघुसूपपातकेजातिशक्तिगुणाद्यपेक्षयैवायोजनीयम् ११७ अवेति अवकीर्णीवक्ष्यमाणःकाणेनगर्दभेनरात्रौच
पशुनानैर्ऋतयज्ञेन्निर्ऋत्याख्यांदेवतांयजेत् ११८ हुत्वेति ततोनिर्ऋत्यैगर्दभवपादिहोमान्यथावच्चतुष्पथेकृत्वातदंतेसमासिंचतुमारुत
इत्येतयाऋचामारुतेंद्रबृहस्पत्यग्नीनांघृतेनाहुतीर्जुहुयादसमासिक्तादवकीर्णवतोलक्षणमाह ११९ कामतइति इच्छातोद्विजः अव
कीर्णीभवेद्ब्रह्मचारीनचयोषितमितिवचनात्स्त्रीयोनौशुक्रोत्सर्गंब्रह्मचर्यस्यातिक्रममवकीर्णरूपंसर्वज्ञावेदविदःप्राहुः १२० मारुत

वृषभैकादशागाश्चदद्यात्सुचरितव्रतः अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेत् ११६ एतदेवव्रतंकुर्युरुपपातकिनोद्विजाः अवकीर्णिवर्ज्यंशुद्ध्यर्थंचांद्रायणमथापिवा ११७ अवकीर्णीतुकाणेनगर्दभेनचतुष्पथे पाकयज्ञविधानेनयजेतनिर्ऋतिंनिशि ११८ हुत्वाग्नौविधिवद्धोमानंततश्चसमेत्यृचा वातेंद्रगुरुवन्हीनांजुहुयात्सर्पिषाहुतीः ११९ कामतोरेतसःसेकंव्रतस्थस्यद्विजन्मनः अतिक्रमंव्रतस्याहुर्धर्मज्ञाब्रह्मवादिनः १२० मारुतंपुरुहूतंचगुरुंपावकमेवच चतुरोव्रतिनोऽभ्येतिब्राह्मंतेजोऽवकीर्णिनः १२१ एतस्मिन्नेनसिप्राप्तेवसित्वागर्दभाजिनम् सप्तागारांश्चरेद्भैक्षंस्वकर्मपरिकीर्त्तयन् १२२ तेभ्योलब्धेनभैक्षेणवर्त्तयन्नेककालिकम् उपस्पृशंस्त्रिषवणंत्वब्देनसविशुध्यति १२३

मिति व्रतचारिणोवेदाध्ययननियमानुष्ठानजंतेजः तदवकीर्णिनःसतोमरुदिंद्रबृहस्पतिपावकांश्चतुरःसंक्रामतिअतस्तेभ्यआहुतीर्जुहुयात्इत्याज्याहुतेरयमनुवादः १२१ एतस्मि
न्निति एतस्मिन्नवकीर्णाख्येपापउत्पन्नेपूर्वोक्तंगर्दभयागादिकृत्वागर्दभचर्मपरिधायेतिहारीतस्मरणात्सगर्दभसंबंधिचर्मप्रावृतोव
कीर्णीअहमितिस्वकर्मख्यापनंकुर्वन्सप्तगृहाणिभैक्ष्यंचरेत्तेभ्योलब्धेनभैक्ष्येणवर्त्तयन्नेककालिकमिति १२२ तेभ्यइति तेभ्यःसप्त
गृहेभ्योलब्धेनभैक्षेणएककालमाहारंकुर्वन्सायंप्रातर्मध्यंदिनेषुचस्नानमाचरन्संवत्सरेणैवविशुध्यति १२३

जातीति ब्राह्मणस्यरुजः कृत्वेत्यादिजातिभ्रंशकरमोक्तंतन्मध्यादन्यतमंकर्मविशेषं इच्छातः कृत्वावक्ष्यमाणंसांतपनंसप्ताहसाध्यंकुर्या
त् अनिच्छातःपुनः कृत्वाप्राजापत्यंवक्ष्यमाणंचरेत् १२४ संकरेति खराश्वोष्ट्रेत्यादिनासंकरीकरणान्युक्तानिनिंदितेभ्योधनादानमि
त्यादिनाचापात्रीकरणान्युक्तानितेषांमध्यादन्यतममिच्छातः कृत्वाचांद्रायणंमासंशुद्ध्यर्थंकुर्यात् कृमिकीटवयोहत्येत्यादिनामलिनीक
रणान्युक्तानितन्मध्यादेकमिच्छातः कृत्वात्रिरात्रंयवागूंक्वथितामश्नीयात् १२५ तुरीयइति ब्रह्महत्यातुरीयोभागः त्रैवार्षिकरूपः द्वा
दशवार्षिकस्यचतुर्थोभागः एतच्चप्रायश्चित्तंस्त्रीशूद्रविट्क्षत्रवधइतिउपपातकत्वेनोपदिष्टंत्रैवार्षिकत्वापेक्षयागुरुत्वात् वृत्तस्थक्षत्रि
यस्यकामतोवधेद्रष्टव्यंवैश्येसाध्वाचारेकामतोहतेअष्टमोभागःसार्द्धवार्षिकंव्रतंशूद्रेवृत्तस्थेहतेकामतोद्रष्टव्यंनवमासिकम् १२६
अकामतइति अबुद्धिपूर्वकंपुनःक्षत्रियंनिहत्यवृषभेनाधिकंसहस्रंयासांगवांताआत्मशुद्ध्यर्थंब्राह्मणेभ्योदद्यात् १२७ त्र्यब्दमिति

जातिभ्रंशकरंकर्मकृत्वान्यतममिच्छया चरेत्सांतपनंकृच्छ्रंप्राजापत्यमनिच्छया १२४ संकरापात्रकृ
त्यासुमासंशोधनमैंदवम् मलिनीकरणीयेषुतप्तःस्याद्यावकैस्त्र्यहम् १२५ तुरीयोब्रह्महत्यायाःक्षत्रि
यस्यवधे स्मृतः वैश्येऽष्टमांशोवृत्तस्थेशूद्रेज्ञेयस्तुषोडशः १२६ अकामतस्तुराजन्यंविनिपात्यद्विजोत्त
मः वृषभैकसहस्रागादद्यात्सुचरितव्रतः १२७ त्र्यब्दंचरेद्वानियतोजटीब्रह्महणोव्रतम् वसन्दूरतरेग्रा
माद्वृक्षमूलनिकेतनः १२८ एतदेवचरेदब्दंप्रायश्चित्तंद्विजोत्तमः प्रमाप्यवैश्यंवृत्तस्थंदद्याच्चैकशतं
गवाम् १२९ एतदेवव्रतंकृत्स्नंषण्मासाञ्छूद्रहाचरेत् वृषभैकादशावापिदद्याद्विप्रायगाःसिताः १३०

यद्वासंयतोजटावान्ग्रामाद्विप्रकृष्टवृक्षमूलेकृतनिवासोब्रह्महणियदुक्तंब्रह्महाद्वादशसमा इत्यादितद्वर्षत्रयंकुर्यात्नचतुरीयो
ब्रह्महत्यायाइत्यनेनपुनरुक्तिर्वाच्याजटीदूरतरेग्रामात्वृक्षमूलनिकेतनइतिवचनात्व्यतिरिक्तशवशिरोध्वजधारणादिसकल
धर्मनिवृत्त्यर्थत्वादस्ययंयस्यअकामाधिकाराच्चइदमकामतः अतएवांगलाघवाद्युचितम् १२८ एतदिति एतदेवद्वादशवार्षि
कव्रतमकामतःसाध्वाचारंवैश्यंनिहत्यवर्षमेकंब्राह्मणादिःकुर्यात्एकाधिकंवागोशतंदद्यात् १२९ एतदिति एतदप्यकामतः
इदमेवव्रतंशूद्रहाषण्मासंचरेत्वृषभएकादशोयासांगवांताःशुक्लवर्णाब्राह्मणायदद्यात् १३० मार्जारेति बिडालनकुलचाष

भेककुक्कुरगोधापेचककाकानामेकैकं हत्वा शूद्रहत्याव्रतं स्त्रीशूद्रवध इत्युपपातकप्रायश्चित्तं गोवधव्रतं चांद्रायणं चरेत् न तु शूद्रे ज्ञेयस्तु षोडशोत्सादिप्रायश्चित्तं पापस्य लघुत्वात् चांद्रायणमप्येतत् कामतोऽभ्यासादिविषये द्रष्टव्यम् १३१ पयइति अबुद्धिपूर्वकं मार्जारादीनां वधे त्रिरात्रं क्षीरं पिबेत् अथ मंदानलत्वादिना न समर्थः त्रिरात्रं प्रतियोजनमध्वनो व्रजेत् अत्राशक्तस्त्रिरात्रं नद्यां स्नायात् तत्राप्यक्षमस्त्रिरात्रं आपोहिष्ठेत्यादिसूक्तं जपेत् यथोत्तरं लघुत्वात् पूर्वपूर्वासंभवे उत्तरोत्तरपरिग्रहः न तु वैकल्पिकः १३२ अभ्रिमिति सर्पं हत्वा ब्राह्मणाय तीक्ष्णाग्रं लोहदंडं दद्यात् नपुंसकं हत्वा पलालभारं सीसकं च माषकं ब्राह्मणाय दद्यात् १३३ घृतेति सूकरे हते घृतपूर्णं घटं ब्राह्मणाय दद्यात् तित्तिरिसंज्ञिनि पक्षिणि हते चतुराढकपरिमाणं तिलं दद्यात् शुके हते द्विवर्षवत्सं क्रौंचाख्यं पक्षिणं हत्वा त्रिवर्षवत्सं ब्राह्मणाय दद्यात् १३४ हत्वेति हंसबलाकामयूरवानरश्येनभासाख्यं पक्षिणामन्यतमं हत्वा ब्राह्मणाय गां दद्यात् १३५ वासइति अ

मार्जारनकुलौ हत्वा चाषं मंडूकमेव च श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् १३१ पयः पिबेत्त्रिरात्रं वा योजनं वाऽध्वनो व्रजेत् उपस्पृशेत्स्रवंत्यां वा सूक्तं वाब्दैवतं जपेत् १३२ अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः पलालभारकं षंढे सैसकं चैकमाषकम् १३३ घृतकुंभं वराहे तु तिलद्रोणं तु तित्तिरौ शुके द्विहायनं वत्सं क्रौंचं हत्वा त्रिहायनम् १३४ हत्वा हंसं बलाकां च बकं बर्हिणमेव च वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम् १३५ वासो दद्याद्धयं हत्वा पंच नीलान्वृषान्गजम् अजमेषावनड्वाहं खरं हत्वैकहायनम् १३६ क्रव्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीम् अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलम् १३७ जीनकार्मुकबस्तावीन्पृथग्दद्याद्विशुद्धये चतुर्णामपि वर्णानां नारीर्हत्वाऽनवस्थिताः १३८

श्वं हत्वा वस्त्रं दद्यात् हस्तिनं हत्वा पंच नीलान्वृषभान्दद्यात् एकैकं छागमेषौ हत्वा वृषभं दद्यात् गर्दभं हत्वा एकवर्षं वत्सं दद्यात् १३६ क्रव्यादानिति आममांसभक्षिणो मृगान्व्याघ्रादीन्हत्वा बहुक्षीरां धेनुं दद्यात् आममांसाभक्षकान् हरिणादीन् हत्वा भोदवत्सिकां दद्यात् उष्ट्रं हत्वा सुवर्णकृष्णलं रक्तिकां दद्यात् १३७ जीनेति ब्राह्मणादिवर्णस्त्रियो लोभादुत्कृष्टापकृष्टपुरुषव्यभिचारिणीर्हत्वा ब्राह्मणादिक्रमेण चर्मपुटधनुः छागमेषान् शुद्ध्यर्थं दद्यात् १३८ दानेति अभिमतानामभावाद्दानेन सर्वपापनिर्हरणं कर्तुमसमर्थो ब्रा

णादिः प्रत्येकंवधे कृच्छ्रंप्राथस्यात्प्राजापत्यंद्विज. पापनिर्हरणार्थंचरेत्सर्पादयश्चाग्निकाष्ठायसीदंष्ट्रादयेवमारभ्येतत्सर्वंताग्रहणंने
१३९ अस्थीति अनस्थिसाहस्र्यात्अस्थिमतांप्राणिनांकृकलासादीनांसहस्रस्यवधेशूद्रवधप्रायश्चित्तमोपदेशिकंकुर्यात् अस्थिरहि
तानांचशकटपरिमितानांवधेतदेवप्रायश्चित्तंकुर्यात् १४० किंचिदिति अस्थिमतांक्षुद्रजंतूनांकृकलासादीनांप्रत्येकंवधेकिंचिदेवद
द्यात् अस्थिमतांवधेपणोदेयःस्वर्णस्येतिस्मरणात्किंचिदेवेतिपणोबोद्धव्यः अनस्थिमतांतुयूकामत्कुणादीनांप्रत्येकंवधेप्राणायामेन
शुद्धोभवतिप्राणायामश्चसव्याहृतिकांसप्रणवांसावित्रींशिरसासह त्रिःपठेदायतप्राणःप्राणायामःसउच्यतेइतिवसिष्ठप्रोक्तलक्षणोग्रा
ह्यः १४१ फलेति फलदानामाम्रादीनांवृक्षाणांगुल्मानांकुब्जकादीनांवल्लीनांगुडुच्यादीनांलतानांवृक्षशाखासक्तानांपुष्पितानांचवी
रुधांकुष्मांडादीनांप्रत्येकंछेदनेपापप्रमोचनार्थंसावित्र्यादिऋक्शतंजपनीयंइंधनार्थमशुष्काणांद्रुमाणामवपातनमित्यादेरुपपातक

दानेनवधनिर्णेकंसर्पादीनामशक्नुवन् एकैकशश्चरेत्कृच्छ्रंद्विजःपापापनुत्तये १३९ अस्थिमतांतुसत्त्वा
नांसहस्रस्यप्रमापणे पूर्णेचानस्यनस्थ्नांतुशूद्रहत्याव्रतंचरेत् १४० किंचिदेवतुविप्रायदद्यादस्थिमतांवधे
अनस्थ्नांचैवहिंसायांप्राणायामेनशुद्ध्यति १४१ फलदानांतुवृक्षाणांछेदनेजप्यमृक्शतम् गुल्मवल्लीलता
नांचपुष्पितानांचवीरुधाम् १४२ अन्नाद्यजानांसत्त्वानांरसजानांचसर्वशः फलपुष्पोद्भवानांचघृतप्राशोवि-
शोधनम् १४३ कृष्टजानामोषधीनांजातानांचस्वयंवने वृथालंभेऽनुगच्छेद्गांदिनमेकंपयोव्रतः १४४ ए
तैर्व्रतैरपोह्यंस्यादेनोहिंसासमुद्भवम् ज्ञानाज्ञानकृतंकृत्स्नंशृणुतानाद्यभक्षणे १४५ मध्येपठितस्यगुरुप्रायश्चि

त्ताभिधानात्इदंफलवद्वृक्षादिछेदनेलघुप्रायश्चित्तंसकृदबुद्धिपूर्वकविषयंवेदितव्यम् १४२ अन्नाद्येति अन्नादिषुजातानांगुडा
दिरसजातानांचउदुंबरादिफलसंभवानामधूकादिपुष्पोद्भवानांचसर्वप्राणिनांवधेघृतप्राशनंपापशोधनम् १४३ कृष्टेति कर्षणपूर्व
कजातानामोषधीनांषष्टिकादीनांवनेचस्वयमुत्पन्नानांनिःप्रयोजनच्छेदनेक्षीराहारः एषैकमहोगोरनुगमनंकुर्यात् १४४ एतैरिति
एभिरुक्तपापैर्हिंसाजनितपापंज्ञानाज्ञानकृतंनिर्हरणीयंइदानीमभक्ष्यभक्षणप्रायश्चित्तंवक्ष्यमाणंशृणुत १४५ अज्ञानादिति म
हापातकप्रकरणव्यवधानेनास्याम्नानात्नेदंमुख्यपैष्टीसुराविषयंवचनम् किंतुतदितरविषयंतत्रयथाचैकातथासर्वागौडीमाध्वीमु

श्यमद्यस्नासंस्पृष्टं भक्तादिरसं वा प्राश्य द्विजातयस्त्रयो वर्णाः पुनरुपनयनमर्हंति १५० वपनमिति शिरोमुंडनं मेखलाधारणं दं
डधारणं भैक्षाणि व्रतानि नियमं मधुमांसस्त्रीवर्जनं युतानि प्रायश्चित्तानि पुनरुपनयने द्विजातीनान्न भवंति १५१ अभोज्यादिति अभोज्या
न्नानाम्नाश्रोत्रियकृतेयज्ञेदत्तायुक्तानामन्नं भुक्त्वा जलमिश्रितसक्तुरूपेण यवागूरूपेण वा यववान्यानयोग्यान्कृत्वा सप्तरात्रं पिबेत् अ
मुष्मिन्नेव विषये मत्या भुक्त्वा चरेत्कृच्छ्रमिति चतुर्थाध्याये प्रायश्चित्तमुक्तं तेन सह वैकल्पित विकल्पश्च कर्त्तृशक्त्यपेक्षः तथा द्विजातिः स्त्री
णामुच्छिष्टं शूद्रोच्छिष्टं वा भुक्त्वा एतदेव कुर्यात्त यात्क्रव्याद्सूकरोष्ट्राणामित्यादिना यद्विशेषप्रायश्चित्तं तन्निषिद्धमांसं भुक्त्वा इदमेव कुर्या
त् १५२ शुक्तेति यानि स्वभावतो मधुरादिरसानि कालयोगेनोदकपरिणामादिना चाम्लभावं व्रजंति तानि शुक्तानि कषायान् विभीतकादीन्
क्वथितानि अमतिपवित्राण्यपि पीत्वा यावन्न जीर्णानि भवंति तावदशुचिः पुरुषो भवति १५३ विड्वराहेति ग्राम्यसूकरखरोष्ट्रसृगालवानर

वपनं मेखलादंडो भैक्ष्यचर्याव्रतानि च निवर्त्तंते द्विजातीनां पुनः संस्कारकर्मणि १५१ अभोज्यानां तु भु
क्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत् १५२ शुक्तानि च कषायांश्च पी-
त्वा मेध्यान्यपि द्विजः तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः १५३ विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः
प्राश्य मूत्रपुरीषाणि द्विजश्चांद्रायणं चरेत् १५४ शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च अज्ञातं-
चैव सूनास्थमेतदेव व्रतं चरेत् १५५ क्रव्यादसूकरोष्ट्राणां कुक्कुटानां च भक्षणे नरकाकखराणां च तप्त-
कृच्छ्रं विशोधनम् १५६

काकानां मूत्रं पुरीषं वा द्विजातिर्भुक्त्वा चांद्रायणं कुर्यात् शोधनं यत्तुच्छत्राकं विड्वराहं चेत्यनेन विड्व
राहग्रामकुक्कुटयोर्बुद्धिपूर्वकभक्षणे पंचमाध्याये प्रायश्चित्तमुक्तं तदभ्यासविषये व्याख्यातं इदं त्वनभ्यासविषये तप्तकृच्छ्रमित्यविरोधः
१५४ शुष्काणीति शाप्यादिना शोषितानि मांसानि भुक्त्वा भूम्यादिप्रभवानि छत्राकानि भुक्त्वा भूमिजं वा वृक्षजं वा छत्राकं भक्षयंति ये
ब्रह्मघ्नांस्तान् विजानीयात् इति यमेन वृक्षस्यापि निषेधात् हरिणमांसं वा भक्ष्यमांसमिति भक्ष्याभक्ष्यतया यन्न ज्ञातं तथा हिंसास्थानं-
सूनातो यदानीतं तद्भुक्त्वा चांद्रायणमेव कुर्यात् १५५ क्रव्यादेति आममांसभक्षिणां ग्राम्यसूकरोष्ट्रग्राम्यकुक्कुटानां तथा मानुषका-
कगर्दभानां भक्ष्ये कं बुद्धिपूर्वकं मांसभक्षणे वक्ष्यमाणं तप्तकृच्छ्रं प्रायश्चित्तम् १५६ मासिकेति यो ब्रह्मचारी ब्राह्मणो मासिकश्राद्धसंबं

रव्यसुरासाम्ययोधनमितरमद्यापेक्षयाब्राह्मणस्यप्रायश्चित्तगौरवार्थमित्युक्तं गौडींमाध्वींचपीत्वागोतमोक्तंतप्तकृच्छ्रंकृत्वापुनःसं-
स्कारेणैवशुध्यति तथाचगोतमः अमत्यामद्यपानेपयोघृतमुदकंवायुंप्रत्यहंतप्तकृच्छ्रःततोऽस्यसंस्कारः इत्थमेवव्याख्यातंभविष्यपु
राणे अकामतःकृतेपानेगौडीमाध्व्योर्नराधिप तप्तकृच्छ्रविधानंस्यात्गोतमेनयथोदितम् बुद्धिपूर्वकंतुपैष्टीतरमद्यपानेप्राणांतिकं
अनिर्देश्यमितिशास्त्रमर्यादा तथागौडीमाध्व्योर्ज्ञानात्पानेमरणानिषेधादितरमद्यापेक्षयागुरुत्वाच्चमानवमेवकणान्वाभक्षयेदब्दमि
तिप्रायश्चित्तमुक्तंअतएवगौडीमाध्व्योःकामतःपानानुवृत्तौभविष्यपुराणे यद्वाऽस्मिन्नेवविषयेमानवंवाप्रकल्पयेत् कणान्वाभक्ष
येदब्दंपिण्याकंवासकृन्निशि सुरापापापनुत्यर्थंवालवासाजटीध्वजीतिपैष्टीगौडीमाध्वीव्यतिरिक्तपुलस्त्योक्तपानसादिनवविधम-
द्यस्यप्रत्येकंपानेलघुत्वात्संस्कारमात्रमेवकेवलंअन्यंहालघुत्वात्प्रायश्चित्तंब्राह्मणस्ययुक्तम् बुद्धिपूर्वपानसादिमद्यपानेतु मतिपू

अज्ञानाद्वारुणींपीत्वासंस्कारेणैवशुध्यति मतिपूर्वमनिर्देश्यंप्राणांतिकमितिस्थितिः १४६ अपःसुरा
भाजनस्थामद्यभांडस्थितास्तथा पंचरात्रंपिबेत्पीत्वाशंखपुष्पीश्रितंपयः १४७ स्पृष्ट्वादत्वाचमदिरांवि
धिवत्प्रतिगृह्यच शूद्रोच्छिष्टाश्चपीत्वापः कुशवारिपिबेत्त्र्यहं १४८ ब्राह्मणस्तुसुरापस्यगंधमाघ्रायसो
मपः प्राणानप्सुत्रिरायम्यघृतंप्राश्यविशुध्यति १४९ अज्ञानात्प्राश्यविण्मूत्रंसुरासंस्पृष्टमेवच पुनःसं
स्कारमर्हंतित्रयोवर्णाद्विजातयः १५०

र्वंसुरापानेकृतेवैज्ञाननतोगुरु कृच्छ्रातिकृच्छ्रौभवतःपुनःसंस्कारएवहीतिभविष्य
पुराणीयमन्यद्विविधंमुन्यंतरोक्तम् १४६ अपइति पैष्टीसुराभांडेतदितरमद्यभांडेऽवस्थिताअपः सुरारसगंधवर्जिताः पीत्वाशंखपु-
ष्पाख्यौषधिप्रक्षेपेणपक्वंक्षीरन्नत्तूदकंशंखपुष्पीविपक्वेनक्षीरेणवर्त्तयेदितिबोधायनस्मरणात् पंचरात्रंपिबेत्सुरामद्ययोःसर्वत्रैवगु
रुलघुप्रायश्चित्ताभिधानात् इहापिज्ञानाज्ञानादिप्रकारभेदेनविषयसमीकरणंसमाधेयम् वाचनिकमेवप्रायश्चित्तंसाध्यमिति
तिथिराह १४७ स्पृष्ट्वेति सुरांस्पृष्ट्वादत्वाचस्वस्तिवाचनपूर्वकंचप्रतिगृह्यशूद्रोच्छिष्टाश्चअपःपीत्वाप्रतिगृह्याप्सुपादानात् ब्राह्म-
णोदर्भक्वथितमुदकंत्र्यहंपिबेत् १४८ ब्राह्मणस्त्वित्यादि ब्राह्मणःपुनःकृतसोमयागःसुरापस्यमुखसंबंधिनंगंधंघ्रात्वाजलमध्येप्राण
यामत्रयंकृत्वाघृतंप्राश्यविशुद्धोभवति १४९ अज्ञानादिति विड्वराहादीनांवक्ष्यमाणत्वात्अबुद्धिपूर्वकंमनुष्यसंबंधिमूत्रंपुरीषंवाप्र

श्यमद्यसुरासंसृष्टंच भक्त्वादिरसंबायाश्च द्विजातयस्त्रयोवर्णा पुनरुपनयनमर्हंति १५० वपनमिति शिरोमुंडनंमेखलाधारणंदं
डधारणंभैक्षाणिव्रतानिचमधुमांसस्त्रीवर्जनयुतानिप्रायश्चित्तानिपुनरुपनयने द्विजातीनान्नभवंति १५१ अभोज्याइति अभोज्या
न्नानान्नाश्रोत्रियकृतेयज्ञेइत्याद्युक्तानामन्नंभक्त्वाजलमिश्रितसक्तुरूपेणयवागूरूपेणवायवान्पानयोग्यान्कृत्वासप्तरात्रंपिबेत् अ
बुद्धिपूर्वेनेच विषयेमत्याभक्त्वाचरेत्कृच्छ्रमितिचतुर्थाध्यायेप्रायश्चित्तमुक्तंतेनसहवैकल्पितंविकल्पश्चकर्तृशक्त्यपेक्षः तथाद्विजातिस्त्री
णामुच्छिष्टंशूद्रोच्छिष्टंवाभक्त्वाएतदेवकुर्यात्तथाक्रव्यादसूकरोष्ट्राणामित्यादिनायद्विशेषप्रायश्चित्तंतन्निषिद्धमांसंभक्त्वाइदमेवकुर्या
त् १५२ शुक्तेति यानिस्वभावतोमधुरादिरसानिकालयोगेनोदकपरिणामादिनाम्लभावंव्रजंतितानिशुक्तानिकषायान्विभीतकादीन्
क्वथितानिअमतिपिबत्यान्यपिपीत्वायावन्नजीर्णानिभवंतितावदशुचिःपुरुषोभवति १५३ विड्वराहेति ग्राम्यसूकरखरोष्ट्रशृगालवानर

वपनंमेखलादंडोभैक्ष्यचर्याव्रतानिच निवर्त्तंतेद्विजातीनांपुनःसंस्कारकर्मणि १५१ अभोज्यानांतुभु
क्त्वान्नंस्त्रीशूद्रोच्छिष्टमेवच जग्ध्वामांसमभक्ष्यंचसप्तरात्रंयवान्पिबेत् १५२ शुक्तानिचकषायांश्चपी-
त्वामेध्यान्यपिद्विजः तावद्भवत्यप्रयतोयावत्तन्नव्रजत्यधः १५३ विड्वराहखरोष्ट्राणांगोमायोःकपिकाकयोः
प्राश्यमूत्रपुरीषाणिद्विजश्चान्द्रायणंचरेत् १५४ शुष्काणिभुक्त्वामांसानिभौमानिकवकानिच अज्ञातं-
चैवसूनास्थमेतदेवव्रतंचरेत् १५५ क्रव्यादसूकरोष्ट्राणांकुक्कुटानांचभक्षणे नरकाकखराणांचतप्त-
कृच्छ्रंविशोधनम् १५६ काकानांमूत्रंपुरीषंवाद्विजातिर्भक्त्वाचांद्रायणंकुर्यात्शोधनंयत्तुछत्राकंविड्वराहंचेत्यनेनविड्वरा

हग्रामकुक्कुटयोर्बुद्धिपूर्वकभक्षणेपंचमाध्यायेप्रायश्चित्तमुक्तंतदभ्यासविषयेव्याख्यातंइदंत्वनभ्यासविषयेतसकृच्छ्रमित्यविरोधः
१५४ शुष्काणीति वाय्वादिनाशोषितानिमांसानिभुक्त्वाभूम्यादिप्रभवानिछत्राकानिभक्त्वाभूमिजंवावृक्षजंवाछत्राकंभक्षयंतिये
ब्रह्मघ्नांस्तान्विजानीयात्इतियमेनरक्षस्यापिनिषेधात्हरिणमांसंवाभक्ष्यमांसमितिभक्ष्याभक्ष्यतयायन्नज्ञातंतथाहिंसास्थानं-
सूनाततोयदानीततद्भुक्त्वाचांद्रायणमेवकुर्यात् १५५ क्रव्यादेति आममांसभक्षिणांग्राम्यसूकरोष्ट्रग्राम्यकुक्कुटानांतथामानुषका-
कगर्दभानांप्रत्येकबुद्धिपूर्वकंमांसभक्षणेवक्ष्यमाणंतप्तकृच्छ्रंप्रायश्चित्तम् १५६ मासिकेति योब्रह्मचारीब्राह्मणोमासिकश्राद्धसंबं

ध्यन्नमध्यानिएतच्चसपिंडीकरणात्पूर्वंएकोद्दिष्टश्राद्धार्थोपलक्षणंसत्रिरात्रमुपवसेत् त्रिरात्रमध्यएकस्मिन्नहनिजलमावसेत्
१५७ ब्रह्मचारीति योब्रह्मचारीमाक्षिकंमांसंवाअनिच्छातः आपदिवाऽश्नात्सप्राजापत्यंकृत्वाप्रारब्धब्रह्मचर्यव्रतशेषंसमापये
त् १५८ बिडालेति बिडालकाकमूषिककुक्कुरनकुलानामुच्छिष्टंकेशकीटरूपसंसर्गदुष्टंवाअकृतमृत्क्षेपविशुद्धिकंज्ञात्वाभुक्त्वा
ब्रह्मसुवर्चलाक्वथितमुदकंपिबेत् १५९ अभोज्यमिति आत्मनःशुद्धिकामेनप्रतिषिद्धमन्नंनादनीयंप्रमादात्तुभुक्तंवमितव्यंत
दसंभवेप्रायश्चित्तैःक्षिप्रंशोधनीयंवमनपक्षेतुलघुप्रायश्चित्तंभवत्येवज्ञानतःपुनःपूर्वोक्तंप्रायश्चित्तम् १६० एषइति अभक्ष्यभक्ष
णेयानिप्रायश्चित्तानितेषामेतन्नानाप्रकारमुक्तंस्तेयपापकारिणांविधानमधुनाश्रूयताम् १६१ धान्येति ब्राह्मणोब्राह्मण

मासिकान्नंतुयोऽश्नीयादसमावर्त्तकोद्विजः सत्रीण्यहान्युपवसेदेकाहंचोदकेवसेत् १५७ ब्रह्मचारी
तुयोऽश्नीयान्मधुमांसंकथंचन सकृत्वाप्राकृतंकृच्छ्रंव्रतशेषंसमापयेत् १५८ बिडालकाकाखूच्छिष्टंज
ग्ध्वाश्वनकुलस्यच केशकीटावपन्नंचपिबेद्ब्रह्मसुवर्चलाम् १५९ अभोज्यमन्नंनात्तव्यमात्मनःशुद्धि
मिच्छता अज्ञानभुक्तंतूत्तार्यंशोध्यंवाप्याशुशोधनैः १६० एषोऽनाद्यादनस्योक्तोव्रतानांविविधोविधिः
स्तेयदोषापहर्तॄणांव्रतानांश्रूयतांविधिः १६१ धान्यान्नधनचौर्याणिकृत्वाकामाद्द्विजोत्तमः स्वजातीयगृ
हादेवकृच्छ्राब्देनविशुध्यति १६२ मनुष्याणांतुहरणेस्त्रीणांक्षेत्रगृहस्यच कूपवापीजलानांचशुद्धिश्चा
न्द्रायणंस्मृतम् १६३ द्रव्याणामल्पसाराणांस्तेयंकृत्वाऽन्यवेश्मतः चरेत्सांतपनंकृच्छ्रंतन्निर्यात्यात्मशु-
द्धये १६४

भक्ता धान्यरूपाणिधनचौर्याणिइच्छातःकृत्वात्मीयगृहात्यानीत्वासंवत्सरंप्राजापत्यव्रताचरणेनशुध्यतिएतच्चदे
शकालद्रव्यपरिमाणस्वामिगुणाद्यपेक्षयामहत्वादिबोद्धव्यंएवमुत्तरत्रापि १६२ मनुष्याणामिति पुरुषस्त्रीक्षेत्रगृहाणामन्यत
हरणेकूपजलस्यवापीजलस्यवासमस्तस्यवाहरणेचान्द्रायणंप्रायश्चित्तंमन्वादिभिःस्मृतम् १६४ द्रव्याणामिति द्रव्याण
णामल्पप्रयोजनानांचानुक्तप्रायश्चित्तविशेषाणांत्रपुसीसकादीनांपरगृहाच्चौर्यंकृत्वातदपहृतंद्रव्यंस्वामिनेदत्वासांतपनंकृच्छ्रं

प्रायश्चित्तंवक्ष्यमाणंचाशुद्ध्येकुर्यात्स्वामिनेऽपहृतंद्रव्यंनिर्यात्येतिसर्वस्तेयप्रायश्चित्तशेषः १६४ भक्ष्येति भक्ष्यस्यमोदकादेःभोज्यस्य पायसादेःयानस्यशकटादेः शय्यायाआसनस्यचपुष्पमूलफलानांचप्रत्येकमपहरणेपंचगव्यपानंविशोधनम् १६५ तृणेति तृणकाष्ठवृक्षा णांशुष्कान्नस्यचतंडुलादेःवस्त्रचर्ममांसानांमध्येएकस्याप्यपहरणेत्रिरात्रमुपवासंचरेत् १६६ मणीति मणिमुक्ताविद्रुमताम्ररूप्यलो हकांस्योपलानांचप्रत्येकमपहरणेद्वादशाहंतंडुलकणभक्षणंकुर्यात्सर्वत्रचात्रसकृदभ्यासदेशकालद्रव्यस्वामिगुणादीशक्त्यपेक्षयाउत्कृ ष्टापकृष्टद्रव्यापहारिविषयसमीकरणंसमाधेयम् १६७ कार्पासेति कार्पासकृमिकोषऊर्णानांवस्त्राणांद्विशफैकशफस्यगोरश्वादेःपक्षि णांशुकादीनांगंधानांचचंदनप्रभृतीनांरज्ज्वाश्चप्रत्येकंहरणेत्र्यहंक्षीराहारःस्यात् अत्रापिपूर्ववद्विषयसमीकरणपरिहारःस्वामिनश्चो

भक्ष्यभोज्यापहरणेयानशय्यासनस्यच पुष्पमूलफलानांच पंचगव्यंविशोधनम् १६५ तृणकाष्ठद्रुमाणां चशुष्कान्नस्यगुडस्यच चैलचर्मामिषाणांचत्रिरात्रंस्यादभोजनम् १६६ मणिमुक्ताप्रवालानांताम्रस्यरज तस्यच अयःकांस्योपलानांचद्वादशाहंकणान्नता १६७ कार्पासकीटजोर्णानांद्विशफैकशफस्यच पक्षि गंधौषधीनांचरज्ज्वाश्चैवत्र्यहंपयः १६८ एतैर्व्रतैरपोहेतपापंस्तेयकृतंद्विजः अगम्यागमनीयंतुव्रतैरे- भिरपानुदेत् १६९ गुरुतल्पव्रतंकुर्याद्रेतःसिक्त्वास्वयोनिषु सख्युःपुत्रस्यचस्त्रीषुकुमारीष्वंत्यजासुच १७० पैतृष्वसेयींभगिनींस्वस्रीयांमातुरेवच मातुश्चभ्रातुस्तनयांगत्वाचांद्रायणंचरेत् १७१

स्वल्पापकृष्टद्रव्य
समर्पणादपिवचनादेकरूपप्रायश्चित्ताविरोधः १६८ एतैरिति एतैरुक्तैःस्तेयजनितपापंद्विजातिरपानुदेत् अगम्यागमननिमित्तंपुन एभिर्वक्ष्यमाणैर्व्रतैर्निर्हरेत् १६९ गुरुतल्पेति स्वयोनिषुसोदर्यभगिनीषुतथामित्रभार्यासुपुत्रपत्नीषुकुमारीषुचांडालीषुमत्येकरे तःसिक्त्वागुरुदारगमनप्रायश्चित्तंकुर्यात् अत्रापिज्ञानाभ्यासाद्यनुबंधापेक्षयामरणांतिकअतएवरेतःसिक्त्वाकुमारीषुचांडालीषंत्य जासुच सपिंडापत्यदारेषुप्राणत्यागोविधीयतेइतियमेनमरणांतिकमुपदिष्टंअज्ञानात्तद्व्रतम् १७० पैतृष्वसेयीमिति पितृष्वसुर्मा तृष्वसुश्चदुहितरंभगिनींमातुश्चसोदर्यभ्रातुर्दुहितरंसोदर्यभगिनीमिवनिषिद्धगमनांगत्वाचांद्रायणंकुर्यात् १७१ ७

एतादति तिस्रएता॰पैतृष्वसेय्याद्या॰भार्यार्थेप्राज्ञोनोद्वहेत्ज्ञातित्वेनबांधवत्वेनतानोपेतव्याः यस्मादेतानुपयन्उपागच्छन्नरकंयाति असपिंडाचयामातुरित्यनेनानिषेधसिद्धौदाक्षिणात्याचारदर्शननिषेधदार्ढ्यार्थंपुनर्वचनम् १७२ अमेति अमानुषीषुवडवाद्यासु नगवि तयागोष्ववकीर्णीसंवत्सरंप्राजापत्यंचरेत् इतिशांखलिखितादिभिर्गुरुप्रायश्चित्ताभिधानात् तथारजस्वलायांयोनितश्चान्य त्रस्त्रियांजलेरेतसेकंकृत्वापुरुषःसांतपनंकृच्छ्रंकुर्यात् १७३ मैथुनमिति यत्रदेशेक्वापिपुरुषेमैथुनंसेवित्वास्त्रियांगोयानेशक्टादौजलेदिवाकालेमैथुनंचसेवित्वासवस्त्रश्चस्नायात् १७४ चंडालेति चंडालस्यांत्यजानांचम्लेच्छशरीरादीनांअज्ञानतोब्राह्मणःस्त्रियोगत्वातेषांचान्नंभुक्त्वातेभ्यः प्रतिगृह्यपततिपतितस्यप्रायश्चित्तंकुर्यात्एतच्चगुरुत्वाच्चाभ्यासतोभोजनप्रतिग्रहविषयम्

एतास्तिस्रस्तुभार्यार्थेनोपयच्छेत्तुबुद्धिमान् ज्ञातित्वेनानुपेयास्ताःपतन्तिह्युपयन्नधः १७२ अमानुषीषुपुरुषउदक्यायामयोनिषु रेतःसिक्त्वाजलेचैवकृच्छ्रंसांतपनंचरेत् १७३ मैथुनंतुसमासेव्यपुंसियोषितिवाद्विजः गोयानेप्सुदिवाचैवसवासाःस्नानमाचरेत् १७४ चंडालांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच पतत्यज्ञानतोविप्रोज्ञानात्साम्यंतुगच्छति १७५ विप्रदुष्टांस्त्रियंभर्त्तानिरुंध्यादेकवेश्मनि यत्पुंसःपरदारेषुतच्चैनांचारयेद्व्रतम् १७६ साचेत्पुनःप्रदुष्येत्तुसदृशेनोपयंत्रिता कृच्छ्रंचांद्रायणंचैवतदस्याःपावनंस्मृतम् १७७ यत्करोत्येकरात्रेणवृषलीसेवनाद्द्विजः तद्भैक्ष्यभुग्जपन्नित्यंत्रिभिर्वर्षैर्व्यपोहति १७८

ज्ञानात्तुतेषांगमनंकृत्वासमानतांगच्छतिएतच्चप्रायश्चित्तगौरवार्थम् १७५ विप्रदुष्टामिति विशेषेणप्रदुष्टामिच्छयाव्यभिचारिणीमित्यर्थः भर्त्तानिरुंध्यात्पत्नीकार्य्येभ्योनिवर्त्यनियतबद्धामिवएकगृहेधारयेत् यच्चपुरुषस्यसजातीयपरदारगमनेप्राय श्चित्तंतदेवैनांकारयेत्तत्तश्च स्त्रीणामर्द्धप्रदातव्यमितियद्वसिष्ठादिभिरुक्तंतदनिच्छयाव्यभिचारेणकर्त्तव्यम् १७६ साचेदिति सा स्त्रीसजातीयगमनेसकृद्दुष्टाकृतप्रायश्चित्तायदिपुनःसजातीयेनाप्यर्थितासतीतद्गमनंकुर्यात्तदास्याःप्रायश्चित्तंप्राजाप ॰ चां द्रायणंचमन्वादिभि॰स्मृतम् १७७ यदिति वृषल्यत्रचंडालीप्रायश्चित्तगौरवात्चंडालीगमनेयदेकरात्रेणब्राह्मणःपापम

ङ्क्षाशीनित्यंसावित्र्यादिकंजपन्त्रिभिर्वर्षैरपनुदति तथाचापस्तंबः यदेकरात्रेणकरोतिपापंकृष्णंवर्णंब्राह्मणःसेवमानः चतुर्थकाल उदकआत्मजापीत्रिभिर्वर्षैस्तदपोहतिपापम् मेधातिथिस्तु इत्थमेवव्याख्यातवान्गोविंदराजस्तुअक्रमपरिणीतशूद्रागमनमा-यश्चित्तमिदमाह १७८ एषेति इयं हिंसाऽभक्ष्यभक्षणस्तेयागम्यागमनकारिणांचतुर्णामपिपापकृतांविशुद्धिरुक्ता इदानींसासा-त्यापकृद्भिःसहसंसर्गिणामिमावक्ष्यमाणाःसंशुद्धीःशृणुत १७९ संवत्सरेणेति पतितेनसहसंसर्गमाचरन्एकयानगमनएकासनोपवेशनएकपंक्तिभोजनरूपान्संसर्गानाचरन्संवत्सरेणपततिनतुयाजनाध्यापनायौनात्संवत्सरेणपततिकिंतुसद्यएवेत्यर्थः अध्यापनमत्रोपनयनपूर्वकंसावित्रीश्रावणंयाजनादीनांचसद्यःपातित्वमाहदेवलः याजनंयोनिसंबंधंस्वाध्यायंसहभोजनम् कृत्वासद्यःपतंत्येतेपतितेननसंशयः विष्णुः आसंवत्सरात्पततिपतितेनसहाचरन् सहयानासनाभ्यासंयौनात्तुसद्यएवहि बौधायनः संवत्सरेणपतति

एषांपापकृतामुक्ताचतुर्णामपिनिष्कृतिः पतितैःसंप्रयुक्तानामिमाःशृणुतनिष्कृतीः १७९ संवत्सरेणपततिपतितेनसहाचरन् याजनाध्यापनायौनान्नतुयानासनाशनात् १८० योयेनपतितेनैषांसंसर्गंयातिमानवः सतस्यैवव्रतंकुर्यात्तत्संसर्गविशुद्धये १८१ पतितस्योदककार्यंसपिंडैर्बांधवैर्बहिः निंदितेहनिसायान्हेज्ञात्यृत्विग्गुरुसन्निधौ १८२ दासीघटमपांपूर्णंपर्यस्येत्प्रेतवत्सदा अहोरात्रमुपासीरन्नशौचंबांधवैःसह १८३ पतितेनसहाचरन् याजनाध्यापनायौनात्सद्योनशयनासनादिति गोविंदराजस्तु याजनादीनांत्रयाणांसंवत्सरेणपातित्यहेतुत्वंसहासनादीनांलघुत्वान्नसंवत्सरेण किंतुतस्मादूर्ध्वमपीतिव्याचष्टे अस्मदीयमनुव्याख्यामुनिव्याख्यानुसारिणीनैनांगोविंदराजस्यकल्पनामनुरुंधमहे १८० योयेनेति पतितशब्दोयंपापकारिवचनः सकलपापिनामविशेषपाठात्एषांपतितानांमध्येयोयेनपापकारिणासहपूर्वोक्तंसंसर्गंकरोतिसतस्यैवव्रतरूपंप्रायश्चित्तंकुर्यान्नतुमरणांतिकमित्यभिहितंतदपिव्रतंसंसर्गिणाक्रियमाणंब्रह्महाद्वादशसमाइत्यादिकंपादहीनंकर्तव्यम् तथाचव्यासः योयेनसंसृजेद्वर्षंसोपितत्समतामियात् पादन्यूनंचरेत्सोपितस्यतस्यव्रतंद्विजः१८१ पतितस्येति महापातकिनोजीवतएवप्रेतस्योदकक्रियावक्ष्यमाणरीत्यासपिंडैःसमानोदकैश्चग्रामाद्बहिःकृत्वाज्ञातिऋत्विग्गुरुसन्निधानेरिक्तायांनवम्यांतिथौदिनांतेकर्तव्यम् १८२ दासीति सपिंडसमानोदकप्रयुक्तादासीउदकपूर्णघटंप्रेतवदितिदक्षि

णाभिमुखीभूयपादेनक्षिपेत् यथासनिरुदकोभवतितदनुतेसपिंडाःसमानोदकैःसहाहोरात्रमशौचमाचरेयुः १८३ निवर्त्तेरन्निति त
स्मात्पतितात्सपिंडादीनांसंभाषणमेकासनोपवेशनंचतस्मैऋक्थप्रदानंसांवत्सरिकादौनिमंत्रणादिरूपोलौकव्यवहारएतानिनिवर्त्ते
रन् १८४ ज्येष्ठतेति ज्येष्ठस्ययत्प्रत्युत्थानादिकंकार्यंतत्तस्यनकार्यंज्येष्ठलभ्यंचतस्यविंशत्युद्धारादिकंधनंनदेयंयद्यपिऋक्थप्रदानप्र
तिषेधादेवाप्युद्धारप्रतिषेधःसिद्धः तथापियवीयसस्तत्प्राप्त्यर्थमनूद्यतेतस्यैवज्येष्ठस्यसंबंधिधनंसोद्धारांशंतदनुजोगुणाधिकोलभते
१८५ प्रायश्चित्तइति कृतेपुनःपतितेनप्रायश्चित्तेसपिंडसमानोदकास्तेनैवकृतप्रायश्चित्तेनसहपवित्रेजलाधारेस्नात्वाजलपूर्णंनवं
घटंप्रक्षिपेयुःइहनवघटग्रहणाद्दासीघटःकृतोपयोगिघटःप्रतीयते १८६ सत्विति सकृतप्रायश्चित्तःतंपूर्वोक्तघटंजलमध्येक्षिप्त्वाततः
स्वकीयभवनंप्रविश्ययथापूर्वंसर्वाणिज्ञातिकर्माणिकुर्यात् १८७ एतदिति स्त्रीष्वपिपतितास्वएवमेवपतितस्योदकंकार्यमित्यादि

निवर्त्तेरंश्चतस्मात्तुसंभाषणसहासने दायाद्यस्यप्रदानंचयात्राचैवहिलौकिकी १८४ ज्येष्ठताचनिव
र्तेतज्येष्ठावाप्यंचयद्धनम् ज्येष्ठांशंप्राप्नुयाच्चास्ययवीयान्गुणतोधिकः १८५ प्रायश्चित्तेतुचरितेपूर्णकु
म्भमपांनवम् तेनैवसार्द्धंप्रास्येयुःस्नात्वापुण्येजलाशये १८६ सत्वप्सुतंघटंप्रास्यप्रविश्यभवनंस्वकम्
सर्वाणिज्ञातिकार्याणियथापूर्वंसमाचरेत् १८७ एतदेवविधिंकुर्याद्योषित्सुपतितास्वपि वस्त्रान्नपानं
देयंतुवसेयुश्चगृहांतिके १८८ एनस्विभिरनिर्णिक्तैर्नार्थंकिंचित्सहाचरेत् कृतनिर्णेजनांश्चैवन
जुगुप्सेतकर्हिचित् १८९ बालघ्नांश्चकृतघ्नांश्चविशुद्धानपिधर्मतः शरणागतहंतॄंश्चस्त्रीहंतॄंश्च
नसंवसेत् १९०

विधिंभर्त्रादिसपिंडसमानोदकवर्गःकुर्यात् ग्रासाच्छादनानिपुनरासांदेयानिगृहसमीपेचासांवासार्थंकु
टीर्दद्युः १८८ एनस्विभिरिति पापकारिभिरकृतप्रायश्चित्तैःसहदानप्रतिग्रहादिकमर्थंकिंचिन्नानुतिष्ठेत् कृतप्रायश्चित्तांश्चैवकदाचि
दपिपूर्वकृतपापत्वेननिंदेत्किंतुपूर्ववद्व्यवहरेत् अस्यापवादमाह १८९ बालघ्नानिति बालंयोहतवान् कृतोपकारंअपकाराचर
णेनयोविनाशितवान्प्राणरक्षार्थमागतंयोहतवान्स्त्रियंचयोव्यापादितवान्एतान्यथावत्कृतप्रायश्चित्तानपिसंसर्गितयानपरिव
सेत् १९० येषामिति येषांब्राह्मणक्षत्रियविशांआनुकल्पिककालेउपनयनंयथाशास्त्रंनकृतवान्तान्प्राजापत्यत्रयंकारयित्वायथा

शास्त्रमुपनयेत् यत्तु याज्ञवल्क्यादिभिर्व्रात्यस्तोमादिप्रायश्चित्तमुक्तं तेन सहास्य गुरुलाघवमनुसंधाय जातिशक्त्याद्यपेक्षो विकल्पो मंतव्यः
१९१ प्रायश्चित्तमिति ये प्रतिषिद्धशूद्रसेविनो द्विजास्ते चोपनीता अपि अनधीतवेदाः प्रायश्चित्तं कर्तुमिच्छंति तेषामप्येतत्प्राजापत्यादि
त्रयमुपदिशेत् १९२ यदिति गर्हितेन कर्मणा निषिद्धशूद्रप्रतिग्रहादिना ब्राह्मणा यद्धनमर्ज्जयंति तस्य धनस्य त्यागेन जपतपोभ्यां वक्ष्य
माणाभ्यां शुध्यंति धनत्यागेन च प्रायश्चित्तविधानात् बहुमूल्येन च कभितुरगादौ अल्पमूल्येन च लौहादौ परिगृहीते तुल्यप्रायश्चित्ताभिधान
मुपपन्नं एवमविक्रय्यविक्रयादावपि १९३ जपित्वेति त्रीणि सावित्रीसहस्राणि जपित्वा गोष्ठे वा मासं क्षीराहारो असत्प्रतिग्रहजनितात्पा
पान्मुक्तो भवति शूद्रप्रतिग्रहादावपि एतदेव प्रायश्चित्तं द्रव्यदोषेण च दातृदोषेणापि प्रतिग्रहस्य गर्हितत्वाविशेषादिति १९४ उपवासेति

येषां द्विजानां सावित्री नानूच्येत यथाविधि तांश्चारयित्वा त्रीन्कृच्छ्रान् यथाविध्युपनाययेत् १९१ प्रायश्चि
त्तं चिकीर्षंति विकर्मस्थास्तु ये द्विजाः ब्रह्मणा च परित्यक्तास्तेषामप्येतदादिशेत् १९२ यद्गर्हितेनार्ज्जयंति
कर्मणा ब्राह्मणा धनम् तस्योत्सर्गेण शुध्यंति जप्येन तपसैव च १९३ जपित्वा त्रीणि सावित्र्याः सहस्राणि
समाहितः मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् १९४ उपवासकृशं तं तु गोव्रजात्पुनरागतम् प्रण
तं प्रतिपृच्छेयुः साम्यं सौम्येच्छसीति किम् १९५ सत्यमुक्त्वा तु विप्रेषु विकिरेद्यवसं गवाम् गोभिः प्रवर्त्ति
ते तीर्थे कुर्युस्तस्य परिग्रहम् १९६ व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च अभिचारमहीनं च त्रिभिः कृ
च्छ्रैर्व्यपोहति १९७

केवलक्षीराहारेण इतरभोजनव्यावृत्त्या कृशदेहं गोष्ठात्प्रत्यागतं प्रणतं नम्रीभूतं किमस्माभिः सहसाम्यमिच्छ
सि पुनरसत्प्रतिग्रहं न करिष्यसीति एवं धर्मं ब्राह्मणाः परिपृच्छेयुः १९५ सत्यमिति सत्यमेतत्पुनरसत्प्रतिग्रहं न करिष्यामीत्येवं ब्राह्म
णेभ्य उक्त्वा यवसं गवां दद्यात् तस्मिन् यवसंभक्ष्यमाणे देशे गोभिः पवित्रीकृतत्वात्तीर्थीभूते ब्राह्मणास्तस्य संव्यवहारे स्वीकारं कुर्युः १९६
व्रात्यानामिति व्रात्यानामतऊर्ध्वंत्रयोप्येते इत्युक्तानामादियाजनं कृत्वा पितृगुर्वादिव्यतिरिक्तानां च निषिद्धौर्ध्वदैहिकदाहश्राद्धादि कृ
त्वा अभिचारं च श्येनादिकं अभिचारो नाभिचारणीयस्य अहीनं यागविशेषः अहीनयजनमशुचिकरमिति श्रुतेः त्रिरात्रादि तस्य यजनं कृत्वा
त्रिभिः कृच्छ्रैर्विशुध्यति १९७

शरणागतमिति शरणागतंपरित्राणार्थमुपगतंशक्तःसन्नुपेक्षतेद्विजातिरनध्याप्यंचवेदमध्याप्यतज्जनितंपापंसंवत्सरंयवाहारो ऽपनुदति १९८ श्वसृगालेति कुक्कुरसृगालगर्दभनरअश्ववराहादैर्ग्राम्यैश्चामिषमांसादैर्मार्जारादिभिर्दष्टःप्राणायामेन शुध्यति १९९ पङ्क्त्यन्नेति अपांक्त्यायेपतिताःस्तेनक्लीबा इत्यादिनोक्तास्तेषांविशेषतोऽनुपदिष्टप्रायश्चित्तानांमासंत्र्यहम यमात्कात्तृतीयेऽह्नि सायंभोजनंवेदसंहिताजपोदेवकृतस्यैनसोऽवयजनमसीत्यादिनाउक्ताःऽष्टभिर्मन्त्रैर्होमः प्रत्येकंकार्यःएतत्समुद्दिष्टंपापशोधनम् २००. उष्ट्रयानमिति उष्ट्रैर्युक्तंयानंशकटादिएवंखरयानमपितत्कामतआरुह्य अव्यवधानउष्ट्रखराभ्यांयानेप्राणायामबहुत्वन्न ग्नश्चकामतःस्नानंकृत्वाप्राणायामेनशुध्दोभवति २०१ विनेति असन्निहितजलोजलमध्येवामूत्रंपुरीषंवा कृत्वासवासाबहिर्ग्रा- मात्नद्यादौस्नात्वागांचस्पृष्ट्वाविशुद्धोभवति २०२ वेदेति वेदविहितानांकर्मणामग्निहोत्रादीनां अनुपदिष्टप्रायश्चित्तविशेषाणां

शरणागतंपरित्यज्यवेदंविप्लाव्यचद्विजः संवत्सरंयवाहारस्तत्पापमपसेधति १९८ श्वसृगालखरैर्दष्टो ग्राम्यैःक्रव्याद्भिरेवच नराश्वोष्ट्रवराहैश्चप्राणायामेनशुध्यति १९९ षष्ठान्नकालतामाससंहिताजपएववा होमाश्चसकलानित्यमपाङ्क्त्यानांविशोधनम् २०० उष्ट्रयानंसमारुह्यखरयानंतुकामतः स्नात्वातुविप्रो दिग्वासाःप्राणायामेनशुध्यति २०१ विनाद्भिरप्सुवाप्यार्त्तःशारीरंसन्निवेश्यच सचैलोबहिराप्लुत्यगा मालभ्यविशुध्यति २०२ वेदोदितानांनित्यानांकर्मणांसमतिक्रमे स्नातकव्रतलोपेचप्रायश्चित्तमभोजनम् २०३ हुंकारंब्राह्मणस्योक्त्वात्वंकारंचगरीयसः स्नात्वानश्नन्नहःशेषमभिवाद्यप्रसादयेत् २०४ ताडयित्वा तृणेनापिकंठेवाबध्यवाससा विवादेवाविनिर्जित्यप्रणिपत्यप्रसादयेत् २०५ अवगूर्य्यत्वब्दशतंसहस्र- मभिहत्यच जिघांसयाब्राह्मणस्यनरकंप्रतिपद्यते २०६

स्नातकव्रतलोपेस्नातकव्रतानांचतुर्थाध्यायोक्तानामतिक्रमेसत्ये काहोपवासंप्रायश्चित्तंकुर्यात् २०३ हुंकारमिति हूंतूष्णींस्थीयतामित्यादिरूपंब्राह्मणस्यकृत्वात्वंकारंचविद्याद्यधिकस्यउक्त्वाअभिवाद नकालादारभ्याहःशेषंयावत्स्नात्वाभोजननिवृत्तःपादोपग्रहणेनापगतकोपंकुर्यात् २०४ ताडयित्वेति प्रकृतंब्राह्मणंतृणेनापिताडयित्वा कंठेवाबध्यवाससावाकलहेनजित्वाप्रणिपातेनप्रसादयेत् २०५ अवेति ब्राह्मणस्यहननेच्छयादंडमुद्यम्यवर्षशतंनरकंप्राप्नोति दंडा

दिनापुनः प्रहृत्य वर्षसहस्रं नरकं प्राप्नोति २०६ शोणितमिति प्रहृतस्य ब्राह्मणस्य रुधिरं यावत्संख्यकान् रजःकणान् भूमौ पिंडीकरो
ति तावत्संख्यकानि वर्षसहस्राणि तत् शोणितोत्पादको नरके वसेत् २०७ अवेति ब्राह्मणस्य हननेच्छया दंडाद्युद्यमने कृच्छ्रं कुर्यात् दं
डादिप्रहारे दत्ते अतिकृच्छ्रं वक्ष्यमाणं चरेत् रुधिरमुत्पाद्य कृच्छ्रातिकृच्छ्रौ कुर्वीत २०८ अनुक्तेति अनुक्तप्रायश्चित्तानां यथा प्रतिलो
मवधादिकृतानां निर्हरणार्थं कर्तुः शरीरधनानि सामर्थ्यमवेक्ष्य पापं च ज्ञाताज्ञानाज्ञानसकृदावृत्त्यनुबंधादिरूपेण प्रायश्चित्तं प्रकल्पयेत्
२०९ यैरिति यैर्हेतुभिर्मनुष्यः पापान्यपनुदति तान् पापनाशहेतून् देवर्षिपितृभिरनुष्ठितान् युष्माकं वक्ष्यामि २१० त्र्यहमिति प्राजाप
त्यं कृच्छ्रमाचरन् द्विजातिराद्यं दिनत्रयं प्रातर्भुंजीत प्रातःशब्दोयं भोजनानामौचित्यप्राप्तदिवाकालपरः अतएव वसिष्ठः त्र्यहं दि

शोणितं यावतः पांसून्संगृह्णाति महीतले तावंत्यब्दसहस्राणि तत्कर्त्ता नरके वसेत् २०७ अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितम् २०८ अनुक्तनिष्कृतीनां तु पापानामपनुत्तये शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् २०९ यैरभ्युपायैरेनांसि मानवो व्यपकर्षति तान्वोऽभ्युपायान्वक्ष्यामि देवर्षिपितृसेवितान् २१० त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्द्विजः २११ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् २१२

शर्भकेनक्तभक्तिव त्र्यहं त्र्यहं अयाचितव्रतं त्र्यहं न भुंक्त इति च कृच्छ्रः आपस्तंबोप्याह त्र्यहमनक्ताशी
दिवाशी च ततस्त्र्यहं त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किंचन इति कृच्छ्रद्वादशरात्रस्य विधिः अपरं च दिनत्रयं सायंसंध्यामतीतायां भुंजीत
अन्यद्दिनत्रयमयाचितं तावदन्नं भुंजीत शेषं च दिनत्रयं न किंचिदश्नीयात् अत्र ग्राससंख्यापरिमाणापेक्षायां पराशरः सायं द्वात्रिंशति-
र्ग्रासाः प्रातः षड्विंशतिस्तथा अयाचिते चतुर्विंशत् परं चानशनं स्मृतम् कुक्कुटांडप्रमाणं च यावान्वा प्रविशेन्मुखम् एतं ग्रासं विजानीया
त् शुध्यर्थं ग्रासशोधनम् हविष्यं चान्नमश्नीयाद्यथा रात्रौ तथा दिवा त्रींस्त्रीण्यहानि शास्त्रीयान् ग्रासान् संख्याकृतान् यथा अयाचि
तं तथैवाद्यादुपवासस्त्र्यहं भवेत् २११ गोमूत्रमिति गोमूत्रादिएकीकृत्य एकैकस्मिन्नहनि भक्षयेत् नान्यत्किंचिदद्यात् अपरदिने चो

पवासइत्येतत्सांतपनंकृच्छ्रंस्मृतंयदातुगोमूत्रादिषट्प्रत्येकंषट्दिनान्युपभुज्यसप्तमेदिनेचोपवासः तदामहासांतपनंभवति तथाच याज्ञवल्क्यः कुशोदकंचगोक्षीरंदधिमूत्रंशकृद्घृतम् जग्ध्वापरेह्न्युपवसेत्कृच्छ्रंसांतपनंचरन् पृथक्सांतनद्रव्यैः षडहः सोपवासिकः सप्ताहेनतुकृच्छ्रोयंमहासांतपनंस्मृतम् २१२ एकैकमिति अतिकृच्छ्रंद्विजातिरनुतिष्ठन्प्रातःसायमयाचितादिरूपेणत्र्यहाणि त्रीणित्रीणिपूर्ववत् अन्यच्चत्र्यहंनकिंचिद्भुंजीत २१३ तप्तेति तप्तकृच्छ्रंचरन्द्विजातिः त्र्यहमुष्णोदकंत्र्यहमुष्णक्षीरंत्र्यहमुष्णघृतं त्र्यहमुष्णवायुएकवारस्नानंकुर्वन्संयतवान्पिबेत् अत्रपराशरोक्तोविशेषः षट्पलंतुपिबेदंभस्त्रिपलंतुपयःपिबेत् पलमेकंपिबेत्सर्पिस्तप्तकृच्छ्रंविधीयते २१४ यतात्मनइति विगतानवधानस्यसंयतेंद्रियस्यद्वादशाहमभोजनमेवपराकाख्यःकृच्छ्रःसकृदाद्यत्तिता रतम्येनगुरुलघुसमफलपापापनोदनः २१५ एकैकमिति सायंप्रातर्मध्याह्नेषुस्नानंकुर्वाणःपौर्णमास्यांपंचदशग्रासानशित्वाततः ।

एकैकंग्रासमश्नीयात्त्र्यहाणित्रीणिपूर्ववत् त्र्यहंचोपवसेदंत्यमतिकृच्छ्रंचरन्द्विजः २१३ तप्तकृच्छ्रंचरन्विप्रोजलक्षीरघृतानिलान् प्रतित्र्यहंपिबेदुष्णान्सकृत्स्नायीसमाहितः २१४ यतात्मनोऽप्रमत्तस्यद्वादशाहमभोजनम् पराकोनामकृच्छ्रोयंसर्वपापापनोदनः २१५ एकैकंह्रासयेत्पिंडंकृष्णेशुक्लेचवर्द्धयेत् उपस्पृशंस्त्रिषवणमेतच्चांद्रायणंस्मृतम् २१६ एतमेवविधिंकृत्स्नमाचरेद्यवमध्यमे शुक्लपक्षादिनियतश्चरंश्चांद्रायणव्रतम् २१७ अष्टावष्टौसमश्नीयात्पिंडान्माध्यंदिनेस्थिते नियतात्माहविष्याशीयतिचांद्रायणंचरन् २१८

प्रतिपत्क्रमेणैकैकंग्रासंह्रासयेत्तथाचतुर्दश्यामेकोग्रासःसंपद्यतेततोऽमावास्यायामुपोष्यशुक्लप्रतिपत्प्रभृतिभिरेकैकंवृद्धिंनयेत् एवंपौर्णमास्यांपंचदशग्रासाःसंपद्यंतेएतत्पिपीलिकामध्याख्यंचांद्रायणंस्मृतम् २१६ एतमिति एतमेवपिंडह्रासवृद्धित्रिषवणस्नानात्मकंयवमध्याख्यंचांद्रायणंशुक्लपक्षमादितःकृत्वासंयतेंद्रियश्चांद्रायणमनुतिष्ठन्आचरेत् ततश्चशुक्लप्रतिपदमारभ्यएकैकंपिंडंवर्द्धयेत् यथापौर्णमास्यांपंचदशग्रासाःसंपद्यंतेततःकृष्णप्रतिपदमारभ्यएकैकंपिंडंह्रासयेत् यथाऽमावस्यायामुपवासोभवति २१७ अष्टाविति यतिचांद्रायणमनुतिष्ठन्शुक्लपक्षात्कृष्णपक्षाद्वाआरभ्यमासमेकंसंयतेंद्रियःप्रत्यहमष्टावष्टौग्रासान्माध्यंदिनेभुंजीत मध्यंदिनइतिगृहस्थब्रह्मचारिणोःसायंभोजननिवृत्त्यर्थम् २१८ ७ ७ ७

चतुरः प्रातरिति प्रातश्चतुरोग्रासानश्नीयात् अस्तमितेचसूर्येचतुरोग्रासान्भुंजीतएतच्छिशुचांद्रायणंमुनिभिःस्मृतम् २१९ यथेति नीवारादिहविष्यसंबंधिनांग्रासानांद्व्यशीतेचत्वारिंशदधिकेकदाचित्षोडशकदाचिदुपवासइत्येवमाद्यनियमेनयथाकथंचित्पिंडान्मासेनसपतवान्भुंजानश्चंद्रसलोकतांयातिएवंपापक्षयार्थमभ्युदयार्थंचइदमुक्तंअतएवयाज्ञवल्क्यः धर्मार्थीयश्चरेदेतच्चंद्रस्यैतिसलोकताम् कृच्छ्रकृत्धर्मकामस्तुमहतीश्रियमाप्नुयात् अतःप्राजापत्यादिकृच्छ्रमपिअभ्युदयफलमितियाज्ञवल्क्येनोक्तम् २२० एतदिति एतच्चांद्रायणाख्यंव्रतंरुद्रादित्यवसवमरुतश्चमहर्षिभिःसहसर्वपापनाशायगुरुलघुपापापेक्षयासकृदावृत्तिप्रकारेणकृतवंतः २२१ महेति महाव्याहृतिभिर्भूर्भुवःस्वरेताभिःआज्यहविरनादेशेजुहोतिषुविधीयतेइतिपरिशिष्टवचनात् आज्येनप्रत्यहंहोमंकुर्यात्

चतुरःप्रातरश्नीयात्पिंडान्विप्रःसमाहितः चतुरोऽस्तमितेसूर्येशिशुचांद्रायणंस्मृतम् २१९ यथाकथंचित्पिंडानांतिस्रोऽशीतीःसमाहितः मासेनाश्नन्हविष्यस्यचंद्रस्यैतिसलोकताम् २२० एतद्रुद्रास्तथादित्यावसवश्चाचरन्व्रतम् सर्वाकुशलमोक्षायमरुतश्चमहर्षिभिः २२१ महाव्याहृतिभिर्होमःकर्तव्यःस्वयमन्वहम् अहिंसासत्यमक्रोधमार्जवंचसमाचरेत् २२२ त्रिरह्नस्त्रिर्निशायांचसवासाजलमाविशेत् स्त्रीशूद्रपतितांश्चैवनाभिभाषेतकर्हिचित् २२३ स्थानासनाभ्यांविहरेदशक्तोऽधःशयीतवा ब्रह्मचारीव्रतीचस्याद्गुरुदेवद्विजार्चकः २२४ सावित्रींचजपेन्नित्यंपवित्राणिचशक्तितः सर्वेष्वेवव्रतेष्वेवं प्रायश्चित्तार्थमादृतः २२५

अहिंसासत्याक्रोधाकौटिल्यानिचानुतिष्ठेत्यद्यप्येतानिपुरुषार्थतयाविहितानितथापिव्रतांगतयाप्युपदेशः २२२ त्रिरिति अहनित्रीन्वारानादिमध्यावसानेषुस्नानार्थंसचेलोनद्यादिजलंप्रविशेत्एतच्चपिपीलिकामध्ययवमध्यचांद्रायणेतरचांद्रायणविषयम् तयोरुपस्पर्शत्रिषवणमित्युक्तत्वात्स्त्रीशूद्रपतितैश्चसहव्रतावस्थायांकदाचित्संभाषणंनकुर्यात् २२३ स्थानेति अहनिरात्रौचउत्थितआसीनःस्यात्नतुशयीतअसामर्थ्येतुस्थंडिलेशयीतनखट्वादौब्रह्मचारीस्त्रीसंयोगरहितव्रतःव्रतीमौंजीदंडादियुक्तःपालाशंधारयेद्दंडमुपवीतंमौंजीचमेखलामितियमवचनस्मरणात् गुरुदेवब्राह्मणानांचपूजकोभवेत् २२४ सावित्रीमिति सावित्रींचसदाजपेत्पवित्राणिचाघमर्षणादीनियथाशक्तिजपेत्एतच्चयथाचांद्रायणेतथाप्राजापत्यादिकृच्छ्रेष्वपिप्रयत्नवान्प्रायश्चित्तार्थमनुतिष्ठेत् २२५

एतैरिति लोकविदितपापाद्द्विजातयः एभिरुक्तप्रायश्चित्तैर्वक्ष्यमाणपरिषदा शोधनीयाः अप्रकाशितपापांस्तु मानवान्मंत्रैर्होमैश्च परिषदेव शोधयेत् यद्यपि परिषदि निवेदने रहस्यत्वस्य नाशः तथाप्यमुकपापे कृते केनापि लोकाविदिते किं प्रायश्चित्तं स्यादिति सामान्यप्रश्नेन विरोधः २२६ ख्यापनेति पापकारी नरो लोकेषु निजपापकथनेन धिङ्मामतिपापकारिणमिति पश्चात्तापेन शुध्यति तपसा चोक्तरूपेण सावित्रीजपादिना च पापान्मुच्यते तपस्यसक्तो दानेन च पापान्मुक्तो भवति ख्यापनं चेदं प्रकाशप्रायश्चित्तांगभूतं न रहस्यप्रायश्चित्तांगम् रहस्यत्वहानिप्रसंगात् अनुतापश्च प्रकाशरहस्यांगमेव २२७ यथेति यथा यथा स्वयं पापं कृत्वा नरो भाषते लोके ख्यापयति तथा तथा तेन पापेन सर्प इव जीर्णत्वचा मुच्यते इति ख्यापनविधेरनुवादः २२८ यथेति तस्य पापकारिणो मनो यथा यथा दुष्कृतं कर्म निंदति तथा तथा शरीरं

एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः अनाविष्कृतपापांस्तु मंत्रैर्होमैश्च शोधयेत् २२६ ख्यापनेनानुतापेन तपसाऽध्ययनेन च पापकृन्मुच्यते पापात्तथा दानेन चापदि २२७ यथा यथा नरोऽधर्मं स्वयं कृत्वानुभाषते तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते २२८ यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते २२९ कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः २३० एवं संचिंत्य मनसा प्रेत्य कर्मफलोदयम् मनोवाङ्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत् २३१ अज्ञानाद्यदि वा ज्ञानात्कृत्वा कर्म विगर्हितम् तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत् २३२

जीवात्मा तेनाधर्मेण मुक्तो भवति अयमनुतापानुवाद इति २२९ कृत्वेति पापं कृत्वा पश्चात्संतप्य तस्मात्पापान्मुच्यते इत्युक्तमपि नैवं कुर्यां पुनरित्येवमनूदितं यदा तु पश्चात्तापे नैवं पुनः करिष्यामीति एवंरूपं निवृत्तिरूपसंकल्पफलकः स्यात्तदा स्फुटतरं तस्मात्पापात्पूतो भवतीति एतच्च निवृत्तिसंकल्पस्य प्रकाशाप्रकाशप्रायश्चित्तांगविधानार्थम् २३० एवमिति एवं शुभाशुभानां कर्मणां परलोके इष्टानिष्टफलं मनसा विचार्य मनोवाक्कायैः शुभमेव सर्वं कर्म कुर्यात् इष्टफलत्वात् नाशुभं नरकादिदुःखहेतुत्वात् २३१ अज्ञानादिति प्रमादादिच्छातो वा निषिद्धं कर्म कृत्वा तस्मात्पापान्मुक्तिमिच्छन् पुनस्तन्न कुर्यात् एतच्च पुनःकरणे प्रायश्चित्तगौरवार्थम् अत एव देवलः विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेदिति॰

यस्मिन्निति अस्यपापकारिणोयस्मिन्प्रायश्चित्तारव्येऽनुष्ठितेनचित्तस्यसंतोषःस्यात्तस्मिन्तदेवप्रायश्चित्तंतावदावर्त्तयेत्यावन्मनसःसंतोषःप्रसादश्चस्यात् २३३ तपइति यदेतत्सर्वंदेवानांमनुष्याणांसुखंतस्यतपः कारणंतपसैवचतस्यस्थितिः तपोऽतंचबुधैःप्रतिनियतदेवादिसुखस्यतपसाजन्मादादिदंवेदार्थैरुक्तंउक्तप्राजापत्यादिप्रायश्चित्तात्मकंतपःप्रसंगेनचेदंवक्ष्यमाणंचसर्वतपोमाहात्म्यकथनम् २३४ ब्राह्मणस्येति ब्राह्मणस्यब्रह्मचर्यात्मकवेदांतावबोधनंतपोराजन्यस्यरक्षणंतपःवैश्यस्यकृषिवाणिज्यपाशुपाल्यादिकंतपः शूद्रस्यब्राह्मणपरिचर्यातपइतिवर्णविशेषेणोत्कर्षबोधनार्थम् २३५ ऋषयइति ऋषयोवाङ्मनःकायनियमोपेताःफलमूलवायुभक्षाःतपसैवजंगमस्थावरसहितंपृथिव्यंतरिक्षस्वर्गात्मकंलोकत्रयमेकदेशस्थाःसंतोनिर्व्यापांतःकरणाःप्रकर्षेण पश्यंति

यस्मिन्कर्मण्यस्यकृतेमनसःस्यादलाघवम् तस्मिंस्तावत्तपःकुर्याद्यावत्तुष्टिकरंभवेत् २३३ तपोमूलमिदंसर्वंदैवमानुषकंसुखम् तपोमध्यंबुधैःप्रोक्तंतपोंतंवेददर्शिभिः २३४ ब्राह्मणस्यतपोज्ञानंतपःक्षत्रस्यरक्षणम् वैश्यस्यतुतपोवार्त्तातपःशूद्रस्यसेवनम् २३५ ऋषयःसंयतात्मानःफलमूलानिलाशनाः तपसैवप्रपश्यंतित्रैलोक्यंसचराचरम् २३६ औषधान्यगदोविद्यादैवीचविविधास्थितिः तपसैवप्रसिध्यंतितपस्तेषांहिसाधनम् २३७ यद्दुस्तरंयद्दुरापंयद्दुर्गंयच्चदुष्करम् सर्वंतुतपसासाध्यंतपोहिदुरतिक्रमम् २३८ महापातकिनश्चैवशेषाश्चाकार्यकारिणः तपसैवसुतप्तेनमुच्यंतेकिल्बिषात्ततः २३९ कीटाश्चाहिपतंगाश्चपशवश्चवयांसिच स्थावराणिचभूतानिदिवंयांतितपोबलात् २४०

२३६ औषधानीति औषधानिव्याध्युपशमनहेतुकानिअगदोगदाभावोनैरुज्यमितियावत् विद्याब्रह्मधर्मचर्यात्मकवेदांतज्ञानंचेदसंबंधिनीचनानारूपास्वर्गादावस्थितिः इत्येतानितपसैवप्राप्यंते यस्मात्तपएषांप्राप्तिनिमित्तम् २३७ यदिति यद्दुःखेनतीर्यतेग्रहदोषसूचितपदानियद्दुःखेनप्राप्यतेक्षत्रियादिनातेनैवशरीरेणबलब्राह्मण्यादियद्दुःखेनगम्यतेमेरुपृष्ठादियद्दुःखेनक्रियतेगोःप्रचुरदानादितत्सर्वंतपसासाधितुंशक्यते यस्मादतिदुष्करकार्यकरणंसर्वंतपसासाध्यतेतपोविघ्नैर्नशक्ति २३८ महेति ब्रह्महत्यादिमहापातककारिणोऽन्येउपपातकाद्यकार्यकारिणःतपसैवउक्तरूपेणानुष्ठितेनतस्मात्पापान्मुच्यंतेउक्तस्यापिपुनर्वचनंप्रायश्चित्तस्तुत्यर्थम् २३९ कीटाइति कीटसर्पशल

भपन्तु पक्षिणः स्थावराणि च वृक्षगुल्मादीनि भूतानि तपोमाहात्म्येन स्वर्गं यांति इतिहासादौ कपोतोपाख्यानादिषु पक्षिणोप्यग्निप्रवे
शादिकं तपस्तपंतीति श्रूयते कीटानां पञ्जातिसह हुःखं तत्सम तपः तेनच क्षीणकल्मषा अविकारिकजन्मांतर कृतेन स्वकृतेन दिवं यांति
२४० यत्किंचिदिति यत्किंचित्पापं मनोवाग्देहैर्मानवाः कुर्वंति तत्सर्वं पापन्निर्दहंति तपसैव तपोधनाः इति तप एव धनमिव रक्षणीयं येषां ते
तपोधनाः २४१ तपसैवेति प्रायश्चित्ततपसा क्षीणपापस्य ब्राह्मणस्य यागे हवींषि देवाः प्रतिगृण्हंति अभिलषितार्थांश्च प्रयच्छंति २४२
प्रजापतिरिति हिरण्यगर्भः सकललोकोत्पत्तिस्थितिप्रलयप्रभुः तपःकरणपूर्वकमेवेमं ग्रंथं प्रकरोत् तथैव ऋषयो वसिष्ठादयस्तपसैव मं
त्रंतः संपन्नाः २४३ इत्येतदिति सर्वस्यास्य जंतोर्यद्दुर्लभं जन्म तपसः प्रकाशात् इत्येवं देवाः प्रपश्यंतः तपोमूलमिदं सर्वमित्यादि तपोमाहा
त्म्यं प्रवदंति २४४ वेदेति यथाशक्ति प्रत्यहं वेदाध्ययनं पञ्चमहायज्ञानुष्ठानमपराधसहिष्णुत्वमित्येतानि महापातकजनितान्यपि पापा

यत्किंचिदेनः कुर्वंति मनोवाङ्मूर्तिभिर्जनाः तत्सर्वं निर्दहंत्याशु तपसैव तपोधनाः २४१ तपसैव विशुद्धस्य
ब्राह्मणस्य दिवौकसः इज्याश्च प्रतिगृण्हंति कामान्संवर्द्धयंति च २४२ प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्र
भुः तथैव वेदानृषयस्तपसा प्रतिपेदिरे २४३ इत्येतत्तपसो देवा महाभाग्यं प्रचक्षते सर्वस्यास्य प्रपश्यंतस्त
पसः पुण्यमुत्तमम् २४४ वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमा नाशयंत्याशु पापानि महापातक
जान्यपि २४५ यथैधस्तेजसा वन्हिः प्राप्तं निर्दहति क्षणात् तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित्
२४६ इत्येतदेनसामुक्तं प्रायश्चित्तं यथाविधि अत ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत २४७ सव्याहृ
तिप्रणवकाः प्राणायामास्तु षोडश अपि भ्रूणहणं मासात्पुनंत्यहरहः कृताः २४८

निशाघ्नं नाशयंति किंसुतान्यानि
२४५ यथेति यथाग्निः काष्ठान्यासन्नानि क्षणेनैव तेजसा निःशेषं करोति तथा ज्ञानाग्निना पापं सर्वं वेदार्थज्ञो ब्राह्मणो नाशयति इत्येत
त् परमार्थज्ञानस्यैतत्पापक्षयोत्कर्षज्ञापनार्थमेतत् २४६ इत्येतदिति इत्येन ब्रह्महत्यादीनां पापानां प्रकाशानां प्रायश्चित्तं यथावि
ध्यभिहितं अत ऊर्ध्वमप्रकाशानां पापानां प्रायश्चित्तं शृणुत अयं श्लोको गोविंदराजेनालिखितः मेधातिथिना तु लिखित एव २४७
सव्याहृतीति सव्याहृति सप्रणवाः सावित्रीशिरोयुक्ताः पूरककुंभकरेचकादिविधिना प्रत्यहं षोडश प्राणायामाः कृताः मासात् ब्रह्मघ्न

मपिनिष्पापंकुर्वंतिअपिशब्दादातिदेशिकब्रह्महत्याप्रायश्चित्ताधिकृतमपिएतच्चप्रायश्चित्तंद्विजातीनामेवनस्त्रीशूद्रादेर्मंत्रानधिकारा
त् २४८ कौत्समिति कौत्सेनऋषिणाअपनःशोशुचदघमितिएतत्सूक्तंवसिष्ठेनऋषिणादृष्टंच प्रतिस्तोमेतिरुषमनुशिष्यइत्येयंऋ
चंमाहित्रंमाहित्रीणामवोस्त्वित्येतत्सूक्तंशुद्धवत्यएतोन्विंद्रंस्तवामशुद्धमित्येतास्तिस्रऋचःप्रकृतंमासमहरहःषोडशकृत्वोपिजपित्वासु
रापोपिविशुध्यतिअपिशब्दात् आतिदेशिकसुरापानप्रायश्चित्ताधिकृतोपि २४९ सकृदिति ब्राह्मणसुवर्णमपहृत्यअस्यवामस्यप
लितस्यएतत्सूक्तंप्रकृतत्वात्माससमेकंप्रत्यहमेकवारंजपित्वाशिवसंकल्पंचयज्जाग्रतोदूरमित्येतद्वाजसनेयकेयत्पठितंतज्जपित्वा
सुवर्णमपहृत्यक्षिप्रमेवनिष्पापोभवति २५० हवीति हविष्पांतमजरंस्वर्विदामेकोनविंशतिऋचःनतमंहोनदुरितमित्यष्टौइतिवा

कौत्संजप्त्वापइत्येतद्वासिष्ठंचप्रतीत्यृचम् माहित्रंशुद्धवत्यश्चसुरापोपिविशुध्यति २४९ सकृ-
ज्जप्त्वास्यवामीयंशिवसंकल्पमेवच अपहृत्यसुवर्णंतुक्षणाद्भवतिनिर्मलः २५० हविष्पांतीयम
भ्यस्यनतमंहइतीतिच जपित्वापौरुषंसूक्तंमुच्यतेगुरुतल्पगः २५१ एनसांस्थूलसूक्ष्माणांचिकी-
र्षन्नपनोदनम् अवेत्यृचंजपेदब्दंयत्किंचेदमितीतिवा २५२ प्रतिगृह्याप्रतिग्राह्यंभुक्त्वाचान्नंविग
र्हितम् जपंस्तरत्समंदीयंपूयतेमानवस्त्र्यहात् २५३ सोमारौद्रंतुबह्वेनामासमभ्यस्यशुध्यति
स्रवंत्यामाचरन्स्नानमर्यम्णामितिचत्यृचम् २५४

इतिमेमनःशिवसंकल्पइतिचसूक्तंसहस्रशीर्षापुरुषइति
एतच्चषोडशर्चंसूक्तंमासमेकंप्रत्यहमभ्यस्येतिश्रवणात्प्रकृतत्वात्षोडशाभ्यासात्जपित्वागुरुदारगःतस्मात्पापान्मुच्यते २५१ ए
नसामिति स्थूलानांपापानांमहापातकानांसूक्ष्माणांचउपपातकादीनांनिर्हरणंकर्त्तुमिच्छन् अवतेहेळोवरुणनमोभिरित्येतामृचं
यत्किंचेदंवरुणदैव्येजनेइत्येतांचऋचंइतिवाइतिमेमनइत्येतत्सूक्तंसंवत्सरमेकवारंप्रत्यहंजपेत् २५२ प्रतिगृह्येति स्वरूपतोमहा
पातकिधनत्वादिनावाप्रतिग्राह्यंप्रतिगृह्यचान्नंस्वभावकालप्रतिग्रहसंसर्गदुष्टंभुक्त्वातरत्समंदिधावतीत्येताऋचश्चतस्रोजपित्वात्र्य
हंतस्मात्पापान्मनुष्यःपूतोभवति स्नानमर्यम्णामितिऋकृत्यृचंवा २५३ सोमेति सोमारुद्राधारयेथामसुर्यमितिचतस्रःअर्यमावरुणं

मित्रंचेतिऋग्द्वयंनद्यांचस्नानंकृत्वामासमेकंमत्सेकमभ्यस्यबहुपापोविशुध्यतिबहुष्वपिपापेषुतंत्रेणैकंप्रायश्चित्तंकार्यमितिज्ञापकमिदम् २५४ अब्दार्द्धमिति एनस्वीत्यविशेषात्सर्वेष्वेवपापेषुइंद्रंमित्रंवरुणमग्निंत्रयइतिएताःसप्तऋचोषण्मासंजपेत् अप्रशस्तंमूत्रपुरीषोत्सर्गादिकंजलेकृत्वामासंभैक्षभोजीभवेत् २५५ मंत्रैरिति देवकृतस्येत्यादिभिःशाकलहोमैःसंवत्सरंघृतहोमंकृत्वानमइंद्रश्चइत्येतांवाऋचंसंवत्सरंजपित्वामहापातकमपिपापंद्विजातिरपहंति २५६ महापातकेति ब्रह्महत्यादिमहापातकयुक्तोभिक्षाल्पाहारोवर्षमेकंसंयतेंद्रियोगवामनुगमनंकुर्वन्यःपावमानीर्विंद्यादिऋचोअन्वहमभ्यासेनजपित्वातस्मात्पापाद्विशुद्धोभवति २५७ अरण्यइति त्रिभिःपराकैःपूतोमंत्रब्राह्मणात्मिकांवेदसंहितांअरण्येवारत्रयंअभ्यस्यवाप्रयतोबाह्याभ्यंतरशौचयुक्तःसर्वै

अब्दार्द्धमिंद्रमित्येतदेनस्वीसप्तकंजपेत् अप्रशस्तंतुकृत्वाप्सुमासमासीतभैक्षभुक् २५५ मंत्रैःशाकलहोमीयैरब्दंहुत्वाघृतंद्विजः सुगुर्वप्यपहंत्येनोजप्त्वावानमइत्यृचम् २५६ महापातकसंयुक्तोऽनुगच्छेद्गाःसमाहितः अभ्यस्याब्दंपावमानीर्भैक्षाहारोविशुध्यति २५७ अरण्येवात्रिरभ्यस्यप्रयतोवेदसंहिताम् मुच्यतेपातकैःसर्वैःपराकैःशोधितस्त्रिभिः २५८ त्र्यहंतूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः मुच्यतेपातकैःसर्वैस्त्रिर्जपित्वाऽघमर्षणम् २५९ यथाश्वमेधःक्रतुराट्सर्वपापापनोदनः तथाऽघमर्षणंसूक्तंसर्वपापापनोदनम् २६० हत्वालोकानपीमांस्त्रीनश्नन्नपियतस्ततः ऋग्वेदंधारयन्विप्रोनैनःप्राप्नोतिकिंचन २६१ ऋक्संहितांत्रिरभ्यस्ययजुषांवासमाहितः साम्नांवासरहस्यानांसर्वपापैःप्रमुच्यते २६२

महापातकैर्मुच्यते २५८ त्र्यहमिति त्रिरात्रमुपवसन्संयतःप्रत्यहंप्रातर्मध्याह्नसायंकालेषुस्नानंकुर्वन्त्रिषवणस्नानकालएवजलेनिमज्यऋतंचसत्यंचेतिसूक्तमघमर्षणंत्रिरावृत्तंजपित्वासर्वैःपापैर्मुच्यतेतत्रगुरुलघुपापापेक्षयापुरुषशक्त्याद्यपेक्ष्यावर्त्तनीयम् २५९ यथेति यथाश्वमेधयागःसर्वयागश्रेष्ठःसर्वपापक्षयहेतुस्तथाऽघमर्षणसूक्तमपिसर्वपापक्षयहेतुरित्यघमर्षणसूक्तोत्कर्षः २६० हत्वेति भूरादिलोकत्रयमपिहत्वामहापातक्यादीनामप्यन्नमश्नन्ऋग्वेदंधारयन्विप्रादिःनकिंचित्पापंप्राप्नोतिऋग्वेदरहस्यप्रायश्चित्तार्थमुक्तंरहस्यपापेकृतेऋक्संहितांमंत्रब्राह्मणात्मिकामभ्यसेत्तदाह २६१ ऋगिति ऋक्संहितांमंत्रब्राह्मणात्मि

कान्नतुमंत्रात्मिकांअनंतरं वेदेत्रिवृतीतिप्रत्यवमर्षात् यजुषांचामंत्रब्राह्मणानांसंहितांसाम्नांवाब्राह्मणोपनिषत्संहितांवारत्रयमभ्य
स्यसर्वपापैःप्रमुक्तोभवति २६२ यथेति ऋगाद्यात्मनात्रिरावर्त्ततइतित्रिवृत् यथामहान्हृदंप्रविश्यलोष्टंविशीर्यतेतथासर्वंदुश्चरितंत्रि
वृतिवेदेविनश्यतित्रिवृत्तमेवाह २६३ ऋचइति ऋचऋङ्मंत्राःयजूंषियजुर्मंत्राःसामानिबृहद्रथंतरादीनिनानाप्रकाराणिअन्यान्ये-
षांत्रयाणांपृथक्पृथक्मंत्रब्राह्मणानिएषत्रिवृद्वेदोज्ञातव्योयएनंवेदसवेदविद्भवति २६४ आद्यमिति सर्ववेदानामाद्यंयद्ब्रह्मवेद
सारं अकारोकारमकारात्मकत्वेनत्र्यक्षरंयत्रत्रयोवेदाःस्थिताःसोन्यस्त्रिवृद्वेदःप्रणवाख्योगुह्योगोपनीयःवेदमंत्रश्रेष्ठत्वात् परमा-
र्थाभिधायकत्वात्परमार्थकत्वेनधारणजपाभ्यांमोक्षहेतुत्वाच्चयस्तंस्वरूपतोऽर्थतश्चजानातिसवेदवित् प्रायश्चित्तेबहुमुनिमतालो

यथामहाहृदंप्राप्यक्षिप्तंलोष्टंविनश्यति तथादुश्चरितंसर्वंवेदेत्रिवृतिमज्जति २६३ ऋचोयजूंषिचा-
न्यानिसामानिविविधानिच एषज्ञेयस्त्रिवृद्वेदोयोवेदैनंसवेदवित् २६४ आद्यंयत्त्र्यक्षरंब्रह्मत्रयीय-
स्मिन्प्रतिष्ठिता सगुह्योऽन्यस्त्रिवृद्वेदोयस्तंवेदसवेदवित् २६५ इतिमानवेधर्मशास्त्रेभृगुप्रो
क्तायांसंहितायांएकादशोऽध्यायः ११ ७ ७ ७ चातुर्वर्ण्यस्यकृत्स्नोयमुक्तोधर्मस्त्वयान
घ कर्मणांफलनिर्वृत्तिंशंसनस्तत्त्वतःपराम् १ सतानुवाचधर्मात्मामहर्षीन्मानवोभृगुः अस्यसर्वस्यशृ
णुतकर्मयोगस्यनिर्णयम् २ शुभाशुभफलंकर्ममनोवाग्देहसंभवम् कर्मजागतयोनृणामुत्तमाधमम
ध्यमाः ३ वनाद्यन्मयोक्तंसदाख्यानंखलुमुनिगिरांतद्भजध्वंगुणज्ञाः नैतन्मेधातिथिरभिदधेनापिगोविंदराजोव्याख्यातारोन
जगुरपरेप्यन्यतोदुर्लभंवः २६५ इतिश्रीकुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांमनुवृत्तावेकादशोऽध्यायः ११ ७ ७ ७
चातुर्वर्ण्यस्येति हेपापरहितब्राह्मणादिवर्णचतुष्टयस्यसांतरप्रभवस्यापिधर्मःत्वयोक्तःइदानींकर्मणांशुभाशुभफलप्राप्तिंपरांज
न्मांतरप्रभवांपरमार्थरूपामस्माकंब्रूहीतिमहर्षयोभृगुमवोचन् १ सतानिति सधर्मप्रधानोमनोरपत्यात्माभृगुरस्यसर्वस्यकर्म
संबंधस्यफलनिश्चयंशृणुतेतितान्महर्षीनब्रवीत् २ शुभेति मनोवाग्देहहेतुकंकर्मविहितनिषिद्धरूपंसुखदुःखफलकंतज्ज
न्याएवमनुष्यतिर्यगादिभावेनोत्कृष्टमध्यमाधमापेक्षयामनुष्याणांगतयोजन्मांतरप्राप्तयोभवंति कर्मशब्दश्चात्रनकायचेष्टया-

मेवकिंतुममेदंस्वमितिसंकल्परूपयोगादिध्यानरचनादावपिक्रियामात्रेवर्त्तते ३ तस्येति तस्यदेहिसंबंधिनः कर्मणःउत्कृष्टमध्य
माधमतयात्रिप्रकारस्यापिमनोवाक्कायाश्रितस्यवक्ष्यमाणदशलक्षणोपेतस्यमनएवप्रवर्त्तकंजानीयात् मनसाहिसंकल्पितमुच्यते
क्रियतेच तथातैत्तिरीयोपनिषदितस्मात्यत्पुरुषोमनसाभिगच्छतितद्वाचावदतितत्कर्मणाकरोतीति तानिदशलक्षणानिकर्माणिद
र्शयितुमाह ४ परद्रव्येति कथंपरधनमन्यायेनगृह्णामीत्येवंचिंतनंमनसाब्रह्मवधादिनिषिद्धाकांक्षानास्तिपरलोकः देहएवात्मेति
अतद्ग्रहश्चइत्येवंत्रिःप्रकारमशुभफलंमानसंकर्मएतत्त्रयविपरीतबुद्धिश्चत्रिविधंशुभफलंमानसंकर्मशुभाशुभफलकर्मेत्युभयस्यैवम
क्रांतत्वात् ५ पारुष्यमिति अप्रियाभिधानमसत्यभाषणंपरोक्षेपरदूषणकथनंसत्यस्यापिराजदेशपौरवार्त्तादेर्निःप्रयोजनंवर्ण-
नंइत्येवंचतुःप्रकारमशुभफलंवाचिकंकर्मभवेत् एतद्विपरीतंप्रियसत्यपरगुणाभिधानंश्रुतिपुराणादौचराजादिचरितकथनंशुभफलं

तस्येहत्रिविधस्यापित्र्यधिष्ठानस्यदेहिनः दशलक्षणयुक्तस्यमनोविद्यात्प्रवर्त्तकम् ४ परद्रव्येष्वभि
ध्यानंमनसानिष्टचिंतनम् वितथाभिनिवेशश्चत्रिविधंकर्ममानसम् ५ पारुष्यमनृतंचैवपैशून्यंचापि
सर्वशः असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधम् ६ अदत्तानामुपादानंहिंसाचैवाविधानतः परदा
रोपसेवाचशारीरंत्रिविधंस्मृतम् ७ मानसंमनसैवायमुपभुंक्तेशुभाशुभम् वाचावाचाकृतंकर्मकाये
नैवचकायिकम् ८ शरीरजैःकर्मदोषैर्यातिस्थावरतांनरः वाचिकैःपक्षिमृगतांमानसैरंत्यजातिता
म् ९

६ अदत्तानामिति अन्यायेनपरस्वग्रहणमशास्त्रीयाहिंसापरदारगमनमित्येवंत्रिप्रकारमशुभफलंशारीरंकर्मएतद्विपरी
तंत्रयंशुभफलम् ७ मानसमिति मनसायत्कृतंदुष्कृतंवाकर्मकृतंतत्फलंसुखदुःखरूपमिहजन्मनिजन्मांतरेवामनसैवायमु
पभुंक्तेएवंवाचाकृतंशुभाशुभंवाग्द्वारेणमधुरगद्गदभाषित्वादिनाशारीरंशुभाशुभंशरीरद्वारेणस्त्रक्चंदनादिप्रियोपभोगव्याधित
त्वादिनाऽनुभवतितस्मात्प्रयत्नेनशारीरमानसवाचिकानिधर्मरहितानिचवर्जयेन्नकुर्याच्च ८ शारीरेति यद्यपिपापिष्ठानांशारीर
वाचिकमानसिकान्येवत्रीणिपापानिसंभवंतितथापिसयदिप्रायशोऽधर्ममेवसेवतेधर्ममल्पमितिबाहुल्याभिप्रायेणइतिव्याख्या
तंबाहुल्येनशरीरकर्मजपापैर्युक्तःस्थावरत्वंमानुषःप्राप्नोतिबाहुल्येनवाक्कृतैःपक्षित्वंमृगत्वंवाबाहुल्येनमनसाकृतैश्चांडालादित्वं
प्राप्नोति ९

वागिति दमनंदंडः वाङ्मनःकायानां दंडाः निषिद्धाभिधानासत्संकल्पप्रतिषिद्धव्यापारत्यागेन बुद्धाववस्थिताः स त्रिदंडीत्युच्यतेन
तु दंडत्रयमात्रेण इत्याभ्यंतरदंडत्रयप्रशंसा १० त्रिदंडमिति एवन्निषिद्धवागादीनां सर्वभूतगोचरतया दमनं कृत्वा एतद्दमनात्मक
मेव कामक्रोधौ तु नियम्य ततो मोक्षावाप्तिलक्षणां सिद्धिं मनुष्यो लभते कोसौ सिद्धिमाप्नोतीत्यत आह ११ यइति अस्य लोकसिद्ध
स्यात्मोपकारकत्वादात्मनः शरीराख्यस्य यः कर्मसु प्रवर्त्तयिता तं क्षेत्रज्ञं पंडिता वदंति यः पुनरेष व्यापारान् करोति शरीराख्यः स पृथि
व्यादिभूतारब्धत्वात् भूतात्मेति पंडितैरुच्यते १२ जीवेति जीवशब्दोयं महत्परः येनेति करणविभक्तिनिर्देशात् उत्तरश्लोके च तावु
भौ भूतसंपृक्तौ महान् क्षेत्रज्ञ एव चेति तत्शब्देन प्रत्यवमर्षात् शरीरक्षेत्रज्ञातिरिक्तोऽन्तः शरीरं आत्माख्यत्वादात्मा जीवाख्यः

वाग्दंडोऽथ मनोदंडः कायदंडस्तथैव च यस्यैते निहिता बुद्धौ त्रिदंडीति स उच्यते १० त्रिदंडमेतन्निक्षि-
प्य सर्वभूतेषु मानवः कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति ११ योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रच
क्षते यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः १२ जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम् येन वेदय
ते सर्वं सुखं दुःखं च जन्मसु १३ तावुभौ भूतसंपृक्तौ महान्क्षेत्रज्ञ एव च उच्चावचेषु भूतेषु स्थितं तं व्याप्य ति
ष्ठतः १४ असंख्या मूर्त्तयस्तस्य निष्पतंति शरीरतः उच्चावचानि भूतानि सततं चेष्टयंति याः १५ पंचभ्य ए
व मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम् शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवम् १६

सर्वक्षेत्रज्ञानां सहज आत्मा तस्या
मेः तस्य विनियोगात् येनाहंकारेंद्रियरूपतया परिणतेन कारणभूतेन क्षेत्रज्ञः प्रतिजन्म सुखं दुःखं चानुभवति १३ ताविति तौ द्वौ मह
त्क्षेत्रज्ञौ पृथिव्यादिपंचभूतसंपृक्तौ वक्ष्यमाणं सर्वलोकवेदस्मृतिपुराणादिप्रसिद्धतया तमिति निर्दिष्टं परमात्मानमुत्कृष्टापकृष्टसत्वेषु
व्यवस्थितमाश्रित्य तिष्ठतः १४ असंख्येति अस्य परमात्मनः शरीरादसंख्यमूर्त्तयो जीवाः क्षेत्रज्ञशब्देनांतर मुक्ता लिंगशरीरावच्छि-
न्ना वेदांतउक्तप्रकारेणाग्नेरिव स्फुलिंगानिःसरंति या मूर्त्तय उत्कृष्टापकृष्टभूतानि देवरूपतया परिणतानि सर्वदा कर्मसु प्रेरयंति १५
पंचभ्य इति पंचभ्य एव पृथिव्यादिभूतेभ्यो दुष्कृतकारिणां मनुष्याणां पीडानुभवप्रयोजकं जरायुजादिदेहव्यतिरिक्तं दुःखसहिष्णु शरी
रं परलोके जायते १६ ७

तेनेति तेननिर्गतेनशरीरेणतायमकारितायातनादुष्कृतिनोजीवाः सूक्ष्मानुभूतस्थूलशरीरनाशेतेष्वेवारंभकभूतभागेषुयथा स्वंमलीयंतेतत्संयोगिनोभूत्वा अवतिष्ठंतइत्यर्थः १७ सोऽनुभूयेति शरीरीभूतसूक्ष्मादिलिंगशरीरावच्छिन्नोनिषिद्धशब्दस्पर्शरूपरसगंधाख्यविषयोपभोगजनितयमलोकदुःखाद्यनुभूयानंतरंभोगादपहतपाप्मभावेनमहत्परमात्मानौमहावीर्यौद्वावाश्रयति १८ ताविति तौमहत्परमात्मनौ अनलसौतस्यजीवस्यधर्मंभुक्तशेषंचपापंसहविचारयतः याभ्यांधर्माधर्माभ्यांयुक्तोजीवः परलोकेहलोकयोः सुखदुःखेप्राप्नोति १९ यदीति सयदिजीवोमानुषदशायांबाहुल्येनधर्ममनुतिष्ठति अल्पंचाधर्मंतदातैरेवपृथिव्यादिभूतैः स्थूलशरीररूपतयापरिणतैर्युक्तः स्वर्गसुखमनुभवति २० यदीति यदिपुनः सजीवोमानुषदशायांबाहुल्येनपापमनुतिष्ठतिअल्पंच

तेनानुभूयतायामीःशरीरेणेहयातनाः तास्वेवभूतमात्रासुप्रलीयंतेविभागशः १७ सोऽनुभूयासुखोदर्कान्दोषान्विषयसंगजान् व्यपेतकल्मषोभ्येतितावेवोभौमहौजसौ १८ तौधर्मंपश्यतस्तस्यपापंचातंद्रितौसह याभ्यांप्राप्नोतिसंपृक्तःप्रेत्येहचसुखासुखम् १९ यद्याचरतिधर्मंसप्रायशोऽधर्ममल्पशः तैरेववावृतोभूतैःस्वर्गेसुखमुपाश्नुते २० यदितुप्रायशोधर्मंसेवतेधर्ममल्पशः तैर्भूतैःसपरित्यक्तोयामीःप्राप्नोतियातनाः २१ यामीस्तायातनाःप्राप्यसजीवोवीतकल्मषः तान्येवपंचभूतानिपुनरप्येतिभागशः २२ एताद्दृष्ट्वास्यजीवस्यगतीःस्वेनैवचेतसा धर्मतोधर्मतश्चैवधर्मेदध्यात्सदामनः २३ सत्त्वंरजस्तमश्चैवत्रीन्विद्यादात्मनोगुणान् यैर्व्याप्येमान्स्थितोभावान्महान्सर्वानशेषतः २४

पुण्यंतदातैरेवभूतैर्मानुषदेहरूपतयापरिणतैस्त्यक्तोमृतःसन्नंतरंपंचभ्यएवमात्राभ्यइत्युक्तरीत्यायातनानुभवोचितसंपातकठिनदेहोयामीःपीडाअनुभवति २१ यामीरिति सजीवोयमकारितास्ताःपीडास्तेनकठिनदेहेनानुभूयततोभोगेनापहतपाप्मातान्पंचजरायुजादिशरीरारंभकान्पृथिव्यादिभूतभागानधितिष्ठतिमानुषंशरीरंगृह्णातीत्यर्थः २२ एताइति अस्यजीवस्यएताधर्माधर्महेतुकाःस्वर्गनरकाद्युपभोगोचितप्रियाप्रियदेहप्राप्तीरंतःकरणेज्ञात्वाधर्मानुष्ठानेमनःसदासंगतंकुर्यात् २३ सत्त्वमिति सत्त्वरजस्तमांसित्रीणिवक्ष्यमाणगुणलक्षणानि आत्मोपकारकत्वादात्मनोमहतोगुणान्जानीयात्यैर्व्याप्तोमहानिमान्स्थावरजंगमरूपान्पदार्थान्निःशेषेणव्याप्यस्थितः २४

यइति यद्यपिसर्वमेवेदंत्रिगुणंतथापियत्रदेहेएषांगुणानांमध्येयोगुणोयदासाकल्येनाधिकोभवतितदातद्गुणलक्षणबहुलंतंदे-
हिनंकरोतिसंप्रतिसत्त्वादीनालक्षणमाह २५ सत्त्वमिति यथार्थावभासोज्ञानंतत्सत्त्वस्यलक्षणंएतद्विपरीतमज्ञानंतत्तमोलक्षणंवि
षादाभिलाषंमानसकार्यंरजोलक्षणस्वरूपंतुसत्त्वरजस्तमसांप्रीत्यप्रीतिविषादात्मकतथाचभवंतिप्रीत्यप्रीतिविषादात्मकाःप्रका
शप्रवृत्तिनियमार्था अन्योन्याभिभवजननमिथुनवृत्तयश्चगुणा एतच्चैषास्वरूपमनंतरश्लोकत्रयेणवक्ष्यतिएतेषांसत्त्वादिगुणानामेत
त्ज्ञानादिसर्वप्राणिव्यापकंलक्षणम् २६ तत्रेति तस्मिन्नात्मनियत्संवेदनप्रीतियुक्तंप्रशांतमिवशुद्धप्रकाशरूपमंतर्भवेत्तत्सत्त्वं
जानीयात् २७ यत्त्विति यत्पुनःसंवेदनंदुःखोपेतमत एवसत्त्वस्वच्छात्मप्रीतेरजनकंसर्वदाचशरीरिणांविषयस्पृहोत्पादकंतत्त्वनि
वारकत्वात्प्रतिपक्षंरजोजानीयात् २८ यत्त्विति यत्पुनःसदसद्विवेकशून्यं अस्फुटविषयाकारस्वभावमतर्कणीयस्वरूपमंतःकरणा

योयदैषांगुणोदेहेसाकल्येनातिरिच्यते सतदातद्गुणप्रायंतंकरोतिशरीरिणम् २५ सत्त्वंज्ञानंतमोऽ
ज्ञानंरागद्वेषौरजःस्मृतम् एतद्व्याप्तिमदेतेषांसर्वभूताश्रितंवपुः २६ तत्रयत्प्रीतिसंयुक्तंकिंचिदात्मनि
लक्षयेत् प्रशांतमिवशुद्धाभंसत्त्वंतदुपधारयेत् २७ यत्तुदुःखसमायुक्तमप्रीतिकरमात्मनः तद्रजो
प्रतिपंविद्यात्सततंहारिदेहिनाम् २८ यत्तुस्यान्मोहसंयुक्तमव्यक्तंविषयात्मकम् अप्रतर्क्यमविज्ञेयं
तमस्तदुपधारयेत् २९ त्रयाणामपिचैतेषांगुणानांयःफलोदयः अग्र्योमध्योजघन्यश्चतंप्रवक्ष्याम्य
शेषतः ३० वेदाभ्यासस्तपोज्ञानंशौचमिंद्रियनिग्रहः धर्मक्रियात्मचिंताचसात्त्विकंगुणलक्षणम् ३१

बहिःकरणास्याद्दुर्ज्ञेयंतत्तमोजानीयात्एषांचगुणानांस्वरूपकथनंसत्त्वस्यवस्थितोयद्भवताभावितव्यमित्येतत्प्रयोजनक
म् २९ त्रयाणामिति एतेषांसत्त्वादीनांत्रयाणामपिगुणानांयथाक्रममुत्तममध्यमाधमरूपोयःफलोत्पादकःतद्विशेषेणवक्ष्या
मि ३० वेदेति वेदाभ्यासःप्राजापत्याद्यनुष्ठानंशास्त्रार्थावबोधमृद्वार्यादिशौचमिंद्रियसंयमोदानादिधर्मानुष्ठानमात्मध्यानपर
ताएतत्सत्त्वाख्यगुणस्यकार्यम् ३१ आरंभेति फलार्थकर्मानुष्ठानशीलताअल्पेप्यर्थेवैक्लव्यंनिषिद्धकर्माचरणंअजस्रंशब्दा
दिविषयोपभोगइत्येतद्रजोभिधानगुणस्यकार्यम् ३२ लोभइत्यादि अधिकाधिकधनस्पृहानिद्रालुताकार्पण्यंपैशुन्यंपर-

लोकाभावबुद्धिरानारपरिलोपः याचनशीलत्वंधर्मादिष्वनवधानं इत्येतत्तामसाभिधानस्य गुणस्य लक्षणम् ३३ त्रयाणामपीति एषां सत्त्वादीनां त्रयाणामपि गुणानां त्रिषु कालेषु भूतभविष्यद्वर्तमानेषु विद्यमानानामिदं वक्ष्यमाणं सांक्षेपिकं क्रमेण गुणलक्षणं ज्ञातव्यम् ३४ यदिति यत्कर्म कृत्वा कुर्वन् करिष्यंश्च लज्जावान्भवति कालत्रयेऽप्यस्य यो न्यत्र चेति विवक्षितं तत्सर्वं तमःकार्यत्वात्तमोभिधानं गुणलक्षणं शास्त्रविदा बोद्धव्यम् ३५ येनेति इह लोके महतीं ख्यातिं प्राप्नोतीत्येतदर्थमेव यो यत्कर्म करोति न परलोकार्थं न च तत्कर्मफलासंपत्तौ दुःखी भवति तद्रजःकार्यत्वाद्रजोगुणलक्षणं विज्ञेयम् ३६ यदिति यत्कर्म वेदार्थं ज्ञातुमिच्छति यच्च कर्माचरन् कालत्रयेपि न लज्जति येन येन कर्मणास्यात्मतुष्टिर्जायते तत्सत्त्वाख्यस्य गुणस्य लक्षणं ज्ञेयम् ३७ तमस इति कामप्रधानता तामसो लक्षणं अर्थ

आरंभरुचिताधैर्यमसत्कार्यपरिग्रहः विषयोपसेवा चाजस्रं राजसं गुणलक्षणम् ३२ लोभः स्वप्नो ऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ३३ त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठताम् इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम् ३४ यत्कर्म कृत्वा कुर्वंश्च करिष्यंश्चैव लज्जति तज्ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम् ३५ येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलाम् न च शोचत्यसंपत्तौ तद्विज्ञेयं तु राजसम् ३६ यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन् येन तुष्यति चात्मास्य तत्सत्त्वगुणलक्षणम् ३७ तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ३८ येन यस्तु गुणेनैषां संसारान्प्रतिपद्यते तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम् ३९ देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ४०

निष्ठता रजसः धर्मप्रधानता सत्त्वस्य एषां च कामादीनां उत्तरोत्तरस्य श्रेष्ठत्वं कामादर्थः श्रेयान् अर्थमूलत्वात्कामस्य ताभ्यां च धर्मः तन्मूलत्वात्तयोः ३८ येनेत्यादि एषां सत्त्वादीनां गुणानां मध्ये येन गुणेन सर्वकार्येण या गतीर्जीवः प्राप्नोति ताः सर्वस्यास्य जगतः क्रमेण वक्ष्यामि ३९ देवत्वमिति ये सत्त्ववृत्ताववस्थिताः ते देवत्वं यान्ति ये तु रजोवृत्त्यवस्थिताः ते मनुष्यत्वं ये तमोवृत्तिस्थाः ते तिर्यक्त्वं च इत्येषा त्रिविधा जन्मप्राप्तिः ४० त्रिविधेति या सत्त्वादिगुणत्रयनिमित्ता त्रिविधा जन्मांतरप्राप्तिरुक्ता सा देशकालादिभेदेन संसारभूतकर्मभेदाच्चा

धममध्यमोत्तमभेदेनपुनस्त्रिविधाबोद्धव्या ४१ स्थावराइति स्थावरावृक्षादयः कृमयःसूक्ष्माः प्राणिनःतेभ्यईषत्स्थूलाःकीटाःन
थामत्स्यसर्पकूर्मपशुमृगाश्चैतेषांतमोनिमित्ताजघन्यागतिः ४२ हस्तिनश्चेति हस्त्यश्वशूद्रम्लेच्छसिंहव्याघ्रसूकराःतमोगुणनिमित्ता
मध्यमागतिः गर्हिताइतिम्लेच्छानांस्वरूपानुवादः ४३ चारणाश्चेति चारणानटादयःसुपर्णाःपक्षिणः छद्मनाकर्मकारिणःपुरुषाराक्ष
साः पिशाचाश्चैतेषातामसीषूत्तमागतिः ४४ झल्लाइति झल्लामल्लाःक्षत्रियाद्व्रात्यात्सवर्णायामुत्पन्ना दशमाध्यायोक्ताज्ञेयाः तत्रझ-
ल्लायष्टिप्रहरणाःमल्लाबाहुयोधिनःरंगावतारकानटाःशस्त्रजीविद्यूतपानप्रसक्ताश्चपुरुषाअधमाराजसीगतिर्ज्ञेया ४५ राजानइति
राजानोअभिषिक्ताजनपदेश्वराःतथाक्षत्रियाराजपुरोहिताश्चशास्त्रार्थकलहप्रियाश्चएषाराजसीगतिर्मध्यमाबोद्धव्या ४६ गंधर्वा

त्रिविधात्रिविधैषातुविज्ञेयागौणिकीगतिः अधमामध्यमाग्र्याचकर्मविद्याविशेषतः ४१ स्थावराःकृमिकी
टाश्चमत्स्याःसर्पाःसकच्छपाः पशवश्चमृगाश्चैवजघन्यातामसीगतिः ४२ हस्तिनश्चतुरंगाश्चशूद्राम्लेच्छा
श्चगर्हिताः सिंहाव्याघ्रावराहाश्चमध्यमातामसीगतिः ४३ चारणाश्चसुपर्णाश्चपुरुषाश्चैवदांभिकाः रक्षां
सिचपिशाचाश्चतामसीषूत्तमागतिः ४४ झल्लामल्लानटाश्चैवपुरुषाःशस्त्रवृत्तयः द्यूतपानप्रसक्ताश्चजघ
न्याराजसीगतिः ४५ राजानःक्षत्रियाश्चैवराज्ञांचैवपुरोहिताः वादयुद्धप्रधानाश्चमध्यमाराजसीगतिः ४६
गंधर्वागुह्यकायक्षाविबुधानुचराश्चये तथैवाप्सरसःसर्वाराजसीषूत्तमागतिः ४७ तापसायतयोविप्रायें
चवैमानिकागणाः नक्षत्राणिचदैत्याश्चप्रथमासात्त्विकीगतिः ४८ यज्वानऋषयोदेवावेदाज्योतींषिव
त्सराः पितरश्चैवसाध्याश्चद्वितीयासात्त्विकीगतिः ४९

इति गंधर्वागुह्यकाराक्षसाजातिविशेषाःपुराणादिप्रसिद्धाःयेच
देवानुयायिनोविद्याधरादयः अप्सरसश्चदेवगणिकाःसर्वाइत्येषाराजसीमध्येउत्कृष्टागतिः ४७ तापसाइति वानप्रस्थाभिक्षवोब्राह्मणा
श्च अप्सरसोव्यतिरिक्ताःपुष्पकादिविमानचारिणोनक्षत्राणिदैत्याश्चैतेषासत्त्वनिमित्ताऽधमागतिः ४८ यज्वानइति यागशीलाः
तथर्षयोदेवावेदाभिमानिन्यश्चदेवताविग्रहवत्यःइतिहासप्रसिद्धाःज्योतींषिध्रुवादीनिवत्सराइतिहासदृष्ट्याविग्रहवंतःपितरःसो

मपादयः साध्याश्चदेवयोनिविशेषाइत्येषासत्त्वनिमित्तामध्यमागतिः ४९ ब्रह्मेति चतुर्वदनोविश्वसृजश्चमरीच्यादयः धर्मे
वान् अव्यक्तंचसांख्यप्रसिद्धंचतत्त्वद्वयंतदधिष्ठातृदेवताद्वयमिहविवक्षितंअचेतनगुणत्रयमात्रस्योत्तमसात्त्विकगतित्वानुपपत्तेः
एतांचतुर्वदनाद्यात्मिकांसत्त्वनिमित्तामुत्कृष्टांगतिंपंडितावदंति ५० एषइति एषमनोवाक्कायरूपत्रयभेदेनत्रिःप्रकारस्यकर्मणःस
त्त्वरजस्तमोभेदेनत्रिविधःपुनःप्रथममध्यमोत्तमभेदेनत्रिविधःसर्वप्राणिगतःसमग्रोगतिविशेषःकार्त्स्न्येनोक्तःसार्वभौतिकइत्यभि
धानात् अनुक्ताअप्यत्रगतयोद्रष्टव्याःउक्तगतयस्तुप्रदर्शनार्थाः ५१ इंद्रियाणामिति इंद्रियाणांविषयेषुप्रसंगेननिषिद्धाचरणं
प्रायश्चित्तादिधर्माननुष्ठानेनमूढामनुष्यापसदाःकुत्सितागतीःप्राप्नुवंति ५२ यांयामिति अयंजीवोयेनयेनपापेनकर्मणाइहलोकेय
तेनयद्यज्जन्मप्राप्नोतितत्सर्वंक्रमेणशृणुत ५३ बहूनिति ब्रह्महत्यादिमहापातककारिणोबहून्वर्षसहस्रान् भयंक

ब्रह्माविश्वसृजोधर्मोमहानव्यक्तमेवच उत्तमांसात्त्विकीमेतांगतिमाहुर्मनीषिणः ५० एषसर्वःसमुद्दिष्ट
स्त्रिप्रकारस्यकर्मणः त्रिविधस्त्रिविधःकृत्स्नःसंसारःसार्वभौतिकः ५१ इंद्रियाणांप्रसंगेनधर्मस्यासेवने
नच पापान्संयांतिसंसारानविद्वांसोनराधमाः ५२ यांयांयोनिंतुजीवोयंयेनयेनेहकर्मणा क्रमशोयाति
लोकेस्मिंस्तत्तत्सर्वंनिबोधत ५३ बहून्वर्षगणान्घोरान्नरकान्प्राप्यतत्क्षयात् संसारान्प्रतिपद्यंतेमहा
पातकिनस्त्विमान् ५४ श्वसूकरखरोष्ट्राणांगोजाविमृगपक्षिणाम् चंडालपुक्कसानांचब्रह्महायोनिमृ
च्छति ५५ कृमिकीटपतंगानांविड्भुजांचैवपक्षिणाम् हिंस्राणांचैवसत्त्वानांसुरापोब्राह्मणोव्रजेत् ५६
लूताहिसरटानांचतिरश्चांचांबुचा रिणाम् हिंस्राणांचपिशाचानांस्तेनोविप्रःसहस्रशः ५७

प्यतदुपभोगक्षया
त् दुष्कृतशेषेणवक्ष्यमाणान्जन्मविशेषान्प्राप्नुवंति ५४ श्वेति कुक्कुरसूकरगर्दभउष्ट्रगोच्छागमेषमृगपक्षिचंडालानांपु
निषादेनशूद्रायांजातानांसंबंधिनींजातिंब्रह्महाप्राप्नोतितत्रपापदेशगौरवापेक्षयाक्रमेणसर्वयोनिप्राप्तिर्बोद्धव्याएवमुत्तरत्रापि
५५ कृमीति कृमिकीटशलभानांपुरीषभक्षिणांहिंसनशीलानांचव्याघ्रादीनांप्राणिनांजातिंसुरापोब्राह्मणोगच्छति ५६ लूताहीति
ऊर्णनाभसर्पकृकलासानांजलचराणांचतिरश्चांकुंभीरादीनांपिशाचादीनांहिंसनशीलानांचयोनिंसुवर्णहारीब्राह्मणःसहस्रवा
रान्प्राप्नोति ५७

तृणेति तृणानांदूर्वादीनांगुल्मानामग्रकांडादीनांलतानांगुडुच्यादीनांआममांसभक्षिणांगृध्रादीनांदंष्ट्रिणांसिंहानांक्रूरकर्मशा-
लिनांवधशीलानांव्याघ्रादीनांजातिंशतवारान्प्राप्नोतिगुरुदारगामी ५८ हिंस्राइति येप्राणिवधशीलास्तेआममांसाशिनोमार्जा
रादयोभवंतिअभक्ष्यभक्षिणोयेतेकृमयोजायंतेमहापातकव्यतिरिक्ताश्चौरास्तेपरस्परंमांसस्यादिनोभवंति येचांडालादिस्त्रीगा
मिनःतेप्रेताख्याःप्राणिविशेषाजायंतेप्रेतान्त्यस्त्रीनिषेविणइतिछंदःसमानत्वात्स्मृतीनांसर्वेविधयश्छंदसिविकल्प्यंतेइतिवि
सर्गलोपेचयह्रायलोपेच्चसवर्णदीर्घः ५९ संयोगमिति यावत्कालीनपतितसयोगेनपतितोभवतितावंतंकालंब्रह्महादिभिश्चतु
र्भिःसहसंसर्गंकृत्वापरेषांचस्त्रियंगत्वाब्राह्मणस्वर्णादन्यदपहृत्यएकैकपापकारेणब्रह्मराक्षसोभूतविशेषोभवति ६० मणीति
मणीन्माणिक्यादीन्मुक्ताविद्रुमांश्चनानाविधान्रत्नानिवैडूर्यहीरकादीनिलोभेनहृत्वात्मीयस्वामाहिनास्वर्णकारयोनौजायते

तृणगुल्मलतानांचक्रव्यादांदंष्ट्रिणामपि क्रूरकर्मकृतांचैवशतशोगुरुतल्पगः ५८ हिंस्राभवंति
क्रव्यादाःकृमयोभक्ष्यभक्षिणः परस्परादिनस्तेनाःप्रेताःत्यस्त्रीनिषेविणः ५९ संयोगंपतितैर्गत्वा
परस्यैवचयोषितम् अपहृत्यचविप्रस्वंभवतिब्रह्मराक्षसः ६० मणिमुक्ताप्रवालानिहृत्वालोभेन
मानवः विविधानिचरत्नानिजायतेहेमकर्तृषु ६१ धान्यंहृत्वाभवत्याखुःकांस्यंहंसोजलंप्लवः मधु
दंशःपयःकाकोरसंश्वानकुलोघृतम् ६२ मांसंगृध्रोवपांमद्गुस्तैलंतैलपकःखगः चीरीवाकस्तुल
वणंबलाकाशकुनिर्दधि ६३ कौशेयंतित्तिरिर्हृत्वाक्षौमंहृत्वातुदर्दुरः कार्पासतांतवंक्रौंचोगोधागां
वाग्गुदोगुडम् ६४ केचित्तुहेमकारपक्षिणमाचक्षते ६१ धान्यमिति धान्यमपहृत्यमूषिकोभवतिकांस्यंहृत्वाहंसःज
लंहृत्वाप्लुवाख्यःपक्षीमाक्षिकंहृत्वादंशःक्षीरंहृत्वाकाकःविशेषोपदिष्टगुडलवणादिव्यतिरिक्तमिक्ष्वादिरसंहृत्वाश्वाभवतिघृतं
हृत्वानकुलोभवति ६२ मांसमिति मांसंहृत्वागृध्रोभवतिवपांहृत्वामद्गुनामाजलचरोभवतितैलंहृत्वातैलपायिकाख्यःपक्षील
वणंहृत्वाचीराख्यउच्चैस्स्वरःकीटःदधिहृत्वाबलाकाख्यःपक्षीजायते ६३ कौशेयमिति कीटकोषनिर्मितंवस्त्रंहृत्वातित्तिरिर्नामा
पक्षीभवतिक्षौमकृतवस्त्रंहृत्वामंडूकःकार्पासमयंपटंहृत्वाक्रौंचाख्यःप्राणीगुडंहृत्वावाग्गुदनामाशकुनिर्भवति ६४ ६५

छुच्छुंदरीरिति सुगंधिद्रव्याणिकस्तूर्यादीनिहृत्वाछुच्छुंदरीर्भवति वास्तूकादिपत्रशाकंहृत्वामयूरःसिद्धान्नमोदनसक्त्वादिना नाप्रकारकंहृत्वाश्वाविधाख्यःप्राणी अकृतान्नंतुव्रीहियवादिकंहृत्वाशल्यकसंज्ञोजायते ६५ बकइति अग्निंहृत्वाबकाख्यःपक्षी जायतेगृहोपयोगिशूर्पमुसलादिहृत्वाभित्त्यादिषुमृत्तिकादिगृहकारीसपक्षःकीटोभवतिकुसुंभादिरक्तानिवासांसिहृत्वाचकोराख्यःपक्षीजायते ६६ वृकइति मृगंहस्तिनंवाहृत्वावृकाख्योहिंस्रपशुर्भवति घोटकंहृत्वाव्याघ्रोभवतिफलमूलंहृत्वामर्कटोभवतिस्त्रियंहृत्वाभल्लूकोभवतिपानार्थमुदकंहृत्वाचातकाख्यःपक्षीयानानिशकटादीनिहृत्वाउष्ट्रोभवति पशून्उक्तेतरगोभवति ६७ यद्वेति यत्किंचिदसारमपिपरद्रव्यमिच्छातोमानुषोऽपहृत्यपुरोडाशादिकंतु हविरहुतंभक्त्वातिर्यक्त्वंयातीति नर

छुच्छुंदरिःशुभान्गंधान्पत्रशाकंतुबर्हिणः श्वाविक्कृतान्नंविविधमकृतान्नंतुशल्यकः ६५ बकोभवतिहृत्वाग्निंगृहकारीह्युपस्करम् रक्तानिहृत्वावासांसिजायतेजीवजीवकः ६६ वृकोमृगेभंव्याघ्रोऽश्वंफलमूलंतुमर्कटः स्त्रीमृक्षःस्तोककोवारियानान्युष्ट्रःपशूनजः ६७ यद्वातद्वापरद्रव्यमपहृत्यबलान्नरः अवश्यंयातितिर्यक्त्वंजग्ध्वाचैवाहुतंहविः ६८ स्त्रियोप्येतेनकल्पेनहृत्वादोषमवाप्नुयुः एतेषामेवजंतूनांभार्यात्वमुपयांतिताः ६९ स्वेभ्यःस्वेभ्यस्तुकर्मभ्यश्च्युतावर्णाह्यनापदि पापान्संसृत्यसंसारान्प्रेष्यतांयांतिशत्रुषु ७० वांताश्युल्कामुखःप्रेतोविप्रोधर्मात्स्वकाच्च्युतः अमेध्यकुणपाशीचक्षत्रियःकटपूतनः ७१ मैत्राक्षज्योतिकःप्रेतोवैश्योभवतिपूयभुक् चैलाशकश्चभवतिशूद्रोधर्मात्स्वकाच्च्युतः ७२

ति ६८ स्त्रियोपीति स्त्रियप्येतेनप्रकारेणइच्छातःपरस्वमपहृत्यपापंप्राप्नुवंतितेनपापेनउक्तानांजंतूनांभार्यात्वंप्रतिपद्यंते एवन्निषिद्धाचरणफलान्यभिधाय अधुनाविहिताकरणफलविपाकमाह ६९ स्वेभ्यइति ब्राह्मणादयश्चत्वारोवर्णाआपदंविना पंचयज्ञादिकर्मत्यागिनोवक्ष्यमाणाकुत्सितायोनीःप्राप्यततोजन्मांतरेशत्रुदासत्वंप्राप्नुवंति ७० वांताशीति ब्राह्मणःस्वकर्मभ्रष्टश्छर्दितभक्उल्कामुखःप्रेतविशेषोजायते क्षत्रियःपुनर्नष्टकर्मापुरीषशवभोजीकटपूतनाख्यःप्रेतविशेषोभवति ७१ मैत्रेति वैश्योभ्रष्टकर्मामैत्राक्षज्योतिकना

मापूयभक्षः प्रेतोजन्मांतरेभवति मित्रदेवताकत्वान्मैत्रः पायुस्तदेवास्यंकर्मेंद्रियंतत्रज्योतिर्यस्यसमैत्राक्षज्योतिकः पृषोदरादित्वात् ज्योतिष. षकारलोपः शूद्रः पुनर्भ्रष्टकर्मा चैलाशकाख्यः प्रेतोभवति चेलंवस्त्रंतत्संबंधिनीं यूकामश्नातीति चैलाशकः गोविंदराजस्तु चेलाशकाख्यः कीटश्चैलइत्युच्यते तद्भक्षश्चसभवतीत्याह तदयुक्तं प्रेताख्यप्राणिविशेषप्रकरणात् ७२ यथेति यथायथाशब्दा दिविषयान्विषयलोलुपानितांतंसेवंतेतथा तथा विषयेषुतेषां प्रावीण्यंभवतीति ततः ७३ तइति तेऽल्पधियस्तेषान्निषिद्धविषयो पभोगानामभ्यासतारतम्यात्तासुतासु गर्हितगर्हिततरगर्हिततमासु तिर्य्यगादियोनिषु दुःखमनुभवंति ७४ तामिस्रादिष्विति सं प्राप्नुवंतिइतिपूर्वश्लोकस्थमिहोत्तरत्राऽनुवर्त्ततेतामिस्रादिषु चतुर्थाध्यायोक्तेषु घोरेषुनरकेषु दुःखानुभवंप्राप्नुवंति तथाऽसिपत्र-वनादीनिवधनच्छेदनात्मिकान्नरकान्प्राप्नुवंति ७५ विविधाइति विविधपीडनंकाकादिभिर्भक्षणंतथा तप्तवालुकादीन् कुंभीपाकां

यथायथानिषेवंतेविषयान्विषयात्मकाः तथातथाकुशलतातेषांतेषूपजायते ७३ तेऽभ्यासात्कर्मणांतेषांपापानामल्पबुद्धयः संप्राप्नुवंतिदुःखानितासुतास्विहयोनिषु ७४ तामिस्रादिषुचोग्रेषुनरकेषुविवर्त्तनम् असिपत्रवनादीनिबंधनच्छेदनानिच ७५ विविधाश्चैवसंपीडाः काकोलूकैश्चभक्षणम् करंभवालुकातापान्कुंभीपाकांश्चदारुणान् ७६ संभवांश्चवियोनीषुदुःखप्रायासुनित्यशः शीतातपाभिघातांश्चविविधानिभयानिच ७७ असकृद्गर्भवासेषुवासंजन्मचदारुणम् बंधनानिचकष्टानिपरप्रेष्यत्वमेवच ७८ बंधुप्रियवियोगांश्चसंवासंचैवदुर्ज्जनैः द्रव्यार्ज्जनंचनाशंचमित्रामित्रस्यचार्ज्जनम् ७९ जरांचैवाप्रतीकारांव्याधिभिश्चोपपीडनम् क्लेशांश्चविविधांस्तांस्तान्मृत्युमेवचदुर्ज्जयम् ८०

दींश्चनरकान् दारुणान्प्राप्नुवंति ७६ संभवांश्चेति संभवान्तिर्यगादिजातिषुनित्यंदुःखबहुलासूत्पत्तिंप्राप्नुवंतितत्र शीतातपादिपीडनादिनानाप्रकाराणिचप्राप्नुवंति ७७ असकृदिति पुनःपुनर्गर्भस्थानेषुवासः समुत्पत्तिंचयोनियंत्रादिभिर्दुःखावहांऽप्रसन्नाश्च शृंखलादिभिर्बंधनादिपीडामनुभवंतिपरदासत्वंचप्राप्नुवंति ७८ बंधुप्रियेति बांधवैः सुहृद्भिः सहवियोगान् दुर्जनैश्चसहएकत्रावस्थानंधनार्ज्जनप्रयासंधनविना-शंकष्टेनमित्रार्ज्जनंशत्रुप्रादुर्भावंप्राप्नुवंतिच ७९ जरामिति जरांचाविद्यमानप्रतीकारांव्याधिभिश्चोपपीडनंक्षुत्पिपासादिनाचनाना

र्भकारान्क्लेशान्मृत्युंचदुर्वारंप्रामुवंति ८० यादृशेनेति यथाविधेनसात्त्विकेनराजसेनतामसेनवाचेतसायत्कर्मस्नानदानयो
गायत्तुतिष्ठतितादृशेनैवशरीरेणसात्त्विकेनरजोधिकेनतमोधिकेनवातत्तत्स्नानादिफलमुपभुंक्ते ८१ एषइति एषयुष्माकंवि
हितप्रतिषिद्धानांकर्मणांसर्वःफलोदयउक्तःइदानींब्राह्मणस्यनिःश्रेयसामुपायंहितंकर्मानुष्ठानंइदंशृणुत ८२ वेदाभ्यासइ
ति उपनिषदादेर्वेदस्यग्रंथतोऽर्थतश्चआवर्त्तनंतपः कृच्छ्रादिज्ञानंब्रह्मविषयंइंद्रियजयोअविहितहिंसावर्ज्जनंगुरु
तत्सहकृत्संसाधनम् ८३ सर्वेषामिति सर्वेषामप्येतेषांवेदाभ्यासादीनांशुभकर्मणांमध्येकिंचित्कर्मातिशयेनमोक्षसाध स्या
दितिवितर्करूपीणांजिज्ञासाविशेषादुत्तरश्लोकेननिर्णयमाह ८४ सर्वेषामिति एषांवेदाभ्यासादीनांसर्वेषामपिमध्यउपनिष

यादृशेनतुभावेनयद्यत्कर्मनिषेवते तादृशेनशरीरेणतत्तत्फलमुपाश्नुते ८१ एषसर्वःसमुद्दिष्टः
कर्मणांवःफलोदयः नैःश्रेयसकरंकर्मविप्रस्येदन्निबोधत ८२ वेदाभ्यासस्तपोज्ञानमिंद्रियाणांचसं
यमः अहिंसागुरुसेवाचनिःश्रेयसकरंपरम् ८३ सर्वेषामपिचैतेषांशुभानामिहकर्मणाम् किंचित्श्रे
यस्करतरंकर्मोक्तंपुरुषंप्रति ८४ सर्वेषामपिचैतेषामात्मज्ञानंपरंस्मृतम् तद्ध्यग्र्यंसर्वविद्यानांप्राप्यते
ह्यमृतंततः ८५ षण्णामेषांतुसर्वेषांकर्मणांप्रेत्यचेहच श्रेयस्करतरंज्ञेयंसर्वदाकर्मवैदिकम् ८६

दुक्तपरमार्थज्ञानंमहत्श्रेष्ठंस्मृतंयस्मात्सर्वविद्यानांप्रधानम् अत्रैवहेतुमाहयतोमोक्षस्तस्मात्प्राप्यते ८५ षण्णामिति एषांपुनःष-
ण्णांपूर्वोक्तानांवेदाभ्यासादीनांकर्मणांमध्येवैदिकंकर्मपरमार्थज्ञानमैहिकामुष्मिकश्रेयस्करतरंज्ञातव्यंपूर्वश्लोकेमोक्षहेतुत्वमा
त्मज्ञानस्योक्तंइहतुऐहिकामुष्मिकश्रेयोंतरहेतुत्वमुच्यतेइत्यपौनरुक्त्यंतथाहिप्रतीकोपासनानांसंशयोदयंनामब्रह्मेत्युपास्ते-
यावन्नाम्नोगतंतत्रास्यकामचारोभवति गोविंदराजस्तुएषांपूर्वश्लोकोक्तानांवेदाभ्यासादीनांषण्णांकर्मणांमध्यात्स्मार्त्तकर्मापेक्ष
यावैदिकंकर्मसर्वदेहपरलोकेसातिशयंसातिशयेनकीर्त्तिस्वर्गनिःश्रेयःसाधनंज्ञेयमितिव्याख्यातवान् तदयुक्तंवेदाभ्यासादीनां
षण्णामपिप्रत्येकंश्रुतिविहितत्वात्तेषुमध्येस्मार्त्तापेक्षयाकिंचिदेवंकिंचिन्नेतिनसंभवतिततश्चकथंनिर्द्धारणेषष्ठी तस्माद्य

कैवच्याख्या इदानीमैहिकामुष्मिकश्रेयःसाधनत्वमेवात्मज्ञानस्यस्पष्टयति ८६ वैदिकेति वैदिकेपुनः कर्मयोगेपरमात्मोपा-
सनारूपेसर्वाण्येतानिपूर्वश्लोकोक्तानिऐहिकामुष्मिकश्रेयांसितस्मिंस्तस्मिन्उपासनाविधौक्रमशःसंभवंति अथवासर्वाण्येता-
नीतिवेदाभ्यासादीन्येवपरामृश्यंतेपरमात्मज्ञानेवेदाभ्यासादीनितमेतंवेदानुवचनेनविविदिषंतियज्ञेनदानेनतपसानाशकेने
तिश्रुतिविहितांगत्वेनांतर्भवंति ८७ सुखेति वैदिकंकर्मात्रज्योतिष्टोमादिप्रतीकोपासनादिचगृह्यतेस्वर्गादिसुखप्रापकंसं-
सारप्रवृत्तिहेतुत्वात्प्रवृत्ताख्यंवैदिकंकर्मतथानिःश्रेयसंमोक्षस्तदर्थंकर्मनैःश्रेयसिकंसंसारनिवृत्तिहेतुत्वात्निवृत्ताख्यमित्येवं
वैदिकंकर्मद्विप्रकारकंवेदितव्यंएतदेवस्पष्टयति ८८ इहेति इहकाम्यसाधनंवृष्टिहेतुकारीयागादिरत्रस्वर्गादिफलसाधनं-

वैदिकेकर्मयोगेतुसर्वाण्येतान्यशेषतः अंतर्भवंतिक्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ८७ सुखाभ्युद
यिकंचैवनैःश्रेयसिकमेवच प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकम् ८८ इहचामुत्रवाकाम्यंप्रवृत्तंकर्म
कीर्त्यते निष्कामंज्ञानपूर्वंतुनिवृत्तमुपदिश्यते ८९ प्रवृत्तंकर्मसंसेव्यदेवानामेतिसाम्यताम् निवृत्तं
सेवमानस्तुभूतान्यत्येतिपंचवै ९० सर्वभूतेषुचात्मानंसर्वभूतानिचात्मनि समपश्यन्नात्मयाजीस्वा
राज्यमधिगच्छति ९१

ज्योतिष्टोमादियत्कामतयाक्रियतेतत्संसारप्रवृत्तमित्युच्यतेदृष्टादृष्टफलकामनारहितंपु
नर्ब्रह्मज्ञानाभ्यासपूर्वकंसंसारनिवृत्तिहेतुत्वात्निवृत्तमित्युच्यते ८९ प्रवृत्तमिति प्रवृत्तकर्माभ्यासेनदेवसमानगतित्वंतत्फलं
कर्मणाप्राप्नोतिएतच्चप्रदर्शनार्थमन्यफलकेनकर्मणाप्रवृत्तेनफलांतरमपिप्राप्नोतिनिवृत्तकर्माभ्यासेनपुनः शरीरारंभकानि-
पंचभूतानिअतिक्रामतिमोक्षंप्राप्नोतीत्यर्थः ९० सर्वेति सर्वभूतेषुस्थावरजंगमात्मकेषुअहमेवात्मरूपेणास्मिसर्वाणिभूता
निपरमाणुपरिमाणसिद्धानिमय्येवपरमात्मन्यासनइतिसामान्येनयोयावज्जीवंब्रह्मार्पणन्यायेनज्योतिष्टोमादिकुर्वन्स्वेनरा
जतेप्रकाशतइतिस्वराट्ब्रह्मतस्यभावःस्वाराज्यंब्रह्मत्वंलभ्यतेमोक्षमाप्नोतीत्यर्थः तथाचश्रुतिःसर्वंखल्विदंब्रह्मयजनादिभिः
शांतउपासीत तथाचयजुर्वेदमंत्रः यस्तुसर्वाणिभूतानिआत्मन्येवानुपश्यति सर्वभूतेषुचात्मानंततोनविजुगुप्सते ९१ ६२

यथेति शास्त्रचोदितान्यपिअग्निहोत्रादीनिकर्माणिपरित्यज्यब्रह्मध्यानेंद्रियजयप्रणवोपनिषदादिवेदाभ्यासेषुब्राह्मणोयत्नंकुर्यात् एतच्चैषांमोक्षोपायांतरंगोपायत्वप्रदर्शनार्थंनत्वग्निहोत्रादिपरित्यागपरत्वमुक्तम् ९२ एतदिति एतदात्मज्ञानवेदाभ्यासादिद्विजातेर्जन्मफलत्वापादकत्वात्जन्मनःसाफल्यंविशेषेणब्राह्मणस्ययस्मादेतत्प्राप्यद्विजातिः कृतकृत्योभवतिनप्रकारांतरेण इदानींवेदादेवब्रह्मज्ञातव्यमितिप्रदर्शयितुंवेदप्रशंसामाह ९३ पितृदेवेति पितृदेवमनुष्याणांहव्यकव्यान्नदानेषुवेद एवचक्षुरिवचक्षुरनश्वरंतत्प्रमाणत्वादसन्निकृष्टफलकव्यदानादौप्रमाणांतरानवकाशात् अशक्यंचवेदशास्त्रंकर्त्तुमनेनापौरुषेयतोक्ता अप्रमेयंचमीमांसादिन्यायनिरपेक्षतया अनवगम्यमानतयाअप्रमेयमेवंव्यवस्था ततश्चमीमांसयाव्याकरणाद्यंगैश्चसर्वब्रह्मात्मकं

यथोक्तान्यपिकर्माणिपरिहायद्विजोत्तमः आत्मज्ञानेशमेचस्याद्वेदाभ्यासेचयत्नवान् ९२ एतद्धिजन्मसाफल्यंब्राह्मणस्यविशेषतः प्राप्यैतत्कृतकृत्योहिद्विजोभवतिनान्यथा ९३ पितृदेवमनुष्याणांवेदश्चक्षुःसनातनम् अशक्यंचाप्रमेयंचवेदशास्त्रमितिस्थितिः ९४ यावेदबाह्याःस्मृतयोयाश्चकाश्चकुदृष्टयः सर्वास्तानिष्फलाःप्रेत्यतमोनिष्ठाहिताःस्मृताः ९५ उत्पद्यंतेच्यवंतेचयान्यतोन्यानिकानिचित् तान्यर्वाक्कालिकतयानिष्फलान्यनृतानिच ९६ चातुर्वर्ण्यंत्रयोलोकाश्चत्वारश्चाश्रमाःपृथक् भूतंभव्यंभविष्यंचसर्ववेदात्प्रसिद्ध्यति ९७

वेदार्थंजानीयादितिव्यवस्थितम् ९४ यावेदबाह्याइति याःस्मृतयःवेदमूलानभवंतिदृष्टार्थवाक्यानिचैत्यवंदनात्स्वर्गोभवतीत्यादीनियानिचासत्तर्कमूलानिदेवताऽपूर्वादिनिराकरणात्मकानिवेदविरुद्धानिचार्वाकदर्शनानिसर्वाणिपरलोकेनिष्फलानि यस्मान्नरकफलानितानिमन्वादिभिःस्मृतानिएतदेवस्पष्टयति ९५ उत्पद्यंतइति यान्यतोवेदादन्यमूलानिचकानिचित्शास्त्राणिपौरुषेयत्वात्उत्पद्यंते एवमाशुविनश्यंतितानिचइदानींतनत्वान्निष्फलानिअसत्यरूपाणिच स्मृत्यादीनांतुवेदमूलत्वादेवप्रामाण्यम् ९६ चातुर्वर्ण्यमिति ब्राह्मणोऽस्यमुखमासीदित्यादिवेदादेवचातुर्वर्ण्यंप्रसिध्यतिब्राह्मणाभूतमातापितृजनितत्वमितितदुपजीवितयास्वर्गादिलोकोपिवेदादेवप्रसिद्धः एवंब्रह्मचर्याद्याश्रमा अपिचत्वारो

वेदमूलकत्वाद्वेदादेवप्रसिध्यंतिकिंबहुनायत्किंचिदतीतंवर्त्तमानंभविष्यंचसर्वमग्नौप्रास्ताहुतिःसम्यगित्यादिन्यायेनवेदादेवप्रसिध्यति ९७ शब्दइति यइहलोकेपरलोकेचशब्दादयोविषयाःप्रयुज्यंतेप्रसूयंतएतैरितिप्रसूतयःप्रसूतयश्चगुणाश्चेतिसत्त्वरजस्तमोरूपाःतन्निबंधनवैदिककर्महेतुत्वात्वेदादेवप्रसिध्यंति ९८ बिभर्त्तीति वेदशास्त्रंनित्यंसर्वभूतानिधारयति-तथाचहविरग्नौहूयतेसोग्निरादित्यमुपसर्पतिवेदःतत्सूर्योरश्मिभिर्वर्षतितेनान्नंभवतिअथेहभूतानामुत्पत्तिस्थितिश्चेति-हविर्जायतइतिब्राह्मणंतस्माद्वेदशास्त्रमस्यजंतोर्वैदिककर्माधिकारिपुरुषस्यप्रकृष्टंपुरुषार्थसाधनंजानंति ९९ सेनापत्यमिति सेनापत्यंराज्यंदंडप्रणेतृत्वंसर्वभूम्याधिपत्यादीन्येतत्सर्वंउक्तप्रयोजनंवेदात्मकशास्त्रज्ञएवार्हति १०० यथेति यथाद्द

शब्दस्पर्शश्चरूपंचरसोगंधश्चपंचमः वेदादेवप्रसूयंतेप्रसूतिगुणकर्मतः ९८ बिभर्त्तिसर्वभूतानिवेदशास्त्रंसनातनम् तस्मादेतत्परंमन्येयज्जंतोरस्यसाधनम् ९९ सेनापत्यंचराज्यंचदंडनेतृत्वमेवच सर्वलोकाधिपत्यंचवेदशास्त्रविदर्हति १०० यथाजातबलोवह्निर्दहत्यार्द्रानपिद्रुमान् तथादहतिवेदज्ञःकर्मजंदोषमात्मनः १०१ वेदशास्त्रार्थतत्त्वज्ञोयत्रतत्राश्रमेवसन् इहैवलोकेतिष्ठन्सब्रह्मभूयायकल्पते १०२ अज्ञेभ्योग्रंथिनःश्रेष्ठाग्रंथिभ्योधारिणोवराः धारिभ्योज्ञानिनःश्रेष्ठाज्ञानिभ्योव्यवसायिनः १०३ तपोविद्याचविप्रस्यनिःश्रेयसकरंपरम् तपसाकिल्बिषंहंतिविद्ययाऽमृतमश्नुते १०४

ह्योग्निरार्द्रानपिद्रुमान्दहत्येवंग्रंथतोऽर्थतश्चवेदज्ञःप्रतिषिद्धाद्याचरणादिकर्मजनितंपापमात्मनोनाशयति एवंचनकेवलंस्वर्गापवर्गादिहेतुःकिंतुनिवृत्तिहेतुरितिदर्शितः १०१ वेदशास्त्रार्थेति यस्तत्त्वतोवेदंतदर्थंचकर्मवेदात्मकंजानातिसनित्यनैमित्तिककर्मानुगृहीतब्रह्मज्ञानेनब्रह्मचर्याद्यन्यभावस्थितोऽस्मिन्नेवलोकेतिष्ठन्ब्रह्मत्वायकल्पते १०२ अज्ञेभ्यइति उभयोःप्रशस्यत्वेसतिअन्यतरातिशयविवक्षायांश्रेष्ठइतीष्ठनोविधानादीषदध्ययनाअज्ञाःतेभ्योग्रंथाध्येतारःश्रेष्ठाःतेभ्योऽधीतग्रंथधारणसमर्थाःश्रेष्ठाःतेनग्रंथिनःपठितविस्मृतग्रंथाबोद्धव्याः अर्थविद्योऽ-

धीतग्रंथार्थज्ञाः प्रकृष्टाः तेभ्योऽनुष्ठातारः १०३ तपइति तपःस्वधर्मवृत्तित्वमितितावद्दर्शनात् आश्रमविहितंकर्मआत्मज्ञानंचब्राह्मणस्यमोक्षसाधनंतत्रतपसोऽवांतरव्यापारमाह तपसापापमपहंतिब्रह्मज्ञानेनमोक्षमाप्नोति तथाचश्रुतिः विद्यांचाविद्यांचयस्तद्वेदोभयंसहअविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुते विद्यातोऽन्यदविद्याकर्ममृत्युदुःखसाधनत्वान्मृत्युः पापमुच्यतेअर्थएवायंमनुनाव्याख्यायोक्तः १०४ प्रत्यक्षमिति धर्मस्यतत्त्वावबोधमिच्छताप्रत्यक्षमनुमानंचधर्मसाधनभूतद्रव्यगुणजातितत्त्वज्ञानाययथाशास्त्रंचवेदमूलंस्मृत्यादिरूपनानाप्रकारधर्मस्वरूपविज्ञानायसम्यग्विदितंकर्त्तव्यंतदेवचप्रमाणत्रयंमनोरभिमतंउपमानार्थापत्त्यादेश्चानुमानांतर्भावः १०५ आर्षमिति ऋषिदृष्टत्वात् आर्षवेदंधर्मोपदेशंचतन्मूलस्मृ

प्रत्यक्षंचानुमानंचशास्त्रंचविविधागमम् त्रयंसुविदितंकार्यंधर्मशुद्धिमभीप्सता १०५ आर्षंधर्मोपदेशंचवेदशास्त्राऽविरोधिना यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरः १०६ नैःश्रेयसमिदंकर्मयथोदितमशेषतः मानवस्यास्यशास्त्रस्यरहस्यमुपदिश्यते १०७ अनाम्नातेषुधर्मेषुकथंस्यादितिचेद्भवेत् यंशिष्टाब्राह्मणाब्रूयुःसधर्मःस्यादशंकितः १०८ धर्मेणाधिगतोयैस्तुवेदःसपरिबृंहणः तेशिष्टाब्राह्मणाज्ञेयाःश्रुतिप्रत्यक्षहेतवः १०९

त्यादिकंयस्तदविरुद्धेनमीमांसादिन्यायेनविचारयतिसधर्मंजानातिनत्वमीमांसानभिज्ञः धर्मेकरणंवेदोमीमांसाचेतिकर्त्तव्यतास्थानीया तदुक्तंभट्टवार्त्तिककृता धर्मेप्रमीयमाणेहिवेदेनकरणात्मनाइतिकर्त्तव्यताभागंमीमांसापूरयिष्यति १०६ नैःश्रेयसमिति एतन्निःश्रेयससाधनंकर्मनिःशेषेणयथावदुदितम् अतऊर्ध्वमस्यमानवशास्त्रस्यरहस्यंगोपनीयमिदंवक्ष्यमाणंशृणुत १०७ अनाम्नातेष्विति अस्यशास्त्रस्यासमस्तधर्माभिधायकत्वंबोधयति सामान्यविधिप्राप्तेषुविशेषेणानुपदिष्टेषुकथंकर्त्तव्यंस्यादितियदिसंशयोभवेत्तदा यंधर्मंवक्ष्यमाणलक्षणाः शिष्टाब्राह्मणाब्रूयुःसतत्रनिश्चितोधर्मःस्यात १०८ धर्मेणेति ब्रह्मचर्याद्युक्तधर्मेणयैरंगमीमांसाधर्मशास्त्रपुराणाद्युपबृंहितो

वेदोऽधिगतः ते ब्राह्मणाः श्रुतेः प्रत्यक्षीकरणहेतवो ये श्रुतिं प्रविलाप्य तदर्थमुपादिशंति ते शिष्टा विज्ञेयाः १०९ दशेति यदि बहवः
संतोऽवहिता न भवंति तदा दशावरा त्र्यवरा च वक्ष्यमाणलक्षणा यस्याः सा परिषत् तदभावे त्रयोऽवरा यस्याः सा वा सदाचारा यं ध
र्मं निश्चिनुयात् तं धर्मत्वेन स्वीकुर्यात् न विसंवदेत् ११० त्रैविद्य इति वेदत्रयसंबंधशाखात्रयाध्येतारः श्रुतिस्मृत्यविरुद्धन्यायशा
स्त्रज्ञो मीमांसात्मकतर्कवित् निरुक्तज्ञो मानवादिधर्मशास्त्रवेदी ब्रह्मचारिगृहस्थवानप्रस्था इत्येषा दशावरा परिषत् स्यात् १११ ऋ
ग्वेदविदिति ऋग्यजुःसामवेदशाखानां येऽध्येतारः तदर्थज्ञाश्च त्रयः सा धर्मसंदेहनिरासार्थं त्र्यवरा परिषद् बोद्धव्या तदभावे ११२
एकोपीति एकोपि वेदार्थधर्मज्ञो यं धर्मं निश्चिनुयात् प्रकृष्टो धर्मः स बोद्धव्यो न वेदानभिज्ञानां दशभिः सहस्रैरप्युक्तः वेदवित्श

दशावरा वा परिषद्यं धर्मं परिकल्पयेत् त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत् ११० त्रैविद्यो हेतुक
स्तर्की नैरुक्तो धर्मपाठकः त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा १११ ऋग्वेदविद्यजुर्विच्च सामवेद
विदेव च त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ११२ एकोपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः स विज्ञेयः
परो धर्मो नाज्ञानामुदितोऽयुतैः ११३ अव्रतानाममंत्राणां जातिमात्रोपजीविनाम् सहस्रशः समेतानां परिषत्त्वं न विद्यते ११४

द्धोऽयं वेदार्थधर्मज्ञपरः एतच्च श्रेष्ठोपलक्षणम् स्मृतिपुराणमीमांसान्यायशास्त्रज्ञोपि गुरुपरंपरोप
देशाविद्यापि तथा केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः युक्तिहीनविचारे तु धर्महानिः प्रजायते तेन बहुस्मृतिज्ञोपि यदि सम्य
क् प्रायश्चित्तादि धर्मं जानाति तदा तेनाप्येकेन धर्म उक्तः प्रकृष्टो धर्मो ज्ञेयः अत एव यमः एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्मपाठकाः स
धर्म इति विज्ञेयो नेतरेषां सहस्रशः ११३ अव्रतानामिति सावित्र्यादिब्रह्मचारिव्रतरहितानां मंत्रवेदाध्ययनरहितानां ब्राह्मणजाति

मात्रधारिणांबहूनामपिमिलितानांपरिषत्त्वंनास्ति धर्मनिर्णयसामर्थ्याभावात् ११४ यंवदंतीति तमोगुणबहुलांमूर्खाः धर्मप्रमाणवेदार्थानभिज्ञाअतएवप्रश्नविषयधर्माविदः प्रायश्चित्तादिधर्मयंपुरुषंप्रत्युपदिशंतितदीयंपापंशतगुणंभूत्वावा चकान्बहून्भजते ११५ एतद्वइति एतन्निःश्रेयससाधकंप्रकृष्टंधर्मादिकंसर्वंयुष्माकमभिहितंएतदनुतिष्ठन्ब्राह्मणादिःपर मांगतिंस्वर्गापवर्गरूपांप्राप्नोति ११६ एवमिति सभगवान्ऐश्वर्यादिसंयुक्तोद्योतनाद्देवोमनुरुक्तमकारेणइदंसर्वधर्मस्यपरमा र्थंशुश्रूषुशिष्येभ्यः अगोपनीयंलोकहितेच्छयाममेदंसर्वमुक्तवानितिभृगुर्महर्षीनाह एवमुपसंहृत्यमहर्षीणांहितायउक्तम पिआत्मज्ञानंप्रकृष्टमोक्षोपकारकतयापृथक्कृत्याह ११७ सर्वमिति सद्भावमसद्भावंचैवंसर्वंब्राह्मणोजानन्ब्रह्मस्वरूपमात्म

यंवदंतितमोभूतामूर्खाधर्ममतद्विदः तत्पापंशतधाभूत्वातद्वक्तॄननुगच्छति ११५ एतद्वोऽभिहितंस र्वंनिःश्रेयसकरंपरम् अस्मादप्रच्युतोविप्रःप्राप्नोतिपरमांगतिम् ११६ एवंसभगवान्देवोलोकानां हितकाम्यया धर्मस्यपरमंगुह्यंममेदंसर्वमुक्तवान् ११७ सर्वमात्मनिसंपश्येत्सच्चासच्चसमाहि तः सर्वंह्यात्मनिसंपश्यन्नाधर्मेकुरुतेमनः ११८ आत्मैवदेवताःसर्वाःसर्वमात्मन्यवस्थितम् आ त्माहिजनयत्येषांकर्मयोगंशरीरिणाम् ११९

न्युपस्थितंतदात्मकमनन्यमनाध्यानप्रकर्षेणसाक्षात्कुर्यात् सर्वमात्मत्वेनपश्यन्रागद्वेषाभावात् अधर्मेमनोनकुरुते एतदेवस्पष्टयति ११८ आत्मैवेति इंद्राद्याःसर्वदेवताःपरमात्मै व सर्वात्मत्वात्परमात्मनः सर्वंजगदात्मन्येवावस्थितंपरमात्मपरिणामत्वात् हिरवधारणार्थे परमात्मैवैषांक्षेत्रज्ञादीनांकर्म संबंधंजनयति तथाचश्रुतिः एषह्येवसाधुकर्मकारयतियमूर्ध्वंनिनीषति एषह्येवासाधुकर्मकारयतियमधोनिनीषतीति इ दानींवक्ष्यमाणब्रह्मध्यानविशेषोपयोगितयादैहिकाकाशादिषुवाय्वाकाशादीनांलयमाह ११९ खमिति मनसीति बाह्या काशमुदराद्यवच्छिन्नशरीराकाशेषुलीनमेकत्वेनधारयेत् तथाचेष्टास्पर्शकारणभूतदैहिकवायौबाह्यवायुंऔदर्यंचाक्षुषतेजस

रग्निसूर्ययोः प्रकृष्टंतेजः दैहिकास्त्वऽप्रकबाह्या अपः बाह्याः पृथिव्यादयः शरीरपार्थिवभागेषु मनसिचंद्रंश्रोत्रेदिशः पादेंद्रिये-
विष्णुम् बलेहरंवागिंद्रियेअग्निम् पाण्यिंद्रियेमित्रमुपस्थेंद्रियेप्रजापतिंलीनमेकत्वेन भावयेत् एवमाध्यात्मिकभूतादिकंलीन
मेकत्वेन भावयित्वायोयमग्न्यादीनां दैहिकादिनियमोयच्च कर्मणां फलंप्रतिनियतं तत्सर्वं परमात्मानं तथाचैतस्यच क्षरस्यप्रशासने
गीस्तर्पयति तथाभयादस्याग्निस्तपतिभयात्तपतिसूर्यः भयादिंद्रश्चवायुश्चमृत्युर्धावतिपंचमइति १२० १२१ प्रशासितार-
मिति प्रशासितारंनियंतारंब्रह्मादिस्तंबपर्यंतस्यचेतनाचेतनस्यजातेः योयमग्न्यादीनामौष्ण्यादिनियमोयश्चादित्यादीनांभ्र
मणादिनियमोयश्चकर्मणांफलंप्रतिनियतमेतत्सर्वंपरमात्माधीनंतथाचैतस्यवाऽक्षरस्यप्रशासनेऽगार्ग्यादुपनिषदः तथाभयाद-
स्याग्निस्तपतिभयात्तपतिसूर्यः भयादिंद्रश्चवायुश्चमृत्युर्धावतिपंचमइति तथाअणोरणीयांसंसर्वात्मत्वात्तथाच श्रुतिः बाला

खंसन्निवेशयेत्स्वेषुचेष्टनस्पर्शनेऽनिलम् पक्तिदृष्ट्योः परंतेजः स्नेहेऽपोगांचमूर्त्तिषु १२० मनसींदुंदिशः श्रोत्रेक्रांतेविष्णुंबलेहरम् वाच्यग्निंमित्रमुत्सर्गेप्रजनेचप्रजापतिम् १२१ प्रशासितारंसर्वेषामणीयांसमणोरपि रुक्माभंस्वप्नधीगम्यंविद्यात्तंपुरुषंपरम् १२२ एतमेकेवदंत्यग्निंमनुमन्येप्रजापतिम् इंद्रमेकेपरेप्राणमपरेब्रह्मशाश्वतम् १२३

अशतभागस्यशतधाकल्पितस्यच भागोजीवोतिविज्ञेयः सचा
नंत्यायकल्पते रुक्माभंयद्यप्यशब्दमस्पर्शमरूपमव्ययमित्याद्युपनिषदारूपंपरमात्मनोनिषिद्धम् तथाप्युपासनाविशेषेषु
-हस्रकवर्णाभम् अतएवयएषोंऽतरादित्येहिरण्मयइत्यादिछांदोग्योपनिषत्स्वप्नधीगम्यंदृष्टांतोयम् स्वप्नधीसदृशज्ञानग्राह्यं
यथास्वप्नधीः चक्षुरादिबाह्येंद्रियोपरमेमनोमात्रेणजन्यतएवमात्मधीरपि अतएवव्यासः नैवासौचक्षुषाग्राह्योनचशिष्टैरि
द्रियैः मनसातुप्रसन्नेनगृह्यतेसूक्ष्मदर्शिभिः एवंविधंपरात्मानमनुचिंतयेत् १२२ एतमिति एतंचपरमात्मानंअग्नित्वेन
याज्ञिकाउपासतेतथातमेकमग्निंइत्यादिधर्मंउपासते अन्येपुनः स्रष्टृत्वात्स्रष्टाख्यप्रजापतिरूपतयाउपासते एकेपुनरैश्व

र्य्ययोगादिंद्ररूपतयाउपासते अपरेपुनःप्राणत्वेनोपासतेसर्वाणिभूरादिइमानिभूतानिप्राणमेवाभिसंविशंतिप्राणमूर्जितइ
त्यादिश्रुतिदर्शनात् अपरेपुनरपगतप्रपंचात्मकंसर्वदा आनंदस्वरूपंपरमात्मानमुपासतेमूर्त्तामूर्त्तस्वरूपेचब्रह्मणिसर्वाएवो
पासनाश्रुतिप्रसिद्धाभवंति १२३ एषइति एषआत्मासर्वान्प्राणिनःपंचभिःपृथिव्यादिभिर्महाभूतैःशरीरारंभकैःपरिगृह्यपू
र्वजन्मार्जितकर्मापेक्षयाउपस्थितिविनाशैरथादिचक्रवत्असकृदुपावर्त्तमानैःआमोक्षात्संसारिणःकुर्वंति इदानींमोक्षत्वेनो-
क्तसर्वधर्मश्रेष्ठतयासर्वत्रपरमात्मदर्शनमनुष्ठेयत्वेनोपसंहरति १२४ एवंयःसर्वभूतेष्विति एवंसर्वभूतेषुचात्मानमित्याद्युक्त
प्रकारेणयःसर्वेषुभूतेषु अवस्थितमात्मानमात्मनापश्यतिसब्रह्मसाक्षात्कारात्परंश्रेष्ठंपदंस्थानंब्रह्मप्राप्नोतितत्रात्यंतंलीयतेमु

एषसर्वाणिभूतानिपंचभिर्व्याप्यमूर्त्तिभिः जन्मवृद्धिक्षयैर्नित्यंसंसारयतिचक्रवत् १२४ एवंयः
सर्वभूतेषुपश्यत्यात्मानमात्मना ससर्वसमतामेत्यब्रह्माभ्येतिपरंपदम् १२५ इत्येतन्मानवंशास्त्रं
भृगुप्रोक्तंपठन्द्विजः भवत्याचारवान्नित्यंयथेष्टांप्राप्नुयाद्गतिम् १२६ इतिमानवेध
र्मशास्त्रेभृगुप्रोक्तायांसंहितायांद्वादशोऽध्यायः १२ समाप्तेयंमनुसंहिता ॐ ॐ ॐ

क्तोभवतीत्यर्थः १२५ इत्येतदिति समाप्त्यर्थइतिशब्दः एतत्स्मृतिशास्त्रंभृगुणाप्रकर्षेणोक्तंद्विजातिःपठन्विहितानुष्ठान
निषिद्धवर्जनात्सदाचारवान् भवतितयाऽपेक्षितांचस्वर्गापवर्गादिरूपांगतिंप्राप्नुयादिति १२६ सारासारवचःप्रपंचनविधौमे-
धातिथेश्चातुरीस्तोकंवस्तुनिगूढमल्पवचनाद्गोविंदराजोजगौ ग्रंथेऽस्मिंधरणीधरस्यबहुशःस्वातंत्र्यमेतावतास्पष्टंमानवमर्थ
तत्त्वमखिलंवक्तुंकृतोयंश्रमः १ प्रायोमुनिभिर्विरतंकथयत्येषामनुस्मृतेरर्थम् दशभिर्ग्रंथसहस्रैःसप्तदशयुताकृतावृत्तिः २
दनावासीयदिवाकरात्मजश्रीमत्कुल्लूकभट्टविरचितायांमन्वर्थमुक्तावल्यांमनुवृत्तौद्वादशोऽध्यायःसमाप्तः इतिवारेंद्रि
भट्टविरचितामन्वर्थमुक्तावलीसमाप्ता ॐ ॐ श्रीकृष्णार्पणमस्तु श्रीरस्तु शुभमस्तु ॐ ॐ ॐ इतिश्रीकुल्लूक

श्रीभुलेस्वरजीकेनजीकश्रीमहाराजरणछोडजीकामंदरमैंमहंतमथुरादासजीरामदासजीजीसकीपोथीसूं
छापखानामैंछपाई.

हेंपुस्तक बापूसदाशिवशेटहेगिष्टेशेट्येश्रीवर्धनकरयांणीं आपले छापखान्यांत छापिलें मुकाम मुंबई.
शके १७८० कालयुक्तनामसंवत्सरेवैशाखेमासेशुक्लपक्षेतृतीयांतिथौभृगुवासरेतद्दिनेसमाप्तः ७

इतिसटीकमनुस्मृतिःसमाप्ता.